प्रवेश सं० १८२९८ विषयः पुराणेतिहासम् क्रम सं० ——

नाम भागवतं सटीकम् ( तृ० स्कन्धः ) ग्रन्थकार टी. वल्लभदीक्षितः

पत्र सं० १ - ४०७ + १ अतिरिक्तपत्रम्

श्लोक सं० —— अक्षर सं० ( पंक्तौ ) ५२ पंक्ति सं० (पृष्ठे) १३

आकार १३.६½" × ७.२" लिपिः दे. ना. आधारः का.

वि० विवरणम् पू० — सं. १८५८ 14292

पी० एस० यू० पी०—७७ एस० मो० ई०—१९५९—५०,०००

ना० ३८९३

Indira Gandhi National Centre for the Arts

त.सु.
१

श्रीगोपीजनवल्लभायनमः अधिकारिषुसांगं
हिश्रवणंसुनिरूपितं स्कंधद्वयेनशेषेषुक्रियतेवि
षयाभिधा १ त्रयस्त्रिंशद्ध्याध्यायास्तृतीयेसर्गव
र्णने स्वाभिप्रेतेसविशेषेहरेर्माहात्म्यसूचके २
लोकेसर्गविसर्गौहियादृशौनेहतौमतौ किंतुतौ
लीलयावाच्यौतेनस्कंधद्वयंततं ३ भूतमात्रेंद्रि
यधियांजन्मसर्गउदाहृतः ब्रह्मणोगुणवैषम्या
द्विसर्गसलक्षणं ४ अत्राद्योद्विविधोप्यस्ति
विद छिनइतिस्फुटः ब्रह्मतोजायतेसर्गोब्रह्मा

एम०
१

निमित्तसप्तमीयथा
मेसंबध्यतेसर्वत्र१

स्ष्टा१

सविशेषः

र्थक्रियतेपरः ५ अतोत्रद्विविधःसर्गःश्रुतिसांख्यानुसारतः भूतमात्रेंद्रियधियःप्रथमेत्रिविधामताः ६ अधिकारेहरेःका
र्येसत्त्वादिगुणभेदतः अतश्चतुर्थमुत्पत्तौद्वादशाध्यायवर्णनं ७ ततोत्रयुक्तरूपस्यब्रह्मणोविनिरूपणं गुणवैषम्यक
र्येनषडध्यायानिरूप्यते ८ कर्मादिमार्गावेदोक्ताःफलतस्तेयदिस्थिरः सर्गोत्रनैवजायेतततस्तन्नाशउच्यते ९ लो
भेनापिचभक्तोर्हिधर्मज्ञानैश्वरैःकृताः॥ततोगुणानांवैषम्यंतमःसत्त्वंरजस्ततः १० एवमेकोनविंशत्याहरिकर्तृकईरितः
॥चतुर्दशभिरध्यायैर्हरयेसर्गउच्यते ११ गुणवैषम्यमेकेनभगवद्योगसिद्धये भूतमात्रेंद्रियधियांजन्मभोगायदेहतः
१२ चतुर्भिरुच्यतेध्यायैर्नवभिश्चगुणास्त्रयः यादृशैर्भगवद्योगस्तेषांसर्गोनिरूप्यते १३ कथापांत्वधिकारोत्रचतुर्भिः
करणंपरैः॥सर्गस्यसविभूतेश्चसर्वत्रैवानुवर्णनं १४ उत्तमेत्वधिकारेतुलीलामात्रंफलायवै॥किंपुनर्दृशधर्मलीलेत्येवंवै
दुरिकीकथा १५ तत्राधिकारेप्रथमेदेहवैशिष्ट्यलक्षणं भूतानांसंस्कृतानांहित्रेधासर्गोनिरूप्यते १६ तीर्थसंगगुण
स्यत्यापंचधावानिरूप्यते तीर्थद्वयेनहरिणाभक्तेस्तत्कथयापिच १७ अस्मिन्भागवतेशास्त्रेपूर्वदेहस्यनाशनं नापे
क्षतेयतःसर्वेभक्तिमार्गाधिकारिणः १८ अथव्याख्या एवंपूर्वाध्यायांतेतद्बोभिधमस्येश्वरणतेतुक्तंमुक्तोपिसर्गेविदुरक
थेवयुक्तेतितत्कथाक्षेपणार्थंविदुरेणैवंप्रश्नःकृतइत्याहश्लोकद्वयेन॥एवमेतत्पुराप्रष्टइति॥यद्बहवःप्रश्नाःकृताःप्र
वपक्षपुरःसरं॥एतत्सर्वंअग्रेवक्ष्यमाणंएवमेवविदुरेणपृष्टोमैत्रेयआहेतिनोच्यते नहिसर्वेपदार्थाःपृष्टाःवक्तव्याःयदेव
तस्योपकारिभवतितदेववक्तव्यमितिभावः॥कियतीभगवत्कथांश्रुत्वातस्यांहृदयंगतायांतद्दार्ढ्यार्थंविशेषंपृष्टवतिसर्वोपीति
कार्यसिद्धिःश्रोतुर्निरूप्यते अन्यथाश्रुतिजस्यशंकयानवक्तव्यंस्मात् भगवत्वमत्रशास्त्रेद्विविधंनित्यंकार्यंच तद्भगव
त्सिद्धिं तस्मादविषयेषुकार्यं॥तस्याधिकारार्थउपदेशादिषुगुरुत्वज्ञानित्वादिसिद्ध ॥ ॥

Indira Gandhi National
Centre for the Arts

मात्रा।मातृपुत्रक्षत्तावनेनाँशालक्षरूपं२

र्थमिहोच्यते अतो मैत्रेयस्यापि प्रमेयसंचारणसामर्थ्यार्थं सर्वसंदेहवारणार्थं च भगवत्त्वं निरूप्यते मित्रायाः पुत्र इति जन्मत एव तस्य सर्वोपका
तमु·१ २ रित्वं सूचितं अग्रे भगवच्छब्दाच्छन्नतयाहूयमानं किलेति प्रसिद्धिरुभयत्र भगवत्त्वे प्रश्ने च अन्यथा तस्य तदन्वयप्रवेशाभावात्कथनमयुक्तं स्या
त क्षत्ता नाम अन्तःपुराध्यक्षः सर्वथा जितेन्द्रियः तादृशाभावेन पुंसकोपि क्रियते अतो विदुरस्य जितेन्द्रियत्वं च वक्तुं क्षत्तृत्वमाह क्षत्त्रेति॥ अध्य· ३ः३ः
वनं प्रविष्टेनेति तादृशस्य सर्वपरित्यागपूर्वकवनस्थिति· प्रश्नाधिकारे निरूपित· वनस्यैवेप्सितत्वात्कर्मत्वं प्रकर्षः तत्रैव देहत्यागवि
२ गृहस्य वक्तृयात्याज्यस्योत्कृष्टत्वं अधिकारसूचकमिति तदाह स्वगृहमृद्धिमदिति अनन्याधीनत्वं सर्वसंपत्तिश्च उद्वेगाभावाय वित्तोद्वेगेन यत्कि
पतेकर्तव्यत्वसहितेनापि न तत्फलावेति १ ननु ज्ञानमार्ग एव परित्यागो गृहस्य तद्विरोधित्वात् भक्तिमार्गे तु गृहस्योत्कृष्टत्वकथनात् उद्दे

किल १४ श्रीशुक उ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्॥ क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् १

यद्वा अयं मन्त्रकृद्वो भगवानखिलेश्वरः पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतं २ ॥

गादेव तस्य गमनमाशंक्य निवारयति यद्वा अयमिति॥ यद्गृहं भगवता आत्मसात्कृतं भगवान्विदुरगृहं स्वगृहं लोकप्रतीत्या मन्यते नके
वलमभिमतिमात्रं किंतु व्यवहारेपि तत्र भगवदीय एवेत्याह॥ प्रविवेशेति हेत्वंतराणि निवारयति पौरवेन्द्रगृहं हित्वेति दुःशासनगृ
हं भगवत्त्विष्यर्थं इन्द्रगृहाद्युत्तमं तैः प्रार्थ्यमानमपि हित्वा उचितं च दुःशासनगृहे गंतुं मंत्रार्थमागतस्य तत्रापि भक्तानां कार्यसाध
कस्य तत्रापि भगवतः सर्वोत्कृष्टपूर्णगुणवतः उत्कृष्ट एव स्थाने स्थातुमुचितं किंच॥ अभक्तत्वदैन्यादिधर्मा न शंकनीयाः यतो य एम०
मखिलेश्वरः॥ सर्वस्यापि स्वामी सर्वनियंता अतो यथा भगवद्गृहे देवालयादौ स्थितिस्तु चिता तथा तस्य स्वगृहेपि तथापि गृहमपि २
ति त्यक्तव्यमेव गृहस्थितेरुत्कृष्टत्वं न भगवदीयत्वमात्रेण किंतु भगवता सह स्थित्या भगवत्कार्यार्थं वा अन्यथा न स्यात् अमिति
स्थितिः २ ॥

कुत्रकेोथारवेत्स्यपितिवत् एव मेतत्पुरा पृष्टो मैत्रेयः क्षत्त्रा वनं प्रविष्टेनेत्यादीनां २=

प्रश्ने कृते तूत्तरं देयं न त्वन्यस्य वचनं तत्र वक्तव्यमित्याशंक्य तत्रत्यो देशकालावुत्कृष्टौ भविष्यत इति तौ पृच्छति कुत्र क्षत्तुरिति॥
अनुवादे ह्युक्तिपदानां कीर्तनं तदुक्तार्थपरिज्ञानबोधकं॥ प्रश्ने हि संगमोपेक्षितो महतां संगनिमित्तो देशः उत्कृष्ट एव भवती
ति आससंगम इति समागम इति पाठे असीत्यादिप्रयोगः सिद्ध एव॥ कदा वेति कालस्यानादरणीयत्वं॥ सह संवाद इति साक्षात्॥
राज्ञा बहु दृष्टमिति प्रश्नक्रमेणैवोत्तरं वक्तव्यमित्याशंक्य निवारयति एतद्वर्णयेति॥ नइत्यस्य भूयउपकारित्वात् प्रभो इति
सामर्थ्यं पूर्वोत्तरमत्रैव संक्रामयितुं अनेनैव वा तत्संदेहनिहनिवारणं कर्तुं सूचितं ३ एवमपि तयापि मुख्यतयैतच्छ्रवणे हेतु

राजोवाच कुत्र क्षत्तुर्भगवता मैत्रेयेणास संगमः॥ कदा वा सह संवादः एतद्वर्णय नः प्रभो ३

न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः॥ तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ४ ॥

माह न ह्यल्पार्थोदय इति। खंडशः पदार्थश्रवणं खंडमेव फलं जनयति इदं तु खंडमपि अखंडमेव फलं जनयिष्यतीति सं
बंधिवैशिष्ट्यात् देशकालपात्रविशेषेण जलादिदानवत्॥ तदाह अल्पस्यार्थस्य उदयो यत्र तादृशः स प्रश्नो न भवतीति हीत्य
नेन तादृशस्य वैयर्थ्यापत्तिरिति युक्तिरुक्ता॥ संबंधिनो वैशिष्ट्यमाह विदुरस्यामलात्मन इति॥ परमनीतिज्ञस्य निर्मलांतःकर
णस्येत्यर्थः॥ वयं तु नीतिज्ञाः शापादिना च न शुद्धान्तःकरणाः॥ अतो यत्किंचित्पृच्छाम इति भावः॥ ततोपि तद्गुरुरुत्कृष्ट इत्याह॥
दरीयसीति॥ साधुवादोपबृंहित इति। अंतरुत्साहो हेतुरुक्तः फलावश्यंभावाय॥ अत एव तेन उपबृंहितः अधिकः पुष्टः कृ
त इति॥ अत्र देशकालपरित्यागहेतवस्त्रयः पृष्टाः ४ ॥

Indira Gandhi National Centre for the Arts

त्टसु·१ तत्रप्राथमिकत्वात्परित्यागहेतुर्वक्तव्यः सचसाक्षाद्भगवत्कथारूपोनभवतीतिशुकेनावर्ण्णनीयत्वमाशंक्यतादृश
३ वर्ण्णनायांहेतुमाहसूतः सएवमिति ऋषयोहिमंत्रद्रष्टारः येनमंत्रेणभगवद्दंगानांमध्येउत्कृष्टेनशीघ्रमस्यदूरदर्यंशु
द्धंभविष्यतीतितदुपकारार्थंशुकप्रवृत्तिंबोधयति वर्यपदेनस्वहानिर्निवारिता अयमितिपुरःस्थितत्वेनतस्यभगवत्तं

सूतउवाच सएवमृषिवर्योयंपृष्टोराज्ञापरीक्षिता
प्रत्याहतंसुबहुवित्प्रीतात्माश्रूयतामिति ५

फलंजातमितिपरोपकारनिरतत्वंसूचितं॥राज्ञेतिलोकेतत्प्रश्नोत्तरमावश्यकं परीक्षितेतितत्स्यबीजसंस्कारःसू एम०
चितः अतइदंतदुपकारीतिप्रत्याह सर्वतत्वपरिज्ञानार्थंसुबहुविदिति मुख्यभगवद्भक्तत्वेनोपचितत्वात्प्री ३
तात्मा अत्रापिशंकांतरंनकर्त्तव्यमितिश्रूयतामित्याह ५ ॥

अस्यपरित्यागोभगवन्निमित्तंभगवतैवकृतइतिनिरूपयितुंभगवत्पदपातिनोभगवद्विमुखैःसहस्थितिरनुचितेतिवक्तुं २८श्लकांविनियोगउच्यते२=
कौरवाणांभगवद्विमुखत्वमाहचतुर्भिः॥यदात्विति॥विदुरस्यगृहत्यागेदृशभिर्हेतुरुच्यते॥चतुर्भिरपराधोक्तिरेकेन
६ हिसमागमः त्रिभिर्मंत्रोक्तिरपरेनिषेधकनिवारणे १ धर्मशास्त्रविरुद्धंलोकशास्त्रविरुद्धंनीतिविरुद्धमीश्वरवचनो
ल्लंघनमित्यपराधाः यद्यपिधृतराष्ट्रेणैवनकृतंतथाप्यप्रतिषिद्धमनुमतंभवतीतिन्यायात्पराधित्वंभवति प्रयोजक
त्वात्सएवकथ्यते नैमित्तिकत्वाच्चनिमित्तपरित्यागकथनंनदोषाय अत्रमुख्यापराधःभगवद्वाक्योल्लंघनंतत्स्वभाव
तोजीवस्यनघटतइतिदोषत्रयसंनिपातःतद्धेतुत्वेनवक्तव्यः नहिसंनिपाताभावेकश्चिद्भगवद्वाक्यंनमन्यते॥तत्रप्रथ

श्रीशुकउवाच यदातुराजास्वसुतानसाधून्पुष्णन्नधर्मेणविनष्टदृष्टिः
भ्रातुर्यविष्ठस्यसुतान्विबंधून्प्रवेश्यलाक्षाभवनेददाह ६ ॥

मंतामसंदोषमाह यदेति राजेत्यदीर्घदर्शित्वं तुशब्दोविदुरस्यपूर्वस्नेहव्यावृत्तिसूचकः स्वसुतानितिऔरसत्वादत्यागः॥
असाधुवर्द्धनंदोषायेति॥तदधर्मेणसुतरामंतर्दृष्टिरपिगता तदाह विनष्टदृष्टिरिति भ्रातुर्यविष्ठस्येतिसंबंधकृतधर्मोना
स्तीतिसूचितं विबंधूनितिसर्वथादयाभावः॥कनिष्ठभ्रातुःपांडोःपुत्रान्पांडवान्राज्यस्पर्द्धादिशंकारहितान्॥स्ववशान्पितृ
हीनान्सर्वथापरिपालनीयान्लाक्षाभवनेप्रवेश्यविश्वासघातंकृत्वाददाहेत्यर्थः अनेनास्यक्रियासंस्पर्शेतिपांडवानाम
मरणेपिवधदोषोजातएवेतिभावः ६ ॥

Indira Gandhi National
Centre for the Arts

न.मु.१

राजसंदोषमाह॥यदासभायामिति भगवतासंरक्षितानां तेषां राज्ञस्तेन राजत्वयुक्तानां राज्याकांक्षां परित्यज्य तूष्णींस्थिता नां बलाद्पराधकरणं सर्वनाशकं॥युधिष्ठिरस्य कुरुदेवत्वात् राजपत्नीकेशाकर्षणं सर्वनाशयतीति ज्ञानन्नपि नवारयामा स सभायामिति परलोकनाशोपि सूचितः॥सभानप्रवेष्टव्यमिति श्रुतेः॥अवमर्शं आकर्षणं॥उत्पादकस्य परिपालनमाव श्यकमिति सुतपदं॥परलोकसाधकत्वाभावात् नपुत्रपदं॥कर्मेति दुरदृष्टजनकं गर्ह्यमिति लोकेपि निंदाजनकं ब्राह्मणः

यदासभायां कुरुदेवदेव्याः केशावमर्शं सुतकर्म गर्ह्यं॥नवारया
मासन्नृपः स्नुषायाः स्वास्रैर्हरंत्याः कुचकुंकुमानि ७ ॥

समदृक् शांतो रीनां नांसमुपेक्षकः॥स्वतेब्रह्म तस्यापि भिन्नभांडात्ययोयथेति संबंधरहितानां ब्राह्मणानामप्येतदुचितं तदपिनकृतवानित्याह॥नवारयामासेति॥अनेन क्षत्रत्वं तस्य गतमिति सूचितं नृप इति सामर्थ्यं॥स्नुषाया इत्यतिलो कविरोधः॥अस्रैः कुचकुंकुमानि हरंत्या इति दयाहेतुत्वमंगलत्वं सूचितं॥स्वशब्देनाश्रूणामलौकिकसामर्थ्यं सूचि एन॰
तं॥कुचकुंकुमानीत्युपरिवस्त्राभावः॥कुंकुमानामपि गमने अतिलज्जा॥इतरराग भावार्थं तथाकरणं॥एवं प्रत्यक्ष ४
तोतिक्रौर्यं निरूपितं ७ ॥

सात्विकं दोषमाह द्यूतेति तुशब्देन अस्मिन् कृते पूर्वकृतापराधा अपि अकृता भवंतीति सूचितं पूर्वं तेषां राज्यापहरणं केवलम धर्मेणैव तदपि सोढ्वा दुःखमनुभूय स्वकीयं दायं शास्त्रतो लोकतश्चाविरुद्धं समयेन मर्यादया याचतो याचयतः याचमानाय वा पर त्यय श्लोक इतः अदानेहेतुलमोनुबाणा इति॥मोहं नुबाणः अजातशत्रोरिति विपरीतशंकाभावः॥स्वकृतनियमोल्लंघनान्मोहः॥
८ एवं त्रिदोषमापन्नः भगवद्वाक्यं नांगीकृतवानित्याह॥यदाचपार्थप्रहित इति॥पृथ्व्याः संबंधमत्प्रेषणं नात्यंतानुचितं॥स्वतोनदत्तवा नेव॥यदाचनदत्तवान् तदा पार्थेन युधिष्ठिरेण प्रहितः प्रेषितः भगवान् यानि जगाद तानि नो हमेन इति संबंधः॥सभायामित्युक्ते

द्यूतेत्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनं गतस्य नयाचतोदात्समयेन दायं तमोजुषाणो यदजातशत्रोः ८
यदाचपार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः॥नतानि पुंसाममृतायनानि राजोरुमेने क्षतपुण्यलेशः ॥ ९ ॥

लेकिप्रतीत्यापि नान्यथाकथनं॥जगद्गुरुरिति सर्वेषां हितोपदेशकर्तृत्वात् परमार्थतोपि नान्यथाकरणं॥यानिजगादेति संध्यनुगु ण तया अविरोधवाक्यानि जगद्गुरुत्व प्रतिपादनार्थं॥धर्मांतरेणान्यथावचनव्याहृत्यर्थं सर्वेषामेव तानि वाक्यानि सर्वदुःखनि वर्तकानीत्याह॥अमृतायनानीति अमृतस्य अयनानि स्थानभूतानि अमृतकुंडिका इत्यर्थः॥यथा क्षीरसागरं मथित्वा अ मृतकलशमुद्धृतवान् एवं सर्वशास्त्राणि मथित्वा तानि वाक्यान्युद्धृत्य व्याहृतवानित्यर्थः॥राजत्वाद्ज्ञानपोषः॥पूर्वं जीवन् सुकृतं राज्यभोगसुकृतं जीवत्पुत्रसुकृतं चेति लेशत्रयं स्थितं॥तन्मध्ये क्षतापुण्यलेशाय स्य स तथोक्तः॥उरुं सं मानितायानक स्य नापकारो भवेदिति भावः॥जीवनं विद्यमानमपि गतमायं सूचितं॥पुण्यांशस्य गतत्वात् केवलं पापांशेन जीवतीति भावः ९

Indira Gandhi National
Centre for the Arts

त्व·सु·१ एवंपुत्रस्नेहेनभगवद्वाक्योल्लंघनेकृतेतत्प्रभृतिखतस्तद्धहेअगच्छत्रपिआकारितस्तदाभवनंप्रविष्टइत्याह॥यदोपहूत
५ इति॥यदेतितदनंतरंमंत्रार्थंपृष्टः किलेतिवचनंस्वस्यतथानुसंधानेप्रर्थगूढार्थभावकत्वात्अनात्मवित्वंस्यादितितन्निरा
करणार्थमुक्तंपूर्वजेनेतिकथनावश्यकत्वं तथाभिन्नक्रमेणोक्तवानित्याह॥ अथाहेति॥संबंधादिकमनपेक्ष्यभयादिकम

यदोपहूतोभवनंप्रविष्टोमंत्रायपृष्टः॥किलपूर्वजेन ॥ अथा
हतंमंत्रदृशांवरीयान्यन्मंत्रिणोवैदुरिकंवदंति १० ॥

प्यनपेक्ष्यअथस्वतंत्रतयाआह॥तस्यमंत्रस्यप्रसिद्धिमाह॥तमिति ताद्दशकथनेहेतुःमंत्रदृशांवरीयानिति॥यथावे
देसएतंमंत्रमपश्यदितिबृहस्पतिप्रभृतयोमंत्रद्रष्टारोभवंति॥तथानीतिशास्त्रेपियेमंत्रद्रष्टारः तेषांमध्येवरीयान् किं एम०
च॥अस्यमंत्रस्यसर्वलोकप्रसिद्धिरस्तीत्याह॥यन्मंत्रिणइति॥विदुरेणप्रोक्तंवैदुरिकमिति॥तेनमोक्तमित्यधिका ५
रसिद्धत्वात्सर्वजनीनप्रसिद्धिः १० ॥

मंत्रमेवाह उपायचतुष्टयमध्येदानमेवमंत्रः अजातशत्रोरितिदायमितिनहीनता॥अजातशत्रोरितिविपरीतशं
काभावः॥तस्याजातशत्रुत्वंनकेवलंनामतः किंतुकार्यतोपीत्याह॥अन्येर्दुर्विषहमपराधंसहतइति॥अजातशत्रुत्वा
देवादानमस्त्वित्याशंक्यभीममुपस्थापयति॥सहानुजइति अनुजैःसहवर्त्ततइति॥साद्देशाभावः॥अर्जुनादीनामपि
क्रूरत्वंसूचितं॥यत्रयस्यराज्ञोनिकटेस्थाप्यसन्वृकोदरनामाअहिरस्ति नहिसर्पोवैरकार्यमकृत्वानिवर्त्तते॥तस्मा

अजातशत्रोःप्रतियच्छदायंतितिक्षतोदुर्विषहंतवागःसहानुजो
यत्रवृकोदराहिःश्वसन्रुषायत्त्वमलंबिभेषि ११ ॥

त्तस्मैतोषार्थंदायंदेयमित्यर्थः॥ननुतेचत्वारःकिंकरिष्यंतिममताद्दशाः शतंपुत्राःसंतीत्याशंक्याह यत्त्वमलंबि
भेषीति यस्माद्भीमादेकस्मादपित्वमलंबिभेषि• आकाशवाणीश्रवणएकएवभीमःसर्वान्मारयिष्यतीतिशतम
प्यप्रयोजकं विपरीतशंकापिनिवारिता आलइत्यर्थात्अनेनभेदोदंडश्चनिवारितः दायत्वाच्चअदानेनसाम॥
॥ ११ ॥

Indira Gandhi National
Centre for the Arts

उ·सु·१ ६

सहायाभावमाशंक्यएकसहायेनैवत्रैलोक्यजयसामर्थ्यंभवतीतितंविशिनष्टि पार्थास्तुदेवइति सहायार्थंप्रार्थनापि नापेक्षते तुपुनःस्वयमेवगृहीतवान् पार्थानितिसंबंधेनबहुवचनेनचसर्वयादुद्योगोलक्ष्यते नहिबहून्स्वकीया नगृहीत्वाकश्चित्तूष्णींतिष्ठति देवत्वात्त्रमानुषैर्जेतुंशक्यः अतएवदुर्योधनस्यदैत्यत्वात्मारणमपिगम्यते॥देवदे त्यानामजेयत्वायभगवानिति अनेनप्रारब्धकर्मापिचेद्विपरीतंभवेत्तदप्यन्यथाकुर्यादितिसूचितं॥कालजयायमुकुं दइति अन्येषामपिदुःखंदूरीकृत्यमोक्षदातृकालजयःकिंवक्तव्यइत्यर्थः॥अनेनराज्यदानंचावश्यकमितिज्ञापितं॥

पार्थास्तुदेवोभगवान्मुकुंदोगृहीतवान्सक्षितिदेवदेवः आ
स्तेस्वपुर्यांयदुदेवदेवोविनिर्जिताशेषनृदेवदेवः १२ ॥

किंच सभगवान्क्षितिदेवदेवइति क्षितिदेवाब्राह्मणाःतेषामपिदेवःतद्धितकर्तृत्वात्॥अतोयत्रभगवान्तत्रैवब्राह्म णाइतितवब्राह्मणाअपिनसहायाः॥किंच॥आस्तेस्वपुर्यांयदुदेवदेवइति योभगवान्स्वस्वतोध्यातोवासर्वमभिष्टंनिर्वा र्यराज्यादिकंप्रयच्छतितत्रसाक्षाद्देवभक्तानांहितार्थंभक्तपुर्यामास्ते किंच यदुदेवायादवायदोर्वंशोउत्पन्नादेवाइतितेषा मपिदेवइति यत्रभगवान्तत्रैवयादवाइतितवबंधुसहायोपिनास्तीत्युक्तं किंच विनिर्जिताशेषनृदेवदेवइति ॥नृदेवाराजानःतेसर्वेविशेषेणनिर्जितायेनतमपिविजिगीषतइतिभावः जरासंधादिजेतृत्वेनसर्वराजानस्तद्वश्याः अतस्तवराजसहायोपिनास्तीत्युक्तं॥नृदेवदेवाजरासंधादयःतेवानिर्जितायेन॥अतोनिर्बलस्यतवजयेकःप्रया

॥ उद्योगप्रभावः ९४ ॥ एम॰ ६

४८१

दुर्योधनोनमन्यतइतिचेत्तत्राहासएष दोषइतित्रिदोषःअयमेव दोषइतिवचनात्तदंगीकारोबाधकः॥दोषःसर्वैर्हेया सोल्पान्योनतुदोषानुरोधेनऔषधंत्याज्यमितिभावः॥तस्यदोषत्वेहेतुमाह पुरुषद्विडिति॥यःपुरुषंद्वेष्टिसएवदोषः॥अ न्यथातस्यैवशरीरेतन्नियमेस्वयंस्थितःकथंतंद्वेष्टि यस्यराज्येग्रामेपिस्थितःतंनद्वेष्टितत्रतच्छरीरेविद्यमानःरोगस्तंकथंद्वि ष्यात् अतःपुरुषद्वेषात्दोषइत्यवसीयते तत्त्यागउपपत्तिरूपोनिदानमित्यर्थः॥आस्तेइतिशीघ्रंतस्यप्रतीकारःकर्तव्यः

सएषदोषःपुरुषद्विडास्तेगृहान्प्रविष्टोयमपत्यबुध्या पुष्णासि
कृष्णाद्विमुखोगतश्रीःत्यजाश्वशुचेनंकुलकौशलाय १३ ॥

सांप्रतंस्वकार्यमकृत्वैवतूष्णींतिष्ठति॥उपेक्षितस्तुकुलमेवनाशयतीतिभावः॥क्वास्तीत्याकांक्षायामाह॥अत्रैवगृहान्प्र विष्टः आस्तेममत्वात्सर्वगृहप्रवेशनेनिवारणाशक्तिः॥षइतिहरेस्थितमंगुल्यानिर्दिशति॥तथाप्यंधत्वात्त्वंनद्रक्ष्यसीतिप्र कारांतरेणबोधयति॥यमपत्यबुध्यापुष्णासि॥आपद्यम्रायतइत्यपत्यंतन्मतिरेव॥किंच॥त्वंचकृष्णाद्विमुखःयतःपुष्णासि ॥अतएवगतश्रीश्चभविष्यसि॥तस्मात्स्यसर्वानर्थमूलत्वात्त्यजेदेकंकुलस्यार्थेइतिन्यायात्एनंत्यजत्वंकारणकृष्णवैमुख्यं चत्यजेत्यर्थः १३ ॥

Indira Gandhi National Centre for the Arts

त॰ मु॰ १ ७ यदा एवमाक्रोशपूर्वकमाज्ञारूपेणोक्तवान् तदा असत्कृत इत्यूचिवानिति संबंधः॥ इत्यूचिवानिति वाभिन्नं तत्रस्थाने आगतेन भ्रातुरंतिके वा सुयोधन इति तस्यापकर्षार्थं वचनं ननु पितृव्यतिरस्कारं कथं कृतवानित्याशंक्यं अतः क्रोधेन बहिर्दृष्टेरक्रांतत्वादिति तृतीयांतविशेषणद्वयं प्रवृद्धोयः कोपः तेन स्फुरितं अधरं यस्य॥ अनेन क्रोधेन लोभ एव स्फुरितइति तद्रूक्रोधानरूपउपायोयं संमत इति सूचितं॥ असत्कारो धिक्कारः अग्रेवक्तव्यो वा॥ एवमप्रियकथनं धर्मनीतिविरुद्धं॥ सत्यं ब्रूयात्प्रियं ब्रूयादिति स्मृतेः॥ प्रधानपरित्यागश्च नीतिविरुद्धः॥ सोपि सन्मानेनैव बोधनीयो भवति तथाप्येवं वचनं

इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण असत्कृ
तः सत्स्पृहणीयशीलः क्षत्तास कर्मानुजसौबलेन १४ ॥

दुर्योधनवाक्यक्षमणं विदुरपरित्यागार्थंवाः परित्यागार्थमेव॥ भगवद्भिर्मुखैः सहस्थातुमयुक्तत्वात्तस्त्रेहश्च नस्थापनीयः चित्तस्यातिदुष्टत्वात्सर्वथा परित्यागमपि न सहते॥ अत एवैवं वचनं एतदभिसंधयाह॥ सत्स्पृहणीयेति॥ सद्भिः स्पृहणीयं शीलं यस्य एवमेवासद्भिः सहस्थितो तत्परित्यागार्थं एवं कर्तव्यमिति सत्स्पृहणीयता॥ क्षत्तेति विश्वासपात्रत्वसूचितं॥ दुष्टचतुष्टयमध्ये दुर्योधनो मुख्यः कर्णदुःशासनशकु एम॰ ७
नयस्तु सहायाः। तदाह तैः सहित इति॥ अथवा॥ ननु मंत्रस्य स्वहितत्वादंगीकारमेव कथं न कृतवानित्यत आह सद्भिरेवस्पृ
हणीयं शीलं यस्येति तस्य सपरिवारस्यासत्वादिति भावः १४ ॥

दूरेणमिति लोकोक्त्या अधिक्षेपः पित्रा समाहूतत्वं ज्ञात्वा अयुक्तकरणान्नमय्याक्षिपतीति ज्ञायते॥ स्वभावजातिक्रियादुष्टस्य मंत्रानर्हत्वात् अयं तु तादृश इति विशेषणत्रयं द्वयं सिद्धं क्रियैव तु तृतीया॥ जिह्मः कुटिलः छिद्रान्वेषी मया कापट्येन स्थातव्यं विश्वासं जनयता स्वावसरे अपकर्तव्यमिति जिह्मलक्षणं तदद्य विदुरे स्पष्टं जातं स्वाधिकारानुसारेण भगवान् सर्वत्र तथा स्फुरतीति सिंहादीनामविद्वेषकत्वं ज्ञापितं दास्याः सुतमिति जातिदोषः॥ क्रियादोषं वक्तुं कृतघ्नतामाह यद्बलिनैव पुष्टः तस्मिन्प्रतीप इति॥ यथा आश्रितत्वाच्चंडालादिभ्यो बलिर्दीयते तथा ऽयमपि पतितः क्षत्रबीजस्य शूद्रायां जातत्वात् अत एव एवकारः॥ बलिपुष्टाश्च काका एवमेव भवंतीति ज्ञापितं पोषएव तथाभावे हेतुः परेषां शत्रूणां कृत्ये आप्त इति क्रियादोषः॥ दंडो निर्वासनमिति॥ आश्रितिया विदुरनिंद्यानुरूपाः ॥ दुर्योधनस्य ॥

क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः॥ तस्मिन्प्रतीपः परकृत्य आप्तो निर्वास्यतामाशु पुरात् श्वसानः
१५ स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोपि॥ स्वयं धनुर्द्वारि निधाय मायां गतव्यथो याकुरुमानया ॥ १६

श्रोत्रएणविन्नेः चित्ते तदुक्तं न प्रविशति तेषामपि तेनापि वधस्यानुक्तत्वात्परित्यागस्यैवोक्तत्वात् निर्वासनं दंडः श्वसानः प्राणमात्रावशेषः॥ असतां दृष्ट्या प्राणहरणापेक्षया अधिकोयं दंडः॥ स्मशान इति पाठे यत्र स्थास्यति तेषामसंमंगलं भविष्यतीत्यर्थः॥ यस्त्वेनमतोपजीवितत्वाद्॥ अत एव पुरान्निर्वास्य इति केवलं वचनमुक्तवान् १५ एवं दशभिः श्लोकैः पूर्वविस्यापरित्यागहेतुरुक्तः॥ अनेन पूर्वदेहसंबंधिनोपि त्यक्ता एव॥ परित्यागमाह॥ स इत्थमिति॥ अत्युल्बणत्वं शीघ्रकार्यकरणात् दृशेनेबाणाः कर्णद्वारा हृदयं वाक्यबाणाः प्रविष्टाः दृशप्राणस्थानेषु मर्मसु ताडितोपि भ्रातुः पुर इति मत्युसंनिधाववाणानां प्राणहारकत्वं दृष्टांतीकृतं॥ ताडितोपि गतव्यथः॥ तत्र हेतुः॥ मायामधिकं मानयानः। धनुर्द्वारि निधायेति प्रतिपक्षगमनशंकानिवर्तितानिःसारणात्पूर्वमेव अयात्॥ स्वकर्तृकस्यैव परित्यागस्य हेतुत्वात्॥ अन्यथा सर्वान्बलकृतानर्थान् कृतान् मनुरब्रवीदिति विरोधः स्यात् १६ ॥ ॥

मृ

Indira Gandhi National
Centre for the Arts

त०मु०१ ८

सेवा तस्यदेहे१ः मननं१ः

एवमपमानतोनिर्विस्मस्पतीर्थादिजनितसुकृतपरिपाकेनपृथिवीजलयोः संस्कृतत्वात् अधिकारिदेहेद्वयसंपत्तिर्निरूप्यते॥ तेजोनिरूपणार्थंसत्संगोजातइत्याह॥सनिर्गतइत्यष्टभिःचतुर्भिर्भूमिसंस्काररत्नथान्येश्चजलस्यच उत्तरोत्तरशेषत्वात्तद्विशेषुच्यतेस्फुटः १ पुण्यदेशार्थगमनंपुण्यदेशेतथैवच तद्‍गाभिफलंचेतिचतुर्धाभूमिसक्रिया २ जलेसामान्यसंबंधोविशेषश्चापितऽतः॥साधनंचफलंचेतिजलोक्तिश्चचतुर्विधा मंत्रगृहान्निर्गतोनस्वगृहंगतःकिंतुपुरादपिनिर्गतइत्याह सनिर्गतइति कौरवपुण्यलब्धइतिपूर्वोपार्जितसुकृतेनप्राप्तः निर्गतश्चेदंशस्थापकसुकृतमेवतद्वारानिर्गतमितिसूचितं पु

सनिर्गतःकौरवपुण्यलब्धोगजाह्वयात्तीर्थपदःपदानि॥अन्वाक्रम
त्पुण्यचिकीर्षयोर्व्यांस्वधिष्ठितोयानिसहस्रमूर्त्तिः १७ ॥

ण्यलब्धत्वंभगवत्स्थानगमनेपिहेतुः सर्वतीर्थानिपादेयस्येतितस्यस्थानेस्थितितीर्थेष्वपिविशेषोवेत्स्वस्थानेष्वेवगतइत्यर्थः अन्वाक्रमत्तमध्येस्थानानतिक्रमेणाक्रांतवान्॥एतन्निवेशनवत्नस्थानमात्रंकिंतुनानामूर्त्यभिधानेनअनुभावंप्रदर्शयन्स्वयमधिष्ठायपेषुस्थितः॑ तानितीर्थानीतिपूर्वेणसंबंधः पुण्यचिकीर्षयेतितत्वज्ञानादुत्कर्षपरमेश्वरप्राप्तिसाधनत्वाद्॥ अथवा॥उर्व्यांपुण्यचिकीर्षयापुण्येनपृथिवींसंस्कर्त्तुमितिदेत्याधिष्ठितेसंस्कारोनभविष्यतीतिउर्व्यां एम० ८
यानिसहस्रमूर्त्तिर्भगवानधिष्ठायस्थितइत्युक्तं॥अनेनसंस्कृतेदेवाधिष्ठानात्पंचाग्निविद्यावद्भगवन्मूर्त्तिष्वेवतस्यसंस्का
रःप्रदर्शितः १७ ॥ विदुरस्यपार्थिवदेहस्य१ः

स्थाने१ः

सप्तपुर्यतपोग्रामान्वादशवनेषेयादितिपरिच्छिन्नोपिनान्येसानितथेवेदिभाव१

विशेषमाह पुरेष्विति मथुराद्वारकागरेषुपरमेश्वरक्रीडास्थानत्वात्गोकुलनिकटवृंदावनादीन्युपवनानि॥ अद्रिर्गोवर्द्धनादिःकुंकुंजानिलतागृहाः॥सर्वाण्येतानिभगवत्संबंधात्पुण्यजनकान्यपिभक्तिजनकानि अपंकतोयेष्विति कृष्णजलक्रीडादियोग्येषुसरित्सरस्सुकालीयादिह्रदेषु॥तेषुपर्यटनेनिमित्तं॥अनंतमूर्तेःरासादिक्रीडाचिह्नैःसमलंकृतेषुजलस्थलप्रधानेषुएकाकीचरतिस्मेत्यर्थः अनन्योभक्तोवा॥अनेनपंचगुणापृथिवीसंस्कृतेतिज्ञापितं॥तत्रपृथिवीद्विधा॥मत्स्यावाराभेदेन॥पुरेष्वद्रिष्विति उपवनेषुगंधःकुंजेषुस्पर्शःसरस्सुरसः अनंतलिंगसमलंकृतत्वेनरूपं॥कुंजेषुवाशब्दः अपंकतोयेष्विति रसः सरस्विति स्पर्शः॥अनन्यत्वेनेवमौनंसिद्धं॥तेनवाशब्दःसंस्कृतः १८ साधनान्याह।गांपर्यटन्निति एतेसप्तत्वगादिधातुसंस्कारः व्रतान्यंतःकरणसंस्का संस्कारसाधनानिः

पुरेषुपुण्योपवनाद्रिकुंजेष्वपंकतोयेषुसरित्सरस्सु॥अनंतलिंगैःसमलंकृतेषुचचारतीर्थायतनेष्वनन्यः १८
गांपर्यटन्मेध्यविविक्तवृत्तिःसदाप्लुतोधःशयनोवधूतः॥अलक्षितःस्वैरवधूतवेशोव्रतानिचेरेहरितोषणानि।। ॥१९

रकानि॥एकाकिपरिभ्रमणंभगवच्चरित्रस्यातिगोप्यत्वात्॥एवंदर्शनेनकिंचिद्भक्त्युत्पत्तेःकृष्णमाप्यभावात्विरहेणतत्प्राप्त्यएव व्रतानिकृतवान् अत्रैवंक्रमः अन्वेषणार्थप्रथमंपर्यटनं ततोंतर्बहिर्नियमाः॥ततोपिव्रतानितत्रमेध्येएकांतेध्यानार्थंउपवेशनादिरूपास्थितिर्यस्येति॥पवित्रैकरात्रांतरिताहारादिजीविकायस्येतिवा॥त्रिकालस्नानभूशयनाभ्यंगवर्जनादयस्त्रयोगुणदोषत्रयनिवारकाः॥नन्वेवंकरणेबंधुभिःकथंनबद्धस्तत्राह॥अलक्षितःस्वैरिति॥तत्रहेतुः॥अवधूतवेषः॥कृत्रिमवेषधारी॥व्रतानिचत्वारि॥एकादश्युपवासःसर्वभूतदया यथालाभसंतोषः॥सर्वेंद्रियोपशमश्चेति॥एतानिभगवत्तोषहेतुभूतानि १९ ॥

Indira Gandhi National
Centre for the Arts

फर्वज्ञानां पुण्यमेवोदये एषां हेतुरिति प्रसिद्धोक्तं तथा तेन तदुपलंभनेऽजितशक्तिः ४ =

ल॰मु॰१ ९ फलमाह इत्थं व्रजन्निति ॥ शुद्धो हि देवदेशे तिष्ठतीति पूर्वकामनापि संपूर्णा ज्ञापकं चैतत्फलस्य ॥ यथा असदधिष्ठानं भूमौ गतं तत्
याशरीरेऽपीति पुण्याधिक्याद्वा रत एव पर्यटनं बहुनापि कालेन यावत्प्रभासपर्यंतं गतवान् तावदन्यथा यथावन्नाहीदित्याह ॥ ताव
दिति एकस्य चक्रं सैन्यं यस्मां सैन्यं वा राजचिह्नं वा अन्यस्य नालीत्यर्थः भारतमेव वर्षं यावत्प्रभासं तावच्छत्रेणोच्यते तावदित्यर्थ वि
शेषो वा ॥ अस्य तीर्थपर्यटनमेव भगवद्भक्तानां भगवतो योऽपोपलंभने हेतुः ॥ अजितेनेति सामर्थ्यं पार्थ इति हेतुः २० एतत्तु पू
र्वं ज्ञातमपि असंभावनया जिज्ञासाभावान्न ज्ञातवान् प्रभासे तु अधिकारिणो देहपरित्यागार्थं तत्स्थानमिति तत्र गतो बहिः स्थि
तं इव ज्ञातः ततः शुश्रावेत्याह तत्राथेति अथेति भिन्नक्रमे सुहृदां विनष्टिं श्रुतवान् तस्य शोकहेतुत्वाय विशेषणं सुहृद्भिन

इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवान्प्रभासं तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः
२० तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयं संस्पर्धया दग्धमथानुशोचन्सरस्वतीं प्रत्यगिया
य तूष्णीं २१ ॥

संक्षेपनाशः २१ श्लि ष्टिमेव निरूपयति ॥ संस्पर्धया दग्धमिति ॥ अनुवादे धर्मप्राधान्यं निरूपणे धर्मिण इति वैप रीत्यं अवस्थाभेदेन औदासीन्यशोकनिरूपणार्थं उपपादनस्य विशेषणं ॥ वनं यथा वेणुजवह्निसंश्रयमिति वेणुजो वह्निः सुहृदुपल्लव॰२=
विवाद॰४ सम्यगाश्रयो यस्य सम्यकूश्रयते यदिति वा ऽर्थः ॥ संस्पर्धया दग्धमित्यस्य नाशः तत्र प्रभासे संस्पर्धिनां भवतु नाशः ॥ तत्संबंधस्त
भीष्मद्रोणादय॰३= वे पि सुहृदो न स्युः इति शोकः ॥ नाशे दृष्टांतः वेणुभां ज्ञातो ग्निर्न तावन्मात्रं नाशयति किं तु वनमेव सर्वं तद्वत् ॥ कौरव पांडवस्पर्धयेति हेतुः
॥ अनेनानुपयोगिनाशः सूचितः ॥ अत एवानुशोकः ॥ सरस्वती धर्महेतुर्जलसंस्कार रूपिणी ॥ भक्तिहेतुस्तु यमुना सत्संगान्नैजसी एम॰
स्मृता ज्ञानहेतुस्तु गंगा सात् बुद्धिसंस्कारकत्वतः १ प्रत्यकूस्रोतोभिमुखं तूष्णीं शोचन्नित्यप्रकटत्वाय ॥ द्वारकागमनाभावाये ९
व मुक्तं २१ ॥
उद्धवसंगात् तेजः संस्कार रूपिणी॰२=

(कुतो)
ननु भगवद्वासभूतद्वारकात्यागेन कथमन्यत्र गत इत्याशंक्य तत्र कृष्णस्मारकाणि बहूनि संतीत्याह तस्यामिति द्वयेन तस्यां सरस्वत्यां
एकादश तीर्थानि प्रसिद्धानि अत्र युक्तमो जलप्राधान्यात् जलक्रमानुरोधेन तत्र सरस्वत्यामेव त्रितकूपमस्ति तत्प्रथमं निर्दिशति ॥
कूपाद्याभ्यः स्वाहेत्यादिना श्रुतौ श्रुतानां ३= कूपानामेवापां प्राथम्यात् ॥ एवमन्यान्यपि ज्ञातव्यानि ॥ उशनसादीनां तपः स्थानानि तानि मनुः स्वायंभुवः पृथुर्वैन्यः तीर्थचतुष्टये
सेवितेशोकादयः सर्वे व्याहत्ताः ॥ त्रितस्तु कूपे पतितः तस्मात् संकटान्निस्तीर्णः ॥ तथायमपि शोकसंकटान्निस्तीर्णः ॥ उशनातत्रम्स्त

तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः तीर्थं सुदा
सस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे २२ ॥ ॥

संजीविनीविद्यां प्राप्तवान् तथायं मृतोज्जीवितः ॥ मनोस्त्विष्टसिद्धिर्ज्ञानरूपा ॥ अस्यापि शोकनिवृत्तेर्ज्ञानोत्पत्तिस्तत्र पृथुस्तु
फर्वज्ञात सर्वदोषनिवर्तकः एवं चतुर्भिः पूर्वावस्था गता नेन पुनः श्रेष्ठा प्राप्ता ॥ अतः परमथ भिन्नक्रमेण विशोक तीर्थानि
कृतवानित्याह अग्नेरिति असितो ऋषिः वायुर्देव तासुदासो राजा गवां गोसत्रस्थानं गोतीर्थं गुहः कुमारः श्राद्धदेवः
वैवस्वतमनुः एतानि सप्ततीर्थानि अवश्यं सप्तधमनुशोधकानि २२ ॥

Indira Gandhi National
Centre for the Arts

अन्यानिप्रकीर्णकानिछन्नजातपर्यंतनिरंतरंकृतानिसर्वशोधकानीत्याह॥अन्यानिचेति एतानितपःकरणात्लोकेतथा
ख्यातानिनित्यान्येव अन्यानितुद्विजदेवैर्ब्राह्मणैर्देवैश्चकृतानि॥अतएवनानायतनानिनानास्थानानियेषुतीर्थेषु किंच॥
तेष्वायतनेषुविष्णोःप्रत्यंगमुख्यांकितमंदिराणिसंति प्रत्यंगान्यायुधानितेषुमुख्यंसुदर्शनंचक्रांकितानिचक्रेणोपरिचिह्नि
तानिभगवन्मंदिराणिभवंति॥किंतावतेत्यतआह॥यद्दर्शनात्कृष्णमनुस्मरंतीति॥भगवत्स्मरणंबहुजन्मसुकृतेनभवति॥
तद्‌त्रचिह्नदर्शनेनैवभवतीतितीर्थानामाधिक्यं॥सांगस्यभगवतस्तत्राऽस्थितिरित्यपि॥अनेनस्मारकदर्शनाच्चिरंस्थि

अन्यानिचेहद्विजदेवदेवैःकृतानिनानायतनानिविष्णोः॥प्रत्यंगमुख्यांकितमंदिराणियद्दर्शना
त्कृष्णमनुस्मरंति॥२३॥ततस्त्वतिव्रज्यसुराष्ट्रमृद्धंसौवीरमत्स्यान्कुरुजांगलांश्च॥कालेनताव
द्यमुनामुपेत्यतत्रोद्धवंभागवतंददर्श २४ ॥

त्वात्तत्रतत्रगतंलक्ष्यते॥अतएवकालविलंबाद्यदुकुलनिवृत्तिरपिज्ञाता २३ एवंतीरगमनेनैवसर्वेदेशाअतिक्रांताइत्या
ह॥ततस्त्वतिव्रज्येति ऋद्धमित्यनेनतत्रभगवानस्तीतिज्ञापितं॥सौवीरदेशोगुर्जरदेशः॥मत्स्यास्ततोऽर्वाक्॥कुरुजांगल
देशाकुरुक्षेत्रदेशाः॥सर्वत्रग्रामैकरात्रविधिनासमागमनेषट्त्रिंशद्वर्षाज्ञाताः॥तदाह॥कालेनतावदिति यावत्कालंभग
वान्स्थितःमौशलंचजातंतावद्यमुनामुपेत्यतावत्कालेनयमुनांगतः तत्रउद्धवंददर्शेतिसंबंधः॥दर्शनेहेतुः॥भाग राम०
वतमितिइदंदर्शनंप्रत्ययजनकंयावताउद्धवःप्राप्तःतावतास्वयमपितत्रगतइति ॥ २४ ॥ श्रीगणेशायनमः॥ १०

अतःपरंसत्संगेनअग्निसंयोगवत्स्वस्यापितेजःप्राप्तिरितितंविशिनष्टि सवासुदेवानुचरमिति॥भगवद्भक्तत्वेपिसेवकत्वंविशे
षः॥वासुदेवसेवकत्वान्मोक्षोपयोगित्वंतद्दर्शनस्य॥अनेनसंभाषणीयत्वंसूचितं॥प्रकटेपिनीतिज्ञत्वात्अस्मंनबोधयिष्यतीति
विशेषणं॥बृहस्पतेःप्राप्तनयमिति॥बृहस्पतेःसकाशात्प्राप्तोनयोनीतिशास्त्रंयेन॥प्राप्तनयमितिपाठेपूर्वमुद्धवःपुत्रत्वेनस्थि
तइतिदेवगुरुत्वाभिज्ञः॥प्रशांतत्वान्नस्वयमासक्ततेप्रतीतत्वात्परिहारःसंभवति॥आलिंग्यगाढमित्युभयोर्भगवदीयत्वात्पूर्वस्ने
हःसूचितः॥प्रणयेनेत्युभयत्रस्वानांभद्रत्वेहेतुः॥भगवत्प्रजानामिति॥भगवत्परिपाल्यानांभगवताअंशावतारेणोत्पादितानांवा॥
1= ध्वासे छ्वासपर्वकेने तस्मिन्दृष्टेस्वयमपिभगवत्संबंधीजातइतितदीयानांस्मरणेनपंचभूतेषुवायुःसंस्कृतः २५ भगवदीयानांकुशलंद्विविधं॥सा

सवासुदेवानुचरंप्रशांतंबृहस्पतेःप्राप्तनयंप्रतीतं॥आलिंग्यगाढंप्रणयेनभद्रंस्वानामपृच्छद्भगवत्प्र
जानां २५ कच्चित्पुराणौपुरुषौस्वनाभ्यपाद्मानुवृत्त्येहकिलावतीर्णौ॥आसातउर्व्याःकुशलंविधायकृ
तक्षणौकुशलंशूरगेहे २६ ॥

मान्यविशेषरूपेण॥तत्रसामान्यंभगवतोप्याणांकुशलंभगवत्स्थितिसाध्यमितिप्रथमंहेतुभूतांभगवत्स्थितिंपृच्छति॥
कच्चित्पुराणौपुरुषाविति॥अवतारावेशाभिप्रायेणद्विवचनं॥स्वगतभेदाभावाद्भगवन्मूर्तीनांपुराणावितिपुरुषोत्तमौजी
ववेलक्षण्यायोक्तं॥सविशेषेणकार्यमाह॥नाभौभवेपद्मेआविर्भूतोब्रह्मास्वनाभ्यपाद्मः तस्यानुवृत्तिःप्रार्थनातया
किलेतिपुराणादौतथाप्रसिद्धत्वात्॥भूम्याःकुशलंभारावतरणंकृत्वासर्वेषांकुशलंयथाभवति इत्यवसरे॥कृत
क्षणौनिश्चिंततयास्वानंदानुभवेनिर्मितक्षणौवा॥वसुदेवगृहेकिमासातइतिप्रश्नः॥अनेनसर्वेषांसाधारणंकुशलंपृ
ष्टं॥ २६ ॥

Indira Gandhi National
Centre for the Arts

पांडुवसुदेवस्यशालकः एवंतद्द्वयोरन्योन्यंव्यवहारः। कौरवस्यप
कनिष्ठभगिनीभर्ता वसुदेवः तस्यशालकेकंडोविदुरेचेतिद्वयं
भगिनीपतिमिति वाच्याख्येयं ३=

नभु॰१ विशेषंद्रष्टृति॥ कच्चित्कुरूणामिति॥ प्रथमंवसुदेवकुशलप्रश्नेहेतुः॥ कुरूणांसुहृन्नोभामस्य॥ भामस्तुभगिनीपतिः॥ प्र प्रतिवर्त्तनशीलोक्तं१=
११ तिविवाहसंभावनयादेवकापिस्वभगिनीत्यभिप्रायेणोक्तं॥ कौरवगृहेवातस्यानोविवाहः॥ पृथापेक्षयावसुदेवस्यज्येष्ठत्वा
त्तदेशन्यायेनकनिष्ठभगिनीभर्त्तृशालकइतिभावुकत्वं किंच॥ सर्वधर्मात्रवसुदेवेकिंतुउपजीव्यइत्याह॥ योवैस्वसृणा
४ स्वसाभातुःपांडोश्वसुरः मिति भूरः श्वशुरोदद्यात्मेवस्वयमपिभगिनीनांददाति वराणभिलषितार्थान्॥ अविहितत्वात्रचतुर्थी॥ अधिकदाने हेतुः
॥ वदान्यइति भगिनीनांभर्त्तृतर्पणमपिकृत्वा॥ २७॥ यादवानांमध्येसर्वतउत्तमंप्रद्युम्नंपृच्छति॥ कच्चिदिति॥ वरूथाधिप

कच्चित्कुरूणांपरमःसुहृन्नोभामःसआस्तेसुखमंगशौरिः॥ योवैस्वसृणांपितृवद्ददातिवरान्वदान्योवरतर्पणेन =
२७ कच्चिद्वरूथाधिपतिर्यदूनांप्रद्युम्नआस्तेसुखमंगवीरः॥ यंरुक्मिणीभगवतोभिलेभेआराध्यविप्रान्स्म
रमादिसर्गे॥ २८॥ कच्चित्सुखंसात्वतवृष्णिभोजदाशार्हकाणामधिपःसआस्ते॥ यमभ्यषिंचच्छतपत्रनेत्रोन =
पतिःसेनापतिःयदूनांमध्येवीरः॥ यदूनांवावरूथाधिपतिः॥ स्वतोवीरः॥ सेनातः जन्मपरं त्याससनाशांपरिहृत्यदूर

परयाचतदाह॥ प्रद्युम्नइति॥ प्रकृष्टबलनात्मकः॥ अतोराजापेक्षयाप्रथमंपृष्टः किंच सद्वंशसर्गहेतुःकामः॥ तंरु
क्मिणीभगवंतंप्रार्थयित्वावंशजननार्थंविप्रानाराध्यधर्मसिध्यर्थंतपः कृत्वालेभे॥ आराध्यविप्रानितिशक्त्यतिशयाधानं
स्ततंगम्यते॥ भगवत्त इतिपुत्रार्थमेवयत्नः २८ कच्चिदितिराज्ञोराज्यंतुकाकतालीयन्यायेनागतमित्याह॥ यमभ्यषिं एम॰
चदिति मृतपुत्रस्यदुःखाभावेनराज्यस्वीकारेहेतुः॥ शतपत्रनेत्रइतिदृष्ट्यैवसर्वतापहारीकमलनयनः॥ दूरादितिपु ११
त्रपौत्रद्वाराअपि २९ ॥ २९ ॥

भेवयामात्राद्दसद्वर्त्तमानएवपतः २ कृष्णोक्तप्रेजावयद्धेहेंमि
केतिविवेचनीयं २=

निरतिशयस्वरूपसामर्थ्यसद्भावात्सांबादीन्माहात्म्यस्वरूपेवदन्पृच्छति॥ कच्चिद्धरेरिति संबोधनानितत्रतत्रकथनेहेतुभूता
नि॥ हरेरेवसद्दृत्तः रथिनामग्रणीः साधुआस्तइति॥ सांबपदेनपार्वत्यासहितोमहादेवएवावतीर्णइतिज्ञायते॥ अतएवतस्यज
ननंनप्राकृतयाशक्यमित्याह असूतयंजांबवतीव्रताढ्येति॥ जांबवान्बलेनभगवत्तुल्योभक्तश्चयतस्तस्यकन्यातत्तोपिव्रता

कच्चिद्धरेःसौम्यसुतःसदृक्षआस्तेग्रणीरथिनांसाधुसांब असूतयंजांबवतीव्रताढ्यादेवं
गुहंयोंबिकयाधृतोग्रे ३० क्षेमंसकच्चिद्युयुधानआस्तेयःफाल्गुनाल्लब्धधनूरहस्यः
लेभेंजसाधोक्षजसेवयैवगतिंतदीयांयतिभिर्दुरापां ३१ ॥ श्रीगोपालयनमः ॥

ध्यातस्यस्वस्वरूपतःसामर्थ्यमाह॥ देवंगुहमिति॥ गुहस्यदेवत्वमुत्कर्षः भूतगणमध्यपातित्वाभावायत्रांबिकयाऽग्रे
ग्निपत्न्यामंतर्भूतयाअयमपितस्योत्कर्षः ३० भूरनुत्क्वाभूरभक्तमाह क्षेमंसकच्चिदिति युयुधानःसात्यकिः॥
अर्जुनशिष्योगतिंपरमभक्तिंफलरूपां तत्रसाधनंभगवत्सेवैव नतुज्ञानमपीत्याह यतिभिर्दुरापामिति ३१ ॥

स्वारूयामंतर्गतयाहद्वीर्यस्ग्निपीतो
गांभसिपतितोध्यतः २=

Indira Gandhi National
Centre for the Arts

परमभक्तमाह॥ कच्चिदिति॥ अतएवबुधः अनमीवोनीरोगः॥ कृष्णस्वैवायोग्यत्वायतथाप्रश्नः श्वफल्कपुत्रोऽक्रूरः भग
त्वम्.१ वत्प्रपन्नः शरणागतः॥ तस्यभक्तिर्लोकेप्रसिद्धेत्याह॥ यः कृष्णपादांकितेति॥ मार्गपांसुरत्यंतमपवित्रः सोपिकृष्णपादांकि
१२ तइतिगंगापेक्षयातस्योत्तमत्वमत्वात्तत्रलोटनंकृतवान्॥ अचेष्टतेतिभक्त्यावेशेनलौकिकपदार्थज्ञानाभावः सूचितः॥ प्र
~४स्वार्थिना बोधितोपिभक्त्याविष्टोनप्रबुद्धइत्याह॥ प्रेमविभिन्नधैर्यइति॥ धीरोहिसर्वग्रहणेसमर्थः ३२ यद्भक्त्यापुत्रत्वमपिप्रा

कच्चिद्बुधः स्वस्त्यनमीवआस्तेश्वफल्कपुत्रोभगवत्प्रपन्नः यः कृष्णपादांकितमार्गपांसुष्वचेष्टतप्रेमवि
भिन्नधैर्यः ३२ कच्चिच्छिवंदेवकभोजपुत्र्याविष्णुप्रजायाइवदेवमातुः यावैस्वगर्भेणदधारदेवंत्रयी
यथायज्ञवितानमर्थं ३३ ॥

प्तोहरिस्तामतिभक्त्यापृच्छति कच्चिच्छिवमितिभोजेतिवंशनाम॥ देवकएवभोजः॥ पुत्रत्वमघटमानमाशंक्यदृष्टांतः॥ अ
दितिर्यथावामनमाताविष्णुरेवप्रजायस्याः देवानांमातेतिसर्वेदेवास्तस्याआविर्भूताइतिभगवानपिस्वयमाविर्भूतः पुत्रत्वं
चगर्भस्थितिमात्रेणजननान्नेत्याह यावैस्वगर्भेणदधारदेवमितिधारणमपिसर्वलोकार्थमित्याह त्रयीयथेति॥ म स्म०
र्भस्थितिमात्रेणजनकत्वंवारयितुंमाहात्म्यमुक्तंभवति अर्थमितिसहजसंबंधरूपत्वात्। अंतर्यामितयाविद्यमा १२
नएवप्रादुर्भूतइतिसूचितं ३३ ॥

अनिरुद्धेजीवस्योत्कर्षाभावेनआविष्टस्यभगवतएवमाहात्म्यंवदन्स्तौति॥ अपिस्विदास्तइति॥ भगवाननिरुद्धः सा
त्वतांवैष्णवानांसर्वकामपूरकः अनिरुद्धएवहिपालकः मनसोधिष्ठात्रीदेवता अतएवयंशब्दयोनिमामनंतिस्मेति
प्रसिद्धोमनः पूर्वरूपंवागुत्तररूपमितिश्रुतेः हृदयस्याधार्यं॥ तादृशस्यावतारइति यतोयंमनोमयः तद्देवतात्वेनैवप्र
सिद्धः अतएवनकेनापिरोद्धुंशक्यतइत्यनिरुद्धः किंच सत्वसांतःकरणस्यतुरीयंयन्मनः तस्यपरमार्थतत्वं॥ अने

अपिस्विदास्तेभगवान्सुखंवोयः सात्वतांकामदुघोनिरुद्धः॥ यमामनंतिस्महशब्दयोनिंमनो
मयंसत्वतुरीयतत्वं ३४ अपिस्विदन्येचनिजात्मदैवमनन्यवृत्त्यासमनुव्रतायेहृदीकसत्या
त्मजचारुदेष्णगदादयः स्वस्तिचरंतिसौम्य ३५ ॥

नसर्वात्मत्वंतस्यलोकसिद्धमपीत्युक्तं॥ ३४॥ एवंकतिपयान्विशेषेणपृष्ट्वाअन्यान्सर्वानेकेनपृच्छति॥ अपिस्विद
न्येचेति निजश्चासावात्माचचैतन्यरूपः तस्यापियोदेवः तादृशंअनन्यवृत्त्यासर्वभावेनयेतदेकनिष्ठाः हृदीकादयः स
त्यात्मजाः सत्यभामापुत्राः चारुदेष्णः प्रद्युम्नभ्राता गदादयोभ्रात्रादयः॥ आदिशब्देनसर्वेसंगृहीताः तेषांचरित्रमपि
किंसमीचीनमितिप्रश्नः ३५ ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰१
१२

युधिष्ठिरस्यकुशलंपृच्छति अपिस्वदोर्भ्यामिति असाध्यसाधनेहेतुः विजयाच्युताभ्यामिति तौहिनरनारायणौ अनिरु
द्धांशोधर्मरक्षकौ राज्ञाचधर्मः बाहुभ्यांचात्मारक्षते अतउक्तं स्वदोर्भ्यामितिविजयोर्जुनः अच्युतोभगवान्सेतुंमर्यादां
परंपरागतांधर्मेणविहितप्रकारेणकिंपालयतीतिप्रश्नः॥धर्मत्वेनधर्मतःपरिपालनंसिद्धमेवकिमितिपुनःपृच्छ्यतइत्याश
क्यसिंहासनस्यअनर्थहेतुत्वमाह॥दुर्योधनइति विविधोजयलक्ष्यपरंपरायस्यांतादृशालक्ष्म्याविजर्जुनः तस्यानुवृत्त्या
सेवयासाम्राज्यलक्ष्म्याच॥यत्सभायांदुर्योधनोतप्यतेतिभिन्नंवा एतल्लगुणद्वयमधिकमस्तीतिसुतरांतापःसंभवतीति

अपिस्वदोर्भ्यांविजयाच्युताभ्यांधर्मेणधर्मःपरिपातिसेतुं दुर्योधनोतप्यतयत्सभायांसाम्राज्यलक्ष्म्याविज
यानुवृत्त्या ३९ किंवाकृताघेष्वघमत्यमर्षीभीमोहिवद्दीर्घतमंव्यमुंचत् यस्यांघ्रिपातंरणभूर्नसेहे
मार्गंगदायाश्चरतोविचित्रं ३७ ॥

भावः ३६ भीमंपृच्छति किंवेति कृतापराधेषुअमर्षीभीमः अघमति॰किमितिप्रश्नः॥अघमत्याअमर्षीकिमिति
वा अघमतिःपापमतिःमारकइत्यर्थः॥अघमत्यामारयिष्यामीतिबुध्याअघमपराधंदंडरूपं अत्यमर्षीभीमइति
वा अत्यमर्षित्वेदृष्टांतःदीर्घतमंदीर्घकालचिंतितंयुत्रोदियरंपराविषयमपिवा अनेनप्रतिज्ञाभीमेनपालितानवाअर्जु
नेनवातेमारिताइतिप्रश्नः अशक्यंतुतस्यनास्तीत्याह॥यस्येति यस्यभीमस्यांघ्रिपातंरणभूःकर्कशापिनसेहे सोढुंअश
क्ताअंघ्रेःपातःउल्लुत्यपतनात्मकः॥तस्यावसरमाह मार्गंगदायाश्चरतइति।गदायाविविधशिक्षाप्रकारंकर्तुंचरतःग
दायुद्धएवाप्लुत्यादिप्रकारः ३७ ॥ ॥

धार्तराष्ट्रः=

एम॰
१२

अर्जुनंपृच्छति॥कच्चिदिति रथयूथपानांयशोधयशोधारकः॥यशोहेतिपाठेसर्वेषांयशोहरणंकरोति॥तत्रसामर्थ्यंगांडीवध
न्वेति॥यशोधाकीर्तिधारी॥सर्वेषांकीर्तिंतिरस्कारेणस्वयमेवबिभर्तीतितथा॥तत्रध्येवा॥अनेनस्वतःपरतश्चसामर्थ्यंसूचितं॥गां
डीवधन्वेतितस्यत्रिषुलोकेष्वप्सरीणांविद्यमानत्वातउपरतारिर्जातोनवेतिप्रश्नः॥सामर्थ्यमाह॥अलक्षितइति॥युद्धसंबंधसर्वमा
याकिरातः अतएवालक्षितः॥अतएवयच्छरकूटेनआच्छन्नः एतादृशसामर्थ्यवतोजयेविलंबकारणंनास्तिप्रतियोगिप्राप्त्यभावव

कच्चिद्यशोधारथयूथपानांगांडीवधन्वोपरतारिरस्ते॥अलक्षितोयच्छरकूटगूढोमायाकिरातोगिरि
शस्तुतोष॥३८॥यमावुतस्वित्तनयौपृथायाःपार्थैर्वृतौपक्ष्मभिरक्षिणीव रेमातउद्दायमृधेस्वरिक्थं
परात्सुपर्णाविववज्रिवक्त्रात् ३९ ॥ ॥

यमयोः
तिरेकेण॥अतःसंदेहःकिंसर्वेप्रतियोगिनःप्राप्तानवेति ३८ यमौपृच्छति॥यमाविति मातृभ्रातृसंमाननशत्रुजयसंदेहाभावे
पित्वतोरमणप्रलिनवेतिसंदेहात्पृच्छति॥माद्रीपुत्रावपिपृथायांसमर्पणात्तत्पुत्रौ॥परात्उद्दायआछिद्य॥सुपर्णाविवेतिसं
भावनयागरुडदृष्टांतः॥वज्रिवक्त्रादितिपीयमानममपिअमृतमाछिद्यनेतुंसमर्थौ यथागरुडोपराद्दितिवैकल्पिकःश्लो
कःसोवा॥तेनशत्रुंजित्वाअजित्वावाधनमानयतइतिज्ञापितं ३९ ॥ श्रीगोपालयनमः ॥ ॥

अन्यार्थचीनयास्लेवनतुशत्रुवा
ज्ञातपा१=

Indira Gandhi National
Centre for the Arts

इष्टविकरर्णोयं १=

टी० स्कं० १ १४ कुंतीद्रव्यति॥ अहोइति॥ पृथापिध्रियते अर्थात्प्राणान्॥ अथवा॥ अर्भकस्य अर्थश्च अर्भकार्थस्तेन सोनपुंसकभावः॥ तेन राजर्षि समाहृद्द्वंद्वकरणव्यतिरेकेण अतएव१

वर्येण पांडुना विनापि॥ भर्त्रासहितावैधव्यधनपुत्रोरक्षणीयो तद्भावेपि रक्षणात्साश्चर्यं॥ तत्सहायसामर्थ्यमाह॥ यस्त्वेकवीर इति॥ यस्य स हायापेक्षांपिना लिशत्रुजये॥ वीर इति स्वयमेव युद्धकर्त्ता॥ अधिरथ इति रथवद्भ्यः सर्वेभ्यएव अधिकः च तत्रः ककुभोविजिग्ये॥ वि जितवान्॥ सहायेधनुरेव अन्यथामंत्रादिना सिद्धावाजयः सिद्धोभवेत्तत्र नाश्चर्यकारी॥ अतउक्तं धनुर्द्वितीय इति॥ ४०॥ एता वताकालेन पूर्वं येषु येषु अनुरागः स्थितः सर्वोप्युक्तः॥ सांप्रतं द्वेषमनुवदति॥ तत्रप्रथमं धृतराष्ट्रं शोचति॥ सौम्यानुशोच इति॥ सौ

अहोपृथापिध्रियतेर्भकार्थेराजर्षिवर्येणविनापितेन॥ यस्त्वेकवीरोधिरथोविजिग्येधनुर्द्वितीयःककुभश्चतस्रः
४० सौम्यानुशोचेतमधःपतंतंभ्रात्रेपरेतायविदुद्रुहेयः निर्यापितोयेनसुहृत्स्वपुर्याअहंस्वपुत्रान्समनुव्रते
न ४१ ॥

म्येतिसंबोधनंमित्रत्वज्ञापनाय॥ अन्यस्थाने अवक्तव्यंनवक्तव्यमिति॥ स एवस्वयमधःपतन्शोचति तमन्वहमपितंशोचामि॥ शोकेहेतुः॥ अधःपतंतमिति॥ पातेहेतुः॥ भ्रात्रेपरेतायविदुद्रुह इति॥ जीवद्दशायामपि अपकृतः मरणानंतरमपितत्पुत्रद्रोहे णापकृतः जीवन्भ्राताहमप्यपकृतइत्याह निर्यापितइति॥ मयात्वपकारेनकृतइत्याह॥ सुहृदिति॥ स्वनगरादेवअ हंनिर्यापितः॥ पुत्रद्वारा पिकृतंस्वकृतमेव॥ यतः पुत्रानयमनुसृतः॥ एवंजीवनकं तभ्रातृद्रोहादधःपातः शोचइति॥ एम० इदानीमपिशोचामि तत्रकारणमस्तिनवेतिप्रश्नः॥ एवमपकृतोगृहेस्थित्वाजीवतीति ४१ ॥ गोपालयनमः॥ १४

निर्मीपर्णो २ पा॰ड़ु१=

ननुयथापुत्रापराधेनसमर्थोपित्वयाधृतराष्ट्रस्यापराधित्वं तथातवाप्युपेक्षादोषात् दुष्टत्वमित्याशंक्यधृतराष्ट्रभीष्मद्रोण दीनांवासुदेवमोहितानांप्रतिपक्षशंकयास्वहितमेवकृतवानहमित्याह॥ सोहमिति सोहमेवंधृतराष्ट्रादिभिरपकृतःविध्न तुःप्रसादात्गतविस्मयएवचरामि॥ अत्राप्यर्थेसंदेहः किंयुक्तमयुक्तमिति सर्वदुःखहर्त्ताभगवान्सहियथासुखंसर्वानभ्युदय निःश्रेयसादिषुयोजयति तत्रयेमहत्त्वासुखाधिकारिणोनिहत्यासुखमिच्छंतितान्व्यामोहयतिसभगवान्नृणांसंबोधयन्मर्त्यदे

सोहंहरेर्मर्त्यविडंवनेनदृशोनृणांचालयतोविधातुः॥ नान्यो
पलक्ष्यःपदवीप्रसादात्चरामिपश्यन्गतविस्मयोत्र ४२ ॥

हः॥ तस्यविडंबनेन अनुकरणेननृणांविधातुरितिवा कपटमानुषचेष्टयानृणांदृशश्चालयितुः। यदिनव्यामोहयेत्तदाते षांस्वर्गैकंकथंकुर्यात्॥ पुनःपुनःस्वष्टार्थंतान्व्यामोहयतीत्यर्थः॥ यथाभगवान्केनापिनज्ञाततस्तथाऽहमपिनान्येनोपलक्ष्यः॥ अतएवतत्प्रसादोमय्यस्तीतिज्ञायते॥ अतः तत्प्रसादस्सूचकोविस्मयाभावः॥ बहिस्तत्प्रसादस्सूचकोलोकज्ञानाभावः॥ अ तएवास्मिबद्धः मारिमाः अहंविचरामीति नृणांभीष्मादीनामंतःकरणहर्त्ताश्रीमयतः प्रसादात्कृतमप्यपराधादिकंतदि
स्थयेतिज्ञानन्गताभिमानःतस्मात्स्वपायंतीर्थाटनंकरोमीत्यर्थः ४२ ॥

Indira Gandhi National
Centre for the Arts

ननुसर्वसमर्थः परमेश्वरः कथमुपेक्षितवानित्यतआह॥ नूनमिति॥ यद्यपिभगवान्दुष्टनाशार्थमेवावतीर्णस्तथापियद्दुर्यो
धनादीन्नहतवांस्तत्प्रपन्नार्त्तिजिहीर्षया शरणागतभीमादिप्रतिज्ञापूरणार्थमित्यर्थः त्रिमदाःविद्याधनाभिजनाख्याः विद्या
मदोधनमदस्तथैवाभिजनोमदइति तेनत्रिमदेनोत्पथानांनृपाणांवधमत लब्धोपेपंचमी वधंकृत्वापिकुरूणांवधमुपे
क्षांकृतवान्कुरूणांवधमकृत्वैवस्थितः यतस्तेषामद्यमपराधमुपेक्षितवान् यतःईशः भक्तद्रुहमपिमारयितुंसमर्थः ४३
॥एवंभगवच्चरित्रंसर्वमेवाहंतत्प्रसादाज्जानामीतिस्वज्ञानंनिरूप्यभगवत्स्वरूपमपिजानामीत्याह। अजस्यजन्मेति अजस्य

नूनंनृपाणांत्रिमदोत्पथानांमहींमुहुश्चालयतांचमूभिः॥ वधात्प्रपन्नार्त्तिजिहीर्षयेशोप्युपैक्षताघंभगवान्कुरूणां॥ ४३॥ अजस्यजन्मोत्पथनाशनायकर्माण्यकर्त्तुर्ग्रहणायपुंसां॥ नन्वन्यथाकोर्हतिदेहयोगंपरोगुणानामुतकर्मतंत्रं ४४ ॥

कर्त्तुश्चजन्मानिकर्माणिचउत्पथानांनाशायसतांशिक्षणायच॥ नहिसूर्योत्पत्तिव्यतिरेकेणअंधकारोनश्यति। नहिभगवदा
चरणव्यतिरेकेणकश्चिद्धर्ममाचरति अतोदुष्टनिग्रहशिष्टपरिपालनार्थंभगवतोजन्मानिकर्माणिविरुद्धान्यपिज्ञायंते॥
अन्यथागुणकर्मपारतंत्र्यरहितःकथंजन्मस्वीकुर्यात्॥ अनेनसाधरणपक्षोज्ञायते॥ स्वेच्छयाजनितदेहेअग्निवद्भगव
दावेशइति॥ गुणानामपिपरइत्यनेनगुणजनितकर्मपरतंत्रःसकथंभवेदितिमहद्वैलक्षण्यंसूचितं देहमात्रस्यैवकर्मपर
तंत्रत्वंमन्यते॥ यथासर्वमेवकाष्ठमनित्यं॥ तत्रप्रविष्टोग्निरपिसतएवानित्योविर्भावोभवतीतिभावः। यथावाभार्यादेहःभर्तृव
शोपिभार्याजीवाधीनएव॥ तथेश्वरपरिगृहीतोपिदेहःकर्माधीनएवेतिकेषांचिन्मतंतथायमपिमन्यते॥ नदृश्येद्रूषयिष्य 

त्युद्धवः ४४ ॥ ॥ हकुब्रीदिरत्र३ विदर१८

एवंस्वस्यसर्वबुद्धिमुक्त्वातेनाधिकारिदेहहेतुभूतवायुसंस्कारंनिरूप्यसंस्कृताकाशसिद्ध्यर्थंभगवच्चरित्रंपृच्छति॥ तस्येति॥ प्रप
न्नाखिललोकपानांप्रपन्नाश्चतेअखिललोकपाश्चसर्वेहीन्द्रादयोभगवत्प्रपन्नाःतदाज्ञाकारिणश्च अतस्तेषांकार्यार्थंआविर्भू
तस्ययदुकुलेवस्तुतोजन्मरहितस्यवार्त्ताकथयेतितृतीयःप्रश्नः ननुतीर्थार्थयात्रार्थंकृतसंकल्पःकथमन्यत्क्षोभ्यतीत्याशंक्या

॥तस्यप्रपन्नाखिललोकपानामवस्थितानामनुशासनेस्वे॥ अर्थायजातस्ययदुष्वजस्यवार्त्तांसखेकीर्त्तयतीर्थकीर्त्तेः ४५ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेप्रथमाध्यायनिरूपणं १ ॥ ॥

ह॥ तीर्थकीर्त्तेरिति॥ तीर्थरूपाकीर्त्तिर्यस्य॥ सखेइतिसंबोधनंयुक्तमयुक्तंवापृष्टंवक्तव्यमेवेतिज्ञापनार्थं॥ एवंभगवच्चरित्रेभ
गवदीयानांचरित्रेशुश्रूषुःप्राप्तसत्संगःतीर्थायतनादनैःकृतपुण्यपुंजोयोग्यदेहंप्राप्याधिकारीभवतिइतिभगवदधिकार
सर्गभूतसर्गोनिरूपितः॥ ४५॥ इतिश्रीभागवतेसुबोधिन्यांश्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायांतृतीयस्कंध
व्याख्यायांप्रथमाध्यायविवरणं १ ॥

Indira Gandhi National
Centre for the Arts

वस्तुतःपंचभिरेवमनसाकर्हैर्द्रिगेरुद्भिर्हानि ज्ञानचरित्राणि।तथाकर्मचरित्राणि२=

भगवतोमहत्त्वंप्रतिपाद्यंमात्रारूपं२=

न.सु.२
१६
कुत्रकोशारतेनस्यापि दुरुत्तेत्यादिप्रश्नस्य४=

अधिकारार्थसर्गेहिभूतसर्गोनिरूपितः॥मात्राणामेवसर्गेत्रद्वितीयेविनिरूप्यते १ मुख्याधिकारिणोभक्तौक्रियाज्ञानवि
भेदतः अलौकिकचरित्रेणमाहात्म्यंविषयोमतः २ क्रियातुभगवत्सेवनात्मत्रेतिनिरूप्यते॥षड्भिस्तुमनसातानिषड्कर्माणि
द्रियैर्यतः ३ षड्गुणैश्वर्यसंपन्नोभगवानेकएवसः॥सप्ताधिकोनविंशत्यातावंतोभगवद्गुणाः ४ तत्वतोविषयाःप्रोक्ताःते
देवाःसर्वएवहि कथायांत्रिभिरध्यायैरधुनोत्तरमुच्यते ५ सामान्यकुशलेत्यत्रत्रेधाप्युत्तरमुच्यते॥लोकद्वयेचभक्तौच
दुर्भाग्यायादृवाइति ६ तत्रप्रथमंविदुरेणपृष्ठउद्धवोनोत्तरमुक्तवानित्याहषड्भिः॥भक्त्युद्रेकोद्धवेषड्भिस्ताद्रशोक्तफलायहि॥
अशक्तिर्भक्तिलिंगंहिहेतूक्त्यातत्प्रसाधनं १ सर्वव्यापाररहितंभक्तिलि ... गस्यदर्शनं॥तथापिकृ

भक्तिलिंगस्य१=

श्रीशुकउवाच॥इतिभागवतःपृष्टःक्षत्त्रावार्त्तांप्रियाश्रयां॥प्रतिवक्तुंनचोत्सेहेऔत्कंठ्यात्स्मारितेश्वरः १

संहात्कंठाः२ भगवद्गुणः२

त्समाहात्म्यकथनायसमुद्यमः २ तत्रप्रथमंतस्याशक्तिरुच्यते॥इतिभागवतइति॥इतिशब्देनपूर्वाध्यायार्थःप्रकारविशे
षादवक्तव्यत्वायसंगृहीतः॥तत्रहेतुः॥भागवतइति॥एतादृशीकथामन्योवक्तुंशक्तः नतुभागवतस्तथापिपृष्टश्चेत्भगवा
निवस्वयमप्यंतर्हितशक्तिरेवभवति॥तत्राप्यज्ञेनकुशलेनपृष्टःतदाह।पृष्टःक्षत्त्रेति॥साहिवार्त्ताप्रियाश्रिताऽत्तरेतुनि
राश्रया॥नहिनिराश्रयाकेनचिद्वक्तुंशक्या॥तदाह॥प्रियाश्रयांप्रतिवक्तुंनोत्सेहइति॥चकारान्निषेधेप्यशक्तःनप्रष्टव्यइ
ति इंद्रियसामर्थ्येविद्यमानेपिज्ञानांशसहायेपिक्रियांशमनःउत्साहात्मकंतत्रनजातमितिनोत्सेहइत्युक्तं॥प्रत्युतकथा
श्रयान्वेषणार्थंप्रवृत्तंचित्तंभगवंतस्मारयितुमुक्तुंठामुत्पादितवत्॥अनेनभक्तिर्वचनप्रतिबंधिकाजातेत्युक्तंभवति॥ई

जाधिकारिका:३=
=
अशक्तिनिरूपणमेतत्
८
एम०
१६

एवमशक्तिंनिरूप्यतस्याभक्तिलिंगत्वंचदर्नहेतूक्त्यातांसाधयतिद्वाभ्यां यःपंचहायनइति पंचवार्षिकोहिसेवायामधिकारी वा
लस्यप्रातर्भोजनंसंपूर्णदिवसेबलजनकं मात्रालालनमुत्साहजनकंतद्द्वयंतस्यपूर्वमेवनासीत्॥बलंतुसपर्ययैवउत्साहस्तुली
लयैव बालत्वंतुतदानीतनंकीर्तितं॥तदुभयमिदानींनास्तीतिनबलंनचोत्साहः अतएवाशक्तिर्भक्तिलिंगं॥अनेनहस्तव्यापारे

यःपंचहायनोमात्राप्रातराशाययाचितः तन्नैच्छ
द्रचयन्यस्यसपर्यांबाललीलया २ ॥

भगवान् मात्राज्ञा१=

भगवत्सेवेतिनिरूपितंमनोव्यापारस्तुप्रथमेस्पष्टः मात्रायाचितइतिलौकिकवैदिकधर्मापेक्षापिनिराकृता इच्छाभावेन॥
भगवदीयानांपदार्थानांलौकिकापेक्षयाअतिबलीयस्त्वंनिरूपितं॥यस्येति॥कृष्णस्य सपर्या परिचर्याक्रीडार्थभ
गवद्धिष्ठानंप्रतिकल्प्यतत्रराजोपचारैःक्रीडनंबाललीला २ ॥

सेव्यमानानां१=

Indira Gandhi National Centre for the Arts

भगवन्मयार्थीस्य २ नानुसंतिकफलार्थी २ — अर्थाति २

त॰ सु॰ २ १७ एवमशक्तेर्भक्तिलिंगत्वंनिरूप्यप्रकृतेहेतुत्वाअशक्तिंसाधयति सकथमिति तस्यवालएवतथात्वंनकिंत्वाजन्मभगवदीयैरेवसामर्थ्य पदार्थः १
यतःसेवयैवसहजत्वंप्राप्तः॥अनेनतस्यसेवाजरणगवार्थमपिनव्याप्टताआनुषंगिकंतुनजातंकालस्यबलीयस्त्वादित्याह कालेनेति॥
जरसंवार्द्धक्यं पूर्वसिद्धसशक्तिहेतोरभावात्कथमितिशङ्कार्थप्रश्नः॥अतएववार्त्तांकथंब्रूयादग्रेपिवार्त्ताप्रतिष्टष्टोमाहात्म्यंक
थयिष्यतितत्तुसर्वदासाश्रयमेव॥अलौकिकत्वात् वार्त्तातुलौकिकी नचात्रभक्तिविरोधः प्रकारांतरेणभक्तेःक्रियमाणत्वात् तदा
ह भर्तुःपादावनुस्मरन्निति॥भर्तृपदेनतसेवंलीलाश्रुतिसिद्धायुक्तेतिसूचयति॥भर्ता संभ्रियमाणोविभर्तीत्यादिश्रुतेः पादावितिद्वि
वचनंभक्तिमार्गख्यापनाय अव्वितिऽपदेशानतिक्रमाय॥अनेनबहिर्वागिंद्रियविषयनिष्टत्तिरुक्ता ३ अशक्तिर्नकेवलंवागिंद्रि

सकथंसेवयातस्यकालेनजरसंगतः पृष्टोवार्त्तांप्रतिब्रूयाद्भर्तुःपादावनुस्मरन् ३
समुहूर्त्तमभूत्तूष्णींकृष्णांघ्रिसुधयाभृशं तीव्रेणभक्तियोगेननिमग्नःसाधुनिर्वृतः ४

येकिंतुसर्वत्रैवेतिसर्वव्यापाररहित्यमाह समुहूर्त्तमिति॥मुहूर्त्तमात्रमेवभगवतिस्थितःसहिकलारूपःपादस्मरणेनचपादांति
कंनीतः॥तूष्णीमितिसर्वेंद्रियव्यापाराराहित्यं तस्यसद्योमुक्तिमाह कृष्णांघ्रिसुधयानिर्वृतइति॥ब्रह्मानंदंप्राप्तइत्यर्थः॥सुधाप
देनचतत्रपाणलयाभावःसूचितः स्मरणेनतदानंदाविर्भावाभावात्तदर्थमुपायमाह॥तीव्रेणभक्तियोगेनसाधुनिमग्नइति॥तीव्रे अग॰
तिबहिर्व्यापारोच्छेदनसामर्थ्यसूचितं॥भक्तिरत्रप्रेमलक्षणा॥सचोपायभूतःसर्वदाविद्यमानः॥नहियोगेननिमग्नःशीघ्रमुत्ति १७
ष्ठति अनेनक्रियारूपस्पर्शेंद्रियव्याटत्तिरुक्ता विषयोपिभक्तानामनेननिरूपितः ४ ॥

एवंसर्वव्यापाररहित्यंनिरूप्यतस्यभक्तिलिंगजनकत्वंअन्यथातद्व्यर्थमितितदाह॥पुलकोद्भिन्नेति॥पुलकैरोमोद्गमैःउद्भिन्नानिसर्वां
गानियस्य॥अनेनानंदःपूर्णोमध्येजातइत्युक्तं बहिरपिनिर्गच्छतीत्याह मुंचन्मीलद्दृशाश्रुचइति॥मीलदितिअंतर्भोगोनिरूप्यते॥
नतुजलनिमग्नवत्केवलमंतःपूर्णता॥अश्रुचःआनंदाश्रूणि॥अनेनशोकंनिवार्यस्वयंनिर्गच्छतीतिसूचितं॥एवंरोमादीनांभैलिंगाना कि
नामुत्पत्तिमुक्त्वातेषांलिंगत्वमाह॥पूर्णार्थोलक्षितइति अर्थोभगवानानंदरूपःपूर्णोयस्मिन् विदुरेण नेत्रोदकादिनावातस्य
भक्तिदर्शनेनस्वस्यापिभक्तिर्जाताखात्मानंविकलीकरोतीतिभक्तेरतिपूरेणअयंबहुदूरेष्णावितइत्यपिलक्षितः भक्तेःज्ञापकत्वंनसंभ
वतीतिस्नेहस्यप्रसरउक्तः साहिशास्त्रेतोज्ञायमानायावत्कार्यमेवज्ञायते॥अनेनविसर्जनक्रियानिरूपिता ५ एवमेवसर्वेंद्रिया

पुलकोद्भिन्नसर्वांगोमुंचन्मीलद्दृशाश्रुचः॥पूर्णार्थोलक्षितस्तेनस्नेहप्रसरसंप्लुतः ५ शनकैर्भ
गवल्लोकान्नृलोकंपुनरागतः विमृज्यनेत्रेविदुरंप्रत्याहोद्धवउत्स्मयन् ६ ॥

णांभगवद्विषयत्वंतादृशोपिभगवंतंदृष्ट्वालब्धाश्रयःभगवन्माहात्म्यकथनार्थंविदुरंकृतार्थीकर्त्तुंभगवदिच्छयाभागवंतमाश्रयभूतंग्र
हीत्वैवसावधानतयासमागतइत्याह॥शनकैरिति॥सावधानत्वेनतस्यस्मरणमात्रंजातं। किंतुआपिवैकुंठेगत्वासमागतइत्याह॥भगवल्लो
कान्नृलोकंपुनरागतइति॥पुनःपदेनचपूर्वमप्युद्धवोवैकुंठादेवसमागतइतिज्ञायते॥अन्यथास्वधामनयमामपीतितस्यकामनाप्रतिह
तास्यात्॥पूर्वंतुभगवतआज्ञापरिपालनार्थंसमागतः॥इदानींतुभक्तस्यतस्यनेत्रेविमृज्येतिनिद्रापायोत्थितत्वंसूचितं॥स्वस्यपूर्ण
त्वेनमहत्वमल्पेष्वागतंगर्वायभवतीतितन्निवृत्त्यर्थमाह॥उत्स्मयन्निति॥उच्छ्वसोनिवृत्तिवाची॥यद्वाअब्जन्मुखविकाशंबोध
यति — तादृशोभूत्वाप्रत्याह ६ ॥ निर्गतस्मय

Indira Gandhi National
Centre for the Arts

तसु॰२ १८ एकेनसाधारणमुत्तरं॥कृष्णद्युमणीति कृष्णोहिसदानंदः सर्वदाद्युमणिरेव॥नहिकदाचिदपिसूर्योभूमौसमायाति॥तत्रस्थित
एवपरमिदंजगत्प्रकाशयति॥तथाभगवानप्यापिवैकुंठएवस्थितः अस्मदादिरूपांपृथ्वीप्रकाशितवान् सइदानीमबहिर्मुखान्
अस्मत्परभागस्थितान्प्रकाशयितुंनिम्लोचति तस्मिन्निम्लोचेसतिसर्वमेवजगत्पूर्वंतत्प्रकाशितमंधकारेणग्रस्यते सत्वंध
कारोजगरः आधिदैविकः॥इदंहिलोकेपरिदृश्यमानंतमः आधिभौतिकं॥कृतरूपंतुतमसावायोज्योतिःप्रलीयतइत्याध्या
त्मिकं॥आत्मसंस्थापनंतमइत्याधिदैविकं महत्तत्त्वंतुमुख्योब्रह्म अजस्यगरणंगिलनंयेनेतिग्रहनिगरणइतिधातोः॥

उद्धवउवाच कृष्णद्युमणिनिम्लोचेगीर्णेष्वजगरेण
ह किंपुनःकुशलंब्रूयांगतश्रीषुगृहेष्वहं ॥ ७ ॥

येनमहत्तत्त्वमपिग्रस्तंतेभगवत्प्रकाशावसानेतेनैवैतेभक्षिताः॥सहिअमुक्तानामभक्तानांचभक्तकोनियतस्तदाह हीति॥
हेतिपाठेभगवदीयानामेतन्महदाश्चर्यंकुशलंहिविद्यमानमुच्यते॥एतावत्तुज्ञातं॥अतःपरंकिंकुशलमितिनज्ञानइत्याह॥
किंपुनःकुशलंब्रूयामिति॥किंच॥कुशलंसर्वंलक्ष्मीकार्यंभगवत्कार्यंच॥तत्रभगवतानतेषुकिंचित्कुशलंकृतंलक्ष्मीकृतं
गृहेस्त्रीषुचभवति॥तल्लक्ष्म्यामपिगतायांगतश्रीषुगृहेषुसत्सुकिंकुशलंब्रूयामितिसर्वकुशलनिवृत्तिः॥अहमितिमहमेवो एम॰ १८
वेदितः॥एतादृशः अतोमांदृष्ट्वैवंज्ञातव्यंयदुक्तव्यं·वक्तव्यंतुनावशिष्यतइत्यर्थः ७ ॥ श्रीगोपालयनमः ॥
गृहेंपत्न्यांगृ।।२।।२=

नतुभगवतातेकथंनोपकृताः तत्राह॥दुर्भगेतित्रिभिः॥तामसादिगुणैस्तेभगवंतंनजानंति॥सामान्यतः अज्ञानं॥अन्यथाज्ञानंवि
रुद्धंचज्ञानमस्तिइतिभगवतातेनोपकृताः॥तेषांसामान्यतः अज्ञानंसहेतुकमुपपादयति॥अयंलोकोभूर्लोकः दुर्भगंतंभाग्यंयस्ता
दृशः बतेतिखेदे॥नहिभाग्येविद्यमानेस्वयंतिष्ठतिभगवतिगते॥अभाग्यंतुनास्तिकियत्कालंभगवदनुभवात्॥यथादुर्भगातथायं
लोकः॥एतावतावर्त्तनस्यदुर्भगतायरमन्यस्मो अयमितिजनात्मकः॥तथास्वयंभगवतिमवहृतवान् येनदुर्भगोज्ञातः या
दवास्तुसुतरामेवतथाज्ञाताः॥येचस्तुष्यंतोप्यंधाइवकूपेपतिताः सर्वतोमत्युरयंलोकः॥यादवास्त्वन्योन्यघातेनतथैवज्ञा
भमौ२
दुर्भगोवतलोकोयंयदवोनितरामपि॥येसंवसंतोनविदुर्हरिंमीनाइवोडुपं ८ ॥

ताइतिभावः॥अंधत्वमाह येसम्यगेकत्रवसंतोपिनविदुरिति॥ज्ञातेकिंस्यादित्याशंक्यदृष्टांतेनविपरीतेफलाभावमाह॥
मीनाइवोडुपमिति पूर्वंसमुद्रेमत्स्याश्चंद्रश्चएकत्रस्थिताः॥तेचेच्चंद्रंप्रार्थयेयुः॥तदाअमृतपानेनअमराभवेयुः॥स
त्यमृतमयः अमृतंचदातुंशक्तः॥मत्स्याश्चसर्वतोमत्त्यवोज्ञातिघातिनश्चतेषांअप्रार्थनायामज्ञानमेवमूलं॥तथायाद
वाःभगवदज्ञानान्नमुक्ताः किंतुसर्वतोमत्यवोजाताइत्यर्थः॥तस्यदानसामर्थ्यमाह॥उडुपमिति॥तदमृतलेशेनैवनक्ष
त्राणिप्रकाशंतेतन्निरोभावेपि।एवंभगवन्निरोभावेप्येतेप्रकाशंप्राप्नुयुः॥यदिजानीयुः॥सर्वदुःखहर्त्तत्वाद्भगवतः ८ ॥

Indira Gandhi National
Centre for the Arts

त०मु०२ १९ किंच मीनानांज्ञानसामर्थ्यमपिनास्ति एतेतुज्ञानसमर्थाअपिनज्ञातवंतइत्याह इंगितज्ञाइति॥भगवतश्चेष्टितमपिजानंति कदाचिद्भ
गवान्किंचिच्चिकीर्षयादिगादिकमपिपश्यति तदैवजानंत्येतत्करिष्यतीति॥एवंज्ञानशक्तिरुक्ता॥पुरुअधिकंप्रौढाः अतिक्रियाशक्ति
युक्ताः अतएवज्ञानक्रियाशक्तियुक्तत्वादेकारामाः॥भगवतासहएकत्रैवारामोयेषांशक्तिद्वयस्यफलमेतत् सात्वताइतिवैष्णवाः॥ए
वंलौकिकप्रकारेणज्ञानक्रियातत्फलभक्तियुक्ताअपिनत्वज्ञानंतीत्याह॥सात्वतामृषभमिति॥सप्तत्वैष्णवानांस्वामिनं॥मुक्ता
नामपिकामपूरकं॥भूतेष्वावासोयस्यपांचभौतिकदेहेस्थितं कारणभूतदेहेस्थितंवा अमंसतज्ञातवंतः अनेनविपरीतज्ञानंतेषा
स्थितंअतोज्ञातुमपिनयतंतइतिभावः ९ एवंश्लोकद्वयेनअज्ञानंस्वरूपाधारणेनान्यथाज्ञानंचोपपादयन्रागमुपपाद्यद्वेषमुप =
पादयति॥देवस्यमाययेति देवस्यज्ञानात्मकस्य॥मायया व्यामोहिकयाकेचनस्पृष्टाः आत्मानंपरंचनजानंति पशुवद्भगवतिव्यव

इंगितज्ञाःपुरुप्रौढाएकारामाश्चसात्वताः॥सात्वतामृषभंसर्वेभूतावासममंसत ९ ॥
देवस्यमाययास्पृष्टायेचान्यदसदाश्रिताः भ्राम्यतेधीर्नतद्वाक्यैरात्मन्युप्तात्मनोहरौ १०

हरंति॥येचपुनः माययासम्यग्व्याप्ताःशिशुपालादयः तेअसद्द्वेषमेवाश्रिताः॥यदसत्तअन्यद्भवति॥भगवत्संबंधंदूरीकरोति॥अथ
वा॥केचित्अन्यदेवाश्रिताः येनभगवतःभिन्नाभवंति॥अहंकारंगर्वसहितमित्यर्थः॥अन्येपुनश्चकारेणोक्ताः सर्वथातत्पदायो
ग्याअपिपाषंडाः असद्भगवन्निंदामेवाश्रिताः॥अनेनयेकेचित्ज्ञातुमपियतंतेतानपितेनाशयंतीतिभावः तर्हिसर्वएवनष्टाः
स्यात्इतिभगवदवतारफलंनजातमित्याशंक्याह भ्राम्यतेधीरिति॥नहिसर्वेषांबुद्धिंतेभ्रामयितुंशक्ताः॥येतद्वाक्यैर्भ्रमंतेअदृढ
मूलाःशास्त्ररहिताः तएवभ्रांताभवंति॥येत्वस्मदादयःआत्मरूपेभगवतिउप्तात्मानः तैर्नभ्रमंतेएकवचनंदुर्लभाभिप्रायेण॥
उप्तः आत्मायेनेति कृष्यादिभूमिंभित्वासर्वतःसंस्कृत्यशुद्धंबीजंयेरुप्यतेतद्बीजंजातांकुरंवायुनानगच्छति॥अमूलंपतितंत एम०
णादिकमेवगच्छति॥आत्मशब्देनचअंतःकरणंसमुद्भूताउक्ता॥भगवांस्तुस्वयंस्वचरणयोरुप्तंचित्तंकेषामपिनदूरीकरोतिसर्वदुः १९

बापुमा १८ ... दारलेख्यलेन २८

अतएवभगवान्ज्ञापनार्थमागतःप्रायेणसर्वानेवानधिकारिणोज्ञात्वास्वरूपमुपसंहृतवानित्याह॥प्रदर्श्येति॥स्वोपेक्षादोषा
भावायप्रकर्षेणदर्शयित्वाइंद्रियाणांबहिर्मुखत्वेनदर्शनकरणयोग्यतेपिस्वसामर्थ्यदत्वाप्रदर्शनंप्रशास्त्रार्थः।तेषांदृष्टीनांसाधनां
तराभावमाह॥अतप्ततपसामिति अतप्ततनूर्नतदामोऽश्नुतइतिश्रुतेः येननतप्तंतपःसत्वामःअपक्वः॥नहिसजलाधारोभवि
तुमर्हति जलनिकटेस्थितेप्यामघटेनजलंप्रक्षिप्यते॥स्वरूपनाशशंकया॥तथाभगवानपिस्वरूपंतेषांदृष्टौनस्थापितवान्॥त किंतत् ...वात्मिसर्थः४
पोव्यतिरेकेणभगवत्यन्यथाबुद्धिसंभवात्नाशएवस्यात्॥तर्हिएतावत्कालंकथंस्थापितवान्तत्राह॥अवितृप्तदृशामिति नवि

प्रदर्श्यातप्ततपसामवितृप्तदृशांनृणां॥ आदा
यांतरधाद्यस्तुस्वबिंबंलोकलोचनं ११ ॥

शेषेणतृप्तादृष्टिर्येषांवस्तुसामर्थ्यात्वस्तुविचारमकृत्वैवरूपमेवपश्यंतःस्थिताः तत्प्रायाजाताःसर्वथातृप्ताश्चेदन्यथाज्ञानी
युः॥अतउपसंहृतवानित्यर्थः॥नृणामिति एजसत्वं॥आदायेतिधर्मद्वारातेषांदृष्टिषुप्रविष्टंततआच्छिद्यस्वयमर्थ्यंतर्हितवान्॥
मध्येवास्थापितवान्॥अवितृप्तेषवहात्तृप्तादृष्टिर्येषांतेत्यधेमुखाःनीचदृष्टयः॥अतएवआदानेसुगमता स्वबिंबमितिस्वय
२ऽस्वरपरिग्रहीतंवपुः माद्रियोबिंबरूपं॥अनेनविदुरज्ञानंपराहं यथातेजोरूपंबिंबं तथाकृतिःसच्चिदानंदरूपेति॥किंच॥तद्रूपंलोकानांलोच
१स्वरूपंकर्मीधीनामिति नंज्ञानरूपं॥नहिपदार्थबोधव्यतिरेकेणचक्षुषाकिंचिज्जानाति॥चक्षुषश्चक्षुरितिश्रुतेः॥लोचनमेतदेव॥नहिलोचनंदृश्यंभ
वतिनिमेषमात्रेणचतिरोभवतीतितस्यतिरोभावोयुक्तइत्यर्थः॥तुशब्देनरूपांतरेणतिष्ठतीतिसूचितं ११ ॥

नहिदृश्यंभवितुमर्हति।किंचनिमषतस्वयंत्वतर्हितवान्इत्यर्थः

Indira Gandhi National
Centre for the Arts

त·सु·२ २० तद्रूपंसन्निधानंदूरूपमितिनिरूपयितुंसदुत्कर्षंचिदुत्कर्षमानंदोत्कर्षंचाहत्रिभिः॥यन्मर्त्यलीलौपयिकमिति॥इदंहिभगवतो
रूपं।सद्रूपंपंचभूतप्रकारेणपंचभूतसममपिपंचभूतेभ्योविशिष्यतइतिसदुत्कर्षः॥तत्रपृथिव्युत्कर्षमाह॥यन्मर्त्यलीलौपयि
कमिति मद्भावमापन्नामर्त्याः मद्भावंत्यजंतीतिवामर्त्याः पृथिव्यांयेभवंतितेषांयालीलास्वरूपक्लेशव्यतिरेकेणसर्वमनोहरचे ष्टितंतेन्च ३=
ष्टारूपातस्याऔपयिकंयोग्यं।मर्त्यानांनलीलाधारत्वं॥अमर्त्येषुमर्त्यलीलाभावः॥तथापिपार्थिवानांनयोग्यता॥अतोऽलौकि
कमेवयन्मनुष्यरूपसदृशंप्रसिद्धंसद्रूपंतदेवलीलायोग्यं॥कार्यसर्वदोषरहितात्॥किंचस्वयोगमायाबलंदर्शयतागृहीतं॥स्वस्या
साधारणरूपासाधनभूतासर्वभवनसमर्थायाकारणरूपामायातस्याबलंपरीक्षार्थंबलिनायथामहत्कर्मकार्यतेतथासतोनंतरू
पकअसिर्वसामर्थ्यएकत्रव्याप्तंप्रदर्शनीयमितितादृशंरूपंनिर्मितं॥नानाविधनिरूपाणिजलं·स्वच्छतयागृह्णाति॥तस्यजल

यन्मर्त्यलीलौपयिकंस्वयोगमायाबलंदर्शयतागृहीतं वि
स्मापनंस्वस्यचसौभगर्द्धेःपरंपदंभूषणभूषणांगं १२ ॥

स्योत्कर्षोप्राया॥वैकुंठस्थितमपिरूपंगृह्णातीति॥जलभावेपिजलोत्कर्षः॥किंच॥स्वस्यापिविस्मापनं॥स्वयंहितेजोमयः सर्वप्र
काशकेभ्यःसर्वमिवस्वरूपमन्येभ्यःप्रदर्शयति नतस्यकिंचित्विस्मयं॥तादृशस्यापेतद्विस्मापनंविस्मयजनकं॥अहोमयेतादृश
मपिलोकेप्रदर्श्यतइति॥तेजोरूपंसत्तेजसोत्कृष्टं॥किंच सौभगर्धेःपरंपदं।सौभाग्यसमृद्धेः अणिमाद्यष्टैश्वर्यस्यचपरमंस्था
नं॥प्राणस्ययोगस्यचकार्यमेतत्द्वयं॥तेनवायुरूपंसत्वायोरुत्कृष्टं॥सौभगमत्रसौंदर्यातिशयः सर्वपुरुषरोचकत्वंस्वच्छिः
समृद्धिः॥पुरुषोत्तमस्यापिरुचिजनकं अतएवैतद्रूपेभगवतोतिप्रीतिःप्राणादप्यधिका॥किंच॥भूषणभूषणांगमिति॥भू
षणानांभूषणभूतानिअंगानियस्य॥भूषणान्यंगदादीनिकौस्तुभांतानि॥तेषांभूषणमंगमेव॥यथेंद्रनीलमणिःस्वर्णमणी एम०
नां॥अनेननभस्तलेविमानविद्युदादयइवभगवद्रूपेआभरणानिशोभंतइति॥आकाशतुल्येप्याकाशादुत्कृष्टं १२ ॥ २०

व.सु१

एवंसदुत्कर्षंनिरूप्यचिदुत्कर्षमाह॥यद्धर्मसूनोरिति धर्मेहिज्ञानमभिव्यक्तंभवति॥धर्माज्ज्ञानंधर्मादप्युत्कृष्टं तस्यापिराजसू
ययागः धर्मोत्कर्षरूपः॥तादृशीमवस्थांप्राप्तत्वाधर्मेणाह बतेतिहर्षे सर्वेपिभगवद्रूपंदृष्ट्वाएवंज्ञातवंतः तद्रूपंवर्णयति दृ
क्स्वस्त्ययनमिति दृष्टीनांस्वलिकल्याणरूपंअयनंस्थानं सर्वेविषयादृष्टीनांनाशकाः येपिभगवद्विषयाः तेपिस्वरूपतः
कल्याणरूपानंकिंबहुनाविषयमात्रमेवतदृष्टिभयजनकंनतुपोषकं ज्ञानमेवतुदृष्टिपोषकं ज्ञानेंद्रियाणांचतद्वैवायनंसजातीय सद्गुणादृपरस्तभंगशब्दा इत्यर्थः ३=

अध इत्यां यद्धर्मसूनोर्बतराजसूयेनिरीक्ष्यदृक्स्वस्त्ययनंत्रिलोकः का
र्त्स्न्येनचाद्येहगतंविधातुरर्वाक्सृतौकौशलमित्यमन्यत १३

ज्ञानसजातीयंज्ञानेंद्रियं
एवप्रविष्टंसजातीयंवर्द्धते॥तेनविषयपक्षेपिकश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरितिन्यायेनयस्तदाज्ञानमेवपश्यतिचत्तुलदास्वस्त्यय
नंभवति॥चक्षुश्चक्षुरितिश्रुतेश्च॥तदात्रिलोकस्ययाबुद्धिर्जातातामाह॥इहचिद्रूपेभगवच्छरीरेकौशलंविधातुर्जगत्कर्तुर्गतं॥
भगवत्स्वरूपात् ३= अर्वाक्सृतावेवकौशलं॥इतोर्वाक्सृतत्वस्यष्टावेवजगत्कर्तुःसामर्थ्यं॥अथवा॥अर्वाक्सृतिर्मनुष्यसृष्टिः। अर्वाक्स्रोतस्त्वात्
तत्रयत्कौशलंतदिहगतं॥अर्वाक्सृतिकौशलेनइदंकर्तुंनशक्यतइत्यमन्यत॥तेनस्वस्त्ययनत्वात्सर्वलोकप्रतीतिसिद्धत्वात्स
त्वस्याधातिरिक्तंसत्तच्चिद्रूपमिति १३ ॥
नक्ष१

Indira Gandhi National Centre for the Arts

उत्कर्ष१—

तमु०२ आनंदरूपतामाह॥यस्यानुरागेति स्त्रियोत्यानंदप्रधनाः ताभ्यांदृष्टिएनंदेसवभवति॥याआनंदार्थमेवप्रयततेतेसाधनेवाप्रकृतेसाध आनंदसाभनेवा१

२१ तले नाभावात्निरुपाधिकस्त्रीदृष्टिविषयत्वेनानंदत्वमुच्यते॥यस्यभगवतः अनुरागेणप्लुतोयोहासः प्लुतोमनोधिकोवातत्सहितोयोरासोर

समूहात्मकोबहुनर्तकीयुक्तोनृत्यविशेषः तत्रयल्लीलावलोकनं॥तेनप्रतिलब्धोमानोयाभिः पूर्वमभिमानंपरित्यज्यभक्तिमार्गानुसारे

णभगवंतंप्रपन्नाः॥तत्रसख्यपर्यंतेभगवद्भजनेजातेअनुरागः प्रवृद्धः हाससहितोरासोभावोक्तारीहृदयेभगवदैकांर्पयति॥तत्रहास्या

द्यः कामसमधेप्रविष्टः अंतरमपिबोधयेदितिअनुरागेणप्लुतः कृतः परमप्रेमात्मकोजातः उत्साहजनकत्वात्हासोप्यपेक्षितः॥एतौवश्य

तापादकः॥अतएवतत्रवशीभूतस्यभगवतोयल्लीलावलोकनंतेनपूर्वंत्यक्तोपिमानः भगवतास्थापितः।दृष्टिद्वाएदत्तइतिप्रतिलब्धमा

नाभवंति अनेनदीनतयाभक्तिरसआक्षिप्तः।स्वतंत्राएवताभगवदानंदानुभवेसमर्थाजाताइत्यर्थः॥व्रजस्त्रियोगोकुलस्त्रियः॥व्रज

यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः॥व्रजस्त्रियोदृ

ग्भिरनुप्रवृत्तधियोवतस्थुः किलकृत्यशेषाः १४ श्रीकृष्णायनमः

नीतिव्रजः संदेकत्रस्थितिरहितः॥ तादृशीनांतत्वतयेकत्ररसास्वादनंस्वभावेनविरुध्यतइतिस्वभावविजयीभगवानानंदमयः।काम

साधकत्वाभावमाह॥दृग्भिरनुप्रवृत्तधियइति॥दृग्भिःसहअनुप्रवृत्ताःधियोयासांयथादृष्टिर्भगवतिप्रविष्टातत्संगेचेतनापितत्रैवगता॥

अतोनस्वशरीरेतासांकामभोगापेक्षा॥भगवत्स्वरूपएवानंदानुभवात्नकामेनानंदः॥नवास्वस्मिन्जातस्यानंदस्यानुभवः॥अंतःक

रणादीनांतत्रैवव्याप्टतत्वात्॥नात्मन्यानंदजननसामर्थ्यं॥अस्मिन्नर्थेनसंदेहःकर्तव्यइत्याह॥किलेति॥किंच॥कृत्यशेषाएवाव

तस्थुः कृत्येशेषोयासांताः॥प्रतिक्षणंभगवदात्मकतामेवप्राप्नुवंतीतिगृहकृत्येतासांकृत्यशेषएवतिष्ठति॥देहस्मरणाभावा एम०

त्॥अतोपिस्वस्मिन्नानंदोत्पत्तिः यथादूरेस्थितंदृष्टिर्विषयीकरोतितथादूरेस्थितंभगवंतमपिआनंदरूपंदृष्टिर्विषयीकरोति॥ २१

अन्यथाआनंदप्रेप्सूनामेवंस्थितिर्नस्यात् १४ ॥

एवंसच्चिदानंदत्वंस्वरूपस्योपपाद्य तत्रजीवस्येवभगवतोपिस्थितिर्वक्तव्येत्याशंक्यतत्रैवसच्चिदानंदरूपेअक्षरेस्थितस्यपुरुषोत्त

मस्यअग्निवत्तत्रप्रादुर्भावइत्याह॥स्वशांतरूपेष्विति॥अक्षरस्येवंप्रकारेणाविर्भावः॥तत्रभगवदाविर्भावश्चनिर्निमित्तंनभवति॥अ

न्यद्वाएतमर्थकारयन्विषमोभवेत॥अतःपुत्रशिक्षावत्भगवान्दैत्यान्मारयतीत्याह॥स्वसर्शांतेषुस्वरूपेषुदेवादिरूपेषुअशां

तैः इतरैःस्वरूपभूतैरेवदैत्यैः अर्द्यमानेषुसत्सुदयाविष्टचित्तःसर्वांशेनाप्यजः उभयसमाधानार्थंस्वयंसाक्षरःपुरुषोत्तमआ

विर्भूतइत्यर्थः॥कालकर्मादिप्रेरणाभावार्थमाह परावरेशइति॥परःकालादिरवरःकर्मादिःतेषांनियंता॥ननुपुरुषोनारायणः

णः प्रथमपुरुषोवातस्यानंदेनसहआविर्भावंलभतांकिंपुरुषोत्तमाविर्भावेनेत्यतआह॥महदंशयुक्तइति॥महानंशोयस्यप्रथम

पुरुषस्य॥तद्युक्तः स्पष्टार्थस्वस्मिन्प्रकृतिपुरुषमंतर्भाव्यैवाविर्भवति।अतएवस्वस्मिन्यशोदादिभिर्जगदुपलभ्यतेएतदेवहि

ब्रह्मलिंगं॥अन्यथाहृत्यर्थमाह भगवानिति यथाग्निरितिव्याख्यातं १५ एवमक्षरपुरुषोत्तमत्वंभगवद्देहात्मनोरूपपा

स्वशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा॥परावरेशोमहदंशयुक्तोह्यजोपिजातोभगवान्यथाग्निः १५

मांखेदयत्येतदजस्यजन्मविडंबनंयद्वसुदेवगेहे॥व्रजेचवासोरिभयादिवस्वयंपुराद्व्यवात्सीद्यदनंतवीर्यः १६ ॥

द्यलोकप्रतीतिविरोधंभगवद्वाक्यविरोधंचपरिहर्तुमाहद्वयेन।मांखेदयत्येतदिति॥भगवान्लोकवंचनार्थंप्राकृतदेहत्वंस्वा

पयितुंवसुदेवपुत्रत्वादिविडंबनंकरोति॥तद्विडंबनमपितस्यसर्वथाअयुक्तमिति।किंसर्वसमर्थस्यवंचनेनेतितथाकरणंमां

व३ खेदयतीत्याह॥अजस्यजन्मविडंबनमिति॥तत्रापिवसुदेवगेहेवसुदेवस्यभार्यायांदेवक्यां एतदपेक्षयालाभइवजलइवब्रह्मणोहृ

दयादिवआविर्भावविडंबनंसमीचीनमितितिमांखेदयति।किंच व्रजेचवासोमांखेदयति॥कुत्रवापिवैकुंठवासीलौकिकानाम

पिवासायोग्येगोकुलेकिमित्यवात्सीदिति।किंच॥अरिभयादिवजरासंधादिभिर्भीतइवपुरान्मथुरातःव्यवात्सीदितियत्पुरान्न

लाप्यहृद्धानांतरंगतमितिपरिदिवाल्परदेवाराः॥अनुकूलेहेतु॥यवंतत्रीर्यदृति॥तत्रैवेविचारः॥गुरुकुलादिसंग्रहार्थः

॥अरिभयादिति उभयाभावात्इवेत्युक्तं।नहिसर्वा

स्तदोऽइयः संभवंति॥नवातत्समयं।अत्रैवोभयात्

वर्तकत्वात्॥स्वयमितितांप्रधार ॥ १६

Indira Gandhi National Centre for the Arts

त॰ सु॰ २ वाक्यविरोधं परिहरति दुनोति चेत इति॥ पित्रोः पादावभिवंद्य कंसवधानंतरं देवकीवसुदेवपादावभिवंद्य भगवानेवमाह॥
२२ हे तात हे अंब कंसाद्उरुशंकितानां किं करिष्यतीति शंकया अतिभीतानां अस्माकमुपरि प्रसीदतं युवां प्रसन्नौ भवतमिति य
कंस१

दुनोति चेतः स्मरतो ममैतत् यदाह पादावभिवंद्य पित्रोः तातांब
कंसाद् उरुशंकितानां प्रसीदतं नो ऽकृतनिष्कृतीनां १७ ॥

देतद्वाक्यं तत्स्मरतो मम चेतः दुनोति दुःखितं करोति॥ अनेन सर्वाण्येव भगवद्वाक्यानि मानुषीं तनुमाश्रितं वदंति वासु एम॰
देवेति वसुदेवसुतं हि मामित्यादिकानि लोकव्यामोहार्थमिति व्याख्यातानि॥ यदा भगवद्वाक्यानामेवैषा गतिस्तदा तैर्व्या २२
मोहितानां वाक्यानां किं वक्तव्यमिति भावः १७ ॥

एवं सर्वविरोधं परिहृत्य साक्षात्पुरुषोत्तमत्वमुपपाद्य तस्य गुणकर्माणि निरूपयिष्यन् भक्तिमार्गसिद्ध्यर्थं आदौ भजनीयान् गुणान् निरू
पयति कोवेति भजनीयः स एव स्यात्। यः स्वयमभयः सकृदपि प्रपन्नं सर्वतोभयान्मोचयति। ऐहिकामुष्मिकीं चस्वकीं मोक्षं च प्रयच्छति॥
भजनसंदेहेपि अनुषंगादपि योमुक्तिं प्रयच्छति॥ स्वयं च निर्दोषः पूर्णगुणविग्रहः॥ अनधिकारिणोपि गतिं प्रयच्छति॥ परार्थं स्वकृतं नि
म॰ यमपि विहृद्य नमन्यते॥ एवं यः सप्तगुणो भवति॥ षडंगसहितभजनोपयोगिमहागुणवान् स भजनीय इति॥ सप्तस्वपि गुणेषु हेतुभू
तं गुणत्रयमस्य द्रवति॥ अतिसामर्थ्यं स्वरूपत एव सर्वोत्कर्षः परमदयाचेति सर्वेषामुपास्यो भवति तदाह सप्तभिः श्लोकैः॥ प्रत्येक
मेकैकेन सप्तगुणाः द्वाभ्यां त्रिभिस्तो द्वाभ्यां तैरेव मूलगुणा निरूप्यंते तत्र प्रथमम् अतिसामर्थ्यं निरूपयन् आश्रितसर्वदुःखदूरीक
र्तृत्वमाह कोवा अमुष्यांघ्रीति॥ सर्वे हि प्राणिनः सर्वानेव भजंते तत्तद्गुणदोषैः अनुरक्ता विरक्ताश्च भवंति एवमत्र निर्धारः॥ भज
नीयदोषव्यतिरेकेण सेवमानं न त्यजंति। लोके हि सर्वेषामेव देवानां मनुष्याणां वा सेवकाः तत्परित्यज्य भगवदीया जायंते न भगवदीयाः भजनीयं पुरुषं पर्यो॰

कोवा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान् विजिघ्रन्॥ यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार॥ १८॥
१ जायंते कदाचिद् एषमसंयत्विमंशात्स्रार्थं अन्यथा करिष्यामीति भगवन्मार्गे समागत्य तं त्यक्तुमिच्छति कौतुकादपि सोपि तथा कर्तुं न शक्नोति॥ भक्तिमार्गे
तदाह अमुष्यांघ्रिसरोजरेणुं सकृदपि विजिघ्रन् को वा विस्मर्तुमीशीतेति॥ अतः स एव ईशः यत्स्वीशितव्यान् वशीकरोति। रेणुघ्राण नमेत२
मार्गेण तद्गतः पूर्वोक्तः तं संघातं भगवदीयमेव करोति। तत्तदर्थोत्पादितसंघातः सर्वतो व्याप्तं तं रेणुं विस्मर्तुं समर्थो भवेत्। ननु क्लि
ष्टः संघातमपि विस्मरति क्लेशनाशकमेवाधिमन्यत इति चेत्॥ तत्राह॥ यो विस्फुरदिति॥ अयं हि कल्पतरुः यस्य भ्रूः पर्णसहिता काचि
च्छाखा॥ अनंतशाखस्य स एकाशाखा संहारकर्त्री स्वभावतः संतुष्टा सापि परमैश्वर्यं प्रयच्छति॥ अतस्तादृशशाखायां विद्यमानत्वात्स्वा
निष्टनाशे का शंका॥ यतो भूमेरेव सर्वाधारभूतायाः कृतः अंतो येन विशेषेण स्फुरतां यत्र भारसंभावनापि तत्र स्वयं गत्वा दूरीकरणस्वभा
वेन भ्रूविटपेन भारमपि तिरश्चकार॥ यदर्थं सर्वेषामपि देवादीनां महान् यत्नः यावत्ते दूरीकर्तुमायांति तावत्स भारः पूर्वमेव तिरो
भवति॥ यथा प्रद्योतोदिते सूर्यकिरणैरेव सर्वतमोनाशः सूर्यस्तु तमः पश्यत्यपि न॥ तथा भगवान् भक्तानामित्यर्थः १८ ॥
भवितव्यर्थं २=

Indira Gandhi National
Centre for the Arts

त॰सुर २३ दृष्टफलं तु भक्तानां नवक्तव्यमेव॥ यतो द्विषन्नपि भगवंतं श्रासुरोपि लोभाभिभूतः सर्वधर्मप्रतिपत्तो भगवत्संबंधमात्रेणैव नि द्वेषरूपेणापि १=
षिद्धेनापि ज्ञानिनोपि दुर्लभं सायुज्यं प्राप्तवान्॥ अयं चार्थः सर्वजनीनस्तदाह॥ दृष्टाभवद्भिरिति॥ कृष्णं द्विषतोपि चैद्यस्य शि
शुपालस्य राजसूयसभायां सर्वैरेव राजभिः तत्र सेवायां क्रियमाणायां या सिद्धिः सायुज्यरूपा सा भवद्भिरेव दृष्टा॥ नन्विति संबोधनं सं
मत्यर्थं॥ यां सिद्धिं योगिनः स्वभावतश्च तमाः फलपर्यवसायिना सर्वसाधनसहितेनापि योगेन वांछामेव केवलं कुर्वंति॥ ननु भगव
त्संबंधव्यतिरेकेण तां प्राप्नुवंति॥ अतः को वा तत्संबंधभावरूपं भगवद्विरहं सहेत॥ भगवत्संबंधो हि कोटिकल्पदृष्टा द्रष्टव्यधि

दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोपि सिद्धिः॥ यां योगिनः संस्पृहयंति सम्यक् योगेन क
स्तद्विरहं सहेत १९ तथैव चामी नरलोकवीरा य आहवे कृष्णमुखारविंदं॥ नेत्रैः पिबंतो नयना
भिरामं पार्थास्त्रपूताः परमापुरस्य २०

कः संप्राप्तः केन वा त्यक्तुं शक्य इत्यर्थः १९ एवमिष्टसिद्धिहेतुत्व अनिष्टनिवारकं भगवद्गुणं निरूप्य स्वरूपं निरूपयन् संबंधव्य
तिरेकेणापि केवलस्वरूपसंबंधेनैव पूर्वोक्तादप्यधिकं फलं प्रयच्छतीत्याह॥ तथैव चामी इति॥ ये नरलोकवीराः अन्ये च भग
वत्संबंधरहिताः भगवंतं ज्ञानं त्यपि न ते प्याहवे रूपसौंदर्येणैव व्यामुग्धाः नेत्रैः नयनाभिरामं लावण्यामृतपूरं कृष्णमुखा एम॰
रविंदं पश्यंतः भगवत्सायुज्ये प्रतिबंधकरूपं अमुं देहं निराकृत्य पार्थास्त्रैः पूताः वह एव व्यापिवैकुंठं तच्चरणारविंदं प्रा २३
पुः॥ एतादृशे का फलचिंता २० ॥

सु:

अत्र परमेकमेव बाधकं॥ व्यामोहिका भगवल्लीला तया चेन्न व्यामुग्धाः सा हि भगवतः सर्वोत्तमत्वादिगुणान् भजनीयतां
च शास्त्ररहितानां बुद्धौ स्थितामपनयति॥ तत्र सावधानेन भाव्यमित्याह स्वाम्यं॥ स्वयं त्विति॥ एषा लीला व्यामोहिका या
सर्वोत्तमत्व स्वयमीश्वरो भूत्वा सर्वोत्तमः सर्वाधमस्य लघुस्सस्वयं तं तादृशं विधाय कैंकर्यं करोतीति॥ येन श्रौतानां हृदये अयमेतादृश ए किंकरएव३=
शिशुपाला वेति श्रौतो मन्येत॥ तत्र प्रथमं तस्य सर्वोत्तमत्वमाह॥ तुशब्दो श्रौतप्रतीतिव्याहृत्यर्थः॥ न विद्यते लोके वेदे वा साम्यमतिशयश्च
दि:४= यस्य यस्मात् स्वरूपतो गुणतश्च प्रसिद्धापि त्र्यधीशः किंच॥ अपेक्षितमपि किमपि नावशिष्यते स्य यल्लौकिकन्यायेन कैंक

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः॥
बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः २१

र्यहेतुर्भवति तदाह॥ स्वाराज्यलक्ष्म्या स्वस्मिन्नेव यद्राज्यं सर्वमिव हि जगत् स्वस्मिन्नेव वर्त्तते यः स्वस्मिन् राज्यं करोति स सर्व
स्मिन्नेव करोति॥ तत्र या लक्ष्मीः निरतिशयानंदरूपा तयैव प्राप्ताः सर्वे कामा येन॥ अस्यैवानंदस्य अन्याभिभूतानि मात्रा
मुपजीवंतीति श्रुतेः॥ किंच॥ लोकेपि तस्यैश्वर्यं सिद्धं यतो बलिं हरद्भिः चिरकालीनैर्लोकपालैः किरीटकोटिभिः ईडितं
स्तुतं पादपीठं यस्य यथापदार्थकरणयत्नः तथा किरीटैरपि पीठस्य स्तोत्रं॥ स्वयमपकृष्टभावेन नम्राः सन्तः स्वसंबंधिनं स पीठ१
र्वोत्कृष्टत्वेन बोधयंतीति॥ यद्वा नोरुत शब्देनेति केचित् २१ ॥

Indira Gandhi National Centre for the Arts

त॰ स॰ २
२४

एतादृशः स्वसिंहासने स्थितः स्वानंदलक्ष्मीमनुभवन्नेवस्थातुं योग्यः न तु कैंकर्यकर्तुं योग्य इत्याह॥ तत्रास्य कैंकर्यमिति॥ किंकरस्य भावः कैंकर्यं॥ तदिति प्रसिद्धं॥ तस्येति पूर्वोक्तस्य॥ ननु करोतु किमपि भगवान् किं तवानेन विचारेणेत्याशंक्याह॥ अलंभता इति॥ वयमत्यर्थं भगवता भृताः धृताः पोषिता वा सेवार्थमेव वयं पोषिताः यद्दिसर्गादेव सेवापि भगवतः कर्तुमास्मात् तस्मिन्नपि पदे वयं मुख्यसेवार्थमुत्पादिताः अस्मद्द्वारैव कारयतु॥ तदर्थमस्मानुत्पाद्य पुनः स्वयमेव करणात् तत्कैंकर्यमस्मान् विग्लापयति स्वयं ग्लायते॥ अस्मानपि ग्लाययति ग्लापयतीति पाठे ग्लपधातुः ग्लौ पार्थः॥ अंगेति स्वदुःखख्यापनयोग्यमित्रसंबो

तत्रास्य कैंकर्यमलंभृतात्रो विग्लापयत्यंग यदुग्रसेनं ति
ष्ठन्निषण्णं परमेष्ठ्यधिष्ण्येन्यबोधयद्देवनिधारयेति २२

धनं॥ उग्रसेनमिति॥ उग्रसेनाय स्वस्य कंसपितातं परमेष्ठ्यधिष्ण्ये ब्रह्मणः स्थाने अधिष्ण्यं धिष्ण्यमिति पर्यायः॥ तस्मिन्निषण्णं स्वयं तिष्ठन् समागतान् सर्वानेवन्यबोधयत्॥ हे देव अयमागतः नमस्करोति पश्येति न्यबोधयत् इदं स्वपतिहीनदौवारिककृत्यं॥ यद्यपि सर्वं कृत्यं भगवत्कर्तृकमेव तथापि रूपांतरमेव कृत्वा करोति॥ यदि स्वयमेव कर्तव्यं तदा विपरीतं किं न करोति इति चित्तक्लेशः देवसभायां यत्र ब्रह्मा उपविशति॥ तद्राजासनमिति परमेष्ठ्यधिष्ण्यमुक्तं॥ अनेन ब्राह्मणोपि पितस्मानभुत्थानं निरूपितं॥ अप्रतिकार्यश्चायं क्लेशः २२ ॥ तद्विपरीतं यथा स्यात्तथा॥ किंकरस्य देवतीर्थः संक्षेपेणार्थः २=
६ पदं २=

एम॰ कैंकर्य १
२४

३३ वसा १

एवं रूपं मोहनं चोक्त्वा तस्याभिप्रायापरिज्ञानात् अज्ञस्य तवक्लेश इत्याशंक्य तदभिप्रायमपि जानामि तथापि क्लेश इति वक्तुं तस्य दयां निरूपयति॥ क्लेशस्तु बुद्धिकृतो न भगवत्कृतः स हि भगवान् सर्वानेव भक्तान् सेवकान् आत्मनोप्यधिकत्वेन ज्ञापयति तत्रास्मास्वहनमयुक्तं॥ उग्रसेनोपि नवक्तव्यः॥ भगवतैव तथा क्रियमाणत्वात् विपरीतं च करोतिपूर्वश्लोके तथैव कथनात् तस्मात्प्रमाणबलमुल्लंघ्य प्रमेयबलेन तथा करोतीति तत्र प्रमेयबलं निरूपयन् भजनीयत्वं स्थापयति॥ अहो बकीयमिति॥ यथा भगवतः स्तनं धनं सर्वाश्चर्यकरं फलं दुर्लभस्य तुच्छ फलसाधकं तथा तु तुच्छसाधनरहितस्यापि दुर्लभफलदानमित्यहो आश्चर्यं॥ वकस्य भगिनी दैत्यबकरूपा तद्भ्रातृत्वात्तोपि न मुक्ता भवति॥ इयमिति बुद्ध्या भगवत्संगे साप्युपस्थिता॥ स्तनकालकूटमिति स्तने विद्यमानं कालकूटं कालानां कूटं समूहः यतः सहस्रं हि कालाः सर्पाः संति॥ ते सर्वे तस्याः स्तने एकीभूताः॥ इति ते तद्धि रहंव सह रन्तीति मुक्तं २२
=
२ वकवत्स्यादिभेन
भगवान् निवस्य पि स्मृतिपथमागतेम ३ थं २

अहो बकीयं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ले
भे गतिं धात्र्युचितां ततोन्यं कं वा दयालुं शरणं व्रजेम २३ ॥

एतदैश्वर्यज्ञाने हेतु पूतना को केन जीवहरणमिति साधुक्ते १=
अतः कालानां कूटं॥ यत्तादृशं स्तनममपाययत्॥ ज्ञानहेतुं पक्षेपि तस्यां दुष्टत्वमाह॥ जिघांसयेति॥ हंतुमिच्छया पूर्वमपि तस्याः दुष्टत्वमाह॥ असाध्वीति॥ अनेन दैत्यधर्मोपि तस्या नास्तीत्युक्तं॥ ते हि जितेंद्रियाः तथा प्याकृतिक्रिययोः यशोदातुल्यत्वात् तत्कृतं दोषमविचार्यैव क्रियाफलं दत्तवान् अनेन भगवत्स्वरूपं यथा कथंचिदपि संबद्धं साधनांतरनिरपेक्षं फलं साधयतीत्युक्तं॥ भगवांश्च गुणानेव स्मृत्वा तिन दोषान् अतः परमदयालुरित्याह कं वा दयालुमिति अन्यस्तु दयालुः देत्यमपेक्षते तेन प्रतीवा दोषा भावेवा अयं तु किमपि नापेक्षत इति ततोन्यं कं वा दयालुं शरणं व्रजेम शरणपदेन च सेवाभ
कोदि कम्पित्वादिर्न
स्वप्राणपोषणार्थं स्तनं शिशुनि धृती व्यभिचारित्यतीमर्थः ८=

Indira Gandhi National Centre for the Arts

इतिवचनान्मध्येऽवतारदशायामिवयोः भगवंतं साक्षान्न प्राप्नुतस्तथेति प्रतीयते २=

हेहेए ४॥ देवा २१७८ मध्यंतमः २१७८

त. सु. २ २५

मध्यए वादद्वतरता तद् द्वारा इत्यर्थः ४=

ननु निबंधायामसुरी मतेति त्र्यामुर्यां संपदि ज्ञाताः कथं मुच्यंते तानहं द्विषतः क्रूरानिति भगवतैवान्यथा प्रतिज्ञानात्तत्राह ॥ मन्येऽसुरानिति ॥ असुरानहं भागवतानेव मन्ये मामप्राप्यैवेति वचनात् ये प्राप्नुवंति भगवंतं द्वेष्यादिनापि तेषामधमगत्यर्थं अप्राप्यभावात् मुक्ता एव भवंति ॥ ये तु मामात्मपरदेहेषु प्रद्विषंत इति द्वेषसाधनाः भगवद्प्राप्तिसाध्या निरूपिताः ते जगद्रूपमेव भगवंतं द्विषंति न तु साक्षात् ॥ ये तु साक्षाद्द्विषंति ते प्राप्नुवंत्येव ॥ केनचिदंतः करणधर्मेण ते भगवत्संबंधिन इति भागवताः ये तु सहजा दानवाः दानवा लुतमोल्या इति वैष्णवे निरूपिताः ॥ ते वेदेषु पि देवप्रतिपक्षत्वेन निरूपिताः न मुच्यंते इति केचित् ॥ तन्न मुच्यमानेषु भूतनादिषु नसहजासुरत्वं किं त्वसुरावेशः स्मतु भगवत्संबंधेगच्छतीति तेषां मुक्तिर्युक्तेति ॥ एतदर्थं भेदवादे वेनाशिकी च प्रक्रिया मोहकवाक्यवत् तत्सविरुद्धं भगवद्वाक्यं वेदवाक्यानि च मन्यंते तेऽबहुवाक्यविरोधमुद्विग्नाः ॥ भक्त्यर्थवा तथा वदंतीति लोकशिक्षार्थं वा ॥ असुराणां भगवत्प्राप्तावुपायमाह ॥ संरंभमार्गाभिनिविष्टचित्तानिति ॥ क्रोधः संरंभः एवं भगवत्प्रापको मार्गः तत्राभिनिविष्टं चित्तं येषां क्रोधमार्गेण तेषां चित्तं भगवति प्रविशतीत्यर्थः ॥ ज्ञानेन

आवेश ५ गीतां ६

मन्येऽसुरान् भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् । ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमापतंतं ॥ २४

प्रयत्नानामिव भगवद्विषयकत्वेन क्रोधस्यापि भगवन्मार्गत्वं ॥ भगवतः परमदयालुत्वसिध्यर्थं क्रोधस्यापि मुक्तिहेतुत्वं निरूप्यते ॥ अन्यथा दयालुत्वं न स्यात् ॥ तस्माद्वैरवैरेवमंगीकर्तव्यं दैत्यानां मुक्त्यभावो वा भगवतो दया वा ॥ तत्रापि बलिष्ठाद ये त्वाह ॥ ये संयुगे चक्षतेति ॥ तेहि युद्धमर्त्तुं समायांति तेषु चेद्भगवतो दयां न भवेत्तदा परो द्वेष्टि तो ऽन्येन मारयेत् ॥ न तु स्वयं प्रत्यक्षो भवेत् ॥ ननु तथा सति भक्तिमार्गविरोध इति चेत्तत्राह ॥ तार्क्ष्यपुत्रमिति ॥ अंसे सुनाभं चक्रमायुधं यस्य तादृशं गरुडं पश्यंति ॥ अंसे सुनाभायुधमित्यलुक्समासः ॥ एतावान्भेदो भक्तदैत्ययोः भक्ताः सर्वरूपं सर्वदा भगवंतं पश्यंति । गरुडाधिरूढं च ॥ अन्ये सहसंयुगे च ॥ दैत्यास्तु संयुग एव गरुडमेव पश्यंति ॥ परं भगवदारूढं भगवानारूढो यमिति ॥ अयमर्थः कालात्मको गरुडः ॥ तदुपरि च भगवान् ॥ अतः कालं प्राप्य भगवंतं प्राप्नुवंति न तु जीवंत इति विशेष इति ॥ २४ ॥

गतागतद्रष्टव्यहतो ष्ठ५

एम० २५

नरकादीनां

भक्ता यथा पश्यंति हरिं तथा दैत्या न पश्यंति गरुडादि रोषः ४=

अनेन द्वितीयस्कंधस्थत्वो द्विष्यापदस्य तत्तां भगवतां साक्षात्परंपरया हतानामेवाचसाक्षात् ततम सिलय उक्तस्य द्वह्रत्कल्पाभिप्रायेण न त्वेतत्साप्तकल्पानुसारे त्विति ज्ञेयं १=

---

इत्येवसर्गेहरितो भगवद्विषयकमात्रारूपो ऽधिकारकृत ४=

एकेनमत्योरक्षा परभ्याममार्गितोदेवेंद्र भजनतोरक्षास्यर्शः २=

क्षाम्याग भोक्षाम्यांरसोक्षाम्यां रूपं २=

प्रपन्नतोषीजने भगवतोरा सर्वतिलीलासकृदेकेन तिद्दशश्लोकानांविनिवेशः २=

एवं भगवतः स्वरूपगुणानुक्त्वा विदुरस्य तद्विषयकमज्ञानं दूरीकृत्य पृष्टकथायामुत्तरं वदन् पंचापि मात्रा निरूपयति दशभिः श्लोकैः ॥ वसुदेवस्य देवक्यामित्यादिभिः ॥ गंधो भगवतः स्थानं रसं क्रीडापि बालकैः ॥ रूपं त्रिभंगिललितं सर्वदोषनिवारकं १ मत्स्योर्मार्गतोरत्नात्स्पर्शोभिधीयते ॥ लोकवेदविरोधेन मनोवागनुसारतः प्रपन्ने भगवल्लीलाद्दुःखाभावसुखात्मिका सशब्दोनान्यइत्येष मात्रा रूपो धिकारकृत २ वसुदेवस्य भार्यायां देवक्यां भोजेंद्रस्य कंसस्य बंधनं यस्मिन् तादृशे गृहे वसुदेवस्य देवकीनिमित्तं भोजेंद्रबंधने जातो वा तात्पर्यस्य निरूपितत्वात् ॥ यथा लोकसिद्धा तथा कथां निरूपयति ॥ सर्वभावविकाराणां तुल्यत्वाय ॥ अस्याः पृथिव्याः शं

वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने ॥ चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥ २५ ततो
नंदव्रजमितः पित्रा कंसाद्विबिभ्यता ॥ एकादश समास्तत्र गूढार्चिः सबलोऽवसत् ॥ २६ ॥

कल्याणं चिकीर्षुः पृथिवीसुखार्थं भगवदवतार इति प्रयोजनं ॥ ब्रह्मप्रार्थनापि भक्तोद्धारार्था ॥ अपि शब्देनान्येषामपि प्रार्थना सर्वोद्धारार्था २५ ततो नंदेति ॥ ततो मथुरायां जननानंतरं पित्रा वसुदेवेन कंसाद्बिभ्यता नंदव्रजमितः प्राप्तः ॥ तत्र चोपसंहृततेजा भूत्वा एकादश समाः एकादश वर्षाणि बलभद्रसहितः स एव निजसहाय इति तत्सहितः अवसत् ॥ एते हि दश मात्रात्मकाः द्वौ द्वौ च विषयात्मकौ जनने हेतुत्रयं ॥ गोकुलसमागमने हेतुद्वयं अजेनापीत्यनुषंगात् ॥ इदं च न प्रयोजनमधर्मप्रविशति ॥ भिन्नतया ख्यातं त्र्येण निरूपणात् ॥ इदं चांतरिक्षस्थानमिव ॥ अत एव रुद्रप्रीत्यर्थमेकादश समा अवसत् ॥ वायोर्लुप्तरूपतया प्रीत्यर्थं गूढार्चित्वं ॥ सबलत्वं च ॥ समा वर्षाः ॥ २६ ॥

पर्वसिन्यदा पीश्लोकेस्मिन्नापदार्था सर्व त्रमात्रा रूपाः दशभिः श्लोकैरित्यर्थः मात्रारूपो वैदविवर्थः ४=

नारवधामिननिप्र गृहे किंचन्यत्रेति नंदगोकुलस्थानं वायोरिवपदं २= अंतरिक्षवासि २=

अंतरिक्षप्राप्तिः तस्य वायोः श्री पद्मिनिधो ज्ञातुल्यत्वरूपत्वगूढ तेजो रूपतया न तया चतिरोधान २=

Indira Gandhi National Centre for the Arts

पूर्वमुक्तमिति तत्रैव २ गोपगृहान्निधानत्वात् २ श्रीवत्सलितवाहनानेंद्रियद्वारसिस्त्रो मुग्धरूपावद्रसनास्तमी मु खेनागच्छमीतिकर्मेंद्रियशब्दरूपत्वादित्यर्थः १=

श्रोत्रवद्देवलीलामृते द्वारे २=          मूलमध्ये १= श्लोक २=

त॰मु॰२
२६
कायोरिव स्वस्यानिजो: प्राणान्नामिव वत्सपानां ३=

एवंभिन्नतयास्थितस्य पूर्वोक्तप्रयोजनाभावात् शिरोभूतवासुदेवरूपेण क्रीडांकृतवानित्याहाष्टभिः॥ सर्वं वै शीर्षेणाग्रग ण्मीति श्रुतेः॥ तत्र श्रोत्रे आह परीत इति द्वाभ्यां॥ वक्ष्यमेतत् द्वयं स्वैकधर्मार्थत्वेन॥ श्रोत्रमेतद्द्वयं प्रकरणार्थत्वेन॥ वत्सपैर्गो पालैर्बालकैर्वेष्टितः॥ वत्सान्चारयन्निति क्रियैव वायोः प्राणानां च व्याहरत् विहारं कृतवान् बालैः सह क्रीडितवानित्यर्थः ॥ बाधभावायाह॥ यमुनोपवन इति॥ यमुनायाः समीपवने॰ चित्तोद्वेगाभावाय कूजद्भिर्द्विजैः संकुलितः अंघ्रिपायस्मिन्॥ भगवद्भक्ताः वेदकल्पद्रुमेषु स्थिताः भक्तिमाश्रित्य भगवंतं गायंतीत्युक्तं भवति॥ २७॥ वने क्रीडामुक्त्वा संध्यादिषु व्रजे

परीतो वत्सपैर्वत्सान् चारयन् व्याहरद्विभुः॥ यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे
२७ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसां॥ रुदन्निव हसन्मुग्धबालसिंहावलोक
नः २८

क्रीडामाह॥ कौमारीं दर्शयंश्चेष्टामिति॥ कुमारसंबंधिनीं पंचवर्षपर्यंतं जायमानां पंचापि लीलाः पंचवर्षैः क्रियमाणाः व्र जवासिनां पंचविधानां त्रिविधाः पुरुषाः द्विविधाः स्त्रियः न हि सात्विकाः स्त्रियः संति॥ अतः सर्वासामेव प्रेक्षणीयां चेष्टां प्र दर्शयन् व्याहरदिति संबंधः॥ समर्थो हि स सर्वकर्तुं दर्शयन्नित्यनेन स्वयं जयान कृतवानेव॥ तत्र प्रथमं रुदन्निव तामसान् देव तुष्यंति रुदन् प्रीत्यर्थं च॰ हसन्निति राजसः मुग्धभावेन तामसाः बालभावेन राजसाः। सिंहावलोकनेन सात्विकाः अत्रोप्या गतः पूर्वभक्तान् स्मरतीति रुदन्निव हसन्। मुग्धो यो बालसिंहः तद्वदवलोकनं यस्य २८ ॥ श्रीगोपालाय नमः ॥ ॥ प्रक्रिया: एम॰ २६

तुष्यो॥ २२          नंदव्रजे भगवा न २८=

पौगंडलीलामाह॥ स एवेति॥ शिष्टेषु षट्सु वर्षेषु षड्भिः श्लोकैर्विशेषतः॥ तास्ता लीला इहोद्दिष्टाः क्रमो नात्र विवक्षि तः १ स एव यः पूर्वमुक्तः गोधनं गवां समूहं लक्ष्मीनिकेतमिति सुंदरं॥ चारणे हेतुः। सितागावो हृष्टायत्रेति धर्मप्रा धान्येन निरूपितं अतस्तच्चारणं धर्मकरणमेवेत्युक्तं॥ अनुगान् स्वाज्ञया धर्मकर्तॄन् शीघ्रमेव फलसंबंधान् कृतवानित्यभि प्रायेण-ह॥ अनुगान् स्वस्य पश्चाद्गा गोपजीविनः गोपान् वेणुवादनं कृत्वा व्रह्मामृतं पाययित्वा परब्रह्मानंदे अरीरमत् र मयामास २९॥ तत्र बाधकांस्तु लीलयैव दूरीकृतवानित्याह॥ प्रयुक्तानिति॥ भोजराजेन कंसेन प्रेषितान् नानारूपधारि

स एव गोधनं लक्ष्मीनिकेतं सितगो वृषं॥ चारयन्ननुगान् गोपान् रणद्वेणुररीरमत्
२९ प्रयुक्तान् भोजराजेन मायिनः कामरूपिणः॥ लीलया व्यनुदत्तांस्तान् बालः क्री
डनकानिव ३० विपन्नान्विषपानेन निगृह्य भुजगाधिपं॥ उत्थाप्यापाययद्गावस्तत्तो
यं प्रकृतिस्थितं ३१

णो दैत्यान् व्यामोहनार्थं समागतान् लीलयैव क्रीडारूपयैव विशेषेणानुदत्॥ दूरीकृतवान्॥ तांस्तानिति प्रसिद्धान्॥ श्रमाभावायाह बालः क्रीडनकानिवेति॥ वस्त्रपुत्रिकाः काष्ठादिक्रीडासाधनानि वा॥ इयमेकवर्षकृतं ३० सप्तव र्षकृत्यमाह॥ विपन्नान्विषपानेनेति कालीयह्रदे विषतोयपानेन विपन्नान् मृतान् भुजगाधिपं निगृह्य तं मारकं दंडयि त्वा तान् सजीवानुत्थाप्य तदेव तोयं गाश्च अपाययत्॥ गाव इति गाः॥ भुजगाधिपः कालीयः तत्तोयं कालीयह्रदतोयं प्र कृत्या स्थितं विषरहितं ३१ ॥

Indira Gandhi National
Centre for the Arts

त्रसु॰२ अयाजयदिति॥सप्तमीतालीला॥गोसवेनेतिइंद्रयागंभंक्त्वावैश्यलोमगावःस्वयंतेनेतिगोसवं॥गोहृद्धिकरंवैश्यलोमात्मकंगोय
२७ एजंनंदं॥द्विजोत्तमैरितितेषांयाजकत्वंनतस्येतिज्ञापितं॥इंद्रयागभंगेनतथाकरणेहेतुः॥वित्तस्येति॥कोद्यवधिद्रव्यस्यभार
रूपेणस्थितस्यसद्ययंचिकीर्षुः॥पूर्वस्थितस्यान्यथाकरणेसामर्थ्यंविभुरिति ३२ अष्टमवर्षीदिकृत्यमाह॥वर्षतीइंद्र
तिदेवताप्रधानपक्षोमुख्यइतिज्ञापयितुमिंद्रेणवृष्टिंकारितवान्पुष्टिलीलांचख्यापयितुंगोवर्द्धनोद्धरणंचकृतवान् वु
जविषयककोपाद्धेतोः॥इंद्रेमेघद्वाराएववर्षतिसतिव्रजनाशमाशंक्यव्रजोरक्षितः॥इंद्रस्यकथमेवंकरणमित्याशंक्याह॥

अयाजयद्गोसवेनगोपराजंद्विजोत्तमैः॥वित्तस्यचोरुभारस्यचिकीर्षन्सद्ययंविभुः॥ ३२॥व
र्षतींद्रेव्रजःकोपात्भग्नमानेतिविह्वलः॥गोत्रलीलातपत्रेणत्रातोभद्रानुगृह्णता॥ ३३ ॥

भग्नोमानोयस्यतस्मिन्सतिपश्चाद्वर्षतिसतिगोत्रःपर्वतःसएवलीलातपत्रंपृथिवीरक्षकाअपिधर्मिष्ठत्वात्भगवता गोत्रायंतेइतिव्युत्पत्तेः२=
उद्धृताः॥लीलयाआतपत्रमिवलीलातपत्रंछत्राकंवात्रातोरक्षितः॥भद्रेतिसंबोधनंउक्तविश्वासाय भवानपितथा एस॰
रक्षितइतिज्ञापनार्थंवा॥अन्यथापिपालयितुंसमर्थःसस्वस्यपरममनुग्रहंव्रजविषयकंलोकेख्यापयितुंपर्वतोद्धरणं २७
कृतवानित्यभिप्रायेणाह अनुगृह्णतेति ३३ ॥

वर्षचतुष्टयकृत्यमाह॥शरच्छशिकरैर्मृष्टमिति॥प्रत्यग्रोदितचंद्रकिरणैर्मृष्टमुज्वलितंरजनीमुखंमानयन्रेमे॥
रजनीस्त्रीशशीभर्त्ता॥सहिवहुकालेनसमागमनतः मानिनींतांअंतस्तापेनक्लिष्टांस्वकरैर्मृजन्मानापनोदनंकरोति॥न
तावतातस्यामानोपगच्छति॥साहिदेवतानिःकलंकेनरमणमपेक्षते॥सहिभर्त्ताशशी शशकलंकयुक्तः अतउभय
समाधनार्थंस्वयमुपायंकृतवान् रजनीस्त्रीसहस्ररूपांकृत्वाचंद्रस्वमनोभवंविधायतस्मनोधिष्ठात्रदेवतात्वसिध्य
र्थंशब्दब्रह्मोक्तिरन्परमांरतिक्रीडांकृतवान्॥शरत्कालीनःशशीतिवर्षाकालेरजनीमुखेदृष्टिर्भवतीतिरुद्धतीवस्य॥ रजनी१

शरच्छशिकरैर्मृष्टंमानयनरजनीमुखं गायन्कलपदैरेमेस्त्रीणांमंड
लमंडनः ३४ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेद्वितीयोध्यायः॥

प्रादि॰१
अतएवतदनंतरकालेउत्पन्नस्वकरैर्मार्जनंकरोतीतियुक्तं॥नत्वन्येरजनीमुखंमानयंति॥महतांतस्मिन्कालेक्री रजनीमुखे१
मोदोषःरसनरसात्मको डाभावात्।दोषस्तुरसात्मकएवनभवति इतिनिर्दोषतयामाननंभगवदेकनिष्ठतयैवस्त्रीणांमंडलंमंडनंयस्य॥मंड
योरसात्मकःसनदोष लस्यवामंडनभूतः सुवर्णेनीलमणिवत्कषपाषाणेवासुवर्णरेखातद्वत्॥इतिश्रीभागवतसुबोधिन्यांश्रीमद्वल्लभदी
इतिवाभावः२= क्षितविरचितायांद्वितीयाध्यायविवरणं॥ ॥

प्रतिलेखश्रीगोभगवदेव,तिथि लेखकत्ततत्वगा२=

Indira Gandhi National
Centre for the Arts

तत्वसंख्याकाः २श्लोकाश्चतथा२ः

त.सु.२ २८ तृतीयेमध्यचरितंकृष्णस्यविनिरूप्यते॥इंद्रियाणांतथासर्गमधिकारस्यपोषकं॥आविर्भूतोहिभगवान्तत्वान्येवप्र
वर्त्तयन् सर्वास्थितिंवितनुतेतावंतोत्रततोगुणाः २ दशेंद्रियाणिचत्वारिमनआदीनिदेवताः॥अष्टाविंशतिरूपा
णिनिरूप्यंतेततोत्रहि ३ पूर्वाध्यायेमथुरायामुत्पत्तिमुक्त्वातत्रकर्त्तव्यचरित्रेवक्तव्येमध्येगोकुलवासादिकंनिरूपितं
इदानीमाविर्भावकार्यंनिरूप्यते॥तत्रप्रथमंगोकुलात्समागत्यकंसंहतवानित्याह ततइति ततोगोकुलात्सभगवान्
स्वपुरंमथुरामागत्यस्वपित्रोः शंचिकीर्षयाउभयोःकार्यसिद्ध्यर्थंबलदेवेनसंयुतःरिपुयूथानांनाथंकंसंतुंगान्मंचा

उद्धवउवाच॥ ॥ततःसआगम्यपुरंस्वपित्रोश्चिकीर्षयाशंबलदेवसंयु
तः॥निपात्यतुंगाद्रिपुयूथनाथंहतंव्यकर्षद्व्यसुमोजसोर्व्यां॥ १ ॥

न्निपात्यतदुपरिस्वयंपतित्वाम्रतेतस्मिन्पित्रोःप्रियचिकीर्षयाहतमपितंव्यकर्षत्विकर्षणंकृतवान्॥एवंहिते अपित्रादीनां१=
षांकामनास्थिताकएनमित्थंकरिष्यतीति॥ओजसेति॥यथातस्यावयवाविशीर्णाभवंतितथामहाप्रयत्नेनविकर्ष
णंकृतवानित्यर्थः इदमेवभक्तानांमनः॥भक्तानांमनसिस्थितंदैत्यंहत्वातन्मनःस्वस्थंकृतमिति॥एतादृशेचरि एम०
त्रेकृतेतेषांहृदयेयज्ञायतेअस्माभिरप्येवंकर्त्तव्यं॥भगवदपेक्षयास्थातव्यं॥भगवानेवचित्तेस्थितंदोषंपरिहृ २८
त्यमनःस्थिरीकरिष्यतीति १ ॥

एवंदुष्टनिग्रहंनिरूप्यशिष्टपरिपालनंवक्तुंसतांशिक्षार्थंस्वयमाद्यंब्रह्मचर्यलक्षणंधर्मसंपूर्णंकृतवानित्या अनिरुद्धव्यूहकार्यं१
ह॥सांदीपिनेरिति॥संदीपनस्यपुत्रःसर्वज्ञःतस्यसकाशात्॥ब्रह्मवेदमधीत्यसकृत्प्रोक्तमित्यतिसौबुध्यंलोकप्रती
त्यानिरूप्यतेविधिपरिपालनार्थंवासुष्ठुविस्तरमितिअर्थावबोधंगादिसहितं॥अधीत्यविद्यांसमाप्यगुरवेदक्षिणां

सांदीपिनेःसकृत्प्रोक्तंब्रह्माधीत्यसुविस्तरं त
स्मैप्रादाद्वरंपुत्रंमृतंपंचजनोदरात् २ ॥

वृ.:१
दत्तवान्॥साद्दक्षिणावररूपा॥सोपिपुत्ररूपः॥सोपिपूर्वंमृतरूपःपूर्वंपंचजनोदरंप्राप्यमृतंपुत्रंमरणात्पू
र्वावसरेस्थितरूपंतस्मैप्रादात्॥भगवदाज्ञयाकालेनमरणक्षणमारभ्यसर्वतत्वसमूहस्यसंघातस्यप्रतिक्षणंयो
विकारोजातःतंसर्वमेवविकारंकालउद्धरणंकृतवान्॥तदासर्वोपिसंघातःपूर्वस्थितएवभवतिइयमेवमनो
धिकारिदेवता॥चंद्रएवहिक्षीणोवर्द्धते शष्ठहेतुश्चभवति २ ॥

Indira Gandhi National
Centre for the Arts

कन्याकर्त्तृकायन्तप्रश्लो बुभूषा तपाठस्त्वेसर्थः २=

त.सु.३ एवमाचारेणशिष्टपरिपालनमुक्त्वा द्वितीयाश्रमलक्षणंधर्ममाचारेणप्रवर्त्तयन्स्तुतवानित्याह॥ समाहुताइति॥ भी
२९ ष्मककन्ययायेषांबुभूषयाश्रियःसवर्णेनरुक्मिणायेसमाहूताः॥ तेषांमूर्ध्निपदंदत्वांगांधर्ववृत्त्यातां हृतवान्॥ गांधर्वी
एकृत्सश्चैवधर्म्यौक्षत्रस्यतौस्मृताविति प्रथमविवाहेतद्भयंविधनतुंरुक्मिणपंशेगांधर्वतांइतरविषयेप्रसह्यकन्याहरणं विवाहस्यर=
तद्राक्षसत्वमितिगांधर्ववृत्त्याजह्रइत्युक्तं॥ तेषांमूर्ध्निपदंदधदितिबंधुभिर्यत्नेभ्योदत्तंतदेकावहुभ्योदातुमशक्येतियो कन्याधनं४
ऽचते-योवामहान्तस्मैदेयेयमितीछायाजातत्वात् तत्सिद्ध्यर्थंसर्वेषांमस्तकेस्वपदंसर्वानुकूलरूपंधत्तवान्॥ अनेनतेषां
वामिच्छापिसमर्थिता॥ सर्वप्रतिरूपत्वाद्भगवतःश्रियःसमानवर्णेनरुक्मिणीरूपेणवायेसमाहूताइतिवापाठः॥ रू

समाहुताभीष्मककन्ययायेश्रियःसवर्णेनबुभूषयैषां॥ गांध
र्ववृत्त्यामिषतांस्वभागंजह्रेपदंमूर्ध्निदधत्सुपर्णः ३ ॥

पेणव्यामुग्धाःसमागताइति॥ तेषांमस्तकेपददानेनतस्मिन्पक्षेतेषांमोहोनिराकृतः॥ भीष्मककन्याकर्त्तृश्रि
यःसवर्णेनिकरणेनगांधर्ववृत्त्याबुभूषयायेसमाहूताइत्यर्थेअनियतत्वात्सर्वप्रतिरूपतयागांधर्वत्वं प्रसह्य
कन्याहरणंतुसर्वत्रतुल्यमेव॥ मिषतामिति चौर्यंनिवारितं॥ सर्वेषांबलहानिर्वानिरूप्यते॥ स्वभागमितिनवैधर्म
दोषः॥ सुपर्णइतिगरुडभावमापन्नोभगवानेव॥ तथास्त्रतिस्मनतमिवतांहृतवान्॥ मातुःप्रियचिकीर्षयास्वभाग राम०
मितिवचनादियंज्ञानशक्तिः॥ एषैवबुद्धिरधिकारिणोयाभगवदेकपराभगवतैवसर्वान्दोषान्दूरीकृत्यस्वार्थमेवा २९
कृक्मिणीः८ त्मसात्कृताभवति॥ ३ ॥ ३

एवंसोमवंशेविवाहमुक्त्वासूर्यवंशेसोत्सवंविवाहमाह ककुद्मिनइति ककुद्मिनोवृषभान्पणत्वेनस्वीकृतान्विद्धनसः कृत्वा
नासिकांभित्वातत्ररज्जुंनिपात्यसमाकर्षणेनदमित्वाभग्नवीर्यान्कृत्वातत्रापिस्वयंवरएवनत्वाहूयदानं॥ अनेनस्वधर्मोप्युक्तः
गांधर्वः॥ नग्नजितःपुत्रीसत्यामुवाह। तस्यांराक्षसत्वमप्याह तद्भग्नमानान्पूर्वंस्वयंवरार्थमागतान्समयबंधरूपैर्हेतुभिरेववृषैः
भग्नोमानोयेषांतथाभूतानपितन्मारकवृषभजेतुःभगवतःसकाशात्तांहर्तुंगृध्यतः अधिकाकांक्षावतः अतएवअज्ञान् नग्नजितीः१
राज१

ककुद्मिनोविद्धनसोदमित्वास्वयंवरेनाग्निजितीमुवाह॥ त
द्भग्नमानानपिगृध्यतोऽज्ञान्जघ्नेऽक्षतःशस्त्रभृतःस्वशस्त्रैः ४

स्वयमक्षतएवस्वशस्त्रैःतान्शस्त्रभृतोजघ्ने॥ अनेनतान्हत्वानयनात्राक्षसत्वंनिरूपितं॥ इयमेवहिबुद्धिर्देवताब्रह्म नग्नजितीः=
रूपा॥ तस्यादोषाद्विविधानियताअनियताश्च॥ नियतामायाकृताःसंप्रव्यसनात्मकाः॥ अनियतास्तुअनंताएव॥ ता
नुभयविधानपिभगवान्दूरीकृत्य। नग्नान्पार्षदान्जयतीतिवेदःधर्मोवा तज्जनिकांदेवतांस्वनिष्ठामेवकृतवानि
ति॥ नस्वभावतोपिभगवदीयानांबुद्धिरन्यविषयाभवति ४ ॥ ॥

धृतंब मां चस्युरा चवेश्यापायर्द्धिचोर्यपां दारसेवेत्पिनसप्तव्यात्.२

Indira Gandhi National Centre for the Arts

न·सु·२ एवंविवाहमुक्त्वातत्र रमणासक्तिव्यतिरेकेणनभवतीतितद्दासक्तिकार्यमाह प्रभुरिति॥प्रियायाःसत्यभामायाःग्राम्यइवप्रि
३० यंविधित्सुःद्युतरुमार्क्ष्यत्पारिजातमाहृतवान्॥स्वर्गस्थितियोग्यंदेवभोग्यमितिपारिजातमर्यादा॥तांभंक्त्वाप्रियार्थंयथाग्रामी
णःकामरसाविष्टोमर्यादांभंक्त्वारसमनुभवतितथादिव्यभोगंकृतवानित्यर्थः॥पारिजातस्यस्वर्गेपिदुर्लभतांख्यापयितुमा
ह॥यदर्थइति॥यस्यपारिजातस्यअर्थेवज्रीइंद्रः वज्रंगृहीत्वास्वर्गार्थंब्राह्मणवधमप्यंगीकृत्ययोब्राह्मणोवृत्रंहतवान्
तादृशस्त्वंवज्रिपदेनसूच्यते भगवतापिसहकलहार्थंसगणोदेवतादिसहितः।विचारणनुत्पन्नयेरुषांधः आदवत्॥
आभिमुख्येनयुद्धार्थमागतः॥अनेनसर्वस्मादपिस्वर्गात्पारिजातोऽधिकइत्युक्तं यदर्थमिंद्रादयोपिमर्त्तुमुद्यताइ

प्रभुःप्रियंग्राम्यइवप्रियायाःविधित्सुराच्छेत्स्युतरुंयदर्थे वज्र्या
द्रवत्तंसगणोरुषांधःक्रीडामृगोनूनमयंवधूनां ५ ॥

ति नन्विंद्रःसर्वज्ञोदेवीबृहस्पतिशिष्यःकथमेवंनीतिविरुद्धंसर्वप्रकारेणोपजीव्येनभगवतासमंविरोधंकृतवानित्या
शंक्याह· क्रीडामृगोनूनमयंवधूनामिति॥अयंइंद्रःवधूनांइंद्राण्यादीनांनिश्चयेनक्रीडामृगःवानरःयथायथोक्त
मेवकरोतिनतुकिंचिदपिविचारयतिवधूशब्देनचतारएवगृहपतयउक्ताः॥तदुक्तार्थमेवेंद्रादीनामुपयोगइतिअय एम०
महंकारोनिरूपितः॥भगवद्भक्तानांभगवतैवस्थापितोहंकारःफलायेति॥अस्याभिमानिनीदेवताहद्रः तद्भक्तानिरा ३०
करणेनभगवानेवतद्रूपइतिभक्ताहंकारनिर्वाहकंरूपमुत्तरत्रवर्ण्यते ५ ॥

गर्वंहृतिमत्कश
कादिरः=

तमुत्रेरणोपयोगाभावोयेषांतादृशानांपदार्थानांर=

६२

भगवतोभोगोपिभक्तेष्टसिद्ध्यर्थमेवेतितत्सदयांप्रतिपादयन्दुष्टनिग्रहपूर्वकंभक्तानांसर्वमेवेष्टंप्रयच्छन्भोगंकरोतीत्याह॥
सुतंमृधइत्यादिचतुर्भिः सुतंनरकासुरंभगवताहतंदृष्ट्वाधरित्रीभगवंतंप्रार्थितवतीशेषरत्नार्थीकृतेकरणाभावात्तदातयाआमंत्रि
तः तत्रनयायभगदत्तायशिष्टंसर्वमेवराज्यंदत्वातत्पुत्रोपयोगाभावपदार्थग्रहणार्थंतदंतःपुरमाविवेशेत्यन्वयः॥भगवान्सर्वेषां
स्वकीयानांसर्वमेवकार्यंस्वयंकरोतीतिभगवच्चरित्रमुक्तं॥इदमेकमहंरूपमहंकारदेवतायाः।नरकासुरवधेहेतुः स्वंवपुषाग्रसं
तमितिहृत्रतुल्यतानिरूपिता ब्रह्मणाहिकृतंजगत्परिपालयितुंसमुद्यतोविष्णुरुद्रप्रसादात्महाभूतग्रसनसामर्थ्यंप्राप्तवंतंछि

सुतंमृधेस्वंवपुषाग्रसंतंदृष्ट्वासुनाभोन्मथितंधरित्र्या आ
मंत्रितस्तत्तनयायशेषंदत्वातदंतःपुरमाविवेश ६ ॥

स्वस्माद्दूरादाहृत्यापहारि त्यर्थस्वंपुत्रमपिहतवान्॥पौत्रस्थापनंतुभार्याप्रार्थनया॥दोषाभावायमृधइत्युक्तं॥संग्रामेहननंनक्षत्रियाणांदोषाय॥स्व
त्वाजातंपुत्रंनरकासु यंहिवस्तुनापूरितंभवति॥स्वमाकाशंशरीरेणपूरितमितितेनग्रासेनिरूप्यते॥ग्रसंतमितिवर्तमाननिर्देशेनप्रतिक्रियाकाल
रम्॥= योग्यमितिसूचितं॥सुनाभंसुदर्शनंतेनोन्मथनंखंडशश्छेदनंतच्छरीरंमथित्वातत्रस्थितंजीवमुद्धृतवानितिवा॥तदंतःपुरप्रवे
शनमात्मनिसायुज्यंप्रापितवानितिलक्ष्यते॥अतएवनदोषोपिकेनाप्यंशेन॥ताश्चदेवस्त्रियइतिच संबंधएववरप्राप्तइति
अष्टावक्रशापप्रसादाभ्यामवगम्यते॥तत्रताभिर्दृतइति ६

वासुदेवेनसंबंधंप्राप्ताःश्चेति१=

Indira Gandhi National Centre for the Arts

मुनिशप्तानरदेवेषुजन्मप्राप्यकन्यारैदेवानांताह्त्यर्थः१=

त.सु.३ ३१ तत्राहृताइति॥ पूर्वोक्ताः देवस्त्रियः सांप्रतंनरदेवकन्याः कुजेननरकासुरेणआहृताः॥ तत्रांतःपुरेसर्वदुःखहर्त्तारंऐहिकपा
रलौकिकदोषदूरीकरणसमर्थंस्वभोगार्थंतथाकरोतीत्याशंकानिवृत्त्यर्थंआर्त्तबंधुंआर्त्तानांतदीयत्वेबंधुवद्धितकर्त्तारंदृष्ट्वाउ
त्थायसद्यः एकवारमेवतंपतित्वेनजगृहुः॥ हरिमार्त्तबंधुमितिविशेषणंनज्ञातमुपयुज्यते॥ किंतुस्वरूपसदेव॥ अत एव
भगवद्दर्शनमात्रेणबंदीक्लेशबंधुत्यागादिसर्वदुःखानांअपुनःस्मरणं· विस्मृतत्वात्· स्वगृहेयुशाइवकामकलापूर्णाः कं
दर्पकोटिलावण्यंभगवंतंभोगेच्छयागृहीतवत्यइत्याह प्रहर्षव्रीडानुरागप्रहितावलोकैरिति॥ भगवंतंहठेनदीनतयाश

तत्राहृतास्तानरदेवकन्याः कुजेनदृष्ट्वाहरिमार्त्तबंधुं॥ उत्थाय
सद्योजगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ७ ॥

रीरेणवाबंधुमिवनगृहीतवत्यः किंतुप्रहर्षेणव्रीडयाअनुरागेणचप्रहितानियान्यवलोकनानिआनंदचित्तसद्भावदृष्ट
यः॥ प्रथमंतोभगवंतमानंदमयंदृष्ट्वाप्रकृष्टोहर्षोजातः। तेनानंदानुभावार्थंदृष्टिः प्रथमंप्रेषिता॥ ततोधिभुज्यमा
नेभगवतिपतित्वेस्त्रीरूपंचेतनभावमापन्नाः व्रीडयाभोगंनिवार्यतदीयत्वख्यापिकादृष्टिःप्रेषिता ततोंतःकरणेभगव
तिपरमप्रेमोत्पन्नोभगवतोपिस्वस्मिन्दृष्टिपातेअनुपश्च। दुद्रुतोरागोजातः तेनपरमवैषयिकभोगार्थंभगवति एम॰
स्तादृष्टिःप्रेषिता॥ तान्येवावलोकनानिभगवद्ग्राहकाणि॥ अनेनभगवदीयानामेवंचित्तंभगवतोत्पाद्यतइत्युक्तं ७ ३१

—

प्रहर्षमिश्रितानिकुतूहलीलोसत्वपिद्यातथाप्रयुक्त
स्ततामाहृसप्तमि:१=

निंदितदोष२

तासांभगवतःस्वीकारमाह॥ आसांमुहूर्त्तएकस्मिन्निति॥ समुदायेनभोगःस्त्रीणांसुखकरोनभवतीतिआसांकालतइच्छाबाधनाभा
वायाहभगवाननुरूपोभूत्वालौकिकवाच्यतानिवृत्त्यैसविधिंविधानपूर्वकंसमानफलसिद्ध्येभगवत्त्वख्यापनायचएकस्मिन्मुहू
र्त्तेपाणिंजगृहेविवाहंकृतवानित्यर्थः॥ स्वमाययाजगत्कर्तृःकरणभूतयाकेवलसन्निधानंरपिभोगार्थंतद्ग्रहणयोग्यत्वायस्वरूपमा
च्छादयतीतिमायायाःकरणत्वं यतःसर्वमेवजगद्भगवद्रूपंचिदंशमाययाव्यवहितंसत् वैर्यथेष्टंव्यवक्रियते॥ तथाभगवान्स्वमाय
यातासामभिलषितभोगार्थंतद्रूपोजातइत्यर्थः॥ योषितामितिभोगदशाप्रदर्शिता॥ नानागारेष्वितिपृथक्रसाविर्भावाय॥ अत्रविधि
गांधर्वइतिप्रतिभाति॥ क्षत्रियाणांमुख्यत्वात्॥ एवंग्रहणमेवचित्ताधिष्ठातुर्वासुदेवस्यभक्तान्प्रतिचित्तप्रेरणमित्युक्तं ८ तासांफ

एकमुहूर्त्तएवपाणिग्रहणमात्रद्रूपोजातःअन्यमुहूर्त्तान्तरे१= आसांमुहूर्त्तएकस्मिन्नानागारेषुयोषितां॥ सविधिंजगृहेपाणिमनुरूपःस्वमायया ८
तास्वपत्यान्यजनयदात्मतुल्यानिसर्वशः॥ एकैकस्यांदशदशप्रकृतेर्विबुभूषया ९ ॥

लमाहतास्वपत्यान्यजनयदिति अपत्यानिकन्यापुत्ररूपाणितासामधिकरणत्वेनतत्तुल्यापत्यजननंनिवारितं॥ तथास सर्वतुल्यं१=
तिभगवदिच्छयाप्रकृतिपुरुषसंबंधेनैवतासांपुत्राजायेरन्॥ तदाहृत्यर्थंआत्मतुल्यानीत्याह॥ सर्वशइतिपंचधा॥ शरीर
तइंद्रियतःप्राणतोंतःकरणतःस्वरूपतस्तत्तद्धर्मतश्चेति एकैकस्यांदशदशेतिविध्यर्थःपरिपालितः॥ दशास्यांपुत्रानाधेही
तिश्रुतेः॥ प्रकृतेर्विशेषभवनेच्छयेतिकरणंसंख्यायां॥ साह्येकमेवपुरुषंसकृदुपलभ्यमहत्तत्त्वकार्यंकृतवतीपुनःसंबंधेप्रयोज
नाभावात्सकामेवस्थिता॥ इदानींभगवांश्चेदनंतरूपोभवतितदातद्भोगार्थंपुनःपुनःपुरुषसंबंधंप्राप्यकार्याणिजनयिष्यतीति
तस्याविबुभूषासिध्यति॥ यागवत्करणतास्याः भगवदिच्छयाप्यष्टताबहुधाजननंसाधयतीति॥ अनेनसांख्यवत्भगवद्ज्ञाना
र्थिंद्रियप्रवृत्तिरितिदशसंख्यायाबहिरिंद्रियाणांस्वरूपमुक्तं॥ तेत्वग्रेनबीजभावंप्राप्नुवंतिभोगश्चान्येच्छयेति॥ तत्रापिनभोगेच्छा
कारणंकिंतुभवनेच्छैवकारणं॥ ॥

Indira Gandhi National Centre for the Arts

विप्रकृत १=

पि॰श्वप्रहृपं२

न॰मु॰३ ३२ एवंकामलीलामुपपाद्यक्रोधलीलांसोपपत्तिकामुपपादयति॥ कालमागधेत्यादिसप्तभिः॥ कामजनकानिचत्वार्येवबहिरिंद्रि
याणि॥ इंद्रियंस्पर्शश्रोत्रंचक्षुरिति रसनेचचतुर्भिः क्रोधांशैः संवत्सररुद्रपालकस्यैः॥ कामक्रोधैस्समोकर्तुसप्तसप्तभिरूपि
ताः॥ यल्लोभेर्गुणसंख्यासोनिवृत्तिः सप्तधाततः १ ततोमध्येचतुर्मूर्तेःप्रद्युम्नादेर्निरूपिताः॥ वासुदेवाङ्क्रूरहात्यतीयासानि
रूप्यते २ तत्रप्रथमंसर्वपरिपालनार्थंभूभाररूपान्शत्रून्अत्युत्कटान्प्रथमंमारयतीत्याह॥ कालेति॥ त्रयोह्युक्ताः स्व
यमागत्यभक्तद्रोहंकृतवंतइतितान्हतवान्॥ तत्रकालमागधौमथुरापुरनिरोधकौ॥ शाल्वोद्वारकायानिरोधकः॥ कालः

कालमागधशाल्वादीननीकैरुंधतः पुरं॥ अजीघन
त्स्वयंदिव्यंस्वपुंसांतेजआदिशत् १० १०

कालयवनः॥ मागधोजरासंधः॥ कालस्यप्रथमतउपादानंअग्रेजरासंधवधात् आदिशब्दः त्रिष्वपिसंबध्यते ते
नसस्समूहास्तेत्रयस्वोक्ताभवंति तामसादिगणाध्यक्षाः॥ अनीकैरितिसेनाभिरोधेकरणत्वं॥ अनेनतज्जयस्यदुर्ल
भतासूचिता॥ तथाप्यजीघनत्॥ स्वयमितिभिन्नतयास्वोद्योगेन॥ नतुजडद्वोगे॥ स्वपुंसांमुचुकुंदभीमप्रद्युम्नबलभद्रा
त्रैता॰मित्यषष्ठी वा२= दीनांतेजआदिशत्॥ अनेनप्रतिष्ठार्थतान्मारकत्वेनोपस्थापितवान्॥ तेहिमार्गत्रयस्थाः लौकिकादिप्रकारेणब्राह्मण एम॰
ब्रह्मशिवप्रपन्नाः भक्तकामनाविक्षेपकाभवंति॥ तन्निवारकोभगवान्त्रिमूर्तिरपित्रिविधकामनियंता ॥ १० ॥ ३२

कालयवनादय२=

एवमुद्यतान्त्रिविधान्हत्वास्वतः अनुद्यतान्अमद्वारैवकांश्चिन्मारितवानित्याह॥ शंबरमिति॥ शंबरः प्रद्युम्नेनमारितःद्वि
विदोबलेन बाणः छिन्नभुजोभगवतैवकृतः मुरोपिभगवतैवहतः बल्वलोपिचबलेनैवदंतवक्रादयोभगवतैवं आदिशब्देन
विदूरथादयः तत्पक्षपातिनः॥ एतान्कांश्चिद्घातयन्कांश्चिदवधीत्॥ हलीबुक्कोभगवदीयैर्भगवत्कर्तव्यंभगवदाज्ञया॥ बलप्रद्युम्नद्वाग्जेन२=
कर्तव्यमिति॥ ११॥ एवंदोषनिर्हारार्थंउद्यतानुद्यतांश्चदैत्यान्हत्वाशस्त्रसंन्यासंविधायभूमिभारंनिराकृतवानित्याह॥
अथेतिद्वाभ्यां॥ भक्तानामेवयद्दुःखंदोषरूपंतन्नवारयत्॥ भूमेस्तुसहजोभारोनशस्त्रेणनिवार्यते १ उत्तारितस्तुभूभारःकंद्रु

शंबरंद्विविदंबाणंमुरंबल्वलमेवच॥ अन्यांश्चदंतवक्रादीन्अवधीत्कांश्चघातयन् ११
अथतेभ्रातृपुत्राणांपक्षयोःपतितान्नृपान् चचालभूःकुरुक्षेत्रंयेषामापततांबलैः १२

कंद्रा:१ योजनयेध्रुवं॥ ततस्तस्मान्निहत्यर्थंनखरूपैर्हिपांडवैः॥ प्रयत्नमेरितैर्बाह्यांस्त्वयमेवन्यवारयत्॥ शाक्रांतरन्यांचतामेवहर्ष
क्रिमि२ स्पर्शसमुद्भवां॥ क्रिमिकंटकरूपांतांतन्नाशेनावधीत्ततः २ अथेति प्रक्रमांतरे॥ सारथ्यभावेन॥ तेभ्रातृपुत्राणांपांडवा
नांदुर्योधनादीनांच॥ पक्षयोःसहाययोःपतितान्तान्धर्ममनपेक्ष्यस्नेहाग्रहभावेनपतितान्घातयन्नितिपूर्वेणसंबंधः॥
तेषामाधिक्यमाह॥ चचालेति॥ कुरुक्षेत्ररूपाभूः धर्मक्षेत्रेहितेऽधर्मभावंमापिताः॥ चलनंमधर्मात्॥ तेसर्वेह्यधर्मैकनि
ष्ठाज्ञातिघातिनः॥ अतएवयेषांबलैःभूश्चचालेति॥ देवेंद्रकार्यंकृतवानित्यर्थः १२ ॥ १२ ॥

हस्तदेवतेंद्रकार्य१=

यदुकुलरूपांकंद्रूकंटकंकण्टकेनवेतिवाक्यात्४

Indira Gandhi National
Centre for the Arts

किंचअप्रधानवधमुक्त्वाप्रधानवधमाहसकर्णदुःशासनेति॥ननुजीवनाहष्टेविद्यमानेकथंसर्वेसंभ्रमतः नह्येकमदृष्टंसर्वेषामित्याशंक्य दुर्योधनपक्षपातेनैवसर्वेषामायुःक्षीणमित्याह॥सकर्णोदुर्योधनःकर्णसहितः॥दुःशासनोभ्राता॥सौबलिःशकुनिः मातुलः एतेचत्वारोदुष्टाःएषांकुमंत्रस्ययःपरिपाकःतेनतत्कुमंत्रेयेस्थिताः तेषांश्रीःआयुश्चपाकेनैवहतमित्याह॥हतेति॥हताश्रीरायुश्चयेषामिति॥येषामितिविशेषणंदुर्योधनमपिहतवानितिसंबंधः॥अनुचरसहितःभग्नोरुःशयानःपश्यतिकर्म॥एवंसर्वकार्यंकृत्वापिभारनिवृत्तयेसमागतःनिर्वर्त्तकैर्भारंजनयन्पूर्वभारंदूरीकृत्यापिननंद॥संतोषंनकृतवानितिस्पर्शरूपतानिरूपिता॥भगवदीयानांस्पर्शेन्द्रियंज्ञानहेतुरेवनसुखहेतुरिति १२ द्वितीयंभारंदूरीकर्तुंपुनेनार्नंदनमेवाह॥ क्रियानिति तद्दनिराकरणार्थंतुद्ग्रामेयदिमहाराजःसमायातितदातत्तेनयेवग्रामोनश्यति॥तत्रायः तुद्रस्तुअल्पमेवना

सकर्णदुःशासनसौबलानांकुमंत्रपाकेनहतश्रियायुषां॥सुयोधनंसानुचरंशयानंभग्नोरुमुर्व्यांननंदपश्यन्॥
१२ कियान्भुवोयंक्षपितोरुभारोयद्द्रोणभीष्मार्जुनकर्णमूलैः॥अष्टादशाक्षौहिणिकोमदंशैरास्तेबलंदुर्विषहं
यदूनां॥ १४ ॥

शयति॥सैनिकास्तुसर्वमितिन्यायेनाह॥भुवःकियान्वाभारोमयाक्षपितःमदंशैःकरणैर्दूरीकृतः॥ चतुर्नांशनाह॥यद्द्रोणभीष्मार्जुनकर्णमूलैरिति॥द्वयंद्वयमुभयत्रमूलभूतैःस्वतेजोभिरेव॥एवंचतुर्विधैरपितेजोभिः॥चतुरंगसेनारूपैः अष्टादशाक्षौहिणिकाः तावदक्षौहिणीभिःजातोभारोयस्मात्दूरीकृतः। ततोप्यधिकोभारोस्तीत्याह आस्तेबलमिति॥अधिकत्वेहेतुः।दुर्विषहमिति॥केनापिसोढुमशक्यं॥दुर्विषहत्वेहेतुः॥मदंशैरिति॥सर्वस्यापिभगवदंशत्वेपियदूनांसंबंधिभिर्मदंशैरितिभक्तपरूपातात्अनिवार्यत्वंनिरूपितं॥वायुरत्रबलाधिष्ठाता भगवत्संबंधिनीमेवस्पर्शबुद्धिंजनयतितत्रसुखंदूरेननतेनपरिछिन्नेनगृहीतुंशक्यतइतिपरिछिन्नतुल्यतयाज्ञानंनभगवदभिप्रेतमितिस्पर्शदेवतानिर्मि

भ.त ५

तस्यापिभारस्यनिवृत्त्युपायमाह मिथोयदैषामिति यतएषांयादवानांमिथोविवादोभविताप्तोपिविवादोविवेकरहितोमोद्याताशपर्यवसायीजातइत्यभिप्रायेणाह॥माध्वामदाताम्रविलोचनानामिति माध्वीमदिराबहुपानसिद्ध्यर्थंमधुररसंतामुक्तवान् तयायोमदःगर्वेदिहविवेकादिविस्मरणंतत्कृतःतेनआताम्राणिविलोचनानियेषां नन्वन्योन्यघातेनमदिरयानिषिद्धस्मरणेनचभगवत्सहायार्थमागतानांभगवदीयानांअयुक्ततेत्याशंक्यप्रकारांतरभावादेवंक्रियतइत्याह॥नैषांवधोपायइयानतोन्यइति एषामियानेववधोपायोनत्वन्यःतत्रहेतुमाह मय्युद्यतइति अन्येतूपायाःसंशेमयिउद्यतेस्वयमेवांतर्द्धधते॥नहिसूर्यकिरणानांनिराकरणंतमसाभवति तुल्यत्वाच्चनैकेन॥स्मेतिप्रसिद्धौ।यदायदायादवनाशार्थमागधादयःप्रवृत्ताःतदाहमुद्यतःतान्हंतुं।तदामयिउद्य

मिथोयदैषांभवितविवादोमाध्वामदाताम्रविलोचनानां नैषांवधोपायइयानतोन्योमय्युद्यतेंतर्दधतेस्वयं
स्म १५

तेअन्येउपायाअंतर्दधते ननुकेयंभगवतोलीलायत्स्वकीयान्सेवकान्स्वसंगेनसमागतान्अनन्यशरणान्स्वयमेवमन्यायेननष्टान्करोतीति॥उच्यते॥सर्गार्थमेवमिति स्वात्मनासहचतुल्यता अतोनात्यंतभक्तिविरोधः स्वतस्तेषामाविर्भावसामर्थ्याभावात्माययैवआविर्भावतिरोभावौ॥खेदाभावायतथावस्था उत्पत्तिलीलार्थमितिनलीलाविरोधः यथास्यसर्गहेतुत्वंतथाग्रेवस्तुते नचतेषांदुर्गतिः॥मुक्तावेतदर्थमेवोक्तत्वात्॥सर्गादौमुक्तत्वंतेचोक्तत्वात्॥सर्वत्रतान्विनानाश्रयोनिरूपयितुंशक्यइतिसूचितं तस्मात्स्वाविर्भावेतेषामाविर्भावंकारयन् स्वतिरोभावेचतांस्तिरोभावयन् स्वसमानान्करोतीतिइतिभक्तेषुकापितिरस्कारलीला एवंविसर्गोनिरूपितः १५ ॥

Indira Gandhi National
Centre for the Arts

मरुणं १
पांडवानामेषां यदहितं क्लेशस्तत्प्रतिभानं १=
वैकुंठे तथाप्यिति हि वैभजनं चेति द्वयोर्हितरूपेस्तः २=
संसारविशेषविरह २=    सर्गादिलीलातःपरे २=    एतजसेवकवत् २=

त·सु·२ ३४ तत्र देवतां मित्रं निरूपयन् प्रद्युम्नं निरूप्य वासुदेवं निरूपयति षड्भिः यत् आपाततः भक्तानां महितं प्रतिभानं तद्भक्तिमार्गस्य तथात्वस्थापनाय दर्शलीलापरे व्यापि वैकुंठे नित्यं वत्स्थितिः रूपांतरेण भजनं स्वामिसेवकयोर्हितं १ स्वामित्वं सेवकोहं तिसेवकत्वं तथापरः अन्यथा सफलो न स्यात् भक्तिमार्गः समाधनः २ सेवादशायां चेत् स्वामी विरसः सिद्धभावता पश्चाच्चेत् सेवकत्वं स्यात् फलमीशश्च नो भवेत् ३ यावत्साधनमात्मानं सर्वशास्त्रविरोधिनं ज्ञात्वा तेषूर्वधर्मस्य नाशं च कुरुते फले॥ ४ अतः स्थितिदशायां हि तद्विचिंत्य हरिः स्वयं स्वानभिमेतविषयान् भोजयत्येव नान्यथा ५ तदाह एवमिति एवंप्रका

एवं संचिंत्य भगवान् स्वराज्ये स्थाप्य धर्मजं नंदयामास सुहृदः साधूनां वर्त्म दर्शयन् १६ ॥

इतिपदं १
रेण सम्यग्विचारयित्वा तथाकरणसामर्थ्यं तस्यैवेति भगवानित्याह स्वराज्येपि तद्येतामहे स्वस्यैव राज्ये वा शास्त्रफलं प्रयोक्तरीति न्यायेन भगवद्राज्ये वा धर्मजमिति तथा स्थाने स्थापनाधिकारो दर्शितः॥ नंदयामासेति सर्वानेव सुहृदः सर्वप्रकारेणानं दयुक्तांश्चकार न केवलं लौकिकविषयैरेव प्रसन्नान्करोति किं तु वैदिकमार्गेणापीत्याह साधूनां वर्त्म दर्शयन्॥ सतां मार्गो एम० वैदिकः तद्धर्मनिष्ठात् दर्शयन् स्वयं यज्ञादिकर्म कुर्वन् वैदिकमार्गेणापि नंदयामासेत्यर्थः अनेन प्रवाहं मर्यादां च स्थि ३४
रीकृतवानित्युक्तं १६ ॥

वै२
पुष्टिमार्गमपि तावत् स्थिरीकरोतीत्याह॥ उत्तरायामिति पूरोर्वंशः अभिमन्युना उत्तरायां शास्त्रानुसारेण धृतः॥ स्वभार्यायामर्जुनपुत्रो यथाशास्त्रं गर्भं धृतवान् इमां मर्यादां प्रवाहो दूरीकृतवानित्याह सवै द्रौण्यस्त्रसंछिन्न इति निश्चयोत्र ब्रह्मास्त्रस्यामोघत्वात् अत एव सम्यक्छिन्नः अग्रे संततिश्छिन्ना पुनश्छेदनानंतरं स एव वंशो भगवता धृतः छिन्नो हि पूर्वो भागः नोत्तरं बिभर्ति॥ वंशः प्रदीपसंततिवद्भवति यथा निरंतरमुत्पद्यमानास्तेजोवयवाः अंगुल्यग्रपरिमितां दीपशाखां प्रवेशनिर्गमाभ्यां स्थापयंति तैलं वर्तिकां च निमित्तमाश्रित्य तथा पूर्वदेहे अन्नायुषी समासाद्य शरीरोत्पादकावयवाः स्थूल

उत्तरायां धृतः पूरोर्वंशः साध्वभिमन्युना सवै द्रौण्यस्त्रसंछिन्नः पुनर्भगवता धृतः १७

तयापरिदृश्यमानं रूपं प्रवेशनिर्गमाभ्यां सममेव स्थापयंतो वस्त्रवत् सूक्ष्मांज्ञानत्वात् तन्मध्ये उत्तरोत्तरं भुक्तान्नानि सन्नावरणानि सूक्ष्मरूपाणि कुर्वंति॥ ततोंतः सूक्ष्मावरणं प्रशिथिलावयवं स्थूलवस्त्रवत्स्थितं योषाग्निसंबंधात् सर्वत आकृष्टं पिंडीभूतमिव योनौ प्रविशति तत्राप्यन्नायुषी निमित्तमाश्रित्य पूर्ववत्तत्रापि सन्नधातून् स्थूलांतः सूक्ष्मसूक्ष्मान् रूपविशेषान् कुर्वंतीति आब्रह्मस्तंबानामवस्था तत्र तस्याः संततेर्विच्छेदे पूर्वसाधितस्य पिंडस्य विनाशकेन विद्यातेन उत्तरोत्पादनासामर्थ्ये भगवान् स्वयं प्रविष्टः तां संततिं तथैव रक्षितवान् नतु रूप्यादिवद्धीजोत्पादनेन संतत्यंतरमेव॥ शास्त्रतोभ्युत्पन्नात्पूर्वसंततिं कृतवानित्यर्थः॥ अनेन पुष्टिमार्गप्रवृत्तिः प्रवाहेण मर्यादाभंग एवेति सूचितं १७ ॥ ॥

Indira Gandhi National
Centre for the Arts

त·सु·२
३५

॥ ७६ ॥ [illegible]

सचेत्पुष्टिमार्गः मर्यादायां यथास्थानस्थितं तान् कुर्यात्प्रवाहवत्तस्यापि बाधकत्वमेव स्यादिति तद्व्यावृत्त्यर्थमाह अयाजयद्धर्मसुतमि
ति अतो ब्राह्मणानां स्वतः प्रवृत्त्यभावात् भगवत्प्रेरणयैव याजनं कुर्वंतीति भगवान् याजयदित्युक्तं मंत्रसहितदेवतासांनिध्यक
रणाद्वा त्रिभिरिति कायिकादिसर्वपरिहारार्थं॥ तरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यामिति श्रुतेः त्रिविधफलसिद्ध्यर्थं आह्म
रपृथक्त्वन्यायेन त्रयोऽश्वमेधाः कृताः याजनादिसामर्थ्यार्थमाह विभुरिति एवं निर्दुष्टस्याग्रिमकार्यमाह स्मोपद्यी अनुजैश्री
त्वभिः सह रत्नविविधधर्मसंपन्नः कृष्णभक्तो जातइत्यर्थः सदैवोपायो निरूपितौ १८ एवं भगवान् भक्तहितं विधाय धर्मस्था
पनफलमिव स्वार्थं कृतां स्पृष्टिं बुभुजइत्याह त्रिभिः॥ भगवानपीति भगवत्सेवको युधिष्ठिरादिरपि भगवद्दत्तं राज्यं बुभुजे भगवा
नपि कामान् सिषेवे विषयान्नानाविधान् बुभुजइत्यर्थः तस्यास्वार्थस्पृष्टस्य जगतो भोगे जीवतुल्यतासादृतश्राह विश्वात्मेति नहि
भगवान् विश्वं विषयत्वेन भुक्तवान् किंत्वात्मत्वेन सहि विश्वात्मा त्रिविधपरिच्छेदाभावेन न तु केवलं विश्वरूपेण॥ ननु तस्य विषय

अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः सोपिक्ष्मामनुजैः रक्षन्रेमे कृष्णमनुव्रतः १८ भगवानपि विश्वात्मा
लोकवेदपथानुगः॥ कामान् सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः १९

भोगः सर्वत्रस्वतएव सिद्धः किमिति विशेषाकारेण
उच्यतइत्यत आह॥ लोकवेदपथानुगइति सहि सर्वदा ब्रह्मत्वेन सर्वान्विषयान् भुंक्ते अत्र तु लोकानुसारेण लौकिकसाधनेन
लौकिकक्रियारूपेण लौकिकान्विषयान् भुंक्ते॥ वेदानुसारेण तु वैदिकक्रियया वैदिकान् पुत्राद्युत्पाद्यतानानुभवति अतोत्र प्रका
त्र॰ रैयेणाप्यनुभवतीत्यर्थः॥ कामभोगे हि निर्गमनमार्गो नास्तीति तस्य सर्वावरकत्वात् कथं भगवान् जीववत्कामान् सिषेवइत्यत आह॥
द्वार्वत्यामिति अनेन कर्मविरोधः परिहृतः॥ यथानिलारणोपायं कुर्वाणः कर्मफलमुपभुंक्ते तद्वदिति॥ ज्ञानविरोधाभावाय अस
क्तइति॥ आसक्त्या भोगो हि ज्ञानविरोधी॥ स्वाधकृतस्य सृष्टिमनुभवंतीति ज्ञापयितुमाह॥ सांख्यमास्थितइति संख्याहितत्वानांय

संहारात् ३४

रतिजननकर्मभोगप्रतिपादनस्य भक्ति मार्गपुरुषोत्तमरूपेण भवति।
इतरमार्गपुरुषरूपेणेति द्वितीयेत थाह १=

पदे?

पुष्टिप्रकारमर्यादा प्रवेशार्थिनः २= रमणं पुरुषोत्तमरूपेण पुरुषरूपेण चेति द्वितीये भोगं वदन् रमयामासेत्येतद्विस्तारयति स्निग्धेति चतुर्भिश्च चतुर्विधानां भूतानां भोगो निरूप्य
ते चतुर्विधास्तत्र भूतानि त्रिविधाजीवाः मार्गत्रयवर्तिनो द्यापि वैकुंठवासिनश्च तत्र भगवानिमं लोकं स्निग्धस्मितावलोकेन रमयामास
अत्र हि द्विविधाजीवाः प्रोद्भूताः सर्गे लोके स्मिन्निति तत्र दैवाः स्निग्धावलोकेन प्रेमदृष्ट्या रतियुक्ताः कृताः आसुरास्तु स्मितेन मंदहा
सेन अर्द्धमायामोहेन सर्वथा मुग्धाः क्षुद्रदैत्या भवंति ते दोषमलात्मकाः अर्द्धमुग्धास्तु लौकिकाः भगवत्प्रसादेन सर्वानेव विषयान्
प्राप्नुवंतीति तत्र स्मितावलोकस्य हेतुत्वं आमुष्मिकान् वाचापीयूषकलया रमयामास ते हि मर्यादावंता वैदिकफलभोक्तारः तद्धि
स्वर्गापवर्गाख्यं तद्भगवद्वाचा वेदेन स्वर्गाख्यं भवति अमृतकल्पेन च उपनिषद्भागवतादिना आमुष्मिकं फलं प्राप्नुवंति अनवद्येन प्रभवति १

स्निग्धस्मितावलोकेन वाचापीयूषकल्पया चरित्रेणानवद्येन श्रीनिकेतेन चात्मना २०
इमं लोकममुं चैव रमयन् सुतरां यदून् रेमे क्षणदयादत्तक्षणः स्त्रीक्षणसौहृदः २१ ॥

पादवेश्मेनीप्रक्रा प्रतरादय:२= चरित्रेण सर्वानेव पुष्टिमार्गस्थितान् भक्तान् यदून् सुतरां रमयामास चरित्रेणैव हि भक्तारज्यंते लोकनिंदारहितेन न तु कुलीनायाद
वाः सुतरां रज्यंते वैकुंठस्थितांः श्रीनिकेतेनानंदयुक्तेन आत्मना सच्चिदानंदरूपेण चकारात् श्र्यादिविभूत्या क्षणदया दत्तक्ष
णोरात्रौ दत्तावसरः स्वप्नसुषुप्तिसुखं निद्रया भवतीति रात्रेः क्षणदात्वं लौकिकं ततोत्र विशेषं वकुं स्त्रीणां संबंधिनि क्षणे सुखे सौहृदं य
स्येत्युक्तं॥ वैकुंठसुखं हि निःप्रपंचेस्वरूपे स्थितो रमते रात्रौ अवतीर्णोपि तथा स्त्रीसुखे एवं चतुर्भिः सर्वेषां रमणमुक्तं स्निग्धेति प्रा
णादेवता इममिति वाक् अतएव तस्यैवमित्यग्निः २१ ॥ इति जननकर्मोक्तं १=

विभिन्नश्लोके १=

Indira Gandhi National
Centre for the Arts

त॰सु॰३
३६

सप्तभिः

प्रा॰

संकर्षणचरित्रमाह॥ तस्यैवमिति॥ एवंप्रकारद्वयेन रममाणस्य विरागो भोगप्रतिबंधत्वाभावश्च भगवदीययोगगुणः उद्भूतो जात इत्याह॥ द्वि
विधा हि विरक्तिः॥ भोग्यपरित्यागेन दोषदर्शनसहितेन शास्त्रदृष्ट्या। साधारणी लौकिकानां अतिभोगेन च। भगवतो विशिष्टा साजा
तेति वक्तुं तद्धेतुमाह॥ संवत्सरगणान्बहूनिति संवत्सरणां गणाः प्रभवादिसमूहाः तेपि बहवो बहुरूपेण रमणात् वैराग्यस्य विष
यमाह गृहमेधेषु योगेष्विति उपायेषु वैराग्यं न तु स्वरूपभोगे उपायो द्विविधः पूर्वमुक्तो लौकिको वैदिकश्च॥ तत्र सुतरां लौकिके
ष्विति गृहस्य एव मेधा बुद्धिर्यैरिति २२ विरागो रागाभावरूपो रागनिवर्तको वा रागस्य हि उभयं निवर्तकं असाध्यताज्ञानमनिष्टज्ञानं च॥
तत्रानिष्टज्ञानं लौकिकेषु विहितेषु शास्त्रतः परमार्थतश्चेति तुल्यबलत्वाभावात् अकार्यताज्ञानं लोके निवर्तकमसंभवतः भगवति वैरा

तस्यैवं रममाणस्य संवत्सरगणान्बहून् गृहमेधेषु योगेषु विरागः समजायत २२
दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान्॥ को विस्रंभेत योगेन योगेश्वरमनुव्रतः २३

देहि जीव स्वरूपे वि१= ग्यमुक्त्वा पुरुषरूपेपि कैमुतिकन्यायेन वैराग्यमाह॥ दैवाधीनेष्विति यत्र स्वप्रयत्नसाध्यता नास्ति तेनार्थांशेन तत्र भोगो न जायते॥ दृष्ट एव
प्रयत्नसाध्यता नादृष्टे॥ सर्वमेव चात्रादृष्टरूपकर्मसाध्यं तत्र देहो भोगाधिष्ठानं विषयास्तदाधारा भोग्याः॥ भोक्ता च तदभिमानी त्रयमपि
पि दैवाधीनं॥ स्वयं पुमानित्यनेनाहिंत्नो देहो बालगाद्यश्च विषयाः॥ ततः किमत आह को विस्रंभेतेति को वा विश्वासं कुर्यात् भोगो
भविष्यतीति घुणाक्षरन्यायेन कदाचिद्भवति॥ न ह्येतावता घुणकीटो क्षराणि लिखितुं जानातीति घुणभक्षितकाष्ठे ऽक्षराणि वाचयि
तुं कश्चिद्विचारयति॥ तथा दैवगत्यात्वप्रवत्कदाचिद्भोगे जाते सर्वदा भविष्यतीति को वा विश्वासं कुर्यादित्यर्थः ननु जगदेव विश्वा स्क॰ ३६
थिर संकरोति कुतो निर्धारित इत्याशंक्याह योगेन योगेश्वरमनुव्रत इति शास्त्रोक्तप्रकारेण शास्त्रं बुद्ध्वा विहितभक्तिमार्गेण उपायेन यो
गेश्वरं सर्वोपायप्रवर्तकं यः सेवते सर्वभावेन स न विश्वासं करोतीत्यर्थः ॥ २३ ॥

रि२

एवं वैराग्यमुक्त्वा तत्संकल्पत्वात् तदनुगुणं वहिर्वैराग्यं तत्र नर्कं शापं निरूपयति॥ पुर्यां कदाचिदिति पुर्यां द्वारकायां सामीप्ये सप्तमी क
दाचिदिति भगवद्विचारितकाले क्रीडद्भिरिति तेषां स्वभावतो दुष्टत्वं॥ यदुभोजकुमारकैरिति उपलक्षणाः सर्व एव भगवदीया बालकाः॥
तत्रापि कुमाराः न वै शिशूनां गुणदोषयोः पदमिति दोषाभावः सूचितः॥ तैः कोपिता मुनयः मननशीलाः ब्रह्मर्षयः शेपुः शापं दत्तव
तः॥ तत्र हेतुः॥ भगवन्मतकोविदा इति भगवदभिप्रायं जानंतीति सर्वदोषाभावः २४ ततः परित्यागत्रयमाह ततः कतिपयैरि
ति त्रिभिः गृहपरित्यागः प्रवाहपरित्यागः सर्वस्वपरित्यागश्चेति रागाभावद्वयस्य तद्धेतुभूतशापस्य च त्रिषु पर्यवसानात्॥ तत्राद्य

पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकुमारकैः॥ कोपिता मुनयः शेपुर्भगवन्मतकोविदाः २४
ततः कतिपयैर्मासैर्वृष्णिभोजांधकादयः ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः २५

माह॥ कतिपयैरेव मासैः त्रिभिर्मासैः सर्वे पियादवा निर्गता इति वृष्णिभोजांधकाः सात्विकराजसतामसा निर्दिष्टाः तदादयः सर्वे
पि त्रिष्वेवांतर्भवंतीति॥ अत एव संहृष्टा ययुः॥ न हि भगवदभिप्रायं स्वगुणज्ञा नंतिप्रकर्षेणाभानस्थानं॥ संहर्तुः संकर्षणस्य स्थानं स्वस्थानं संकर्षणलिप्रक शस्थानं२=
प्रभासः रथैरिति युद्धसाधनयनं सूचितं॥ एवं गमने हेतुः॥ देवरूपेण भगवता मोहिता इति मनुष्यभावं परित्यज्य देवभावः
प्राप्तव्य इति॥ अनेन शापोत्र विपरीतो निरूपितः शापो हि हीनभावं नयति न तूत्कृष्टभावं॥ एते तु शापाद्देवभावं प्राप्स्यंतीति २५ ॥

Indira Gandhi National
Centre for the Arts

त्व सु: ३ लौकिकक्रियापरित्यागार्थमाह॥ तत्रस्नात्वेति अयमेववा विशेषमोहः तेहिभगवद्भक्ताःभगवद्भक्त्यैव सर्वसमाधानं कर्तुमु
३७ चिताः तथापिस्नानादिकमेवकृतवंतः॥ तत्रसरस्वत्यामग्निकुंडे वास्नात्वादेवर्षिपितृतर्पणंविधायविप्रेभ्यो बहुगुणागावो
बहुदोहसारदुग्धसाधुत्वादयो बहवोगुणाः॥ अनेनाध्यात्मिकाधिदैविकाधिभौतिकसंतोषः संपादितइत्युक्तं २६ ध

तत्रस्नात्वापितॄन्देवान्ऋषींश्चैवतदंभसा॥ तर्पयित्वाथविप्रेभ्योगावोबहुगुणादडुः २६
हिरण्यंरजतंशय्यांवासांस्यजिनकंबलान् हयान्रथानिभान्कन्यांधरांवृत्तिकरीमपि २७

नत्यागमाह हिरण्यमिति॥ हिरण्यंसुवर्णंहिरण्यंरजतमितिदेवपितृप्रीत्यर्थंदक्षिणाविषयः शय्यांवासांसि इति एत्रिदि
नसुखकराणि अजिनकंबलानितिआस्तरणपरिधेयानि त्रिविधान्येतानिसत्वरजस्तमोभेदेनसाधारणानांदेयानि॥
. हयान्रथान्केवलाःसहिताश्चाश्वाः इभाहस्तिनःस्वतंत्राः कन्यांधरणमिति॥ एतत्संदानंहयाःसात्विकाः वृत्तिकरीम ए्म०
पिभूमिमात्रं पूर्वधरग्रामादिरूपा किंबहुनायेषांयद्दयितत्किंचित्तत्सर्वंब्राह्मणद्वारापरिसमर्पितमित्यर्थः २७ ३७

एवंपरित्यज्यशुद्धाभूत्वाभगवत्प्रीतिकरंकर्मकृतवंतइत्याह अन्नंचोरुरसमिति अनेकव्यंजनयुक्तंअन्नंपूर्वोक्तेभ्यएवब्राह्मणेभ्यः
कृष्णप्रीत्यर्थंदत्वानिष्टत्तपापाःभक्त्यावेशेनसात्विकभावंप्राप्ताःस्वधर्मेष्वधनएतत्समिश्राःसात्विकाजाताइत्याह गोविप्रार्थासवः
शूराइति गवांविप्राणामेवार्थेअसवःप्राणायेषामितिसात्विकत्वं॥ शूराइतिराजसाः ताद्दशानांसर्वप्रायश्चित्तमाह प्रणेमुर्भुवि
मूर्द्धभिरिति यएवशापंदत्तवंतस्तेभ्यस्तदीयेभ्योवाभूमौसाष्टांगप्रणामंकृतवंतः शिष्टेषुशिष्टानि एवंमर्यादयाचतुर्विधंभ

अन्नंचोरुरसंतेभ्योदत्वाभगवदर्पणं गोविप्रार्थासवः शूराःप्रणेमुर्भुविमूर्द्धभिः
न्यथा तदनुग्रहमपि न मन्येत॥ इहास्मिन् लोके न ततोऽन्यो दुःखनिवारणहेतुः॥ नूनं निश्चितं संदेहाभावऽभयत्र भगवदीयैरे
व दुःखाभावो नान्यैरिति॥ तत्र हेतुर्जनार्दनस्येति॥ जनो सर्वलोकजननी अर्दयतीति जनार्दनं यस्मादिति॥ सहि मूलं ज
ननं निवारयति॥ तदीयाश्च तत्साधकाः ३ ॥
भगवदीयानुग्रहपतिपादक्मतमेतदुःखाभावे ३= अविद्या २

त०भु०५
५६

अस्योत्तरं भगवद्भजनं कर्त्तव्यं तस्य व्यभिचारिसुखहेतुर्भवतीति तेनोद्विग्नो यदा तत्रोपायं कथयेतीच्छति॥ तत्साधुव
र्यादिशेति॥ तत्र यद्यपि भगवद्भजनेनैव प्राणी कृतार्थो भवति तदा तत्तद्वर्त्मादिश॥ भगवत्प्रेरणया भगवदाज्ञारूपवेदा
नुसारेणावाक्रियमाणेपि भगवानपरितुष्यति दुःखस्यानिवृत्तत्वात्॥ अतो येन मार्गेण सम्यगाराधितो भगवान् ज्ञानं प्र
यच्छति तमुपायं स्थिरं प्रहितं सर्वलोकप्रसिद्धं कथयेति प्रश्नः॥ कल्याणरूपमिति साधनदशायामपि सुखरूपत्वं॥

कर्माणि१

तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसां ह
दि स्थितो यच्छति भक्तिपूतो ज्ञानं सतत्त्वाधिगमं पुराणं ४

उपाय१

यथा विमानयानं गूढस्मात्यभीष्टस्यापि ज्ञापने हेतुः॥ हे साधुवर्येति संबोधनं॥ हितमात्रं साधुरपि वदति॥ एतादृशं तु भ
गवद्भक्तो यो ब्रह्मवित् स एव वदति॥ स हि स्वात्मानमिव सर्वं मन्यते॥ येन मार्गेण प्रथमं भगवान् संराधितो भवति। भगवत्त्वा
च्च संराधनं कठिनं॥ किमासनं तेगहडा सनायेति वाक्यात् स्वस्य चामर्यादत्वादिगुणवैशिष्ट्यात्॥ पुंसामिति बहूनां पकाक ग्र०
तालीयवदुपायो न मार्गो भवति किंच॥ भगवानंतर्यामी सर्वानेव नाना ॥ ५६

हृदिस्थितः१

व

प्रकारेण प्रेरयति स्वस्वभावाज्जीवस्वभावमनुसृत्य सर्वं। उभयथापि प्रेर्यधर्मविशेषो भवति॥ तत्र यदि पूर्ववदेव स प्रेरयेत् तदाक्रमणमपि भ
जनं व्यर्थं स्यात्॥ अतस्तादृशउपायो वक्तव्यः येन स एवांतर्यामी भक्त्या पूतो भवति॥ पूतः पवित्र एव प्रेरयति॥ भक्त्या पूतो भक्त्यैव प्रेर
येत्॥ स हि स्वभावतः प्रवाहनिर्वाहार्थमेव नियुक्तः — तथा प्रेरयति यथा प्रवाहः सिद्ध्यति॥ अयं तस्य सहजो धर्मः तथाकरणात्
अपूतश्च लोके प्रसिद्धः तस्यैव च बहीरूपं कालः यथैकेन हस्तेन ध्रियते अपरेण च मार्यते॥ तत्रोभयोः पावनार्थं मार्गद्वयं स्पष्टं॥
वेदः कालस्य अंतर्यामिनो भक्तिः॥ तन्मार्गेण प्रविष्टः सो भवत्पूतो भवति॥ वेदेन पूतः कालो न मारयति भक्त्या पूतोंतर्यामी नान्य
था प्रेरयति॥ इदं च पावनं नाशुद्धस्य शुद्धिजनकं॥ किंतु सो भवत्तन्मार्गनिर्गमनं॥ अन्योन्याश्रयाच्चायमर्थो न सिद्ध्यतीति प्रश्नः॥ गु
रूपदेशाच्चायमर्थो न सेत्स्यतीत्याह॥ हृदि स्थित इति सहि हृदये स्थितः स्वरूपायादि प्रेरयेत् किं बहिरुपदेशेन॥ अतो भगवताय
दुक्तं इदं विदुर्ययज्ज्ञानं वक्तव्यमिति तदंतर्यामिसमाधानव्यतिरेकेण न भविष्यतीति तत्समाधानार्थं प्रथमतो भगवदाराधनां ततो भग
वत्संतोषः ततो भगवता दत्तस्य प्रेम्णः प्राप्तिः। ततः प्रेमभक्त्या तस्यैवांतर्यामिणः ज्ञानार्थं प्रेरणं पूर्वसिद्धनानाविधज्ञानानां विद्यमा
नत्वात् तदस्मरणपूर्वकं यथाज्ञानमुदेतिवाक्यात् तथा प्रेरणं पूर्वसिद्धमिति तज्जनितं ज्ञानं न कार्यं समर्पयति॥ अत एव महता
पि साधनेन वाक्यात् ज्ञानं नोदेति॥ यदा पुनः स एवांतर्यामी स्वस्यैव गुणभूतं ज्ञानं तस्मै प्रयच्छति तदा पवित्रमिव वाक्यं ज्ञानहेतुर्भव
ति॥ तज्ज्ञानं त्रिविधं शारीरात्मनो ब्रह्मत्वेनानुभवः॥ सांख्यं सर्वतत्त्वविवेचनात्मकं॥ भगवतश्च अविशेषविशेषप्रकारेण स्वरूपबोध
कं तत्त्रिविधमपि ज्ञानं साधनसाध्यफलभूतं भक्त्या पूतो भगवानुप्रयच्छतीति॥ ज्ञानं ब्रह्मभावः॥ तच्च सर्वतत्त्वानां ज्ञानसहितं॥ त
त्रापि तत्त्वानां मूलभूतस्य सर्वभावज्ञानं पुराणं ४ रामनामगतिते ॥ ॥

जीव ३

प्रवाहप्रेरणं भगवतः ३
गंतर्यामि जीवयोः [illegible] ६ :

त.मु.५ ५७ नन्वेतत्तन्निरंतरं भगवद्गुणश्रवणाद्भवतीति चेत्तत्राह करोतिकर्माणीति॥ अयं चतृतीयः प्रश्नः॥ भगवतो हीयं श्रीः अ
त्रसप्तपदार्थाः पृच्छ्यंते॥ सप्तविधभक्तिसिद्ध्यर्थं॥ भगवतो वतारकर्माणि जगदुत्पत्तिस्थितिप्रलयास्त्रयः प्रवेशनाना
त्वं जगतः प्रकार इति सप्तानां पूर्वपूर्वसाधकत्वं॥ तत्र भगवदवतारकर्माणि किमर्थमित्याकांक्षायां मोक्षार्थमिति चेद्
त्पत्तिर्मर्यादा न भवेत्किमिति संदेहः॥ अथ यदि तदर्थमेवोत्पादनं तदावतारकर्माण्यर्थानि उभयोरेकत्वात्॥ अमोहक उत्पत्तिनिष्ठेन ४=

करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः॥
यथा स सर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ५

अध्य: उत्पत्ति २=
त्वेनैव कार्यसिद्धेः॥ तस्मादुत्पादनलीलापि ज्ञातव्या॥ उत्पादनमात्रेण च कार्यासिद्धेः योग्यतासिद्ध्यर्थं तावत्कालं स्थि एम०
तिरपि मृग्या॥ यदि भगवांस्तन्न नाशयेत्तदा विहितकरणं दिनापि कार्यं सेत्स्यतीति नावतारप्रयोजनं॥ किंच॥ यदि व ५७
कुधर्मं यं भगवान्न भवेत्तदावतारेण सर्वमुक्तिरेव भवेत्॥ अतो भिन्नस्वभावेन प्रेरणात्तन्नानाभावाच्च सर्वव्यव ॥

दिग्दर्शितम्: १=

अवतारप्रयोजनं २= नानात्वप्रकारत: २=

स्थासंपद्येत॥ लोकाश्चेत् भगवत्कृता एकविधाः सुर्ब्रह्मांडान्निर्गमनं न भवेत्तस्मात् अवतारकर्माणि भिन्ना
नि॥ ऐकात्म्येवाय द्येकस्य साधनमन्यस्य भवेत्तदापि मैथ्यं स्यादिति॥ भेदनिर्माणं च ज्ञातव्यं स्यात्॥ अतः सप्तानां
मेकप्रश्नः सप्तांगत्वाच्छ्रियः कृतावतारो भगवान्यानि कर्माणि करोति॥ यानीति प्रसिद्धिरुक्ता॥ बहूनि च वक्त
व्यानि तेषां कर्मत्वं च वक्तव्यं तानि भगवत्कर्माणि भवंति न भवंतीति भगवतः कर्तव्यं न कर्तव्यं वा॥ दोषत्रयाभाव
स्तु मंयेवज्ञायत इति विशेषणत्रयमाह॥ भगवान् कालाधीनतया न किंचित्करोति कालार्थं वा॥ तदाह॥ आ
त्मतंत्र इति॥ स्वतंत्रो न कालाधीन इत्यर्थः कर्मस्वभावयोः स्वप्रध्यपातात् भिन्नतया निवारयति भगवानिति क
र्माधीनता व्यावर्तिता॥ नहि पूर्णज्ञानवतः कर्माणि बंधकानि भवंति॥ अधीश इति त्रिगुणनियंता॥ अतो न स्व
भावाधीनः॥ तस्मादेतादृशोन यानि कर्माणि कृतानि न स्वभावेन्नादृष्टतः न कालप्रेरणात्तानि कर्माण्येव लोकि
कान्येव भवंतीति श्रोतव्यानि भवंति॥ किंच यथा इदं स सर्जाग्रे सृष्टेः पूर्वं एको दोषाभावस्तु ज्ञायते यदयं चेष्ट
यानकरोतीति मनश्चेष्टापि निवारिता॥ इच्छायां संदेहः॥ प्रयत्नो नास्तीति निश्चयः ज्ञानं चास्तीति॥ किंच॥ स
र्वमेवोत्पादितं सम्यक् स्थापयित्वा जगतो वृत्तिं विधत्ते॥ सर्वेषामेव जीविकां प्रयच्छति॥ अत्र दूषणाद्यभावेन स्तु
तो न ज्ञायते॥ प्राणिनामन्योन्याहारणत् ५ ॥ ॥

Indira Gandhi National
Centre for the Arts

न॰मु॰५ ५८ किंच॥ यथेति॥ यथावाइदंसर्वंसंहृत्यस्वकीयेहृदयाकाशेइदंसर्वंनिवेशयस्वयमपिगुहायांगुप्तस्थानेकिलशेते॥ अ
त्रैकस्यदूषणस्यपरिहारोज्ञायते॥ निहन्ताहन्तयोयस्यजाग्रत्स्वप्नसुषुप्तत्रयोयत्रनसंतीतिकावागुहा कोवासंगो
प्यइतिनजानीमः॥ हृदयेचपुनःसर्वंनिवेशितवान्॥ किंच। योगेश्वराणामधीश्वरः एकएवएतत्सर्वंस्वमनुप्रविष्टःय

यथापुमान्स्वेखइदंनिवेश्यशेतेगुहायांसनिहन्तहन्तिः॥
योगेश्वराधीश्वरएकएतदनुप्रविष्टोबहुधायथासीत् ६

यावद्बहुधआसीत्तद्वक्तव्यं॥ योगेननानारूपाणियोगीकरोतितदीश्वराये तेषुपायेनस्वयोगंस्वयीकृत्यतथाभवं
ति॥ यथाकर्मणा॥ परंकर्मणाक्रमेणभवंतियोगेनत्वेकदैवभवंति॥ अयंतुतेषामधीश्वरः॥ अधिशब्देनचयोगै एम॰
श्वर्येअप्यधिकेनिरूपितेभवतः॥ अनेनबहुधाभवनंसंभवतीत्युक्तं॥ परमखंडःसमुदायेनवा खंडशोवाभव ५८
तितिसंदेहः ६ ॥ श्रीगोपालयनमः

चरणतिभक्षणयोरितिधातोःसंस्तिभक्षणरूपाण्यमृतानिविदितेषु
लक्षणयाचलोकेतेःदर्शदशाचदितिपर्थः६२

नन्वेताहशंचरित्रंभवतावद्धमश्रुतंभारतादेकिमितिपुनःपृच्छतइत्याशंक्याह॥ क्रीडन्विधत्तइति॥ द्विजगोसुराणांक्षेमायअवता
रभेदैःक्रीडन्कर्माणिविधत्ते॥ किमतोयद्येवमतआह॥ तानिकर्माणिअपएवतामपिमनोनतृप्यति॥ अन्येषांतृप्तावपिनोमनोनतृ
प्यति तत्रहेतुः॥ सुश्लोकमौलेश्चरितामृतानीति॥ एकंकर्तुर्विशेषणं॥ अपरंकर्मणां॥ सुश्लोकाउत्तमाकीर्तिः मौलेयस्य॥ यदा
भगवान्दृश्यतेतदाहूरादेवतस्यकीर्तिर्दृश्यते॥ यथादूरात्पुरुषस्यमुकुटंदृश्यते॥ अतोभगवदिच्छायांनिहन्तायांपरंकीर्तीच्छान
निवर्त्तते॥ भगवंतमन्यमानःकथंशिरोभूषणान्निवर्त्तेत॥ किंच एतानिकर्माणिअमृतरूपाणिचरितामृतानिकर्माण्येवचरितानि
मोक्षरूपाणि२ ॥ चरितानाममृतत्वमनुभवसिद्धं॥ तृप्तिपासादिनिवारकत्वेनमरणनिवर्त्तकत्वंच॥ चरितमितिप्रयत्नमात्रं॥ भेदेनवाचकत्वेन
वाविरोधेनामृतत्वंअद्भुतकर्मत्वेन॥ कर्माणिचपुनःचरितेनकृत्वेवअमृतानि॥ उत्पन्नान्येवनित्यानीति॥ प्रयत्नमात्रविषयत्वेन

क्रीडन्विधत्तेद्विजगोसुराणांक्षेमायकर्माण्यवताररभेदैः॥ मनोनतृप्यत्यपिश्रृण्वतांनःसुश्लोकमौलेश्च
कर्मणां१ तेषांनित्यत्वेश्रवणादिप्रयत्नविषयाणामपिनित्यत्वात्सर्वेंद्रियव्यापारदुर्लभत्वेनऐहिकामुष्मिक रितामृतानि ७
दुःखनिवारकाणिभवंति॥ तदैवयामृतत्वंसंपद्यते॥ द्विजगोसुराणामितिमंत्राहविदेवतास्वयागेभेधनभूतास्त्रयोनिर्दिष्टाः
तेषांक्षेमायंकर्मकरणं॥ अनेनभगवत्कर्माणिधर्मरूपाणीत्युक्तंततश्चतानिमनसाभावितानिमनोयज्ञाभवंति॥ कीर्तितानिवा
ग्यज्ञाः॥ इति॥ श्रुतानिज्ञानयज्ञाइति॥ अवतारभेदैरितिनानाविधैरवतारैः॥ भेदग्रहणेनलोकेतदवतारत्वेनज्ञातुमशक्यमितिग
म्यते॥ मत्स्याद्यवताराविसदृशत्वात्भेदाइत्युक्तं॥ अथवा॥ ज्ञानक्रियाविशिष्टभेदेनत्रिधावताराः॥ तेषांभेदाः ज्ञानकलावता
राव्यासादयः॥ क्रियाकलावताराः वराहादयः॥ उभयंकृष्णः॥ अवताराश्चभेदाश्चेतिवा॥ तदाभेदाआवेशिनः॥ अवतारैरावेशैश्च
यज्ञानांपरिपालनंक्रियतइति॥ करणेरक्षाहेतुः॥ [illegible] ७ ॥

क्षेमरूपा१=

Indira Gandhi National
Centre for the Arts

त.मु.५ ५९ किंच॥येसत्वभेदैरिति येसत्वभेदैर्लोकानलोकांश्चलोकपालसहितान् अचीक्लृपत्॥ तानिकथयेत्याह॥कतितत्वानिलोक
सर्गमाप्तानि॥कतिचालोके॥यदिसर्वैरेवतत्वैः सर्वएवकृताःस्युस्तदालोकालोकादिभेदोनस्यात्॥लोक्यंतइतिलोकाः॥प्रत्य
क्षयोग्याः॥लोकालोकात्परभागास्तुनप्रत्यक्षयोग्याः॥अस्यायंभावः॥स्वभावतएवलोकरूपाअलोकरूपाश्चलोकाः नतुतेप्र
तेजस.५ माप्रकाशिताः॥मनुष्याणामेवतदपेक्षणात्॥तदभावोवाकिंमूलकः॥अत्रैवहिमेघकाष्ठोस्योदयउत्पद्यंते॥तेचान्यत्रकु उपलभंते ४
तोनभवंति॥अतः अलोकाःकेचनस्वतएवेति॥तत्रापिचलोकपालाःसंति॥तत्रचचक्षुषाविषयग्रहणेआलोकापेक्षाभावः॥
चक्षुरभावोवा॥अथवा॥लोकान्स्वर्गादीन् अलोकान्लोकरहितानुज्ज्वटान्देशान्लोकेपिलोकपालसहितान्त्रीनित्यर्थः

येसत्वभेदैरधिलोकनाथोलोकानलोकान्सहलोकपालान्
अचीक्लृपद्यत्रहिसर्वसत्वनिकायभेदोधिकृतः प्रतीतः ८

स्वदृकेकालेवा १- यत्राचीक्लृपत्॥तत्कथयेतिप्रश्नः॥ननुकिमितित्रयोभेदागणिताः॥लोकाराजसाः॥अलोकास्तामसाः॥लोकपालाःसात्वि
काइति॥तत्राह॥यत्रसर्वसत्वनिकायभेदः अधिकृतःप्रतीतश्च॥सर्वाणिचसत्वानिजीवयोनिभेदाः तेषांनिकायःसमूहः॥
तस्यभेदःमहानवस्थानं समूहाअपिभिन्नास्तिष्ठंतीति॥नहिपिपीलिकाःपक्षिणश्चएकत्रभवंति॥सोप्यधिकृतः॥तत्राप्य राम० ५९
धिकारिणःसंति॥अन्यथाउपदीकानांमुखेजलंकाकानामेकाक्षित्वं पशूनांचतूपरातूपरभेदोनस्यात्॥किंच॥प्रतीतोप्ययंस
र्वोभेदः यत्रप्रतीयंतेसर्वेभेदाः तत्राप्रतीताःकियंतोवाभवंतीतियुक्तएवमहतोनिर्माणेतत्वभेदइतिहिशब्दार्थः॥अनेनब्रह्मा
डनिर्माणसहेतुकंवक्तव्यमितिप्रश्नः ८ ॥

मंडुकादीनां २

अपरोधर्म्मः गरुडादेर्वर्णवैचित्र्यता परीतभेदः २

किंचयेनेति॥प्रजानामपिप्रत्येकंआत्मास्वरूपंकर्मरूपंअभिधनामएतेषांयेनहेतुनाकृत्वाभिदांव्यधत्त॥एकस्यामपियोनौ
अनंताएवभेदाः॥तेषुचएकोद्वितीयइवनभवतिस्वरूपादिनाकेनापि तत्कुतइतिप्रश्नः॥नन्वेतदकृतमेवस्यात्तत्राह॥नाराय
णोविश्वसृगात्मयोनिरिति॥अत्रहेतुत्रयमस्माभिर्ज्ञायतेनान्यइतितानाह॥नाराज्ञातानितत्वानिनाराणीतिविदुर्बुधाः तान्यय
नंयस्येति॥तेषुसर्वत्रैवविद्यमानत्वात्एकेनांशेनद्वयंनक्रियतइतितदंशेविद्यमानएवभगवान्तावद्भेदहेतुरित्येकःपक्षः॥
किंच॥विश्वसृक्॥सर्वस्यकर्ताभगवान्॥सर्वत्रैवोपादानगोचरापरोक्षज्ञानमस्यास्ति॥अन्यथाताववतोनस्रष्टत्वं॥अतोभगव

येनप्रजानामुतआत्मकर्मरूपाभिधानांचभिदांव्यधत्त नाराय
णोविश्वसृगात्मयोनिरेतच्चनोवर्णयविप्रवर्य ९ ॥

ज्ञानमेतावद्भेदहेतुरितिद्वितीयं॥किंच॥आत्मयोनिरिति॥आत्मैवयोनिःकारणंयस्य॥अयंस्वस्मादेवस्वयमुत्पद्यते
अतोभगवतःकश्चनतादृशोगुणोस्तियेनस्वयमेवस्वस्मादुत्पद्यतइतिभिन्नोभवति॥एवमेवअयमनंतमूर्तिर्जायतइति
स्वयमेवतावद्रूपोभवतीति॥एवंतत्वतोज्ञानतःकारणत्वतश्चेतिहेतुत्रयंज्ञायतेअस्मदकृत्यमित्यर्थः॥एतच्चेतिचकारएतत्स
र्वोक्तमपिप्रष्टव्यमित्युक्तं॥अन्यथोत्तरमेववक्तव्यंस्यात्॥सर्वत्रनइतिबहुवचनंएकशिष्यत्वादवक्तव्यनिराकरणेनप्रचा
रणपारंपर्यबहुत्वज्ञापनार्थं॥विप्रवर्येतिपूरणइतिधातोःविशेषेणपूरयतीतिसर्वगुणपूर्णतानिरूपिता॥तेषामपिव
र्यत्वात्पूर्णाभगवद्गुणाअस्मिन्संतीतिसर्वकथनेहेतुः ९ ॥

वर्णये

ममविदुरस्यैकशिष्यत्वादवक्तव्यंचेदिहतत्तिरवाचंनिराकरणेनितात्पर्यनिरन्तरप्रचार
भवितेतिपारंपर्यबहुत्वं ३=

Indira Gandhi National
Centre for the Arts

तृप्नु.५
६०

नन्वेतत्सर्वं भारते कथितमेव तथा च पुनः किमर्थं पृच्छ्यत इत्याशंक्याह॥ परावरेषामिति॥ श्रुतस्यापि श्रवणे किं कारणं॥ अ
नंत्यात्पदार्थानां अपर्यवसानमिति चेत्॥ तत्रोच्यते॥ परावरेषां ब्रह्मादिस्थावरांतानां व्रतानि नियतधर्माः कर्माणि च श्रुता
न्येव॥ तानि व्यासमुखादभीक्ष्णशः श्रुतानि॥ आलोडिनीति ज्ञानार्थं बद्धधमः सर्वेषां धर्मान्कथयति॥ अन्यथा एतस्मिंस्थिरबु मे३
द्धिर्न भवतीति परं एतस्मिन्नेव तत्त्वमिति तेष्वपरता बुद्धिः॥ उपरमे हेतुः॥ क्षुल्लसुखावहानामिति॥ अल्पमेव सुखमावहं
तीति तद्धृतश्रवणेन तत्र हृदयभावनायां अंततो गत्वा तत्त्वं न भवति॥ तस्माद्दोषाद्विमुच्यते॥ उभयथाप्यल्पसुखफ
लतः स्वरूपतस्तु तत् दुःखात्मकमेव॥ अत उक्तं क्षुल्लसुखमावहंतीति॥ अतस्तेष्वतृप्ता जाताः अतः परं तद्द्रवणोद्यतो

परावरेषां भगवन्व्रतानि श्रुतानि मे व्यासमुखादभीक्ष्णं अ
तृप्नुमः क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात्॥१०॥

स्य यत इत्यर्थः॥ तेषामिति प्रसिद्धानामिति॥ कृष्णकथामृतौघादृते॥ कृष्णकथैवामृतौघः अमृतपूरः तस्मात्परं =
न तृप्तिरिति विरोधाभासश्च सूचितः॥ क्षुल्लसुखात्तृप्तिः अमृतपूराच्चातृप्तिरिति॥ अयमर्थः इच्छा हि यथाविषयं जाय
ते तस्मिन्प्राप्ते निवर्त्तते च। सा च विषयसमाना भवति॥ विषयश्चाल्प इति॥ अल्पीयस्येव सा सर्वत्रोत्पद्यते॥ पिपीलिका ०
वद्दत्॥ न हि पिपीलिका गजभोज्यं भोक्तुमर्हति॥ अतोऽल्पेनैव निवर्त्तते॥ गजस्तु कोटिपिपीलिकान्नेनापि न तृप्यति॥ अ
तो भगवद्विषयिणी याऽऽच्छा अनंतगुणत्वाद्भगवतः सर्वं गृहीतुं महता कालेनाप्यशक्यत्वात् तृप्तिर्न भवति॥ अतो न निवर्त्तत अतृप्नु तृप्न०
इति॥ कृष्ण इति सदानंदः तस्य कथा तद्रूपा भगवद्धर्माणां भगवद्रूपत्वात्। सरसश्च परार्थो विकृष्यते॥ अल्परसोऽल्पेनेत्य ६०

देवानां

अत्राधिकारिभेदेन व्यवस्था भविष्यतीत्याशंक्य निराकरोति॥ कस्तृप्नुयादिति॥ अत्रैवैवनोत्पद्यते उत्पन्ना चेन्न कदापि तृप्य
ति॥ वह्निरिंधनैरिव॥ तद्गुणा इच्छामेव वर्द्धयंतीति पूर्वं निरूपितं॥ युक्तश्चायमर्थः॥ आ सुराणामिच्छाभावात्॥ देवानां मध्ये
कस्तृप्नुयात्॥ विहितार्थ एव हि तेषां प्रवृत्तिः॥ तत्र विरक्ताविरक्तभेदेन ब्राह्मणक्षत्रियभेदेन वा यज्ञास्तीर्थानि च विहितानि चि
त्तशुद्धिद्वारा मोक्षफलकानि॥ तानि स्वरूपतो दुःखात्मकान्यपि फलतः समीचीनानि। भगवद्गुणास्तु च तद्रूपाणि॥ स्वरूपतो
प्यमृतोद्यानि॥ फलतो मोक्षफलानि॥ यज्ञरूपाणि तीर्थरूपाणि च॥ अतः कस्तृप्नुयात्॥ तीर्थानि पादे यस्य स॥ तिस्रः कोट्यो
ऽर्द्धकोटी च तीर्थानां वायुरब्रवीत्॥ दिवि भुव्यंतरिक्षे च तानि वै जाह्नवीजल इति॥ सा गंगा भगवत्पदी तादृशस्य च अभिधा

कस्तृप्नुयात्तीर्थपदोऽभिधानात्सत्रेषु वः सूरिभिरीड्यमानात् यः
कर्मनाडीपुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति॥ ११ ॥

नं। शब्दमात्रमेतदिति पक्षोऽग्रे निवर्त्तयिष्यते॥ सत्रेषु च सूरिभिः भगवद्गुणाभिज्ञैः ईड्यते सत्रेषु हरिगाथोपगायनम
स्ति॥ यथाऽश्वमेधे ब्राह्मणौ वीणागाथिनौ गायतामिति॥ यथा वा नारदो गानार्थमाहूतः तेन हि सत्रं पूर्यते॥ विष्णोः क
र्माणि पश्यतेत्यादि श्रुतेश्च॥ किंच। यो भगवान्कर्मनाडीपुरुषस्य यातः स्वस्य हृदि स्थितः पश्चाद्धृदये विद्यमानो गेहरतिं सं
सारदायिनीमनिष्टरूपां छिनत्ति॥ अमृतरूपत्वात् इष्टरूपत्वं पूर्वमेव निरूपितं॥ अनिष्टनिवारकत्वं चोक्तं॥ या गात
कता च निरूपिता॥ कर्मनाडीपुरुषस्य यात इत्यनेन शब्दो न केवल इत्युक्तं॥ भगवत्सहितत्वे तु तीर्थानि सिद्धान्येव॥११॥

Indira Gandhi National
Centre for the Arts

भरतवंश्पत्रा१=

त॰मु॰ नन्वेवंसतिव्यासःकथमन्यदुक्तवानित्याशंक्याह॥मुनिर्विवक्षुर्भगवद्गुणानामितिसहिभगवद्गुणानेववक्तुमिच्छुः॥तेषामधिका
६१ रसिद्ध्यर्थंभगवानिदंभगवदाज्ञांप्राप्यभरतवंशोत्पन्नानामेवचरित्रमाह॥सहिदेवत्यंतिर्माययामत्यगादितितद्दृश्याः॥तादृशाएव
तेषांश्रवणेनदेवमायामोहभावेभगवद्गुणाःश्रोतुंशक्याभवंति॥अतोऽनधिकारिणोपिभगवद्गुणश्रवणसिद्ध्यर्थंतेसखापि
केवलभगवद्गुणवक्तापिनाम्नाकृष्णोपिभारतमाह॥यस्मिन्भारतेनृणांबुद्धिरुपायेनाकृष्टाभवति॥तत्रतेसर्वेग्राम्यकथा
स्वेवाविष्टचित्ताःप्रवृत्तिश्चस्वरूपैव॥अतस्तेषांबुद्धिग्रहणार्थंग्राम्यकथासुभगवत्कथाप्रवेशिताः॥ताःकथाःग्राम्यत्वेना
पिगृहीताःस्वप्रयोजनंकुर्वंतीतिप्रयत्नःसार्थकोभवति॥तदाह॥नृणिमित्येनेति १२ ततःकिमतआह॥सांश्रद्दधानस्ये

मुनिर्विवक्षुर्भगवद्गुणानांसखापितेभारतमाहकृष्णः॥यस्मिन्नृणांग्राम्यसुखानुवादैर्मतिर्गृहीतानुहरेःकथा
यां १२ सांश्रद्दधानस्यविवर्द्धमानाविरक्तिमन्यत्रकरोतिपुंसः॥हरेःपदानुस्मृतिनिर्वृतस्यसमस्तदुःखाप्ययमा

त॰द॰त॰ ति॥आस्तिक्यबुद्धिःश्रद्धा॥कथाप्रथमतःस्वकार्यंश्रद्धामेवजनयति॥ग्राम्यपदार्थेषुउच्चनीचभा/शुधत्ते १३
वेरसानुभवात्उत्कृष्टमेवगृह्णातिननिकृष्टं॥अतःसामतिःश्रद्दधानस्यविवर्द्धमानाश्रद्धयानिरंतरश्रवणात्विव
र्द्धमानाअन्यत्रकृशरतयाप्राप्तेविरक्तिंकरोति॥उत्तमात्रसंपन्नोनहिकश्चित्पिण्याकंभक्षयति॥परमेकस्यवगुणोपेक्ष्य
ते॥स्वातंत्र्यमिति॥तदाह॥पुंसइति॥ततोपिकिमतआह॥हरेःपदानुस्मृतीतिप्रवृद्धमत्यानिरंतरंभगवत्स्मरणंकरोति
॥तदाचित्तेभगवत्स्मरणात्सनिरंतरस्थितोचित्तेनिर्वृतंभवति॥तत्रहिभगवानानंदमयःप्रविष्टइतितत्संपन्नंसततस्थि एम॰
तंततोननिवर्त्तते॥तदाततोपिप्रवृद्धामतिःसमस्तानांदुःखानामप्ययंनाशंआशुशीघ्रमेवधत्ते॥अतःपरमपुरुषा ६१
र्थःसत्साधनोनिर्दिष्टः १३ ॥

भारते१=

एवमप्युपायेकृतेयेषांचित्तंभगवतिनप्रविशतितान्नप्यहमनुशोचेभगवान्स्वस्यैवार्थमिंद्रियाणिदत्तवान्॥कतिपयेभ्योनदत्त
वान्॥येभ्योनदत्तवान्तेशोच्याः॥तेषांचेदिंद्रियाणिभवेयुःतदाभगवद्भजनंकुर्युरिति॥येपुनःदानसमयेप्राणिनइंद्रियाणि
प्राप्तवंतःतेतांकथांश्रुत्वापितद्रसानभिज्ञाःनभजंतेतेशोच्यानामपिशोच्याः॥अथवा॥येनज्ञानंत्येवहंगाद्यभावात्तानहं
शोचेतेपियदिदैवगत्यापिभगवत्संमुखाभवेयुःतथापिनशोच्याः॥सर्वथाविमुखाश्चेत्तदाशोच्याः॥तथात्वेहेतुः॥अ
घेनेति॥पापेनैवभगवद्विमुख्यंकार्यते स्वनाशशंकयातथाकालोपितान्ग्रसतीत्याह॥ह्रिणोतीति॥सहिसर्वज्ञोदेवःस

ताञ्शोच्यशोच्यानविदोऽनुशोचेहरेःकथायांविमुखानघेन ह्रि
णोतिदेवोनिमिषस्तुयेषांआयुर्वृथावादगतिस्मृतीनां १४ ॥

र्वान्जानाति॥ग्रासार्थंचअनिमिषःसावधानः॥तुशब्दःपक्षांतरंव्यावर्त्तयति भगवद्विमुखस्यदेवनांतरेणवामार्गांत
रेणवानिस्तारोस्तीतिपक्षः॥तेषांसर्वेषामेवआयुर्हरति॥तस्यतदेककार्यत्वात्॥ननुकायवाङ्मनोभिस्तेकिंचित्समीचीनं
करिष्यंतीत्याशंक्याह॥वृथावादगतिस्मृतीनामिति॥अर्थश्रूत्यास्त्रयोपिवादादयःतएवतेषांरोचंते॥दिवात्रीतानांयथाते
जो गतिःकायिकी तस्मात्तेषांसर्वस्वनाशात्विद्यमानेपिपुरुषार्थसाधनेपुरुषार्थाभावात्शोच्यानामपिशोच्याः १४

Indira Gandhi National
Centre for the Arts

त॰सु५
६२

एवमन्वयव्यतिरेकाभ्यां भारततात्पर्यमुक्त्वा तेन भगवत्कथायां गृहीतचित्तं मां प्रति भगवत्कथैव केवला वक्तव्येत्याह ॥ तदस्येति पूर्व प्रश्नाश्चत्वारः अज्ञानान्यथाज्ञाननिवर्तकाः ॥ अयं प्रश्नो ज्ञान एव प्रत्यहं भोजनवत् आवश्यकोपेक्ष्यते तत्तस्मात्कारणात् अस्य पुरतः परिदृश्यमानस्य भगवतः स्वभावतया सर्वेभ्यः शर्मदातुः दुःखनिवारकस्य च कथामेव कथय ॥ ननु हरिकथा लोके किंवा संवलिता कथं भिन्नतया केवला कथयितुं शक्यते ॥ तत्रोपायमाह कथासु सारमुद्धृत्येति ॥ सृष्टिप्रकारा बहवः संति ॥ तत्र भगवत्कर्तृकैव सृष्टिर्वक्तव्या पालनं बहुविधमस्ति ॥ कालकर्मादिभिः क्रियमाणं ॥ तत्र भगवत्क्रियमाणमेव वक्तव्यं ॥ प्रलयोपि तथैव ॥ यस्मात्सृष्टौ भगवानेव प्रविश्य नाना भवति न तु जीवः पुरुषो मो वा ॥ चरित्रमपि प्रकृत्याद्यसंवलितं वक्तव्यमिति

तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारं उद्धृ
त्य पुष्पेभ्य इवार्तबंधो शिवाय नः कीर्तय तीर्थकीर्तेः १५

किं बहुना भक्तेष्वपूरणदुःखनिवारणैकप्रयोजनं केवलं भगवच्चरित्रं सर्वतः सारमुद्धृत्य वक्तव्यं ॥ बुद्ध्यैवात्रोद्धारः ॥ सूक्ष्मोद्धारे दृष्टान्तमाह ॥ पुष्पेभ्य इवेति यथा पुष्पेभ्य एव मकरंदं तं स्विद्यति । परं तं भ्रमर एव पिबति ॥ मधुमक्षिका चोद्धृत्य स्थापयति ॥ तथा यद्यपि भ्रमरवत्पीयते ॥ तथापि परोपकारेण भवतीति मधुमक्षिकावत् उद्धृत्य वक्तव्यं ॥ नन्वेतत् क्लेशात्मकं भवति पीतस्य पुनरुद्गिरणात् ॥ तत्राह ॥ आर्तबंधो इति ॥ लोकोपकारार्थं क्लेशोपि सोढव्यः ॥ वस्तुतस्तु पान इव निष्कासनेपीन्द्रिय एम०
संबंधस्य तुल्यत्वात् अविकृतत्वाच्च परोपकारे सिद्धे रोमंथ इव रसास्वादनं भवति अतो नोऽस्माकं शिवाय कीर्तय ॥ अधिका ६२
रेणास्तीति न प्रष्टव्यं ॥ तीर्थरूपा कीर्तिर्यस्येति ॥ तेनैवाधिकारोपि भविष्यति १५ ॥

---

प्रथमं महतः सृष्टिं द्वितीयं त्वंडसंस्थितमिति वाक्यात् १=

सारतयोद्धृतां १

एवमुक्तभगवत्कथां पृष्ट्वा मूलपुरुषस्य द्वितीयपुरुषस्य च चरित्रं वा पृच्छति ॥ सविश्वेति ॥ यः पूर्वोक्तः स एव कार्यार्थं तस्य र्थे अवतीर्णस्य चरित्रं प्रथमं ततः पृष्टमिति ॥ अंते सर्वस्यापि विश्वस्य जन्मस्थितिसंयमार्थं यः कृतावतारः परमपुरुषो अ अवतीर्य २=
ष्टीनां वा जन्माद्यर्थं कृतावतारः ॥ ननु कालादीनाज्ञापयति किं तु स्वयमेवागत्य करोतीति यः ॥ ननु भगवदुक्तेपि इहेत्याद्यनुभवात् कथं केवलं भगवत्कृतं तत्तद्भविष्यतीत्याशंक्याह ॥ प्रगृहीतशक्तिरिति ॥ प्रकर्षेण गृहीताः कालादिशक्तयो येन ॥

स विश्वजन्मस्थितिसंयमार्थे कृतावतारः प्रगृहीतशक्तिः ॥ च
कार कर्माण्यतिपौरुषाणि यानीश्वरः कीर्तय तानि मह्यं १६

ते हि कालादयस्तत्र प्रतीयमाना अपि भगवता नियमिताः न स्वतः कार्यं कुर्वंति ॥ प्रतीतिमात्रं तु न दोषाय ॥ जन्माद्यर्थमेवावतारे तज्जन्मादीनि करिष्यत्येव ॥ किं त्वन्येभ्यः पुरुषेभ्यः प्रकर्षेण अतिपौरुषाणि यानि चकार साधारणानि तु न कशि व्यति ईश्वरत्वात् ॥ तानि केवलं मह्यमेव कथय ॥ मया परं परार्थमप्यन्यस्मै न वक्तव्यमिति भावः ॥ एतादृशप्रश्नकर्तॄणा न्यो भविष्यति न वा प्रश्नव्यतिरेकेण वक्तुं शक्यं ॥ अतोऽस्याधिकारो निरूपितः ॥ अनेनैव प्रश्नेन अन्येपि सहिता भवंतीति पर्यवसानत एक एव प्रश्नः सिद्धः १६ ॥

विदुरस्य २=

Indira Gandhi National
Centre for the Arts

तस्योत्तरमध्यायद्वयेनवक्ष्यति॥अवतारादिपौरुषप्रयोजनभेदात्॥तस्मादेतदध्यायद्वयंस्वतएवानेनोद्धृत्योक्तं॥अ
नेनचेदत्नः प्रश्नांतरजिज्ञासुर्भविष्यतितदापूर्वोक्तानपिविशेषान्तत्रैवकृष्णरेपातयित्वाजीवसंदेहनिवृत्त्यर्थं
वक्ष्यामित्यभिप्रायोमैत्रेयस्य अतःप्रश्नाभिनंदनंवक्तुंतस्यायंप्रश्नोभिप्रेतइत्याह॥एवंसभगवान्पृष्टइति॥मैत्रे

श्रीशुकउ॥एवंसभगवान्पृष्टःक्षत्त्राकौषारविर्मुनिः॥पुं
सांनिःश्रेयसार्थायतमाहबहुमानयन्॥१७ ॥

येआविष्टोभगवान्वर्त्ततइतिसभगवान्॥केवलेनैतत्ज्ञातुंवक्तुंचाशक्यं॥क्षत्त्रेतिपूर्ववत्॥कौषारविरितिपितृना
म्नाविवेकित्वं।मुनिरितितदुक्तार्थज्ञानानुसंधानेहेतुः॥इदमतिपवित्रंचरितंनैकस्मैप्रयोजनायवक्तव्यमितिपुं
सांनिःश्रेयसार्थायेत्युक्तं॥परंतमुद्दिश्यैवेत्याह॥तमाहेति बहुमाननेनतस्यहृदयेप्रविशतीति॥भगवदीयत्वाद्व
बहुमाननंकृतवानित्यर्थः १७ ॥श्रीराधावल्लभायनमः

एवंशास्त्रापकत्वंतस्यज्ञापनायेस...

तत्रचतुर्भिःसन्माननंकरोति॥पृष्टार्थदेहजीवानांसंबंधस्यापिसर्वतः॥ज्ञात्वाकथनवोधायतेहत्कर्षोनिरूप्यते १ तत्रप्रथमंप्र
ष्टमोत्कर्षेणातमभिनंदति साधुपृष्टमिति॥बहवएवपृच्छंतिकोप्येवंनपृच्छतीतित्वयेत्युक्तं॥नचतवायंप्रश्नःकाकतालीयः॥किंतु
ज्ञात्वैवकृतः॥उत्तरमपिज्ञायते॥तर्हिप्रश्नोव्यर्थइत्याशंक्याह॥लोकान्साधनुग्रहकृतेति॥लोकोद्धारार्थमेवज्ञात्वापित्वयाप्रश्नः
कृतः॥अनेनास्मिन्शास्त्रेपरोपकारोमुख्यंसाधनमित्युक्तंभवति॥तवाप्येकमानुषंगिकंफलंसिद्ध्यतीत्याह॥कीर्त्तिवितन्वतालो
कइति॥अस्मिंल्लोकेआत्मनःकीर्त्तिविस्तारयताभवतापृष्टं॥ननुस्वकीर्त्यर्थंतथाकरणमनुचितंचेत्तत्राह॥अधोक्षजात्मनइ
ति अधोक्षजएवअंतःकरणेयस्य।देवालयप्रतिष्ठयादेवएवप्रतिष्ठितोभवतीति परंपराश्रयणंतुसाक्षाद्भगवतइंद्रियागोचर देहेंद्रियातदंतःकर णाश्रयणाभगवता कृतमित्येतदर्थः

मैत्रेयउवाच साधुपृष्टंत्वयासाधोलोकान्साधनुग्रहकृता कीर्त्तिवितन्वतालोकेआ
त्मनोधोक्षजात्मनः १८ नैतच्चित्रंत्वयिक्षत्तर्बादरायणवीर्यजे॥गृहीतोऽनन्यभावे
ननयत्त्वयाहरिरीश्वरः १९

त त्वात्॥तदाह॥अधोक्षजेति॥एवमस्यप्रश्नस्यस्वपरहितत्वात्साधुत्वं १८ देहोत्कर्ष
२ काकभुशुंडादय माह॥शूद्रयोनिदोषाभावाय॥नैतच्चित्रमिति॥क्षेत्रमेकेप्रशंसंतिबीजमन्येमनीषिणः॥तयोर्बीजमेवोत्तमं॥यद्बीजस्यप्रभावेनहि
र्यचस्तपयोऽभवन्॥अतोबादरायणस्यवीर्यजेत्वयिचित्रंन॥तादृशवक्तुःपुत्रःवक्तुमेवसमर्थोभवतिकिंपुनःप्रष्टुं॥अतएवचित्राभा
वः॥तस्यबीजस्यफलमपिजातमित्याह॥गृहीतइति॥अनेनप्रामादिकबीजत्वशंकानिवारिता॥नह्यन्यथोत्पन्नोभगवद्भक्तोभवति
भगवत्कर्तृकसर्गत्वात्॥अतएवअनन्यभावेनकेवलभगवद्भावेनभगवान्गृहीतः॥सहिदुःखमपिशमयति॥योन्यादिसर्वदोषा
नपिदूरीकरोति॥यतईश्वरः॥करणेहेतुः॥हरिरिति॥दीनदयालुत्वात्तथाकरोतीत्यर्थः १९ ॥श्रीराधावल्लभायनमः ॥

Indira Gandhi National
Centre for the Arts

त० सु० ५ ६४

नीवोत्कर्षमाह॥ मांडव्यशापादिति॥ सहि धर्मराजस्त्वेव मांडव्यशापात् व्यासद्वारा क्षेत्रियभोगपत्न्यां जातः॥ मांडव्योहि यमेनाज्ञा
नाद्दंडितः॥ कस्यचिद्राज्ञो चौरैः सह मांडव्यनामा ऋषिः तपः कुर्वाणः शूले आरोपितः॥ सहि यमं प्रष्टुं गतः॥ तेन पृष्टो यम आह॥
त्वया बाल्ये शकुंतिकायाः पुच्छे इषीका प्रवेशितेति॥ ततः क्रुद्धो मुनिः बाल्ये न कृतं पित्रोर्भवतीति अज्ञानात्त्वयाहं दंडित इति शूद्रो
भवेति शशाप॥ तस्य देवस्य शापसंबंधे हेतुमाह॥ प्रजासंयमन इति॥ प्रजाः संयमयति मारयतीति तथा॥ अतस्तेन कर्मणा देवस्य
पिपापं लग्नं॥ ततो दैत्येषु जन्म माभवत्विति सर्वथा दैत्यसंबंधरहिते भगवति व्यासे आविष्टः शापसार्थकत्वात्तस्यैव भ्रातुः क्षे
त्रे भोगपत्न्यां भुजिष्यायां शूद्रायां आसर्पेपि संक्रमणायोग्यार्थ सत्यवतीसुत इत्युक्तं॥ उपरिचरवसो बीजात् मत्स्ययोनौ जाता कै

मांडव्यशापाद्भगवान्प्रजासंयमनो यमः॥ भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुतात्
२० भवान्भगवतो नित्यं संमतः सानुगस्य हि॥ यद्ज्ञानदेशाय च मामादिशद्भगवान्व्रजन् २१

वर्ताधिपेन दाशेन परिपालिता दासकन्या सत्यवती तस्याः पुत्रात् व्यासाज्जात इति २० भगवदीयत्वेन प्रकृतोपयोगित्वमाह॥ भगवत्संबंधित्वेन १=
भवान् भगवतो नित्यमिति॥ नित्यं भवान् भगवतः संमतः॥ सेवकसहितस्यापि वैष्णवानामपि सुसंमत इति तदाह॥ सानुगस्येति॥
सर्वदा संमतिः तदानीं स्मरणाद्वसीयते॥ सेवका अपि भीष्मादयः विदुरेण महात्मनेति वाक्यात् भवं तं मन्यंते॥ तत्र हेतुमाह॥ य
ज्ञानदेशायेति यस्य तत्वज्ञानोपदेशार्थं भगवान् मामादिशत्॥ चकारात्त्वयमपि स्मरणेनोपदिष्टवान्॥ भगवानिति स्मरणे एम०
हेत्वभावः॥ व्रजन्निति तस्यावश्यकर्तव्यं॥ देवरात्सुतोत्पत्तिर्विहितेति व्यासस्य भ्रातृपत्नीगमनेन दोषः॥ तस्य रागसंबंधाभावः प्र ६४
योजक इति अग्निहोत्रादिवत्कलौ निषिद्धः २१ ॥

कुलोपसंहारोत्तरसमये १=

स१

पौराणिकी २

एवं तस्याभिनंदनमुक्त्वा तत्स्वरूपं भगवल्लीलामाह॥ अथेति॥ लोकप्रसिद्धेर्भिन्नः प्रकार इत्यथशब्दः॥ केवलभगवन्निर्मितं चरित्रं वेद
एव॥ तथापि तु भूतं तत्कर्तव्यं न भवतीति योगमायोपबृंहिता भगवल्लीलां वक्ष्यामीत्याह॥ अथते भगवल्लीलेति योगमाया साध
नभूता पूर्वोक्ता भगवन्माया॥ तया उपबृंहिताः स्पष्टाः केवलास्ववयोग्या न भवंतीति॥ तत्राप्यंतिम प्रश्नेन परिहार उच्यते॥ विश्व वैदिकत्वात् १=
स्य स्थित्युद्भवांता एवार्थाः प्रयोजनानि यासां ताः॥ आनुपूर्व्येण क्रमेणैव वर्णयिष्यामि॥ भगवल्लीलायाः मनोनुरंजकत्वेन स्वेहज

॥ अथ ते भगवल्लीला योगमायोपबृंहिताः ॥ विश्व
स्थित्युद्भवांतार्था वर्णयाम्यनुपूर्वशः २२ ॥

नकत्वं॥ योगमायोपबृंहितत्वेन आश्चर्यरूपत्वात् अद्भुतत्वं॥ बुद्ध्यंतरविस्मरणार्थं तदुच्यते॥ विश्वोत्पत्त्यादिकं तु माहात्म्यज्ञाना
र्थं॥ आनुपूर्वी तु बोधसौकर्याय॥ एवं सति भक्तिर्भवति अनेन भगवत्कर्तृकतालीलयैवेति सर्वदोषाभावः॥ पुरुषोत्तमत्वाय
योगशब्दवाच्ये २= लीला॥ उपायेन संबद्धेति न साध्यगच्छति॥ तस्यां न कर्तृत्वप्रवेशः किंतु सहभावमात्रं॥ अन्यथा सर्ववशीकरणं न स्यात्॥ विश्वस्य
स्वरूपं वक्तव्यं तदेकं भगवद्रूपं॥ तासां लीलानां तदुत्पत्त्यादयो विषयाः सिद्धा एव भया परं कीर्त्यते न तु कविवत्वर्ण्यत इति
आनुपूर्वी निरूपिता २२ ॥ २२

मायायां १=

Indira Gandhi National
Centre for the Arts

सुमुहा॥ प्रलये ३=

त॰सु॰५ ६५ एवंप्रतिज्ञायश्रोतारंसावधानंविधायविश्वस्योत्पत्तिनिरूपणार्थंपूर्वावस्थामाह॥भगवानेकआसेदमिति इदंसर्वंजगत्पू
र्वंभगवानेवास॥शुद्धानुभगवल्लीलाभगवानेवैवंप्रकारेणभवतीति॥योगमायोपबृंहितंतुजगदेकंरूपंभगवतः॥प्रवाह
नादिप्रकारेणआविर्भावतिरोभावयुक्तंअनाद्यनंतंवर्त्तते॥तिरोभावेतद्भगवानेवभवति यथालवणंजलमेवभवति॥तथा

त१

भगवानेकआसेदमग्रआत्मानांविभुः आत्मेछानुगता
वात्मानानामत्युपलक्षितः २३ श्रीगोपालयनमः

पिनतयोःस्वरूपैक्यं॥तस्यमिश्रोरसः॥असचलवणःपरंविवेचयितुंनशक्यतइतिभगवत्त्वं॥तदाह॥इदंजगत्अग्रेसृष्टेः
पूर्वंभगवानेवासअनंतमूर्त्तौचभगवतिनतस्यतिरोभावः॥किंत्वेकस्मिन्नेव॥आसेतितत्रनभगवत्कर्त्तृत्वताकाचित्॥वि एम॰
लीनंलवणंजलेस्वतएवभवति॥ततःपृथक्करणंतुमहत्कठिनंभगवदेकसाध्यं॥अतइदंभगवच्चरित्रमुच्यते॥स्वयंत ६५
थाभवनेभिन्नतयोत्पादनेवायोगिव॥ ॥

वासुदेवादिव्यूहरूपेमूलेएकपदस्या
भि[redacted]प्रायोद्योतितः॥अग्रेरे[redacted] ३=

त्म
चिद्रूपेलयाभावे॥सत्यत्वानस्यतस्योत्पत्तिर्वक्तव्यवेप
कस्यकेठिन्यमनेवनस्यात्२=

चि्रूपेएव२

न्मणिवत्तनकोपिप्रयासः॥ननुजीवर्नांतदानींतेनानांचिद्रूपत्वात्कथमेकस्मिन्लयः तत्राह॥ आत्मात्मनामिति॥सहि
भगवान्सर्वेषांजीवानामात्मासमष्टिवत्मूलभूतःचिद्रूपएव॥तत्रैवासससत्प्रधमनस्सलयः अन्यथाकाठिन्यमेवनस्या
त्॥स्वतिलयेसदेवसात्॥अमुक्तजीवानांप्रलयात्जीवाश्रितंजगत्तत्रैवलीनं॥तस्योक्रमनसामर्थ्यमाह॥विभुरिति॥स
घ४ हिसर्वसमर्थःप्रथमतोजीवान्स्वस्मिन्संपाद्यतत्रैवजगल्लयंकारितवान् अनेनतस्यासर्शोनिरूपितः॥एवमेकोप्यस
र्शो,विभुत्वहेतुः॥ननुजीवानामिछादिधर्माणांविद्यमानत्वात्कथमेकभावेनस्थितिस्तत्राह॥आत्मेछानुगतोसत्यां॥आ
त्मनांयाइछाःसएवधर्माः तेषामपितत्रैवानुगतिः॥भगवतोवाइछायाःयदातत्रजगत्यनुगति॥तदातल्लीनमितिपूर्वप्र
लयेहेतुर्निरूपितः॥तदायंभगवान्आत्मेत्येवव्यपदिश्यते॥आत्मत्वेनवातस्मिन्स्थितेनैवातदात्मभूतंजातं॥तदा जीवरूपेणवा
भगवान्सर्वान्तरवत्एकरसोनजातः॥किंतुनानामतिभिरेवउपलक्षितः॥अथवा॥सर्वैरेवमतिभिःएकएवउपल
क्षितः॥यथा,स्योत्पविजातीयानिसहस्रंलवणानिएकस्मिन्जलेपरिक्षिप्तेप्रक्षिप्तानिएकरसत्वमप्यापन्नानिना
नामतिभिरुपलक्षितमेकंभवति यथाकेनचित्पृष्टःसैंधवादिक्वेतिसर्वत्रार्थेजलमेवनिर्दिशति॥आत्मेछायाःस
र्वत्रानुगमात् आत्मत्वंवा॥तेनैकदेशएवभगवतिविश्वस्यलयउक्तोभवति॥एकांशेनस्थितोजगदितिभगवद्वा
क्यंतत्परमेव॥आविर्भावेपितथा २३ ॥ २३ ॥

लवण[redacted]स्यमिवतस्तुजलरूपंतत्स्वरूपं २= चिद्रूपेःअग्रे २

Indira Gandhi National
Centre for the Arts

एवंपूर्वस्थितिमुक्त्वाप्रथमतोजीवानामुत्क्रममाह॥सवाएषेति॥सएवभगवान्स्वस्मिन्विद्यमानसर्वःवैनिश्चयेनएषदेवदत्तादि रूपेणप्रतीयमानोजीवोजातः॥तदाजीवोभूत्वातिरोभावप्रकारेणाविर्भूतः पूर्वसंस्कारेणतदाद्रष्टाजातः॥ अहंद्रष्टेतिपूर्वा वस्थांस्मृतवान् तदाद्रष्टृत्वनिर्वाहार्थंदृश्यालोचनेक्रियमाणेदृश्यंनापश्यत् यतःसएकएवसर्वजीवानामात्मभूतो निर्गतइति एकएवराजतेयद्यप्यात्मानमपिद्रष्टुंशक्नोतितथापिपूर्ववासनयाबहिर्मुखएवनिर्गतइतिस्वातिरिक्तमे

सवाएषतदाद्रष्टानापश्यत्दृश्यमेकराट् मेनेसंतमि
वात्मानंसुप्तशक्तिरलुप्तदृक् २४ ॥श्रीगोपालयनमः

वदृश्यमालोचयन्तदभावेआत्मानमेवअसंतंमेन॥इवेत्यर्द्धासत्वं॥आत्मांशोवर्त्ततेवेद्यांशोनास्तीति॥औपाधि कधर्माणांउपाध्यभावेधर्माभावः अतोद्रष्टाआत्मानंअद्रष्टारमेवमेने॥ननुपूर्वंदृश्यस्यविद्यमानत्वात्सदृश्य स्यतस्यलयात्स्वाविर्भावेदृश्यमपिकुतोनाविर्भूतमितिचेत्तत्राह॥सुप्तशक्तिरिति॥सुप्ताःशक्तयोयस्य॥येमपंचोद्बोध काःतेनाद्याप्युत्थिताइति॥एवंतर्हिज्ञानशक्तिरप्यनुद्भूतास्यात्ततःकुतोमेनेआत्मानमसंतमितितत्राह॥अलुप्तदृगि ति॥अलुप्ताद्दृक्यस्य॥अस्यज्ञानशक्तिःपूर्वमपिनलुप्ता॥लोपंनप्राप्ता॥आत्मवदेवस्थिता॥आत्माविर्भावएवआ विर्भूतेत्यर्थः २४ ॥

सयदाआत्मानंअसंतमिवमेनेएतान्येवात्मासत्वज्ञानानिएकीभूतानिमायारूपेणजातानीत्याह साबाएतस्येति॥यदात्मान मन्यथाज्ञातवान्एषैवमायासापूर्वोक्तापसिद्धामोहिका॥सदसदात्मिका सदसद्रूपःआत्मायस्याः॥स्वभावतःसन्अन्यथा गीकाएदसत्॥एताद्दृशएवआत्मातस्याः अयमेवात्मास्याधर्मरूपा॥तस्यावास्वरूपंआत्मैवसमर्पयतिंत्रितयात्मकंवास्वरू पं॥तस्याधर्मत्वमाह॥एतस्यसंद्रष्टुःशक्तिरिति एतस्यजीवस्यसम्यक्द्रष्टुःअर्थादालोचनेनात्मानमेवपश्यतीतिशक्तिःउ त्तरकार्यसामर्थ्यं॥तस्यानाममायेति॥मयासहवर्त्ततइतिप्रत्ययस्यालुक्॥सुबंतप्रतिरूपकोवायंनिपातः॥ततोऽएप्रत्ययः॥स वर्णदीर्घः॥नङीप्॥महाभागेतिसंबोधनं अयमर्थोदुर्ज्ञेयइतितज्ज्ञानेमहद्भाग्यमितिसूचितं॥ययेदंनिर्ममेविभुरिति॥यया माययाचिच्छक्तिरूपयाअनुद्भूतसारयाइदंजगदेवनिर्ममेयस्यभावरूपाशक्तिःतस्यकर्त्तृत्वंव्यावर्त्तयति विभुरिति॥भगवत्क

र्सावाएतस्यसंद्रष्टुःशक्तिःसदसदात्मिका मायानाममहाभागययेदंनिर्ममेविभुः २५ कालवृत्त्यातुमा या
यांगुणमय्यामधोक्षजः॥पुरुषेणात्मभूतेनवीर्यमाधत्तवीर्यवान् २६ ॥ श्रीगोपालयनमः ॥

र्त्तकएवजगतिजीवार्थत्वात्तन्माययैवभवान्जगत्कृतवान् येनकेनापिजगत्करणात्विभुरिति॥२५॥पत्न्यासामान्यतः स्थितिरुक्तातांविस्तरेणनिरूपयति॥कालवृत्त्येतितुशब्दोऽन्यपक्षंव्यावर्त्तयति [illegible] नवाजीवःकर्त्तानवाअन्येनकरोती ति कालस्यवृत्तिःकालस्तत्रसभागस्यपरिवृत्तःप्रवृत्तिर्णंकृतवान्॥कालपरवृत्त्याकृत्वामाययागुणक्षोभोजातः॥कालेनव्याप्त ताद्भृगुणजातेत्यर्थः तदासाव्यामुग्धासतीपुरुषइवकामाधजाता॥तदाभगवान्इंद्रियातीतएवतस्याअदृश्यएवभू त्वातस्यभर्त्तायोग्यंआत्मनःसकाशात्एकंपुरुषंनिर्ममे॥सहिभर्त्तायोग्योभगवदंशःपुरुषोत्तमात्मकएव॥तस्यस्वतःप्रवृत्त भावात्तंनिमीतीक्षणभगवान्स्वयमेवतदंतर्यामीभूत्वातस्यांवीर्यमाधत्त॥यतःस्वयमेववीर्यवान् पुरुषस्तुवयोवीर्याभा



Indira Gandhi National
Centre for the Arts

त.सु.५ ६७ अतः पुरुषं निमित्तीकृत्य भगवता स्थापितं वीर्यं मायायां स्थितं तद्बीजप्रवेशात् महत्तत्त्वमभवत्। तस्मा एव स्थितस्य बी
जस्य महत्तत्त्वतानामेतीति प्रसवार्थं कालक्षोभात् प्रसवकर्त्री तस्याः महत्तत्त्वमभवदित्याह॥ अव्यक्तात्कालचोदिता
दिति जीवधर्मादेवभगवद्दृशाच्च सर्वं चेतनं कार्यं जायते॥ संघातोत्पत्तिरेवात्राभीष्टा संघातस्य च लीयते स हि वि
स्वरूपत्वेन

ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात् विज्ञाना
त्मात्मदेहस्थं विश्वं व्यंजंस्तमोनुदः २७ ॥ ॥

ज्ञानात्मा जातः॥ महत्तत्त्वमिति महदिति तस्य नाम॥ तत्त्वमिति भगवतः कारणभावः॥ तस्य तनने गुणभावेपि पश्चात्क
धनभावात् तत्त्वतां परित्यज्य महान् पुंस्त्वेन निर्दिष्टः॥ स हि विविधज्ञानात्मा जातः॥ तद्द्वारैव च सर्वं जगज्ज्ञातं क्र
मस्य स्थिपदत्वात्॥ तदा तस्य विज्ञानेन स्वस्मिन् विद्यमानं जगत्प्रकाशयुक्तं जातं॥ तत्र तमावरणं च तमो हरीभू एम० ६७
तं तदाह॥ स विज्ञानात्मा आत्मा आत्मदेहस्थमेव विश्वं प्रकाशयन् तमोनुदो जात इति २७ ॥ ॥

सोपीति॥ स जगज्जननार्थं भगवतास्पृष्ट इति पुनस्तु स्वीलस्मिं स्थिते कार्यार्थं भगवता सदृष्टः कालोपि समागतः॥ कारणगुणा अ
पि समागताः सत्वादयः॥ अंशोपि पुरुषः समागतः आत्मा जीवोपि एतेयस्मिन् तादृशो भूत्वा चतुर्मूर्तिर्भगवद्दृष्टः आत्मानं विवि
धमकरोत् आपाणविषयं कृतवान्॥ यतोयं विश्वस्यात्मा अन्यथात्वात्मानव्याप्तः स्यात्॥ तथा किमर्थमकरोदित्याशंक्याह॥ स्वस्यमहत्तत्त्वस्या
विश्वस्यास्य सिसृक्षयेति॥ स हि सर्वं ब्रह्म विविधस्थितः॥ पश्चात्कार्यव्याप्तो जात इत्यर्थः २८ कार्यमाह महत्तत्त्वादिति स्वात्मं त्मा२-
स्याभावात् पुनः कारणभावमेवापन्न इति महत्तत्त्वादित्युक्तं स यदा विशेषेण कुर्वाणो जातः कार्यमात्मा कर्तुमैच्छत् तदा त
स्मादहंतत्त्वमजायत॥ तस्य त्रैविध्यं पूर्ववन्निरूपयति॥ कार्येति॥ कार्यमधिभूतं॥ कारणमध्यात्मं॥ कर्ता अधिदैवं॥ स त्रितया

सोप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः॥ आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया २८ महत्तत्त्वाद्विकुर्वाणा
दहंतत्त्वमजायत॥ कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः २९ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा॥ अहंत
त्माभूत्वा भूतेंद्रियमनोमयो जातः भूतानामिंद्रि ऽऽत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत्॥ वैकारिकाश्च ये देवा अर्था
याणां मनसश्च जनकः त्रिविधो हंकारो जात इत्यर्थः २९ तान्भेदान् गणयति॥ वैकारिक इ ऽऽभिव्यंजनं यतः ३०
३ राजसः तिवैकारिकः सात्विकः तैजसो॥ तामसो भूतहेतुः॥ सात्विकात्सृष्टिमाह अहंतत्त्वादिति वैकारिकाश्च ये देवा इति गंधर्वादि
व्युदासः॥ सात्विकाहंकारकार्यभूता ये देवाः तेपि सात्विकाज्जाता इत्यर्थः॥ तेषां भिन्नत्वे प्रमाणमाह॥ अर्थाभिव्यंजनं यत इति देवा
धिष्ठानमतिरेकेण केवलानींद्रियाणि दृष्ट्वा नादिकं न भवतीति सामर्थ्यं देवानामेव इंद्रियाणामेव तथात्वं कल्पेत यदि कल्पितं शास्त्रं
स्यात्॥ यथा सिद्धमंत्रो च्यत इति देवाधीनैव विषयप्रकाशनशक्तिः ३० ॥ तांदि

Indira Gandhi National Centre for the Arts

द्वित.यस्कंधे २ -

त.सु. ६८ राजसात्सृष्टिमाह॥तैजसानीन्द्रियाण्येवेति॥एवकारः सात्त्विकतामसत्वव्युदासार्थः॥ज्ञानंसत्वंप्रधानंक्रियातमःप्रधाने
ति॥उभयविधान्यामिंद्रियाणांराजसत्वेयुक्तिः पूर्वमुक्तैव चकारः बुद्धिप्राणौ॥तामसात्सृष्टिमाह॥तामसइति॥भूतसू
क्ष्माणामादिः शब्दतन्मात्रंतस्यआदित्वेनैवग्रहणात्तामसइतिपुल्लिंगनिर्देशः॥अहंकारविशेषणंवा॥तदाभूतानांसूक्ष्मा

तैजसानीन्द्रियाण्येवज्ञानकर्ममयानिच॥ तामसोभूतसूक्ष्मा
दिर्यतः खंलिंगमात्मनः ३१ श्रीगोपालयनमः ॥

णांचसआदिरितिसामान्यतस्तस्यकार्यंनिर्दिष्टं॥यतः अहंकारात् शब्दतन्मात्रात्खमाकाशं॥आत्मनोभगवतोलिंगं
बोधकंशरीरंवा आकाशवद्व्यापकोनिर्लेपश्चेति॥यथावाआकाशेअभ्रतमःप्रकाशाभवंतिनभवंतिच॥तथापिन राम० ६८
तैराकाशोलिप्यते एवमात्मा॥आकाशशरीरंब्रह्मेतिश्रुतेश्च॥माहात्म्यार्थंतथाकथनं॥अन्यथातामसस्सृष्टिरध
मेतिनवक्तव्यास्यात् ३१ ॥

आकाशाद्वायोःसृष्टिमाह॥कालेति॥पूर्ववत्कालोगुणक्षोभकः॥मायागुणरूपा॥अंशः पुरुषोजीवोपिवाअत्रापिपूर्ववद्भगव
दृष्टिः भगवद्वीक्षितंनभोजातमितिभिन्नं॥कौर्यमुखात्सृष्टिमाह॥नभसइति॥नभसःसकाशात्अनुस्पृतमुत्पन्नंस्पर्शंस्पर्शतन्मा
त्रं ... तत्पुनः विकुर्वन्अनिलंनिर्ममे॥अनिलोपीति॥एवमनिलोपिनभसाखकारणेनकृत्वाउरुबलान्वितोत्ताः तदारू
पतन्मात्रंससर्ज॥ततोज्योतिर्जातं॥लोकस्यलोचनमितिमाहात्म्यंतस्य॥आलोकाभावेलोकोस्मदादिः विद्यमानेपिचक्षुषिनप
श्येत् अतोलोकस्यलोचनमित्युक्तं ३३ अनिलेनान्वितंज्योतिरिति॥पूर्ववत्कारणबलसिद्धिः परेणभगवतावीक्षितंस
कालमायांशयोगेनभगवद्वीक्षितंनभः॥नभसोनुसृतंस्पर्शंविकुर्वन्निर्ममेऽनिलं ३२ अनिलोपि विकुर्वाणोन
भसोरुबलान्वितः॥ससर्जरूपतन्मात्रंज्योतिर्लोकस्यलोचनं ३३ अनिलेनान्वितंज्योतिर्विकुर्वत्परवीक्षितं॥
आधत्ताम्भोरसमयंकालमायांशयोगतः ३४ ज्योतिषाम्भोनुसंसृष्टंविकुर्वत्परवीक्षितं॥महींगंधगुणामाधत्
कालमायांशयोगतः॥ ३५॥भूतानांनभआदीनांयद्भव्यावरावरं तेषांपरानुसंसर्गात्यथासंख्यंगुणान्विदुः ३६
तस्मादम्भोरसमयमितिरसतन्मात्रंजलात्पृथक्नप्रतीयतइतिश्लिष्टमेवोत्पन्नमित्युक्तं॥अत्रापिवाक्रमःकल्पनीयः॥प्रथम
तोरसतन्मात्रंपश्चादंभइति॥कालमायांशयोगतइतिज्योतिरित्यस्यसाधनं॥एवमग्रेपि॥ज्योतिषाअनुसंसृष्टंअंभः इत्यस्यार्थोज
लंगंधगुणांमहीमितिपूर्ववत्।प्रथमतोगंधतन्मात्रं॥तस्मान्मही ३५ तेषांधर्मानाह भूतानामिति॥नभआदिर्येषांवायुप्र
भृतीनांमध्येपदेवोत्तरोत्तरमग्रेभाव्यं॥तदेवाधिकगुणं॥तत्रहेतुः परानुसंसर्गादिति॥कारणानुसंसर्गात्॥यथासंख्यं॥संख्या
मनतिक्रम्य॥आकाशस्यैकोगुणःशब्दः॥वायोर्द्वयं॥शब्दस्पर्शौतेजसस्त्रयः शब्दस्पर्शरूपाणिअंभसश्चत्वारः शब्दस्पर्श
रूपरसाः॥पृथिव्याश्चाधिकोगंधःविदुरितिप्रमाणं॥ ३६ ॥

Indira Gandhi National
Centre for the Arts

त.सु.५ ६७



एतेषांतत्वानांचेतनानांकार्यौपयिकरूपसिद्ध्यर्थंभगवद्भजनमाह॥ एतेदेवाइति॥ देवेंद्रियाणांऐक्यविवक्षायांदशत्वं॥ भूत
तन्मात्राणिचदशमहदहंकारमनांसित्रीणि॥ एवंप्राकृतिकसप्तयोविंशतिकोगणः॥ सामान्यनिर्देशात्कालमायादयोपिस्तोत्रं
कुर्वंतीतिज्ञापते॥ सर्वेदेवाःविष्णोर्भगवतःकलाः धर्मादृत्यर्थः कालमायांशाः लिंगानिवर्तंतेयेषामितिहेतुसहिताअपि॥ गु
णत्रयकार्यरूपत्वात्भिन्नभावंप्राप्ताः॥ अतोनानात्वाद्भिन्नभावात्स्वक्रियायांब्रह्मांडनिर्माणेअनीशाःसंतःत्रिविधत्वादमेलनं
प्रत्येकंत्वसमर्थाः अतोविभुंसमर्थंप्रांजलयोरणता॥ भगवतःकारणंपंचविंशतिप्रकारेणज्ञातेत्युक्तंभवति॥ भावप्राधान्येनंध
र्मिणः अप्राधान्यात्सच्चिदानंदरूपाण्यपितिरोहितभूत्वाप्रोचुःस्तुतिंकृतवंतइत्यर्थः एतेषांदेहवचनादिकंविचार्यते॥ तत्वा
न्येतानिभगवद्भावभूतानि॥ भावोनामसर्वात्मतिसामान्यका+ तद्रूपाणिभवंति यावद्धर्ममात्रैकप्राकट्यंभगवताक्रियते॥ ता तै

एतेदेवाःकलाविष्णोःकालमायांशलिंगिनः नानात्वात्स्व
क्रियानीशाःप्रोचुःप्रांजयोविभुं ३७ ॥ ३७

दृशाएवभवंति भगवतःसर्वतःपाणिपादत्वात्यदंशाएतेप्रतिरूपतयानिर्गताः तत्रसर्वत्रैवकारणप्रतिरूपहस्तपादादीनांविद्यमा ॥
नत्वात्तैरेवतेषांव्यवहारः॥ शरीरंतूत्पन्नमेव॥ अभिमानिनोपिचिदंशाःदेवविशेषाः॥ अतएवनाधिकवलत्वं वेदेतुतत्वस्था
नीयःप्रजापतिरेवेतिसमष्ट्यनंतरमेवतत्रत्यानांपदार्थानांनिरूप्यमाणत्वात्॥ द्वयाहप्राजापत्याइत्यत्रापिसृष्टिभेदेनउभयविधें २ पूर्वकाण्डे
द्रियाण्यपितत्रसंतीतितेषामपीदमेवरूपमितिचक्षुरुदगायदित्यादिसंगच्छते॥ यथात्रमहत्तत्वं तथावेदेप्रजापतिः तथाविराड्
यथाभगवानतथायज्ञः यथाकालस्तथापरमेष्ठी॥ यथामायातथातेषांप्रयत्नमिति॥ उत्तरकांडेतुयज्ञस्थानीयंब्रह्म॥ यथात्रभ पद्मतिः
गवत्स्तुतिः॥ तथातत्रोद्गीथः॥ आधिदैविकत्वात्तेषांअस्मदादींद्रियनियामकत्वेनोच्यंते॥ अन्यथागुणदोषादिनियमाःभगव एम०
दाज्ञाचप्रत्येकंकर्तृत्वस्यात्॥ अतोभगवदिंद्रियप्रतिरूपेंद्रियाणांतत्वेषुविद्यमानत्वात् विसर्गेजीवेष्वपितथात्वात्नकाप्यनु ६७

स्पष्टोनुसाधकंरूपंभक्त्यादेर्विनिरूप्यते॥ तत्वादिस्तोत्ररूपेणसर्वलीलासुतत्स्थितौ १ तत्वेषुभक्तिनिर्द्धारेभूतस्यब्रह्म
णातथा तत्र षिभिर्यद्भूनिर्द्धारःत्रितयंसृष्टिहेतुकं २ भगवत्कार्यसिद्ध्यर्थंकामादिरहितंतथा॥ साधकंनान्यथारूपमित्यग्रे
नाशउच्यते ३ कालप्रयुक्ताभक्तिर्हित्रयोदशविधायतः॥ अन्यथासृष्टिक रणंभ्रुकुपानेवतद्भवेत् ४ भक्तिप्रपत्तीप्रत्य
हंभक्तिरूनेपरोक्षतः॥ सात्विकीयंसमाख्यातावाह्यंतत्रैवभावतः ५ राजसेभक्तिराहित्यात्तदर्थप्रार्थनापुरः॥ शरणागमनं
पश्चात्रिंदपासाधनंफले ६ तामसेभूतानतिदातःपरोक्षभजनंस्तुतं॥ भगवत्कार्यराहित्यहेतूक्तात्स्वस्यसाधनं फलव

देवाऊचुः॥ नमामतेदेवपदारविंदंप्रपन्नतापोपशमातपत्रं य
न्मूलकेतापतयोंजसोरुसंसारदुःखंबहिरुत्क्षिपंति ३९ ॥

त्प्रार्थनाप्रोक्ताद्विविधस्तानिगद्यते॥ ७॥ तत्रप्रथमंसात्विकीमुत्तमांभक्तिंप्रत्यक्षेणनिरूपयति॥ देवाऊचुः नमामेति॥ न
मनातिरिक्तस्यप्रत्यक्षेभजनस्याभावात्॥ नमोनमएतावत्सदुपशिक्षितमितिवाक्याच्चस्वामिन्तेचरणारविंदंनमामेत्य
ऊचुः॥ नमनेहेतुरूपमाह॥ देवेति॥ पत्रैवदेवरूपताप्रतिभातिसनमस्यः गुर्वादिष्वपिदेवत्वमेवनमनप्रयोजकं॥ गुरुत्वंतु
परिचर्यायां॥ तच्चनमनंत्रिविधं॥ लौकिकंवैदिकंभ क्तिमार्गस्थितंच॥ तत्रेदंभक्तिमार्गेस्थितमितिज्ञापयितुमाह॥ पदा
रविंदमिति॥ चरणस्यसुसेव्यतांवुध्वास्नेहेनयन्नमनंचरणारविंदेसाभक्तिः॥ यद्रूपस्यनमनंतद्वैधं॥ पत्रऊतधर्माणांमै
त्र्यर्यानोनमनंतल्लौकिकं॥ अनाविर्भूतरूपस्यनमनाद्वारविंदमितिस्पेकवचनं॥ सगुणत्वा ॥ ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰५
७०

त्तस्योपयिकत्वात्सामर्थ्यक्लेशाभावस्यसहकारित्वात्॥क्लेशनिवारकत्वंचरणारविंदस्यप्रकारद्वयेननिरूपयति प्रप
त्तिभक्तिभेदेन॥तत्रापिप्रपन्नधिकारिणस्त्यागासमर्थाः॥भक्त्यधिकारिणस्तुत्यागसमर्थाइति अतःप्रथमंतापनिवारण
रूपमाह॥प्रपन्नतापोपशमातपत्रमिति॥प्रपन्नानांशरणागतानांयेंतर्बहिस्तापाः॥तदुपशमनार्थमिकटएवतद्दूरीकर
णार्थंभगवच्चरणारविंदमातपत्रंभवति॥आतपात्त्रायतइति॥भगवच्चरणारविंदंध्रुवस्येवप्रपन्नस्योपरितिष्ठति॥अनेन
यत्रक्वचिदपिसंगच्छतितत्रैवतच्चरणारविंदंतापंदूरीकुर्वदेवगच्छतीतिभक्तवश्यताचरणाधर्मोनिरूपितः॥कालकृतो
पंतापइतिआतपत्रत्वेननिरूपिता॥स्वभावकृतेतुअमृतत्वादिनिरूपयति॥कर्मकृतेतुअगदादिभावेननिरूपयति॥प्र
पन्नार्थंभगवान्स्वयमागच्छतिसंगच्छतीत्ययुक्तंसर्वतोविरक्तान्भक्तान्प्रतिचरणमाहात्म्यमाह॥यन्मूलकेताइति
॥यस्यचरणस्यमूलमधोभागः॥भगवच्चरणारविंदाधस्तवसर्वदातिष्ठंति॥नगृहद्वाराद्यधःतेमूलकेताःअनिकेतनंके
तःस्थानमितियावत्॥यद्येवंव्यवहाराभावात्अनुपसर्गःतर्हितदर्थमन्यदूहंकर्त्तव्यमितिचेत्पंचाग्नितपोवत्त
त्राह॥यतयइति॥भगवन्मार्गेप्रयत्नवंतः॥तत्रपूर्वावस्थात्यागःपूर्वांगंतावन्मात्रपर्यवसिताः॥शालाकृकभस्ताएव
भवंति॥त्यागास्तामीचीन्येतुपाषंडित्वमेव॥येतुभगवदर्थंयतयः तेअंजसाअनायासेनैवउरुअधिकंसंसारदुःख
तृट्पिपासादिकृतंबहिरूतत्त्रियंतिपारलोकिकंचबहिरेववर्त्ततइतिमूलकेतानांतन्निष्टमेव॥अतःसर्वपुरुषार्थरू
पत्वाच्चरणारविंदस्यांतन्नमामेतिमुख्योहेतुर्निरूपितः॥येषामर्थंभगवान्समागतः॥तेत्रिविधानिरूपिताः॥भगव
दीयाःप्रपन्नाःभक्ताश्च ३९ ॥ तेर

त्यागात्पूर्वमवसितानतुयतयस्तत्र...लेति४=

प्रपन्नैस्स१

शालाकृकाणाद्वयामे
तास्तिश्रुतेर्दारपुत्रा
दयइत्येतन्न्यायाइत्यर्थ.
णम० ४=
७०
...वंधिनः१=

अन्यार्थमागतंयेभजंतेतेषांस्वरूपंकथयंतःमध्यमभावेनाश्रयमाहुः॥धमतरिति॥अन्यार्थंसमागतइतिज्ञापितं॥धमता
विधमताकर्त्तापितेर्थः॥अस्मिन्भवेसंसारेयद्यस्माद्धेतोःजीवाःतापत्रयेणाभिहताएवभवंति॥शर्मक्वापिनलभंते॥ईशेतिसं
बोधनंतद्दूरीकरणसामर्थ्यार्थंप्रथमतएवनिरूपितं॥एकेनापितापेनाभिहतःस्वाभाविकंशर्मनप्राप्नोतिशर्मातरस्यचका
वार्त्ता॥त्रयेणात्वभिहतःसुतरामेवनशर्मप्राप्नोतिअतोऽस्माभिःप्रथमतएवसंसारेप्रवेशमकृत्वैवतवांघ्रिच्छायामेवाश्र
येम॥प्रार्थनायांलिङ्॥भगवन्नितिसंबोधनंसर्वतापनिवृत्तिपूर्वकंसर्वेष्टसिद्धिनिरूपणार्थं॥छाययाबहिस्तापोगच्छति॥

धातर्यदस्मिन्भवईशजीवास्तापत्रयेणाभिहतानशर्म॥ आ
त्मन्लभंतेभगवांस्तवांघ्रिच्छायांसविद्यामतआश्रयेम ४०

अंतस्तापनिवारणार्थमाह॥सविद्यामिति॥यथासजलंछत्रंभवति॥छायाप्राधान्यंभगवदभिप्रायप्राधान्यार्थंस्वरूपा
दिवशात्कदाचिच्छायाचरणारविंददेशादन्यत्रपतति॥तदास्मत्रस्थितेरेवाश्रयःकर्त्तव्यइतिअंघ्रधस्तात्तुधर्मएव
भवति॥निकटेनस्थातव्यमिति॥भगवदिच्छायांनिकटेनस्थातव्यमितिभावः सांप्रतंतथात्वात्॥वयमतोहेतोश्छाया
मेवाश्रयेमेविद्याउपासनाज्ञानंवाभगवद्गुणानुसंधानेनचभगवत्परिचर्ययावाक्वचित्स्थातव्यमित्यर्थः॥एवंस्ता
त्तद्भगवत्संबंधेभक्तिप्रपत्तीनिरूपिते ४० ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰५ ७१ तथाऽनधिकारिपरोक्तेगंगातीरेस्थित्वाश्रुतितात्पर्यविचार्यभगवच्चरणानुसंधानंकुर्वाणेनस्थातव्यमित्याह॥मार्गंतीति॥य
घस्मात्स्वयःमंत्रद्रष्टारःतेमुखपप्रनीतैःछंदःसुपर्णैःतेपदंमार्गंतिविचारयंति॥वेदाहिगरुडप्रायाःपक्षिणःतेषांमूलस्था
नंभगवतोमुखपद्ममेव॥यथापद्मेमकरंदास्वादनार्थमागंतुकाअपिपक्षिणस्तिष्ठंति॥एतेषांतुतत्क्रीडमेव तेहितत्रैव
लब्धजन्मानःततएवोड्डयंति अन्यत्रचरंतोपिनीडतात्पर्याएवते॥छंदसांसुपर्णत्वंश्रुतिसिद्धमेव॥छंदांसिरथोमेभव
तेत्यत्रतेषामेवरथत्वं॥छंदांसि सोपर्णमयाइतिश्रुतेः सुपर्णपदेनचगरुडरूपतयाभगवत्समारूढाएवतेलोकेप्रवर्तंति
यद्रूपंभगवंतंलोकेबोधयंतीतिस्त्वमयोहिमंत्रद्रष्टारःभगवन्मंत्रंजानंति॥एवंप्रकारेणगंगातीरेस्थितेभगवान्स्वपदंप्रा

मार्गंतियत्तेमुखपद्मनीडैःछंदःसुपर्णैरृषयोविविक्ते॥ यस्मा
घमर्षोदसरिद्वरायाःपदंपदंतीर्थपदःप्रपन्नाः ४१ ॥

पयिष्यतीतिअतएवएकांतेएकाकिभिरेवस्थीयतइत्यर्थः॥बहूनांमापणाभावात्॥यसेतिप्रसिद्धस्यतेतीर्थःपदःतीर्थानि
पादेयस्यप्रसिद्धत्वान्नसंदेहः॥तीर्थपदत्वात्सर्वपापक्षयहेतुत्वमधिकारसिद्धये तीर्थपदत्वमेवोपपादयति॥अघमर्षो
दसरिद्वरायाःपदमिति अघस्यपापस्यमर्षोपिनतादृशमुदकंउदकंयस्याःतादृशीयासरिद्वरागंगातस्याःपदंस्थानमिति॥
पदविशेषणं गंगातीरे गमनेपदपर्यंतंगच्छति॥वेदानांचपुनस्तात्पर्येविचार्यमाणेभगवत्पदंजानंति॥जलेपापनाश
नंआनुषंगिकफलत्वेनोक्तं चरणादस्यत्रगच्छत्यपिगंगावेदवत्पुनस्तत्रैवप्रवेक्ष्यतीति॥वेदानांदृष्टांतार्थेनिरूपितं॥ रम॰ ७१
माहात्म्यंचयथागंगायाःपदसंबंधात्एववेदप्रामाण्यमपिभगवत्प्रामाण्यादेव॥मंत्रायुर्वेदवच्चतत्प्रामाण्यमाप्तप्रामा
ण्यादितिस्मृतेःअत्रमार्गणकर्त्तारःप्रपन्नाएवभवंति॥नान्येमार्गणंकर्त्तुंशक्यंते ४१

अन्येपुनस्तत्राप्यशक्ताःकेवलंज्ञानमार्गेणचरणारविंदमाश्रित्यतिष्ठंतीत्याह॥यच्छ्रद्धयेति॥यस्मिन्भगवतिश्रद्धाआस्ति
कबुद्धिःश्रुतवतीचभक्तिःश्रवणादिनापोषिताज्ञानमार्गेश्रद्धाभक्तीअंतःकरणशोधिकेचकाएतत्यथायथात्मापरिमृज्य
तेसाविति कीर्त्तनरूपयापिभक्त्यासंमृज्यमानेसम्यक्शोध्यमानेहृदयेअंघ्रिसरोजपीठंअवधार्यनिश्चित्यतेननिश्चयात्म
केनज्ञानेनवैराग्येणबलंयस्यतादृशेनधीराभवंति॥तादृशंतेंघ्रिसरोजपीठंव्रजेमप्राप्नुम॥वयंतुतोप्यनधिकारिणः॥अ भाजनत:४
तस्तद्धृदयेस्थितंनिर्द्धारितंवयंभजेम॥श्रद्धाश्रवणादिनावैराग्यसहितात्मज्ञानेजाते विदितात्मतत्वाब्रह्मभूताभवंति।त

यच्छ्रद्धयाश्रुतवत्याचभक्त्यासंमृज्यमानेहृदयेवधार्य ज्ञा
नेनवैराग्यबलेनधीराःव्रजेमतत्तेंघ्रिसरोजपीठं ४२ ॥

दा॰ज्ञरंभगवत्पादपीठंतत्राभिव्यक्तंभवति॥तदातदुपरिशान्तहृदयेवाप्रविश्यतत्तत्वभावंवाप्राप्यतच्चरणंगताभवंति॥
अतश्चतुर्थकक्षाभक्तिमार्गेत्विषांसाक्षिधम॥स्वतोहृदयेभजनंभक्त्याश्रयणंवेति॥ज्ञानिनांपादाभिव्यक्त्यभावात्पीठमि
त्युक्तं॥एवंस्वोपयोगिरूपनिरूपणायअंघ्रिसरोजपदंधीरभवनमे[illegible] वतत्रफलं॥वस्तुतोभगवान्भग
वदाज्ञयावाकालादिःकरोतिनान्यथावाअतोभयहेत्वभावात्मर्वमेवप्राणीधैर्याभावात्क्लेशाननुभवति॥अतःपूर्वो
क्तपक्षाभावेधैर्यफलकोयमेवपक्षःसमीचीनः॥एवंसात्विकप्रकारेपंचपक्षानिरूपिताः ४२

स्वर्ग्यद्रिमविषयत्तोपयो
गिभगवत्स्वरूपेत्यर्थः२

प्रपन्नरूताताममेवंक्रियात्मकाउपदेशादेतानितज्ञानिप्रारणंगतानीत्यथः।तद्धृदयेप्रवि
श्यवा।तत्तत्वभावंप्राप्यवाप्रारणंगतानि ५८

Indira Gandhi National
Centre for the Arts

एजसप्रकारेणाप्याह॥ तत्र प्रथमं सकामतया शरणागतिमाह॥ विश्वस्येति॥ यो भगवान् विश्वस्रष्टा धर्म्ममेवावतीर्णः अवतारूपविशेषेण॥ प्रकृतिः पुरुषश्चोभौ परमात्मा भवत्पुरेति निबन्धोक्तप्रकारेण यो भगवानवतीर्णः तस्य पदांबुजं शरणं व्रजेम॥ सत्यस्मदनुगुणः॥ नन्ववतारिता एव भवंतः सम्यक् प्रकारेण किमतः परं शरणागत्या तत्राह॥ स्मृतिं प्रयच्छतीति॥ यद्यस्मात् कारणात् त्वत्पुंसां भक्तानां संबंधि अभयं न विद्यते भयं यस्मात् तादृशं स्वरूपं वा प्रयच्छति॥

विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते॥
व्रजेम सर्वे शरणं यदीश स्मृतिं प्रयच्छत्यभयं स्वपुंसां ४३

तेपदांबुजं कर्तृ स्मृतिमभयं चेति द्विपदं

वा पदांबुजात्
स्मृतिं च प्रयच्छति॥ स्वकीयानामस्माकं वा तत्द्वयं प्रयच्छेदिति॥ अवतारिता अपि वयं स्मृत्यभयहीना श्चेत्तदा सर्वं व्यर्थं॥ भगवदीयानां वा स्मरणं भवेत्॥ भगवत्स्मृतिः पूर्वसिद्धस्वरूपस्मृतिः प्रकृतोपयोगिकार्यस्मृतिर्वा स्म्य — राम०
त्वभयदाता विश्वकर्त्ता भगवान् तस्य वरणं शरणागमनेजन्मादौ सुखं भवतीति फलार्थक्रियाव्याप्तत्वस्य भक्तिः — ७२
प्रथमा एजसी ४३ ॥



द्वितीयामाह॥ पत्न्यानुबंधेसतीति॥ जगत्कर्त्ता भगवान् सर्वस्रष्टा सर्वत्र प्रविष्टः सर्वेषां हृदये प्रकाशते तौ तथापि न प्रतीयते दोषवशात् तादृशस्य वतमदृष्ट्वैव केवलं हृदये वर्त्तत इति ज्ञात्वा तच्चरणागमनं द्वितीयं॥ दोषनिराकरणार्थं वा दोषस्य त्रैविध्य — गमगंहीणा २
माह॥ स्वानुबंधे पुत्रादिसहिते देहे गेहे च असति दृष्टे ममाहमिति दृष्टाग्रहः तत्र केवलाग्रहे यथाकथंचित् त्रिविधं हे धर्मीं धर्मे भगवद्भजनार्थं वा आग्रहे त्रैविध्यं भवति देहगेहयोर्वा असत्वाभावे अन्यतरासत्वे उभयासत्वे च त्रैविध्यं भवति अनुवादो वा नि

सत्स्वानुबंधेसति देहगेहे ममाहमित्यूढदुराग्रहाणां पुं
सां सुदूरं वसतोपि पुर्यां भजेम तत्ते भगवन् पदाब्जं ४४

यमेन द्वयोरसत्वमेव॥ तत्र स्थिते रूढश्चाग्रहो भवतीति तादृशानां हृदये पदांबुजं सुदूरं॥ यद्यपि भगवान् पुर्यामेव वसति॥ तथापि तत्र चरणारविंदेन स्तः॥ केवलमंतश्चरणमेरणार्थं हस्तौ वा इच्छामात्रं वा प्रकटीकरोति॥ अतो येषामभिमानः तेषु भक्तिर्नास्तीति मुख्यः पक्षः॥ संस्काराभिमानाभावेन केवलभगवदीयाभिमानेन गौणः पाक्षिको भगवान् स्थीत्यर्थः॥ सर्वथाभिमानाभावे सर्वथास्तीति सिद्धांतः॥ तस्मात्प्रकृते तादृशप्रकारेण क्वचित्प्रकाशप्रकाशौ कुर्वतो भगवतः पदाब्जं व्रजेमेति ४४ ॥ ४४ ॥

प्रागर्थी

Indira Gandhi National
Centre for the Arts

ग.सु.५
७२

तरा१

एतादृशा अपि परि भगवद्भक्तानां सेवका भवेयुस्तदा पितृत्वेनापारजसी भक्तिर्भवेत्॥ यथा भक्ता ते पिभक्ताः भगवच्चरित्राभिज्ञाश्चेत् न चार्यसुगमः पन्थाः किमिति नाश्रीयते तत्राह॥ तान्वीत्यसद्वृत्तिभिरिति॥ तान् भगवद्भक्तान् ते न पश्यंत्यपि॥ भजनं तत्र दूरे॥ तत्र हेतुः असद्वृत्तिभिरक्षिभिश्च पराहृतांतर्मनस इति॥ असत्स्वेवं त्वयो येषां तान्यासुराणीन्द्रियाणि॥ आसुराणि स्वभावतः असत्पदार्थानेव गृह्णंति॥ यथा मक्षिका अमेध्यं गृह्णाति न तु चंदनं॥ अत एव तादृशैः आसुरैरिन्द्रियैः पराहृतं वशीकृतं अंतःकरणं मनश्च येषां इंद्रियैर्विषयाकृष्टैरिति न्यायेन इंद्रियाणि विषयैराकृष्यंते इंद्रियैश्च मन आकृष्यते॥ मनसो रूपहृपमस्ति॥ आंतरं बाह्यं च॥ आंतरं यदधीनं तद्वशो भवति पुरुषः॥ तदाह पराहृतांतर्मनस इति॥ तर्हि ते छेके स्वतंत्राः कुशलिन इति किं तेषामेतरदर्शनेनेत्यत आह परेशेति॥ परे ब्रह्मादयस्तेषामीश इति संबोधनं॥ तां दर्शयितुं भगवांस्तथा करोतीति द्योतयति॥

तान्वीत्यसद्वृत्तिभिरक्षिभिर्ये पराहृतांतर्मनसः परेश॥ अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ४५

अथो अथ अतो हेतोस्त्वां न पश्यंति पूर्वेण संबंधः॥ ननु दर्शनाभावः कथमुच्यते॥ दृष्टापि परं ॥ यदि ते तान् पश्येयुः तदा यथा भगवान् सर्वैरेव गीयते तथा न भजंतीत्येवमंतव्यं॥ तत्राह॥ उरुगायेति॥ उरुभिर्गीयत इति॥ यदि ते तान् पश्येयुः तदा यथा भगवान् सर्वैरेव गीयते तथा तैरपि गीतः स्यात्॥ तदभावाद्देवं लक्ष्यते॥ नूनं तैस्तेन दृष्टा इति तान् साधनरूपभक्तानपि विशिनष्टि ते पदन्यासविलासलक्ष्म्या इति॥ ते पदयोर्न्यासः तत्र यो विलासः तेन लक्ष्म्याः तेषां लक्षणं भगवत्पदन्यासविलासः तेन देवहार्यं तेयदि भगवांस्ते स्थानेगमनार्थं तेषु स्वविलासस्थापनार्थं च विलासेन पदन्यासं करोतीति तेषां हृदये वा पदस्थापनार्थं विलासप्रेमा दिकं करोतीति तदा ते ताता भवंतीत्यर्थः भगवत्पदसंबंधादेव येषां महत्त्वं नमस्कारं न रेणा अतस्तस्यलक्ष्म्यार्थ स्वगुणत्वात् तत्र ज्ञानंतीत्युक्तं विलासलक्ष्म्या इति पाठे विलासस्य पालक्ष्मीः शोभा तस्या ते॥ ते विलासलक्ष्मीसंबंधादेव प्रसिद्धा इति पूर्ववत्

चतुर्थमाह॥ पानेनेति हे देव ते कथासुधायाः पानेन प्रवृद्धभक्त्या प्रकृत्या ये विशदाशयाः ते वैराग्यसारं बोधं प्रतिलभ्य यथा अनायासेन ते अकुंठधिष्ण्यं ईयुः॥ तथा परे पीयुरिति संबंधः॥ एतेनु राजसात्॥ एजस्तेषु निकृष्टाः॥ ये अंतःकरणशुद्ध्यर्थं अंतःकरणतापनिवारणाय भगवत्कथां पीत्वा तेन प्रक्षालितांतःकरणाः प्रक्षालनार्थं च मध्ये भक्तिमपि कल्पयित्वा तेनापि शुद्धांतःकरणाः॥ एवं साधनसाध्यभक्तौ अंतःकरणशुद्ध्यर्थमेव ये नियुंजते ते कर्ममार्गा इव राजसप्रथमाः॥ शुद्धे चांतःकरणे वैराग्यमेव सारभूतं यस्य येन ज्ञानेन न विषयवैतृष्ण्यं भवति तादृशं ज्ञानं प्राप्य अंजसा आत्मस्वेन तेन अकुंठधिष्ण्यं कृत्रिमवैकुंठं ईयुः॥ देवेति

पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये॥ वैराग्यसारं प्रतिलभ्य बोधं यथांजसान्वीयुरकुंठधिष्ण्यं ४६
तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठां॥ त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवया ते ४७

संबोधनात् विष्णुलोकं गच्छंतीत्युक्तं भवति॥ ध्रुवस्थानं वा॥ अकुंठमिति न कदाचिदपि कुंठितं॥ तत्र सर्वदा भोगः सिद्ध एव॥ अथवा॥ ते सारसायुज्यं प्राप्नुवंति ४६ तथा केवलज्ञानिनोपीत्याह॥ तथापरे चेति॥ फलतो भगवदीयत्वात् भक्तत्वं॥ परेभ्यो॥ इदानीं न भगवदीयाः॥ चकाराद्भगवदीया अपि केचित्॥ स्वभावगुणानां बलिष्ठत्वात्॥ आत्मपर्यवसायी आत्मविषयको वा॥ यतो पतो निस्सरतीति प्रकारेण निरंतरस्थितिरूपसमाधिपर्यंतज्ञानेन प्रवृत्तामसवासनां जित्वा त्वामेव विशंति परं पुरुषरूपं॥ विराट् सायुज्यं प्राप्नुवंतीत्यर्थः॥ एतदेव वा अकुंठधिष्ण्यं चतुर्विंशतिप्राकृतसंबंधाद्विमुक्ताः पुरुषं प्रकृतिभर्तारं वा ईयुः॥ त्वामेवेति पुरुषांतरव्युदासः॥ साधनभक्त्यापेक्षया लभक्ताहीनाः इत्याह॥ तेषां श्रमः स्यादिति साधनभक्तेरप्रवेशात्॥ ४७ ॥ श्रीगोपालाय नमः ॥

योगतानेकाग्रे ...: फ° सवारूपायाः वद्धभक्तेरेतेषां योगिष्वप्रवेशाद्धेतोः श्रम:

केवलज्ञानयोगिनः २
योगः ३
केवले ३ =

लो३

Indira Gandhi National Centre for the Arts

तामसान् उत्तममध्यमाधमभेदेन १८

त॰स्कु॰ ७४ एवंसर्वानुक्त्वातामसभेदान्स्वान्मन्यमानाः आत्मनएवत्रिविधतामाहुः॥ तन्नेवयमिति॥ तत्तस्मात्कारणात्नोवयंत्वदीयालामसाव
लोकसिसृक्षयात्वया घसृष्टाः॥त्रिभिरात्मभिरिति॥ आत्मस्थानेस्थापितैस्त्रिभिर्गुणैः अहंकारैर्वा॥त्रिविधजीवैरित्येके॥ अस्मिन्
पक्षेप्रत्येकंभेदत्रयं॥ अनुपश्चात्सृष्टाइतिपरोक्षेणसृष्टाः ज्ञानरहिताजाताः अद्येतिसृष्ट्यंतरव्युदासः॥ अन्यहातुर्यस्माज्जायते ९३
प्राणोमनःसर्वेंद्रियाणिच॥खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीतिभगवतएव सान्द्रात्सर्वंभवतीतितन्निवारणार्थम

तन्नोवयंलोकसिसृक्षयाद्यत्वयानुसृष्टास्त्रिभिरात्मभिः स्मस
र्वेवियुक्ताःस्वविहारतंत्रंनशक्नुमस्तत्प्रतिहर्त्तवेते ४८

धेत्युच्यतेअतएवत्रिभिरात्मभिरित्युक्तं॥ अतःसर्वेवियुक्ताःचकारादृस्मत्तामस्यपिसर्वाभगवतात्रिविधासृष्टा॥ अतोपि
व२ वयंवियुक्ताः॥ अतएवस्वस्यतेविहारतंत्रंविहरणसाम्रग्रीनशक्नुमः तेतुभ्यंप्रतिहर्त्तुं॥ तुमर्थेसेसेइत्यनेनतवेप्रत्ययः॥ त्म॰
तत्प्रतिहर्त्तुं यदर्थंवयंसृष्टाः तत्प्रयोजनंप्रतिहर्त्तुंदातुंसमर्पयितुमितिपावत्॥तत्किमित्याकांक्षायांतत्प्रसिद्धंस्वविहा ७४
रतंत्रमितिसंबध्यते॥ तत्स्वविहारतंत्रंप्रतिहर्त्तुंनशक्नुमइत्यर्थः ४८

अन्यतःस्वसृष्टेः मध्यमान्यपि

तामसमध्यमाएते॥यदर्थंभगवतासृष्टाःतेसर्वेंद्रुएतमानःस्वस्याभिमानेननष्टाःभगवत्कार्यमकृत्वापिस्थिताइतिएता
दृशाभक्तालामसमध्यमाः भगवताभिन्नतयासृष्टाइतिमध्यमत्वंभवति अन्यथाऽधमाएवस्युः॥तादृशाअपिवयंजा
ताइत्याहुः यावद्बलिमितिहेअजयावत्तेबलिंहराममत्तावद्यथावयमन्नमदामतथात्वपाकर्त्तव्यमित्यभिप्रायः॥यावदिति

यावद्बलिंतेजहरामकालेयथावयंचान्नमदामयत्र तत्रो
भयेषांतइमेहिलोकाबलिंहरंतोन्नमदंत्यनूहाः ४९

प्रलयावसानता॥नतुसृष्टिमात्रं॥कालेस्वस्वावसरेयथावयंचअन्नमदाम॥यत्रचअन्नमदाम॥यथावोभयेषांत
वास्माकंचइमेसृष्टालोकाःबलिंहरंतिनिष्प्रत्यूहाःसंतःस्वयमन्नमदंतितथाचक्षुःपरिदेहीतिअग्रेणसंबंधः॥ अतए
वैतेषांवैषम्यंकेचनस्वार्थनिरपेक्षाः॥भगवदर्थमेवकार्यंकर्त्तुमिच्छंति॥केचित्स्वार्थापेक्षिणोपिभगवदर्थमेवकुर्वं
ति॥कार्यंभगवानेवपश्चाद्दास्यतीतिकेचित्तुस्वस्यसेवकानांचभगवतश्चकार्यंतुल्यतयाकर्त्तुंवांछंतितएते ४९
तामसमध्यमाः१

तत्त्वदेवानांमित्तत्व२

Indira Gandhi National Centre for the Arts

त॰सु॰ ७५ ननुकिमर्थमेवंप्रार्थ्यते प्रथमतोऽस्मदर्थं ब्रह्माण्डं कुरु तत्पश्चात्स्वार्थमित्याशंक्याह॥ त्वन्नः सुराणामिति॥ नोऽस्माकं सुराणां देवानां सान्वयानां सपरिकराणां त्वमेव आद्यः उत्पादकः॥ यद्यपि वयमपि स्वकार्योत्पादकाः तथापि वयं विकृताः॥ भवांस्तु कूटस्थः अविकृतः किंच पुरुषो भवान् स्वतंत्रः वयं प्राकृताः अस्वतंत्राः॥ किंच॥ भवान् पुराणः पूर्वः सर्वदृष्ट्वा नाभिज्ञः॥ वयं नूतना आधुनिकाः॥ अतस्त्वय्येवास्माकं सर्वं कर्तव्यं॥ किंच॥ पुत्ररूपा वयं तव अतस्त्वया प्रथमतो वयं पालनीया इत्याह॥ हे देव त्वं देवरूपायां शक्त्यां मायायां गुणाः॥ कर्माणि च योनिर्यस्याः गुणकर्मात्मिका योनिः गुणरूपाः कर्मात्मकाश्च ततोऽजा

त्वन्नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः
त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ५०

यंत इति॥ तस्यामजायां कामात्यारनार्थं रेत आदधे अजाशब्दोऽत्र न यौगिकः॥ नापि रूढः किंतु कल्पनोपदेशः॥ कल्पनोपदेशाच्च मध्वादिवदविरोध इत्यधिकरणेनायमर्थः समर्थितः॥ अन्यथात्र मायायाउत्पन्नेरुक्तत्वात् योगो विरुध्येत॥ रूढिरप्याकृत्यभावात्॥ स्पष्टो कामः प्रधनमितित निरूपणार्थं अजशब्दकल्पनात्र निरूपिता॥ कविं महत्तत्वं पूर्वावस्थारेतः उत्तरावस्थाकविरिति उभयोः साजात्याभावे कार्यमेकविधं न भवेदिति भागवतोऽप्यजत्वं निरूपितं॥ अयमेव तामसहीनभावो भक्तेः यद्भगवत एवं प्रकारेण निरूपणं ५० ॥ वर्करवर्कशःवरूपा कल्पना एम० ७५



ततस्तत्सजातीया एव वयमुत्पन्ना इत्याह॥ ततो वयमिति॥ सात्विकाहंकारप्रमुखा यस्य भगवतः कार्यार्थं बभूविम उत्पन्नाः॥ तर्हि स्वयमनुत्पादयिष्यामीत्याशंक्याह॥ हे आत्मन्निति॥ सर्वेषां त्वमात्मा॥ न हि कार्याणां स्वभावतः कश्चन गुणो दोषो वाऽस्ति॥ त्वन्न एव जातत्वात् तद्रूपत्वाच्च॥ अतोऽस्मान् प्युत्पाद्य तेषु यदि शक्तिं दास्यसि तदा ते प्युपयुक्ता भविष्यंति॥ अतो लाघवात् अस्मभ्यमेव तत्सामर्थ्यं देयमिति भावः॥ नन्वनाज्ञाकारिणो भवंतः यतो महत्त्वा एव तूष्णीं स्थिता स्तत्राह॥ करवाम किं त इति तुभ्यं किं करवाम॥ आज्ञापनाभावाद्विशेषतो ज्ञानाद्वी तूष्णीं स्थितिः॥ अतो वस्तुतो न दुष्टत्वं॥ तर्हि इदानीं ब्रह्मांडनिर्माणं कुरु तेत्याशंक्याह॥ त्वन्न इति नोऽस्माकं त्वमेव सर्वार्थो अतस्तत्र साधकं स्वचक्षुः परिदेहि येन चक्षुषा वयं निष्पादिताः॥ तत्र क्रियाशक्तिरेवा समर्था ८२

ततो वयं सत्प्रमुखा यदर्थं बभूविमात्मन् करवाम किं ते त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणां ५१ इति श्री भागवते महापुराणे तृतीयस्कन्धे पञ्चमोऽध्यायः ॥ ॥

स्मासु प्रतिष्ठिता न ज्ञानशक्तिरिति अतः स्वं चक्षुः परिदेहि॥ परितो दानं सर्वेभ्यः॥ क्रियाशक्त्या सह पुनर्देयं॥ विशकलितत्वयो भयप्राप्तावपि न कार्यसिद्धिः अतः स्वशक्त्या सह स्वचक्षुर्देहीति॥ ननूभयदानं सह दानं चाशक्यं उभयोरेकदा स्थित्यभावात्॥ एकं शब्देऽपरं क्रियायामितीत्याशंक्याह॥ हे देवेति॥ यद्यपि लौकिकन्यायेन लौकिकेन वा नैवं कर्तुं शक्यं॥ तथापि भवान् देवः॥ अतो लौकिकसामर्थ्यात् मिलितमपि दातुं शक्नोतीति॥ ननु नियमेन भवद्भ्य एवं देयमिति कोऽयं निर्बंधस्तत्राह॥ क्रियार्थे यदनुग्रहाणामिति॥ ब्रह्मांडकरणार्थमेव यस्य भगवतोऽनुग्रहो येषां येनानुग्रहेण वयमुत्पादिताः तेनैवानुग्रहेण चक्षुःशक्त्या सह देयमित्यर्थः ५१ इति श्रीभागवते ... श्रीवल्लभ ... तृतीयस्कन्धे पञ्चमोऽध्यायविवरणं ॥

Indira Gandhi National
Centre for the Arts

त.सु.६ ७६

एवंभगवतःस्रष्टोमूतोत्पत्तिर्निरूपिता॥कालोत्पत्त्यर्थमधुनाब्रह्मांडोत्पत्तिरुच्यते १ स्वशक्तिदानंभोगेतुविषयत्वार्थमुच्य
ते विषयानंत्पसिद्धेहिमाहात्म्यंविनिरूप्यते २ एवंभगवतोमात्राःचतुर्द्धाविनिरूपिताः॥स्पर्शोभगवतोनास्तितद्भावादेह
हुक्तिः ३ एवंपूर्वाध्यायांतेतत्वानांप्रार्थनमुक्तं॥तत्प्रार्थनमुपसंहरति॥इतीति॥एतावत्येवप्रार्थनातासांगतिंनिरीस्वशक्ति
बिभ्रद्युगपदाविशदिति संबंधः॥तासुभगवत्प्रवेशोनयुक्तइत्याशंक्याह स्वशक्तीनामिति॥तासामिति स्त्रीत्वेनतासांविद्या
पनंनदोषाय॥स्वस्यैवसामर्थ्यरूपत्वात् तासांकृत्यभावेस्वसामर्थ्याभावएवभवत् स्त्रीरूपाश्चताःभार्यासक्तंस्वयमेवक
रोतिकारयतिच॥शक्तित्वादेवभिन्नतयास्थितिर्नदोषाय नहितावाक्येनमिलंतिस्वेनैवतुमिलंति॥पुरुषालिंगितास्वतास्वकी

मैत्रेयउवाच॥इतितासांस्वशक्तीनांसतीनामसमेत्यसः॥प्रसुप्तलोकंतंत्राणांनिशाम्यगतिमीश्वरः १॥

भवंतिनस्वभावतः समानप्रतिपन्नेर्नवैमनस्यं॥अतएवस्व भावतःअसमेत्यअमिलित्वासतीनांविद्यमानानाम्॥किं
च॥स्वप्रवेशव्यतिरेकेणतासुविद्यमानमपिरजोनप्रकटीभवतितदाह॥प्रसुप्तलोकतंत्राणामिति॥प्रकर्षेणसुप्ताः लोका
नांतंत्राणिरचनाःयासु॥तत्रंसमूहोवा॥प्रसुप्तावायेलोकाः येषांजीवानांकर्मनप्रबु द्धंतदधीनालोकाःप्राणदृष्टप्रेरितास्वतासां
॥कार्याणिकुर्वंति॥समस्तेर्गहत्वेनव्यष्टीनामेवसुख्यत्वमितिपरूः॥परूद्वयमप्यत्रभगवतःपुरुषरूपद्वयसंपत्त्यर्थनिरूप्य
ते॥तदुक्तं॥असमेत्यसतीनांप्रसुप्तलोकंतंत्राणामिति॥तासामन्योन्यमेलनेब्रह्मांडोत्पत्तिः॥कर्मप्रबोधेव्यष्टीनामुत्प एस० ७६
त्तिः॥एतत्सर्वंनिशाम्यदृत्वाअग्रेप्रकारभूतांचगतिंनिशाम्यसर्वप्रकारकरणसामर्थ्यार्थमाह॥ईश्वरइति १॥

परमाण्वादिगतिरूपेण २

एवंसमर्थोनिश्चित्ययत्कृतवांस्तदाह॥कालसंज्ञामिति॥कालइतिसंज्ञायस्याः॥कालोप्येकाभगवच्छक्ति॥अन्यथापुरुषद्वय
प्रवेशेशक्तिषुरसाभासस्यात्॥कालेनसंज्ञावोधोयस्याः॥स्तांवा॥मर्यादारूपाशक्तिः॥सष्टिकालेप्रबुध्यते॥अस्यासुभगव ए
त्यर्थमा ३ तांप्रबोध्यंते॥तयासहभगवद्दर्शनेनतासांमौभवत्विति देवीमित्युक्तं॥साहिदेवतारूपाअतिस्रत्स्तातयाविनाकर्मप्रबोधोदु
र्घटः॥कर्मकालाधीनमेव॥अतएवकालेकर्मविधानं॥तस्याअप्रयोजकत्वंनिराकरोति शक्तिमिति॥बिभ्रदितिप्रवेशप्र

कालसंज्ञांतदादेवीबिभ्रच्छक्तिमुरुक्रमः ३
योविंशतितत्वानांगणंयुगपदाविशत २

पद्यार्थत्र्यर्थमुक्तं॥तत्रभगवतः॥अतिसामर्थ्यवक्तुंतादृशसामर्थ्यंभगवतोवर्ततइतिज्ञापयति उरुक्रमइति॥
अद्भुतचरितत्वंउरुक्रमेसिद्धंतेनैवाद्भुतचरित्रेणत्रयोविंशतितत्वानांगणंयुगपदाविशत्॥प्रकृतिपुरुषौपरित्यज्य
शिष्टाह्यत्रयोविंशतिर्भवंति युगपत्प्रवेशोद्भुतचरित्रं॥तत्रयोःसंधिरिवनैकतरप्रवेशेकार्यसिद्धिः॥गणप्रवेशेगण
देवकार्यमितिसूचयितुंअत्रप्रवेशोनजलादेरिव॥किंतुतेजसइवअयोगोलादावावेशः॥यथागणकार्यंभगवत्कार्यं
भवति॥अन्यथाभगवच्चरित्रतासर्गस्यनस्यात्तदाह आविशदिति १॥

प्रलेगापो २

Indira Gandhi National Centre for the Arts

भ.सु:३ ७७

ततः किमतआह॥ सोनुप्रविष्टइति॥ यद्यपिताभिःक्रिययासहज्ञानमेवप्रार्थितंनसहप्रवेशःतथापिभगवदेककार्येनताभिः सेत्स्यतीतिभगवान्स्वयमेवप्रविष्टः॥ अतःपरंप्रार्थितस्यप्रयोजनाभावात्नप्रार्थितंदत्तं॥ ननुस्वभावतएवसर्ववस्तुषुवस्तु स्वरूपोभगवान्अस्तितथापिवेत्कार्यंनसिध्यतिकिंप्रवेशेनापिभवेत्॥ तत्राह॥ चेष्टारूपेणेति॥ चेष्टायोपयोगिज्ञानेच्छा प्रयत्नरूपेणकेवलप्रयत्नरूपेणवातत्रप्रविश्यपुनस्तंगणंभिन्नंसंयोजयामाससेष्टावेवकार्यजननसमर्थास्तेस्वष्टापरं भिन्नाइतियोजनमेवकर्तव्यं॥ सम्यग्योजनंयथाकार्यमुपपद्यते॥ संगेनीतायाःशक्तेःप्रयोजनमाह सुप्तंकर्मप्रबोधयन्नि ति प्राणिनांयत्सुप्तंकर्मतत्कालशक्त्याप्रबोधयन्॥ प्रबोधनप्रवेशयोःसमानकालत्वेउभयविधंकार्यमेकदासिध्य

सोनुप्रविष्टोभगवान्चेष्टारूपेणतंगणं॥ भिन्नंसंयोजयामाससुप्तंकर्मप्रबोधयन्

क१ ३ प्रबुद्धकर्मादैवेनत्रयोविंशतिकोगणः॥ प्रेरितोजनयत्स्वाभिर्मात्राभिरधिपूरुषं ४

ति॥ प्रबोधनस्यभिन्नहेतुकत्वात्नप्रधानक्रियासंबंधः ३ ततोयज्जातंतदाह॥ प्रबुद्धकर्मादैवेनेति॥ सुप्तेःसहकरणाम प्यशक्यंप्रबुद्धेसाहाय्यमपितेनसिध्यति॥ दैवेनेति॥ दैवतारूपयाशक्त्याक्रियाप्रबोधेस्वार्थेभवेदितिनपुंसकनिर्देशः॥ त पासहितभगवद्रूपंवादैवशब्देनोच्यते सर्वत्रकर्मप्रबोधार्थपुनस्त्रयोविंशतिकोगणइत्युक्तं॥ पुनर्भगवत्कार्यांतरमाह॥ प्रेरितइति॥ मेलनप्रेरणंचभगवत्कार्यंभगवतःप्रवेशात्तस्यगणस्यव्यापकताउता॥ ततोगणांशैः अस्मैरेवब्रह्मांडनि र्माणंजातमित्याह॥ स्वाभिर्मात्राभिरिति॥ अधिपुरुषंब्रह्मांडं॥ पुरुषमधिपुरुषशरीरत्वात्॥ पूरुषशब्दोव्यस्तिपुरुषा दप्यधिकंवा॥ आवरणानामपिजननात्॥ भगवत्प्रेरणयागणेनकृतत्वात्॥ भगवत्कृतमेव ॥ ४ ॥ ॥

एवंब्रह्मांडसृष्टिमुक्त्वाद्वितीयपुरुषमुपपाद्यतृतीयमुपपादयितुंतत्रैवपुनःकार्यमाह॥ परेणविशतेति॥ स्वस्मिन्विशता परेणभगवताहेतुनाकृत्वाविश्वसृग्गणश्चुक्षोभ॥ परंमात्रयाएकदेशेनअंशस्थितेनअन्यथाब्रह्मांडभेदःस्यात्॥ अतःकार्या र्थमेवस्वस्मिन्विशतेत्युक्तं॥ अन्यथाभगवत्प्रवेशेनक्षुब्धोजातइतिवदेत्॥ अतःप्रवेशेनाक्षोभएव॥ तदेकंब्रह्मांडंनिष्प न्नं॥ यदापुनःसनियामकेनरूपेणभिन्नरूपेणवासएवगणःस्पष्टःतदामध्येसहस्रधाविदीर्णः चुक्षोभ अन्यथाव्यष्टिपु

परेणविशतास्वस्मिन्मात्रयाविश्वसृग्गणः॥ चुक्षो

भान्योन्यमासाद्ययस्मिन्लोकाश्चराचराः ५ ॥

रुषाणांनस्यादिभवेयुः॥ क्षोभफलमाह॥ अन्योन्यमासाद्येति॥ सहिविश्वसृजांगणः॥ विश्वसृष्टिस्तस्यस्वतःकार्यं॥ अतएकस्मिन्नपिव्यष्टौसर्वतत्वानांकार्यसिध्यर्थमन्योन्यमासाद्यचुक्षोभ॥ एकस्मिन्नपिद्वाविंशतितत्वानांप्रवेशः॥ एवंप्रस्तारेआनंत्यंभवत्योंकृत्यधिकरणन्यायेन॥ अतस्तदर्थमेवान्योन्यासादनं॥ ततोयज्जातंतदाह॥ यस्मिन्नन्योन्या सादनपूर्वकक्षोभयुक्तगणेचरएवलोकाः ५ ॥ ५ ॥

Indira Gandhi National
Centre for the Arts

॥एवंसमष्टिव्यष्टिदेहानामुत्पत्तिमुक्त्वातत्रसर्वत्रभगवत्प्रवेशार्थंजीवानामप्रवेशः॥तत्त्वान्यपिभगवत्प्रवेशार्थंसर्वसामग्रीं
संपादयंति॥स्थितानीत्याह हिरण्मयइति॥सहिब्रह्मांडात्माहिरण्मयः सुवर्णात्मकः॥पृथ्वीअपतेजसांसमानांशतया
अन्योन्याभिभवाभावेनयत्कार्यंतत्सुवर्णमित्युच्यते॥तत्राधिक्येरौप्यं॥पृथिव्याधिक्येत्वन्येधातवः॥द्वयोःकारणप्रवेशेम
न्मयानि।मदल्पेजलसातितापेसिकताः मध्यतापेपाषाणाः अल्पतापेत्विष्टकाः॥जीवसंबंधेनस्थावरास्थिभेदाः।का
ष्ठादयः॥तत्रसविराट्पुरुषःहिरण्मयः॥सुवर्णप्रतिमावत्सएवपुरुषोदेहरूपेण॥पुरुषसहितोवा॥सहस्रपरिवत्सर

॥हिरण्मयःसपुरुषःसहस्रपरिवत्सरान् आंडकोशउवासाप्सुसर्वसत्त्वोपबृंहितः ६

पर्यंतंस्वयमंडात्पृथग्भूतनालिकेरफलवत्॥अस्मिन्नेवांडकोशेअधस्तात्स्थितेगर्भोदकेदेहात्स्वतएवस्रुतोदकेस्वसृष्टे
वाउदकेशयनंकृतवानित्याह उवासाप्स्विति॥अप्त्नीनामपितस्याशयनमेवेत्याह॥सर्वसत्त्वोपबृंहितइति॥सर्वाणिसत्त्वा
निजीववद्देहाःसदृशत्वात्तत्त्वानीत्युच्यंते॥तैरुपबृंहितःसंबद्धःनारायणोदरएववसः वीणिभूतानिस्थितानीत्यर्थः॥अ
स्मिन्पक्षेननिरात्मकः कियत्कालंस्थितः पूर्वमेवभगवत्प्रवेशात् स्रष्टुःप्रवेशपक्षेतुनिरात्मकस्थितिः॥अतएवात्रस 
पुरुषइत्युक्तं॥अत्रतुसहस्रवर्षपर्यंतंअंतःकार्यंकृतवानितिकेवलंसत्वैरुपबृंहितः कार्यप्रकारपर्यालोचनार्थंस्थितः
६ ॥ ६ ॥ ६ ॥

ततःकार्यंकृतवानित्याह सवैविश्वसृजांगर्भइति॥विश्वसृजांतत्त्वानांगर्भोबालकः अंतःसामर्थ्यरूपोवात्रिविध
कर्मात्मकोजातः॥चेष्टारूपस्यभगवतःप्रवेशात्कर्मशक्तियुक्तोजातः॥कर्मप्रेरककालशक्तिप्रवेशाद्देवशक्तियुक्तोजातः
॥विश्वजांसहजसामर्थ्यात्कारणधर्मेसात्मशक्तिपुक्तोजातः॥अतस्त्रिविधशक्तिमान्आत्मानमेवविवभाज॥केचना
त्माधीनाःकृतास्तेऽध्यात्मिकाःकेचनदैवाधीनाः तेआधिदैविकाःकालाधीनाइत्यर्थः॥केचनक्रियाधीनाःतेआधि

सवैविश्वसृजांगर्भोदेवकर्मात्मशक्तिमान्॥विब भाजा
त्मनात्मानमेकधादशधात्रिधा ७ ॥श्रीगोपालयनमः

भौतिकाः॥अतोभगवतःक्रियारूपस्यप्रवेशात् क्रिययाभगवत्कार्यमेवकर्तव्यं॥भगवत्क्रिययाऽन्यकरणेतुस
ष्टोदोषःतदाह॥बिवभाजेति॥अतःपरंतस्यकारणांतरंनापेक्षितमित्याह॥आत्मनात्मानमिति॥तत्रत्रैविध्यंमतां
तरभेदान्वदन्नाह॥एकधेति॥प्रथमभेदेसात्विकेदैवएकएवभेदः द्वितीयराजसेदशभेदाः॥तृतीयेतामसेत्र
योभेदाइति ७ ॥

Indira Gandhi National
Centre for the Arts

न०मु०६
७७

नन्वेतावद्भिरेवभेदैः कथंसर्वंकार्यंसेत्स्यतीत्याशंक्याह॥ एषहीति॥ अशेषसत्वानामात्मांशोहिपुरुषश्चायमर्थः॥ वीजंयादृशमेवभवतितादृशमेवकार्यंभविष्यतीति॥ सर्वेषामात्मत्वात्स चेदेवंप्रकारेणत्रिरूपोजातः तदासर्वाण्येवसत्वानितथाभविष्यंतीतिसर्वमेवकार्यंसेत्स्यति किंच किमनेनैकेनएतादृशाभगवतःकोटिशःसंत्यंशाः अतोभगवतोपिअनेकेभेदाःसेत्स्यंतीत्यभिप्रायेणाह यस्मात्मानोंशइति अयंगर्भःपुरुषोत्तमस्यांशः॥ कोप्यंशानामप्यंशः ::॥ परमंयमा

एषह्यशेषसत्वानामात्मांशःपरमात्मनः आद्योवतारो
यत्रासौभूतग्रामोविभाव्यते ८ श्रीगोपालयनमः

नंदांशइत्याह आद्योवतारइति॥ चिदंशास्तुजीवाः सर्वेषांब्रह्मांडांतर्वत्त्यवताराणामयमाद्योवतारः॥ सत्वरूपत्वरतोविद्यमानोभगवान्॥ प्रथमस्मिन्विराजीउत्तीर्णः॥ पश्चान्मध्ये॥ इदमेवावतरणं॥ संबंधश्चवह्निवदितिपूर्वमुक्तं॥ अस्यावतारस्यस्वरूपात्प्रच्युतिः केनाप्यंशेननास्तीत्यभिप्रायेणाह॥ यत्रासौभूतग्रामोविभाव्यतइति॥ प्रपंचाश्रयत्वमेवभगवत्वं॥ एम०
अतोनारायणोयंप्रपंचाधारत्वाद्भगवानेव॥ असौपरिदृश्यमानोभूतग्रामः यस्मिन्पुरुषेविशेषेणभाव्यते॥ शबलतयातिष्ठतीत्यर्थः ८ ॥ ७७

मध्यमांः

पूर्वोक्तभेदान्गणयति॥ साध्यात्मइति॥ अस्यचाऽन्योऽन्यथावर्णयेत् त्रैविध्यंप्रथमतोनिरूपयति अस्यजगतस्त्वामसप्राधान्यात्देहप्राधान्यादित्यर्थः॥ तत्रैकः साध्यात्मोभेदः॥ आत्मानमधिकृत्ययोवर्त्तते॥ सअध्यात्मोदेहःतद्गतोवा॥ आत्माजीवः भगवदंशोवा॥ अनेनअध्यात्मेनसहितःविराड्देहांशःसाध्यात्मोभवति एवंसाधिदैवः देवाः अंतर्यामिदिगाद्य॥ तानधिकृत्ययोवर्त्ततेइंद्रियवर्गः तदभिमानिनोजीवाःभगवदंशावा॥ तेअधिदेवाः॥ इंद्रियादयोवा॥ तैःसहितःविराड्देहांशः उपरिभागःसाधिदैवः॥ एवमधिभूतश्च॥ अत्रचकारः अवांतरभेदेषुआध्यात्मिकादिसंग्रहार्थः॥ साधिभूतोविराडधोभागः॥ इत्यमुनाप्रका

साध्यात्मःसाधिदैवश्चसाधिभूतइतित्रिधा॥ विराट्प्रा
णोदशविधःएकधात्हृदयेनच ९ श्रीराधावल्लभा॥

रेणत्रिधा॥ इदंहिगणनाशस्त्रैविध्यं॥ दशविधमाह॥ विराट्प्राणोदशविधइति॥ विराज्ञोयःप्राणःआसन्यरूपःषष्ठ्यासंबंधात्विराडास्यावतारइत्युक्तं॥ महत्तत्वस्यैवक्रियाशक्त्यंशःसूत्रात्मासएवविराट्॥ प्राणादयःपंच॥ तथानागादयः॥ नागःकूर्मश्चकृकलोदेवदत्तोधनंजयइतिवाक्यात्॥ एतेषांदेहेकार्यंनियतं॥ काशश्चिद्व्यानयोःप्राणेन्द्रंभाशोषतंथैवच॥ तस्यैकःप्रकारःहृदयेन॥ हृदयमितिवक्तव्येतस्यकरणत्वेननिर्देशः तदवांतरभेदनिरूपणार्थः॥ मनोबुद्धिरहंकारश्चित्तमिति॥ चकारेणसाधिभूतादिभेदाःसंगृहीताइति॥ हृदयंमनःप्रभृतयस्तद्देवाश्चेति ९ ॥ ॥

Indira Gandhi National
Centre for the Arts

एवंतस्यविराजःतदंतर्गतानांचएकप्रकारेणस्वरूपमुक्त्वास्वप्रवेशेनैवविश्वसृजांकार्यंविधायज्ञानक्रियाशक्तीअदत्वा
यथावयंवात्रमदामयत्रेतियद्विज्ञापितंतदपिचेन्नदद्यात्तत्वानांनाशःखेदोवाभवेदितितेषांविज्ञापनंसत्यांकृतवानि
त्याहस्मरन्विश्वसृजामिति॥विश्वसृजामित्यनेनतेषांमहत्वमुपकारश्चसूचितः॥दानेहेतुर्विज्ञापितमिति॥स्वार्थंतुनकृ
तवानित्याह॥अधोक्षजइति॥अधःअक्षजंयस्मात्॥यत्किंचिदिंद्रियैरुत्पद्यतेज्ञानंक्रियावातद्भगवंतमप्राप्यैवपरागेव
निवर्त्तते॥अतःस्वोपयोगाभावात्उभयोपयोगेभक्तिविरोधाच्चतेषामेवोपकारंकृतवान्॥किंकृतवानित्याकांक्षायामा
ह विराजमतपदिति॥सहिसर्वसमर्थःसिद्धेपिकार्येतेषामुपयोगार्थंस्वतेजसापुनस्तत्कार्यंसंतप्तंकृतवान्॥स्वतेजसातत

स्मरन्विश्वसृजामीशोविज्ञापितमधोक्षजः॥विराजमतपत्स्वेनतेजसैषांविवृत्तये १० अ
थतस्याभितप्तस्यकतिचायतनानिह॥निरभिद्यंतदेवानांतानिमेगदतःशृणु ११ ॥

मत्वात्नहृष्यानाशप्रकारेणतस्यभंगःकिंतुएषांतत्वानांविविधवृत्तयेस्थानसिद्धयेयथातेषांस्थितस्थमध्येछिद्राणि
स्थानानिभवंतितथातापंकृतवानित्यर्थः १० तेषांछिद्राणांस्वोपयोगाभावात्भिन्नप्रक्रमेणनिरूपयति॥अथेति॥
तस्यविराजःभगवत्तेजसाअभितप्तस्यकतिआयतनानिनिरभिद्यंत॥तानिचेज्ज्ञानासितदानवक्तव्यं॥अथनजाना
सितदावक्तव्यमित्यभिप्रायेणकतीत्युक्तं॥चकारएवार्थःस्वार्थचतत्रैवप्रकारःसंगृहीताः॥भेदेननाशशंकांवारय
ति॥आयतनानीति॥भित्वाप्यपिग्रहरूपाण्येवतत्वानांज्ञानानीति हेत्वाश्चर्यंदेवानांस्थानत्वात्नांगविकलत्वं॥ता एम॰
निनज्ञानासिचेत्मेगदतःशृणुमेगदतःसतःमयात्वदर्थमेवोच्यतइतिनदेवानांमर्मोद्घाटनेनदोषःस्यात् किंतुम ८०
याकीर्त्यते॥देवानांस्थानस्वरूपं॥त्वयापिश्रोतव्यं॥आज्ञांआवेवैयेस्यादिति ११ ॥

तान्यायतनानिनिरूपयति॥तस्याग्निरास्यमिति॥तस्यविराजःनिर्भिन्नेआस्येवक्त्रेअग्निरविशत्॥वाचिजायमानेभोगःअ
ग्नेर्भवति॥लोकपालइतिविशेषणं॥अग्नेस्तत्वरूपस्यविज्ञापनासिद्ध्यर्थं॥आग्नेयदिशियेलोकाःतेषांपालकत्वंदत्तं॥
आस्येचस्थानंदत्तंतत्रदत्तंतस्यलोकास्तुपालाःरक्ष्याएव॥भोगस्तुवाच्येव वाचांशेनेति॥वागिंद्रियंअग्नेरध्यात्मिकरू
पंआसंगदोषसहितोग्निः।वागित्युच्यते॥अतएवअग्नेःस्वांशभूतावाक्॥अनेनाग्निःइत्यरूपीनिवारितः।किंतर्हिदेवतया

तस्याग्निरास्यंनिर्भिन्नंलोकपालोविशत्पदं॥वाचास्वांशेनवक्तव्यंययासौप्रतिपद्यते॥ १२ ॥
निर्भिन्नेतालुवरुणोलोकपालोविशद्विभोः जिह्वयांशेनचरसंययासौप्रतिपद्यते १३ ॥

वाचावा॥तत्राहययावाचाअसौवि राट्पुरुषःवक्तव्यंवाग्व्यापारंशब्दोच्चारणमितियावत्॥तद्देवताधिष्ठितेंद्रियेणप्रति
पद्यते १२ स्थानांतरमाह निर्भिन्नेतालुनीति तत्रैवास्येयोवक्त्रसंमितः॥आकाशःतत्राप्यग्निःदेवतावाग्निंद्रियंतत्रैव
पुनःतालुलोकेजिह्वायदयाचं॥गोलकंनिर्भिन्नंतन्निर्भिन्नंतालुवरुणोदेवताआविशत्॥लोकपालइतिपूर्ववत्॥विभो
रितिविराजः॥सहिविभोःनानारसानुपस्थाप्यग्राहयति॥अतोवरुणस्यतत्रमहाभोगः॥प्रभोर्भोगस्थानेविद्यमानत्वात्॥
जिह्वयांशेनेति॥जिह्वायीद्रियंवरुणस्यांशंतयाजिह्वयाअसौविराट्रसंप्रतिपद्यते १३ श्रीगोपालायनमः ॥

Indira Gandhi National
Centre for the Arts

त.मु. ८१

भगो

अस्यद्विवरद्यमाह॥निर्भिन्नेअश्विनाविति॥अश्विनीकुमारौनिर्भिन्नेनासापुटेपदमाविशतां॥नासापुटद्वयंगोलकंविष्णोर्वि एजः घ्राणमिंद्रियंगंधस्यप्रपतिःगंधज्ञानंघ्राणदेवताभ्यांहेतुभ्यांभगवतोभवति॥सर्वत्रविवरंगोलकंदेवतापास्यानंदेवता इंद्रियप्रेरिका इंद्रियंचतस्यांशः॥इंद्रियदेवताभ्यांचअभिमानिनस्तद्विषयानुभवइति १४ इंद्रियांतरस्यचक्षुषोविषयंनि रूपयति निर्भिन्नेअक्षिणीइति॥अक्षिणीगोलकेत्वष्टासूर्यः॥अभिमानिनोनिर्देशः चक्षुषःप्रापिकासुरत्वस्थापनाय॥चक्षु

निर्भिन्नेअश्विनौनासेविष्णोराविशतांपदं॥ घ्राणेनांशेनगंधस्य प्रतिपत्तिर्यतोभवेत्॥ १४ ॥निर्भिन्नेअ क्षिणीत्वष्टालोकपालोविशद्विभोः॥चक्षुषांशेनरूपाणांप्रतिपत्तिर्यतोभवेत् १५ निर्भिन्नान्यस्यचर्म णिलोकपालो निलोविशत्॥प्राणेनांशेनसंस्पर्शंयेनासौप्रतिपद्यते १६ कर्णावस्यविनिर्भिन्नौधिष्ण्यं स्वंविविशुर्दिशः॥श्रोत्रेणांशेनशब्दस्यसिद्धिर्येनप्रपद्यते १७ त्वचमस्यविनिर्भिन्नांविविशुर्धिष्ण्यमोषधीः

रिंद्रियं १५ निर्भिन्नान्यस्यचर्माणीति॥रोमकूपच्छिद्रानंत्यात्बहु १८॥अंशेनरोमभिःकंडूंयैरसौप्रतिपद्यते १८ वचनं॥एषात्वगूधा॥त्वक्शब्देनचअग्निमरुत्संयोगोनिरूप्यते तस्मादत्रेंद्रियद्वयं॥यच्चर्मोपरिभूत्संयोगोंशःसात्वक्॥त्वक्च र्मेतिक्रमात्॥तत्रचर्माणिअनिलोदेवताप्राणइंद्रियंलोकेत्वक्शब्दवाच्यं॥प्राणस्योपष्टंभकत्वात्तच्छब्देनोच्यते॥कर्णाविति ॥दिशोदेवताः श्रोत्रमिंद्रियं॥शब्दस्यसिद्धिः॥शब्दज्ञानंत्वग्गोलकं श्रीषधीर्देवताःलोमानिइंद्रियाणि॥ कंडूत्वाघ र्षणसुखं १८ ॥

त्वक्चर्ममांसरुधिरमेदोमज्जा॥स्थेयातवइतिनाक्यक्रमात् २८

एम० ८१

---

अंतःकरणस्योद्भवंविषयभेदंचनिरूपय तिचतुर्भिः २५

मेढ्रंगोलकंकोदेवता॥रेतइंद्रियं॥आनंदःस्त्रीसंभोगसुखं गुदंगोलकं॥मित्रोदेवता॥पायुरिंद्रियंविसर्गोमलत्यागः॥हस्तौ गोलकं इंद्रोदेवता॥स्वर्पतिरितिलोकपालः वार्त्ताकृतिः॥करणसामर्थ्यबलमितियावत् इंद्रियंवृत्तिःहस्तव्यापारः॥ पादौगोलकंविष्णुर्देवता॥गतिरिंद्रियंप्राप्यं॥चरणकर्म॥ग्रामादिसंबंधइतियावत् २२ तद्देवांशभेदेनबुध्यादिशब्देनो च्यते बुद्धिर्गोलकंवागीशोब्रह्मादेवताबोधइंद्रियं॥बोध्यमादेर्घटादेःप्रतिपत्तिः॥ज्ञानंइंद्रियव्यापारः २३ हृदयगोलकं

मेढ्रंतस्यविनिर्भिन्नंस्वधिष्ण्यंकउपाविशत् रेतसोंशेनयेनासावानंदंप्रतिपद्यते॥ १९॥गुदंपुंसोविनिर्भिन्नं मित्रोलोकेशआविश ५ . पायुनांशेनयेनासौविसर्गंप्रतिपद्यते २० हस्तावस्यविनिर्भिन्नाविंद्रःस्वर्प तिराविशत्॥वार्त्तयांशेनपुरुषोययावृत्तिःप्रपद्यते २१ पादावस्यविनिर्भिन्नौलोकेशोविष्णुराविश त्।गत्यास्वांशेनपुरुषोययाप्राप्यंप्रपद्यते २२ बुद्धिंचास्यविनिर्भिन्नांवागीशोधिष्ण्यमाविशत्बोधनांशे नबोध्यंप्रतिपत्तिर्यतोभवेत्॥हृदयंचास्यनिर्भिन्नंचंद्रमाधिष्ण्यमाविशत् मनसांशेनयेनासौविक्रियांप्रतिपद्यते॥ २४ आत्मानंचास्यनिर्भिन्नंअभिमानोविशत्पदं॥कर्मणांशेनयेनासौकर्त्तव्यंप्रतिपद्यते॥ २५ ॥ ॥

अंतःकरणचतुष्टयस्यहृदयमेकंगोलकंचंद्रमादेवतामनइंद्रियंविक्रियाविविधक्रियासंकल्पविकल्परूपा।इंद्रियव्या पारः।आत्माहंकारः अंतःकरणांशः अभिमानोदेवताहृद्रात्मकइतिकेचित्।नूतनसृष्टत्वात्तच्छब्दवाच्यएवतथाविधास्ते कर्मअभिमतिःदेहादावहंबुद्धिः इंद्रियंकर्त्तव्यमहंकारकार्यं २५ ॥

ध

दि

श्री ५

Indira Gandhi National Centre for the Arts

त०मु०६ ८१ सत्वंगोलकं॥महान्देवताचित्ताभिंद्रियंविज्ञानंचेतनोइंद्रियव्यापारः २६ एवंसात्विकाहंकारकार्यमनसिमहत्तत्वाहंकारयोःबुद्धेश्च ऐक्यविवक्षयातेषांमयींद्रियत्वंयरिकल्पतत्रदेवतादिभेदउक्तः॥इदानींमध्येअवयवैर्लोकनिर्माणमाह शीर्ष्णेस्येतिअस्यविरा जःशीर्ष्णःसकाशात्द्यौरुदपद्यत॥नाभेःखमंतरिक्षमुदपद्यत॥पद्भ्यामितिपंचमी धरापृथिवी॥विपरीतकथनेप्रयोजनंवक्तव्यं॥ ननुकिमर्थमेतन्निरूपणंविज्ञापितेहिसंतापःकृतः॥तत्वानांचभोगार्थस्थाननिर्माणमुक्तंधरादिनिर्माणस्यकोपयोगइत्याशं क्याह गुणानामिति॥पूर्वंअहंकारस्यमायायावागुणानिरूपिताःतेषांप्रत्येकवृत्तिस्थानंवक्तव्यंतदभिमानिदेवानांनियतभोग

९८ सत्वंचास्यविनिर्भिन्न महान्धिष्ण्यंउपाविशत्॥चित्तेनांशेनयेनासौविज्ञानंप्रतिपद्यते २६ शीर्ष्णो स्यद्यौर्धरापद्भ्यांखंनाभेरुदपद्यत॥गुणानांवृत्तयोयेषुप्रतीयंतेसुरादयः २७ आत्यंतिकेनसत्वेनदिवंदे वाःप्रपेदिरे॥धरांरजस्वभावेनपणयोयेचताननु॥ २८ ॥श्रीगोपालयनमः ॥ ॥

५१ ५२

र्थवृत्तयोविलासप्रकाराःयेषुद्यौरादिषु॥ननुगुणानांकावृत्तयःविलासश्चेतनानांभवतीत्याशंक्याह।येषुप्रतीयंतेसुरादयइति॥ येषुप्रतीयंइतिपुनरनुषज्जते॥सुरादेवाःआदिशब्देननराभूतानिच २७ तदेवविभज्यस्पष्टयति॥आत्यंतिकेनेति॥आत्यंतिकं गुणांतरास्पृष्टंसत्वाधिक्यंवा देवाःपूर्वोक्तास्तेच पूर्वमपिआधिदैविकानिरूपिताः॥अन्येचत्रयस्त्रिंशत्तेसर्वेअतिसात्विकाइ तिसत्वविलासस्थानंदिवंप्रति पेदिरे॥विपरीतकथनेहेतुंवदन्व्युत्क्रमेणनिरूपयति धरामिति॥गुणक्रमएवात्र क्रमःनतुवयःक्रमःरजःस्वभावेनपणयोनराःधरांप्रतिपद्यंते॥कर्मदत्वाफलंगृह्णंतीतिकर्मणैवव्यवहारइतिपणयोनराःता एम० ८१ ननुयेगवादयस्तेषांतामसत्वेपिनरोपकारात्भूमिमेवाश्रिताः २८ ॥

ति०

ता०:

ततीयस्थानेहेतुमाह तार्तीयेनेति॥तार्तीयंतृतीयं॥प्रकृतेर्गुणत्रयस्वभावेनेत्युक्तं भगवन्नाभिमंतरिक्षंतामसस्यमध्येनि वेशनेहेतुरुच्यते॥उभयोरंतरंव्योमेति॥अंतरिक्षंशून्यंतेषांस्थानं॥रुद्राद्यातुकाअनायतनाः॥अतस्तृतीयत्वेपिमध्यस्थान स्यशून्यत्वात्रुद्रैःतत्स्थानंगृहीतमिति आधेयाधारयोःबलिष्ठत्वेनअंतरालमेवस्थानं॥तत्रस्थितान्निर्दिशति॥येरुद्रपार्षदा ओ इति रुद्रस्यपार्षदिसभार्यापाःकदाचित्तत्रतुरुद्रसभार्यासनकादयोदेवावाअगच्छंतीतितत्साहचर्यगणाइत्युक्तं॥येमहादेव स्यगणाभूत्वापार्षदाःतेमध्येतिष्ठंति २९ एवंमष्टिस्रष्टोगुणैःस्थानभेदानिरूपिताः॥गुणैरेववर्णभेदाइतिवर्णानवयवेभ्यःउ त्पन्नान्निरूपयतिभजनार्थं मुखतोवर्ततेति भगवतोमुखतःब्रह्मदेवतारूपंशुद्धसत्वपरिणामभूतंपदधिष्ठानात् ब्राह्म णाभवंतितज्जातं अवर्ततेतिविद्यमानमेवमुखात्प्रकटीभूतं॥पुरुषस्यभगवतोनारायणस्य॥कुरूद्वहेतिविश्वासार्थं एत

तार्तीयेनस्वभावेनभगवन्नाभिमाश्रिताःउभयोरंतरंव्योमयेरुद्रपार्षदांगणाः २९ मु ८१ खतोवर्ततब्रह्मपुरुषस्यकुरूद्वह॥यस्तून्मुखत्वाद्वर्णानांमुख्योभूद्ब्राह्मणोगुरुः ३०

द्ब्रवणाधिकारार्थंवा॥यस्तुवर्णानांमध्येमुख्यःब्रह्मोन्मुखत्वात्ब्राह्मणोभूतगुरुश्चाभूत्तुशब्देनस्वतोब्राह्मणस्यमुख्यत्वंवारयति॥ ब्रह्मणिस्थितोब्राह्मणःतत्रभवोवा॥तस्येदमितिवाअण्॥उन्मुखोग्रेमहत्तः॥मुख्योवर्णःऊर्ध्वमुखोभवति॥ऊर्ध्वमुखंयस्य उ पदेशाद्यर्थंआद्यस्यऊर्ध्वमुखंभवति॥ब्रह्माप्यूर्ध्वमुखंभगवन्मुखात्यतऊर्ध्वंजातं।ऊर्ध्वमुखंयेनेति॥ब्रह्मोत्पत्त्यर्थमेवभगव तोमुखमूर्ध्वंजातंइति॥अतःसमष्टिव्यष्ट्योबीजांकुरभावेनैक्यात्॥उन्मुखत्वसाम्येनवर्णानांमध्येमुख्यः॥मुखेभवःप्रथमंजात ब्राह्मणोतातः अतएवगुरुःभगवानेवहिगुरुः॥सहिमुखेनोपदिशति॥तदुपदेशनार्थमेवब्रह्मआधिभौतिकंनिर्गतं॥आ धिदैविकंत्वरूपमिति॥अतोभौतिकब्रह्माविर्भावात्॥उन्मुखत्वसाम्येनतद्ब्रह्मवर्णाद्येप्रविशतीतिब्राह्मणएवद्वितीयब्रह्मणोवेद

ब्राह्मणो१

Indira Gandhi National Centre for the Arts

ल॰सु॰ ८२ द्वितीयवर्णोत्पत्तिमाह बाहुभ्योवर्त्ततेति॥ क्षत्रंनामभगवतोवीर्यंलोकरक्षात्मकंकिंचित्तद्बाहुभ्योनिर्वृत्तं॥ अंतःस्थितं
सद्बहिर्निर्गतमित्यर्थः॥ वर्णानांमध्येद्वितीयः तदनुव्रतः॥ क्षत्रमनुव्रतंयस्य॥ यथाक्षत्रंरक्षार्थमेवप्रवृत्तंतथायमपीति
सहजातत्वात्एकोपादानकत्वाच्च क्षत्रस्यसेवकत्वात् क्षत्राद्धइति नियतधर्मवाचकत्वेनजातिवाचकत्वएवघञ्

बाहुभ्योवर्त्ततक्षत्रंक्षत्रियस्तदनुव्रतः॥ योजात॥
स्त्रायतेवर्णान्पौरुषः कंटकक्षतात् ३१ ॥

त्पयात्अनुव्रतत्वार्थेनियुक्तःतदेवविशदयतिपोजातइति क्षतात्त्रायतइति क्षत्रियः॥ योजातएवस्वव्यतिरिक्तास्त्री
न्वर्णान्कंटकक्षतात्त्रायते॥ रोगात्त्राणव्युदासार्थंकंटकादित्युक्तं॥ कंटकादेत्प्रांशाः तेहिभूमेःकंटकप्रायाःगतिप्र
तिबंधकाःधर्मप्रतिबंधकाइतिपावत्॥ अन्यथामारकत्वात्विपरीततापात्॥ अनेनकंटकानांवर्णतानिषिद्धा॥ एम॰
क्षतादितिसंभावनायां॥ पौरुषोयंक्षत्रियः॥ पुरुषाज्जातःपौरुषः॥ सामर्थ्यकथनार्थपौरुषइत्युक्तं ३१ ॥ ८२

कृषिगोरक्षपो:३४ मर्त्तं४४
तृतीयवर्णोत्पत्तिमाह॥ विशोवर्त्ततेति॥ विशइतिसर्वेषामेववर्णानांजीविकावृत्तयःउक्ताःकृष्यादयः॥ शिलोञ्छादीना
मपितन्मूलकत्वं देयमपिततएवोत्पद्यतइति तत्रोत्पादकंद्वयं॥ कृषिर्गोरक्षाच वाणिज्यकुसीदवृद्धिप्रायके य
द्यपिधातुभिर्व्यवहारेवैश्यस्यनैयोजकत्वंतथापिनधातुभिर्वृत्तिर्भवतीतिअन्नोत्पत्त्यर्थंरसोत्पत्त्यर्थंचकृषिगोरक्ष
योरेवप्रयोजकत्वं कंटकादेवरक्षाक्षत्रियस्य ततएवोत्पन्नैरुपदेशाद्ब्राह्मणोलभतेरक्षत्रियः॥ आरण्यानांमूल
फलादीनांचयद्यपिजीवनोपयोगित्वंतथापिनसर्वेषांसर्वदातदुपयोगः तस्यभगवतःऊर्वो॥ ऊरुद्वयात्वार्त्ताउत्पन्ना॥ तद्यातः३४

विशोवर्त्ततवार्त्तालोककवृत्तीकरीर्विभोः॥ वैश्य विश:१
स्तदुद्भवोवार्त्तान्वृत्त्यायःसमवर्त्तयत् ३२ ॥

तासांप्रयोजनमाह॥ लोकवृत्तिकरीरिति॥ लोकानांवृत्तिंजीविकांकुर्वंतीति॥ नन्वमूर्त्तास्ताःपदार्थानांचनियत
त्वात्धर्मादीनामपिदर्शनात्कथंतासांसर्वनिर्वाहकत्वमतआहविभोरिति॥ सहिसमर्थःवृत्त्याश्रयणमात्रेणै
वसर्वानपिदोषान्हरीत्युत्पन्नंजीवयत्येव॥ तासाममूर्त्तानांआधारार्थंताभ्यएवनिर्गतःवैश्यस्तृतीयोवर्णःव
र्णांवार्त्तांजीविकांसम्यगवर्त्तयत् यइतिप्रसिद्धः॥ अथवावैश्यस्तदुद्भवइतिभिन्नं॥ यइत्यनुवादः॥ वृत्तामिति
देवादिव्युदासः॥ अनेनसाधारणाएवपुरुषाः। तद्वृत्त्याजीवंतिनत्वधिगतपरमार्थाः॥ सम्यक्प्रवर्त्तनंनामअनायासेन
वैश्य२ नित्यनिर्वाहकत्वं ३२

Indira Gandhi National
Centre for the Arts

त.सु.६ चतुर्थोत्पत्तिमाह॥पद्भ्यामिति भगवतः सर्वात्मकस्य पदार्थचतुष्टयमभिप्रेतं॥ ज्ञानंक्रियारूपारूपाज्ञीविकासेवेतितैर्भगवतः पद्भ्यां
८४ शुश्रूषानामसेवारूपाकाचित् भगवद्भक्तिरूपाअंतरंगाकाचिद्भक्तिरुत्पन्नातस्याः प्रयोजनमाह॥धर्मसिद्धय इति धर्मः सेवये
वभवति गुरुसेवा देवतासेवा॥अरण्यसेवा॥आत्मसेवेति किंबहुनासर्वएवधर्मः पातिव्रात्यादयोपिसेवायामेवपर्यवसिताः॥
अतोधर्मसिद्ध्यर्थंसेवागतिदात्रीभगवद्भक्तिहेतोरुत्पन्ना॥ नेनपूर्ववर्णानांपुरुषार्थांतरहेतुत्वंअर्थादुक्तं॥विशेषार्थसाधकत्वं क्षत्र
स्यकामसाधकत्वंब्राह्मणोमोक्षसाधकत्वंअतएवब्राह्मणएवमुक्तिः॥क्षत्रियेभोगः वैश्येपार्थः धर्मः शूद्र इति॥ उत्तरस्यपूर्वहेतुत्वा
त् उत्तरार्थमेवपूर्वग्रहणं॥अतोमोक्षार्थमेवधर्मादीनामन्यधर्माणांकरणंब्राह्मणस्यतथाभोगार्थमेवक्षत्रियस्यधर्मादिकरणं
तथावैश्यस्यधनार्थमेवधर्मकरणंशूद्रस्यतुधर्मार्थमेवसेवाधर्मकरणं॥अतोयंमहान्॥अन्यार्थधर्मकरणात्॥अतएवपद्भ्या

पद्भ्यांभगवतोजज्ञेशुश्रूषाधर्मसिद्धये॥तस्यांजातः पुराशूद्रोयद्वृत्त्यातुष्यतेहरिः ३३

तुष्यतेहरिरिति॥हरिः सर्वेषांदुःखहर्तासेवयाचदुःखंगच्छति अतः स्वकर्तव्यकरणादपितुष्यति॥ तादृशसेवायांजातः शूद्रत
न्निर्वाहार्थंवा॥पुराकल्पादौ इदानींतनानांतुतदुद्भवत्वं॥शुश्रूषायांभवइतिशकारउकारौमिलितौद्विरुक्तौएकशेषेणशूभ
वतः सन्प्रत्ययश्चजत्वेनदत्वमापद्यते॥रेफस्यचपरोक्षार्थेव्यत्ययः॥अः प्रत्ययादितिसन्नंतादकारोभवति॥स्त्रीत्वाभावान्नटाप्
अणप्रत्ययोवातद्धितः वृद्ध्यभावः परोक्षार्थः शुगस्तदनादरश्रवणात्तदाद्रवणादितितुयोगेनान्यथाशूद्रशब्दोनिरुक्तः॥सन
जात्युपयोगी तंवानिर्वचनंकालभेदेनस्थापयति॥पुराशूद्रइति॥सहियावत्पर्यंतंसेवांनकरोतितावत्पर्यंतंशुचैवद्रवतितस्य एम०
अर्थाद्यभावात्धर्मोपियदिनभवेत्शोकोभवेदितितेनवाद्रवतीतिपुराअयंशूद्रोवति पश्चात्तुवर्णमात्रं॥शोकाभावेहेतुः॥यद्वृत्त्या ८४
नुष्यतेहरिरिति हरितोषात्सर्वमेवसिद्धंभवतीत्यर्थः ३३ ॥

एवंवर्णानामुत्पत्तिमुक्त्वाभगवतितेषांविनियोगमाह॥एतेवर्णाइति॥एतेवर्णाः स्वधर्मेणवागादिव्यापारेणांसहितेषांस्वधर्मः॥ औ
त्पत्तिकः॥वाग्व्यापारेणभगवद्भजनंब्राह्मणस्य॥ रक्षादिनाभगवद्भजनंक्षत्रियस्य सेवोपयोगिपदार्थसमर्पणेनवैश्यस्य॥से
वयाशूद्रस्येतितत्रसेवाप्रथमकक्षासर्वसुलभायदिसर्वंभगवत्तोषमेवकेवलंकामयंतेतदासेवैवकर्तव्या॥यदिस्वधर्मेणसे वि
तुमिच्छंतितदास्वधर्मसिद्ध्यर्थंसेवाकर्तव्या तदास्वधर्मस्यफलंवक्तुंतदुपयोगिभगवद्गुणानाह॥स्वगुरुंहरिमिति॥स्वधर्मे
णसएवोपास्यः यस्त्वावश्यकोभवति तत्रधर्मोप्रदेष्टृत्वात्भगवानेवोपास्यः॥सहिस्वगुरुः॥धर्मेणसहोत्पादनात् यथा

एतेवर्णाः स्वधर्मेणयजंतिस्वगुरुंहरिं श्रद्धया
त्मविशुद्ध्यर्थंयज्जाताः सहवृत्तिभिः ३४ ॥

जीवस्य.२ तं२ जीवं

र्थंज्ञापयन्शब्दोच्चारपितागुरुर्भवति॥एवमेवभगवान्वृत्तिंस्वधर्मंप्रथमतः उत्पाद्यपश्चात्तदर्थमात्मानमुत्पादयतीति॥किंच॥
तथैवकृतेऽस्यदुःखाभावोभवतीतिनियमात्तथाकर्ताहरिर्भवतियंजंतीतिसिद्धवन्निर्देशः॥ उत्पन्नैवधर्मप्रकारयोर्ज्ञातत्वा
त्॥विलंबाभावाच्चअपर्यवसितत्वाच्चसर्वदैवभगवद्भजनेवर्तमानता॥यजंतीत्यनेनतत्पीतिजननप्रकारेणस्वधर्मः कर्तव्य
इतिसूचितं॥श्रद्धयेतिहेतुः सर्वत्र॥आत्मविशुद्धिरंतः करणशुद्धिः सर्वत्रापाषडिनांनियतंफलं॥शुद्धेत्वंतः करणेसर्व
त्राधिकारीभवतिपश्चात्सर्वंसुलभं॥ननुनिरंतरसेवायांकोयंनिर्बंधस्तत्राह॥यद्यस्माद्वृत्तिभिः सहजाताः अभजनेकालांत
रेअहंतोदुर्गतिस्यतीति ३४ ॥

Indira Gandhi National
Centre for the Arts

त्व·मु· एवंभगवतःसमष्टिव्यष्टिरूपोत्पादनंसर्वदेवानांतत्रोपयोगःस्वार्थवर्णचतुष्टयोत्पादनंतेषांचभगवद्भजनप्रकारइतिचतुष्ट
८५ यमुक्त्वोपसंहरति एतत्कृत्स्नंभगवतइति॥एतच्चतुष्टयमेवास्माभिर्निरूपितंसूचनार्थमधिकंतुस्वयमेवज्ञातव्यमितिनेपु
ण्यार्थसंबोधनं कृत्स्नमिति॥एकस्यवीर्यस्यांशभूतायाः क्रियाशक्तेःकोप्यंशलेशोनिरूपितः।अतिरिक्तो
भगवान्पूर्णएवतदाह॥भगवतःइति।तत्रापित्रितयसंयोगमाह॥देवकर्मात्मरूपिणइति॥देवंकालःकर्मप्राणिनां॥आत्मा
स्वभावःएतान्यपिस्वस्यैवरूपाणि॥तानिरूपाणिवर्त्ततेयस्यएकस्यापिरूपस्ययत्रानंत्यंतत्रकोवातंचतद्रूपंआनंत्यचतुष्टया

एतत्कृत्स्नंभगवतोदेवकर्मात्मरूपिणः कः श्र
द्दध्यादुपाकर्तुंयोगमायाबलोदयं ३५ ॥

त्मकंनिरूपयेत् किंच योगमायायाःबलस्यउदयोयत्रएतादृशंचरित्रं॥योगमायाहिस्मरणमात्रेणकोटिब्रह्मांडानिक
र्तुंशक्नोति तस्याअपिबलंभगवद्गुणैरेवेति॥अथवा॥योगमायाकरणंयोगमाययायोबलोदयइति॥उपाकर्तुं॥यथा
वेदाआरभ्यंतेउपाकरणेनसमाप्यंतेचउत्सर्गेण॥तत्रभगवद्गुणानामपिमुख्यविधात्वात्तदुपाकरणंयुक्तं॥समाप्तिंदूर्द्दू एम०
रेउपाकर्तुमपिकोपिनशक्नोति उपाकरणमपिदूरे॥करिष्यामीतिप्रारंभमपिकःकुर्यात्॥अंततोगत्वाश्रद्धामपिकः ८५
कुर्यात्॥अतोमयाभगवतश्चतुर्मूर्त्तेःआपाततोगुणाःकथिताः ३५ ॥

नचैतावतार्हनिवृत्तः किंतुगुणानामानंत्यमेवतदाह अथाप्यपिकीर्त्तयामीति अंगेतिकोमलसंबोधनंअप्रतारणाय। अथापीति।
यतआरभ्याहमुत्पन्नंतत्प्रभृतिअद्यापिमरणपर्यंतंकीर्त्तयाम्येव स्वधर्मत्वात्परंस्वरूपज्ञीवत्वान्मयिविशेषः यथामतीति मतिमनति
क्रम्ययावद्बुद्धानामितावदेवकथयामिनतुकल्पयित्वा तत्रापियथाश्रुतंगुरोःसकाशात्श्रवणमनतिक्रम्य अनेनाहन्निर्भगवद्गुणा
नामुक्तातत्रप्रयोजनमाह कीर्त्तिंहरेरिति नूतनश्रवणसामर्थ्यमुपायश्चनास्ति प्रयोजनाभावश्चआनंत्यात्स्वधर्माभावाच्च अ
तोयावत्कीर्त्तयितुंशक्यतेतावदेवश्रोतव्यमितिअसंस्कृत्वात्देवकीर्त्तयामितदाहैकवचनेन हरेरिति तावतैवभगवानदुःखंदूरी

अथाप्यपिकीर्त्तयाम्यंगयथामतियथाश्रुतं कीर्त्तिंहरेः
स्वांसत्कर्तुंगिरमन्याभिधासतीं ३६ ॥

करिष्यतीति पुनःपुनःकीर्त्तनस्यप्रयोजनमस्ति स्वांगिरंसत्कर्तुंअन्यपदार्थानामभिधयाकथनेनेयमस्मद्वाणीअसतीजाता भग
वतास्वार्थमेववयमुत्पादिताः वाणीचस्वांसमर्पितवान्स्वसेवार्थंतस्याःपतिर्भगवान्भगवद्र्थंस्वयंप्रेरकः। तथाचस्वतोवामत्प्रे
रणयावाअन्यमभिधायवाणीव्यभिचारिणीजातातामिदानींसंस्करोमि संस्कृतासाभगवतियोजनीयेतिअतः संस्कारार्थंबहुधाकी
र्त्तयामीत्यर्थः अनेनयस्ययस्साधनंभगवतास्वार्थंयद्दत्तंतदन्यत्रोपयोज्यतच्छुध्यर्थंभगवतितत्पुनःपुनरुपयोज्यमिति ३६

Indira Gandhi National
Centre for the Arts

श्री

त·मु·६ ८६ एवमुपसंहृत्य सर्वेषां निर्द्धारितं जन्मफलमाह एकांतलाभमिति अन्यानि इंद्रियाणि केवलं भगवदर्थ्ये योजयितुमशक्यानि दे
हार्थं तदुपयोगावश्यकत्वात् दुष्टानि च न भगवति योजनीयानि हस्तौ नित्यं अमंगलस्पर्शौ तिष्ठाचक्षुषी तथा अन्यान्यपि देहनिर्वा
हार्थमवश्यमन्यत्र योजनीयानि वद्भगवदर्थे किंचिद् करणीयं स्वतः शुद्धं शुद्धं कृत्वा वा तदा हृदयं करणीयं। वागिंद्रियं श्रोत्रं च अन

एकांतलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः श्रु
तेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगं २७

योर्न देहोपयोगः आवश्यकः॥ तस्मादेते चेत् भगवत्कृपया स्वार्थप्राप्तिभवतः तदा भगवद्गुणा वक्तव्याः श्रोतव्याश्च नान्यद्व एम० ८६
क्तव्यं श्रोतव्यमित्याह वचसः वागिंद्रियस्य एकांतलाभः एक एव भगवान् स्वार्थः अंतोयस्य लाभो भगवत्प्राप्त्यैव समाप्यते स
को लाभ इत्याकांक्षायाम् ॥

ह सुश्लोकमौलेर्गुणवाद इति सुष्ठु श्लोकाः कीर्तिप्रतिपादकाः भागवतादिरूपाः तत्प्रतिपादिता कीर्तिर्वा मौलिर्यस्य अनेनत
स्य कीर्तिर्मुकुटरूपा भवतीत्युक्तं तां चेद् हृदयं संकुर्यात् सर्वस्य गात्रस्य शिरः प्रधानमिति प्रधानमेव भूषितं भवेत्॥ तादृशस्य भगव
तो गुणवादं उत्कर्षप्रतिपादकानां धर्माणां भावपूर्वकं निरूपणं लाभमाहुरिति संबंधः आहुरिति प्रमाणं न केवलं वचस एवायं
लाभः किंतु अनुपश्चात् नुनिश्चयेन वा पुंसामपि लाभः तदुपयोगार्थमन्येंद्रियव्यापारत्वोपयोगे पि स्वस्य तत्रोपयोगात् की
र्तनद्वारा सर्वाण्येवेंद्रियाणि स्वयं च सफलो भवति श्रोत्रस्य च अयमेव लाभः। चकारात्तदनुवर्तिनां पुंसामपि विद्वद्भिरुपाकृता
यां भगवत्कथायामारब्धायां उपसंप्रयोगं समीपे सम्यक् प्रकर्षेण योगो यस्य तादृशं श्रवणं अमृतकथाश्रवणमिति यावत् तच्छ्रु
तेर्लाभः श्रोत्रस्य विशेष उच्यते। भगवत्कथैव श्रोतव्या तत्राप्यमृतरूपा प्रेम्णा निरूपिता तत्रापि विद्वद्भिरेव निरूपिता अ कृथा
न्यथा अज्ञैरन्यथा निरूपणसंभवात् तेषां पदार्थानां वस्तुतो भगवदीयत्वाभावात् भगवत्कथायां तच्छ्रवणे श्रोत्रस्य व्यभिचार ए विद्वि:
व भवेत् अतो भगवदीयपदार्थश्रवणार्थं विद्वद्भिरेव निरूपितं श्रोतव्यं तैरप्यन्यार्थनिरूपणे प्रकृते तात्पर्याभावात्तत्र श्रोतव्यं
तदाह उपाकृतायामिति कथासंबद्धा वार्त्ता सैव सुधा रसज्ञनिकामं त्वनिवर्त्तिका च तदपि श्रवणं न दूरतः॥ अंतःकरण
बुद्धिद्वारा ज्ञानं भविष्यतीति इद् विडमंडकन्यायो भगवद्गुणेषु नकर्त्तव्यः सम्यक्त्वं च स्व पर्यवसानात् प्रकर्षो विस्मरणाराहि
त्यं यद्येवं श्रृणुयात्तदा श्रोत्रं स्वयं च भगवदर्थ्यं भवेत्। अन्यथा व्यर्थो भवेत्कालस्यार्थः कालार्थो वा २७ ॥ ॥
व्या१ तस्यां उपसंप्रयोगं किं तु उपसमपि २=

Indira Gandhi National
Centre for the Arts

त्मु ६ ८७ नन्वल्पमेवोक्त्वाकथमुपसंहारः कृतः कथंवास्वार्थेनिरूप्यतइत्युच्यते भगवन्माहात्म्यंज्ञातव्यं ततोभक्तिः ततोभगवत्प्रायु ज्यमितिइमंक्रमंपरित्यज्यवाकुष्णुध्यर्थंगुणानुकीर्त्तनंइंद्रियलाभार्थंश्रवणकीर्त्तनेइतिकथमेवमुच्यतइत्याशंक्याह आत्म नोवसितोवत्सेति आत्मनोभगवतोवासुदेवस्यमहिमाआदिकविना ब्रह्मणापिसंवत्सराणांसहस्रपर्यंतंतपोयोगंचकृत्वा तत्परिपाकेसतिसंवत्सरसहस्रांतेयोगविपक्वयापिबुद्ध्याअवसितः किंअपितुनज्ञातएव ब्रह्मणापितपः कृत्वापिमहता पिकालेनमहिमाचेन्नज्ञातः यस्यकथाअग्रेवक्तव्या अन्यःकोवाज्ञास्यति एतदर्थमेवतांकथांकथयिष्यामीतिभावः अ

र्ते

आत्मनोवसितोहिवत्समहिमाकविनादिना संव
त्सरसहस्रांतेधियायोगविपक्वया ३८ ॥

तः इंद्रियलाभएवभगवद्गुणोकथितेक्रमात्सर्वस्मिन्नपिसंघातेस्वाधीनेज्ञातेसुखेनसाक्षादृकुंठभगवत्सेवाकर्तुंशक्यतइ तिमेत्रेयसिद्धांतः इमंपक्षंनिराकृत्ययोऽन्यथावक्ष्यतितमग्रेभ्रांतत्वेननिराकरिष्यति॥ आत्मनइतिवलप्राप्यभावेनदुर्ल भतानिराकृता आत्मत्वेनापिप्रकाशमानस्य०किमित्यनध्याहारेणवाकाकुस्वरकल्पनयावातथावक्तव्यः। अथवाब्रह्म त्म० णोवादसितः॥तस्यसाधनत्रयं प्रथमंभगवानात्मत्वेनप्रकटः॥स्वयंचादिकविः।वेदगर्भः॥अनेनप्रमाणंप्रमेयंचतस्यसि ८७ द्धमित्युक्तं॥संवत्सरसहस्रांतइत्यादिसाधनंतदाफलंयुक्तमिति॥तदापिवानफलमितिचिंत्यं ३८ ॥

ब्रह्मणः कथाययातथास्तु अन्येतुमहिम्नोज्ञानार्थंयेयतंतेतद्वाएचभक्तिंप्रार्थयंते तेकेवलंभगवन्मायामोहिताः॥ तेयद्यपिअ न्यान्मोहयितुतथावदंतितथापिमहतीभगवन्मायातानपिव्यामोहयतीत्याह अतोभगवतइति॥ अतः कारणात्यस्मात्तेमाहा त्म्यंज्ञातुंप्रवृत्ताः इयमेवभगवन्माया तेसंसारंव्यामोहयित्वामोक्षार्थंप्रवृत्ताः तानपिव्यामोहयति॥ ननुभगवन्माहात्म्यज्ञाना र्थंप्रवृत्ताःकथंव्यामुग्धाभवंतितत्राह यत्स्वयमिति अयमात्माभगवान्स्वस्यापिमार्गंस्वयंनजानातिकिमुतापरे सहियावत्क

अतोभगवतोमायामायिनामपिमोहिनी यत्स्वयंचात्मवर्त्मात्मानवेदकिमुता
परे ३९ यतोऽप्राप्यनिवर्त्तंतेवाचश्चमनसासह अहंचान्यइमेदेवास्तस्मैभ
गवतेनमः ४० इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेषष्ठोध्यायः ॥

मार्गात्?

र्णेतितावत्तस्यपरोऽस्तेभवति॥नहिकश्चित्कृतात्दूरेगतःस्वातिक्रांतंसर्वमेवमार्गंपश्यति॥ तथासतिनगतएवस्यात्॥ अतिनिपु णोपिपूर्वंदिवसेयावद्दशंकुर्यात्तावद्दशंपुनःकर्तुंज्ञातुंवानजानातिअतःप्रतिक्षणंनूतनानंतब्रह्मांडनिर्माणस्वर्दयेनमार्गेणसोप्रवर्तस्थितस्य णोपि... मर्थोवर्त्ततत्समार्गंस्वयमपिनजानातीतियुक्तं अपरेपुनस्तत्रेर्याः कचिद्ब्रह्मांडोदुंबरेमशकवत्स्थिताः स्वगतिमेवनजानंतिकु तोभगवद्गतिं॥ उत्प्रेक्षात्वप्रमाणं अथवाभगवन्माहात्म्यज्ञानार्थंप्रवृत्तः कथंभगवन्माययामोह्यते: असथास्वन्मार्गोऽस र्थःस्यात् अन्यत्रतस्यामोहकत्वंसि ॥ महात्म्यज्ञानार्थंप्रवृत्तस्यतथात्वे १=

तसु.६ ८८

मायाः=

इमेवभगवन्माहात्म्यज्ञानार्थंप्रवृत्तावपियदिमोहयेत्तदाप्रमाणानिदत्ततिलांजलीनिस्युरित्याशंक्यत्वायोग्यमिच्छनुरूपः
पतस्येवनसंशयइतिन्यायेनमायायाःकोदोषइतिवदन्माहात्म्यज्ञानार्थंप्रवृत्तस्यस्वरूपमाहयत्त्वयमिति· स्वयंजीवः आ
त्मापिभूत्वाकोऽहमादिकल्पेस्थितःकथमेतावत्पर्यंतमागतइतिस्वगतिंनवेद।सर्वज्ञाअपिजन्मनांत्रयंचतुष्टयंवाजानं
ति· अन्योऽसंज्ञास्तीतिदूरकथा।शद्वाज्ञानमंधपरंपराम्नायतुल्यमितिनात्यंतंप्रमाणं· तस्मादस्मदुक्तमार्गएवयुक्तः
वेदेत्वसंदेहेसंदेहवचनं।यद्विद्वानवेदेतिकोहितद्वेदेतिवत् सर्वज्ञतयाख्यातमपितत्अबाधिततत्वाभावेनपरमतात्विद्य
मानाज्ञानंअप्यार्वज्ञंचेत्संपादयतिनदायमेवार्थः अबाधितसर्वज्ञतायांव्यासादीनामिवास्थितिभावः॥अतोयावत्किंचि
त्वकीर्त्तनीययोगितावदावर्त्तनीयमितिकिंचतदप्यशक्यं स्यापेक्षमितिच्येतोनमननमेवकर्त्तव्यमित्याह यतोप्राप्येति वा
कूमनश्चयंभगवंतमप्राप्यैवअर्वागेवनिवर्त्तते अहंकारश्चदेवः अग्नेचइमेदेवाः इंद्रियाधिष्ठारःतमप्राप्यैवनिवृत्ताः
वाचोत्रवेदरूपामनस्तेषामपिपूर्वरूपंभगवदीयं यतोवाचोनिवर्त्तंतइतिश्रुतेरपिअयमेवार्थस्तदनुअहंकारः॥यस्तु
श्रुतोअहमित्येवात्मानंवेदभगवान्सोहंनामाभवदितिसोपिजगत्कर्त्तास्वयमात्मानंनवेद। तेनवाजगन्निर्माणार्थेनिरू
पितानीमानितत्वानिदेवाःनविदुः।तस्मान्माहात्म्यज्ञानंदुर्लभमितितदर्थंमयासमकृत्वाकेवलंभगवतेनमनंकर्त्तव्यंतदाह॥
तस्मैभगवतेनमइति यादृशोसिहरेकृस्नतादृशायनमोनमः॥यादृशोस्मिहरेकृस्नतादृशंमांहिपालय ४० इतिश्रीभा
गवतसुबोधिन्यांश्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायांतृतीयस्कंधविवरणेषष्ठाध्यायविवरणं ॥ ॥

सर्वज्ञत्वाभावेनप=
भगवत्कथनं=

एम० ८८

त्रिविधाःप्रश्नाःअत्रसप्तमेतदुपाः२=

कः

हरेरिंद्रियवर्गस्यमनसःसर्गउच्यते॥संकल्पेनविकल्पेनद्विधातद्विनिरूप्यते १ संकल्पोनिश्चयःप्रोक्तःसचसंदेहपूर्वकः अन्यथाज्ञानमे
वस्यान्नदृष्टंप्रथमोद्विधा।विकल्पोविविधःपक्षस्तेप्रश्नाइहरूपिताः २ अत्रसर्वाणिकार्याणिपृष्टानिभगवत्कृतिं॥ज्ञातुंसोमनसाभाव्याहूर्वं
चापिकृतोमनः एवंपूर्वाध्यायांतेऽकृत्यपुष्येमइतिप्रश्नेस्वबुध्यायावदुध्यतं तावन्निरूपितं तत्रयत्स्वयंचात्मवत्मात्मानंवेदेतिवचनात्भ
गवतः अलौकिसामर्थ्यप्रायेणास्यानभिप्रेतमितितदभिप्रायेणजीवेभगवतिचसंदिग्धमर्थद्वयंसपृच्छति॥तत्रप्रथमंभगवतिसंदेहच
तुष्टयंजीवेचद्वयंपृच्छति ब्रह्मन्निति करणादिव्यापारःत्वयाएकविधानिरूपिताः तेचगुणातीताएवेतिवक्तुंनशक्यते॥सगुणाश्चेत्कार्यका
रणवैलक्षण्यं ब्रह्मन्नितिसंबोधनंज्ञानस्यनिश्चितत्वस्यब्रह्मभावोभवतीतितवनिश्चितमेवकिंतुबोधनार्थंपृच्छ तेइत्यौद्धत्यसमाधानं॥
कथमितिप्रकारेप्रश्नः भगवतश्चिन्मात्रस्येतिभगवच्छद्वोनयौगिकःकिंतुरूढ्याब्रह्मपरः॥तच्चचिन्मात्रमेवेतिधर्मत्राक्रिविशेषस्वरूपाणा
मभावात्वाच्यवाचकसंबंधाभावात्अनिरूप्यत्वाच्च कथंतादृशस्यजगत्कर्तृत्वं कर्तृत्वादयश्चधर्माःविकृताःविकारिणोभवंतिअतः

श्रीशुकउ एवंब्रुवाणंमैत्रेयंद्वैपायनसुतोबुधः॥प्रीणयन्निवभारत्याविदुरःप्रत्यभाषत १ विदुरउ०
ब्रह्मन्कथंभगवतश्चिन्मात्रस्याविकारिणः॥लीलयाचापियुज्येरन्निर्गुणस्यगुणाःक्रियाः २ ॥

अविकारिणोभगवतःप्रयोजनसंदेहपूर्वपक्षाभावेपिनिर्गुणस्यगुणाःक्रियाःकथंभवंतीतिबीजसंदेहप्रश्नः॥कार्येहिबीजंप्रयोजनाभाविना
नभवति॥तत्रप्रयोजनंपरमानंदस्यजगतिनास्त्येवलोकवत्तुलीलेतिन्यायेनप्रयोजनाभावेपिलीलयाकरिष्यतीतिचेल्लीलापिनसंभविष्यती
त्यग्रेवक्ष्यते अस्तुवालीलातथापिजगतोबीजंनभगवान्विलक्षणत्वात॥जगच्चेतनंविकारिनानारूपंचभगवांस्तुचिन्मात्रोऽविकारीच।
किंचजगत्सगुणंभगवान्निर्गुणः।अतःकार्यकारणवैलक्षण्यात्नभगवत्कार्यंजगत॥यद्यपिचिंतामणेःसकाशात्तद्विलक्षणंसकलमे
वकार्यमुत्पद्यते॥तथापिपूर्वपक्षिणःपक्षेनचिंतामणिमात्रात्कार्यमुत्पद्यते॥अन्यथासर्वदोत्पद्येतकिंतुकामयितुःसन्निधानेयथायथा
चिंतातत्पद्यते घटाकारेणपटाकारेणचतथातथामणिर्सानिध्यात्तेपदार्थाःमनसाभाविताःकायकृताइवभवंति।इयमलौकिकीत
स्यशक्तिः॥भगवतस्तुद्वितीयसान्निध्याभावात्नानेनापिप्रकारेणकार्योत्पत्तिःतंनादिनागारह मानसेति २ ॥ ॥

द्वितीयस्यदेलदेदपि१=

विदुरस्य४

भगवत्कृतिः२

Indira Gandhi National
Centre for the Arts

त्रसु६
८७

एवंबीजभावं दूषयित्वा फलभावापन्नां लीलां दूषयति॥ क्रीडायामिति लीला नाम विलासेच्छा कार्यव्यतिरेकेणैव कृतिमात्रं न तया कृत्या बहिः कार्यं जन्यते जनितमपि कार्यं नाभिप्रेतं नापि कर्तुरिष्टयाः संजनयति॥ किंत्वंतःकरणे पूर्णे आनंदे तदुल्लासेन कार्यजननसदृशी क्रिया काचिदुत्पद्यते यथा लोके राज्ञः सा लीला सापि नोपपद्यते। तत्र प्रयोजनाभावे हेतुरस्ति स च हेतुर्लोकसिद्ध एव वक्तव्यः। लोकन्या येन लीलानिरूपणात् सा च लीला बाले प्रसिद्धा॥ बालस्यापि कामेनैव चिक्रीडिषा भवति अन्यथा सर्वदैव क्रीडितुमिच्छा स्यात् कामोपि स हेतुकः। अन्यथा सर्वदा स्यादित्याह॥ अर्भस्य क्रीडायामुद्यमः प्रथमतो भवति स चार्भस्य प्रथमं कामात्तत्रैव वा कारचना प्रथमतोऽर्भस्य कामः वासनया काममय एवायं पुरुष इति श्रुतेः तदनंतरं चिक्रीडिषा॥ क्रीडितुमिच्छा अन्यतश्च भवति अन्यं बालकं निमित्तमाश्रित्य एकस्य क्रीडासंभवात् तदभावे कामेपि क्रीडेच्छा निवर्तत इति॥ कामोत्र क्रीडाज्ञानं॥ क्रीडायाः फलरूपत्वात् साधनरूपत्वाच्च कामप्रयत्नयोरेकविषय

क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषाऽन्यतः॥ स्वतस्तृप्तस्य च कथं निवृत्तस्य सदाऽन्यतः २ ॥ २ ॥

त्वं॥ यत्र पुनः स्वर्गादौ साधनफलयोर्भेदः तत्र कामः स्वर्गे चिकीर्षा यागे अतो न तयोर्न हन्तत्वं॥ तदनंतरं क्रीडायामुद्यमो भवति क्रीडां कर्तुमुद्युक्तो भवति केचित्तु कामस्यैव विशेषणमुद्यमं वदंति उद्यमयतीत्युद्यमः॥ काम एव पुरुषमुद्यमयति॥ अन्यतश्च चिक्रीडिषा भवतीति तच्चित्यं एतादृशोपि पक्षो भगवति न संभवति स्वतस्तृप्तस्य कामो न संभवति कामो ह्यपूर्णस्यैव। अन्यथा फलेज्ञातेपि कामः स्यात्॥ स्वस्यैव सर्वफलरूपत्वात् प्राप्तत्वाच्च॥ तृप्तस्य कामाभावो लोकसिद्धः। प्रकारभेदेनैव कामत्वनिश्चेत् अतृप्तो भगवान् स्यात्॥ ततश्च स्वार्थमेव कुर्यात्॥ एतादृशी तन्निरूपणमितिचेत् स्वानंदस्य परिच्छेदः स्यात्॥ तस्माद्युक्त्या कामो निरूपयितुमशक्य इति सोकामयेति श्रुतिरन्यपरा भवति। नित्यश्चेत्कामः स्यात् सर्वदैव कार्यं भवेत्। कार्यपक्षेतु तज्जनकांतराभावात् अनुत्पत्ति एम०
रापद्येत॥ कालादिनाऽनुबोधपक्षेपि भगवतः कालादिसंबंधो भवेत् स च नास्तीत्याह निवृत्तस्य सदाऽन्यत इति॥ अन्यसंबंधाभावः ८७
तस्य सर्वदा· अतो बीजप्रयोजनाभावात् भगवतः कार्यपक्षोनुपपन्नः २ ॥

किंच॥ मायां स्वीकृतोपि यद्यपि पूर्वोक्तसर्वदूषणानिवृत्तिर्भवति॥ किंतु तदेव स्वीकर्तुमशक्यं भगवतो मायासंबंधस्य निरूपयितुमशक्यत्वात्। मायात्वज्ञानात्मा सा ज्ञानाभावे भवति भगवतस्तु ज्ञानाभावो न संभवतीत्याह। श्लोकद्वयेन॥ असृक्षीदिति॥ चित्संबंधिनीमेव मायां मन्यमानस्यैव प्रश्नः॥ भगवानिदं विश्वं गुणमय्यात्ममायया असृक्षीत् तयैव च संस्थापयति तयैव च भूयः प्रत्यपिधास्यति संहरिष्यति ४ एवं मायया उत्पत्तिस्थितिप्रलयाः विश्वस्य भगवता कृता इति पक्षमनुद्य मायासंबंध एव तस्य न घटते पूर्णज्ञानत्वादित्याह देशत इति॥ ज्ञानस्य नाशः पंचधा संभवति। भगवांस्तु पंचप्रकारेणाप्यविलुप्तबोधात्मा नविलुप्तोवबोधो ज्ञानं यस्य तादृशश्चा

असृक्षीद्भगवान्विश्वं गुणमय्यात्ममायया॥ तया संस्थापयत्येतत् भूयः प्रत्यपिधास्यति ४ दे
शतः कालतो योसौ अवस्थातः स्वतोऽन्यतः। अविलुप्तावबोधात्मा स युज्येताऽजया कथं ५

सावात्मा चावबोध एवात्मा वा। स कथमजया युज्येत॥ तत्र कस्यचित् बोधः देशेन नश्यति घटज्ञानं घटेन परिच्छिन्नं पटं न विषयीकरोतीति देशतस्तस्याभावः कालतोपि ज्ञानस्य नाशः कालांतरे विस्मरणात्॥ अवस्थातोपि नाशः स्वप्ने जाग्रदवस्थावस्तूनां ज्ञानाभावात्॥ स्वतोपि नाशः उदासीनज्ञानानां संस्काराजनाधायकत्वात् अन्यतोपि नाशः विरोधिगुणप्रादुर्भावात्॥ भगवतस्तु ज्ञानं पंचविधेरपि दोषैरसंबद्धं॥ तच्च सर्वविषयकत्वात् न देशतः परिच्छिन्नं॥ नित्यत्वान्न कालतः। भगवतः अवस्थाभावात् नावस्थातः निर्विषयकत्वान्न स्वतः। भगवतो विरोधिगुणाभावात् नान्यतः अतः अजया मायया प्रकृत्या वा न युज्येत॥ तस्मात्स्वतो वा मायासंबंधेन वा भगवतो जगत्कर्तृत्वं नोपपद्यते॥ ५ ॥

Indira Gandhi National
Centre for the Arts

त.सु.७ ९० किंच जीवोपिभगवानेवत्वयानिरूपितः तथासतितदर्थंजगतस्त्रष्टोहिताकरणादिदोषः दोषांतरमप्याह भगवानिति एकएवभ
गवान्सर्वक्षेत्रेषुअवस्थितःसर्वदेहेषुअवस्थितएकएवेतिवाएतादृशस्यदुर्भगत्वंवाजन्मभिःक्लेशोवानभवेत् अनुभवसिद्धत्वा
तत्क्लेशस्य अज्ञानतोंगीकारेपिसएवदोषः पुनःपुनःजन्मानिचश्रूयंते॥तस्माद्भगवतोजीवभावोप्यनुपपन्नः जगत्कर्तृत्वंचानु
पपन्नमिति ६ एतस्मिन्नर्थेमेमनःखिद्यतीत्याह एतस्मिन्निति एतस्मिन्ज्ञानसंकटे ज्ञानस्यशास्त्रस्ययुक्तिरूपविशालमार्गा
भावात्ज्ञानस्यप्रसारणाशक्तेः संकटयुक्तभावः अन्यथाज्ञानंवासंकटं॥तत्रनिर्द्धारार्थंप्रवृत्तंमनःप्रसरणाभावात्युक्तभावे

भगवानेकएवैषसर्वक्षेत्रेष्ववस्थितः अमुष्यदुर्भगत्वंवाक्लेशोवाकर्मभिःकुतः ६ ॥
एतस्मिन्मेमनोविद्वन्खिद्यतिज्ञानसंकटे॥तंनःपराणुदविभोकश्मलंमानसंमहत् ७ ॥

नखिद्यति तंखेदंनः अस्माकंहृदयेवर्त्तमानं॥युक्तिभिःपराणुदतिष्टत्वेनदित्याशंक्याह॥कश्मलंमानसंमहदिति इदंतु
मनसोमहत्कश्मलं तत्तुमहद्भिर्दूरीकर्त्तव्यमेव अन्यथाअग्निमंपूर्वोक्तंचज्ञानंदुष्टेमनसिनतिष्ठेत् अतोनिरूपणमा
णार्थबोधार्थइदंपराणुदेत्यर्थः ७ ऐश्वर्यंप्रथमेत्यक्तंद्वितीयेवीर्यमेवच यशश्रियोतथाद्वाभ्यांवैराग्यंज्ञानमंत्ययोः १
युक्त्याअसंपत्त्याभगवत्त्वंनिराकृतं ततोत्रभगवद्दारःसर्गेपिविनिराकृतः २ तस्मिन्निराकृतेप्रश्नोनपूरितइतिस्थितं॥अ एक० ९०
तत्स्योत्तरंवाच्यंस्वोक्तार्थस्थापनायहि ७ ॥

सहिमैत्रेयःसर्वनिरपेक्षःचित्रप्रश्नार्थंपथोक्तंगृहीत्वाआवर्त्तनीयमित्युक्त्वापूर्वयक्ष्येकृतेकिमग्रेवदतिनवेतिसंदेहंवारयितुंशुकोव
दतीतिपक्षंसहेतुकमुपपादयति सइत्थमिति भगवदीयत्वात्भगवदाज्ञासहकारित्वात्विदुरस्यप्रेरकत्वंमैत्रेयस्यकथनेद्याज्ञनक
त्वं रूत्रेतित्वतोपिप्रेरकत्वंनिपुणत्वात्॥तत्रापितत्वजिज्ञासुना नोकूहणमात्रं अतस्तत्वजिज्ञासुंबोधयेदिति किंचमुनिरयंनिर्द्धा
रितंज्ञानातिभाव्यर्थंच भगवदाज्ञापरिपाभनार्थंआक्षेपोपिसमाधातव्यइति भगवच्चित्तःभगवानेवतच्चित्तेनिर्द्धारितंबोधयत्वितिप्रा
र्थनार्थंवास्मयन्निवेति॥किमेतैरेतावत्कालंभारतादौबुद्धमितिहसन्निव इवेतिभगवन्मायायामोहकत्वात् गतःस्मयोगवैयस्य ॥
८ अतोयंगूढतयानिरूपयिष्यति अनधिकारेणज्ञानेपुनःप्रश्नेवातूष्णींस्यातव्यमिति निर्बंधएवात्रसमाधानंस्पष्टतयानिरू

श्रीशुकउ सइत्थंचोदितंरूत्रातत्वजिज्ञासुनामुनिः॥प्रत्याहभगवच्चित्तःस्मयन्निवगतस्मयः ८
मैत्रेयउ०सेयंभगवतोमायायन्नयेनविरुध्यते॥ईश्वरस्यविमुक्तस्यकार्पण्यमुतबंधनं ९ ॥

पितं गुणातीतात्सृष्टिकथासर्वथानोपपद्यते॥कार्यकारणवैजात्याल्लोकहेतोरभावतः १ निरुपाधिकरूपेहिसंदेहद्वयमीरितं॥
सोपाधित्वेपरीहारस्तदेवनभवेदिति २ तृतीयोब्रह्मणःसिद्धोजीवेप्येवमभेदतः मायासंबंधकार्येहिपरिहार्येतयोःक्रमात्देश
यस्यपरीहारःषड्भ्यानित्यतयोदितः भगवत्वाविरोधित्वंप्रकृत्यैवचसूचितं ४ असमासात्प्रधानत्वंतेननोपाधिसंभवः द्विती
यस्यपरीहारेविरोधात्कार्यबाधनं ५ विरोधमात्रमाहोस्वित्आद्येस्येयंदृशिर्यतः॥द्वितीयेभूषणंतस्माविरोधोननुदूषणं ६
विरुद्धकार्यसंबंधस्तत्कृतस्तेनवर्ण्यते॥विरोधोपिप्रतीत्यैवनवस्तुनियतोदृढदिति ७ अत्रपूर्वपक्षसमाधानंब्रह्मवादेस्पष्टमे
वद्वपतेत्वित्यधिकरणेननिरूपितं अविकृतएवभगवान्सर्वंकरोति॥तादृशमेवभगवत्स्वरूपंश्रुतिप्रमाणात्॥यादृशेअंगीक्रि
यमाणेसर्वसमाधानंभवति तस्मात्तत्रनमायादिकल्पना॥योऽ ॥

Indira Gandhi National
Centre for the Arts

म॰।। सहितः श्रद्धब्रह्मवा
दरूपः२ म॰पे॰।।ब्रह्मरूपत्वसामर्थ्यतेन १

त्सु॰७ ९१ नुपपत्तिपरिहारोमाययासोपिस्वरूपेणैव।एवंसतिश्रोतार्थताभवति अन्यथात्वप्रामाणिकंस्यात् स्वकपोलकल्पनात्स
पक्षैः अत्रैवर्णिकायसर्वथानवक्तव्यइति॥द्वेयोवैवर्णोब्राह्मणाः असुर्यःश्रद्धइतिश्रुतेः मायेयमसुराइतिच।उपक्रमेपिश्र
यतेभगवल्लीलायोगमायोपबृंहितेतिप्रतिज्ञानात्॥अत्रापिमाययैवसमाधानमाह।सेयंभगवतोमायेति कार्यकारणवैज्ञात्यं
माययैवममाहितं कृष्णामध्येतयासर्वंअन्ययैवान्यथाभवेत् १ तादृश्येवहिसाशक्तिःस्वीकर्तव्यान्यथानसा॥क्रीडास्थि
तथाज्ञानंज्ञानेप्यज्ञानसंभवः २ अभेदेपियथाजीवःतथामायैवयातथा ३ इयंभगवतोमायासैवयाऽस्माभिर्जगत्कारणत्वे
ननिरूपिता॥नववाकोपिसैवा अतोयदस्माभिर्निरूपितंतदेवत्वयातस्याःविरुद्धधर्मनिरूपणेननिरूपितमितिनात्रकिंचि
त्समाधातव्यं॥यतःसानयेनन्यायशास्त्रेणविरुध्यते सविरोधस्तयैवनिरूपितइतिनास्माभिर्बोधनीयः॥असैवसिद्धांतत्वा
त्एतत्समाधानमुअमानंपूर्वपक्षेणैवमंतव्यमितिभावः॥विरोधमेवस्पष्टयति ईश्वरस्येति॥अयंजीवईश्वरएव॥तत्त्वमसि
अयमात्माब्रह्मविज्ञानमयमितिश्रुतेः अतएवईश्वरस्यसर्वसमर्थस्यसंसाराद्विमुक्तस्यकार्यगणंदैन्यंअनालोचितयाचकर्तृत्व
वाऐश्वर्यविरुद्धं बंधनंचविमुक्तविरोधि॥ननुकथमेवंमायायाःस्वरूपंतथासतिप्रमाणानाममानामेवसुवक्तंस्यात्सम्मा
र्गश्चविरुध्येतेतिचेत्सत्यमेव परंसामायायथागमिष्यतितथोपायंवक्ष्यामि॥तस्यागमनमेवमुख्यंसमाधानमितितत्त्सांगता
यांनकोपिविरोधःस्फुरिष्यतीति॥अतोविरोधसमाधानार्थंनयत्नःकर्तव्यः किंतुमायानिराकरणार्थमेवप्रयत्नःकर्तव्यः॥
तत्सांगतायांभगवत्साक्षात्कारेसर्वेपिसंदेहानिवर्त्तंतइतिप्रकारांतरेणज्ञानमुपदिष्टंभवति॥तद्यथास्वयमेवब्रह्मवादंज्ञास्यती एम॰
तिं॥आसुरत्वेवागतेश्रद्धइत्वमपिगमिष्यतीतितत्सांगतायांस्वतोवामयावाबोधनीयइतिभावः ९ ॥श्रीगणेशायनमः ९१

मायादीनामेवंरूपत्वानिद्रादिदृष्टांतेनाह यदर्थेनेति॥यद्यस्मात्कारणात्अमुष्यजीवस्यपुंसःअर्थेनबंधकादिनाविनैवआत्मवि
पर्ययःआत्मनोऽन्यथाभावःप्रतीयतएव।प्रतीतिमात्रंनतुवस्तुतोस्ति।यतःअयंउपसमीपेद्रष्टानत्वयंदृश्यः॥व्यापकश्चायंप्रत्यक्
रंप्रे॥१॥ संवेद्यःपरिछिन्नःपराक्त्वात्॥यथादर्पणेसंनिहितेनऋतत्वेनविपरीततयामुखंदृश्यते॥तथामायासंनिधानेनआत्मापराक्परिछिन्न
श्चदृश्यतइत्यन्यथादर्शनेमायैवहेतुः तत्रयथास्वप्नेशिरःछेदःप्रतीयते नहिद्रष्टुःशिरस्छेदःसंभवतिनवाद्रष्टुंशक्यते चक्षुषस्त
त्रैवविद्यमानत्वात्प्रतीतिश्चवर्त्तते॥विरुद्धश्चायमर्थः।युक्तिश्चनास्ति।एवमत्रापीतिभावः १० ननुमायायांअयमात्माप्रविशतीति

यदर्थेनविनामुष्यपुंसआत्मविपर्ययः प्रतीयतउपद्रष्टुःस्वशिरश्छेदनादिकं १० यथा
जलेचंद्रमसःकंपादिस्तत्कृतोगुणः दृश्यतेसन्नपिद्रष्टुरात्मनोऽनात्मनोगुणः ११ ॥

आत्मधर्मोमायायांभवितुमर्हति॥ननुमायाधर्मोआत्मनिमायायाःप्रवेशाभावात्॥तमसःपरस्तादितिश्रुतेः॥तस्मान्मायाधर्मोबंधा
दयःकथमात्मनीत्याशंक्याह॥यथाजलेचंद्रमसइति॥यद्यपिआत्मनिमायानप्रविशतिआत्मैवतुप्रविशति तथापिप्रवेशानंतरं
तद्धर्मैःसंबध्यतेनत्वप्रविष्टः।प्रवेशोपिप्रतीत्यैव॥यथाचंद्रमसोजलेप्रतिबिंबितस्यजलकंपात्तत्कंपनःनतुस्वभावतः तथाअसन्नपिध
र्मःआत्मनिमायासंबंधात्प्रतीयतेतदाह दृश्यतइति असत्त्वेहेतुः।द्रष्टुरिति।आत्मनिरूपितंवैलक्षण्यमिदं मायानिरूपितंवै
लक्षण्यमाह अनात्मनोगुणइति अनात्मनःप्रकृतेर्देहादेरेवगुणोदृश्यत्वादिः ११ ॥श्रीगोपालायनमः ॥

Indira Gandhi National
Centre for the Arts

त.सु:७ ७२ अतोमायायांप्रतीत्यासंबंधात्ततसंबंधाभावार्थमुपायमाह।सर्वैर्निवृत्तिधर्मैणेति समायासंबंधःधर्मत्रयेण निवर्त्तते॥यथाग्नि
देवेपुरुषोम्रियतेतथाधर्मत्रयसंबंधेतस्मिन्नेवशरीरेमायासंबंधोगच्छतिप्रतीत्यात्मा तान्धर्मानाह॥निवृत्तिधर्मेणेत्यादिपदैः॥
तत्रप्रथमंनिवृत्तिधर्माःकर्त्तव्याःननिवृत्तिमात्रं॥तथासतिभगवतःकृपानस्यात् विधानेनपरित्यागःपुनस्तत्कापरिग्रहः।एका
कित्वंतीर्थसेवामौनंकृष्णानुचिंतनं॥कालादिप्राप्तदुःखस्यसहनंचाप्रतिक्रिया दयासंतोषात्मजयामुख्यधर्मानिवृत्तितः ततो
भगवदनुकंपा सत्वाकारांतःकरणेस्फुरितस्यभगवतःकृपावलोकनं।ततोभगवद्भक्तियोगः भगवद्विषयकत्वाद्भक्तेःसाधनरू

सर्वैर्निवृत्तिधर्मैणवासुदेवानुकंपया भगवद्भक्तियोगेनतिरोधत्तेशनैरिह १२ यदेंद्रि
योपरमोथद्रष्टात्मनिपरेहरौ विलीयंतेतदाक्लेशाःसंसुप्तस्येवकृत्स्नशः १३ ॥

पत्वंस्ययोगइतिनिरंतरकृतिः॥निरंतरश्रवणादिकंभगवत्कृपाव्यतिरेकेणनभवतीतिभगवद्भक्तियोगःपश्चादुक्तः॥एवंत्रिभिर्गुणै
र्मायासंबंधःशनैरस्मिन्नेवजन्मनितिरोधत्ते शनैरितिसाधनबलानुसारेण १२ सहसासर्वक्लेशनाशार्थमुपायमाह॥यदेंद्रि
योपरमइति॥यदैवसर्वेषामिंद्रियाणांस्वतएवस्वविषयेभ्योनिवृत्तिः।अथतदाभिन्नप्रकारेणआत्मनिद्रष्टाभवति द्रष्टृत्वेच
आत्मास्फुरति प्रकृत्यादिनियामकत्वंचस्फुरति स्वस्यहरित्वंच तदाविलीयंते॥सर्वेक्लेशा अविद्यादयः॥तेपंचमस्कंधे स्क० ७२
वक्तव्याः॥भवाटव्यां निवृत्तेरसंभावितत्वनिराकरणायदृष्टांतमाह।संसुप्तस्येति।सुषुप्तस्यस्वात्मनासहैकंप्राप्तस्य यथास्त्रिया
संपरिष्वक्तः एवमेवायंशारीरात्माप्राज्ञेनात्मनासंपरिष्वक्तःशेतेइतिश्रुतेः १३

यदेतिवचनात्नास्यसाधनसिद्धकालोनियतः॥अतोनियतंहेतुमाह अशेषसंक्लेशशमंविधत्तइति भगवतोमाहात्म्यज्ञापकध
र्मानुकीर्त्तनपूर्वकंश्रवणंअशेषसंक्लेशशमंविधत्ते गुणानुवादश्रवणास्यसंक्लेशशमस्यचकार्यकारणभावः कारणविद्यमा
नदशायामेवतेनयावत्संक्लेशविनाशंगुणानुवादश्रवणंकर्त्तव्यं अतोनैकेनश्रवणेनसर्वक्लेशाभावोज्ञातइतिविरोधोनमंत
व्यः परंनियतकारणत्वमत्रोच्यते मुरारेरिति विघ्नाभावः तत्रस्वतःसिद्धः॥यदाश्रवणमेवैतत्विधत्ते तत्रभगवच्चरणार
विंदरतिर्विधत्तइतिकिंवक्तव्यंतदाह कुतइति किंपुनरितिवक्तव्येकुतइतिवचनंरतिसाधकश्रवणदशायामेवक्लेशानिवृत्ताइ

अशेषसंक्लेशशमंविधत्तेगुणानुवादश्रवणंमुरारेः कु
तःपुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा १४

तिरतिःकुतोनिवर्त्तयिष्यतीतिज्ञापितं॥चरणारविंदेति भक्तिमार्गानुसारः॥चरणारविंदस्यपरागाःपूर्वंनिरूपिताः॥गंगायांभग
वदीयशरीरेचसंतीतितत्रसेवायांरतिः परागएववामपुण्यदिस्थितःसेव्यइति॥चरणसेवामकरंदोभजनानंदःस्वतःपुरुषार्थरूपः ७प्र
तत्संबंधिनीसेवातस्यारतिःप्रीतिःसाप्यात्मनैवलब्धाअकस्मात्प्राप्ताआत्मनिवालब्धास्वतःपुरुषार्थसेवायांस्वभावतोरुचिःसा
सर्वमेवक्लेशंदूरीकरोति॥एवंसाधनत्रयमुपदिष्टं कर्ममार्गानुसारेणज्ञानमार्गानुसारेणभक्तिमार्गानुसारेणच ॥ १४ ॥

Indira Gandhi National Centre for the Arts

त०सु७ एवंमायापगमएवसर्वसंदेहनिवृत्तिरितिमैत्रेयोक्तंश्रुत्वासाधनंभगवद्रतिंसाधनवाक्येनसम्यक्त्वातस्यामुक्तायांस्वतएवसंशयो
९३ गतइतितदुक्तंफलंजातमितिस्वहृदयेजातःसंशयाभावइत्याहाग्रेनुवदति॥संछिन्नइति॥अन्यथासर्वसंदेहाभावस्यगुरुशास्त्र
प्रतिपाद्यतानसात् मद्यमदृर्थप्रयुक्तोयत्नवस्तुक्तासिः उक्तमवाक्यखड्गः तेनसंशयश्छिन्नः ननुयुक्त्यामोचितः वचनंचखड्ग
रूपं साधनप्रदर्शनरूपत्वात्॥अतःपरंचयुक्तिर्नवक्तव्या॥भगवन्मायांशबलत्वेनस्वीकृत्यतयासहयत्रैववुद्धिःप्रेर्यतेतत्रै

विदुरउवाच संछिन्नःसंशयोमह्यंतवसूक्तासिनाविभो
उभयत्रापिभगवन्मनोमेसंप्रधावति १५ ॥

ववुद्धिरप्रतिहतागछति धनुषियोजितःशरइव॥तदाह॥उभयत्रापीति॥भगवतःस्वातंत्र्येजीवपारतंत्र्येवा॥जगतोबीज
प्रयोजनयोर्वा॥ज्ञानमायासंबंधयोर्वा॥संशयश्छिन्नइतिउभयत्रापिमेमनःसम्यक्प्रधावति॥भगवन्नितिसंबोधनंस्व एम०
स्मिन्नादृशज्ञानजननसामर्थ्यबोधाय॥प्रकर्षेणधावनंयुक्त्यपेक्षारहितंनिःप्रत्यूहं॥सम्यक्त्वंचप्रयासाभावः १५ ॥ ९३

नकेवलंपूर्वप्रश्नेष्वेवममसंदेहोगतःकिंत्वन्यत्रसर्वत्रैवकार्येसंदेहोगतइत्याह।साध्वेतदिति॥एतन्मायानिरूपणवचनंयद्भवताव्या
हृतंतत्साध्वेवव्याहृतं विद्मइति॥तवात्रानुभवोस्तीतिविज्ञापितंनतुशास्त्रदृष्टिमात्रेण।किंनिरूपितमित्याकांक्षायामाह॥आत्म
मायायनंहरेरिति॥हरेःसंबंधिनोयेआत्मानःजीवाःतेषांयामायाव्यामोहिकापूर्वंचतुश्श्लोक्यांनिरूपितातस्यामायायाःअयनं
स्थानंविषयाकारोब्रह्मजडत्वेनआत्मानात्मत्वेनयत्स्फुरतितद्यथार्थमेवस्फुरति॥मायैववाअयनंयस्येतिमायाकृतोयोंतरासर्गःसतुअ
पार्थमेवाभाति॥वस्तुदूरीकृत्यनिर्विषयिकमेवज्ञानंमायाश्रितंयत्किंचिद्विषयत्वेनभाति तर्हिसर्वदैवभायात्ततश्चानिर्मोक्षप्रसंगइत्या
शंक्याह॥निर्मूलमिति मायातिरिक्तमूलाभावात्तत्सस्पर्शेब्रह्मावभानात्तदेवगच्छतीतिनिर्मूलत्वं॥एवमेवबहिर्मुक्तिकार्यांरजतप्रतीतिः
अंतराभासतेतत्सस्पर्शेचनिवर्ततइति अयमेवार्थोमंत्रेपिनिरूपितः॥नतंविदाथयइदंजजानान्यद्युष्माकमंतरंभवतीति जगद्भगवा

साध्वेतद्व्याहृतंविद्मात्ममायायनंहरेः॥आभात्यपार्थनिर्मूलंविश्वमूलंनयद्बहिः १६ ॥

न्कर्तृत्वंचश्रुतिसिद्धंसत्यमेवसृष्टस्यब्रह्मस्वरूपस्यजगतःतथात्वप्रतीतौव्यामोहिकयामाययामध्येअन्यथैवप्रत्याय्यते अविकृ
तंकार्यकारणंकृतिश्च॥युष्माकमितिवचनान्नसर्वेषामयमनुभवः॥यत्पुनःप्रमेयाध्यायेअविरोधेविलक्षणत्वंसमर्थितंपूर्वपक्षेनवि
लक्षणत्वादिति॥तथात्वंचशब्दादिति॥विज्ञानंचाविज्ञानंचेति॥तत्सिद्धांतेवादिबुद्धिमनुसृत्य ब्रह्मवादस्यवक्तुमयुक्तत्वात्परोक्तया
दूष्यतेत्वित्यनेनपरिहृतंविलक्षणंदूष्यतेननुवस्तुतइत्यर्थः॥श्रुतिस्तुपूर्वकांडइवलोकसिद्धमनुवदतितल्लक्षणार्थं·यथादहरंवे
सापरंच्यामितिलौकिकदेहानुवादः अतएवसत्यंचानृतंचसत्यमभवदितिउभयथाप्रतीयमानंसत्यमेववस्तुतोजातमितिबोधय
ति।तदृष्येतस्यभगवद्ध्यानात्तथास्फुरितमितितस्यानुवादः॥मध्यस्थमात्रानुवादोवा॥मायावादिवत्किंच॥विश्वस्ययन्मूलंतद्ब
हिर्विषयेषुनास्तिभगवतोनामातीतत्वात् किंतुहृदःप्रकाशातद्रूतामध्यएवस्फुरति १६ ॥ ॥



Indira Gandhi National
Centre for the Arts

भगव[illegible]सत्रं यमार्गे वर्त्तमानः १

इतस्ततप्रुवा २

त-सु७ ९४ तस्मादस्मिन् शास्त्रे ऽभावे वसुविनोऽज्ञानसंकटरहितौ तौ निर्दिशति यश्चमूढतम इति॥ यस्तुज्ञानार्थसर्वथानप्रवृत्तः सलोक
न्यायेन वर्त्तमानः भायापगमार्थमेवयत्नं कुर्वन् भगवत्कृपयातद्पगमे पश्चात्सर्वमेव निःसंदिग्धं जानाति अथ यः सद्गुरुणा कृत्वा भ सुखेोदर्कं २
गवत्कृपया सहितः आमोहिकं बुद्धिं त्यक्त्वा बुद्धेः परंगतः स्वरूपे स्थितः पूर्वमेव निवृत्तानर्थत्वात्ससुखमवतिष्ठते॥ अंतरितोम
ध्ये स्थितस्तु अल्पज्ञानाल्पभक्तिनिष्ठाप्रभावात् एकतरज्ञानाश्रयाभावाच्च नोकाद्वयारूढवत्क्लिश्यति॥ लौकिकमूढपक्षे उभयोः स
मानसुखकथनं विरुद्धमापद्येत॥ न वा मूढानां सुखमस्ति १७ एवं शास्त्रार्थं निरूप्य स्वस्य किंचिज्ज्ञातं किंचिच्च नेति तदुभयम

यश्चमूढतमो लोके यश्च बुद्धेः परंगतः॥ तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः १७
अर्थाभावं विनिश्चित्य प्रतीतस्याप्यनात्मनः॥ तां चापि युष्मच्चरणसेवयाहं पराणुदे १८

नुवदति॥ अर्थाभावमिति॥ शास्त्रतः प्रतीयमानस्य अर्थस्वरूपं नास्तीति सूचितं॥ आत्मैवेदं सर्वमिति श्रुतेः॥ अनात्मनोर्थाभावः लोककल्पलोक
सिद्धः॥ अतः परं प्रतीतिरस्ति विषयबाधानिवृत्ता तामपि प्रतीतिं युष्मच्चरणसेवया गुरुचरणसेवया अहं पराणुदे॥ यद्यपि स्व दृशा?
भावतो गुरुर्नोपदिशति तथापि सेवायां क्रियमाणायां तद्धर्मेण तदुपदेशे न वा तत्सम्पर्शे भविष्यतीति तामप्यपनुदे दूरीकरिष्या
मि॥ ज्ञानमार्गानुसारेणैवार्थस्य निवृत्तत्वात्॥ अन्यथा भगवच्चरणसेवयैव तां दूरीकुर्यात्॥ अहमिति स्वाधिकारः॥ तथैव भग रुभ०
वदाज्ञापनात्॥ अन्यथा भक्तिमार्गानुसारेणैव दूरीकुर्यात्॥ अधिकारश्च पुनः प्राप्तव्यः १८ ॥ श्रीगोपालयनमः ॥ ९४
अन्यत्स्वभातिर्विषयता हृपाबाधिनिवृत्तिः अविषयो भगवानिषयता माया जन्यसुके स्वत्वानिवृतेति ४ =

मत्त्वाद्[illegible]नना :

किंच भगवन्मार्गेपि गुरुसेवा भक्त्युपयोगिनीत्याह॥ यत्सेवया भगवत इति॥ मार्गत्रयाविरोधाय भगवतो विशेषणत्रयं॥ अन्य
था गुरुसेवाभावे मार्गांतरविरोधेन भगवति भक्तिः स्यात्॥ तत्र भगवत इति॥ भक्तिमार्गानुसारी भगवान्कूटस्थस्येति ज्ञानमार्गानु
सारी मधुद्विष इति दैत्यद्वेत्य द्वेषी॥ सर्वेषामेव सुमनसां पुष्पाणां वा मधु गृहीत्वा स्वसुखेन तद्भमित्वा यथा निष्पादितं मधु भवति॥ सदृशादि [illegible]
तथा सर्वदेवानां बलं संगृहीत्वा दैत्यैः स्वभावं तत्र संपाद्य सर्वधर्मप्रतिपक्षतया ब्रह्मघातको निर्मितो मधुः कैटभस्तु ज्ञानांशबाध
स्व[illegible]मा[illegible]

यत्सेवया भगवतः कूटस्थस्य मधुद्विषः रतिरा
सो भवेत्तीव्रः पादयोर्व्यसनार्दनः १९ ॥

कः॥ अत एव कपिलेके कैटभार्दन इत्युक्तं॥ तादृशस्य भगवः पादयो रतिरासो भवेत् रति विलासो भवेत्॥ विलासपदेन चरणवशीकर
णं सूचितं॥ रतीनां वा बहुविधानां सर्वेंद्रियविषयाणां रासो रससमूहः॥ पादयोरिति अवताराभिप्रायेण लौकिकोपि व्यामो
होगच्छतीति तीव्र इति शीघ्रमेव तत्संस्पर्शयति॥ अवांतरे वैरास्तु तस्यानुषंगिका इत्याह व्यसनार्दन इति॥ व्यसनानि लौकिकानि निसकार्यहेतोः २ =
विचित्राणि अर्दयतीति तस्य विशेषणं॥ अतो व्यसननिवृत्तिः रासस्यानुषंगिकी अतो मार्गद्वयसाधकत्वात् गुरुसेवा सर्वेषामेव हि
तकरी॥ १९ ॥

Indira Gandhi National
Centre for the Arts

:हस्तवेदं:-

गहन१

नमु॰७ ७५ तर्हिकथंनसर्वेकुर्वंतीत्याशंक्याह दुरापाइति अल्पंतपोयेषांतेषांवैकुंठवर्त्मसुसेवादुरापादुःखेनप्राप्तुंशक्या॥दुर्लभत्वायेकं
वचनं॥भगवद्भक्तानांमाहात्म्यप्रतिपादनायवैकुंठवर्त्मसुइत्युक्तं॥वैकुंठस्यमार्गाभूतेषु॥ग्यापिवैकुंठस्यभगवतोवा॥तन्मार्गेगतस्त
त्रगच्छतीतितेषांवैकुंठमार्गत्वंस्थापयति॥यत्रोपगीयतेनित्यमिति यत्रभगवद्भक्तेषुभगवान्नित्यमेवोपगीयते॥अनेनतन्मात्रत्रग
मनंसूचितं॥भगवद्गुणाःपुष्पाणांगंधाइवभगवन्मार्गेस्मिनायांति अतएवतेषामुपगानं॥हृदयेस्थितानांतत्रैवोल्लसितानांगानं॥
उल्लासाधिक्येनमार्गेनैकद्यं॥नित्यमुल्लासाद्वायुनेवश्रुत्यादूरेनयनंनिराकृतं॥किंच॥सहिदेवानांदेवः देवोपरिवर्त्ततेअतोदेवमा
र्गापेक्षयायज्ञापेक्षयापिअयंमार्गःसमीचीनः॥किंचजनार्दनोयंजनामर्दयतीतिजनार्दनः॥ज्ञानकार्यकर्त्ताअतः अचेतननिवर्त्त

दुरापाह्यल्पतपसांसेवावैकुंठवर्त्मसु॥यत्रोपगीयतेनित्यंदेवदेवोजनार्दनः २० सृष्ट्वा
ग्रेमहदादीनिसविकाराण्यनुक्रमात्॥तेभ्योविराजमुद्धृत्यतमनुप्राविशद्विभुः २१ ॥

कापेक्षयाज्ञानमार्गापेक्षयापिभगवद्गुणगानहणांसेवनमुत्तममित्यर्थः २० एवंपूर्वपक्षसिद्धांतपक्षौनिरूप्यअन्यान्विशेषा
न्ज्ञातुंपृच्छति॥सृष्ट्वाग्रेमहदादीनीति॥तत्रादौश्लोकद्वयेनसार्द्धेनसाधिकेनपूर्वोक्तमनुवदति॥अन्यथोक्तार्थविस्मरणात्अ
ग्रेनवक्तव्यंस्यात्॥निर्द्धारितंचाल्पेनोच्यते महदादीनित्रयोविंशतितत्वानितेषांविकाराअवांतरभेदाः॥सात्विकादिभेदाःआ
ध्यात्मिकादिभेदावा॥आनुपूर्व्येणचतेषांसृष्टिः॥तेभ्योविराजमुद्धरणंच पुरुषस्यसांशत्वायतमनुप्राविशदिति॥अ एम॰
र्थान्निरूपितमनुवादेनसृष्टितं॥तत्प्रवेशव्यतिरेकेणब्रह्मांडमध्यकार्याणिनभवेयुः॥विभुरितिसामर्थ्यरूपेण २१॥ ७५

सारोचत्नः:सर्गाद्येचेतिविज्ञकरणकोष्ठगतसा
रःस्वयंभगवत्साम्यर्थ्यतदशत्वात्पुरुषस्येतिभाव:२

भगवत्सहितस्यविराजोनाम यमाहुराद्यंपुरुषमिति॥अस्यसाद्यपेक्षयाआद्यत्वं॥सहस्रांघ्र्यूरुबाहुकमिति॥यद्यपिप्रचरद्रूपे
णपूर्वाध्यायेनास्तितथापिपुरुषस्यतथारूपत्वात्तद्धर्मत्वेनानुवादः॥स्वस्यसविशेषपरिज्ञानार्थंभगवद्रूपयावाधर्मांतरस्फु
रणं—तदपिगुरुत्वेनैवज्ञापयितुमनुवादःक्रियते॥यत्रचपुनःपुरुषेइमेविश्वेलोकाःसर्वप्राणिनःसविकाशंअतिविशालभू
किंच४ माविवसुखमासते २२ यस्मिन्पुरुषेदशविधःप्राणोनिरूपितः॥इंद्रियाणिइंद्रियार्थाश्चनिरूपिताः इंद्रियाणामिंद्रियार्था
नांप्राणानांचत्रैविध्यंनिरूपितं॥यतोवर्णाअपित्वयानिरूपिताः॥एवमनूद्यविशेषंपृच्छति॥इदंभगवच्चरित्रंभगवद्रू॰ पंचतदे

यमाहुराद्यंपुरुषंसहस्रांघ्र्यूरुबाहुकं॥यत्रविश्वइमेलोकाःसविकाशंसमासते॥२२॥यस्मिन्
दशविधःप्राणःसेंद्रियार्थेंद्रियस्त्रिवृत् त्वयेरितोयतोवर्णास्तद्विभूतीर्वदस्वनः २३ यत्रपु
त्रैश्चपौत्रैश्चनप्तृभिःसहगोत्रजैः॥प्रजाविचित्राकृतयआसन्याभिरिदंततं २४ ॥

वस्मात्यद्यस्यविभूतिर्भवेत्॥भगवतोऽसाधारणगुणेषुविभूतिरप्येका॥कथापक्षेपिअग्रेवक्ष्यमाणानांब्रह्मादीनांनविसर्ग
त्वंविवक्षितं किंतुविभूतित्वमेव॥तेनसविभूतिःसर्गोनिरूपितोभवति॥विसर्गस्तुधर्माधर्मक्षोग्रेवक्ष्यतेव्यष्टिरपिसमष्टिव्यष्टि
भेदःपरिकल्पते॥तत्रब्रह्मासमष्टिःप्रजाव्यष्टयः॥प्रजानांकर्त्तत्वंकदाचिन्नभविष्यतीतितदर्थंप्रथमतातान्पृच्छति यत्रे
तिसर्वत्रचत्वारोभेदाःविभूत्यर्थंवक्तव्याः॥नप्तारःप्रपौत्राःकन्यापुत्रावा पुत्रशब्देपुत्र्याएकवद्भावः॥पौत्रेचपौत्र्यः॥एतदु स्क॰वन्न॰व१
भयंनप्राप्तंसूचयति॥गोत्रजादूरज्ञातयः २४ ॥ ॥

फलैःदृष्टव्यवहारे, धर्मःदेवर्षोपात्तत्वात्...

Indira Gandhi National
Centre for the Arts

त·सु७ ९६

प्रजापतीनामिति॥ सर्गः कारणपदार्थानामुत्पत्तयः अनुसर्गः कार्याणां॥ मनवश्चमन्वन्तराणिषड्विधानि २५ एतेषां मनूनां वंशानुचरितं तत्रोत्पन्नानां वंशहृद्धिहेतुचरित्रं॥ चकारादन्यान्यपि चरित्राणि॥ भूमेरुपरिस्वर्गादयो लोकाः कियंतः अधश्च कियंत इति आसत इति स्थिराश्चोत्पन्निकाः मित्रात्मजेतिबहुप्रश्नेपिद्रोभाभावः सूचितः २६ तेषां लोकानां संस्थां मर्यादां केषु लोकेषु केव्यवहारइतिप्रमाणं परिमाणं चकारात्तत्रत्यानामपिव्यवस्थां॥ उपर्यधोलोकानामेवपृष्टत्वात्॥ प्रधानभूतं भूर्लोकं पृच्छति भूर्लोकस्येति॥ भूर्लोकस्य संस्थां प्रमाणं चेत्यर्थः चकारादवांतरभेदानां॥ जीवानां योनिभेदान्पृच्छति॥ तिर्यगिति तिर्यङ्मानुषदेवाः

प्रजापतीनां सपतिश्चक्लृपेकान्प्रजापतीन्॥ सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराणि च २५ एतेषामपि वंशांश्च वंश्यानुचरितानि च॥ उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते २६ तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय तिर्यङ्मानुषदेवानां सरीसृपपतत्रिणां २७ वद नः सर्गसंव्यूहं गार्भस्वेदजोद्भिदां॥ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयं॥ सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्र

तामसराजससात्विकाः॥ सरीसृपसर्पपक्षिणो द्वितीयकक्ष्यायां तामसादयः तेषां सर्गानां सम्यग्व्यूहः समूहः केकियं तः कुतउत्पन्ना इति चतुर्विधा अपि भूतभेदा वक्तव्या इत्याह॥ गार्भेति गर्भभवाः गार्भाः॥ जरायुजाः जरायुशब्देन वा गर्भ उच्यते॥ स्वेदजा मशकादयः॥ अंडजाः पतंगादयः उद्भिज्जा वृक्षाः॥ स्वेदजादीनां स्वेदत्वमन्यप्राणः स्वेदादिशब्दैरेव तज्ज्ञानं पृच्छति २७ गुणावतारैरिति॥ ब्रह्मविष्णुमहेश्वरैः॥ विश्वस्य सर्गउत्पत्तिः अप्ययोनाशः उत्पत्त्यादीनामाश्रयं॥ कृतिं भावं वा॥ ब्रह्मांडरूपमाधा एम·
रमितिकेचित्॥ सृजतः श्रीनिवासस्येति मूलकारणं विष्णुरुक्तः॥ श्रीनिवासस्येति ब्रह्मानंदपूर्ण उक्तः॥ तस्य उदारविक्रमाः ९६
अवतारचरित्राणि॥ प्रकीर्णकानामेतेषां प्रश्नानां भगवद्विभूतिभेदार्थकीर्तनं २८ ॥

२८२

वर्णाश्रमेति॥ वर्णानां विभागश्चतुर्धा॥ आश्रमाणां च॥ अष्टानामपि रूपशीलस्वभावाः भिन्नतया वक्तव्याः॥ रूपमाकृतिः शीलमाचारः स्वभावोंतःकरणधर्मः ऋषीणां भृग्वादीनां जन्म उत्पत्तिप्रकारः कर्म मंत्रद्रष्टृत्वादि वेदस्य विकर्षणं शाखाभेदेन विभागः २९ यज्ञस्य सप्तदशविधस्य वितानानि संस्थाभेदाः॥ चकारात्क्रतुसत्राणां॥ योगस्य पथः योगमार्गान्॥ चकारादंगानां॥ प्रभो इति संबोधनं ज्ञानार्थं नैःकर्म्यं निवृत्तिमार्गः सांख्यस्य तंत्रं सांख्यशास्त्रं भागवतं तंत्रं वैष्णवशास्त्रं॥ स्मृतमिति स्मृतिशब्दमेव प्रमाणमिति सूचितं पाषंडेति सर्वेष्वपि शास्त्रेषु पाषंडपथवैषम्यं पाषंडमार्गवैषम्यं वक्तव्यं। प्रतिलोमानां चांडालादीनां निवेशनं शास्त्रोपयोगमुत्पत्तिं वा॥ जीवस्य गतयः संसरणप्रकाराः॥ स्वरूपतः प्रकारतश्च गुणतः कर्मतश्च वक्तव्याः। धर्मार्थेति चतुर्विधपुरुषार्थानां अन्याविरोधतः निमित्तानि च वक्तव्यानि॥ वार्त्तायाः जीविकायाः॥ अधिकारिभेदेन प्रकारा वक्तव्याः एवं दंडनीतेश्च॥ एत

वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ऋषीणां जन्मकर्माणि वेदस्य च विकर्षणं २९ यज्ञस्य च वितानानि योगस्य च पथः प्रभो नैःकर्म्यस्य च सांख्यस्य तंत्रं भागवतं स्मृतं ३० पाषंडपथवैषम्यं प्रतिलोमनिवेशनं जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः॥ ३१॥ धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः॥ वार्त्ताया दंडनीतेश्च श्रुतस्य च विधिं पृथक्॥ ३२
श्राद्धस्य च विधिं ब्रह्मन्पितृणां सर्गमेव च ग्रहनक्षत्रताराणां कालावयवसंस्थितिं ३३ दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलं प्रवासस्थस्य यो धर्मो यश्च पुंस उतापदि ३४ येन वा भगवांस्तुष्येत् धर्मयोनिर्जनार्दनः संप्रसीदति वा येषां
धर्माणां विधिः प्रकारो वक्तव्यः श्रुतस्य वेदाध्ययनस्य चकारादंगानां अर्थज्ञानस्य वा॥ पृथगधिकारि ((एतदाचक्ष्व मे नघ ३५ ॥
भेदेन शास्त्रस्यापि प्रकारो वक्तव्यः॥ श्राद्धस्येति श्राद्धस्य विधिः प्रकारो वक्तव्यः॥ पितृणामपि सर्गो वक्तव्यः ३३ ग्रहनक्षत्रताराणां बुधादीनामश्विन्यादि अन्यनक्षत्राणां कालावयवे ज्योतिश्चक्रे सम्यक् स्थितिर्वक्तव्या॥ दानस्येति दानादीनां फलं वक्तव्यं विधानं चवापीत्यनादरे॥ यएव भेदास्तवा
[illegible]
निपुंसः आपदि यो धर्मः॥ किंच॥ येन वा प्रकारेण भगवांस्तुष्येत् धर्मकर्त्तृज्ञानदृश्च॥ तोषस्तस्य भावतः परितोषः प्रसीदतीति वरदानाय

Indira Gandhi National Centre for the Arts

त.सु.७ अपृष्टमपिवक्तव्यमित्याशंक्याह अनुव्रतानामिति नहिगुरुं बालाःप्रष्टुंजानंति॥ अनुव्रतंयेषांगुरोरिच्छानुवर्त्तिनां॥ शिष्याणां
९७ शेषभावंप्राप्तानांज्ञानार्थिनांवा॥ पुत्राणांचेतिदृष्टांतार्थां॥ द्विजोत्तमेतिसंबोधनं॥ तदपित्रादिभिर्यथाभवान्शिक्षितः एवंमयाशि
क्षयेतिज्ञापनार्थः॥ अनापृष्टमपिब्रूयुरितिवचनेसदाचारःप्रमाणंतदपिनबलात्किंतुदययातदाहुःदीनवत्सलाइति॥ प्रलयंभि
न्नतयापृच्छति तत्वानामिति तत्वानामेषांकतिधाप्रतिसंक्रमःप्रलयः चतुर्विधादिभेदाःशास्त्रेषुबहुधासिद्धाइति किंच तत्र

अनुव्रतानांशिष्याणांपुत्राणांवाद्विजोत्तम॥ अनापृष्टमपिब्रूयुर्गुरवोदीनवत्सलाः ३६ तत्वा
नांभगवंस्तेषांकतिधाप्रतिसंक्रमः॥ तत्रेमंकउपासीरन्कउस्विदनुशेरते ३७ पुरुषस्य
चसंस्थानंस्वरूपंवापरस्यच ज्ञानंचनैगमंयत्तद्गुरुशिष्यप्रयोजनं ३८ निमित्तानिचतस्ये
हप्रोक्तान्यनघसूरिभिः॥ स्वतोज्ञानंकुतःपुंसांभक्तिर्वैराग्यमेवच ३९ ॥ ॥

प्रलयेइमंभगवंतंकेउपासीरन्केवा अनुशेरतेलीनाभवंति ३७ जीवदेहतत्वानांमध्येपुरुषस्यविराजः॥ चकारादन्येषां
संस्थानंनाशःस्वरूपंचवक्तव्यं॥ चकारात्संस्थानविशेषोपि॥ एतेपित्रयोभेदाः॥ अपरस्यचव्यष्टीनांचज्ञानंवक्तव्यं॥ चका
राद्वैराग्यंच॥ नैगमंवेदोक्तं॥ गुरुशिष्याणांचआवश्यकत्वेप्रयोजनंवक्तव्यं निमित्तानिचवक्तव्यानि॥ तस्यज्ञानस्य॥ इहअ एस०
स्मिन्देहे॥ एवंप्रकारेणवाचकारात्बाधकानिचसूरिभिःप्रोक्तानीतिपरंपरयासिद्धानि। अन्येषांतुपाक्षिकत्वं। गुर्वाद्यभा ९७
वेस्वतोवाज्ञानंकथंभवतिसउपायोवक्तव्यः॥ तथास्वतोभक्तिः वैराग्यंच ३९ ॥ श्रीगोपालयनमः ॥

---

...[illegible]...तिन्तोरथ...र्यात सदिति चो वांते इति भग... ...ताक्ष
क्यात्... ...पाद...

नन्वेतेपदार्थाः अनुपयुक्ताःकिमितिपृच्छ्यंतइत्याशंक्याह। एतान्मेइति॥ एतान्प्रश्नान्मेमह्यंब्रूहिवचनेहेतुः। हरेःकर्मविवित्स
यापृच्छतः॥ भगवतःकर्माणिमनसाविज्ञातव्यानि चिंतनीयानिवाविशेषेणधातव्यानिवा हृदयेस्थापनीयानि मेऽज्ञस्यमित्रत्वादि
तिभिन्नंवाक्यं त्वंयद्यपिसर्वेषांमित्रंतथापित्वन्मैत्रातेषांनोपयुज्यतइतिमदर्थमेवमित्रंभवेत्याह। अजयानष्टचक्षुषः मेऽज्ञ
स्यमित्रत्वात् ब्रूहीतिसंबंधः मोहिन्यामायययाममज्ञानंनष्टमितिदैन्यं॥ सर्वदानापिकृपयाज्ञानदानमुत्तममितिवक्तुंज्ञानेनजी
वस्यभयंगच्छतीतिफलतोज्ञानंस्तौति सर्वेवेदाइति सर्वेवेदाअधीताअध्यापिताश्च यज्ञाःकृताःकारिताश्च तपोदानानि चका
रात्यमनियमादीनि अनघेतिसंबोधनंवाआर्थसंप्रत्यर्थं जीवाभयदानस्यज्ञानस्यकलयापियत्फलंभवतितत्सर्वेपिमिलित्वाकर्तुंन

एतान्मेपृच्छतःप्रश्नान्हरेःकर्मविवि[illegible]त्सया॥ ब्रूहिमेऽज्ञस्यमित्रत्वादजयानष्टचक्षुषः ४० सर्ववेदा
श्चयज्ञाश्चतपोदानानिचानघ जीवाभयप्रदानस्यनकुर्वीरन्कलामपि ४१ श्रीशुकउ सइत्थमापृष्टपु
राणकल्पः कुरुप्रधानेनमुनिप्रधानः।प्रवृद्धहर्षोभगवत्कथायांसंचोदितस्तंप्रहसन्निवाह ४२ इतिश्रीभा
गवतेमहापुराणेतृतीयस्कंधेसप्तमो

शक्नुवंतीत्यर्थः ४१ एवमनेकप्रश्नेमैत्रेयस्योत्तरदानार्थंसंमतिरस्तिनवेतिसं
देहेसर्वेषांप्रश्नानांभगवच्चरित्रपरत्वंवर्त्ततइतिमहानेवहर्षः॥ तस्यजातइत्याह। सइत्थमिति॥ आसमंतात्पृष्टःपुराणकल्पोयेनपु
राणंकल्पयतीति॥ एतेषामुत्तरार्थेएकंपुराणंवक्तव्यं नतुकथामात्रेणप्रकरणमात्रेणवाएतेषामुत्तराणिनिरूपितानिभवंतीत्यर्थः
॥ वक्तृश्रोत्रोरुत्कर्षमाह॥ कुरुप्रधानेनमुनिप्रधानःसंचोदितइति प्रवृद्धहर्षः भगवत्कथायाः वक्तव्यत्वान्नदेवाहा भगवत्क
थायामिति सम्यक्प्रेरणंसपरिकरप्रश्नात्॥ प्रहसन्निवेतिमुखप्रसादः। पुराणकथनप्रसंगप्राप्त्यावा॥ अभिनंदनंपूर्वकमाहेत्य
र्थः॥ सर्वंमगदतःसंकल्पविकल्पात्मकंमनोनिरूपितं ४२ इतिश्रीभागवतसुबोधिन्यांश्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षि
तविरचितायांतृतीयस्कंधेसप्तमाध्यायविवरणं॥ ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰ ९८

अष्टमेभगवद्बुद्धिर्यादृशीसात्रवर्ण्यते॥आधाराधेयरूपाणांतदीयानांतथोक्रमः १ चद्विधाभगवद्बुद्धिस्वरूपेरतिरूपिणी जगद्वि
षयणीचैवहृतियुक्तेतिवैत्रिधा २ हरेरेवतथामापिभगवद्विषयात्रिधा॥लौकिकोपायजनितासप्रथमासाद्विधापुनः ३ तर्कक्रियादि
भेदेनद्वितीयावैदिकीस्मृता साक्षात्कारस्वतीयस्तुयहस्तुसर्वंप्रतिष्ठितं ४ साभासतोग्रंथरूपाभगवद्बुद्धिरीर्यते॥सर्गोपयोगिनी
यस्मात्रामसाङुरुताहिसा ५ अनेकधाभागवतप्रवृत्तिरुपयुज्यते॥दशलीलायुतासर्वाकल्पभेदैर्व्यवस्थिता ६ भगवद्बुद्धिरेषेति

मैत्रेयउ॥सत्सेवनीयोबतपूरुवंशोयल्लोकपालोभगवत्प्रधानः॥
बभूविथेहाजितकीर्त्तिमालांपदेपदेनूतनयस्यभीक्ष्णं १ ॥

स्र्गं वेसनं ।
सेवलीलाद्ध्येतता॥एवंपूर्वाध्यायेभगवच्चरित्रज्ञानार्थंबहवः प्रश्नाः कृताः॥तत्रभगवत्क्रियाज्ञानार्थंमहानस्योद्यमइति
तंप्रोत्साहयितुंस्तौति॥ ॥सत्सेवनीयइति मैत्रेयउ बतेतिहर्षे सद्भिर्महद्भिरपिपूरुवंशःसेव्यः॥उत्पत्तिस्थानार्थंज्ञानार्थं एम०
च॥यतयस्मात्यस्मिन्वंशेउत्पन्नोलोकपालोपियमोपिभगवद्धर्मविरोधिधर्मयुक्तोपिभगवत्प्रधानोजातः॥भगवानेवप्रधानंय ९८
स्यतादृशस्त्वंबभूविथयतः अजितकीर्त्तिमालांपदेपदेरूणोरूणोनूत ॥ श्रीगोपालयनमः ॥ ॥
लो२ प्रशं२

नयसि अभीक्ष्णंसर्वदा॥संतोहिस्वभावजयार्थमहांतंयत्नंकुर्वंति तच्चेत्पूर्वसंबंधमात्रेणभवतितदाप्रयत्नांतरंपरित्यज्य
सद्भिःपुरुवंशएवसेव्योभवति॥बतेतिअत्याश्चर्यदर्शनात्प्रमेयबलाधिक्यज्ञापनार्थं॥अधिकारेहिसर्वथाभगवद्बुद्धिर्नश्य
तिसुतरांलोकपालाधिकारेयदप्युक्तंद्वादशेतेविज्ञानीमइतितद्दंडपरिवर्जनार्थंअधिकारिणाज्ञातव्यमितिज्ञायतेनतुभक्ति
मार्गानुसारेण॥तत्रापिप्रकृतेविशेषवक्तुंबभूविथेतिमध्यमपुरुषःप्रयुक्तः॥तेनयमोतिक्रूरःसर्वघातकइतिसूचितं॥ता
दृशस्यापियदिभगवत्परत्वंतद्वंशसंबंधात्सोपिसंबंधः आभिमानिकएवअविवाहितायांव्यासाडुत्पन्नः॥अजितेतिनकेनापिजि
तइतिभगवदुत्कर्षः तस्यहृदयेरोचतइतिज्ञापितंतेनसर्वथामात्सर्याभावःसूचितः॥कीर्त्तिमालामिति॥यमःकर्मप्रधानोन
प्रसिद्धिमात्रंमन्यते॥साप्यस्यहृदयेसमागतेतिज्ञापितं॥किंचमालेतिकंठभूषणं॥कीर्त्तिंकंठेस्थापितवानितिभक्तोभोग्याधि
क्यं॥नूतनकरणेनातिसामर्थ्यं पदेपदेनूतनकरणंप्रेम्णा एवंमाहात्म्यज्ञानपूर्वकसुदृढस्नेहोस्यवर्त्ततइतिसूचितं॥अ
भीक्ष्णमित्यनेनप्रेम्णः अकुंठत्वंसर्वतोधिकत्वं एवंसर्वदोषनिवृत्तिपूर्वकभगवद्विषयकसवगुणउत्पन्नाइतिमहानयं
वंशः॥पांडवादीनांभक्तानांस्वंसंचअवज्ञागर्वाभावार्थंतथानिरूपितं १ श्रीरामनारायणायनमः ॥
॥ ५ ॥ ५ ॥ ५ ॥
मैत्रेयस्य१- पूरुवंशःसत्सेवनीयोनतुस्वमितिभावेन१=

Indira Gandhi National
Centre for the Arts

त.सु.०८
९९

इदानीं सर्वप्रश्नाः विशकलिततया पृष्टाः भगवच्चरित्रज्ञापकाः न भवंतीति तथाविधत्वज्ञापनार्थं अपृष्टकथनार्थं च पुराणमेव
मूलतः किंचित्कथयिष्यामीत्याह सोहमिति॥ त्वया ये पूर्वं प्रश्नाः कृताः॥ सुखाय कर्माणि करोति लोक इत्यादिना ते प्यनेन परि
हृता भविष्यंतीति॥ तत्र प्रथमं प्रश्नं फलत्वेन निर्दिशन्नाह॥ नृणां कृल्लसुखाय मत दुःखं गतानां तद्विरमायेति॥ अनेन पृष्टा
नां सर्वेषामेव पदार्थानां भगवत्कर्मपरत्वं सामान्यतो निरूपितं॥ स्वभावतः कर्मणां अल्पसुखेच्छया कृतानां महादुःखजनक

सोहं नृणां कृल्लसुखाय दुःखं महद्गतानां विरमाय तुभ्यं॥ प्रव
र्तये भागवतं पुराणं यदाह साक्षाद्भगवान् ऋषिभ्यः २ ॥

त्वं॥ तान्येव च कर्माणि भगवत्संबंधीनि चेत् भगवदीयत्वेन कृतानि दुःखाभावपूर्वकमहासुखफलानि भवंतीति॥ अत्र श्रवणे
भवानेवाधिकारीति तुभ्यमुक्तं॥ भागवतमिति॥ भगवता यत्र हि प्रतिपादिताः पदार्थाः स्वरूपतः सफला एव। परंपरया पायि
भगवदुक्तपदार्थानां दोषसंबंधाभावाय वक्तुः श्रोतुः स्वरूपतो वस्यातश्च परमां शुद्धिं निरूपयितुं शुद्धपरंपरामाह॥ यदा
ह साक्षाद्भगवान् ऋषिभ्य इति॥ यद्भागवतं भगवता न परंपरयोक्तं किंतु साक्षादेव भगवत्त्वं वा साक्षात् भगवत्कृपया ज्ञातं भ एम०
गवत्त्वमुदासार्थं॥ ऋषिभ्य इति॥ ज्ञाननिष्ठा ऋषयः परमपात्रत्वेन निरूपिताः येषां बुद्धौ मंत्राः स्वतः स्फुरंति सा बुद्धिरूज्ज ९९
मेव भवति २ ॥

संकर्षेप्र९

भगवानपि नक्रीडां कुर्वन् लक्ष्मीसहितो वा भागवतमुक्तवान्॥ किंतु आत्मध्यानारूढः एकाग्रचित्तः तथोक्तवानिति भगवंतमुप
देष्टारं वर्णयति आसीनमुर्व्यामिति आसीनमिति क्रियांतराभावेन लौकिकरीत्यापि वैयग्र्याभावः सूचितः॥ उर्व्यामिति भूमौ
स्थित्याय ज्ञीयत्वं सूचितं॥ अन्यथा भगवान् कथं भूमावासीत्॥ इयमुर्वी नोर्ध्वतां किंतु मूलभूतेवाय तः पाताला धो विद्यमानत्वस्या
नलरूणादिभिर्नागकन्याभूजया च निरूप्यते॥ आद्यमिति पित्रादिजन्मदोषः परिहृतः॥ संकर्षणमिति भगवतश्चतुर्मूर्त्तेर्या मूर्त्तिः
संहारकर्त्री सा निरूपयतीत्युक्तं॥ तेन भगवता पदार्थनिरूपणे दृष्टांतार्थमपि यद्यन्ये पदार्था निर्दिष्टा भवंति तेपि संकर्षणं प्राप्य दग्ध
पूर्वावस्था भगवदीया एव नूतना भवंतीति सूचितं॥ तामसत्वेन समागतं दूषणं परिहरति देवमिति ननु देवानामपि नानाविधत्वा
त्तामसत्वमपरिहृतमेव अत आह॥ अकुंठसत्वमिति। न कुंठं कुंठितं सत्वं सत्वगुणः अक्रूरात्मत्वं वा आसनत्वेन यस्य॥ सत्वगुणात्त

॥ ॥ आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठसत्वं विवित्सवस्तत्वमतः परस्य कुमारमुख्या मुनयोन्वपृच्छन्॥ ३ ॥

एवं तामसः संहारकर्तृत्वात्तदपि प्रलयकाले इदानीं तु देवः सर्वोपास्य एव॥ संकर्षणत्वं च दृष्टदृश्ययोः सम्यक्कर्षणात्॥ अतः स ह
वर्षं सारं प्रयच्छतीति आद्यत्वं तेन भजनावश्यकत्वं पितृत्वादुपदेष्टृत्वं च संगच्छते॥ इदं तु ज्ञानिन एव ज्ञानंतीति श्रोतृत्वं सनकादीनां
मोक्षार्थमपि आश्रयमिवसेव्यः सम्यक्कर्षणं तत एव यतो निवर्त्तते॥ अस्य च रूपमग्रे निरूपयिष्यते॥ ननु सनकादीनां ज्ञानस्य वि
द्यमानत्वात्संकर्षणस्यानेकिमर्थं गता इत्याह॥ विवित्सव इति॥ अतः संकर्षणात्परस्य वासुदेवस्य तत्वं स्वरूपं विवित्सवः ज्ञातुमि
च्छवः कुमारमुख्याः सनकादयः॥ सनत्कुमारो मुख्यो येषां॥ मुनय इति संकर्षण एव ज्ञानाति सम नंतरो वासुदेवं ज्ञातुं नान्य इति ज्ञा
नयुक्ताः॥ अन्विति॥ ब्रह्मणा सह एव प्रष्टव्य इत्युक्ते तमनु अपृच्छन् ३ ॥ श्रीगोपालाय नमः ॥ ॥

प्रणम्यानंतरामि
तिकेचित्॥

यदि यतः परस्य तत्वं विवित्सवस्ताः हंस एवाक्षलेवेदात्मकः संकर्षणः शेषः प्रष्टव्यः तुल्केलं तिव्रलल्ण ते ब्रलो
णामनु ते पृच्छन्नित्यर्थः ॥ ३ ॥

ओ: सनकादयोपूर्णमनेकं संकर्षणंलेष्ठाते
तिज्ञानप्रधानत्वात्१=

न.सु.८ १०० यद्यपिब्रह्मज्ञानातितथापिसभक्तिमार्गप्रधानः सनकादींस्तध्यानमन्यतेअतःसंकर्षणमपिज्ञानप्रधानंमन्यमानस्तैर्ध्या
ह सस्संकर्षणः अभिमानाधिदैवत्वात्तत्तमभिमानोब्याप्नोतिअतःस्वस्यापिपरंवासुदेवंध्यायन्नेवसर्वदातिष्ठति यदावाध्या
यति तदातेगताइतितस्यध्यानावस्थांनिरूपयति॥त्वमेवधिष्ण्यमिति धिष्ण्यंध्यानमाश्रयंनत्वासनं॰वासुदेवाख्यंतंबहुमानयं
तंतस्यध्यानेक्रियमाणेध्याताहंयंध्येयंबहुमानयत्येवतस्यध्येयस्यस्वरूपमाह॰यंध्येयत्वेननिरूपितंलोकावासुदेवेतिवदंति॥
योध्येयत्वेननिरूपितः तमित्यर्थः॥वासुदेवइत्यभिधायस्यवस्तुतस्तुत्वस्यैवाश्रयभूतआत्मा॥लोकाःपरंशब्दांतरेणाप्यपदिशंति॥

त्वमेवधिष्ण्यंबहुमानयंतंयंवासुदेवाभिधमामनंति प्रत्यक्
धृताब्जांबुजकोशमीषदुन्मीलयंतंविबुधोदयाय ४ ॥

ननुध्यानारूढोबहिःसंवेदनाभावात्कथमुपदेष्टाभवतीत्यतआह॥प्रत्यग्धृतेति प्रत्यगात्मस्वरूपेमोधृतंअक्षि
येन कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरितिश्रुतेः यद्यप्यंतर्नीतंतेनचक्षुस्तथापिभगवान्कमलनयनइतितदं वक्ष्ये:२
बुजंजलाद्बहिर्दृश्यतएव तथाभगवानपिध्यानरूढोपिबहिःपश्यतीतिज्ञातव्यं॥किंच॥तदक्षिकमलस्यैवकोशरूपंको
शोहिमुकुलितपत्रात्मकोभवतितथायमपिनिमीलिताक्षःतथापिविबुधानामागतानांसनकादीनांउदयायअभ्युदयाय एम० १००
तानभ्युदितान्कर्तुंईषद्धिकचइवपश्यंतंकोशेनहिअर्द्धविकाशःसंभवति ४ ॥ श्रीगोपालायनमः ॥ ॥
कोश कं:११=
कमलचक्षुरिवे१=

तेपिब्रात्यतोपिमुक्त्वाभूत्वासमागताइत्याह॥स्वर्धुन्युदार्द्रैरिति अथवाभगवदीयशरीरस्पर्शात्स्वर्धुन्युदार्द्रैरितियावत्गंगा
जलेनार्द्रशरीरंतिष्ठतितावद्दैत्याक्रमणंनभवतीतिपातालेदैत्याधिक्यात्तत्स्पर्शाभावार्थंआर्द्राएवजटाः कृताःनशोषिता
श्च गंगाद्वारमार्गेणागताइतिकेचित् तथासतिसर्वार्द्राएवतेवक्तव्याः॥योगेश्वराणांगतिमाकुरितिन्यायेनयेनकेनापि
मार्गेणतेगंतुंशक्ताः॥स्वर्धुनीपदेलक्षणाचस्यात्॥अस्तुवातथैवअतिपाविव्यार्थं जटाःअसंस्कृतकेशाःतेषांकला
१५ पा॰कलकम् पैःसमूहैःसंकर्षणचरणोपधानंपीठंउपस्पर्शंतःअपष्ठत्रितिसंबंधः॥पूर्वंकृतनमस्काराअपिवासुदेवस्वरूपज्ञानार्थं

स्वर्धुन्युदार्द्रैःस्वजटाकलापैरुपस्पृशंतश्चरणोपधानं॥
पद्मंयदर्चंत्यहिराजकन्याःसप्रेमनानाबलिभिर्वरार्थाः ५

पुनःसाष्टांगनमस्कारंकृतवंतइत्यर्थः॥ननुस्वार्द्रजटाकलापैःतदुपस्पर्शेकोहेतुस्तत्राह॥पद्मंयदर्चंतीति॥अहिराज गंगाजलार्द्राणां
कन्यावासुकिकन्याःसप्रेमयथाभवतितथावरार्थाःसमःनानाबलिभिःनानापूजाप्रकारैर्यत्पद्ममर्चंति॥तेषांस्पर्शे सनकादीनां२
दोषायेतिकेचित्॥गंगापेक्षयापितच्चरणस्यैवप्रकृष्टत्वात्॥किंतुतदुपस्पर्शनेइष्टकामनासिद्ध्यतीतितदुपस्पर्श
नेहेतुरर्चंतीति॥महतामपिफलदानेतिस्विष्टसिद्धिःसूचिता॰कन्यात्वादेवनविकारांतरसंभावना॥कामितांतरकथना स
त्तनकाम्यत्वं॥अतःसर्वप्रकारेणनिर्दुष्टंसर्वकामप्रदंभगवंतंतमेवध्यायन्तत्स्वरूपंसमस्पृशन्तीतिसूचितं ५ संकर्षणेनिम्या:१
नागकन्येषु२= वासुदेवं:

Indira Gandhi National
Centre for the Arts

त॰ मु॰ ८
१०१

तेषां संकर्षणज्ञानपर्यंतं ज्ञानं सिद्धमिति ज्ञापयितुं वासुदेवज्ञानस्यात्यभीष्टत्वं विज्ञापयितुं तेऽस्मत्सुवंतीत्याह॥ मुकुंदेति॥ भक्त्युद्रेकान्मुकुंदस्मरणं। ज्ञाननिष्ठानां मनसा स्मरणं संभवतीति प्रेमोल्लासख्यापनार्थं वचसेत्युक्तं॥ ततोऽप्याधिक्याय स्खलत्पदेनेति यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति वाक्यात् वासुदेव इवास्मिन्नपि प्रेमाह अनुरागेण स्खलंति पदानि यस्मिन् कविवन्नूतनकल्पनयाऽस्तोत्रं निवारयति अस्य कृतानीति॥ अस्य संकर्षणस्य कृतानि चरित्राणि तत्प्रतिपादकवचसा गृणंत इति संबंधः॥ नूतनपरिचयं व्यावर्त्तयन् संकर्षणेन कृतानि तानि तेषामाह। तत्त्वज्ञा इति। संकर्षणस्य कृतं ज्ञानं तीति तथा॥ अन्यस्मै पूर्वोक्तलक्षणरहिताय भागवतं न वक्तव्यमिति तथोक्तं॥ तस्य संकर्षणस्य

मुकुंदेति गृणंतो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः किरी
टसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रं ६ ॥

तादृग्रूपांतरेणास्थितिं वारयति॥ आनुषंगिकदोषाभावात्। किरीटसाहस्रेति किरीटानां यत्साहस्रं सहस्रसमूहः तत्र ये मणिप्रवेकाः मणिपुत्तमाः तैः प्रद्योतिताः ये उद्दामाः फणाः तेषां सहस्रं यस्य। किरीटानामनादृत्य स्वार्थे साहस्रपदप्रयोगः॥ तेन नित्यनूतनानि किरीटानि भवंतीति ज्ञापितं। मणिपुत्तमैः प्रद्योतितत्वेन सहस्रफणदर्शनं स्पष्टं ज्ञापितं॥ अनेन दर्शनेनापि भयं निवारितं॥ गृणंती तत्वज्ञापनाय उद्दामेति प्रलयसाधकत्वात् कालांतरे तेषां सान्निवसंकोचः संभवति तदपि निषिध्यते॥ ए॰ म॰
तथाकरणं तत्रत्यानां आदीनां नैकधाभावाय॥ फणाशब्दो विकसितफणावाची फणानां आसहस्रमभिव्याप्य यस्येति वा ६ १०१

स्फुरणात्तु रुक ॥ द्वयोरिस्यमरकोशे॥ ? उद्दामकरणं :- दामबंधनमुद्गतिपर्यावशब्दः ललकार्यं प्रलयकाला भावेऽसंकोचं लं भगवतानिवि ... तइसमर्थः ॥

उत्कृ भगात्तं।
तत्र पाठे वै साक्षात्किंकसाहेक दृष्ट भगवतं पमिन्न वर्त्ततेद्वितिप्रतिश्रयनं वा मत अप्राद्वर

एवं श्रोतृवक्तृस्वरूपं निरूप्य प्रस्तुतमाह॥ प्रोक्तं किलेतदिति ननु स्ववक्ष्यमाणस्य भागवतस्य माहात्म्यज्ञापनार्थं किमिति तावदुच्यत इत्याशंक्याह। किलेति भगवत्तमेनेति निरुपाधिकभगवत्त्वं आवर्त्तयति अन्ये भयश्रोत्कर्षं चाह॥ अनेन तेनापि वासुदेवाद्ज्ञातमिति ज्ञापितं॥ अस्य श्रवणेऽधिकारमाह निवृत्तिधर्माभिरतायेति निवृत्तिधर्मे पारमहंस्यधर्मे अभिरतिर्यस्य॥ तेनं पूर्वोक्तेन सहस्रफणारूपेणैव उपदेशं कृतवानिति ज्ञापनार्थं पुनर्निर्देशः कृतः॥ सनत्कुमारायेति दुर्लभाधिकारित्वेन सनत्कुमारस्यैवोपदिष्टः अन्ये त्वानुषंगिकाः। तत्र हेतुः॥ निवृत्तिधर्माभिरतायेति पूर्वमुक्तं। ततः परंपरामाह॥ स चाहेति॥ सांख्यायनायैतदुक्तवान्॥ योगनिष्ठः सनत्कुमारः सांख्यनिष्ठायोक्तवान् सांख्ये व्यवहारेऽन्यथाभातीति तद्दर्थमाह ०प्रतिवृत्याघनं ?

संकर्षणोनत्वन्येनेस्य थः ४-

प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन। सनत्कुमाराय स चाह पृष्टः सांख्यायनायांग धृतव्रताय ७
सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाथ बृहस्पतेश्च ८

धृतव्रतायेति धृतानि व्रतानि येन॥ अंगेति संबोधनं तथाधिकार एव तेषिध्यतीति विदुरस्यापि तथात्वाय ७ सांख्यायनस्तु पराशरं भक्तं मत्वा तस्मै प्रसंगादुक्तवानिति स्वगुरोरधिककथनार्थमाह॥ सांख्यायन इति॥ स हि पारमहंस्यधर्मे मुख्यः परमहंसानां श्रवणकीर्त्तनमावश्यकं॥ अतो भगवद्विभूतीर्विवक्षमाणः वक्तुमिच्छन् अन्विताय मिलिताय अस्मद्गुरवे पराशराय जगाद॥ अन्वितो योग्यो वा॥ अथ भिन्नप्रक्रमेण बृहस्पतेः स्थानंगत्वात्तस्मै चोक्तवान्॥ बृहस्पतेरत्र निरूपणं देवलोके भागवतप्रचारार्थं॥ ब्रह्मा सनकादयश्च उपरितनलोकेषु संत्येव॥ ध्रुवपर्यंतं बृहस्पतिः॥ भूमौ पराशरः॥ पाताले संकर्षण एवास्ति॥ अतश्चतुर्दशभुवनेषु भगवच्चरित्रं भागवतं व्याप्तमस्तीत्युक्तं ८ ॥

Indira Gandhi National
Centre for the Arts

भागवत॥८८॥१

तपु ८
१०२ पराशरद्वारेणप्रचारमाह॥प्रोवाचेति॥मर्त्यमैत्रेयाय दयालुरितिस्वस्यतथाधिकाराभावउक्तः॥मुनिरिति॥अग्रेप्रचरणज्ञान
वानसइतिप्रसिद्धःपराशरः॥यःसप्तवार्षिकोपिमार्कंडेयापेक्षयापिवयसाहृद्गोगर्भेचवेदाध्येतापूर्णज्ञानःपुलस्त्येनउक्तः
पुराणंवक्तव्यमित्याज्ञप्तःपराशरःस्वपितरंशक्तिंराक्षसभक्षितंश्रुत्वाराक्षससत्रेसर्वाणिवरक्षांसिहुतवान् अतःस्ववंश
रक्षार्थंपुलस्त्यःसमागत्यराक्षससत्रनिवृत्त्यर्थंसप्रार्थयत्॥ततोनिवृत्तायपराशरायवरोदत्तःपुराणाचार्योभवेति॥अन्य
थाअनधिकृतःपुराणंवक्तुंनशक्नुयात्॥ततउक्तंपुलस्त्येनोक्तइति॥आद्यंभागवतं॥पुराणप्रवृत्तौप्रथमोत्पन्नायब्र

प्रोवाचमत्यंसदयालुरुक्तोमुनिःपुलस्त्येनपुराणमाद्यं सो
हंतवैतत्कथयामिवत्सश्रद्धालवेनित्यमनुव्रताय ९ ॥

ह्मणेभगवताप्रथमतएवोक्तं विष्णुपुराणंतुभागवतसंबंधिप्रमेयमेव॥वेदव्यासेनशास्त्राभेदेनैवतद्विष्णुपुराणेमैत्रे
यपराशरसंवादकथानिरूपितातत्त्वाद्वृत्त्यर्थमाद्यमित्युक्तं॥अन्यथाविष्णुपुराणेनेयंपरंपरानिरूपिता॥सोहंगुरु
कृपानुगृहीतस्तवश्रोतृसंबंधित्वेनएतद्भागवतंकथयामि॥वर्त्तमानसामीप्येवर्त्तमानप्रयोगः॥वत्सेतिस्नेहःकथ
नेहेतुः॥भगवदाज्ञानुतावन्मात्रस्व॥मर्यादारक्षार्थंअधिकारेविशेषणद्वयमाह॥श्रद्धालवेनित्यमनुव्रतायेति॥ एम०
श्रद्धामुख्याधिकारःनित्यंचानुव्रतत्वं इच्छानुरूपनिरंतरंसेवाअंतर्बहिरधिकारहेतूश्रद्धासेवे ९ ॥ १०२

भागवतसानमाजेए:२= \पुलस्त्यात्पराशरस्ततोहंमत्तस्त्वमि।तउच्यमानातेनस्यादिसर्प।१=

एवंपरंपरांप्रतिज्ञांचोक्त्वापुराणमारभते॥ ॥उदप्लुतमिति पुराणंहिदशलीलायुक्तं॥तत्रादौसर्गोवक्तव्यः।सचभागवतइति
त्वाद्भगवत्कृतः॥तत्रतत्स्रष्टानामर्थानांब्रह्मकल्पेअभावात्कल्पांतरानुसारेणवक्तव्यं॥यद्भगवतेवक्तृतंतच्चरित्रंपद्मकल्पेवर्त्त
तइतितन्निरूपणार्थंपूर्वकल्पस्यप्रलयानंतरस्थितिमनुवदति उदकेनप्लुतंसर्वमेवविश्वमासीदिति॥बहुविधाहिप्रलयाः
तामसेषुकल्पेषुतामसानिभूतानिदृश्यंते अग्रिमसृष्ट्यर्थंएतत्सेषुतुप्रलयजलेननिमग्नानिभवंतिसात्विकेषुतुस्थिताएवपदा
र्थाःएकदेशेननिहताः अवशिष्यंतएव॥यद्यग्रेपिसात्विकएवकल्पोभवति॥तत्रपद्मकल्पात्पूर्वकल्पोराजसइतिउदप्लुतमित्युक्तं॥
इदंविश्वंपूर्वंउदप्लुतमासीत्॥इदमितिसर्वदाविश्वमेकविधमेवेतिप्रवाहानादित्वंनिरूपितं तदेतिपूर्वप्रलये॥तस्यप्र
लयस्यनिमित्तमाह यन्निद्रयेति॥यद्यदानिद्रयाभगवच्छक्त्याअलुप्तज्ञानशक्तिरेवअमीलितदृक्न्यमीलयत् अक्षिनिमील
नंकृतवान्निमीलिताक्षोजागर्त्तीत्यर्थः॥ननुदेवस्थितोकोगुणइत्याशंक्याह स्वात्मरतोकृतरूपणइति कदाचिद्रमतेस्वस्मिन्न

उदप्लुतंविश्वमिदंतदासीद्यन्निद्रयामीलितदृङ्न्यमीलयत्॥अहींद्रतल्पेधिशयानएकःकृतक्षणःस्वात्मर
तोनिरीहः १० ॥

पंचेपिकचित्सुखमितिसृष्टिप्रलयकरणेनिमित्तमुक्तं॥आत्मरतोआत्मनिक्रीडायांस्वरूपानंदर॥
मणे।स्वरूपानंदःपूर्णानंदःअक्षरानंदस्तुलक्ष्मीरूपःपूर्वंनिरूपितः।सचभगवान्व्यापिवैकुंठेपिकदाचिल्लक्ष्म्यासहक्रीडतिक
दाचित्स्वानंदमेवानुभवति॥बीजधर्मएवसर्वत्रकार्यपरंपरायांआब्रह्मस्तंबपर्यंतं॥तथाप्यंशकार्येषुयादृशमेववहीम
रणंतादृशमेवांतररमणंक्रीडाबहीरमणेअभिवृद्धिकरीज्ञानंत्वंतः।अन्योन्यबाधकत्वंच॥सर्वेहोपरतिरेवआत्मानंदानुभ
वेअंगंतदाह।निरीहइति॥सर्वचेष्टारहितः॥यथापुरुषत्वेतुल्येपिरंकमहाराजयोःबहिर्भोगातिशयःतथात्मन्यपीतियावदेव
त्मत्वेनजानातितावदेवात्मसुखंवर्द्धते।यथायथापरिच्छिन्नत्वंतथातथाल्पोभवति।इदमेवभगवानसृष्टिप्रलयाभ्यांबोधय
ति एकइति॥तत्सुखमखंडमेकेनैवानुभूयते॥क्रीडायांसपत्न्याहतल्पंअधिकार[illegible]
र्थअहींद्रतल्पेशेषपर्यंके॥सहिभगवच्छ्वासोत्थवायुपानेनप्रतिक्षणंतुंगःकोमलश्चभवति॥अतएवबहुकालंशयानो

शेष:१=

तम्‌० ८ १०२ तदग्रेस्थितिर्न स्यादित्याशंक्याह सोंतरिति शरीरं त्वानंदमयमिति पूर्वं निरूपितं॥ सदानंदमयं वा॥ सच्चिदानंदरूपमिति वस्तुस्थि
तिः॥ पुरुषस्य सद्व्यांशमध्ये ज्ञानं आनंदस्तु तः स्त्रियास्तु विपरीतं॥ तस्याः सत्वमेव रतिः न त्वानंदे काचिदपि॥ अतः सांख्ययोगज्ञा
नाधिकार एव तस्याः॥ बहिर्भक्तिश्च॥ पुरुषस्य तु विपरीतं॥ आनंदानुभवस्त्वांतर एव युक्तः न बाह्योभेदकरणप्रसंगात्॥ आनं
दस्यस्वस्थानत्यागाच्च॥ न तादृशानंदोऽनुभवयोग्यः॥ भगवत्यपितया॥ बीजत्वात्तत्सहिभावस्थिषु परिवर्त्तते इति सच्चिदानंदेषु आनंदस्य:४
नैकत्रैवस्थितिः॥ अन्यथा तादृग्रूपवैयर्थ्यापत्तेः॥ अनुसूतस्तु तदात्मक एव नित्यसिद्धः॥ अतः सतिरमणे अक्रूरणं दृष्टयं
अंतर्बहीरमणं? कृकृत्यलस्याप्सहरमते॥ चितिरमणे सदानंदो तस्यां तद्बहिर्निधाय बाह्याभ्यंतरभेदेन रमते॥ तत्र प्रपंचो वेदाश्च रमण
साधनं स्वकृतप्रपंचे त्वेतदुभयं करोतीति ते कल्पप्रलयाइत्युच्यंते॥ तत्राधिकारिणः कालस्य नियामकत्वात् भगवदेकसंभो

सोंतःशरीरेर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः उवास तस्मिन् सलिले पदे स्वे यथानलो दा
रुणि रुद्धवीर्यः ११

ग्यांपादकत्वाच्च अंशानां भोगो मा भवत्विति तद्विषयानंतः प्रवेशयतीति तदाह॥ अंतः शरीरे
अर्पितानि भूतसूक्ष्माणि येनेति॥ चिदंशान् सर्वान् वयथास्थं स्थापयित्वा स्वात्मानुभवं करोतीति तेषामतिक्रमनिवृत्त्य
र्थं कालात्मिकां शक्तिं संहारिकां उदीरयाणः अलीनां कुर्वाणः प्रेरयमाणः तस्मिन् सलिले स्वे पदे नारायणस्य स्थानभूते
तस्मिन् पूर्वोक्ते वा उवास स्थितः॥ अयमंशः पूर्वोक्ताद्विशेषः॥ अवांतरकल्पत्वात्॥ अल्पप्रयत्नव्यापारेण नामनिर्वर्ति
काच्च सलिलानुग्रहः॥ अतो सदाद्दिः स्वसच्चिदानंदांशेषु रमणे शीघ्रं य रमपुरुषार्थपर्यवसानाभावात् कारणे सतिरति
कुर्वीत॥ ननु बहिःस्थितानां पदार्थानां अंतः स्थापितत्वात् कालस्य च विद्यमानत्वात् सर्वं जगत् बहिरागच्छेत् तत्राह॥ एम० १०२
यथानलो दारुणि रुद्धवीर्य इति॥ कारणे तादृशं रूपमलीनित्त्वापयितुं कार्ये तादृशं रूपं दृष्टांतीकृतं॥ यथा तस्य दाह
कशक्तिर्निरुद्धा॥ तथा कालादीनामपि स्वस्यापि शक्तिर्निरुद्धा ११

एवं कियत्कालं स्थित इत्याह॥ चतुर्युगानामिति॥ चतुर्युगानां स्वरूपमग्रे निरूपणीयं॥ तेषां सहस्रात्मको ब्रह्मणो दिनं भ
वति तावत्येव निशेति तावत्कालं शयनं चकार तत्संध्यांशयोर्ग्रहणं॥ अन्यथा संख्या निवृत्त्यर्थं च। कालशक्त्याः पर्वद्व
यस्य विद्यमानत्वात् प्रथमपर्वातिक्रम्य यदैव सा द्वितीये पर्वणि समायाति तदैवानंदतिरोधानार्थं ज्ञानशक्तिमुद्भावयति॥
अतिक्रमणज्ञापनार्थं वा॥ अत एवास्मिन् कल्पे जीवद्वारैव भोगः अतो भगवान् स्वपन्नेव स्वकीयया प्रामाणिकया स्व
नेवोदीरितया विद्यारूपया स्वशक्त्या न तु भिन्नया स्थितकालेन॥ कदाचिद्भगवदिच्छया सोऽप्यंतः प्रविश्य तथा कुर्या

चतुर्युगानां च सहस्रमप्सु स्वपन् स्वयोदीरितया स्वशक्त्या कालाख्य
यासादितकर्मतंत्रो लोकानपीतान् ददृशे स्वदेहे १२ ॥

त्ततश्च तस्या नियतत्वात् कालातिक्रमो भवेत्॥ कालाधीनस्य सृष्टिश्चेयं न भवेत् शक्त्युत्तरणमप्युद्बोधप्रसंगात् अतो भगवदि
च्छानुसारेण स्वशक्त्यैव कालाख्यया आसादितमुपस्थापितं लोकानां तंत्रं करणसाधनं यस्य॥ चिति आगमनमात्रेणैव विषयं
करणसाधनं चोपस्थापितवतीत्यर्थः॥ तदा अपीतान् मुक्तान् लोकान् जनान् स्वदेहे ददृशे वासनाविषये संबद्धान्
स्वांशेन भगवति चिति प्रविष्टान् स्वस्मिन् विद्यमानमंशं तत्र प्रवेशयितुं ददृशे तदा सदंशमध्ये सर्वोपि चिदंशः पिंडीभूतः
॥ १२ ॥

Indira Gandhi National Centre for the Arts

त·सु·८
१०४

तस्योद्गममाह॥ तस्यार्थेति॥ तस्य भगवतः अर्थसूक्ष्मे जीवानामुपभोग्यसूक्ष्मे अभिनिविष्टदृष्टेः सतस्तस्यांतर्गतोर्थः चिज्जडात्मकोऽभूत् तस्य तनीयान् सूक्ष्मरूपो जातः॥ अरूपस्य सूक्ष्मरूपं महान् विशेषस्तद्दपि रजोगुणेनैव न तु भगवता अन्यथा पुरुष इव भगवद्रूपतास्यात्॥ तदनंतरं तत्सत्त्वेनैव रजसा कालानुगतेन विद्धः सन् सूष्यन् प्रसवं प्राप्नुवन् तदा नाभिदेशादभिद्यत नाभिदेशं भित्त्वा निर्गतः॥ किंतु अतिसूक्ष्मत्वात् आकाशशरीरत्वाच्च तस्माद्देशात् सजीवपदार्थत्वात्

तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोर्थो रजसा तनीयान् गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् १३ स पद्मकोशः सहसोदतिष्ठत् कालेन कर्मप्रतिबोधनेन स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः॥ १४॥

प्रसवप्रकारेण निर्गत इत्यर्थः १३ निर्गतस्य स्वरूपमाह॥ स पद्मकोश इति नारायणस्तु जलात्मक इति जलकार्यं सूक्ष्मं पद्मकोशमेव तत उदतिष्ठत् सहसेति विकाशमंतरेणैव॥ तदा तस्मिन् बहिः स्थितः कालः कर्म च प्राणिनां संबद्धं कोशोत्पत्त्या प्रबुद्धं॥ कर्म बहिः स्थितं कालमंतः प्रवेशितमिति कालेनैव केवलेन अग्रिमकार्यं कृतमित्याह कालेनेति स्वरोचिषा स्वस्य तेजोरूपेण॥ कालस्याग्निरूपत्वात् प्रकाशकं रूपं तस्य गृहीतं विशालमेव तत्सलिलं विद्योतयन्नेव जलेन प्रकाशनयोर्विशालत्वाभावात्॥ अर्क इव॥ तथा सामर्थ्याय॥ आत्मा भगवानेव योनिः कारणं यस्य स उदतिष्ठदिति एम० संबंधः १४॥ १०४

सहसा निर्गतत्वात् तद्विकाशार्थं स एव भगवांस्तत्र प्रविष्ट इत्याह॥ कारणप्रवेशनव्यतिरेकेण पुनस्तस्य निःसारस्य कार्योपयोगो न भविष्यतीति नारायणप्रवेशः॥ उ इति कोमलसंबोधने॥ पूर्वं नारायणोपि तत्र प्रवेशात् विष्णुर्जातः॥ विष्णुव्याप्ताविति वा॥ पूर्वमेव तत्र स्थितः तत्राभिव्यक्तो जात इत्यर्थः॥ तत्र हेतुः॥ सर्वगुणानामवभासो यत्र॥ भगवद्गुणानां सर्वेषामतिर्मजककार्यरूपाभिव्यक्तिस्थानत्वात्॥ भगवत्सहिता एव सर्वगुणाभासं तामिति एतदर्थं भगवत्प्रवेश इत्यर्थः॥ अयं पद्मकल्पे विशेषः॥ तत्र सर्वे जीवाः एकीभूताः समष्ट्यात्मिकाः संतः एकरूपेण प्रादुर्भूता इत्याह तस्मिन् स्वयमिति॥ स्वयं भगवान् अत्र चितो भेदाभावात्॥ तत्राप्युभयक्रीडार्थं वेदमयो विधाते त्युक्तं॥ वेदमयत्वात् आत्मरमणं विधानत्वात् बहिश्च रमणमिति। तस्योद्गतस्य नामाह स्वयं

तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासं॥ तस्मिन् स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदंति सोभूत १५ तस्यां स चांभोरुहकर्णिकायां अवस्थितो लोकमपश्यमानः॥ परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि १६

भुवमिति॥ तत्रत्यालोकास्तस्य पितरमदृष्ट्वा स्वयमेव ब्रह्मा जात इति स्वयंभुवमाहुः॥ एवं लोकैः स्वयंभूत्वेन निरुक्तः अभूत्॥ ततो यज्जातं तदाह॥ तस्यामिति॥ पूर्वोक्तकमल एव स्वयमपि पूर्वोक्त एव भगवत्प्रवेशेन विकसिते कमले कर्णिकायामवस्थितः स्वातिरिक्तं लोकमपश्यमानः॥ जनात्मकाः स्वस्मिन्नेव लोकात्मका स्तु कमले॥ तदुभयविमर्शाभावात् लोकादर्शनं॥ ततो यथा दर्शनं कृतवानित्याह परिक्रमन्निति॥ परितः आक्रमन् शिरः प्रसारयन्॥ व्योम्नीत्युपरिभागे॥ पूर्वमेव पिंडस्योत्पन्नत्वात्॥ विवृत्तनेत्रः प्रसारितनयनो भूत्वाय मेव भागं न पश्यति तत्रैव लोको भविष्यतीति बुध्या सर्वत्र मुखेच्छायां सर्वगुणावभासस्य प्रतिष्ठितत्वात् अनुदिशं च त्वारि मुखानि लेभे तदा चतुर्मुखो ब्रह्मा जात इत्यर्थः १६॥

Indira Gandhi National
Centre for the Arts

त.सु.० ८ १०५ एवंमुखचतुष्टयेनापिसर्वाएवदिशःपश्यन्यदालोकंनदृष्टवान्तदाभयंचिंताचजातेत्यभिप्रायेणाह॥तस्मादिति॥यु
गांतेयःश्वसनोवायुस्तेनावघूर्णितंयज्जलंततउत्पन्नायेऊर्मयः तेषांचक्रंयस्मिन्तादृशात्सलिलात्विशेषेणारूढं
कमलमपाश्रितइतिभयकारणं॥सलिलमत्रनित्यं॥जलंकृत्रिमं॥वायुनाचजलमेवदोलायितंअतस्तस्यचक्रंसलि

तस्माद्युगांतश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढं अ
पाश्रितःकंजमुंलोकतंत्रंनात्मानमद्धाविददादिदेवः १७ ॥

लेवर्त्तत इतिनपौनरुक्त्यं॥विरूढमितिनित्यसलिलादुत्पन्नत्वात्नमज्जनंनापिनालभंगः।अपाश्रितइतिअस्थि
रमनः॥अतएवकमलविचारेआत्मविचारेवाबुद्धिर्नप्रसृता॥लोकानांतंत्रंदेहादिसर्वसामग्रीयत्रएतादृशंक एम० 
मलमात्मानंचउभयमपिअद्धासाक्षात्आदिदेवोपिभूत्वापूर्वज्ञानादिसंपन्नोपिनाविदत्नज्ञातवान् १७ ॥ १०५

तदापूर्ववासनयातत्रजिज्ञासोत्पन्नेत्याह कएषइति योहंएषकः जिज्ञासायांआत्मविचारेप्रवृत्तइतिपूर्वंविचारप्रारंभेयो
विचारकत्वेनप्रतिभातःसएवविचारदशायांभिन्नतयाप्रतीतइतिएषइत्युक्तं स्वस्यस्वरूपाज्ञानात्कइतिप्रश्नः यत्रच
अब्जपृष्ठे अहंएतदब्जंकुतोजातमिति ननुजलेकमलंभवत्येवकिमाश्चर्यमित्यतआह अनप्स्विति अप्स्वितिबद्ध
ग्रंथसं.१४ जलसंबंधः तादृशेचकमलंनभवति किंचैतन्निर्मूलंनभवति अतोयत्रैतदधिष्ठितंअधिष्ठायस्थितंतेनसता
भाव्यं असतःअधिष्ठानाभावात् अतःअस्यकमलस्यअधस्तात्किंचिदस्तिकिंचनेतिकिंचिदर्थएतत्कमलमधिष्ठि

कएषयोसावहमब्जपृष्ठएतत्कुतोवाब्जमनन्यदप्सु अस्तिह्यधस्तादिहकिंचनैतदअ
धिष्ठितंयत्रसतानुभाव्यं १८ सइत्यमुद्वीक्ष्यतदब्जनालनाडीभिरंतर्जलमाविवेश ना
र्वाग्गतस्तत्खरनालनालनाभिंविचिन्वंस्तदविंदताजः १९ ॥ श्रीगोपालयनमः ॥

तंयत्र एवमनुमानेननैयायिकवदेतावत्ज्ञानंजातं॥ततस्तेनज्ञानेनतर्कसहकृतेनपदार्थंविनिश्चित्यपुरुषोहंममच
जननाधारात्मकंकमलंकेवलमचेतनादुत्पत्तिंनार्हतीतिकश्चिन्मत्पितावर्त्ततेअधस्तात्तमन्वेषयिष्यामीतिनिश्चित्य
सूक्ष्मंरूपंकृत्वातस्याब्जस्यनाडीरंध्रेषुप्रविष्टोंतर्जलमाविवेशतथाप्यधोभागंनप्राप्नवानित्याह नार्वाग्गतइति तस्य
खरनालस्यकमलस्ययन्नालंतेनतन्मूलभूतांनाभिंविचिन्वन्नपितत्तदाअजोपिब्रह्मापिसन्नाविंदत अथवातन्नाल
मेवाविंदत यतोयमजःबहिर्मुखः १९ ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰८ १०६

तदायज्ञातंतदाह॥ ॥तमस्यपारइति विदुरेतिसंबोधनंमहतामप्यज्ञानमितिसूचयति अपारेतमसीतिआलोकाभा
वात्दूरदृत्वानं आत्मसर्गंस्वपितुरंविचिन्वतोमहान्कालोजातइत्याह॥त्रिणेमिरिति चक्रत्वात्तस्यएवृत्तिः शीघ्र
मेवभवति शीतातपवर्षाकालोनेमयोयस्यसः॥कियान्कालोजातइत्याकांक्षायामाह योदेहभाजामिति शतसं
वत्सरात्मकःसकालः शतायुर्वैपुरुषइतिश्रुतेः शतवर्षानंतरंदेहभाजामवश्यंभयंभवति तस्यकालस्यमरणज

तमस्यपारेविदुरात्मसर्गंविचिन्वतोऽभूत्सुमहांस्त्रिणेमिः योदेहभाजांभयमीरया
णःपरिक्षिणोत्यायुरजस्यहेति २० ततोनिवृत्तोऽप्रतिलब्धकामःस्वधिष्ण्यमा
साद्यपुनःसदेवः शनैर्जितश्वासनिवृत्तचित्तोन्यषीददारूढसमाधियोगः २१ ॥

नकत्वात्तत्रहेतुमाह॥अजस्यापिआयुर्हेतिःकालचक्रंयतःपरिक्षिणोति॥तस्यअन्येषांदेहभाजांभयजननेकःसंदेह
इत्यर्थः २० अतःस्वस्यापिप्रथममरणमाशंक्यततोनिवृत्तइत्याह॥ततइति अप्रतिलब्धकामएवततोनिवृत्यपुनःस्वधि
ष्ण्यमास्थायज्ञानसहितोभूत्वादेवोजातः॥ततःशनैर्जितश्वासेननिवृत्तचित्तोभूत्वान्यषीदत्स्थिरतयाउपविष्टः ततः एम॰
आरूढःसमाधिपर्यंतंयोगोयेनयोगेनचित्तैकाग्र्यंविधायतमेवार्थमचिंतयदित्यर्थः २१ ॥श्रीकृष्णायनमः॥ १०६

एतादृशोयोगोपिबहुकालंकृतइत्याह कालेनेति पुरुषायुषाअभिप्रवृद्धोयोगोयस्मिन्तेनकालेनविरूढ
बोधोजातः॥विशेषेणारूढःस्थितोबोधोयस्य तदास्वयमेवभगवंतमपश्यदित्याह स्वयमिति पूर्वंप्रयत्नेनापि
नदृष्टः इदानींचित्तेशुद्धेभगवान्स्वयमेवमायाजवनिकांदूरीकृत्यब्रह्मणोहृदयेभातः॥पूर्वंमानसपरिकल्पितमूर्
त्तिर्वैलक्षण्यमाह यंचपूर्वंकदाचिदपिनापश्यत् यद्यपिहृदयेब्रह्मकल्पेभगवान्दृष्टः वैकुंठस्थितःप्रति

कालेनसोऽजःपुरुषायुषाभिप्रवृद्धयोगेनविरूढबोधः स्व
यंतदंतर्हृदयेवभातंअपश्यतापश्यतयंनपूर्वं २२

ब्रह्मा
कल्पंचपश्यतिअन्यथास्यस्थितिसामर्थ्यंनभवेत्॥तथापिनैवंविधःकदापिदृष्टः॥नहित्वमनसिभातेभगवतितन्ना
भिकमलेस्वयंस्थातुमर्हति नवानालेअधस्ताद्दिग्यमानेअच्छिन्ननालःअंतःप्रविशति नवाकदाचित्स्वस्यांतर्हृ
दयेप्रसन्नोभूत्वासमागतःशेते अतोयन्नपूर्वंकदाचिदपिदृष्टमितियदुक्तंतद्युक्तमेव २२ ॥

Indira Gandhi National
Centre for the Arts

त॰पु॰८
१०७

अपूर्वरूपंतदनुवर्णयति॥स्वच्छपयोगित्वात्त्रिभिः॥अवस्थामुपमानंचस्वरूपंचत्रिभिः क्रमात्॥शास्त्रप्रत्यक्षभेदेनफलसाधनमेवच सर्वतत्वाश्रयेणापिसर्वसौंदर्यमेवच एवंषड्गुणमाहात्म्यमेकरूपेणवर्णितं पुनर्गुणानांप्राधान्याद्उपमारूपतत्वभिः॥तस्यब्रह्मत्वसंसिद्धौतज्ज्ञानेसर्वबोधनंततोयुक्तंयदेवात्रतदंत्येननिरूप्यते तत्रभगवंतंप्रथममवस्थावत्वेनदृश्यमनुवर्णयति मृणालेति मृणालवद्गौरः आयतोयः शेषभोगः शेषस्यशरीरंतदेवपर्यंकः तस्मिन्नेकएवपुरुषःशेते महदेतदाश्चर्यंयत्सर्पशय्यायांशेतइति किंच फणातपत्राणांयदयुतंअमेलनंतत्सहितोयोमूर्द्धातत्रयानिरत्नानितेषांद्युभिःहतंध्वांतंयत्र एतादृशेयुगांततोयेप्रलयसमुद्रेशेषपर्यंके॥तस्यैवशेषस्येफणाः

मृणालगौरायतशेषभोगपर्यंकएकंपुरुषंशयानं॥फणा
तपत्रांचितमूर्द्धरत्नद्युभिर्हतध्वांतयुगांततोये २३ ॥

तएवविकसिताःसंतः आतपत्रप्रायाभवंतितेचपुनःकमलपत्रवत्तनपौर्वापर्येणमिलिताः॥तत्रफणानांअधोभागेदेवतात्वसिद्धयेसर्वत्रैवमूर्द्धावर्त्तते॥फणानांशोभार्थाः॥तेवामूर्द्धानः अयुताः तत्रसर्वत्रैवमणयुत्तमाः संतितैरेवतत्रत्योंधकारःसर्वएवगच्छति॥ अतः स्पष्टोभगवान्दृश्यते॥ब्रह्मणोहिबुद्धिर्बहिःप्रकटानत्वंतः अतोभगवानपिबहिरेवप्रम एम॰
टः बुद्धिनिरूपकत्वादध्यायस्य भगवतोऽलौकिकप्रभावाज्ज्ञानात्भगवत्तेजसानांधकारनिवृत्तिः किंतुप्रमाणतोज्ञा १०७
नात् शेषशिरोमणिभिरेव २३ ॥ ॥

हेतुज्ञानदृष्टिदूरीकरणंनवकं पं १ :
तस्य बुद्धौलोकवत्प्रतिभातमितिलौकिकोपमाभगवतिवर्ण्यते॥प्रेक्षामिति कीदृशंददर्शेतिसर्वत्राकांक्षा हरितोपलाद्रेःप्रेक्षांक्षिपंतं हरिन्मणिपर्वतःकश्चित्क्षीरसमुद्रेवर्त्ततेतथाशेषपर्यंकेभगवान् अतएवशेषस्यमृणालतुल्यताश्वेतपचिह्नाणांतीनांशुक्लरूपाश्रितानांतत्रैवसत्वात् प्रेक्षादृष्टिः तुल्योहितुल्यविषयिकींदृष्टिंदूरीकरोति ननुभगवत्वेनतत्रवक्तव्यंसर्वप्रेक्षामेवक्षिपतीति तत्रकोवाहरितोपलानामद्रिः।ननुयुक्तमेवतत्प्रेक्षाक्षेपणंअनलंकृतःसःभगवानलंकृतइतितत्राह संध्याभ्रनीवेरिति संध्याकालीनानिअभ्राणिमेघाः पीतरक्ताः तेनीवीक

प्रेक्षांक्षिपंतंहरितोपलाद्रेःसंध्याभ्रनीवेरुरुरुक्ममूर्द्ध्नः रत्नो
दधारौषधिसौमनसवनस्त्रजोवेणुभुजांघ्रिपांघ्रेः ॥ २४ ॥

टिवस्त्रंपीतांबरंयस्य॥उरूणिरुक्माणिसुवर्णानिमुकुटरूपाणिमूर्द्धसुयस्य किंचरत्नानिपभरणगारीन्येवोदधाराः जलप्रवाहाः औषधवनस्याः एत्रौतेजोवत्पःसौमनसंसुमनसांसमूहःवनानिचतेषांमालायस्य पंचवर्णाहिभगवन्मालायथेंद्रधनुषोमध्येवर्णाःभवंति॥रत्नानामेकामाला आरक्तारत्नमालेव उदधाराणांमालामुक्ताहारइव औषधीनांमालाअलौकिकदिव्यरत्नकांतिमालेवदीपसदृशमणिमालेववा पुष्पमालेववनमालातुलसीमालेवाकिंचवेणवएवभुजाः अंघ्रियाएवअंघ्रयोयस्य वेणुभुजश्चासौअंघ्रिपांघ्रिश्च २४

Indira Gandhi National
Centre for the Arts

त्व·मु·८ स्वरूपमाह आयामइति आयामोदैर्घ्यंविस्तारःविशालता लोकानांत्रयाणांसंग्रहोयत्रएतादृशंस्वस्यशरीरमा
१०८ नं यावताविस्तारेणदैर्घ्येणचपरिकल्प्यमानेनलोकत्रयंतत्रतिष्ठतितादृशेनदेहेनउपलक्षितंभगवंतमित्यर्थः॥किं
चविचित्राणिदिव्यानिआभरणानिअंशुकानिचयस्यतेषांसंबंधिन्यातैरेवकृतयायाश्रितःसर्वत्रतेजःपुंजवत्परिव

आयामतोविस्तरतःस्वमानदेहेनलोकत्रयसंग्रहेण विचित्र
दिव्याभरणांशुकानांकृतश्रियापाश्रितवेषदेहं २५ ॥

र्त्तमानोवेषःआकृतिविशेषोयस्यतादृशोदेहोयस्येति भगवतोरूपंसच्चिदानंदरूपमितिज्ञापकंत्रैलोक्याश्रय एम०
त्वं॥आभरणादिभिःक्रियमाणशोभाभगवद्वेषमेवाश्रयतेनत्वाभरणैर्भगवद्वेषेशोभाभवति आभरणानामा १०८
भरणत्वंचभगवद्धर्मः २५ एमनामगतेरी ॥

शाख्न१
परोक्तयामार्गानुसारेणभक्तानांफलदानंस्वोपयोगाभावात्ब्रह्मधर्मएवेतितमाह पुंसामिति स्वकामायस्वाभिलाषसि
द्ध्यर्थंविविक्तमार्गैःअन्योन्यम्मिश्रितरहितैःलोकातीतैर्वाएकांतप्रकारैर्वायेअभ्यर्चयंतितेषांकामदुघंयत्अंघ्रिपद्मंतत्तेषा
मर्थेप्रदर्शयंतं पुनःकथंभूतमंघ्रिपद्ममित्याकांक्षायामाह नखेंदुमयूखभिन्नांगुलिचारुपत्रमिति॥नखान्येवइंदवः
अंगुलिदृष्टान्ति २ तेषांमयूखैःभिन्नाःसर्वदेहविलक्षणायाअंगुलयःताएवचारूणिपत्राणियस्य।स्वभावतःपादपद्मंविकसितं नखाना
मिंदुत्वेनपत्राणिप्रत्येकसंकुचितानिपरितः इंदुरश्मिर्यंनत्वग्रतःकमलपत्राणिचंद्रकिरणैःसंकुचितानिभवंतितिर्य
क्संकुचितानिच तेनालौकिकत्वात्हृदयांधकारमलौकिकमपिनाशयंति चरणस्यपद्मतायांहेतुरप्युक्तोभवति॥स नखानिअंघ्रिपल्लवर्त्त
पुंसांस्वकामायविविक्तमार्गैःअभ्यर्चतांकामदुघांघ्रिपद्मं॥प्रदर्शयंतंकृपयानखेंदुमयूखभिन्नांगुलिचारु मानानीदवेदर्थः १
पत्रं २६ मुखेनलोकार्तिहरस्मितेनपरिस्फुरत्कुंडलमंडितेन शोणायितेनाधरबिंबभासाप्रत्यर्हयंतंसुनसेन·
र्वदेहवैलक्षण्यात्भक्तिमार्गःसर्वेभ्यउत्तमइत्युक्तंभवति॥भक्तिरेवखलुतत्रफलेतिस्वयंफलमद २२सुभ्रु २७
त्वात्तेषांकामनापूर्त्त्येदुःखाभावायचतदुपास्यंचरणमेवप्रदर्शयति २६ एवंमार्गेणभजतांफलमुक्त्वाप्रत्यक्षेणभ
जतांफलमाह॥मुखेनेति॥मुखेनप्रत्यर्हयंतंयेपूजांकुर्वंतितान्प्रतिपूजयंतं॥येयथामांप्रपद्यंतइतिवाक्यात्॥ननु
तेस्वकीयेनसर्वस्वेनापिभगवंतंपूजयंतिभगवांस्तुकथंतान्पूजयतीत्याशंक्यभगवतिषड्गुणाःसंतितद्युक्तेनमुखेन
तान्पूजयति॥तेषुमुखधर्मान्सर्वानेवयोजयति॥ तत्रमुखेषड्धर्मान्षड्भिर्विशेषणैःसंपादयति॥लोकार्तिहरस्मि
तेनेत्यादिभिः॥भगवतोमुखस्यगुणद्वयंसर्वोपकारि॥चतुष्टयंभक्तानामेव लोकानां ॥ ॥

गुण१=

Indira Gandhi National
Centre for the Arts

नमु॰८
१०७

आर्त्तिं हरतीति तादृशं स्मितं यत्र स्मितं मंदहासः हासो जनोन्मादकरी च माया भगवान् सृष्टिलीलाकर्त्ता॥ ब्रह्मांडस्थि
तजीवान् स्वेच्छया सर्वथा विनियोक्ष्यति तत्र ते प्रमाणबलमाश्रित्य अन्यथा कर्तुं यतंते तदा व्यामोहयति॥ दृष्याक्लेशं
प्राप्स्यंतीति अतस्तेषां क्लेशाभावाय एव हासः॥ मंदत्वं च सर्वथा व्यामुग्धा ऽन्यथा दृष्या पारलौकिकदुःखं प्राप्स्यंतीति॥
लोकशब्देन सज्जीवाः॥ किंच॥ परिस्फुरत्कुंडलमंडितेनेति॥ परितः स्फुरंती ये कुंडले ताभ्यां मंडितेन सांख्ययोगौ कुं
डले तयोः परिस्फुरणं ऐहिकामुष्मिककार्यसिद्धये॥ तेन वैदिकमार्गेणापि यः क्लेशः स योगेन निवार्यते सांख्येन स्व
रूपानंद अनुभाव्यते एतद्वा विपरीतं॥ उभयमुभयत्र वा अतो ऽनिष्टनिवारकेष्टप्रतिपादनपूर्वकं प्रतिपूजनं क
रोति इदं भक्तानां नातीव पुरुषार्थरूपं शोणायितेनेति शोणाईषदरुणः पीतांबरतुल्यः॥ अनेन तेभ्यो भक्तिं
प्रयच्छतीत्युक्तं किंच। अधरविंबभासा अधरबिंबस्य भाः कांतिर्यत्र अधरो लोभात्मकः तत्र यद्बिंबं बिंबसदृशमिति अ
र्थवशात् शब्दबलेन भगवत्स्वरूपं तल्लोभेप्यापितं भगवद्भक्तेभ्यः प्रयच्छतीति प्रतिपूजनसाधने तत्कांतिस्तत्साक्षा
त्कारः समायाति। एवं भक्तिं दत्वा सर्वदुर्लभं तेभ्यः स्वरूपं प्रदर्शयतीत्युक्तं॥ किंच॥ सुनसेन सुभ्रुवेति शोभने नासिके नम॰
यस्मिन् शोभने भ्रुवौ यस्मिन्निति अश्विनीकुमारौ नासिके भ्रूः कालः॥ रोगकालयोर्निवृत्तिं करोतीत्यर्थः॥ ए १०७
वं प्रपन्नभजने सर्वपुरुषार्थदाता निरूपितः २७ ॥ भक्तानां २

भगवान्

पितांबरा छादितप्रदेशे ग्रत्रक दर्शपितं पुं। मा।।१श्री।।२ जीवा: १

सर्वजनत्वाश्रयेणापि भगवतः सर्वसौंदर्यं निरूपयति॥ कदंबेति॥ कदंबस्य यथा किंजल्काः तथेति॥ रेखाकाराः मुक्ता मुक्ताश्च पी
तांबरे प्रतीयंते॥ तेन सर्वतत्वैर्मुक्तैः सहितया भक्त्या भगवानाछन्न इति भगवति गोप्यं रूपमुक्तं॥ तेनैव तत्र शोभानुरूपेण॥
अत एव पीतांबरेण सुष्ठु अलंकृतं॥ तच्च बहिर्मयं तेनाच्छादनं स्पष्टमेव॥ किंच मेखलया नितंबे स्वलंकृतमिति॥ मेखलाभू
मौ भगवत्कीर्त्तिः भगवद्गुणानुवर्णनं॥ गुणमयी च सा॥ तया भगवत्कार्यकरणात्॥ कार्यार्थमपि भगवानन्वेष्टव्यः॥ एवं क
चिद्भगवद्रूपं अप्रत्यक्षमपि सर्वसौंदर्ययुक्तमित्यप्रकटं ततोपीत्याह॥ हारेणेति॥ हारः सर्वरत्नानां तेनैव अत एवानंतध सौंदर्ययुक्तमित्यर्थ: १=

कदंबकिंजल्कपिशंगवाससा स्वलंकृतं मेखलया नितंबे हारेण
चानंतधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन ॥ २८ ॥

भगोः स्मपत्य रूपः २=
नेन॥ वत्सरूपश्चिह्नरूपो योयं श्रीवत्सो दक्षिणावर्त्तरोमरेखा तद्युक्तं यद्वक्षः तदेव स्थलं सर्वसौंदर्याणां आश्रयभू
तं सर्वेषां भूतानां वा आश्रयभूतं तत्र वल्लभेन तेन च स्वलंकृतं॥ नवभिर्गुणैरेकदेशस्थितैः हीराणां वा समूहेन मुक्ता जीव द्वि
देनं प्रवाहिसमूहेन॥ अनंत एव धनं यस्य॥ अधिकारानंतरमेव तेषां स्वरूपप्राप्तिः॥ अनंतः कालः॥ श्रीवत्सस्य चिह्नत्वं ल भक्तादीनां ३=
क्षणतया ज्ञापकं तेन ब्रह्मसत्ता निरूपिता॥ श्रीवत्सस्य यद्यपि चिह्नत्वं स्वभावत एवं तथापि प्रियत्वाय तथोक्तिः॥ नाम्नि तु श्रि
यः प्रियत्वं प्रतीयते॥ ततोपि हारस्य प्रियत्वं ख्यापयितुं वल्लभेति॥ एवमुभयविधैरपि तत्वैः भगवत्सौंदर्यं निरूपितं २८॥ स्वमुक्तैर्मुक्तैश्चास्य सौंदर्यं गुणैश्च १-

व दा।।त्वैर्नवभिर्वा गुणैर्दीनमि रुलाक्षितेन ४=

कालोत्माभगवान् ३=

Indira Gandhi National
Centre for the Arts

नसु० ८
११०

॥ २८

पुनर्भगवंतंसर्वपुरुषार्थोपयोगित्वेनसर्वाश्रयणीयत्वेनचनिरूपयतितत्रभगवंतंकल्पवृक्षत्वेनवर्णयति॥ परार्द्ध्येति॥
परार्ध्याअमूल्याःकेयूरेषुमणिप्रवेकाःतैःपर्यस्तायेदोर्दंडास्तैःकृत्वासहस्रंशाखायस्य॥ पूर्वंतदेवरूपंशयानमुपलभ्य
पुनःपरिदृश्यमानेतामवस्थांपरित्यज्यरूपांतरेणप्रदर्शितवान्॥ वृक्षइवस्तब्धोदिविवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणस
र्वमितिश्रुते स्ताद्दृशंरूपंब्रह्मत्वज्ञापनायप्रदर्शितमितितदनुवर्णयति॥ वृक्षत्वेप्यलौकिकोयंवृक्षः॥ केयूरंकंकणोपरि
हस्ताभरणंतेनालंकृताएवहस्ताः॥ तत्रत्यानांमणीनांप्राधान्येनकीर्तनं॥ तत्तेजःसर्वमेवहस्तंव्याप्नोतीति॥ शतवल्शाः
सर्वेवृक्षाःसहस्रवल्शात्वर्थसहस्रशाखइत्युक्तः अनेनप्रमाणात्मकताचनिरूपिता उत्थितोयंभगवाननुशयानः॥ वृक्षनु

परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं॥ अव्यक्तमू
लंभुवनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शं २९ ॥

ल्पत्वात्पर्यस्ताइतिनानाविधकार्यकर्तृत्वं॥ अतोस्यस्रष्टावुपयोगः॥ बाहूनांदंडत्वंमर्यादारूपत्वान्नियामकत्वंव्याप
नार्थं॥ अत्राभरणानिकर्माणितेषांप्रवेकत्वंनित्योत्कृष्टत्वंअमूल्यताचस्वतएवधानप्राप्तत्वात्॥ अन्यथादानमाप्य
पेक्षयाक्रयमाप्तमुत्तममेव॥ एवंतस्यबाहूनांशाखात्वेनवृक्षत्वंनिरूप्यमूलतोवृक्षत्वंनिरूपयति॥ अव्यक्तमूलमिति॥
इतोप्यग्रेअन्वेषणंनकर्तव्यं॥ यतस्तस्यमूलमव्यक्तं॥ अनाविर्भूतएवाविर्भूतइति प्रकृतिंकेचिदाहुः॥ तदाप्यव्यक्त
स्यमूलमितिव्याख्येयं॥ अतःपरंनेत्यर्थः॥ भुवनांघ्रिपेंद्रमिति॥ अंघ्रिपानामिंद्रःवृक्षश्रेष्ठःभुवनान्येवअंघ्रिपेंद्रः अत
एवप्रत्यक्षंकल्पाभिन्नाभवंतीति॥ इयमुत्तरकांडमर्यादा॥ अव्यक्तमूलमितिप्रमाणं द्वितीयंप्रमेयं तृतीयंफलमिति॥

कल्पवृक्षत्वेनगणनार्हत्वं डुहेर्येभवतत्रिलिपितं॥ श्री
हीद्रभोगैः हारकणेः अधिवीतावल्शायस्यसा
पुस्तक ७२ पत्र ११

तम०
११०

एवमुत्थितंभगवंतंनिरूप्यउपविष्टंनिरूपयति॥ चराचरौकइति उपविष्टेषुपर्वतःस्थितःसचस्थावरजंगमानामा
श्रयोभवति भगवानेवमहीध्रः भूमिधारणसाम्यात् अहींद्रस्यबंधुःअहींद्रएवबाबंधुःबंधनरूपोयस्यमंदरस्य॥
सलिलेनसमुद्रेणउपगूढोभवतिमैनाकादिः एवमुपविष्टेभगवतिचतद्रूपतानिरूपिता सर्वाश्रयोजीवनेहेतुः

चराचरौकोभगवन्महीध्रमहींद्रबंधुंसलिलोपगूढं। किरी
टसाहस्रहिरण्यश्रृंगमाविर्भवत्कौस्तुभरत्नगर्भं ३० ॥

ख

सर्वोद्धारकःसंसारात्॥ अलौकिकभक्तिरसपाययिता॥ भीतानांशरणभूतश्चसुसेव्योवाकिंच॥ उपरिभागेशिखरेपरि
स्थितसुवर्णैःकिरीटयुक्तइवकिरीटानांसाहस्ररूपाणिहिरण्यश्रृंगाणियस्य॥ आविर्भवत्कौस्तुभरत्नगर्भंयस्य॥
मध्योपरिभागोवर्णितो॥ महाराजत्वायरत्ननिधित्वायचऐश्वर्यलक्ष्मीश्चवर्णिता ३० श्रीगोपालयनमः॥

Indira Gandhi National
Centre for the Arts

त॰सु॰८
१११

आम्नायेति शे० (marginal note)

एवं बहिःस्थानेशयानमुत्थितमुपविष्टमुक्त्वामार्गत्रयरूपाणि च निरूप्य अंतःस्थितं रूपं निरूपयन् मूलरूपं निरूपय
ति निवीतमिति तथा तथा दर्शनात्तथा तथा निरूपणं आम्नायमधुव्रतश्रियास्वकीर्त्तिमय्यावनमालया निवीतं॥ मू
लभूतं भगवतः पुरुषरूपं॥ निवीतमिति मनुष्यधर्मत्वात् निवीतं कंठलंबितं आम्नायाः आवर्त्यमाना वेदास्त एव मधुव्र
ताः तेषां श्रीर्यत्र॥ तेनीलात्मा मसाइव॥ स्वकीर्त्तिः शुक्ला॥ सात्विकीव॥ आपादलंबिनी माला वनमाला प्रकीर्त्तिता तुल
सीपुष्परचिता नवरत्नैर्विराजिता रूपेणएतत्सीवः मायेषा प्रवाहहेतुः कीर्त्तिमयीति भक्तिहेतुर्मर्यादाहेतुश्चाद्यामं
र्यादापुष्ट्योर्धर्मत्वं प्रवाहाश्रयत्वात् मूलमेतादृशमिति ज्ञाते तदं तरं गैर्भजनं सेत्स्यतीति॥ नेतेतस्य सहजधर्माः किंतु प्र

निवीतमाम्नायमधुव्रतश्रियांस्वकीर्त्तिमय्यावनमालयाहरिं सू
र्येंदुवाय्वग्न्यगमंत्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदं ३१

माणबलकल्पिता एव॥ सहजं तु सर्वेषां दुःखहर्तृत्वं॥ तदाह हरिमिति॥ संख्यातेस्थितस्य तत्रागमनार्थं हेतुरूपमाह॥ सू
र्येंदुवाय्वग्न्यगममिति॥ एतेसूर्यादयः कर्णिकायामावरणभूताः एतैर्विद्यमानैर्भगवत्प्राप्तिर्न भवतीति दिनएत्रिअवस्थया
कालातिक्रमार्थं अवस्थात्रयेण योगेन कर्मणा वा भगवान्न प्राप्यत इति तथा तत्वैरपि संख्येनतदाह॥ परिक्रमत्प्राध
निकैर्दुरासदमिति परितः क्रमंतीति तेषामपि आवरणत्वं निरूपितं प्रधनेऽपयुक्तानि प्राधनिकानि चक्रादीनि तै
र्दुरासदं इति कालातिक्रमो ज्ञानेन अवस्थातिक्रमश्च॥ योगेन वायुतिक्रमः कर्मणा चाग्न्यतिक्रमः पृथिवीजलातिक्रमस्तूक्त
एव ज्ञानभक्तिभ्यां॥ तत्वातिक्रमस्तु सांख्येन॥ एवं पंचपर्वया विद्यया सर्वातिक्रमः॥ एतैरेवा प्राप्तिरित्येके तदापंचाप्येतानि

भक्तिमार्गकथना (right margin note)
नाम्नायेति (right margin)
एम॰
१११

स्वदृष्टं भगवद्रूपं स्वपक्षयोर्ई तम० २ (marginal note)

व्र॰... (left margin)

एवं भगवति ज्ञाते अन्यत्सर्वं स्वत एव ज्ञातमित्याह॥ तर्ह्येवेति तस्मिन्नेव क्षणे तस्मान्नाभिसरोवररूपेऽकृतं सरोजं पश्यंतत्र स्थित
मात्मानं बहिःस्थितमंभः श्वसनं च वियदाकाशं च पृथिवीप्रभमेव तेजो भगवानेव तस्मिन्विद्यमानस्तदा पंचभूतानि दृष्टानि
॥ नान्यपिस्वदेह एव देहे सर्वं दृष्ट्वा जगतो विधाता जातः॥ अतः परं ब्रह्मभूतो न जात इत्यर्थः। उभयोरैक्यं तद्रूपं हेतुभूतं यतोयं
लोकविसर्गे दृष्टिर्यस्य तादृशः ३२ ततः किं कृतवानित्याह सकर्मबीजमिति॥ सकर्मबीजं इयदेव दृष्टो अलोदिति संब
धः कर्मणि कार्ये जगत्करणे एतदेव बीजं भगवान्पंचमहाभूतानि च यत्संनिपातेजगत्भवति ननु चेतननिर्माणे
छयाप्रवृत्त इति न बीजमात्रेण कार्यं किंतु रजोप्यपेक्षत इत्याशंक्याह॥ रजसोपरक्त इति रजोगुणेनउपसमीपेरक्तः स्वय
मपि रजोगुणभूतो जात इत्यर्थः॥ इयदेव दृष्ट्वेति॥ क्रियाज्ञानं तस्य न जातं॥ नहि रजोबीजाभ्यामेव किंचिद्भवति॥ वचनकर्त

तर्ह्येव तत्राभिसरः सरोजमात्मानमंभः श्वसनं वियच्च॥ ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः
३२ सकर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा॥ अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभि
वेशितात्मा ३३ इति श्रीभागवतमहापुराणे तृतीयस्कंधे अष्टमोध्यायः ॥

त्वं पूर्वांगं अव्यक्तत्वाविकृतं वर्द्धनं जीवदानं च यावन्न ज्ञायते तावत्कार्यं न सेत्स्यतीति च त्वारोर्थाः प्रार्थनीयाः तद्दाने च स्तो
त्रं हेतुभूतमिति अस्तौत मोक्षार्थं तां व्यावर्त्तयते॥ विसर्गाभिमुख इति भगवता स्वविसर्गसंमुखः कृतः विसर्गमेव करिष्यामी
त्यध्यवसाययुक्तः॥ अत एव तं येनैवायमेवं कृत इति॥ तर्हि स्तोत्रं किमर्थमित्याशंक्याह ईड्यमिति स सर्वैः स्तुत्यः स्तोत्रा
[illegible] प्रार्थनीयः। नन्वन्यत्वं यज्ञानानुवेदास्य साधनोपदेष्टारः संति किं भगवतेत्याशंक्याह॥ अव्यक्तवर्त्मन्य
भिवेशितात्मेति॥ अव्यक्तमार्गएव अभिनिवेशितांतःकरणः॥ नहि कुंभकारवत् स्रष्टतया जगत्कर्तुमिच्छति॥ किंतु योना

Indira Gandhi National
Centre for the Arts

त॰मु॰८ ११२

जीवसर्गेभूतस्सृष्टोब्रह्मज्ञानंतदुच्यते॥पंचविंशतितत्वानांस्वरूपस्यचबोधतः॥अतोत्रनवमेध्यायेस्तुतिसंप्रार्थ्य
नेपुरा ततःसर्वोपदेशश्चभगवत्कृतदर्श्यते॥ज्ञानमार्गस्यनिर्द्धारःस्तोत्रेस्मिन्क्रियतेस्फुटःविषयःसाधनंरूपंबार्ध
भावस्तथैवच॥प्रकीर्णार्कंचस्तोत्रेस्मिन्ज्ञानार्थोविनिरूप्यते पूर्वाध्यायांतेददृशेतियदुक्तंतद्भगवत्स्वरूपंसृष्टेकु
त्रउपयुज्यतइतिनिरूपणीयं॥यदीदंब्रह्मभवेत्तदामूलकारणत्वेनोपयुज्येत॥कर्त्ताचनभवतिस्वस्यतत्रविनियो

ब्रह्मोवाच॥ज्ञातोसिमेद्यसुचिरान्ननुदेहभाजांनज्ञायतेभगवतोगतिरित्यव
द्यं नान्यत्त्वदस्तिभगवन्नपितन्नशुद्धंमायागुणव्यतिकराद्यदुरुर्विभासि १

गात्॥अतःप्रथमंअयमेवभगवान्ब्रह्मेतिब्रह्मज्ञानस्यजगत्कारणत्वात्ज्ञाननिरूपणार्थंस्वस्यज्ञानएवसा
क्षात्कारोज्ञानमितिनिरूपयति॥ज्ञातोसीति हेभगवन्अद्यैवमेमयात्वंज्ञातःपरंसुचिरात्महताकालेनज्ञा एम॰
तएवजन्मसाफल्यंनान्यथेत्यज्ञानंनिंदति नन्विति॥अत्रोभयत्रभगवानेवसंमतिहेतुः॥नन्वितिकोमलसंबो ११२
धनंदेहभाजांभगवतो॥ ॥

गतिर्नज्ञायतइतिमहदवद्यं महान्दोषःनैतन्नर्षिविदित्वानगरंप्रविशेदितिश्रुतिनिषेधात्॥भगवांस्तुकेनचित्प्रकारेण
ज्ञायतएव गतिःपरंनज्ञायते सकेनप्रकारेणकदाकुत्रकथंकेनगच्छतीति॥एतस्यांज्ञातायांज्ञातव्यंनावशिष्यते॥
ननुगतिमात्रज्ञानेकथंकृतार्थताविवक्षितस्वरूपाज्ञानादित्याशंक्याह॥नान्यत्त्वदस्तीति त्वत्तःअन्यत्किमपिवस्तुज्ञातव्यं
स्यात् त्वमेवपरंतथाभवसि॥अतस्तवगतिर्ज्ञातव्या भगवन्निति संबोधनंतवषड्धर्मेषुत्वयिचसर्वंप्रतिष्ठितमि
तिज्ञापितं॥ननुमध्येमाययाबुद्धिभ्रामिकयाअन्यत्क्रियतइतिनिरूपितंतत्कथमुच्यतेनान्यदितितत्राह अपितन्न
श्रीतं८ शुद्धमिति मुख्यज्ञातेब्रह्मवादेतन्नोस्त्येव॥तथापिदैवंब्रह्मवादेतद्भवेत्॥तत्रभगवद्भक्तेःमाहात्म्यनिरूपणार्थंन पे॰ए॰ए॰८
तंविदाथेत्यादिमंत्रेषुसूचितं तत्रमुख्यब्रह्मवादोभवति॥नचेंद्रोमायाभिःपुरुरूपईयतइतिमाध्यंदिनेसवनेमाहेंद्र
ग्रहेमहेंद्रस्तोत्रपरत्वात्॥इंद्रस्यैवमायास्ताःशक्तयः॥अन्यथावक्रवचनंनोपपद्येत॥उपनिषत्सुचतत्कीर्त्तनंसर्व
सामर्थ्यंभगवतएवेतिज्ञापनार्थं॥इंद्रेणापियत्क्रियतेतद्भगवत्कृतमेवेति॥देवताब्रह्मवादसंग्रहार्थमित्येकेतस्माद्दे
नास्त्येवमाययासृष्टिः स्वप्नोतिरिक्तइतिकेचित्॥तथापिभागवतसिद्धांतेपियद्यंतरामायाकल्पयतितन्नशुद्धं॥अम
स्यदोषस्यजनकत्वात्॥नन्वेकस्यकथमनेकतानहिकारणेएकत्वविरोधादनेकसंख्यासंभवतितत्राह॥मायागुण
व्यतिकरादिति॥मायागुणानांसत्वरजस्तमोगुणानांव्यतिकरादन्योन्यसंबंधात्॥तेपरिछिन्नाःसंतोगृहाइवआतपे
नानात्वंसंपादयंति॥तथात्वमुरुर्विभासि॥अतस्त्वयिज्ञातेनकिंचिज्ज्ञातव्यं १ श्रीराधावल्लभायनमः॥

Indira Gandhi National
Centre for the Arts

टसु०
११२

ननुब्रह्मणिज्ञातेन किंचिज्ज्ञातव्यमितियुक्तं ननुमयिज्ञात इत्याशंकात्वमेव ब्रह्मेतिप्रमाणतर्काभ्यामुपपादयतिश्लो ४
कत्रयेण॥ तत्रप्रमाणंद्वयेन॥ प्रकृतसमर्थनार्थंअतिरिक्तनिराकरणार्थंच॥ तत्रप्रकृतंसमर्थयते॥ रूपंयदेतदिति॥
यदेतत्त्वयारूपंगृहीतंतद्ब्रह्मैवयतः अवबोधरसोदयेनतज्ज्ञातंकेवलानुभवेनतत्रापिरसरूपेणनिर्विषयेण तत्रा
पितस्योदयेन॥ सच्चिदानंदरूपताप्युक्ताभवति॥ नन्वज्ञानमपिस्यात्सतिदेहग्रहणहेतुभूतं तत्राह॥ शश्वन्निवृत्तत
मसइति शश्वत्सर्वदानिवृत्तंतमोयस्यतस्यतवैतद्रूपं॥ अवबोधरसोदयेननिवृत्ततमंसइतिज्ञानाज्ञानाभावयोः
कार्यकारणभावमाहुः तन्निवृत्त्यर्थंशश्वदित्युक्तं॥ नित्यनिवृत्तानर्थस्यहेतुरपेक्ष्यते साधननित्यत्वेनैवतथात्वमिति
चेन्न॥ कादाचित्कत्वेनैवसाध्यसाधनभावस्यव्याप्तत्वात्॥ नन्वेवंग्रहणेकिंनिमित्तंतत्राह सदनुग्रहायेति॥ अनेनापि

रूपंयदेतदवबोधरसोदयेनशश्वन्निवृत्ततमसःसदनुग्रहाय॥ आदौ
गृहीतमवतारशतैकबीजंयन्नाभिपद्मभवनादहमाविरासं २ ॥

ब्रह्मातिरिक्तानानिषिद्धानहिसतांअब्रह्मणःकिंचित्कार्यंसिध्यति॥ किंच॥ आदौगृहीतमेतद्रूपं॥ आदौशुद्धंब्रह्मैवासि
॥ नततोतिरिक्तंकारणंकिंचित्॥ ब्रह्मैवतथाप्रादुर्भूतमित्यर्थः॥ किंच॥ अवतारशतैकबीजमिति॥ अवताराणांशतस्य
एतदेवएकंबीजं॥ अस्यैवांशाअन्येअवताराइति॥ अवताराश्चब्रह्मरूपाइत्यग्रेवक्ष्यतेऽकाश्च॥ अस्यकारणंब्रह्म
कार्यंचमध्येइदमेवकथंनब्रह्मभवेत्॥ किंचजगत्कारणंब्रह्मेतिब्रह्मलक्षणंतदत्रैवदृश्यतइत्याह॥ यन्नाभिपद्मभ
वनादहमाविरासमिति॥ भवनशब्देनपद्मस्यविशालतानिरूपिता॥ अहमितिसगुणकर्ता॥ आविरासमितिनिमाप्य

लौकिकं जगत्॥ आतः सर्वप्रकारेणैवं ब्रह्मैव

निमित्तानर्थं त्वं

राम०
११२

श्रातेः निराकरण मा६१=

ब्रह्मांतरपक्षंनिराकरोति॥ नातःपरमिति॥ अतःपरमस्माद्रूपात्परंनिक्रमेतद्रूपनियामकंवाभवतःस्वरूपंन॥ आनंदश
रीरंब्रह्मेतिश्रुतेः ब्रह्मणःआनंदरूपंतदेवततनवितः अन्यत्॥ आनंदमात्रादिगुणकंरूपमस्ति॥ आनंदस्तत्रोपादानं
अन्यच्चसहकारिभविष्यतीत्याशंकांनिवारयति॥ तर्हितदेवविकृतंभविष्यतितत्राह॥ अविकृतंतर्हितिरोहिततेजोभवि
ष्यतितत्राह अविद्धवर्चइति॥ नविद्धंवर्चःकेनापियस्य॥ अतिरिक्ताभावेप्रमाणमाह॥ पश्यामीतिब्रह्मणोनुभवःप्रमाणं
॥ अस्यब्रह्मत्वेतुसर्वएवब्रह्मधर्माःसंतितानाह विश्वसृजमेकमविश्वमिति॥ विश्वकर्तृब्रह्मयतोवाइमानीतिश्रुतेः॥
एकंब्रह्म एकमेवाद्वितीयमितिश्रुतेः॥ अविश्वंब्रह्मविश्वस्माद्यतिरिक्तं॥ योस्मात्परस्माच्चपरमितिश्रुतेः एवंब्रह्म

नातःपरंपरमयद्भवतःस्वरूपंआनंदमात्रमविकल्पमविद्धवर्चः॥ पश्या
मिविश्वसृजमेकमविश्वमात्मन्भूतेंद्रियात्मकमदस्तउपाश्रितोस्मि ३ ॥

धर्माणांबहूनांविद्यमानत्वात्ब्रह्मैवेदं॥ आत्मन्नितिसंबोधनंब्रह्मादिभिरात्मत्वेनोपास्यइतिकेचित्॥ अयमात्मा
ब्रह्मविज्ञानमयइतिश्रुतेःअनात्मत्वेब्रह्मत्वंनस्यादिति नन्वत्रचक्षुःश्रोत्रादीनांप्रतीयमानत्वात्इंद्रियवत्वेनक
थंब्रह्मत्वमतआह भूतेंद्रियात्मकमिति॥ भूतानामिंद्रियाणांमात्मायं चक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रमित्यादिश्रु
तेःभूतेंद्रियाणामात्मत्वाद्भूतेंद्रियवत्वेनज्ञायते॥ ननुतत्रभूतेंद्रियाणिसंतीत्यर्थः॥ नन्वप्रत्यक्षंब्रह्मतत्राह॥ अद
इति इदंप्रतीयमानमपित्वदिच्छयाप्रतीतत्वात्॥ अदएव परोक्षमेवेत्यर्थः॥ तेअदःउपाश्रितोस्मीतिसंबंधः॥ प
श्यामीतिनिमित्तवाक्यं॥ अतोभवतस्तदितिनोनश्तर्ं २

Indira Gandhi National
Centre for the Arts

त०मु०९ ११४ तर्कमाह तद्वाइदमिति हे भुवनमंगल त्रैलोक्यस्यैव मंगलरूप॥ तदेवेदं वै निश्चयेन तत्र हेतुः नोध्याने मंगलाय दर्शितं ॥किमतः तदुपासकानामिति वयं ब्रह्मसाक्षात्कारार्थं ध्यानं कृतवंतः यतस्तदुपासकाः नहि परब्रह्मोपासकाः परब्रह्मव्य
तिरेकेणान्यद्ध्यायंति॥ नच तादृशानां कल्पनार्थं भगवानन्यत्प्रदर्शयति नहि तादृशानामन्येन पुरुषार्थो भवति तस्मात्का
रणात्युक्त्यापीदं ब्रह्मैव एवं तस्य ब्रह्मत्वं विनिश्चित्य तत्र नमस्करोति तस्मै नम इति तद्रूपं भगवाने वेति भगवत इत्यर्थः॥
नमनमात्रं उदासीनेनापि क्रियत इति स्वस्य मुख्यसेवकत्वख्यापनाय तुभ्यमनुविधेमेत्याह॥ त्वत्प्रीत्यर्थं अनुविधानं कु

तद्वा इदं भुवनमंगल मंगलाय ध्याने स्म नो दर्शितं त उपासकानां तस्मै न
मो भगवतेऽनुविधेम तुभ्यं यो नादृतो नरकभाग्भिरसत्प्रसंगैः ४ ॥

र्म इत्यर्थः॥ नमोनुविधेमेति पक्षे छांदसत्वादुपपदविभक्तिरेव वलीयसी॥ नमस्कुर्मो नृसिंहायेतिवत् नन्वेवंस
तिवादिनः कथमत्र संदेहं कुर्वंति कथं वा न भजंत इत्यत आह योनादृत इति येषां नरकपातोवश्यंभावी तैस्त्वं ना
रैरयं नादृतः नन्वनादरणमात्रेण कथं नरकपातो निषिद्धाचरणाभावादित्यत आह असत्प्रसंगैरिति॥ अस
द्भिः सह प्रकृष्टः संगस्तेन हि स्वभावत एव कश्चिद्भगवंतं न मन्यते॥ आप्तत्वादानंदमूर्तित्वाच्च किंतु असतां संगे
न बुद्धिरन्यथा जाता अतस्तत्संसर्गिदोषात्सोपि पंचमो महापातकी स चेद्भगवंतं मन्येत पूर्वपुण्यवशादन्य राम० ११४
थावा तदा नरको न भवेत्॥ अतो नरकस्यावश्यंभावात् तादृशैर्भगवान्नादृतः ४ ॥ श्रीगोपालाय नमः ॥

एवं प्रमाणतर्काभ्यां इदमेव ब्रह्मस्वरूपमित्यवधृत्य एतत्साक्षात्कार एव ब्रह्मसाक्षात्कार इति भक्त्या मामभिजानातीति वाक्यात् तत्सा
क्षात्कारार्थं भक्तिमाह साधनमुखतयापि ब्रह्मत्वं साधयति येत्विति तु शब्देन चरणोपासनारहितान्पुरुषार्थविमुखान्व्यावर्त्त
यति ये त्वदीयचरणांबुजकोशगंधं कर्णविवरैर्जिघ्रंति तेषां हृदयात्त्वं नापैषीति संबंधः तत्र हेतुः॥ भक्त्या गृहीतचरण इति॥ त्वदीया
नां चरणौ भगवत इव रेणवो न संति किंतु स्वभक्तरक्षकत्वात् कोशत्वं तद्धर्मो गंधश्च वर्त्तते॥ त्वदीयमेव वा चरणांबुजं॥ भगवदीय
त्वसंपादकशरीरहेतुभूतानि संस्कृतानि भूतानि चेत्प्राप्नुयुः तदास्मिन्नू जन्मनि त्वदीया एव भवेयुः॥ अथेदानीं तादृशशरीराभावे

ये तु त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतं भक्त्या
गृहीतचरणः परया च तेषां नापैषि नाथ हृदयांबुरुहात्स्वपुंसां ५ ॥

पि शरीरांतरेपि श्रुत्यादिपर्यालोचनया माहात्म्ये ज्ञाते भक्तिर्भवति॥ तत्रेंद्रियाणां भगवदीयविषयग्रहणार्थं अन्यथात्वं ज्ञा
पयते गंधो हि चित्तक्षोभकः॥ अंतःप्रवेशसमर्थत्वात् शब्दस्तु न तथा ततः श्रवणेपि गंधानुभवत्वमुच्यते॥ अंतः प्रविश्य
क्षोभार्थं॥ भगवदीयानां पदार्थानां सर्वधर्मवत्वं॥ श्रुतीनां च गंधवाहकत्वं स्वतस्पर्शात्॥ अत्र यशोवाचीगंधशब्दः॥ पुण्यस्
कर्मणो गंध इव॥ भगवन्माहात्म्यश्रोत्रणां श्रवणं देवतारूपमिति गंधो व्याप्तिः॥ एवं माहात्म्यप्रतिपादनार्थमेवं कथा॥ कर्णवि
वरैरिति मूर्त्तिभूतानां गुणानां प्रवेशः प्राणेनैव भक्तिः प्रेमलक्षणा॥ चकारात्साधनरूपा च॥ तदा तेस्व पुंसां भवंति तत्र
हृदयाद्भगवान्नापगच्छति तदा नियतः साक्षात्कारः प्रवेशश्च भवतीत्यर्थः इदं ब्रह्मण एव कार्यं नान्यस्येति कार्यद्वारापि
ब्रह्मत्वं समर्थितं ५ ॥

Indira Gandhi National Centre for the Arts

वाधाभ्यंतरभेदतो ॥ ब्रह्मरूप...

ब्रह्म त.मु.६ ११५ धर्मांतरेणापिसमर्थयते तावद्भयमिति अभयंवैजनकप्राप्तोसीतिश्रुतेः ब्रह्मप्राप्त्यनंतरमेवअभयमितिभगवदीयत्वेनाभ
यत्वंविनिरूपयन्ब्रह्मत्वंनिरूपयति॥ यावन्नेअभयंअंघ्रिंलोकोनवृणीततावद्भयमितिसंबंधः नविद्यतेभयंयस्मादिति
उभयथापिएतस्मान्नभयंआत्मत्वात्॥ द्वितीयाद्वैभयंभवतीतिश्रुतेः॥ अस्मदपिभयंनिवर्त्ततेसमर्थत्वात् तत्सामर्थ्यम
लौकिकमितिभयविशेषान्निर्दिशति द्रविणनिमित्तंमुख्यंभयं सर्वस्यैवतदाकांक्षितत्वात्॥ ततोदेहनिमित्तं देहोगमिष्य
तीति ततः पुत्रादिनिमित्तं भार्यापुत्रौदेहत्वेनवागृहीत्वापश्चाद्स्येसुहृदोगृहीताः॥ विद्यमानेभयंगतेशोकः॥ देहेकेदे नेत्र...

ताबद्भयंद्रविणदेहसुहृन्निमित्तंशोकःस्पृहापरिभवोविपुलश्चलोभः॥ ता
वन्ममेत्यसदवग्रहआर्त्तिमूलंयावन्नतेंघ्रिमभयंप्रवृणीतलोकः ६ ॥

देहत्वेन... शोवादेहत्वेनग्राह्यः अन्यथाशोकोनस्यात्॥ पुत्रादिर्वागेहइतिपाठेस्पष्टमेव॥ पुनःप्राप्तव्यमितिस्पृहा॥ ततोजनानुधा
वनेनैरेवपरिभवः॥ अथदैवगत्याकथंचित्प्राप्तेविपुलोलोभः तावदितिसर्वत्रसंबंधः॥ किंच॥ अहंममेतिदेहादावसद
वग्रहः मिथ्याग्रहः तावदेव॥ इदमप्येकंब्रह्मत्वसाधकं॥ ब्रह्मात्मभावएवतन्निवृत्तेः॥ असदवग्रहस्यलौकिकप्रतीत्या
सुखहेतुत्वमाशंक्यतस्यदुःखहेतुत्वमाह॥ आर्त्तिमूलमितिनियतलिंगं तदंघ्रेः परमंपदमितिश्रुतेर्भगवत्पदमे एम. ११५
वब्रह्म॥ अतोनब्रह्मज्ञानेनव्यभिचारः॥ वृणीतेति यथाकन्यावरंवृणीतेस्वेष्टपूरकत्वेपिस्वयमेवतदीयाभवतिनतु
सःस्वकीयः॥ लोकइतिविशिष्टाधिकारी ६ ॥

नन्वेवंसतिसर्वेकथंनभजंतइत्याशंक्यपूर्वरूपविशेषेअसत्प्रसंगैरितिपरिहृत्यापिपुनःसामान्यतःपरिहरति॥ दैवेनेति॥ तेदैवेन
प्राचीनकर्मणैवहताधीर्येषांतेभवतःप्रसंगाद्येविमुखेंद्रियाः विषयस्यसर्वोत्तमत्वेपिप्रमातुःसर्वदृष्टत्वेपिआत्मत्वेपियेनभ
जंतेतत्रैंद्रियबुद्ध्योरेवग्राहकप्रेरकयोर्दोषोवसीयते अग्रहणे तत्रप्रेरिकाबुद्धिःदैवेनहतादैवंतस्याएवबुद्धेः आधिदैविकंभ
गवदिच्छारूपमितिकेचित्॥ प्रवाहनियामकस्यकर्मणएवतथात्वमिति ब्रह्मवादे अधिकृतःकालःस्वाधिकारमतितंतंजीवंभ
गवत्प्रसंगेनान्यथाऽयंमाभवत्विति तद्बुद्धिंनाशयति कालएवेत्यपरे॥ परंतुत्रयेपितेषांस्वतोदोषाभावः॥ पूर्वंतुतेषांदोषज्ञः
॥ इमंहेतुत्वेननिर्दिश्य अग्रेस्वदयामुपपाद्यतेषुभगवत्कृपांप्रार्थयिष्यत्यर्थात्प्रसंगोवार्त्तामात्रंसांगिकीकथांसर्वेपिवदंतीष्टएवं
ति॥ ततोपिविमुखाः अन्यकथायांभगवत्कथाप्रसंगाच्चेत्समायातितत्तोगच्छंतिनिद्रावाअन्यचिन्तावाभवंतीत्यर्थः॥ तेषांबु
द्धेर्दैवहतत्वोपपादनार्थंभगवत्प्रसंगस्यगुणमाह सर्वाशुभोपशमनादिति तेखलुअन्यप्रसंगाद्दक्षेवपापंकृतवंतः॥ अन्यप्रसं

दैवेनतेहतधियोभवतःप्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रियायें॥ कुर्वंतिकामसुखलेशलवायदीनालोभाभि
भूतमनसोकुशलानिशश्वत् ७ ॥

गान्नत्सर्वंगच्छेत्॥ प्रारब्धकर्मणोपिअशुभंजायमानमुपशामयति॥ अवि
द्याचात्मनिविद्यमानामहाग्नावार्द्रकाष्ठमिवआत्मन्येवशांताभवति॥ इंद्रियपदान्तेषांनिर्दुष्टत्वं॥ इंद्रियाणामपिसन्मुखाभावो
नस्वाभाविकः तस्मादेतेप्रवाहयतिताःकामलोभव्याप्ताइत्याह कुर्वंतीति कामितस्यसुखस्यलेशस्यलवार्थंदीनाः संतः अकु
शलानिकुर्वंति॥ पंचेंद्रियाणामुपभोग्यंकामसुखंपूर्णंतस्यलेशःएकेंद्रियसुखंतस्यलवोऽत्यल्पोभागःक्षणमात्रभोग्यः॥ य
थाकामिनीप्रसादार्थंभूयानेवायमर्थःक्रियते॥ ननुसुखार्थंतथाकरणंयुक्तमित्याशंक्याह दीनाइति॥ देहेभोक्तृविशेषणं
॥ अतोदेहस्याविद्यमानेभोगोत्पादाद्... नभोगःसिध्यति॥ ननुतथाप्याभिमानिकोभोगः
सिद्धेत्तत्राह॥ लोभाभिभूतमनसइति॥ लोभेनमनसोभिभवात्दृष्टेवद्रव्यंव्ययितमितिपश्चात्तापात्नाभिमानिकंसिद्धिः अ
भोग १

कुशलपदेनतन्निवृत्तेकुशलंयत्स्मात्तद्विर्यौगेनविद्यमान ॥
शपिकुशलंगच्छतीतिस्थितं ७

Indira Gandhi National
Centre for the Arts

त॰सु॰९
११६

तादृशेषु कृपां प्रार्थयितुं तेषु स्वसदयामाह॥ क्षुत्त्रडिति॥ इमाः प्रजाः अस्वतंत्राः सत्वरजस्त्वेनोपस्थिताः तासां स्वरूपं सम्यक्
पश्यतः हे उरुक्रम मे मनः सीदति। परदुःखं दृष्ट्वा दुःखितं भवतीत्यर्थः॥ संबोधनेन तन्निवारणसामर्थ्यं सूचितं॥ इयमेव प्रार्थना उरुक्रमेति॥
द्वादशविधः पुरुषः द्वादशधा रोगैर्व्याप्तः न केनाप्यंशकेन सुखी भवति॥ तान् द्वादशदोषान् निवार्यनाह क्षुधादिपदैः॥ क्षुत्तृ
षोः असह्यत्वं स्वानुभवसिद्धं। त्रिधातवो वातपित्तश्लेष्माणः॥ ते पि तथा॥ मुहुरर्ध्यमाना इति॥ बहुधा प्रतीकाराः अपि शीतादयोपि

क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्ध्यमानाः शीतोष्णवातवर्षैरितरेतराच्च कामा
ग्निनाच्युत रुषा च सुदुर्भरेण संपश्यतो मन उरुक्रम सीदते मे ८ ॥

चत्वारस्तथा॥ अन्योन्यतोपि क्लेशः॥ इतरेतरा दिशश्च निपाताः॥ अतो नैकशेषः नापि सर्वनामता॥ चकारान्नक्षत्रसंबंधिश
स्त्रादिभिरपि कामस्यानलत्वेनाग्नित्वं॥ अग्निना स्वरूपनाश एव भविष्यतीत्याशंक्य॥ अच्युतेति संबोधनं स्वरूपर
क्षार्थं अच्युतो रक्षइति केचित्॥ न कदाचिदपि च्युतो भवति यो रोषः चकाराल्लोभादिभिः॥ सुदुर्भरेणेति क्षणमा
त्रमपि तत्सहनमशक्यं॥ सर्वदा प्रतीकारश्चाशक्यः॥ अतो दुःखित्वं ॰ सीदत इति॥ अर्थस्यालौकिकत्वात् आत्मने
पदं छांदसं ८ ॥ ॥

श्म॰
११६

तर्हि ज्ञानोपदेशेन ताः प्रजाः कथं न कृतार्थाः क्रियंते तत्राह॥ यावदिति॥ यावदात्मनः पृथक्त्वं पश्येत् तावदुपदिष्टेपि ज्ञा
ने संसृतिर्न प्रतिसंक्रमेत॥ यावदित्यवधिरुक्तः॥ मध्ये दुःखनिवृत्त्यर्थं प्रार्थना आत्मनः पृथक्त्वं निरूपयति इदमिति या
वदिदमिति मन्यते यत्किंचित्तावत्पृथक्त्वं॥ अस्यावधिर्भगवत्सायुज्यमेव ब्रह्मभावोपि स एव॥ अन्यस्तु पक्षो देहग्रहणाग्रह
णाभ्यां सर्वथानुपपन्नः॥ इदमोर्थे भेदकत्वं निरूपयति इंद्रियार्थमायाबलमिति भगवतः इंद्रियार्थरूपाया मायाया बलं यत्र॥
अंतरेत्यन्नापदार्था मायिका एव इंद्रियाण्यमेवार्थे निष्पादिताः॥ भगवता इव इंद्रियाणि यदा लोकहितार्थं प्रवृत्तानि अहंकारेण
तदा भगवदाज्ञया भगवन्मायया स्वस्वरूपभूताः पदार्था निष्पादिताः॥ अतो विशेषणमपि भगवदीयमिति स विशेषणो भगवत्सं
बंध उक्तः सात्त्वधिष्ठानज्ञानेन न निवर्त्तते॥ परं तद्यथा न भवति तथा बुद्धिः शास्त्रादिप्यानो हेनमहदेवबलं करोति॥ तस्याः ब

यावत्पृथक्त्वमिदमात्मन इंद्रियार्थमायाबलं भगवतो जन ईश पश्येत् ता
वन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थापि दुःखनिवहं वहती क्रियार्था ९

लस्य इदमेव निदर्शनं॥ यदिदं प्रतीयते॥ तदस्ति बलमिति भगवदीयत्वात् भगवत्कृपयैव निवर्त्तत इति ज्ञापितं॥ दर्शने हेतुः॥ ज
न इति॥ यदा जायते शरीरं गृह्णाति तदेदं पश्यतीति नियम एवं न तु किमिति ज्ञायते तत्राह॥ ईशेति॥ यदा भगवतः ईशो हमिति ख्या
तदा ईशितव्यस्यापेक्षणात् जननमित्यर्थः। संसृतिः संसरणं बहुधा देहत्यागग्रहणं॥ असाविति॥ परिदृश्यमाना प्रतिसंक्रमः
विपरीतप्रवाहः॥ न स भगवत्सायुज्यं प्राप यिष्यति॥ अत्रैव प्रलीयते मर्त्य इत्यादिना सा तावन्न भवति॥ ननु संसृतेः किंमूलं किंवा
प्रयोजनं कथं वा न प्रतिसंक्रमते तत्राह संसृतेः कर्ममूलं तदाह॥ क्रियार्थेति॥ प्रयोजनं तु नास्त्येव तदाह॥ व्यर्थापीति वि
कालः स एव व्यर्थः कालार्था संसृतिः मध्ये दुःखनिवहं वहती दुःखपदादिभिः[illegible] निवर्त्तते॥ अतो वी

प्रतिसंक्रमः

नप्रयोजनान्तरप्रयोजनान्तरविद्यमानत्वात्कदा
पितन्निवर्त्ततइत्यर्थः ९ ॥

Indira Gandhi National
Centre for the Arts

आत्मनः एव कृपती मादुःखं ?-

त्म.८ ११७ ननुब्रह्मात्मभावेअधिकारिणोगुरुकृपयावार्क्यस्रदेहयुतमनसाभातेकथमिदंननिवर्त्ततेसर्वत्रैवाहंवुद्धेः आत्मैवेदंसर्वंब्रह्मैवेदंसर्वमितितत्राह॥ अक्ष्याष्टतार्त्तकरणाइति येपूर्वजन्मनिरूपयकः ब्रह्मात्मभावचिंतनपराः तथाचिंतनेनैवप्राप्तदेहावसानाः तेपियुष्मत्प्रसादविमुखाः इहैवसंसरंति संसारेपितेषांविशेषः॥ अक्षिदिवसेआष्टतानिव्याष्टतानि

अक्ष्याष्टतार्त्तकरणानिशिनिःशयानानानामनोरथधियाक्षणभग्ननिद्राः॥
दैवाहतार्थरचनाऋषयोपिदेवयुष्मत्प्रसंगविमुखाइहसंसरंति १०॥

अतएवार्त्तानिकरणानिइंद्रियाणियेषां॥ निशिएवोचनितरांशयानामहामोयस्ताभवंति॥ एवंव्यर्थकालाःनिद्रयाजनितंआनुषंगिकंसुखमपिनास्तीत्याह॥ क्षणभग्ननिद्राइति॥ क्षणमात्रेणैवभग्नानिद्रायेषां॥ भंगेहेतुः॥ नानामनोरथधियेति॥ नानामनोरथविषयिणीयावुद्धिःमनोरथानुसारेणस्वप्नंपश्यंति ॥ श्रीगोपालयनमः ॥ ॥ एम० ११८

तस्मिन्स्वप्नेभयादिदर्शनात्इष्टवियोगाद्वास्वाप्निकस्यास्थिरत्वात्व्याकुलस्यनिद्राभंगःस्पष्टः॥ दैवेनैवआहताअर्थरचनायेषां तेषांक्रियापिव्यर्थैतिस्रूचितं॥ यदितेभोगार्थंगृहादिकमपिकुर्वंति॥ तदपिकालेनव्यर्थंनश्यतीत्यर्थः॥ ऋषयोमंत्रद्रष्टारः॥ भगवांस्ताद्दशेभ्यःप्रसन्नोभूत्वासत्यादिलोकेषुइहवाकिंचित्प्रसादंप्रयच्छति॥ स्वोक्तनिद्दत्तिमार्गकरणात्॥ तद्दानेदमस्माकमपेक्षितमितितत्तोविमुखाःजइहसंसरंति॥ तेहिबालाःवाक्यार्थमेवविचारयंतिननुतस्योपपत्यादिकंकथमस्यजीवस्यब्रह्मभावोभवतीति॥ वाक्यानांतात्पर्याज्ञानात्॥ अत्रब्रह्मांडेतेषामानंदंशःप्रकटोनभवत्येवसर्वार्थेमायाजवनिकायाःप्रसारितत्वात्॥ तथाभगवत्सायुज्यमपि भगवत्माकट्याभावात्॥ ज्ञानमार्गस्यभगवतोवश्यत्वापादकत्वाभावात्तथापिसद्योमुक्तिरुक्ता इहैवसमवनीयंतेप्राणाः ब्रह्मैवसन्ब्रह्माप्येतितदपिस्वतंत्रभक्त्याभगवत्सायुज्यं॥ अतएववेदव्यासःसकलवेदार्थाभिज्ञोज्ञानफलत्वेनसद्योमुक्तिंनोक्तवान्॥ किंतुब्रह्मविदोर्चिरादिमार्गेणब्रह्मलोकेस्थितिरेवफलत्वेनोक्ता॥ अपुनरावृत्तिश्च॥ तदेवफलंभगवद्दत्तंतदनंगीकारेमनसायोगेनवासंसृतिरेवभवति॥ अतोब्रह्मभावनायामपिनसंसारनिवृत्तिः १० नन्वेवंसतिभक्तानामपिसंसारेणनिवर्त्तते उत्तमानामपिविष्णुलोकप्राप्तिःकृत्रिमवैकुंठगमनंवाभवेत् मायाजवनिकायाःसिद्धत्वात्योगेनब्रह्मांडभेदस्तुफलप्रकारएवनिरूपितः ॥

Indira Gandhi National
Centre for the Arts

त॰मु॰ ९
११८

ननु तत्राधिकारी कश्चित्संभवति ब्रह्मणा सह तु ब्रह्मांडनाशे एव तस्मान्मुख्यभक्तिमार्गोपि नश्रीघ्रं पुरुषार्थसाधक इत्याशंक्याह॥ त्वं भावयोगेति भावः प्रेमलक्षणा भक्तिः रतिर्देवादिविषयिणी भाव इति समुदायार्थत्वात् प्रीतिरूपमाहात्म्यज्ञानादेव स एव योगः विहित उपायरूपो भवति अन्यस्त्वनुपायः कामादिना जातः॥ तत्र प्रमेयबलमिति वक्ष्यते॥ प्रमाणबले त्वेषैव व्यवस्था॥ अतो भावयोगेन परिभावितं परितः शोधितं भगवद्विषयकमाहात्म्यज्ञानपूर्वकस्नेहो यदि हृदये सहजो धर्मो भवति तदा तत् हृदयं सरोजं भवति प्रेमजले तद्वै उद्गतं भगवदासनोपयिकं कमलं भवति॥ तस्य च निदर्शनं॥ यदि वैषयिकाः केपि न स्फुरंति तदपि चेत्प्रेम्णा पूर्ववत्स्वनुभवैतितदा भगवांस्तत्र तिष्ठति श्रुतेन गुणश्रवणेन श्रवणसहितेंद्रियेण वा ईक्षितो मार्गो ये

त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसां
यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ११

नयरेव श्रवणं रिक्तं भविष्यति तदा भगवता निर्गमनार्थं मार्गो दृष्ट एव॥ नन्विति कोमलसंबोधनं निश्चयार्थं नाथेति युक्तिः॥ भगवांस्तेषां पतिः॥ स तु भार्यागृहे तिष्ठत्येव॥ परमेतावान्विशेषः पुंसां मयपतिः॥ ननु तेषां ब्रह्मसायुज्ये आस्तिन्ने हृदये भगवत्स्थितिः कुत्रोपयुज्यते तत्राह॥ यद्यद्धियेति॥ हे उरुगाय उरुभिर्गीयत इत्यनेकप्रकारेण निरूपितानंतमूर्ते॥ ते तव यद्यद्रूपं भक्ता विभावयंति॥ तत्तद्वपुः ब्रह्मरूपं वैकुंठरूपं वापि वैकुंठरूपमवताररूपं वा तदेव प्रकटीकरोषि तत्र हेतुः॥ सदनुग्रहायेति॥ संश्चासावनुग्रहश्च॥ ज्ञानिष्वनुग्रहमात्रं अत्र सन्ननुग्रहः अवाधितोनुग्रहः तदत्रैव भगवति सायुज्यं

इति निर्गमाख्या...
...१२
११८

एवं ज्ञानभक्तिमार्गौ निरूप्य साधननिरूपणे भक्तिसाधनापेक्षया ज्ञानमार्गसाधनं भगवत्तोषे हेतुरुक्तमित्याह॥ नातिप्रसीदतीति॥ साधनभक्तौ देवा मुख्याधिकारिणः द्रव्याणि च पुष्पादीनि साधनानि तैर्न प्रसीदति॥ प्रसन्नोपि तेभ्यः कामितं फलं प्रयच्छन्नपि आत्मानं न प्रसीदति॥ तत्र हेतुः हृदि बद्धकामैरिति॥ प्रसादस्तु यदि भगवांस्तद्धृदये समागत्य तिष्ठति तदा स्वकीयानुभवं तेन तदा भवति तत्र तैर्हृदये भगवत्स्थानेकाम एव वलात्त्वद्बद्धो वर्तते॥ सहजश्चेत्कामो भवेत् अंततो भगवानपि दूरीकुर्यात्तस्य च वद्धः कामः कस्यचिन्नाशं कृत्वा निवर्तते वद्धो हि स्वकीयं सर्वस्वं प्रयच्छति अतो दैत्यानां वधेच्छया पूजितो भगवान्दैत्यवधं कृत्वापि न प्रसन्नो भवति तत्र हेतुः नानाजनेष्ववहितः सुहृदंतरात्मेति तर्हि केन प्रसीदतीत्याशंक्याह यत्सर्वभूतदयेति॥

नातिप्रसीदति तथोपचितोपचारैः आराधितः सुरगणैर्हृदिबद्धकामैः॥ यत्सर्व
भूतदययासदलभ्ययैको नानाजनेष्ववहितः सुहृदंतरात्मा १२ ॥

हितभाव२ यद्यथा सर्वभूतदयया भगवान्परितुष्यति॥ सर्वभूतेषु साधारणी दया ननु विशिष्टा॥ अशक्यत्वात् स्वचित्ते तेषां हितभावनं भगवत्कृपाप्रार्थना अनिषिद्धो वा दैहिकः॥ यदेवैकं कार्यं सर्वेषामेव हितं भवति तद्भगवत्तोषहेतुः॥ तर्हि सर्वे निदैवकथं न कुर्वति सुलभत्वाच्चेत्याशंक्याह॥ असदलभ्ययेति इयं सर्वभूतदया असतामलभ्यैव न कदाचिदपि तेषां हृदये दयोत्पद्यत इत्यर्थः॥ एतदेवासल्लक्षणं॥ उभयत्र हेतुत्रयं॥ यतोयं भगवान्नानाजनेषु सात्विकादिनानाभेदभिन्नेषु अवहितः सावधानो भूत्वा तत्र स्थितः॥ स भगवांश्चेत्क्वचिदेव तिष्ठेत्तदा क्वचित्पूजया संतुष्टो भवेत् क्वचिदपराधे क्वचित्पूजायां न तुष्यति नहि पादेताडितः शिरसि पूजितस्तुष्यति॥ किंच अयं सर्वेषां सुहृत्॥ अतः क्वचिदपराधेपि न संतुष्यति॥ किंच॥ अंतरात्मा
...दायं अंतःकरणे हृदि देवपूजा लापनैः संतुष्यति नवहिस्थारणकृतैः अतो ॥

Indira Gandhi National
Centre for the Arts

भा.मु.९
११८

येनैवप्रकारेणभगवान्परितुष्यतितदेवसाधनंअन्यत्तुपरंपरया॰अपरितोषहेतुत्वसाधनमेवेतिनिश्चयः १२ एतदेववदन्न
वोक्तिनिरूपणमुपसंहरति पुंसामिति॥अतोहेतोः पुंसामयमेवसत्क्रियार्थः यद्भगवतस्तवाराधनंविविधकर्मभिर्लौकिकैर्वैदि
कैः अध्ययनयोगपूर्त्तादिभिः देवताप्रीतिहेतूनिनिरूपितानि एनेनेतिमनुष्यप्रीतिहेतुः॥ उग्रंतपःस्वस्यैवप्रीतिहेतुर्देहस्यवा॥
व्रतचर्याअंतःकरणस्य एवंलौकिकालौकिकभेदेनसर्वाण्येवकर्माणितवाराधनरूपाणितद्धेतवोवाभवंति॥ तदासत्क्रिया

पुंसामतोविविधकर्मभिरध्वरद्यैर्दानेनचोग्रतपसाव्रतचर्ययाच॥ आरा
धनंभगवतस्तवसत्क्रियार्थोधर्मोऽर्पितः कर्हिचितद्रियतेनयत्र ॥ १३ ॥

यार्थोभवतिविहितक्रियाणांफलरूपंभवति॥ननुधर्मःस्वतंत्रफलंपुरुषार्थत्वात् अभ्युदयनिश्रेयसहेतुत्वाद्यातत्कथमुच्य
तेसर्वैर्भगवदाराधनंचेत्तदाफलमितितत्राह॥ धर्मोर्पितइति यत्रभगवतिअर्पितःसमर्पितोधर्मःकदाचिदपिनद्रियते
नविदीर्णोभवति॥फलार्थंकृतोधर्मःस्वतंत्रोवा॥धर्मःक्षरतिकीर्त्तनात्हंतिपुण्यंपुरकृतं॥अश्वपुण्यंविनश्यतीत्यादिवा एम॰
क्यैः तस्यनाशःश्रूयते॥तेनचेद्भगवानाराधितोभवतितदाभगवत्कार्येनिरूपितःभगवत्संबंधेननित्यतांप्राप्तःअन्यत्र ११९
फलदानार्थंतस्यापेक्षितत्वात्कदापिनद्रियते १३ ॥

ना॰

एवंसर्वशास्त्रार्थंनिरूप्यभगवंतंनमस्यतिषड्भिःभगवतोनमस्यरूपाणिषड्भवंति अस्माद्ब्रह्मणःपूर्वतराणि तत्रैतद्देवै
कंरूपं शेषशायीनारायणःपुरुषोद्वितीयः॥सर्वतत्त्वसहितःप्रकृतिभर्त्तापुरुषस्तृतीयः॥कालश्चतुर्थः॥यज्ञःपंचमःपुरु
षोत्तमःषष्ठः॥तत्रैनंहृदयेपरिदृश्यमानंतदावश्यकधर्मकीर्त्तनेनैनमस्यतिकदाचिदिदंशयानंरूपंमोहात्मकंभवेदित्याशंक्य
तस्यमोहाभावंनिरूपयति॥अथवैतद्रूपरूपंशयानंतुश्लोकद्वयेनवक्ष्यति॥ शश्वदिति॥शश्वत्सर्वदास्वरूपमहसैवनि
रंतरंस्फुरतास्वप्रकाशेनैवनितरांपीतोभेदमोहोयेन॥ द्वयमेवजीवत्वसाधकंभेदोमोहश्च भिन्नश्चजीवोभवतिमुग्धश्च॥

शश्वत्स्वरूपमहसैवनिपीतभेदमोहायबोधधिषणायनमःपरस्मै विश्वोद्भव
स्थितिलयेषुनिमित्तलीलारासायतेनमइदंचकृमेश्वराय १४ ॥

अतोजीववैलक्षण्यंदोषाभावेन॰गुणेनवैलक्षण्यमाह॥बोधधिषणायेति॥बोधएवधिषणाबुद्धिर्यस्य॥जीवानांतुजड
रूपाबुद्धिः॥अतएवपरस्मैसर्वनियामकाय नियामकत्वमत्रनमनेहेतुः॥एवंस्वरूपमुक्त्वाकार्यमाह विश्वस्यउद्भव
स्थितिलयेषुनिमित्तायमानायालीलातयारासःक्रीडायस्य॥तस्मैवारससमूहोयस्मात्स्वणत्मकोभगवानेवनाम्नइ
तिवदन्नूनमस्यति॥तेइदंनमश्चकृमेतिनमस्कारंसाष्टांगंकुर्वन्इदमानिर्दिशति॥इदमिति चकृमेतिस्वांतर्गतैःसर्वै
रेवजीवैःसहितोनमस्करोमीतिज्ञापयति॥शिक्षार्थंचैतन्नमनमितिज्ञापयितुमाह॥ईश्वरायेति सएवसर्वसमर्थः॥अ
न्यथातत्कृपाव्यतिरेकेणजीवस्तत्कार्यंकथंकुर्यात् १४ ॥

Indira Gandhi National
Centre for the Arts

पुरुषंनमस्यन्पुरुषावतारान्सर्वानेवनमस्यति [redacted] पूर्वश्लोकेसामान्यभगवद्रूपकीर्त्तनेनेननमनं विशेषाह्नक 
षट् तत्रप्रथममवताराः पुरुषादयस्तेज्ञाताइतिकस्यचिद्भ्रमोभवेत्तएतन्निवृत्त्यर्थंतस्यदोषानूपरिहरन्नमस्यति य
स्येति अवताराःगुणाःकर्माणिचविडंबयंतिअनुकुर्वंति॥देवकीनंदनदयालोगोवर्द्धनोद्धरणधीरेतियानिनामानि
येप्राणिनःअसुविगमेप्राणोत्क्रमणसमयेविवशाअपिभूत्वागृणंतितेपूर्वोपार्जितानेकशमलमपितत्क्षणमेवहित्वा

यस्यावतारगुणकर्मविडंबनानिनामानियेसुविगमेविवशागृणंति तेने
कजन्मशमलंसहसैवहित्वासंयांत्यपावृतमृतंतमजंप्रपद्ये १५

अपावृतंउद्घाटितकपाटंस्वतंब्रह्मरूपंसंयांति॥एवंसर्वेषांसर्वपुरुषार्थहेतुकर्त्तारंनमामीत्याह तमिति अज
मितिजन्माभावः॥तमितिगुणकर्माभावः।सजातीयाःसजातीयंमन्यंते अतउत्पन्नानांसगुणानांकर्मकर्तृणांस्वसदृ
शएवरोचतइतितादृशानिजन्मानिगुणकर्माणिप्रदर्श्यतान्मोचयतिनतुतस्यतादृशंजन्मगुणाःकर्माणिवाअतो 
निर्दोषपूर्णगुणविग्रहंतंप्रपद्येब्रह्मामिशरणंगच्छामिवानमनप्रपत्त्योरेकार्थता १५ ॥ १५ ॥ 

एवंपुरुषंनत्वासर्वतत्वसहितंप्रथमपुरुषंनमस्यति॥योवाअहमिति॥योभगवान्त्रिपाद्वृद्धेतस्मैभुवनद्रुमायनमइति
संबंधः॥पादत्रयमाह॥अहंब्रह्माचकारात्तयःप्रभृतयः गिरिशोमहादेवः चकाराद्धर्मादयः विभुःसमर्थःस्वयंपालकोवि
ष्णुः एतेषांकार्यमाह स्थित्युद्भवप्रलयहेतवइति एतेत्रयः वैनिश्चयेन यःपुरुषएवत्रिपात् आत्मनोमूलंप्रकृति
भित्वावद्धेमहदादिरूपेणमरीच्यादिरूपेणवा॥उरवः अधिकाप्ररोहायस्य॥अधश्चोर्द्धंतस्यप्ररोहाः अधोब्रह्मांडमध्ये
पृथिव्यादयःकश्यपादयश्च।उपर्यावरणानि॥एवंभुवनद्रुमात्मकःसर्वशब्दवाच्योभगवान्कल्पवृक्षस्तस्मैनमः १६

योवाअहंचगिरिशश्चविभुःस्वयंचस्थित्युद्भवप्रलयहेतवआत्ममूलं भित्वात्रिपाद्ववृधएकउ
रुप्ररोहस्तस्मैनमोभगवतेभुवनद्रुमाय १६ लोकोविकर्मनिरतःकुशलेप्रमत्तःकर्मण्ययंत्वदु
दितेभवदर्चनेस्वे यस्तावदस्यवलवानिहजीविताशांसद्यःछिनत्त्यनिमिषायनमोनमस्ते १७

कालात्मकंनमस्यति लोकोविकर्मनिरतइतिविकर्मनिंदितकर्मतत्रनिरतः तदेकप्रवणइत्यर्थः॥कुशलेधर्मेप्रमत्तः
असावधानः॥सुतरांत्वदुदितेकर्मणि मन्मनाभवमद्भक्तइत्यादेभवदर्चनेतवपूजारूपेस्वेस्वधर्मरूपेसर्वथाप्रमत्त
तस्ययःजीविताशामपिछिनत्ति तावदितिनरकादर्वाकपश्चात्तरकमपिप्रयच्छतीत्यर्थः॥इहेति नेकदे भगवदपरा
धंकृत्वायोमहानपिभवतितमपिमारयतीत्येतदर्थमाह वलवानिति तथोपायंकरोतियथैजीवन्नेवजीविताशांत्यज
ति एवमलौकिककालात्मनेनमः १७ ॥ ६१

कीलीत निला:

Indira Gandhi National
Centre for the Arts

यज्ञरूपंनमस्यति यस्मादिति कालोद्विविधः यज्ञादिप्रवर्तकःयज्ञात्मालौकिकश्च॥तत्रलौकिकःपूर्वमुक्तः॥यज्ञात्म
कद्विदानीमुच्यते स्वधर्मनिष्ठःशतजन्मभिःपुमान् विरंचितामेतिततःपरंहिमामितिवाक्यात्येनैवयज्ञात्मकेनसहस्रा
श्वमेधरूपेणब्रह्मपदेअहंनिवेशितः इदानीमपिवहुभिर्यागैःतयोभिश्चतमेवाराधुमिच्छामितत्सायुज्यमेववांछामि॥
एवंयद्यपिद्विपरार्द्धधिष्ण्यमास्थितः।द्विपरार्द्धेतस्यासनस्यस्थितोकालपरिच्छेदकेयस्यआसनस्यापिनियतकालत्वंअहम
पिनियतकालस्तादृशः॥तथापीश्वरगतिर्ज्ञातुमशक्येतिबिभेमेवयद्यपिममासनस्यमहत्वं॥सर्वलोकनमस्कृतत्वात् तथा

यस्माद्बिभेम्यहमपिद्विपरार्द्धधिष्ण्यमध्यासितःसकललोकनमस्कृतंयत् तेपेतपोवहुसवोवरुरु
त्समानत्तस्मैनमोभगवतेधिमखायतुभ्यं १८ तिर्यङ्मनुष्यविबुधादिषुजीवयोनिष्वात्मेच्छया
त्मकृतसेतुपरीप्सयायः रेमेनिरस्तरतिरप्यवरुद्धदेहस्तस्मैनमोभगवतेपुरुषोत्तमाय १९ ॥

मप्रन्
पिमहानितिनत्यसतीतिभयं॥स्वभावतएवाहवहुसवः वहुयज्ञकर्त्तातथापितपसेपि एवमतिदुर्द्धर्षायमखाधिष्ठात्रेदेवा
यतुभ्यंनमइति १८ पुरुषोत्तमंनमस्यति तिर्यगिति तिर्यङ्मनुष्यविवुधाःतामसएजसस्सात्विकादेहास्तदायोन्य
पित्रिविधास्तेषुजीवयोनिषुजीवस्योत्पत्तिस्थानेषुआत्मेच्छयास्वेछयैवअवरुद्धदेहःसन्स्वीकृतलीलाविग्रहोभूत्वा
आत्मकृतसेतुपरीप्सयास्वकृतमर्यादारक्षणार्थंयोरेमे मनुष्यादीनस्वतुल्यान्विधायस्वकृतधर्मरक्षार्थमेवकृतस्वरू
पोभूत्वातिर्यगादिषुक्कुत्रचिदपियोनिरस्तरतिरपिरेमे।एतादृशाय अरुणदृष्युत्तमः॥लोकप्रतीत्यावोधनार्थमे
वंदेहग्रहणकथा॥अवरुद्धानिरुद्धावादेहायेन इच्छापिनास्तिदेहोपिनास्तितथापिस्वरूपानंदभूतएवरेमे॥१९॥ 

नारायणंनमस्यतिकारणकार्यावस्थारूपद्वयनिरूपणेनश्लोकद्वयेनयोविद्ययेति॥यःदृशार्द्धहृत्यापंचहृत्याअविद्ययाअनु
पहतोपिनिद्रामुवाह नहिकश्चित्स्वात्मविस्मरणअतिरेकेणनिद्रितुमर्हति॥पंचहृत्येतिवक्तव्येदृशार्द्धहृत्येतिवचनंविद्यावि
द्ययोःसमभागार्थंयथाविद्ययाअनुपहतोपिजागर्त्येवऽमविद्ययानुपहतोपिनिद्रामुवाहेति॥विद्याऽविद्याकार्यंभगवति
नास्तिकिंतुतत्सदृशीलीलावर्त्तितइतिज्ञापनार्थं किंच जठरीकृतालोकयात्रायेन सर्वानेवलोकान्स्वोदरेनिवेश्यशेते॥
यथालोकस्यस्वप्नःतथास्मिन्त्रिदानींलोकाः॥अयमेवस्वप्नकर्त्तानिद्रासहितः॥अतःस्वप्नेकार्यंकुर्वन्नपिमायिकमेवकार्यं
करोति॥यदिइदानीमपिनिद्रितएवकार्यंकरिष्यतितदाअग्रेउत्पत्स्यमानमपिकार्यमसदेवस्यात् मूलस्यतथात्वात् निवी

योविद्ययानुपहतोपिदृशार्द्धहृत्यानिद्रामुवाहजठरीकृतलोकयात्रः अंतर्जले
हिकशिपुस्पर्शानुकूलांभीमोर्मिमालिनिजनस्यसुखंविवृण्वन् २० ॥

जफलहृत्त्ववत्॥ किंचअंतर्जलेभीमोर्मिमालिनिअहिकशिपुस्पर्शानुकूलांनिद्रामुवाह॥नहिकश्चिज्जलमध्येशेतत्रा
पितरंगाकुले॥तत्रापिसर्पभोगे॥शयनंतामसीअवस्था जलमध्येशयनंसर्वथानुपपन्नं॥आकुलाधिकरणशयनमति
श्रमसूचकं॥सर्पेचशयनंमत्फहेतूनप्यविगणय्यशयनसूचकं॥एवंशयनंकिमर्थंकरोतीत्याशंक्याह जनस्यसुखंविवृ
एवन्निति॥जनस्यजायमानस्यएवमवस्थाचेत्तदासुखंभवतीतिलोकेविवृण्वन्ज्ञापयन्॥अतएवमेवस्थितेयदिस्वस्थिर्भ
वेत्तदोत्पन्नानांमोक्षादिवार्त्तानभवेदितिएतदवस्थापरिहारंप्रार्थयिष्यन्इमामवस्थामेवंवर्णितवान् २० ॥

Indira Gandhi National
Centre for the Arts

त.मु.९ १२२ स्वस्थाद्धेतस्सकार्यावस्थामाह॥यत्राभिपद्मभवनादिति यस्यनाभिपद्मभवनादहंब्रह्मा आसंतस्मैनमइतिसंबंधः॥ननु
पितृत्वान्नमनमेवकर्त्तव्यंस्तुत्याकिमित्याशंक्याह हेईड्येति स्तुत्योयः तस्मैस्तुतिरेवकिंचित्कर्त्तव्यं॥लोकत्रयमुपकरणं
यस्य यथापुरुषस्यघटपटादयः एतादृशत्वंतत्कृपयैवजातमित्याह॥यदनुग्रहेणेति॥यदनुग्रहेणलोकत्रयोपक
रणोहमितिसंबंधः॥तस्मैतेतुभ्यंनमः नमनेप्रयोजनमाह उदरस्थभवायेति विश्वमेवतदुदरेस्थितंतत्त्वेत्पयद्येत

यत्राभिपद्मभवनादहमासमीड्यलोकत्रयोपकरणोयदनुग्रहेण तस्मै
नमस्तउदरस्थभवाययोगनिद्रावसानविकसन्नलिनेक्षणाय २१ ॥

तदास्वष्टिर्भवेदिति तर्हिनिद्रितायनमस्कारोऽनुचितइत्याशंक्याह॥योगनिद्रावसानविकसन्नलिनेक्षणायेति॥
योगनिद्रायाः अवसानेविकसन्नलिनवदीक्षणेयस्य॥योगनिद्राकाचिच्छक्तिः यथासृष्टिः॥उभेभगिन्यौतुल्यका
ले साभगवतिप्रलयकालेआदित्तणेतस्याःप्रथमोंशःसंवध्यते प्रलयांतेत्वंतिमोंशः॥इदमेवतस्याअवसानं॥ एम० १२२
यतोनिद्रावसानरूपोयंअतोनमनमुचितमित्यर्थः २१ ॥

एवंनत्वास्वाभीष्टान्पदार्थान्प्रार्थयते॥यत्राभिपद्मभवनादितिचतुर्भिः स्वस्थर्यभगवताउत्पादितइतितान्यत्रतस्याधिका
रः स्वष्टेयपदार्थज्ञानमपेक्षतेतेबुद्धिसंयोगेन्यथाकर्तुमेवनशक्येत॥ज्ञात्वाचकर्त्तव्यं॥चित्तस्यभगवच्चरित्रपरताचावश्यकी॥
भगवदुपयोगिहृष्टिकरणात् वेदादिस्मरणंचापेक्ष्यतेतत्थामतिपातकिंकृतंकार्यंपुरुषार्थोपयोगिनस्यात्॥संतोषपूर्वकं
विषादद्दूरीकरणंचापेक्ष्यतेकार्योपयोगाय॥अतोवरचतुष्टयप्रार्थना॥तत्रप्रथमंसृष्टिसामर्थ्यसद्भवेविद्यमानत्वेपिवुद्धेरु
द्वेगान्नैरस्फुर्त्तिः विषमकरणंचस्यात् अतोभगवतोज्ञानसंबंधंप्रार्थयते सोयमिति॥सोयंभगवान्येनसत्वेनजगन्मडय
तेतेनैवमेदृशंअनुस्पृशतात्इतिसंबंधः सर्वेषांहितकारित्वात्औदासीन्याभावात्आवश्यकत्वात्भगवतोज्ञानंस्वष्टावपे

सोयंसमस्तजगतांसुहृदेकआत्मासत्वेनयन्मडयतेभगवान्भगेन॥ तेनै
वमेदृशमनुस्पृशताद्यथाहंस्रक्ष्यामिपूर्ववदिदंप्रणतप्रियोसौ २२ ॥

क्रितंतदर्थविशेषणत्रयमाह॥समस्तजगतांसुहृत्॥एकः आत्मेति॥एकत्वात्सर्वत्रतुल्यः॥एकस्वभावइत्यर्थः॥आत्मत्वात्साद
रूपकः॥सत्वेनेति॥ज्ञानसुखकरणभूतसत्वगुणेन॥यद्यस्मात्कारणात्मडयतेसुखयति यदितिप्रसिद्धंवाजगत् कर्मणः
स्पष्टत्वात् अवचनंवा॥भगेनेतियत्सत्वंभगात्मकं॥ऐश्वर्यादिषड्गुणरूपं॥तेनमेदृशमनुस्पृशतादितिषड्गुणैश्वर्यादयः प्रार्थि
ताभवंति ततःकिमतआह॥यथाहंस्रक्ष्यामिपूर्ववदिति॥उद्वेगाज्ञानवैषम्यानियदागमिष्यंतितदापूर्ववदेवकरिष्यामि न
न्वेतावत्कथंदास्यतीत्याशंक्याह॥प्रणतप्रियोसाविति असौप्रणतप्रियःप्रणतःप्रियोयस्येति॥प्रियायहिसर्वमेवदीयते॥
असावेवैतादृशोनान्यइत्यर्थः २२ ॥ श्रीगोपालयनमः ॥

Indira Gandhi National
Centre for the Arts

चित्तस्य भगवच्चरित्रपरतां प्रार्थयते॥ एषप्रसपन्नवरद इति॥ यदि चित्तं भगवच्चरित्रपरं न स्यात्तदाहंकर्तृत्वाद्गर्वः स्यात्॥ प्रमादाद्विषमकृतिजनितदोषात्राशङ्क्य चरित्रं सत्त्वांशेन कृतं चित्तसहितेन वा विशिष्टेन वाऽभेदेन तादृशमानंदं न जनयति अतो ब्रह्मानंदरूपयारमयाल स्याभेदाभावायात्मशक्त्या प्रपन्नानां वरदानार्थं यद्यत्करिष्यति॥ तत्रापि स्वाधिकारानुसारेण ग्रहणार्थं गृहीतगुणावतारः॥ गृहीताः गुणावतारा येन गुणानां धर्माणां अवतारः पूर्वमुक्ता यत्रोद्यत इत्यादिना॥ अथवा गुणा भगवदीयाः सर्वे पुरुषस्थिताः अभिव्यक्ता जातास्ते गुणावतारास्तानादाय यद्यत्करिष्यतीति वहवएव पदार्था भगवदीया भवंति हि कालकर्मस्वभावकृतातिरिक्ताः॥ सामान्यतोऽधिकृतत्वात्तत्राप्यहमेव कर्त्ता॥ अतस्तस्मिंस्तव चरित्रे इदं तव पराक्रमरूपं

एषप्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः॥ तस्मिन्स्वविक्रममिदं सृजतोपि चेतो युंजीत कर्मशमलं च यथा विजह्यां २३ ॥

जगत् भगवदीयं सृजतोपि मे चेतो यथा युंजीत॥ तच्चरित्र एव चित्तं सर्वदा युक्तं भवेत्॥ यद्यपि कालादिकृतसृष्टौ चरित्रपरता चित्तस्य युक्ता॥ गर्वाभावार्थं भगवत्स्मरणार्थं च॥ भगवदीयसृष्टौ तु नोपयुज्यते॥ पूर्वोक्तदोषासंभवादित्याशंक्य अत्रापि दोषद्वयं संभवतीति तन्निराकरणार्थं चरित्रपरतायुक्तैव॥ अत्र सृज्यानां भगवदीयत्वात् अणमात्रेणापि भगवदिच्छावैपरीत्येन कृतिर्भवेत् तदा भगवत्द्रोहः स्यात् सृज्यानां चाक्रोशस्तदुभयनिराकरणार्थं स्वविक्रममिदं सृजतोपि चेतो युंजीत॥ किं च॥ कर्मणा जायते सर्वथा शमलं। सृज्यानां सर्वथा हिताकरणात्तच्च शमलं यथा विजह्यां वेदविस्मरणं यथा न स्यात्॥ रूपस्य सृष्टेर्नामाधीनत्वात् ॥ एम० १२३

---

कर्मबोधनार्थं च वेदोपेक्षित इत्याह नाभिह्रदादिति॥ इहांभसि सतोयस्य पुंसो नाभिह्रदात् अहमासं तस्यैवानंतशक्तेश्चित्रं रूपं विहृएव तो मे गिरां विसर्गो वेदः मा रीरिषीष्ट नाशमायगच्छतु इह सत इति अग्रेति ऐभावात् प्रश्नानुपपत्तिः तत्त्वएवोत्पन्नत्वात् अन्यो दृष्टः विज्ञानशक्तित्वाद्विस्मरणं नोचितं॥ चित्रंरूपमिति विस्मरणे हेतुः नाभिह्रदादित्यन्वेषणक्लेशसूचनं अनंतशक्तेरिति अविस्मरणदानसामर्थ्यं अहमिति यद्रूपया एतावत्वं साकृपात्यग्रेपि निर्वाह्येति सूचितं॥ अस्य रूपमिति वचनात् हलांतं ब्रह्मवर्चसमिति स्यायेन वेदस्फुरणहेतुधर्मनाशः सूचितः चकाराद्भगवदपराधश्च विशेषेण परित्या

नाभिह्रदादिह सतोंभसि यस्य पुंसो विज्ञानशक्तिरहमासमनंतशक्तेः॥ रूपं विचित्रमिदमस्य विहृएवतो मे मा रीरिषीष्ट निगमस्य गिरां विसर्गः २४ ॥

गः स्वाभानंनमायश्चित्तवत्॥ रिष हिंसायामिति धातोः सनंताल्लुङ्। स्तगतावित्यस्याशीर्लिङि ईडन्देशेकृतेवारूपं॥ सर्वथाछांदसाश्रयणं केनांशेन अडभावश्च माङ्योगात् इगभ्यसयोरिति कृत्वेपि छांदसईकारादेशः फलोफलीतिवल्लोमः वि विधः सर्गो विदेः ब्रह्मणः सर्वमेव वाक्यं वेदरूपमिति वा निगमस्य वेदस्य गिरामिति देवताशब्दांतरव्यावृत्त्यर्थमुक्तं॥ वेदो मा विस्मृतो भवत्विति वक्तव्ये प्रकारांतरेण कथनं वरेणान्यस्मरणमात्रव्यावृत्त्यर्थं॥ यथाऽस्मदीयमपि न स्मरेयमिति अत

एवमालुप्यतामिति प्रश्नः २४ ॥

Indira Gandhi National Centre for the Arts

त·सु९ १२४

संतोषपूर्वकं विषाददूरीकरणं प्रार्थयते अस्मोदुत्थाय मे विषादं माध्याणि एअपनयनादिति संबंधः प्रार्थितदानसामर्थ्यनिरूपणार्थमस्य इति पूर्वोक्तनिर्देशः अरुणाकरुणायसदैयेव प्रार्थितदाने हेतुः भगवानिति प्रार्थनीयत्वं विहृद्धप्रेमस्मितेन भक्तक्लेशस्मरणेन भक्ते विहृद्धा भगवतः प्रीतिर्भवति क्लेशाभावार्थं शास्त्राग्रहव्याहृत्तये किंचिन्मोहनमपि करोति तदा भगवतो ज्ञानशक्तिः रूढत्वाभावाय अंबुनिशीतले विषयसुखे संयुक्तमिति जीवो पि विषयसुखस्पृष्टो भवति एतदाह ॥ नयनमेवांबुरुहमिति तस्य विजृंभा विशिष्टो विकाशः ज्ञानशक्तिः रतिविलसिता सर्ववस्तुयाथात्म्यं बोधयंती क्लेशं सर्वथैव दूरीकरोति विशिष्टश्च विकाशः कार्यं पितृथो क्रमपरः उत्थिता तु जगत्सृष्टिरनलसा भवती तु त्याये त्युक्तं विश्वविजयाय चेति वि

सोसावदभ्रकरुणो भगवान्विहृद्धप्रेमस्मितेन नयनांबुरुहं विजृंभन् उत्था
य विश्वविजयाय च नो विषादं माध्या गिराऽपनयतात्पुरुषः पुराणः २५

वि॰

अस्मिन्विजयः स्वभावादिसुराहेनत्वाभिप्रेतविधित्सा ॥ तं तं विश्वस्मिन्नेव ॥ चकाराद्विश्वस्यानुगुणतायै ॥ नो विषादं पूर्वोक्तं अस्मद्विषादं ॥ न इति स्वीतस्थितभूतसहिताभिप्रायं ॥ माध्या गिरेति स्निह्मप्रतिपादकेन वचनेन ॥ ईश्वराज्ञायाः कठिनत्वशंकयोक्तं ॥ पुराणः पुरुष इति पितामहत्वेन समत्वाय ॥ नयनांबुरुहविजृंभणं विश्वविजयरूपेष्टविधौ विघ्नादिनिराकरणे च हेतुः वा स्म॰ १२४
णीर्चपरमेकं कर्तृ प्रविष्टं ॥ अलौकिकद्वारा तदुभयकर्तृ एकं तु लौकिकद्वारा एतत्सर्वकार्याभिनिविष्टः करिष्यति न वेति संदिह्य पुरुषोत्तमभावं तत्र निरूपयति ॥ पुराण इति २५ ॥

विरामेऽत्यार्थो यं २

स्वार्थसर्वप्रार्थितं इति ब्रह्मकल्पवद्भक्तिप्रश्नाभावात् वहुकालभोगेन मध्ये प्रलयसंभवात्कुरुणानयस्य अवधायकत्वं बोधयन् चिरकालेनोत्तरं दत्तवानित्याह त्रिभिः ॥ स्वसंभवमिति ॥ यावद्ज्ञानं ब्रह्मणो भगवद्विषयकं जातं ॥ तपसा उपासनया समाधिपर्यंतयोगेन च ॥ स्वसंभवं स्वपितरं एवं पूर्वोक्तप्रकारेण निशाम्य ज्ञात्वा स्वस्य यावन्मनः सामर्थ्यं तावत्कल्पयित्वा यावद्वावक्तुं शक्यं तावदुक्त्वा तूष्णीं स्थिते भगवति अनवसरोयं वेति संदिह्य स्वयमपि तूष्णीं स्थितः ॥ भगवंतं प्रसन्नवदनं दृष्ट्वा पूर्वं खिरस्याप्यनुवृत्तत्वात् खिन्नवदित्युक्तं ॥ यथा यथा लूयते तथा तथा ज्ञात इति ज्ञानप्रयंतेन निरूपितं २६ मध्ये भगवद्विचारेपि कालविलंबहेतुर्जात इत्याह ॥ अथेति आनंतर्यकालविलंबात् अभिप्रे

मैत्रेयउ स्वसंभवं निशाम्यैवं तपोविद्यासमाधिभिः यावन्मनोवचः स्तुत्वा विरराम स खिन्नव
त् २६ अथाभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः विषण्णचेतसं तेन कल्पव्यतिकरांभसा २७ ॥

तं स्वसमानज्ञाने श्वर्यं प्रार्थयत इति अन्वीक्ष्य अन्वीक्षणं निश्चयः ॥ तस्मिन्दत्ते वा कालांतरे अपकारेण भवेदिति अन्वीक्ष्य ॥ ब्रह्मण इत्यधिकारित्वं ॥ तेन तथा प्रार्थनायामपि नापराधः ॥ मधुसूदन इति ॥ तद्धितार्थं चरणं भगवतः स्वाभाविकं ॥ यथा अनिष्टं निवर्त्तयति तथेष्टं संपादयतीत्यर्थः ॥ विषण्णचेतसमिति ॥ दयाधिकारित्वात् तस्य शक्यत्वात् च साधनोपदेश एव ॥ तेनेति पूर्वोक्तेन भगवद्हितेन ॥ भगवदीयत्वे तु तस्योद्वेगो न स्यात् ॥ भगवदीयकार्ये चानुगुणं स्यात् ॥ अभगवदीयत्वार्थमाह कल्पव्यतिकरांभसेति कल्पव्यतिकरो नाशः तत्साधकेन अंभसा ॥ तस्मात् इमं भगवच्चरित्रं तस्य दुःखनिवारकमपीत्येतदुक्तं ॥
२७ स्वार्थं चेत्तदा दुःखं ॥

अभद्रः

Indira Gandhi National Centre for the Arts

त॰सु॰९
१२५

भगवत्कार्यार्थंतुयत्दुःखंतत्साक्षात्देवनिवारयतीत्याह॥लोकसंस्थानविज्ञानइति लोकानांसम्यक्स्थानंयथोपयोगंदेहादौस्थितिःत
द्विषयकज्ञानार्थंपरिखिद्यतःपरितःखेदंप्राप्नुवतोब्रह्मणःआत्मनएवहेतोःज्ञायतएवसाधनेनसाध्यमितिसाधनमकृत्वैवसाध्यप्रे
प्सुःखिन्नोभवत्येव तपोपिशीघ्रमेवनिवर्त्तितमितिभगवतोविलंबःतदर्थमेवश्यानएवभगवानाविर्भूतः॥सतुतंदृष्ट्वैवऊन्नालोभू
त्वास्तोत्रंप्रार्थनांचकृत्वातूष्णींस्थितः॥एतादृशमपितंभगवानाह॥अगाधावाणीभगवतः अभिप्रायाज्ञानात्॥कश्मलमुभयविधं
शमयन्निवेतिसाधनोपदेशात् २८ तत्रप्रथमंज्ञानबुद्धिसंयोगेऊन्नमोह॥मावेदेतिदशभिः॥वाक्यैरेवचतुर्थेत्तिरंभवति॥द्वितीयं
नुवरदानादेव तृतीयेत्वल्पःप्रयासः॥अतःसपरिकरंप्रथममेवऊपपादयति॥आलस्याभावतपसीभगवज्ज्ञानसाधने सर्वत्रान्वी
तृणांचैवज्ञानेनैवमलत्ततिः १ चरित्रपरताहेतुर्मलाभावेविचारतः सुज्ञानेनैवसंसिद्धोद्यतस्तत्फलमीर्यते २सुखहेतुश्चतज्ज्ञानं

लोकसंस्थानविज्ञानआत्मनःपरिखिद्यतः॥तमाहागाधयावाचाकश्मलंशमयन्निव २८
श्रीभगवानुवाच मावेदगर्भगास्तंद्रींसर्गेचोद्यममावह॥तन्मयापादितंह्यग्रेयन्मांप्रार्थयतेभ

स्वसंबंधविशेषणात्॥गर्वाभावोवरदानात्नान्यथेतिनिरूपितं ३ स्वाभाविकस्यदोषस्यनिवृत्तिश्चाप्यनुग्रहा(( वान् २९
त॥मत्स्वरूपस्यविज्ञानंजातमेवतदेवतत् ४ मयातथैवचकृतंआविष्कारःस्तुतौकृतः॥ममैवानुग्रहात्सर्वमित्येषामुपसंहृ
तिः ५ द्वितीयस्योत्तरंवेदेश्चतुर्थेप्युक्तएवहि॥भवेदितिकृतंस्तोत्रंचरित्रंभक्तिहेतुकं ६ नान्यत्रविनियोक्तव्यंभक्तिर्नित्यानसाध पं॰च॰९९
नं वेदाविस्मरणेहेतुर्देहएवकृतःपुराणतदिहैकेनतेनैतेकलाश्लोकानिरूपिताः ७ तत्रप्रथमंआलस्याभावमाह॥हेवेदग राम॰
र्भतंद्रीमागाःआलस्यंमाकुर्वित्यर्थः॥सर्गेऊद्यमंचावह॥सर्गकरणार्थमुद्युक्तोभव चकारात्साधनेमतिःकर्त्तव्या॥साधनमेव १२५
नजानामीतिचेत्तत्राह॥तन्मयापादितमिति॥यन्मांत्वंसाधनंप्रार्थयसेतन्मयापूर्वमेवापादितं॥हियुक्तोयमर्थः॥अन्यथेताव
द्दूरेसाधनपरंपराणभवेत्॥अतःसाधनस्यसिद्धत्वात्आलस्यंत्यक्तव्यमितिभावः २९ ॥ श्रीगोपालयनमः ॥

साधनमन्त्रप॰२=
ज्ञानमहात्म्यंचेतिद्वयं

ज्ञानार्थंचतपःकुर्वित्याह॥भूयस्त्वमिति॥यथापूर्वंतपःकृतंतथैवततोपिभूयस्तपःकर्त्तव्यं॥पुनःपदादिपरित्यागेनभू
यःपदप्रयोगेनअर्थद्वयमभिप्रेतमितिज्ञायतेतपसिआस्थाकर्त्तव्या विद्यामदुपासनार्थेकर्त्तव्या॥साचोपासनामद्विषयैव॥
॥ताभ्यांउपासनातपोभ्यांहृदयमध्यएवअपावृतान्लोकान्द्रक्ष्यसि॥ब्रह्मन्नितिसंबोधनंतदधिकारद्योतनार्थं॥नहिब्रह्म
भावव्यतिकरेणकश्चित्स्वस्मिन्लोकान्द्रष्टुमर्हति॥अपावृतान्मदीयान्अन्येतुत्रिविधाजीवाःकालादिभिरावृताएवभवंति॥
सर्वेषामेवजीवानामपावृतत्वेत्रैविध्यंनस्यादितिकेचित्॥परमार्थतोवाअपावृताःसर्वएव॥ततोभवानात्मानंप्रज्ञावदंतःस्था

भूयस्त्वंतपआतिष्ठविद्यांचैवमदाश्रयां॥ताभ्यांमंतर्हृदिब्रह्मन्लोकान्द्रक्ष्यस्यपावृतान् ३०
रति

वृतान्लोकांश्चद्रष्टाआत्मत्वेनज्ञानात्स्वस्मिन्लोकेचभक्तिर्भविष्यति॥स्वस्मिन्।स्नेहांशोस्त्येव॥माहात्म्यस्यदृष्टत्वात्॥स्नेहो
माहात्म्यंचमिलितंभक्तिर्भवति॥लोकेचअपावृतत्वदर्शनात्॥माहात्म्यज्ञानंतदुभयात्मज्ञानं-भक्तिश्चनस्वर्गत्रार्किंतुभ
समाहितपदस्य गवज्ज्ञानार्थमिति॥तज्ज्ञानंकदाभविष्यतीतिसावधानःतदामांद्रक्ष्य+नंस्वात्मत्वात्स्नेहःएवमुभयत्रभक्तियुक्तः।तत्रैकोदोषः
पर्यायः२= संभवतिभगवतस्तत्कलत्वाततदभावार्थंसमाहितोभवेत्·+सि॥स्वमध्येलोकान्लोकमध्येचमामितियत्रैवंभक्तिः तन्मध्येस्थिताः
प्रकाशंते॥अतस्तत्वमस्याद्यर्थस्यापिबोधनंस्वरूपेब्रह्मणिभक्त्यर्थंततःस्वस्मिन्नेवस्थितंभगवंतंद्रक्ष्यतीति ॥श्रीकृष्णाय
॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥

Indira Gandhi National
Centre for the Arts

समेग-

त॰ति॰ ननुस्वस्मिन्लोकेचभक्तौकथंभगवत्साक्षात्कारस्तत्राह॥ततइति ततमितिच॥सर्वत्रव्याप्तं॥युनर्ब्रह्मन्निति संबोधनंप्र
१२६ कृतोपयोग्यधिकारसूचकं॥ तदानीमपिभक्तिरस्येवंतदातानेवमद्भक्तानपिद्रक्ष्यसीत्याहआत्मनीति॥ आत्मसंबंधिनिमयि नः
लोकानिति॥नन्वेवंज्ञानस्यकिंप्रयोजनमित्याशंक्यखंडशोज्ञानप्रयोजनमाह भगवान्तत्रलोकेवितत्भगवद्ज्ञानंसर्व
दोषनिवर्तकं॥भगवदधिष्ठानत्वेनसर्वस्यज्ञातत्वात्नकोप्यग्रेदोषःसंभवति योमामजमनादिंचेतिवाक्यात्भगव पापादिनु
ज्ञानेसर्वपापक्षयःसिद्धः ३१ अतोविततज्ञानंयाद्दशमपेक्षितंकश्मलनिरसनेतादृशंरूपमाह॥यदात्विति॥ सर्वभू
तेषुयथादारुष्वग्निमवस्थितंपनिवर्त्तीतःपश्येत्नत्वाकाशवत्॥सहिलोकेएदृतस्वरूपगमनमात्रेणप्रकाशतेननुमथ मेघ॥
तं१

ततआत्मनिलोकेचभक्तियुक्तःसमाहितः द्रष्टासिमांततंब्रह्मन्मयिलोकांस्त्वमात्मनः ३१
यदातुसर्वभूतेषुदारुष्वग्निमिवस्थितं॥पनिचक्षीतमांलोकोजह्यात्तर्ह्येवकश्मलं ३२ ॥

मत्स्वरूपं॥ नेनअग्निरिव घर्षणेनचायमभिव्यक्तोभवति। किंतुतथायोगेननिरंतरभावनयावामनसात्मघर्षणेनवहिरगृहीतानिराक
रणार्थंतयसाचतदभिव्यक्तंभवति स्थितिःप्रथमतएवसर्वेष्वपिदारुषु एकस्मिन्नपिसर्वावयवेभ्योनिर्गतोग्निस्तत्स
एव एकश्चसः भेदकप्रमाणाभावात्॥एवंसर्वत्रविचारंकृत्वायोगेनयदाभगवंतंपश्यति॥पनिचक्षणंपरीक्षदर्शनं॥त एम॰
देवसर्वेषांलोकानांसर्वकश्मलनिरसनंभवति॥अतोलोकेप्ययमर्थःसिद्धइतितवकश्मलनिरसनेकःसंदेहइत्यर्थः॥ १२६
तर्ह्येवेति॥मध्येकश्मलनिरसनंबाधितं॥ ३२ ॥

अन्यत्ज्ञानद्वयमस्तिस्वस्यब्रह्मत्वेनज्ञानंस्वस्मिन्प्रजाज्ञानंच-भगवतिप्रजाज्ञानंसर्वेषामेवास्तीतिनतदत्रनिर्दिश्यतेअन्ययोःफलं
स्वाराज्यंतदाह यदारहितमिति भूतेंद्रियगुणाशयैःरहितमात्मानंस्वरूपेणचिद्रूपेणमयाऔडुलोमिमतवत्मयाऽपेतंआत्मा
नंपश्यन्स्वाराज्यंस्वरूपानंदानुभवंस्वस्मिन्विद्यमानेषुवाआधिपत्यंप्राप्नोति ३३ स्वस्मिन्विद्यमानान्लोकानुत्पानिवचेत्स्रष्टृ
सितदात्वत्हृदयेनकोपिदोषःआलस्यादिरुत्पत्स्यतीत्याह॥नानाकर्मवितानेति यथावद्कार्यकर्त्तावहूनिकाष्ठादीनिप्रसा
र्ययथायथायोग्यंसर्वंकरोतितथादेवतिर्यङ्मनुष्यादिभावजनकंकर्मप्रसार्ययथायोग्यंचेत्प्रजाःस्रष्टुमिच्छसितदाकर्मानुसारेणकरणात्ते

यदारहितमात्मानंभूतेंद्रियगुणाशयैः॥स्वरूपेणमयोपेतंपश्यन्स्वाराज्यमृच्छति ३३
नानाकर्मवितानेनप्रजावह्वीःसिसृक्षतः॥नात्मावसीदत्यस्मिंस्तेवर्षीयान्मदनुग्रहः ३४
ऋषिमाद्यंनवध्नातिपापीयांस्त्वांरजोगुणः यन्मनोमयिनिर्बद्धंप्रजाःसंसृजतोपिते ॥ ३५

आत्माअंतःकरणंनावसीदतिनखिन्नोभविष्यतिइदंज्ञानमात्रेणनभविष्यतीतिसहकार्यंतरमाह॥अस्मिन्कार्येतेतुभ्यंवर्षीयान्नेव
महानेवममानुग्रहोवर्त्ततइत्यर्थः ३४ तस्यानुग्रहस्यस्वरूपंवदन्तत्कार्यमपिविशदयति॥ऋषिमाद्यमिति॥आद्यंऋषिंब्रह्मा
णंत्वांपापीयान्रजोगुणःगर्वजनकःउत्पत्त्यादिविक्षेपकर्त्तावानवध्नातिइत्यनुग्रहः॥तत्रहेतुः॥यद्यस्मात्कारणात्मयिमनोनि
र्बद्धंभगवतिनिर्बद्धंमनोगुणातीतेशुद्धसत्वेवारजसाव्याप्तंनभवति कर्मनिर्दिशति॥प्रजाःसंसृजतइति सम्यगभिप्रायपूर्व
कंप्रजाःसृजतोमनोरजोगुणव्याप्तंभवत्येव॥कर्मस्वभावात्॥कूपाद्बहिःस्थितस्यकूपेलंबमानःपादःकदाचिदपिनयतति॥तथा
मयिनिर्बद्धंमनःकदाचिदपिरजोव्याप्तंनभवतीत्यर्थः ३५ नन्वेतत्ज्ञानेभवति ॥

Indira Gandhi National
Centre for the Arts

त०मु०९
१२७
कृ०३

ममत्वुपलब्धिविषयिकं ज्ञानं ज्ञातंतत्प्रतीयज्ञानं आहोस्वित्स्वरूपज्ञानमितिसंदेहनिराकरणार्थमाह॥ ज्ञातोहमिति॥ तुशब्दःपक्षंव्याव
र्तयति॥ अद्येतिपूर्वंज्ञानंव्यावर्त्यते पूर्ववद्बहिःस्थितंभगवंतंज्ञात्वाक्रियया प्राप्तव्यइतिज्ञातवान्॥ तदद्येतिव्यावर्त्यते अंतःस्थितो
भगवान्तपसाभक्त्याच आविर्भूतंभगवंतंदृष्ट्वाविचारपूर्वकंयज्ज्ञातवान् एतज्ज्ञानंतदाह ज्ञातोहमिति॥ ननुकिमाश्चर्यंवहवएवत्व
स्वविदस्त्वांजानंतीतिचेत्तत्राह॥ दुर्विज्ञेयइति॥ देहिनामहंदुर्विज्ञेयएवदेहाभिमानिनः स्वदेहंपश्यंतोमामपिपश्यंतः कदाचिदपिनमां
ब्रह्मत्वेनज्ञातुंशक्नुवंति॥ नह्यंतःकामेस्थितेकामिनीस्पर्शः कामोद्बोधकोनभवति॥ तदभावेतुकामिन्यपिपुरुषांतरवत् प्रतिभाति॥
एवंभगवानपिसच्चिदानंदविग्रहः प्राक्तनेविग्रहेविद्यमानेतदभिमानवतामस्यत्रविनियोगा आत्मत्वेनदृश्यते॥ स्वविनियो

ज्ञातोहंभवतात्वद्यदुर्विज्ञेयोहिदेहिनां॥ यन्मांत्वमन्यसेयुक्तंभूतेंद्रियगुणात्मभिः ३६ तु
भ्यंमद्विचिकित्सायामात्मामेदर्शितोवहिः॥ नालेनसलिलेमूलंपुष्करस्यविचिन्वतः ३७ ॥

गात्भगवंतमपिपरंदेहिनमेवमन्यते अतोदेहिनांदुर्विज्ञेयः॥ किंचयस्मात्कारणात्त्वमेवपूर्वंमांभूतेंद्रियगुणात्मभिर्युक्तंमन्य
से भूतानिपृथिव्यादीनि॥ देहारंभकाणि इंद्रियाण्युभयविधानि गुणाविषयाः॥ आत्माअंतःकरणचतुष्टयं॥ सर्वैरेवतत्वा
द्योर्युक्तं॥ अन्यथावहिरन्वेषणंनसंभवति ३६ अतएवमयातुभ्यंमत्स्वरूपंनप्रदर्शितमित्याह तुभ्यमिति मद्विचिकि
त्सायांमत्स्वरूपज्ञानेच्छायांमे आत्मामयावहिर्नप्रदर्शितः॥ अन्यथातत्रोत्पन्नमन्यथाज्ञानंत्वद्बुध्यासंवादिज्ञातमितितत्वस्व
रूपज्ञानमेवनस्यात्॥ अतोंतर्वहिःस्थितोप्यहंनवतथाज्ञातंमाभवत्विति बहिःस्वात्मानंनप्रदर्शितवान्- नचवक्तव्यंमया ए८०
नप्रोतमितिअन्यथाजलेअन्वेषणार्थंनगच्छेःस्तदाह॥ नालेनेति॥ नालद्वाएसलिलस्यमध्येपुष्करस्यमूलविचिन्वतस्तेतुभ्यमि १२७
तिसंबंधः ३७ ॥

॥ तर्हिइदानींमयाज्ञातमितिकिंप्रमाणंतत्राह॥ यच्चकर्थांगेति॥ यद्यस्मात्कारणात्हेअंगमत्स्तोत्रंचकर्थ॥ ननु
स्तोत्रमात्रेणकथंस्वरूपज्ञानंतत्राह॥ मत्कथाभ्युदयांकितमिति॥ ममकथाअभ्युदयश्चउभाभ्यामंकितं॥ स्तोत्रेणभव
तास्वज्ञानंसर्वंप्रकटितं॥ नस्तोत्रंमत्कथयासंबद्धं मदीयैववार्तातत्रकथिता मत्कथेतिवचनात्अन्यथातस्मि
न्समारोप्यनकथितेतिसूचितं किंतुयाकथासामदीयैवविशेषतोपितवज्ज्ञानंज्ञातंयतोमदभ्युदयेनापिअंकि

यच्चकर्थांगमत्स्तोत्रंमत्कथाभ्युदयांकितं य
द्वातपसितेनिष्ठासएषमदनुग्रहः ३८ ॥

तं॥ अभ्युदयोनामसर्वोत्तमरूपंचरित्रं॥ ननुकथंपूर्वंममज्ञानंनजातंपश्चाद्वाजातमितितत्राह यद्वातपसितेनि
ष्ठेति॥ यद्वेतिवचनात्पूर्वार्द्धंपुनरप्यनुषज्यते॥ यत्त्वयाएतादृशंस्तोत्रंकृतंयद्वातेतपसिएवंनिष्ठाएषसर्वोपि
ममानुग्रहएव॥ अतःपूर्वंअनुग्रहाभावाददर्शनंपश्चादनुग्रहाद्दर्शनमिति॥ ननुतपसादर्शनं नपरस्त्वनुग्रह
सूचकं ३८ ॥

Indira Gandhi National
Centre for the Arts

नपु० १२८ एवंतसज्ज्ञानवुद्धिसंयोगः पूर्वंजातएवेत्यभ्यानदुपपादितं॥ इदानींचित्तस्यभगवच्चरित्रपरतायाप्रार्थितात्तत्राह॥ प्रीतोहमिति
चतुर्भिः॥ चित्तंभगवच्चरित्रपरं तदैवभवतियदिभगवान्प्रीतोभवति॥ प्रीतः केनज्ञायतइतिसंदिग्धं तत्रभगवानाह॥ अस्त्विति॥
भगवांश्चेद्भुभाशंसनंकरोतितदाप्रीतोभवतिशुभाशंसनंपरमेष्ठः करोति॥ अतः सर्वथाआराधितः परमेष्ठश्चेद्भवतितदा
कृत्याप्रीतिप्रीत्यनुसारव्यापारेक्रियमाणोपितस्यकालादिवशात्केनाप्यंशेनतदानुगुण्यंचेन्नभवेत्॥ ततोपिभजनेपुन
रेवकरणेपुनर्भजनेअशक्यमिवभगवान्मन्यमानः सत्यवाक्सत्यसंकल्पः तस्येष्टमाशंसते॥ तदातस्यसत्यवाक्यात्
सर्वप्रतिबंधकनिवृत्त्याभगवत्प्रसादोपयिकमेवतस्यसर्वंसिद्ध्यति॥ तदाप्रसन्नोभवतीतिनात्रान्योन्याश्रयः॥ तेभद्रमस्त्वि

प्रीतोहमस्तुभद्रंतेलोकानांविजयेच्छया यदस्तो—
षीर्गुणमयंनिर्गुणंमानुवर्णयन् ३९ ॥

तियोजनायामयमेवार्थोपिस्यते॥ अनुवादेतुअस्त्वितिप्रार्थनानोपपद्येतप्राप्तौचलोटोनुवादस्यवस्मात् अतस्तेभद्रमे
व॥ त्वदुद्देश्यचरित्रपरताभविष्यतीत्यर्थः॥ लोकानांस्वाधीनकरणंचत्वदभिलषितंसेत्स्यतीति॥ ननुचरित्रपरतैवममा
भीष्टाननुलोकानांविजयइतिचेत्तत्राह॥ यदस्तोषीरिति॥ यदिलोकविजयेच्छानस्यात्तदैतावत्स्तोत्रंनकृतंस्यात्॥
एवंप्रकारेणचनकृतंस्यात्॥ गुणमयंअनंतगुणपरिपूर्णं॥ निर्गुणंसत्वादिभिःप्राकृतैर्गुणैरतीतं॥ निर्दोषपूर्णगुण एम० १२८
विग्रहप्रकारेणमामनुवर्णयन्यदस्तोषीः॥ अतोज्ञापतेस्वाभिलाषस्यादृशोषुगुणेषुइति ३९ ॥ ॥

तर्हिस्तोत्रमात्रेणकथमेतावत्फलंभविष्यतिनहिस्वाभिलषितकीर्तनमात्रेणअभिलषितंप्राप्यतेपितत्राह॥ यएतेने
ति॥ अनेनस्तोत्रेणयद्यन्योपिस्तोत्रंकुर्यात्तस्याप्यहंप्रसन्नः किमुततुभ्यं॥ एतेनस्तोत्रेणपुमान्स्वतंत्रः॥ नित्यंनियमेन
मांभजेत्॥ भगवत्परिचर्यायांपूजायांवाइदंस्तोत्रंस्वयंकुर्वन्नेवअर्थानुसंधानपूर्वकंत्वमिवयःकुर्यात्कृत्वाचपरिच

यएतेनपुमान्नित्यंस्तुत्वास्तोत्रेणमांभजेत् तस्या
शुसंप्रसीदेयंसर्वकामवरेश्वरः ४० ॥

र्यांकुर्यात्तस्यशीघ्रमहंप्रसन्नोभवामि॥ स्तोत्रंनपरिचर्यांगंप्रसादः परिचर्याफलंशेघ्र्यंस्तोत्रफलं कालकृतदोष
निवर्तकमितिफलितं तेनकिंभवेदित्याशंक्याह॥ सर्वकामवरेश्वरइति॥ सर्वेयेकामवराअभिलषितपदार्थसिद्धयः
तेषामीश्वरइति॥ अतोमयिप्रसन्नेसर्वेकामास्तस्यस्वतःसिद्धाइत्यर्थः ४० ॥

Indira Gandhi National
Centre for the Arts

ननुकिंपरंपरयास्तोत्रेणकामाएवफलिताभवंतीतिकुतोनोच्यतेतत्राह॥ पूर्तेनेति॥ पूर्तंखातादि॥ तपःकृच्छ्रादि॥ यज्ञा अग्निष्टोमादयः साधनत्वेनकृताः दानानितुलापुरुषादीनि॥ योगाआत्मसंयमादयः समाधिश्चित्तैकाग्र्यं॥ एवंवा त्यधर्मेण॥ केवलंभोगनिरोधेनक्रियाभावरूपशारीरेणवैदिककायवाङ्मनःकृतेनलोकोपकाररूपेणइंद्रियांतःकर णनिरोधेनचसर्वप्रकारेणापिधर्मेणयत्फलंसिद्धमितिनितरांचश्रेयोरूपमपि॥ तत्रविचारेक्रियमाणेकिंफलमितितद्दे

पूर्तेनतपसायज्ञैर्दानैर्योगैःसमाधिना रा
द्धंनिःश्रेयसंपुंसांमत्प्रीतिस्तत्वविन्मतं ४१

वफलंयत्फलमेव॥ नसाधनंनाप्यफलं॥ तत्रमोक्षस्यापिसर्वाभिलषितत्वाभावात्वैषयिकसुखनिवर्त्तकत्वेननन त्फलत्वमेव॥ यथावैषयिकानांगाथा॥ अपिवृंदावनेशून्येशृगालत्वंसइछति॥ ननुनिर्विषयंमोक्षंकदाचिदपिगो तमेति॥ अतःसर्वसाधारणमेकंनिर्णेतव्यं॥ यत्सर्वेषामेवसर्वफलरूपंभवति तत्रसतामयंनिर्द्धारः॥ मत्प्रीतिरि ति तस्याएवतथात्वात्॥ तेहिखलुतत्वविदःसर्ववस्तूनांयाथात्म्यंजानंति अतस्तेषांसंमतं ४१ ॥ १२७

ननुबहूनांप्रीतिहेतूनामुक्तत्वात्मुख्यंतवप्रीतिसाधनंकिमित्याकांक्षायांस्वयंहेतुपूर्वकंजीवसंमत्यर्थमाह अहमात्मेति॥ सर्वेषा मात्मनामहमात्मा॥ यथासर्वस्यैवगंगाजलस्यगंगा॥ यथावासर्वस्यापिमृदःपृथिवीस्थूला॥ यथावापत्रशाखादीनांवृक्षः॥ ए वमहंसर्वेषामात्मनामात्मा धातरितिसावधानतयाकरणार्थंसंबोधनं॥ नन्वात्मत्वनिरूपणेकिंफलंतवतुतदात्मत्वेहानि रेवपूर्णत्वात्तेषांचक्लिष्टत्वात्तेषामपिनोपकारःस्वतएवदुःखितत्वात् यद्यपितोनभवतिहितकर्तृत्वंयंचेतनरूपंस्वतं त्रपुरुषार्थरूपंसत्तत्किंज्ञानंभवेत् यथालोकेस्वतोऽदातात्ततोपिनदाताभवति तस्माद्नुवादार्थएवसर्वोपिभगवद्वादइत्याशं क्याह॥ प्रेष्ठःसन्प्रेयसामिति॥ प्रेयसामप्यहंप्रियः अतःप्रीतिविषयत्वात्मयिरतिंकुर्याद्देहादौचरतिंनकुर्यात् देहादिस्त्वात्मसं

अहमात्मात्मनांधातःप्रेष्ठःसन्प्रेयसामपि अतोम
यिरतिंकुर्याद्देहादिर्यत्कृतेप्रियः ४२ ॥ ॥

बंधात्प्रियः॥ करोम्येवाहंसर्वमेवहितं॥ परंमयिस्नेहाभावात्जीवास्तुसुखंनगृह्णंति। अतोयदिमयिरतिंकुर्यात्तदासुखंदत्तंगृह्णीया त्पश्चात्कृतार्थएवभवेत्॥ ज्ञानमप्येतदर्थमेवमत्कृतंगृह्णीयादितिभिन्नतयापिभजनेभजनफलत्वेनगृह्णीयात्॥ तत्तस्माज्ज्ञानात्॥ तद्विचारेणेष्टमपिमद्विचारेणनभवतीतिनोच्यतेज्ञानं ज्ञानापेक्षयापिप्रीत्याशीघ्रंगृह्णातीतिप्रीतिरेवोच्यते तेभ्यःस्वकीयंसर्वमेव दीयतइतिस्वातंत्र्यमपिदत्तमितिकुर्यादितिबोध्यते॥ अतःप्रीत्यादिकमपिप्रशंसनार्थमेवोच्यते॥ वस्तुतस्तुमयिरतिमेवकुर्यात् मत् कृतग्रहणार्थं प्रीतस्त्वहंसर्वदास्वभावतः अग्रहणादप्रीतएवंयथास्वयमात्मानमेवाक्रोशतितन्निवृत्त्यर्थंरतिरुच्यमानानित्यप्री तिपरत्वेनोच्यते अनेनैवभगवच्चरित्रपरताभवति भगवत्कृतमेवचरित्रं ४२ ॥ श्रीगोपालायनमः ॥ ॥

स्वा.र.त.
सुख।
स्नानं ४८
भीवे२

Indira Gandhi National
Centre for the Arts

त.सु.९ १२० एवंद्वितीयंप्रश्नमुपपाद्यवेदाविस्मरणलक्षणंततीयंउपपादयति॥सर्ववेदमयेति॥अयंतवदेहोवेदमयएवतेनवेदाविरोधेनदे
हेनैवकरणेनसर्वंकुरु॥तावतैववेदाःस्थास्यंतीतिभावः ननुकेवलवेदरूपस्यकथंकरणत्वंनहिदेहमात्रंकरणंकिंतुप्रयत्नाविष्टं
अतःस्वप्रयत्नमन्यत्रव्यापारयित्वाकरणत्वेनदंडादिवपरिदृश्यते वस्तुतस्त्वात्मैवकरणंतत्राह॥आत्मनेति आत्मसहितेनदेहे
नएकभावापन्नेनोभयेनेआत्मत्वं॥अनेनमद्धर्ममपिसामर्थ्यंतत्रैवदत्तमितिसर्वंत्वयाकर्तुंशक्यमितिफलं॥ननुजीवायथाआत्मानस्तथाअ
हमपीतिकथंममसामर्थ्यंभवेत्तत्राह॥आत्मयोनिनेति आत्मायोनिःकारणंयस्यमदुत्पन्नत्वात्तवसर्वसामर्थ्यंसिद्धमितिभावः॥अतःय
थापूर्वंप्रजाःसृजयाश्चप्रजामय्यनुशेरत इति॥भगवदीयानामपिसृष्ट्याज्ञा एवंचतुर्विधाअपिजीवास्त्वयास्रष्टव्याइति ४३ एतावदुप

सर्ववेदमयेनत्वमात्मनात्मात्मयोनिना प्रजाःसृजयथापूर्वंयाश्चमय्यनुशेरते ४३ मैत्रेयउवाचतस्माइ
दंजगत्स्रष्ट्रेप्रधानपुरुषेश्वरः॥व्यज्येदंस्वेनरूपेणकंजनाभस्तिरोदधे ४४ इतिश्रीभागवतेमहापुराणेतृति
यस्कंधेनवमोध्यायः ॥

दिश्यभगवानंतर्हितइत्याह॥तस्माइति॥जगत्स्रष्ट्रत्वादेवतस्मैनाधिकंकिंचिद्देयं॥न ९९ ...भगवदा
नुतत्साधनानिचेत्तदनुगुणानिनभवेयुःतदाकिंकर्तव्यमित्याशंक्याह॥प्रधानपुरुषेश्वरइतिप्रधानंपुरुषश्चतयोरीश्वरः भगवदा
ज्ञयातावपिसामग्रीकौतदनुगुणौभवतः तावतापितस्याज्ञानमाशंक्यएकवारंसर्वंएवजगत्प्रदर्शयामासएवंकुर्वितिज्ञापनार्थंतदाह॥
व्यज्येदमिति॥इदंजगत्मकदंस्तत्वास्वेनैवरूपेणअभिव्यक्तिकरणेन हेत्वंतरउत्पत्त्यादिकमपेक्षतेकिंतुस्वस्मिन्नेवशरीरेविद्यमानंजग
त्साधारंप्रकाशितवान्॥स्वेनरूपेणेत्यग्रेपिसंबध्यते॥ननुतद्रूपंस्थापयित्वागतःकिंतुतेनरूपेणतिरोहितवान् कंजनाभइतितद रम० भागवत २.
तिरोधानेजगत्कर्तुंनशक्यतइतिसूचितं॥नहिकश्चिद्भगवदीयोभगवतउपरिसृष्टिंकर्तुंशक्नोतीति ४४ इतिश्रीभागवतेसुबोधि १२०
न्यांश्रीमद्वल्लभदीक्षितविरचितायांतृतीयस्कंधेनवमाध्यायविवरणं ॥ ॥

लो० विषयाःसर्गाः२ कालेनाग्रहणेतुसर्गोकार२

जगतोभूतसर्गस्तुब्रह्मणोत्रनिरूपितः भगवत्कृपयायुक्तस्तादृशस्त्वनिदानतः १ मात्राणिसर्वरूपाणिदशस्त्राण्यतोत्रवै॥दशमे
विनिरूप्यंतेमात्रत्वंचापिकालतः २ कालेनैवग्रहीतास्तेभोग्याभोक्तारमेवतु ... भूतानांमात्रसंबंधरूपणार्थंकृतिःपुरा ३ ब्रह्म स्वरूपाणां...
र०.. णानिर्मिताम्प्राहद्वयंमत्रनिरूप्यते॥प्रथमतोब्रह्मनिर्मितमात्रानिरूपणार्थंभगवदाज्ञयाब्रह्माकथंकृतवानितिभागवत्सेवकधर्मज्ञानार्थं
विदुरःस्वयमुल्लासेनपृच्छति॥अंतर्हितेभगवतीति भगवतिधर्मिण्यंतर्हितेतद्धर्माणामप्यंतर्भावआवश्यकइतिब्रह्मणाकथंजगत्स
ष्टुंशक्यतइतिप्रश्नः॥लोकपितामहत्वात्जनकस्यापिजनकत्वात्तज्जनितकार्यदर्शनेनसप्रपंचोज्ञातएवेतिसंदेहः॥उपादनेक

विदुरउ०॥अंतर्हितेभगवतिब्रह्मालोकपितामहः॥प्रजाःससर्जकतिधादैहिकीर्मानसीर्विभुः १
येचमेभगवन्पृष्टास्त्वय्यर्थाबहुवित्तम तान्वदस्वानुपूर्व्येणछिंधिनःसर्वसंशयान् २ ॥

रणद्वयंदेहोमनश्च वाक्तुवैदिकसृष्टौप्रविशति॥अतःकरणद्वयमेवकतिधप्रजाःससर्जेति॥प्रकारभेदेभगवदीयंज्ञानम
पेक्षतइतितथोक्तं॥ननुदेहेनैवकरणमुचितंअतोमानसःकथंपृच्छ्यतेतत्राह॥विभुरिति सर्वप्रकारेणकरणसमर्थः १
अग्रेनिरूप्यमाणस्यापिजगतोभगवदीयत्वबोधार्थंपूर्वोक्तानपिप्रश्नान्स्मारयति॥येचमेभगवन्पृष्टाइति॥भगवन्नितिसंबो
धनंअविस्मरणेहेतुः॥त्वयीतित्वत्समीपेअर्थाइति॥तेप्रश्नाःप्रयोजनरूपाः अतःसर्वथाज्ञातव्याः॥बहुवित्तमेतिसंबोध
नंउत्तरदानेहेतुः तेषामानुपूर्व्येणकथनप्रार्थनंस्वबुद्ध्याग्रहणार्थं॥उत्तरंचयथानिःसंदिग्धंभवतितथावक्तव्यंतदाहछिं
धिनःसर्वसंशयानिति २ ॥

Indira Gandhi National Centre for the Arts

त॰सु॰१० नन्वयं पृथक्प्रश्नः पृष्टं द्वयमपि आदरेणाहेत्याह॥ एवं संचोदित इति प्रीतः प्रत्याहेति प्रथमप्रश्नोत्तरं पूर्वोक्तान् प्रश्नांस्तु
१३१ अविस्मृतान् हृदिस्थानेव॥ अथेति भिन्नप्रक्रमेण॥ ननु प्रथमप्रश्नशेषतया भार्गवेति संबोधनं भगवद्विशेषतया सर्वनिरू
पणमिति ज्ञानार्थं २ वक्ष्यमाणानि तानि तु पदानि पुनर्न व्याख्यायन्ते विशेषार्थाभावे॥ तत्र प्रथमप्रश्ने अंतर्हिते पि
भगवान् स्वकीयान् षड्गुणान् ब्रह्मणि स्थापयित्वा गत इति ब्रह्मकृतान् अर्थान् षड्भिः श्लोकैराह॥ तत्रापि निर्दिष्टेन कर्तव्यमिति
दोषाभावार्थं श्लोकत्रयं॥ तपो ज्ञानं कृतिश्चेव दोषाभावश्च वर्ण्यते आलोचन कृतिश्चेतदुपपादनमेव च प्रथमं भगवद्
अ॰१

सूत उ॰॥ एवं संचोदितस्तेन क्षत्त्रा कौषारवो मुनिः॥ प्रीतः प्रत्याह तान् प्रश्नान् हृदिस्थानथ भार्गव॥ ३
मैत्रेय उ॰ विरिंचोपि तथा चक्रे दिव्यं वर्षशतं तपः॥ आत्मन्यात्मानमावेश्य यथाह भगवानजः ४

ज्ञा यथा ज्ञाता तथा ब्रह्मा कृतवानिति धर्माना विरिंचोपीति भगवानंतर्हितः विरिंचोपि तथाभूत्वा तत्रांतर्हितः सन्
यथा भगवदाज्ञा ज्ञाता तथा कृतवान्॥ अंतस्तथात्वस्याति ऐधाना भावे बहिर्जगत्कर्तृत्वं न संभवतीति तदुक्तमपीति दिव्यं भगवन्मार्गस्य
वर्षशतमिति संध्यांशीकृतयुगस्य चतुर्थो भागो निरूपितः॥ पूर्वं च चतुर्थः। तपसि अन्वेषणे च॥ चतुर्थभागे तु सर्वपदा
र्थनिर्माणं भविष्यति ततः उत्तरेषु सर्वेषु युगप्रवृत्तिः एतत्सर्वं सूचयितुं दिव्यं वर्षशतमित्युक्तवान्॥ केवलतपो धर्मः स्क॰
भगवदीयो न भवतीति तपसि विशेषमाह॥ आत्मन्यात्मानमावेश्येति॥ भगवत्यंतःकरणमावेश्य तपःकरणं॥ भगवदु १३१
क्तमित्येव कृतवान् तदाह॥ यथाह भगवानज इति ४ ॥

ततो यज्जातं तदाह॥ तद्विलोक्येति तपसा तस्य ज्ञानं जातं तज्ज्ञानविषयमाह अब्जसंभूतो ब्रह्मा यदधिष्ठितः यत्पद्म
मधिष्ठाय स्थितः तत्पद्मं दृष्टवान् तस्य विलोकनं विशेषप्रकारेण अतस्तत्कृतं सर्वमेव ज्ञातवानित्यर्थः॥ तत्कालकृतवीर्ये
ण वायुना पद्मं अंभश्च कंपितं॥ वायुना कंपितत्वज्ञानं वायोश्च प्रलयकालीनत्वं॥ देशांशित्वेन वायोः परिज्ञानं तस्मिन्न

तद्विलोक्याब्जसंभूतो वायुना यदधिष्ठितः पद्ममंभश्च तत्कालकृतवी
र्येण कंपितं ५ तपसा ह्येधमानेन विद्यया चात्मसंस्थया॥ विवृद्ध
विज्ञानबलो न्यपाद्वायुं सहांभसा ६ श्रीकृष्णाय नमः ॥

नुपसंहृते कार्यकरणं च न स्वस्थं भवेत् कालेनापि दैत्येभ्यो वलं दीयते ५ ततो धर्मज्ञानाभ्यां यत्कृतं तदाह॥
तपसेति एधमानेन तपसा विद्यया च विवृद्धविज्ञानस्य वलं यस्य तादृशः अंभसा सह वायुं पीतवान्॥ ननूपासना
पूर्वमेव निवृत्तेति कथमस्या ज्ञानवलजनकत्वं तत्राह आत्मसंस्थयेति अंतःकरणे स्थानित्यतया स्थिता मनसा
ब्रह्मानित्यमेव भगवत्परिचर्यां करोतीत्युक्तं ६ ॥ ॥

त.भु.१० एवंदोषाभावंनिरूप्यभयकंपादिहेतोर्वायांवंभस्तिचनिष्टत्ते ततोयत्कृतवान्तदाहश्लोकत्रयेण॥ तत्रप्रथमं पूर्वस्थानंतस्य
१३२ प्रवुद्धमित्याह तद्विलोक्येति यत्स्लेनअधिष्ठितंपुष्करंवियद्व्यापिविलोक्य॥ प्राक्पूर्वदिवसे॥ अनेनैवप्रकारेण अने
नैवचपद्मेनलोकान्कल्पितास्मिकल्पयितास्मीतिअचिंतयत्॥ कल्पयितास्मीतिलुट्चिंतनंविमर्शः॥ ब्रह्मणः शतवर्षे
शतंकल्पाभवंतीतिकल्प्यतेप्रत्यष्टंदृष्टरूपवत्कल्पाइतिदृष्टरूसाम्यात्तत्त्ववर्षांतरएवअन्यथात्वंस्पष्टं॥ तेनैकैकःकल्पः
संवत्सरएवहोएवसंख्यापरिमितः॥ मध्येत्वतिसूक्ष्मभेदः आकलयितुंनशक्यतइतिननामांतएपादकत्वं तथासतिप
प्रकल्पाअपिषष्ण्युत्तरशतत्रयपरिमिताभवंतितदापूर्वकल्पेपिपद्मेनैवजगन्निर्माणंकृतमितिअनेनलोकान्प्राग्ली

तद्विलोक्यवियद्व्यापिपुष्करंयदधिष्ठितं॥ अनेनलोकान्प्राक्लीनान्कल्पितास्मीत्यचिंतय
त् ७ पद्मकोशंतदाविश्यभगवत्कर्मचोदितः॥ एकंव्यभांक्षीदुरुधात्रिधाभाव्यं द्विसप्तधा ८

नानितिविमर्शःसंगच्छते ७ तदापूर्ववदेवकृतवानित्याह॥ पद्मकोशमिति तदाज्ञानानंतरंतदेववापद्मकोशमा
विश्यएकंपद्मकोशमुरुधाव्यभांक्षीत्॥ ननुभगवन्नाभिकमलंकथमेवंभंक्तुमर्हतीत्याशंक्याह॥ भगवत्कर्मचोदितइ
ति भगवदीयस्सृष्टौभगवतएवकर्मात्रसंक्रांतमस्ति तेनप्रेरितः तदाभगवत्कर्मणाप्रेरितस्यभगवत्कर्मरूपत्वात्तन
तस्यापराधःकार्यंतत्कृतस्यखंडनाह॥ एकंव्यभांक्षीदुरुधेतिएकमेवतदुरुधाव्यभांक्षीत्॥ अवांतरलोकभेदेनसहस्रशः राम०
खंडान्कृतवान्॥ जातिभेदेनविभागेक्रियमाणेसत्वादिभिः कृत्वात्रिधैवभाव्यं प्रसिद्धलोकव्यवहारेणभेदेक्रिय १३२
माणेद्विसप्तधाव्यभांक्षीत्॥ चतुर्दशलोकभेदेनविभागंकृतवान् ८ ॥

।अ

ननुसर्वेषामेवलोकानांजीवाधिष्ठानानांक्रियमाणत्वात्कथंचतुर्दशलोकेष्वेवकोटिशोजीवसंघास्यास्संतीत्याशंक्याह एता
वानेवेतिजीवानांस्थानभूतस्यलोकस्यसंस्थयासम्यङ्मर्यादयाभेदोविभागःएतावानेवचतुर्दशधैवत्रिविधाएवहिसर्वेजी
वाः मध्येत्रयोगुणाः अहंकारस्यत्रिविधत्वात् तामसाःसप्तपंचमहाभूतानितन्मात्राःकार्यंचेति चत्वारःसात्विकाः अंतः
८१

एतावानजीवलोकस्यसंस्थाभेदः समाहितः धर्म
स्यह्यनिमित्तस्यविपाकःपरमेष्ठ्यसौ ९ ॥

करणस्यचतुर्विधत्वात् अत्रैवहिसर्वेजीवाःसमाहिताःभवंति सम्यगाहितःस्थानविभेदेनसम्यक्स्थापितोभेदः॥ नन्वे
वंकथंसामर्थ्यंब्रह्मणः भगवदाज्ञायामपिस्वतःसामर्थ्यस्यापेक्षितत्वादित्याशंक्याह धर्मस्यह्यनिमित्तस्येति अनिमित्त
स्यनिष्कामस्यदशशताश्वमेधस्यशतजन्मसाधितस्यविपाकःफलं असौपरमेष्ठी वहुजन्मसाधितकर्मफलत्वात् ब्र
ह्मणस्तथाकरणंयुक्तमित्यर्थः ९ ॥

Indira Gandhi National
Centre for the Arts

त·मु१०
१३३

एवमाधारभूतंजगत्लोकानांमात्रात्वेननिरूपितं आधेयभूतस्यलोकत्वात्मात्रात्वंनभविष्यतीत्याशंक्यकालवशात्जीवस्यापिविषयत्वमितिकालप्रस्तावना भगवतउत्पत्त्यादिकर्तृत्वंश्रुतवतःकालविभेदेनकालमेवसर्वहेतुंमन्यमानस्यकालजिज्ञासाउत्पन्नातदाएच्छतिविदुरः॥यद्दात्थेति॥बहुरूपस्यहरेरद्भुतकर्मणः लक्षणंयदात्थतद्यथावद्वर्णयेतिसंबंधः॥ कालोहिभगवतोलक्षणंअसाधारणोधर्मः॥जगत्कर्तृत्वंनामजगतउत्पत्तिकालइत्यर्थः॥तल्लक्षणसहितः यः आत्मासभ

विदुरउ॰यद्दात्थबहुरूपस्यहरेरद्भुतकर्मणः का
लाख्यंलक्षणंब्रह्मन्यथावद्वर्णयप्रभो १० ॥

गवान्अतएवबहिरेवभगवान्गरुडध्वजः॥भगवतोऽतिसूक्ष्मत्वात्लक्षणमप्यतिसूक्ष्मंदुर्ज्ञेयं॥कलयतीतिकालःकलनंवा॥ सर्वस्यापिवस्तुनः आकलनंग्रहणंज्ञानंवाभगवद्धर्मोभवत्येव॥अतएवकालइत्याख्यायस्यलक्षणस्य॥तस्यकलनंनसाधारणं॥अद्भुतकर्मत्वात्॥यथाआकलनेज्ञातेभगवानद्भुतंकर्मकरोति॥यथावाआकलय्यएकःसन्बहुधाभवति॥यथावा राम०
आकलय्यसर्वेषांदुःखंस्वयंदूरीकरोति॥मार्गत्रयंवाप्रकाशयति॥तादृशस्यलक्षणभूतस्यकालस्यस्वरूपमवश्यंज्ञातव्यं॥ १३३
अतोऽस्माकंतज्ज्ञानार्थंत्वंवर्णय समर्थत्वात्तदाह प्रभोइति १० ॥

विमदत.म.नं४=

एवंकालस्यअवश्यंनिरूपणीयत्वेअसाधारणधर्मत्वात्कालंलक्षयति गुणव्यतिकराकारइति कालोह्यमूर्त्तोधर्मः अतएवनप्रत्यक्षः किंतुकार्यवशादनुमेयः अतस्तस्यलक्षणंनेदमित्थतयाचवक्तुंशक्यं कालस्तदैवलक्षणंभवेत्यदिधर्मिणोधर्मेभ्यःकार्याच्चविलक्षणःस्यात् तदेवासाधारणंभवेत् तत्रत्रितयवैलक्षण्यार्थंलक्षणेविशेषणत्रयं तत्रप्रथमंगुणव्यतिकराकारः कालः गुणानांव्यतिकरः अन्योन्यसंश्लेषः आकारोयस्य अमूर्तत्वात्कार्यद्वारैवलक्षणंकार्यंपुनः प्रकृते

मैत्रेयउ॰गुणव्यतिकराकारोनिर्विशेषोऽप्रतिष्ठितः पुरुष
सकलउपा
नंयत्रतमात्मा
नं१
स्तदुपादानमात्मानंलीलयासृजत् ११ ॥ श्रीगोपालयनमः

परम२ गुणाः१

र्गुणसाम्यावस्थारूपायाः॥येनभगवद्गुणेनगुणानांव्यतिकरोभवति॥प्रथमतःसत्वादिरूपेणविभिन्नाभवंति॥ततःलब्ध्वाअन्योन्यंचमिलिताभवंति सगुणःकालइत्यर्थः॥इदमेवभगवतःआकलनं क्रियाशक्तिरूपः प्रथमोगुणोमुख्यःयोअग्रेप्रकटोजातः तत्रक्रियाशक्तिभेदाअन्येपिसंति तेषांविशेषनामानिवर्त्तंते॥सएवक्रुतेनीछालोकामयतेतिकामःतथातस्यलोकप्रसिद्धकार्यधर्मवत्वेनकार्याधेयतयानविशेषणंसिद्धं॥यथामनोधर्माइच्छाकामादयः तथानकस्य ॥

Indira Gandhi National
Centre for the Arts

त॰मु॰१० १२४ चित्कालोधर्मः परं सर्वाधारत्वेनैव प्रतीयते इहेदानीमित्यादिशब्दैः॥ अतोयंनिर्विशेषः कस्यचिद्धर्मत्वेतत्र प्रतीये
त घटेकालइतिभ्रमोकालइतिप्रतीयतेत्विह घटइतितस्मात्सर्वविशेषरहितः गुणक्षोभहेतुः कालइतिलक्षणं॥
किंच वहवएवधर्माः॥ आकाशादीनांव्यावर्त्तकाः विशेषास्ततो विशेषरहिताभगवद्धर्माः संति अन्यथानित्यानां
परमाणूनां अतींद्रियाणांव्यावृत्तिर्नस्यात् तद्व्यावृत्त्यर्थमाह॥ अप्रतिष्ठितइति प्रतिष्ठासमाप्तिः पर्यवसानंतद्रहि
तइत्यर्थः॥ विशेषास्तुप्रतिष्ठिताः॥ अन्यथापरमाणूनांपरिछेदोनस्यात् अतः असंस्थितः अप्रतिष्ठितः कालः। सर्वएवपदा
र्थाः संतिष्ठंते कालस्तुनसंतिष्ठते॥ एवंकालस्यलक्षणमुक्त्वा सगुणोभगवता किमर्थंगृहीतइतिजिज्ञासयातस्माप्रासंगिकं कार्यगु =
णक्षोभरूपंजगदाधारत्वं तत्समुख्यंप्रयोजनंनभवतीतिमुख्यंप्रयोजनमाह॥ पुरुषस्तदुपादानमिति॥ पुरुषोभगवान्कारण
रूपः सत्वगुणनेवकर्तृत्वादिभावापन्नान्कृत्वाजगत्करोति॥ तत्रकर्तृत्वंस्वरूपधर्मएवभवति क्रियाशक्तिस्तस्यनिर्वाहिका ८
समवायिकारणंतुकिंभवेत्॥ अविकृतैवसाभवति॥ सर्वत्रसाक्षात्कार्येषुअविकृतमेवसमवायिकारणंभवति॥ यथाघटे
मृद्रूपापृथ्वी खननादिनापरिछिन्नाकर्तृक्रिययाआत्मउपादानत्वमापद्यते॥ एवंभगवानपिआत्मानंसृजति॥ कालमुपा
दानंकृत्वा॥ एकैवपृथिवी कुलालचक्रचीवरदंडमृद्रूपास्वधर्मैरेवस्वयंघटरूपाभवति तत्रान्येसर्वेधर्माःकुलाला
यः जीवसंबंधंप्राप्यैवकर्तृत्वादिभावमापद्यंते॥ कुलालशरीरेदेवदत्तोजीवः दंडेस्थावरः चीवरेपिकार्यासः स्थावरएव॥
चक्रेपिपर्वतः विकारेतुविकारएव॥ एवंसर्वत्र॥ तस्माद्यस्मिन्नंशेनकोपिविकारः प्रविशति कर्तृकर्मव्यतिरिक्तभगवद्ध एम॰ १२४
र्मः कालः। सआत्मानंस्वयमकुरुतेतिश्रुतेः॥ लीलयेतिविशेषप्रयोजनाभावः तदुपादानमतिसमीचीनं॥ कर्तुःप्र

नन्वेतस्यकालस्यभगवतः कापेक्षाउपादानंस्वरूपंप्रकृतिर्वाभवतुतत्राह॥ विश्वंवैब्रह्मतन्मात्रमिति विश्वंकार्यंब्रह्मतन्मात्रंयस्येयथा
महाभूतेषुशब्दादीनांतन्मात्रता सूक्ष्मावस्थारूपत्वात् एवंविश्वस्यापिब्रह्मैवसूक्ष्मावस्थारूपं॥ पूर्वावस्थाब्रह्मउत्तरावस्थाजगदिति
॥ ३ तस्योपसंहारस्तिरोभावोविष्णोर्भगवतोमाययाविष्णुस्कंधरूपः उपसंहर्त्रीतस्यैवमायातयासम्यक्स्थितंवाविष्णुमायया अलौकि पालि॥३
कसामर्थ्येनस्थितमुपसंहृतंचभवतीत्यर्थः तत्रकश्चित्परिछेदकोपेक्ष्यते अन्यथाएकस्मिन्नपिकार्येकृत्स्नप्रसक्तिर्निरवयवत्वश
ब्दकोपोवाभवेत्॥ तस्माद्भगवतएवकश्चिद्धर्मोस्तिअसाधारणरूपः येनोत्पाद्यमानंकार्यंपरिछिन्नंभवति॥ तदेकंभगवतोरूपमित्या
ह ईश्वरेणपरिछिन्नंइति ऐश्वर्यमपिगुणः तत्रैवभगवतास्थापितः॥ अन्यथाकरणसामर्थ्यंहितस्य॥ अतएवकलयतीतिकालः॥

विश्वंवैब्रह्मतन्मात्रंसंस्थितंविष्णुमायया ईश्वरेणपरिछिन्नंकालेना
व्यक्तमूर्त्तिना १२ यथेदानींतथाचाग्रेपश्चादप्येतदीदृशं १२

तस्यचरूपमव्यक्तएवतिष्ठति॰ अतःपरिछेदार्थंकालोपेक्ष्यतइत्यर्थः १२ तस्योपादानत्वंकार्येप्रदर्शयति॥ यथेदानीमितिका
लस्यनित्यत्वात्तदुपादानकंजगन्नित्यमेव परंतथोपादानत्वमुपदिश्यते॥ भूतादिव्यपदेशाः कालकृताः॥ कालोहिनिरंतरंवर्तमा
॥५ नः जलप्रवाहवत्पूर्वउत्तरोवाधते॥ तदान्तरेणजातविकारंजगद्भूतत्वेनव्यपदिश्यते॥ वर्त्तमानोपिकालएव॥ देशापेक्षाभावात्नामे
रिकंवर्त्तमानत्वं॥ जलादौतुदेशापेक्षायाविद्यमानत्वात्आपेक्षिकेवर्त्तमानताभवति॥ अतोयादृशः कालः तादृशंजगत्॥ काला
धीनेत्वेषेवमस्था॥ अवांतरकालानांमूलभूतः कालोनियामकः जीवानामात्माभगवानिव। अतः स्वभावतत्कल्पत्वात्अवांतरभेदो
विवक्ष्योच्यते॥ इदानींयथाजगत्अग्रेपितथैवभविष्यतिपश्चादप्येतदीदृशमेवंअतोऽस्यजगतः कालनियामकत्वात्तन्मायिक
त्वं॥ तस्मात्कालेनाभिव्यक्तस्वरूपत्वात् ब्रह्मरूपंजगत् १२ ॥
प्रथमा॰ ३॰२ कालजगतो३॰

Indira Gandhi National Centre for the Arts

जीवानं २

तमु १० १३४ एवंकालोपादानकत्वंजगतो निरूप्यकालस्याधिदैविकंस्वरूपमुक्त्वाआधिभौतिकंस्वरूपंनिरूपयति॥ सर्गोनवविधइत्यादि
नायावदध्यायसमाप्तिः॥ आध्यात्मिकभेदानग्रिमाध्यायेवक्ष्यति॥ तावतासाधारणीनांमात्रेंद्रियाणांकालएवनियामकः तेषां
बुद्धिस्तुवेदात्ब्रह्मादिभिश्च अतोभगवदधीनास्तेभगवदाज्ञयासंसारेप्रवृत्ताः भगवान्भगवदाज्ञाचतेषांमूलं महाभूतव
त॥ विषयेंद्रियाणितुकालाधीनान्येवकालरूपाणि॥ तामात्रास्त्रिविधाइतिआध्यात्मिकानाधिभौतिकांश्चनिर्दिशति स

सर्गोनवविधस्तस्य प्राकृतोवैकृतस्तुयः काल
द्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः १४ ॥

सर्गः

र्गोनवविधइति प्राकृतआधिभौतिकःषड्विधः॥ वैकृतः आध्यात्मिकस्त्रिविधः॥ उभयेनवविधाः तुशब्दोवैकृतभेदांतरम =
स्तीतिज्ञापकः वैकृतेपिआध्यात्मिकःवैकृताद्भिन्नःआधिदैविकः अतएवत्रयःप्रसिद्धः॥ उत्पत्तिर्नवविधा॥ त्रिविधानामपि
गुणानांउत्पादकत्वात्॥ प्रतिसंक्रमस्तुत्रिविधः॥ तामसानामेवनियामकत्वात्॥ तत्राधिकारिणस्त्रयः॥ कालः द्रव्यंगुणाश्चे
ति॥ कालेनपदार्थाः प्रकृतौप्राप्यंते॥ द्रव्यैर्वायुदंडादिभिः गुणैः विरोधिभिःविरुद्धागुणाः प्रादुर्भूताः॥ कर्मणाविहितप्रकारे एम० १३५
ण देवादिभावेप्राप्तेमानुष्यादिभावानिवर्त्ततइति सत्वादिभिरेवद्रव्यस्यप्रलयः नियतस्तुकालकृतःप्रलयः॥ अनियतावित

तुरुदेनवा प्रलयः

प्राकृतःपिंग... प्रलयकालीनश्चअंशरूपादिभिः२ द्रव्यगुणाभ्यां १

महत्त्वमा २

सर्गाणांनवविधत्वमुपपादयति॥ आद्यस्त्विति॥ सर्गाअत्रविभेदेनकालतःक्रियया तथा॥ अतस्तत्वेपिषड्भेदाः पारंपर्यंनदृष्ट
र्णां १ महत्वेनप्रकारेणजगत्सर्वंतथोद्भूतं॥ अतोजगतएवात्रसर्गेहेतुर्महान्पुनः २ भूतमात्रेंद्रियधियांजन्मसर्गउदाहृतः॥ तेच्च
तुष्टयमत्रास्ति तेनसर्गत्वमस्यहि ३ तुशब्दःपक्षंव्यावर्त्तयति॥ महत्तत्वस्यनकेवलंजन्ममात्रं॥ किंतुमहतोजन्मसर्गस्तत्राप्याद्यः
सर्गांतरापेक्षया अयंसर्गः सर्वोपकारी॥ महत्वात्तुबुद्धिरुक्ता॥ तस्यमहत्तत्वस्ययोनेःसकाशादुद्गमइवसर्गोत्रनविवक्षितः कि

तथाबुद्धिःयथापि चित्तमनोबुद्धिस्तथा स्त्रमहान्

आद्यस्तुमहतःसर्गोगुणवैषम्यमात्मनः॥ द्वितीयस्त्वह
मोयत्रद्रव्यज्ञानक्रियात्मकः १५ ॥ १५

गोभः

त्वात्महेतुकः गुणानांविषमोभावः। तत्रसत्वंधीनिमित्तं॥ सर्गवतोधीनिमित्तत्वेसत्वंमनोनिमित्तं विषयाएजसाः॥ भूतानि शुद्धसत्त्वात्मकस्य
तामसानि॥ वैषम्यादिभावेतुस्थित्यादिहेतुत्वं॥ आत्मनःसकाशात्गुणानांवैषम्यंएतदेवमहत्तत्वसर्गइत्यर्थः॥ द्वितीयमाह॥ १
द्वितीयस्त्विति॥ अत्रापिजन्ममात्रंव्यावर्त्यते॥ अहमः अहंकारस्यसर्गोद्वितीयः॥ अत्रापिचतुर्विधत्वमाह॥ यथासर्गेगुण
वैषम्यमपेक्षितं॥ एवंद्रव्यज्ञानक्रियाणामपिउदयोपेक्षितः द्रव्यमधिभूतं॥ ज्ञानमधिदैवंक्रियाआध्यात्मिकी॥ आद्योभा
वोवैषम्यंद्वितीयोभावस्त्रैविध्यं॥ यत्रेत्यधिकरणंकारणरूपंमहत्तत्वंबुद्धिः १५ ॥

Indira Gandhi National Centre for the Arts

त.सु.१०
१३६

अवेक्ष्य१२=

तृतीयमाह॥भूतसर्गइति॥अत्रापितुशब्दः पूर्ववत्॥यथाहोभयेंद्रियथावाज्ञानक्रियाविषयाणांतथा परिणामहेतु
रूपस्यापि तत्स्वरूपंभोक्तृभोग्यभावापन्नंवेक्तव्यं इतिभोग्यंतन्मात्रत्वेनविवक्षते॥भोक्ताशरीरसाधकभूतत्वेन॥ तदु
भयमाह॥तन्मात्रोद्रव्यशक्तिमानिति तन्मात्रःपंचतन्मात्रारूपः द्रव्यशक्तिः परिणामः तत्सहितः तृतीयसर्गइत्यर्थः॥

भूतसर्गस्तृतीयस्तु तन्मात्रोद्रव्यशक्तिमान् च
तुर्थऐंद्रियःसर्गोयस्तुज्ञानक्रियात्मकः १६ ॥

एवंत्रिभिःसर्गैःकार्यंनिष्पद्यतेत्रिभिश्चज्ञायते॥तत्रप्रथमंचतुर्थऐंद्रियःसर्गःइंद्रियसंबंधीसर्गः॥इंद्रियाणांस्वरूपोत्प
त्तिर्नसर्गःकिंतुकार्योपयोगित्वेन॥अतोनुवादेतुशब्दःकार्यभिन्नतयोत्पत्तिमाहत्यर्थसर्गः पूर्वत्रैक्योजितः॥यस्त्वित्य एम०
नुवादः॥स्वरूपकार्ययोर्भेदनिरूपणार्थं॥ज्ञानात्मकःक्रियात्मकश्च॥उभयंहींद्रियकार्यं॥क्रियात्मकत्वेनभूतानीं १३६
द्रियाणिचोक्तानि॥ज्ञानात्मकत्वेनतन्मात्राणिधियश्चोक्ताः १६ ॥

पंचममाह वैकारिकइति॥वैकारिकःसात्विकःदेवानांसर्गः॥अत्रदेवानांसर्गेस्वरूपत उत्पत्तिः॥ अतींद्रियत्वेनअव्यवहार्यत्वे
नचद्वैविध्याभावात्नपृथगुक्तिः॥यथाज्ञानेइंद्रियाण्यपेक्ष्यंतेक्रियायांचतथैवदेवताप्रेरणांतदभावेग्रहणानुपपत्तेः॥वै
कारिकत्वेनत्रिरूपता-देवत्वाद्बुद्धिरूपत्वंनन्वेतेषांदेवानांकिंकार्यंप्रेरणंत्वंतर्याम्यजीवाभ्यामेवोपपद्यतइत्याशंक्याह य
न्मयंमनइति॥पंचमसर्गप्रचुरमनः॥यथेंद्रियाणांसद्भावेपिमनोव्यतिरेकेणनज्ञानक्रियोदयः॥नाश्रोषं॥अन्यमनाइत्याद्यभि
लापात् नहिसज्जातीयनियमनव्यतिरेकेणकेवलंचेतनेनराज्ञेवसर्वथानियमनंकर्तुंशक्यते॥अतःसामान्यतःमनोयथानियाम

वैकारिकोदेवसर्गःपंचमोयन्मयंमनः षष्ठस्तुतमसःसर्गोय
स्त्वबुद्धिकृतःप्रभोः १७ ॥ श्रीगोपालयनमः ॥ ॥

स्वपि९

कंतथेंद्रियदेवताअपि॥वैकारिकत्वेनचैकं॥वैकारिकत्वंपूर्वरूपं॥प्रेरकत्वमुत्तररूपमिति॥षष्ठमाह॥षष्ठस्त्विति॥इंद्रियग्राह्य
त्वंभगवतोनसंभवतीतिअंतरणनिष्पत्तिरूपांअविद्यांमन्यते साकेवलंतामसी अविद्याप्रकृतिमायानांमध्येप्रथमायाःप्राकृ
कैःकि.कृ.तं. तविषयत्वात्प्राकृतैःसावातत्कार्यत्वादुच्यते॥अतोग्रहणार्थंतामसःषष्ठःसर्गोविषयः तामसत्वमात्रेणविषयत्वेभूतसर्गोपि
तथास्यात्अतस्तद्व्यावृत्त्यर्थंयस्त्वनूद्यतुशब्दः॥अबुद्धिकृतोज्ञानकृतः॥नन्वज्ञानेनशुक्तिकारजतवत्मिथ्याभूतमेवकिंचि
दुत्पद्यतेतस्यकथंसर्गत्वंस्वरूपाभावादित्याशंक्याह प्रभोरिति समर्थस्यसद्यज्ञानप्रकारेणापिसदभिव्यक्तिंकर्तुंशक्तोतिअतो
स्यगत्वमाणविषयस्यअविद्याकृतत्वेपिसर्गत्वं १७ ॥

Indira Gandhi National
Centre for the Arts

त०सु१० १३७ एवमाधिभौतिकप्रकारेणनिरूपितान्षट्सर्गानुपसंहरति षडिमेप्राकृताःसर्गाइति॥एवंविभागंचेन्नकुर्यात्सप्तमा
दिप्रयोगात्सर्वेप्येकविधाभवेयुः॥एवंप्राकृतानुपसंहृत्यवैकृतेषुसावधानतयाभेदोज्ञातव्यइत्याह वैकृतानपीति॥
प्राकृतकार्यंवैकृतंप्राकृतेनिरूपितेनिरूपितंभवतीतिअनिरूपितेवैकृतानांनभेदोनस्वरूपंवासिद्ध्येत्अतोमेश्रृणिव
त्याह मत्तएवैतेभेदाःश्रोतुंयोग्याःनत्वन्योजानातीतिभावः अतोन्यासंगमुदासार्थंश्रृणितिवक्तं॥नन्वेतेप्राकृतवैकृताः
लौकिकाःभगवद्भक्तैःकथंश्रोतव्याइत्याशंक्याह॥रजोभाजोभगवतइति यदाभगवान्रजोगुणंउत्तत्यर्थंकृतेरजोवाका

षडिमेप्राकृताःसर्गाविकृतानपिमेश्रृण रजोभा
जोभगवतोलीलेयंहरिमेधसः १८ ॥

मार्थंभजतेतदैवंलीलांकरोति॥अतोभगवल्लीलात्वात्श्रोतव्याएवसर्गाः॥ननुनसर्वाभगवल्लीलाश्रोतव्यायावानर्थउद्या
नइतिन्यायेनस्वोपयोगिन्येवलीलासेव्येत्याशंक्याह॥हरिमेधसइति॥हरिःसर्वदुःखहर्त्रीमेधायस्य॥भगवद्विषयिणीया
काचिन्मतिःसैवसर्वदुःखहर्त्रीतिस्लाघाकापिभगवल्लीलाश्रोतव्यैव किंच॥नियताविषयवुद्धिर्भगवत्संवंधित्वेनात्रवो
ध्यते॥अतोलीलांतएपेरूपामात्रारूपालीलाःकालसंवंधित्वात्सहजनाशिकालदोषनिवृत्त्यर्थंचअवश्यंभगवदीय एम०
त्वेनज्ञातव्याः॥एतदेवाभिसंधायमेधःपदं यथामेधाशब्दोवुद्धिवचनःएवंमेधसशब्दोपिसंप्रत्ययांतः १८ ॥ १३७

गहिक्वी

लीलालीलासर्गस्वरूपं० अतःपुष्पसहिताःनतुनरिरैतएवरप्रताःसःवनस्तोउवराःदिवः इतिदत्तावक्षमनाः

तस्माच्छ्रोतव्यमित्युपपाद्यवैकृतेषुप्रथममुपदयति॥सप्तमइति॥वैकृतेषुमुख्यभवोमुख्यः॥अन्नंप्रथमतःसृष्टंअन्नादालदनंतरं॥
अन्यथावाधकंत्वग्रेवस्यतेप्रक्रियांतरे॥अतोमुख्यभवोभक्ष्यत्वेनैवपरिकल्पितः सर्वजीवनोपयोगिप्रायमेनोपकल्पितः॥मनसास
हकर्मेंद्रियाणांषड्विधत्वात् आद्यःषड्विधः तेयथाभक्ष्यमाणाअपिनापसरंतिततस्थुषामित्यक्तंस्थावराणामेवयषड्विधःसर्गःसए
वात्रग्राह्यइतियद्दृष्टेननिर्दिष्टःनतुजंगमत्वेनज्ञातःस्थावरतामापद्यमानःतस्याःभगवल्लीलात्वाभावात् चकाराद्येपिशास्त्रेतोनिरू
पिताःपरिगृहीताः दुग्धादयोवाचकारेणपरिगृहीताः॥वनस्पतयःअश्वत्थादयः॥प्रथमतोवनस्पतीनांग्रहणंपालनेविहलोःप्रा
धान्यात्वैहल्यवत्वेनवैहल्यावावनस्पतयइतिश्रुतेः॥पुष्पसहिताःसफलाःवनस्पतय रजोरहिताःसफलाःवैहल्यवाःउषधयःव्रीहियवाद श्र१
यःफलपाकांताः तेहिमुख्यमन्नंवंति लताःकूष्मांडादयःमेदोरूपाःभंजनात्मकाः त्वक्साराःवेणवः अन्नस्थित्यात्मकाःवेणयवाश्च

सप्तमोमुख्यसर्गस्तुषड्विधस्तस्थुषांचयः॥वनस्पत्योषधिलतात्वक्साराःवीरुधोद्रुमाः
उत्स्रोतसस्तमःप्रायाअंतःस्पर्शाविशेषिणः १९ श्रीगोपालयनमः ॥

त्वेणवश्चवहूपयोगिनः॥वीरुधःसोमादयःतृणादयश्च तेषामप्यभयरूपत्वं॥द्रुमाःसफलपुष्पाःआम्रादयः॥एतैःषड्वि
धैःअद्यमानैःअन्नाःसुप्रतिष्ठिताभवंति॥नन्वेतेषांषड्विधानांकेनधर्मेणैकसर्गत्वमित्याशंक्यतान्धर्मान्निर्दिशति॥उत्स्रोतसइ
ति॥एतेहिसर्गरूपाःभूतादिभावरूपावक्तव्याः॥तेरवचतुर्भिर्विशेषणैर्निरूप्यंते॥ऊर्ध्वंस्रोतआहारःसंचारोयेषांतेषांभक्षितंजला
दिकंऊर्ध्वमेवगच्छति॥अनेनभूतत्वंनिरूपितंविपरीतंवा॥वुद्धिर्हिक्रिययावोध्यतेपादपाइतितेषांवुद्धिर्निरूपिता॥तमःप्रायाइतिज्ञाना
भावः॥अज्ञानंतत्रैवपर्यवसितं प्रापपदंव्याहृत्यर्थंवदन्विषयत्वंनिरूपयति॥अंतःस्पर्शाइति॥अंतःस्पर्शमात्रंगृह्णंतिनत्वन्य
विषयकंज्ञानमस्तीत्यर्थः॥यत्तुभारतेहृद्राणांसर्वेंद्रियत्वंसाधितंसर्वज्ञानंचतदधिष्ठातृदेवतापरं॥अभिमानिनांतुस्पर्शएवप्रवि
शेषिणाश्चहस्तवितस्मादिपरिमाणोनियमरहिताः॥विशेषसंज्ञारहितावा १९ ॥

Indira Gandhi National Centre for the Arts

त•स्कं१० १३८ एवंसप्तमंनिरूप्यअष्टमंनिरूपयति तिरश्चामिति तिर्यगाहारसंचारोयेषांतेतिर्यंचःतिरश्चांतीति॥गोभिर्भक्षितंतिर्यग्भागेनैव गच्छतीति॥तेषांसर्गःअष्टमः अन्नस्यभक्षकोपयोगित्वात्॥सोष्टाविंशद्विधः तत्वानांतथात्वात् तत्वैरेवभक्षितस्यप्रार्थितत्वा
त् यद्यपिवहवोभेदाःसंतितथापिभेदकप्राधान्यादष्टाविंशद्विधएवमतः अन्येषामत्रैवांतर्भावोवक्ष्यते॥वैकृतत्वंवानि
एकरिष्यते॥एतेषामपिपूर्ववच्चतुर्धालक्षणमाह॥अविदइति वेदनंवित्स्वस्यकर्त्तव्याकर्त्तव्यानुसंधानंपारलौकिकज्ञा
नंवातद्रहिताःअविदः॥भूरिअधिकंतमोयेषांअतस्तमसाअभिभूताःसत्संगेजातेपिनज्ञानयुक्ताः।येतुदेवपशवःवैकुंठा

तिरश्चामष्टमःसर्गःसोष्टाविंशद्विधोमतः॥अविदोभूरितमसोघ्राणज्ञाहृद्यवेदिनः २०

गौरजोमहिषःकृष्णःशूकरोगवयोरुरुः द्विशफाःपशवश्चेमेअविरुष्ट्रश्चसत्तम २१

दिस्थितास्तेत्वावातेकालाभिभूतानभवंतीतिनतेर्लक्षणव्याप्तिःएतेषांसर्वेंद्रियसद्भावेपिघ्राणेनैवविशेषतःपदार्थान्जानं
ति॥चक्षुरादिभिस्तननिर्द्धारस्तमोभूयस्त्वात्॥हृद्यवेदिनइति॥पूर्वानुभूतस्यस्मृतिशून्याःचिंतारहितावाविदनंवेदःवेदइति॥ नवेदःअ २
अज्ञानंतेषांभूतस्थानं॥मोहोविषयः॥इंद्रियाणिघ्राणमात्रपर्यवसितानि॥बुद्धिस्त्वनुभवरूपैव॥२०॥एतेत्रिविधाःसांति
काद्विशफाःप्रोक्ताः राजसास्तुचतुःशफाः॥तामसाइतरेप्रोक्तागुणानांहीनतापरा॥नवद्विशफागवादयः।कृष्णकृ
ष्णमृ गवयोगोसदृशःरुरुर्वक्रशृंगमृगः॥एतेद्विशफाः।एतेपुनर्यज्ञपशवःतिर्यक्शब्दवाच्याःद्विश एम०
फाःपशवश्च॥यत्रयत्रशवोनिर्दिष्टास्तेतत्रैतेग्राह्याः॥अविर्मेषःउष्ट्रश्च सत्तमेतिसंबोधनंपश्चुगणनायांभगवत्कृतसृष्टौ १३८
अन्यथाज्ञाननिवारणार्थं २१ ॥

षडेकशफाःखरादयः॥गौरःगौरमृगःआरण्यः॥शरभोष्टापदः चमरीगोसदृशोमृगः चकारात्अन्येप्रसिद्धा
आरण्याः॥ग्रामचमर्याद्विशफत्वं तानभगवत्सृष्टाःकृताइतिसंबोधनंनैपुण्यार्थं॥अतएववहुविधाविश्वामि
त्रादिभिर्योगबलेनसृष्टाभवंतितथाहृत्स्वर्थंस्थाणिवतितिनिर्देशनंपंचनखेषुबहुसंदेहस्तूचकं॥पंचनखामनुष्याअपि
तथाहृत्स्वर्थंपशूनित्युक्तवान्॥मनुष्याणामपियद्यपिपशुत्वंश्रुतिसिद्धंतथापिविवक्षितंनभवतीतितद्धर्मासः २२

खरोश्वोश्वतरोगौरःसरभश्चमरीतथा॥एतेचैकशफाःक्षत्तःशृणपंचनखान्
पशून् २२ श्वासृगालोवृकोव्याघ्रोमार्ज्जारःशशशल्लकौ॥सिंहःकपिर्गजः
कूर्म्मोगोधाचमकरादयः॥२३॥कंकगृध्रवकश्येनभासभल्लूकवर्हिणः॥हंस
सारसचक्राह्व काकोलूकादयःखगाः२४

त्रयोदशश्वादयःतत्रमकरादयःसर्वेअभूचराएकविधाःअंडजाः॥कूर्मो
जलचरोपिअंडजत्वाभावात्पृथग्गणितः॥मकरादयइतिआदिशब्देनसर्पादयोपियरिगृहीताः॥अंडजत्वसामात् २३
॥तत्रापिप्रधानभूतान्निर्दिशति॥कंकेति॥भल्लूकोपिपक्षिविशेषः नतुऋक्षः॥तंविश्वामित्रसृष्टंकेचिदाहुः॥पभक
स्येतद्भावोवाआदिशब्देनसक्त्वाअपिसर्वेपरिगृहीताः॥ २४ ॥श्रीनारायनमः ॥ ॥श्रीराधावल्लभायनमः॥ ॥

Indira Gandhi National Centre for the Arts

मानुषाः२=

त्रसुः१० १३९ एवंभोग्यभोक्तृन्निर्दिश्यतदुभयनियामकान्निर्दिशति॥ अर्वाक्स्रोतइति॥ उशब्दोत्रपूर्ववज्जननंव्यावर्त्तयति॥ अ वागिवश्रोतआहारसंचारोयस्यसन्नवमःसर्गःएकविधएव॥ सर्वेपिचनखाःजलचराअपितथा एकपादाज्जलचराश्च तस्मिन्कल्पेनसंतीतिवा॥ तेषांपूर्ववल्लक्षणमाह रजोधिकाइति॥ रजोगुणएवतेषामधिकः॥ नसात्विकानापितामसा पंचजन्तवः१=

अर्वाक्स्रोतास्तुनवमः क्षत्तरेकविधोनृणां रजो
धिकाःकर्मपराःदुःखेचसुखमानिनः २५ ॥

इति येपुनर्भगवदीयास्त्रिगुणातीताः देवाएवननराः॥ ब्रह्मस्पृष्टावानभवंति॥ प्रथमकल्पेवातदभावः॥ भूतस्थानीयं रजः सर्वदाकर्मपराःकुर्वतएवतिष्ठंति॥ दुःखेचसुखमानिनइतिबुद्धिः चकारात्सुखेदुःखसाधनेच २५ ॥ रम० १३९

नेंद्रियाणितेषांगौणानि॥ अनेनविषयेंद्रियनिरूपणं१४

इंद्रियाधिदेवरूपोयःसप्रोक्तःप्रागेव४=

एवमाधिभौतिकादिभेदेनस्थावरजंगमामनुष्याश्चनिरूपितास्त्रयएव॥ अन्येस्थानरूपभिन्ना अपिनसर्गत्वंप्राप्नुवंतित दाह॥ वैकृतास्त्रयएवैतेइति॥ देवसर्गश्चसत्तमेति मनुष्याएवपुण्यपरिपाकवशात्देवाभवंतीतिकेचित्॥ अतोनवैव सर्गाःगुणानांभेदांतरासंभवात्॥ उत्पत्त्यानवविधोपिउपपत्त्याउपसंहाराच्चदशविधः अतश्चकारः देवसर्गश्चेति॥ स त्तमेतिसंबोधनंदेवानांफलरूपत्वज्ञापनार्थंसदेवसर्गोद्विविधः॥ एकोवैकारिकःसात्विकः अपरोवैकारिकोविकारज्ञातः वैकृतात्नरादेवपुण्यपरिपाकतोजाताः२= सदृशमः तत्रप्रथमेनिर्णयमाह वैकारिकइति तुशब्दः अस्माद्वैकारिकाद्भेदमाह॥ यःसात्विकोवैकारिकःसप्रोक्तःपंच

वैकृतास्त्रयएवैतेदेवसर्गश्चसत्तम॥ वैकारिकस्तुयःप्रोक्तःकौमारस्तूभयात्मकः २६
देवसर्गश्चाष्टविधोविबुधाःपितरोसुराः॥ गंधर्वाप्सरसःसिद्धायक्षरक्षांसिचारणाः २७
भूतप्रेतपिशाचाश्चविद्याध्राःकिन्नरादयः॥ दशैतेविदुराख्याताःसर्गास्तेविश्वसृक्कृताः २८

मः कौमारस्तुदेवोपिभवतिमनुष्योपिभवतीतिउभयनिरूपणेनैवनिरूपितः॥ अतःपृथक्तयासनवक्तव्यइतितुशब्दः॥ देवसर्गस्त्वेकविधोऽवांतरभेदेनाष्टविधः॥ तान्गणयतिविबुधादेवाःइंद्रादयः॥ एकेपितरोसुराएकेगंधर्वाप्सरसः॥ ए केसिद्धाः॥ एकेयक्षरक्षांसि एकेचारणाअपि यक्षेष्वेवेतिकेचित् २७ भूतप्रेतपिशाचाएके॥ विद्याधराभिन्नाइतिके चित्॥ किंनराःकिंपुरुषादयः एवंसर्वानुपपाद्यउपसंहरति॥ दशैतेविदुराख्याताइति॥ संबोधनंस्नेहसूचकं॥ तेनाऽस्य थाकथनंव्यावर्त्तितं विश्वसृजाब्रह्मणाकृताएतेसर्गाः २८ ॥

Indira Gandhi National Centre for the Arts

त्रसु१० एतावदुक्त्वा तूष्णीं स्थिते पूर्ववत्पुनः प्रक्ष्यतीति वक्तव्यांतरं निर्दिशति॥ अतः परं प्रवक्ष्यामीति॥ अनुपदं नं एतच्छेषनि
१४० रूपणानंतरं कालांतरे प्रवक्ष्यामीत्यर्थः॥ अनशिष्टं रूपद्वयमस्ति॥ इंद्रियाणि बुद्धिश्चेति॥ तदुभयं निर्दिशति॥ वंशान्म
न्वंतराणि चेति वंश इंद्रियरूपः॥ चकारेण तत्संबंधिनोपि तत्वेनैव वक्तव्याः प्रतिज्ञाताः॥ नन्वेवं भगवान् अनेकविधान् कि
मर्थं करोति वा करोतीत्याशंक्याह एवं रजःप्लुत इति रजसामाप्नो भगवान् स्रष्टो प्रवृत्तः॥ सर्वेष्वेव कल्पादिषु आत्मनः स

अतः परं प्रवक्ष्यामि वंशान्मन्वंतराणि च॥ एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः॥
सृजत्यमोघसंकल्पः आत्मैवात्मानमात्मना २९ इति श्रीभागवते महापुराणे तृती
यस्कंधे दशमोऽध्यायः॥ ॥

काशात् स्वयमेवाविर्भूतः सर्वेषां दुःखनिवारणार्थं अमोघसंकल्पमात्रेण कर्तृकर्मकरणरूपः स्वयमेव सृजति॥ ब्रह्मा
पि रजःप्लुतो भगवानेवेत्यर्थं भवति॥ कल्पादिष्विति बहुवचनं सततत्वानि ब्रह्मांडानि वहुधा सृजतीति ज्ञापयति॥ रजोपि
स्वयमेवेति स्वस्यैव करणत्वं — तथा कर्मकालादयोपि स्वयमेव॥ जगदपि स्वयमेवेति स्वस्यैव कर्मत्वं॥ पुरुषादयोपि एम०
स्वयमेवेति स्वस्यैव कर्तृत्वं॥ तस्मात् सर्वं हरिरिति सिद्धं २९ इति श्रीभागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचि १४०
तायां तृतीयस्कंधे दशमाध्यायविवरणं॥ ॥

एकादशे तु कालस्य सर्वेषामिंद्रियाणि यत् आध्यात्मिकं तु यद्रूपं त्रेधा तद्विनिरूप्यते १ सर्वो हि भगवान् कालस्तदर्थमुपचर्य
ते धर्मप्रयुक्तो यः कालः स हि त्रैस्वर्ण्यमेयिवान् २ सूर्यात्मकस्तु यः कालः सर्वेषां सोपि च त्रिधा कार्यप्रवेशाप्रवेशात्
दर्शनादर्शनात्तथा ३ भचक्रस्थानभागाभ्यां अत्रायुक्तावर्चसदा एवं पूर्वाध्याये कालस्य स्वरूपं कार्यं चोक्त्वा तस्यावांतर
भेदान्निरूपयति सूर्यगत्या तु तद्भेदाः सूर्यस्तस्याधिदैविकं आध्यात्मिकं तु तद्भेदाः क्वचिद्द्विधापि भेदिका पृथिवी च जलं
तेजो देवास्तु पितृमानुषाः उपाधित्रितयं प्राहुस्ततः कालस्त्रिधा मतः प्रथमं मनुष्याणामहोरात्रं निर्णेतुं पार्थिवलोके
पृथिव्यवधानाव्यवधानाभ्यां सूर्यदर्शनादर्शनकृतं कालस्य दिनरात्रिरूपत्वमिति निरूपयितुं पार्थिवैरेव परमाणवादि

मैत्रेय उवाच॥ चरमः सद्विशेषाणामनेकोऽसंयुतः सदा॥ प
रमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः १ ॥

भिः कालभेदं नाह॥ तत्रोपाधिभूतस्य परमाणोर्लक्षणमाह॥ चरम इति सतः कार्यस्य घटादेः विशेषाणामवयवानां म
ध्ये यश्चरमः यस्य पुनरवयवो नास्ति॥ अतिसूक्ष्मत्वात् विभागकाघातेन सह तेस्य चरमः सोपि सजातीयैः समुदायावस्थां
न प्राप्नस्तदाह॥ अनेक इति कार्यावस्थां च न प्राप्तः॥ असंयुत इति॥ सदेति कदाचित् संयोगं प्राप्नो भवत्येवेति लक्षणमसंभ
वेव स्यात्॥ अनेकत्वं च नैकसंख्याभावः॥ यत्र तिष्ठति तत्र तत्सजातीया वहव एव तिष्ठंतीत्यनेकत्वं॥ भौतिकत्वे सति नित्योग
तिमान् परमाणुरिति परमाणुलक्षणे क्रियमाणे परमाणुभ्यः कार्योत्पत्तिरिति मतं स्यात् सिद्धांते तु स्थूलादेव सूक्ष्मोत्पत्तिः
स्वसमा ॥ ॥

परमाणुतः परः वृ गारा ए

प्रत्यवयवं कार्यमाप्रत्यव परमाणुरू स्या... यस्य अभवत गोपा नस्या॥ तिनश्रुत:

नतः तथ मवा...

त·सु११ नावयवस्थूलांशकार्यजनकइति यदनेकावयवैर्योजनं पटादीनां कार्पासादेः स्थूलस्यैव दीर्घावस्थां प्राप्तस्य आकृतिविशेषसं
१४१ पादनार्थं खंडशो योजनं समुदायस्य चैवोपादानत्वं॥ एवं कुंडलप्रतिमादावपि तावत्समुदायस्यैवोपादानत्वं॥ अन्यथा अ
नेकं कार्यं स्यात् एकस्यैकस्यैवोपादानमिति निश्चयः कार्यस्य पांचभौतिकत्वात् जलादयः संयुक्ता भवंतीति तेपि ततः पृथक्
भूताः परमाणुत्वमापद्येरन्॥ भगवांश्च सर्वत्रोपादानमिति चरमत्वं च तस्योपपद्यत इति तथा इत्यर्थमनेकइति॥
१४ सत्वेकएव॥ असंभवव्याहत्यर्थं विसदृशः स परमाणुर्विज्ञेयः विशेषेण तत्र ज्ञानमपि विधीयते॥ कुयुक्त्या सोन्यथा
नमंतव्य इत्यर्थः तस्य परमाणोः स्वरूपमुक्त्वा कार्यमाह॥ न एणामैक्य भ्रमो यत इति न एणां जीवानां ये परमाणुभिः कृत्वा
आत्मना सह देहस्यैक्य भ्रमो भवति॥ ऐक्यभ्रमहेतवस्तु परमाणव एव॥ ते च तिसृत्वाः धर्माधर्मभ्यां संस्कृताः जीवे संब
ध्यंते तदा देहभावमापद्यंते॥ अत एव ते दुष्टाः कालस्योपाधिभूताः तत्संबंधे जीवस्य नाश एव॥ अत एव तेषां भ्रमज
नैत्व॥ पुंजीत्य निपत्तमाश्रित्य भ्रमात् केचिदाहुः॥ तन्नोक्तं॥ एतदर्थमेव कालावयवत्वेन निरूपणमिति भ्रमपद
प्रयोगः॥ मनसु परमाणुपरिमाणमेव न तु परमाणुः॥ परमाणावस्तु चतुर्विधा एव॥ अन्यथा पंचविधा एव परमा
णवः स्युः॥ कार्यं च ततः स्यात्॥ परमाणुत्वात्॥ अतो नित्यगतिमत्वं न लक्षणं तदेजतितन्नैजतीति श्रुत्यानित्यो भग
वान् परमाणुः स्यात्॥ भौतिकत्वं च तेषां साधनीयं॥ स्मृतिश्च श्रुत्या बाधितेति वैशेषिकादीनां लक्षणं बाधितमेव॥ १४१
प्रकृते चानुपयोगः १ ॥

एवं परमाणुलक्षणमुक्त्वा परमहतो लक्षणमाह॥ स...वेति॥ सतः कार्यमात्रस्य संपूर्णस्य ब्रह्मांडस्य स्वरूपावस्थितस्य न तु आक
द्येनावस्थितस्य कैवल्यं एकता तत्परममहानिति लक्ष्यं पृथिवीमात्रं परममहानिति पक्षं निषेधति अविशेष इति॥ नास्य यं पृथि
वीजलमिति वा विशेषो यस्य सः विशेषस्तु... विषयः॥ निरंतर इत्येभेदमूलस्तस्य तएवेति स्वाभिकं व्युदासः पदार्थस्येति वैदव्युदासः॥ स्व
रूपावस्थितस्येति कार्यव्युदासः ब्रह्मांडस्थितो भगवान् स परममहानित्युक्तं भवति॥ सर्वेपि पदार्थाः सर्वत्रानेकबुध्यारूढः विशेषक
ल्पनाभूतः प्रमात्रपेक्षभेदमूलो पि यावान् सूर्येण प्रकाश्यते स सर्वो मिलितः परममहान् १ एवं पूर्वोक्त एव धीनिरूप्य उपहितं कालं
लक्षयति एवं कालोप्यनुमितइति यथा परमाणुपरममहांतौ अनुमितौ कार्यं चरमविशेषेण कार्यसमुदायेन च एवं कालोपि त

सत एव पदार्थस्य स्वरूपावस्थितस्य यत् कैवल्यं परममहान् विशेषो निरंतरः २ एवं का
लोप्यनुमितः सौक्ष्म्यस्थौल्ये च सत्तम संस्थानभुक्त्या भगवान् अव्यक्तो व्यक्तभुग्विभुः ३ ॥

द्योक्तानादृशपरिछेदकर्त्ता अनुमेयः॥ सौक्ष्म्यस्थौल्ये च॥ सत्तमेति संबोधनं अनुमानज्ञापनार्थं॥ ननु कालस्य असंगस्य भगवत इव कथं पदार्थ
संबंधः कथं वानुमानं अन्यथा भगवतोप्यनुमानं स्यात्तत्राह॥ संस्थानभुक्त्येति॥ संस्थानं तदवस्था॥ परमाणुत्वं परममहत्वमिति॥ भगवतोव
स्तुस्वरूपत्वे न तुल्यत्वेपि यः संस्थानविशेषः तस्य च भोगः स कालकृत एवेति कार्यस्यौल्यसौक्ष्म्यात्कालस्य सौक्ष्म्यं स्थौल्यं च॥ नन्वेवं कथं कार
तिस्वरूपस्यान्यथात्वं तस्य च भोगं तत्भोगमित्याशंक्याह भगवानिति॥ एवं सामर्थ्यरूपो भगवान् यथा केचनतादृशीं मायामविद्यां वा क
ल्पयंति॥ अस्मिन् शास्त्रे स कालः॥ तर्हि एवं सर्वपदार्थभोक्तारं कथं सर्वे न पश्यंतीत्याशंक्याह॥ अव्यक्त इति॥ तस्य कालस्य ग्रासनिवृत्तिपरि
ज्ञानार्थं कार्यमाह॥ व्यक्तभुगिति॥ ननु स्वयमव्यक्तः व्यक्तं कथं भुंक्ते तत्राह विभुरिति सर्वप्रकारेण भोक्तुं शक्त इत्यर्थः ३ ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰ ११ १४२

अनुमितं कालं शङ्कते आह॥ सकाल इति॥ यः परमाणुतां भुंक्ते परमाणुं आप्नोति॥ ततः स्वस्यापि परमाणुत्वमनुभवति स परमाणुकाल इत्यर्थः॥ एवं सतो विशेषभुग्यः स्यात्स एव विशेषतां यो भुंक्ते तद्योगेन स्वयं वा विशेषत्वं प्राप्नोति स परम महान् कालः॥ तु शब्दो महत्त्वस्य आयुः परिछिनत्ति ४ एवमाद्यंतकालं निरूप्य मध्यकालं निरूपयति॥ अणुर्द्वौ परमाणू स्यादिति येन मार्गेण सूर्यरथचक्रं गच्छति तस्मिन्मार्गे परमाणुदेशं यावता कालेनातिक्रामति स परमाणुकालः॥ यावता परमाणुद्वयदेशमतिक्रामति स अणुकालः। एवमग्रेपि॥ यावता कालेन सर्वमेव नभोवलयं द्वादशराश्यात्मकं अतिक्रामति स परम महान्संवत्सरात्मकः॥ अणुत्रयेण त्रसरेणुः स्मृत इति चतुर्मुखस्य

सकालः परमाणुर्वै यो भुंक्ते परमाणुतां॥ सतो विशेषभुग्यस्तु स कालः परमो महान् ४ अणु
र्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः जालार्करश्म्यवगतः खमेवानुपतन्नगां ५ त्रसरेणुत्रि
कं भुंक्ते यः कालः स त्रुटिः स्मृतः॥ शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः ६ ॥

तत्र प्रमाणं महतां स्मरणं स तु प्रत्यक्ष इत्याह जालार्करश्म्यवगत इति गवाक्षमार्गेणांतः प्रविष्टसूर्यरश्मिषु अवगतो भवति॥ अवगतेर्व्यंजकद्वयमाह॥ खमेवानुपतन्नगामिति न ते त्रसरेणवो भूमौ पतंति किंतु तस्मिन्नेव रश्मौ आकाशं प्रत्युड्डीयमाना गच्छंति॥ एकवचनं अवांतरभेदव्युदासार्थं॥ ५॥ त्रसरेणुत्रिकमिति॥ त्रसरेणुत्रितयस्य यावान्कालः स त्रुटिसंज्ञो भवति॥ स एव त्रुटिः एम॰
शतभागो वेधः शतांशो भागः शतशब्दोत्र नापरिमितवाचीत्याह॥ तु शब्दः॥ शतं त्रुट्यः एको वेध इत्यर्थः॥ वेधत्रयं लवः ६ ॥ १४२

निमेषइति निमेषस्त्रिलवः निमेषत्रयं क्षणः पंचक्षणाः काष्ठा पंचदशकाष्ठाः लघु ७ पंचदशलघूनि नाडिका नाडिकाद्वयं मुहूर्त्तः नाडिकाषट्कं प्रहरः सप्त वा नृणां मनुष्याणां यन्नाडिकां घटिकां पिकृत्या स्थूला॥ तेन कथमपि द्वादशत्रिर्दिनं वा तस्य चतुर्थो भागः सप्तनाड्यात्मकः क्वासेतु षट्नाड्यात्मकः॥ एवमहोरात्रे द्विपंचाशन्नाडिका भवंति षष्टिनाडिका एव प्रकारेणात्र गणिताः। ये तु संध्याद्वयपरित्यागेनाद्यः नैर्यामाश्चत्वारश्चत्वार इति वाक्यमनुसंधेयं अथयद्दिमातः संध्यादिवसे सायं संध्या रात्राविति तत्रोभयत्रार्द्धघटिका प्र

निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रिभिः क्षणः क्षणान्पंच विदुः काष्ठां लघु ता दश पंच च ७
लघूनि वै समाम्नाता दश पंच च नाडिका ते द्वे मुहूर्त्तः प्रहरः षड्यामः सप्त वा नृणां ८ ॥

चतुष्टयं न गणितमिति तथा गणनायां प्रयोजनाभावात्॥ संध्या संध्यांश व्यतिरेकेण मध्ये धर्मार्थमिति चेत्॥ एवमप्यायुर्निरूपकत्वेन तत्त्यागे प्रयोजनाभावात्॥ तत्र धर्मकरणे आयुर्वृद्धित इति चेत् अन्यदा धर्मकरणे आयुर्वृद्धिर्न स्यात् उद्यन्तमस्तमयन्तमा विविति विरोधश्च न चन्द्रणामिति वाक्यात् पूर्वसंध्याकालः देवानां पश्चान्न तो सुराणामिति॥ एवं प्रथ्यां परिमाणार्थं नगंतव्यं धर्मार्थमेव तथा कथनं युक्तं ८ श्रीरामकृष्णायनमः श्रीराधावल्लभायनमः ॥ ॥

Indira Gandhi National
Centre for the Arts

लप २

किंचयदिवस्समाणंप्रमाणंसांप्रतनाडीपरिमाणमेवसान्नदैवंकल्पनमुचितंवर्द्धतेत्विदंपरिमाणंतद्दर्शमानमाह॥द्वादशार्द्धपलो
ल·मु·११ १४२ न्मानमिति॥द्वादशार्द्धंषट् उभयत्रानेनूनाधिकभावोबुध्यतइतितुंत्रानार्थंद्वादशार्द्धताउक्ता॥पलं सुवर्णाश्चत्वारः सुवर्णंषोड
शमाषंपंचगुंजापरिमितोमाषः॥गुंजाचत्रियवा॥द्वादशार्द्धपलेनताम्रेणपात्रंविधायस्वर्णशलाकाचतुष्टयेनमिलितेनमध्येछि
द्रंकर्त्तव्यं॥तेचस्वर्णमाषाश्चतुरंगुलाः चतुस्त्रिंशत्तिलानांचतुर्गुणदीर्घाः तदाह॥स्वर्णमाषैश्चतुर्भिश्चतुरंगुलैरिति यावत्तस्य

द्वादशार्द्धपलोन्मानंचतुर्भिश्चतुरंगुलैः॥स्वर्णमाषैः कृतछिद्रंयावत्तस्यजलप्लुतं ९ ॥
यामाश्चत्वारश्चत्वारोमर्त्यानामहनीउभे॥पक्षः पंचदशाहानिशुक्लः कृष्णश्चमानद १०

जलंतत्रमातितावतिप्रविष्टेप्लुतंभवति ९ एवंनाडिकापरिमाणमुक्त्वाततऊर्द्धकालपरिमाणमाह यामाश्चत्वारइति॥चत्वा
रोयामाअहः पुनश्चत्वारोयामाःरात्रिरितिज्ञापयितुंद्विरुक्तिः अहनीरात्रिदिवं॥उभेइतिआद्यत्रियुद्रासार्थं॥एवंमुभयंमिलि
त्वाएकमहः॥पंचदशाहानिपक्षःसपक्षोद्विविधः।शुक्लः कृष्णश्चेति रात्रिमुखेचंद्रदर्शनयुक्तः शुक्लः॥रात्रिमुखेरततद्दीपे रम० 
चंद्राभावयुक्तः कृष्णः मानदेतिसंबोधनकृत्येववचनान्यागछतीतिगुरोर्मानदाता॥पंचदशाहानीतिकलाभिप्रायं १० ॥ १४२

तयोःसमुच्चयइति॥तयोःसमुच्चयोमेलनंमासः॥सउभयविधोभवतीतिद्वयमप्यस्याभिप्रेतं॥पितॄणांतदहर्निशमितिचं
नय. द्रस्यपंचदशकलासुयदाप्रविशतितदारात्रिः चंद्रेणाव्यवधानात्॥यदाततोपगछतितदादिनं॥पितरोहिजलकृतमेवव्यवधानं
सूर्यस्यमन्यंते॥ननुद्दृष्टिवीक्षितं यथास्माकंचंद्रेविद्यमानेऽविद्यमानेसूर्योदयास्तमयाभ्यामेवरात्रिदिनव्यवस्था तथाते

तयोःसमुच्चयोमासःपितॄणांतदहर्निशं द्वौताहतुः
षडयनंदक्षिणंचोत्तरंदिवि ११ श्रीगोपालयनमः

रवे:
र्थांसूर्यस्थितिरप्रयोजिका॥चंद्रकलासुप्रवेशनिर्गमावेवप्रयोजकौ॥प्रवेशएवकलोत्पत्तिर्निर्गमएवकलाक्षयः॥ निर्गमो
दिनमिति॥अमावास्यायामहर्दिनंसातेषांभोजनकालोभवतिपौर्णमास्यांतुतृप्ताः शेरतइतितेषांदिनरात्रिव्यवस्थाएवंमा
सद्वयंस्त्वतुःषण्मासास्त्वयनंद्वादशमासाः संवत्सरइति ११ श्रीकृष्णायनमः श्रीराधावल्लभायनमः ॥ ॥

तमु११
१४४

अयनद्वयंसंवत्सरः॥ तयोर्नामदक्षिणंचोत्तरमिति॥ दक्षिणायनमुत्तरायणंचेत्यर्थः॥ तदयनद्वयंदिविस्वर्गेअहनीप्राहुः॥ दक्षिणायनंरात्रिःउत्तरायणमहः॥ स्वर्गस्थाःतेजःकृतमेवव्यवधानंसूर्यस्यमन्यंते॥ नचंद्रकृतंनापिपृथिवीकृतं॥ तत्रनक्षत्राणितेजःशब्देनोच्यंते॥ तत्रोत्तरस्यांउत्तरायणदिवसस्यारुणोदयः॥ तस्यपादेउपभुक्तेसूर्योदयोभवति॥ तदाभवतिमकरःपुनर्वसुपादत्रयपर्यंतंदिनं॥ एतानिनक्षत्राणिमालाकारेणवर्त्तंते॥ अन्योन्यसमुखानितेषुपरभागेपूर्वभागेवास्थिताःअर्द्धपश्यंत्यर्द्धेन॥ यथाद्विगुणेवस्त्रेचित्रार्द्धमेवैकत्रस्थिताःपश्यंति॥ तथादेवानामपिपुनर्वसुपादमारभ्यउत्तराषाढापादपर्यंतंनक्षत्राणिअवधायकानिसर्वाण्येतान्युपरिमुखानिमालारूपेणचवर्त्तंते अतोदक्षिणायननक्षत्राणियदासूर्यसहितानिभ

अयनेचाहनीप्राहुर्वत्सरोद्वादशस्मृतः॥ संवत्सरशतंनृणांपरमायुर्निरूपितं १२

वंतितदोभयनक्षत्राण्यपिअधोमुखानिभवंतीतिसूर्यस्तैर्नदृश्यतएव॥ प्राहुरितिप्रमाणं द्वादशमासोवत्सरः॥ अत्रापिस्मृतइतिप्रमाणं॥ संवत्सरशतंनृणांपरमायुः अहृद्धिक्षये। एकेनसंवत्सरेणएकमायुःकालेनोपभुक्तंभवति॥ शतायुर्वैपुरुषइतिश्रुतेः॥ धर्मेतुक्रियमाणेकालेनायुर्भोगःप्रतिवध्यते तदाशतसंवत्सरादप्यधिकंजीवति॥ पापेतुक्रियमाणेपापमपि[illegible]र्भुंक्तेकालोपितत्तेत्पापंकालसमानंभवति॥ उत्कृष्टंचेत्भूयसः आयुषःक्षयः उत्कृष्टपापेवक्रजन्मजनकेबीजपातक्षणमारभ्यपंचविंशतिवर्षपर्यंतंनानावि– धायोनयःप्राप्यंतेनतेनशतायुःश्रुतिभंगःनिरूपितमितिप्रमा एम०
णं १२ ॥ १४४

:

प्रहप्रस्थानः

एवंकालंनिरूप्यउपसंहरति॥ ग्रहर्क्षताराचक्रस्थइति॥ ग्रहाबुधादयः ऋक्षाणिअश्विन्यादयः ताराअन्याः तेषांचक्रंभवक्रं॥ तत्रविद्यमानःसूर्यःतत्रस्थःपरमाणुरद्दशमारभ्यसंवत्सरावसानपर्यंतंपर्येति पुनःपुनर्मंडलाकारेणपरिभ्रमति॥ अनिमिषःपरत्रसनेसबधानः विभुःसमर्थः॥ जगत्पर्येतिउपभुंक्ते १३ तस्यसंवत्सरात्मकस्यकेनचिन्निमित्तेनपंचनामानिसंतितान्यपासनार्थमाह॥ संवत्सरइति मासाःपंचविधाःसंवत्सरसमाप्तिसूचकाद्वादशमासाःसंवत्सरः त्रयोदशमासाःसंवत्सरोनाक्षत्रेनियतंचांद्रेकादाचित्कं॥ द्वादशमासाःसंवत्सरइतिसौरेनियतंचांद्रेकादाचित्कं॥ बार्हस्पत्येतुप्रभवादयस्तेनियताः॥ वैष्णवोपिनियतः॥ सावनस्तुननियतःप्रतिदिनपर्यवसायित्वात्॥ अतःसंवत्सरप्रयुक्ताप्रभवादिनामसिद्ध्यर्थंबार्हस्पत्यमानमप्यपेक्षते॥ नत्वादिसिध्यर्थंएकादशपादिरपिमासोवै इति४

ग्रहर्क्षताराचक्रस्थःपरमाणवादिनाजगत्॥ संवत्सरावसानेनपर्येत्यनिमिषोविभुः १३
संवत्सरःपरिवत्सरइद्वावत्सरएवच अनुवत्सरोवत्सरश्चविदुरेवंप्रभाष्यते १४ ॥

सवः अन्यथाभगवतःशयनंरात्रौभागद्वयेनस्यात्॥ सावनस्तुव्यवहारसिद्ध४नक्षत्रपदवीमुपारोढुमर्हति॥ अतःपंचैवसंवत्सराः नत्वचांद्रःसंवत्सरःपरिवत्सरोवैष्णवः॥ इद्वावत्सरःसौरः॥ अनुवत्सरोनाक्षत्रः॥ वत्सरोजैवः॥ विदुरेतिसंबोधनंतत्रेहपरिज्ञानार्थंकिंचंद्यकस्यवकालःसर्वेषांनसंवत्सरभेदेनआहुत्यातथापिनामान्येवपंचेति॥ एवंपरिभाष्यतेइत्युक्तं॥ केचित्तुषष्टिसंवत्सराःमासत्वेनपरि
टीका हृताःद्वादशधापरिवर्त्तमानाःपंचवत्सरात्मकाभवंतीतिआहुः॥ प्रभवादिवक्रधान्यंताःसंवत्सरशब्दवाच्याःप्रमाथ्यादयःद्वादशउत्तरशब्दवाच्याइति॥ तत्तुमासादीनांनियाम– कत्वाभावात्चिंत्यं १४ ॥ श्रीगोपालयनमः ॥ श्रीरामचंद्रायनमः ॥

Indira Gandhi National
Centre for the Arts

त.मु.११ १४४ एवंकालस्यभेदत्रयमुपपाद्यतत्रोपासनमाहफलार्थं॥यःस्वरूपइति॥कालस्यप्रयोजनंवदन्भजनमुपपादयितुंमाहात्म्यमाह यःस्वरूपेषु
अंकुरादिषुवीजादिस्थितांशक्तिंउरुधाउद्भूसयन्पत्रकांडादिभेदेनवीजसामर्थ्यंप्रकटयन्स्वस्यशक्त्याकिरणादिस्थितसामर्थ्येनप्र
तिरूपंप्रकारभेदजनकेनवीजशक्तिंप्रकटीकुर्वन्पुंसोधिकारिणः अभ्रमायवैराग्यार्थंदिविस्वर्गेधावतिपरिभ्रमति॥धावतीत्य मे ४=
नेनक्षणमात्रमपिपारलौकिकयत्नंविनानस्थातव्यमितिज्ञापयति॥ननुधावनकथमेवंभवतीत्याशंक्याह॥भूतभेदइति॥भूतानां
भेदोयत्र सहिकालःसर्वाणिभूतानिभिनत्तिअतःस्वस्यापिभेददर्शकयावैराग्यजनकत्वं॥स्वशक्त्येत्यत्रयदादित्यगतंतेजइतिवाक्या
त्भगवच्छक्तिर्भविष्यतीत्याशंक्यतन्निवृत्त्यर्थमाह कालाख्ययेति॥कलयत्याकलयतीतिकालः आख्यायस्य॥तत्रप्रकाशकत्वेनैवभग

यःस्वरूपशक्तिमुरुधोद्भूसयन्स्वशक्त्यापुंसोऽभ्रमायदिविधावतिभूतभेदः॥का
लाख्ययागुणमयंक्रतुभिर्वितन्वन्तस्मैवलिंहरतवत्सरपंचकाय १५ ॥

उ.टी.

मर्व केन... वत्तेजःप्रविष्टमिति कालद्वारैवेयंभगवच्छक्तिः एवंसाधनेसामर्थ्यमुपपाद्यफलेसामर्थ्यमुपपादयति॥गुणमयंक्रतुभिर्वितन्वन्निति॥
गुणमयमानंदमयंस्वर्गादि॥आनंदादयःप्रधानस्येतिन्यायात्आनंदादयएवगुणाःतन्मयाःस्वर्गादयःक्रतवोपिकालभेदाएव॥अतः
क्रतुभिःस्वर्गादिकंवितन्वन् नह्यधिष्ठात्व्यतिरेकेणयागादयःप्रकटीभवितुमर्हतिस्वर्गोवाप्रकटीभवितुमर्हति॥सोपिभगवदंशश्चे
ततः देवेभ्योवैस्वर्गोलोकस्तिरोभवदित्यत्रनिर्णीतः॥एवंफलसाधनकप्रवर्त्तकोभगवान्वत्सरपंचकप्रवर्त्तकः॥ तादृशायकालात्मने
स्तूर्यायवलिंहरत तदुपार्जितान्नभोक्तारः तदुपार्जितस्वर्गभोक्तारश्च अन्यथाकृतघ्नतास्यात्भोगश्चनसिध्येत्।।येनैवोपायेनभो एम० १४५
गःसिध्यतिकालोवानग्रसतिसचप्रीतोभवेत्तथोपायःकर्त्तव्यः॥अहरहरुपासनंकर्त्तव्यमितिसिद्धं १५ ॥ ॥



एवंत्रिविधकालंनिरूप्यतूष्णींभावेआयुःप्रतिपादकत्वेनतदुपपादितंनिरूप्यविशेषंप्रष्टुमाह पितृदेवमनुष्याणामि
ति॥आयुरायुःपरिमाणं परंपर्यवसितं॥परेषांकल्पवासिनांयेकल्पांतरेप्यस्यन्त्राःकल्पसमाप्तावपिअनुवर्त्तंते॥ते
षांगतिदिनरात्रिमवस्थां॥तत्रतेषांकर्मवाआचक्ष्व॥केचनकल्पांतमेवतिष्ठंति तेषांकल्पस्यैवायुष्ट्वं ततोपियेक
ल्पात्वहिर्जीवंति॥जीवनेहेतुर्विदइति॥ज्ञानिनएववद्धकल्पजीविनः १६ मत्रकथनार्थंमैत्रेयस्यज्ञानमुपपादय

विदुरउ०पितृदेवमनुष्याणामायुःपरमिदंस्मृतं॥परेषांगतिमाचक्ष्वयेस्युःकल्पाद्बहिर्विदः १६
भगवान्वेदकालस्यगतिंभगवतोननु विश्वंविचक्षतेधीरायोगराद्धेनचक्षुषा १७ ॥

भगव... ...

ति भगवानिति भवान्भगवान्भगवत्कृपयातथात्वात्भगवतिश्रद्धावत्त्वाच्च अतएवभगवतःकालस्यगतिंवेद सहि
त्वात्मानंवेदेति॥किंच॥धीराः संसारखेदसहिष्णवः॥योगसिद्धाःविश्वंसर्वमेवयोगसिद्धेनचक्षुषाविचक्षते॥ अतोयोग
जधर्मेणज्ञानेनचविचक्षतेचक्षुषेतिनिःसंदिग्धार्थं॥योगसिद्धत्वात्नभ्रमजनकत्वं १७ ॥ श्रीगोपालयनमः ॥

Indira Gandhi National Centre for the Arts

भ०पु११ यथाकृतादिभिः दिनगणनात्तथायुगैः तेषां दिनगणनेतिकृतादीनां रूपमाह॥ कृतमिति॥ कालविशेषस्य नाम किंचित्कृतमिति तस्मिन्
१४६ काले कालेन यत्कर्तव्यं तत्प्रतीका एवात कृतमेव॥ तस्मिन्युगे ऽत्यन्तानां न किंचित् कर्तव्यमवशिष्यते॥ त्रेतानाम तृतीयांशकर्तव्यता॥
द्वापरं मशद्वयकर्तव्यता॥ कलिः कलहः सर्वमेव विवादास्पदं॥ न किंचिन्निर्द्धारितमित्यर्थः॥ अतएव कृते ये वै चत्वारस्तोमाः कृतं
तत् अथ येपंच कलिः सइतिलोमानां पंचपक्षो निंदितः त्रिवृत्पंचदशसप्तदश एकविंशइति चत्वार एव स्तोमाः॥ चत्वारो वर्णाः
तएवोत्पादिताः अतस्तेषु न कोपि विवादः॥ पंचस्तोमपक्षस्तु निंदितः कलिपदेन॥ षट्स्तोमपक्षस्तु निंदितः यस्त्रिणवमंतर्यंतीत्या
दिना निरूपितः अतो निंदितपर्यायः कलिः तेषां कलस्वादित्वं यस्मिन्काले सर्वमेव कर्तुं शक्यते सफलं च भवति स कालः अमृतघटि

मैत्रेयउ कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगं दिव्यैर्द्वादशभिर्वर्षैःसावधानंनिरूपितं १८

कारूपः कृतशब्देनोच्यते यस्त्व निंदितः विषघटिकात्मकः स कलिः यत्र कलह एव न चर्चपर्यवसानं॥ एतच्चतुष्टयं मिलित्वा चतुर्यु
गमित्युच्यते तेषां कालमाह॥ दिव्यैरिति॥ द्वादशभिर्वर्षैरिति सहस्रैरित्युक्तं भवत्यर्थात्॥ दिव्या हि वर्षाः नाल्पसंख्यया गणितु
योग्याः॥ सहस्रसंख्या परमा काष्ठा अतः सहस्रसंख्या प्राप्यते॥ दिव्यपदेनैव० शतसंख्यापि प्राप्यते॥ तथापि संदिग्धेषु वाक्यशे
षादिति न्यायेन संख्यातानि सहस्राणीत्यग्रिमवाक्यात् सहस्रसंख्यैव प्राप्यते॥ द्वादशभिर्दिव्यसहस्रवर्षैः सावधानं चतुर्युगं नि
रूपितं भवति॥ अवधानं अवधानं॥ संधौ भवा संध्या अवधानानंतरं यज्ज्ञायते सा संध्या॥ संध्यांशः अल्पकरणं॥ यथा द्यं या एम०
नादेषु रणनं तन्मध्ये युगं॥ सध्यासंध्यांशो युगे न संबद्धाविति उभयसंबंधात्कगतं च समुदाययोगशक्तिभ्यामवसीयते॥१८॥ १४६

स०मा०२

तेषामवांतरकालानाह॥ चत्वारीति॥ चत्वारि सहस्राणि कृतयुगं॥ त्रीणि त्रेता॥ द्वे द्वापरे एकं कलिरिति यथाक्रमं सह
स्राणि संख्यातानि॥ युगदशमांशः संध्या तावानेवांशः॥ अतस्ते विंशतिशतानि प्रत्येकं समुदाये न द्विगुणानि चकारात् अति
रिक्तोपि कश्चन कालो लभ्यते यस्मिन् भगवत्कार्ये किंचिदवधानं भवेत्॥१९॥ सर्वस्य युगत्वमाशंक्य निराकरणाय मध्यका
ल एव युगशब्देनोच्यते इत्याह॥ संध्यांशयोरंतरेणेति॥ संध्यांशश्च तयोरंतरेण यः कालः॥ शतसंख्ययोरिति सं

चत्वारित्रीणिद्वेचैकंकृतादिषुयथाक्रमंसंख्यातानिसहस्राणिए
तानिद्विगुणानिच १९ संध्यांशयोरंतरेणयःकालःशतसंख्य
योः॥तमेवाहुर्युगंतत्ज्ञायत्रधर्मोविधीयते २० ॥२०

ध्यांशयोरपि कालविशेषत्वमेव न तु देवतात्वं तमेव कालं युगमाहुः॥ तज्ज्ञा इति प्रमाणं नन्वनंतस्य कालस्य स्वतः परिच्छेदरहित
स्य केनोपाधिना कृतत्वमित्याशंक्य तमुपाधिमाह॥ यत्र धर्मो विधीयत इति॥ यत्र कालविशेषे धर्मः विधीयते नानूद्यते॥ संध्यायां
पूर्वधर्मस्य भवति लोपः तदा युगप्रवृत्तौ ऋषिभिः पारंपर्यज्ञानाभावात् अपूर्वो धर्मो विधीयते स तु युगसमाप्तिपर्यंतं विधिः प्राप्ति
नः प्रवर्तयन्ननुवर्त्तते॥ अतो युगशब्दवाच्यो भवति धर्मोपाधिकत्वात् २० ॥ श्रीगोपालयनमः ॥ ॥

Indira Gandhi National Centre for the Arts

त.मु.११ नन्ववांतरभेदः किंनिबंधनइत्याशंक्याह॥ धर्मश्चतुष्पादिति॥ धर्मोवांतरभेदएवयुगावांतरभेदहेतुः॥ तमाह॥ चतुष्पाद्धर्मःकृतेम
१४७ नुजान्समनुवर्त्तते॥ कालेनैवप्रेरितोधर्मःमनुजाननुवर्त्तते॥ तत्रापिमनुजाएवहेतवः चत्वारोवर्णाःकृतएव॥ त्रेतायांब्राह्मणा
भावः॥ द्वापरेक्षत्रियाभावः॥ कलौशूद्रएव॥ अतश्चतुष्पाद्धर्मःमनुजान्समनुवर्त्तते॥ सएवधर्मः अन्येषुयुगेषुपादेनव्येतिपा
देनवर्धतांधर्मेणकृत्वा अनेनत्यक्तधर्मोवर्णः अधर्मेणव्याप्रियतइत्यर्थः २१ एवंयुगानांस्वरूपमुक्तातेदिनव्यवस्था

धर्मश्चतुष्पान्मनुजान्कृतेसमनुवर्त्तते॥ सएवान्येष्वधर्मेणव्येतिपादेनवर्द्धता २१
त्रिलोक्यायुगसाहस्रंवहिराब्रह्मणोदिनं॥ तावत्येवनिशा तातयन्निमीलतिविश्वसृ
ट्कृ॥२२॥

माह॥ त्रिलोक्याइति॥ त्रिलोक्यावहिःब्रह्मलोकपर्यंतंयुगानांसहस्रसंख्यासमुदायःदिनं॥ महर्लोकमारभ्यउपरितनेषुलोकेषु
तावद्दिनमित्यर्थः॥ आब्रह्मणइतिवचनंपातालादिव्यावृत्त्यर्थं॥ तत्रदिनएवत्रिव्यवस्थैवनास्तियावद्दिनंतावत्येवनिशा॥ यु
गाद्यभावेपिब्रह्मणः आयुःखंडाएवनियमकाभगवदिच्छावा॥ तत्रनिमित्तांतरमाह॥ यन्निमीलतिविश्वसृगिति॥ यस्मिन्का एम०
लेविश्वसृक्ब्रह्माभगवान्ब्रह्मोदरेवाभगवान्शेते॥ निद्राभावान्निमीलनमेवतस्य॥ निमीलनमेवयोगनिद्रा॥ तातेति १४७
संबोधनमप्रतारकत्वज्ञापनाय २२ ॥



यथायुगप्रवृत्तिःदिनव्यापिकातथाशयनप्रवृत्तीरात्रिव्यापिकेति॥ नियामकांतरमाह॥ प्रतियुगंस्वप्रियात्यर्थं निशा
वसानइतिराव्यवसानेअरुणोदयेभगवताप्रारब्धोलोककल्पःयावद्दिनंदिवसावसानपर्यंतंअनुवर्त्तते॥ प्रवाहरूपेणलो
काःकल्प्यंतेउत्पाद्यंतेअनयापरंपरयाअस्मीवांतरपारंपर्यंलोककल्पः तद्दिनंभगवतः॥ ब्रह्मविरामपिभगवत्वात्॥ तत्रब्र
ह्मप्रवृत्तेर्हेतुमाह॥ मनून्भुंक्तेचतुर्दशअयंलोककल्पश्चतुर्दशमनून्भुंक्तेअनुभवति॥ धर्मपालकत्वेनरक्षतीत्यर्थः।

निशावसानआरब्धोलोककल्पोनुवर्त्तते॥ यावद्दिनंभगवतोमनून्
भुंक्तेचतुर्दश॥ स्वंस्वंकालंमनुर्भुंक्तेसाधिकांह्येकसप्ततिं २३ ॥

मनूनांधर्मपरिपालनरूपंवक्तुंतत्परिछिन्नंकालमाह॥ स्वंस्वंकालमिति एकसप्ततिचतुर्युगानिसार्द्धैकपंचाशद्दिव्यव
र्षाधिकंमन्वंतरं॥ मन्वंतरशब्दोरूढः। षड्गधर्मसाधनपरःनतुमनोरंतरंतेनोपभुज्यमानःकालः॥ तथासतिमनुपुत्रा
दीनामुपभोगकालोन्यःस्यात्॥ नापिसर्वस्यापिवंशवाचकोमनुशब्दः प्रियव्रतपुत्रेषुउत्तमतामसरैवतेषुभिन्नमन्वंतरं
नस्यात्॥ सएवस्वांतरंनिम्नइतितुप्रक्रियांतरत्वात्नाम्नैर्मन्वंतरैर्विरोधः। अतोमन्वंतरशब्दोरूढएव॥ मन्वंतराणिसद्ध
र्मइतिवाक्याद्धर्माणांसमुदायोमन्वंतरं २३ ॥

त्सु११ १४८

तानाह॥मन्वंतरेष्विति॥सर्वेष्वेवमन्वंतरेषुमनवोमनुपुत्राः ऋषयः देवाः इंद्रः अंशावताराश्च॥एतेयुगपदेवभवंति॥सपुत्रएवम
नुः अधिकारेभिषिच्यतेसुरेशाश्चेंद्रः॥आद्यंतयोर्बहुवचनंसमुदायाभिप्रायेणअंशावतारस्तुयुगपन्नजायतइतिपंचैवोक्ताः॥२४
॥उक्तानिमन्वंतराणियस्थिंतमुपसंहरति॥एषदैनंदिन इति॥दिनेदिनेजायमानोदैनंदिनःसंवत्सरात्मकःकल्पोभिन्नः॥अयंतुदैनं
दिनः॥अस्यविशेषमाह॥त्रैलोक्यवर्त्तनइति॥त्रैलोक्यंवर्त्तयतिआवर्त्तयतीति॥देवतिर्यग्मनुष्याणांपुनःपुनर्जन्मेतिकृत्वात्रैलो
क्यवर्त्तनत्वं॥तदेवाह॥तिर्यङ्नृपितृदेवानामिति॥नृपितरःएकोंजीवन्मृतभेदेनविवक्षया॥दैनंदिनपुनःपुनरुत्पत्तौकर्मणोनि

मन्वंतरेषुमनवस्तद्वंशाऋषयःसुराः॥भवंतिचैतेयुगपत्सुरेशाश्चानुयेचतान् २४ ए
षदैनंदिनःसर्गोब्राह्मस्त्रैलोक्यवर्त्तनः॥तिर्यङ्नृपितृदेवानांसंभवोयत्रकर्मभिः॥
२५ मन्वंतरेषुभगवान्बिभ्रत्सत्वंस्वमूर्त्तिभिः॥मन्वादिभिरिदंविश्वमवत्युदितपौरु
षः २६॥

यामकत्वं २५ एवंदिनमुपसंहृत्यतत्रनियामकेधर्मेकःप्रवर्त्तकइत्याकांक्षायांधर्मस्यभगवानेवप्रवर्त्तकइत्याह मन्वंतरेष्विति॥
सर्वेष्वेवमन्वंतरेषुस्वस्यशुद्धंसत्वंबिभ्रत्भगवान्॥स्वस्यमूर्त्तिभिःज्ञानकर्मयोगादिप्रवर्त्तकैरवतारैः मन्वादिभिःसहितैरिदंवि
श्वमवति॥उदितंपौरुषंयस्य यद्यपिस्वयमेवधर्मंपालयन्जगत्पालयति॥तथापिस्वस्यैवपौरुषस्यएतेअंशाःमन्वादयः एस० १४८
अवताराश्च॥ २६ ॥श्रीराधावल्लभायनमः ॥ ॥

एवंदैनंदिनसृष्टिमुपपाद्यतत्रत्यंप्रलयमुपपादयति॥तमोमात्रामुपादायेति॥तमसोमात्रासत्वरजःसंबंधरहितांकेवलंतमइत्यर्थः॥ता
मुपादायप्रतिसंरुद्धोविक्रमोयस्य॥तमसाविक्रमेपिप्रतिसंहृतेविक्रमद्वाराविक्रमकार्यमपिजगत्कालेनकृत्वाभगवत्येवानुगतंभव
तितदाह कालेनेति सर्वमेवानुगतंभवति॥अतोशेषपदेनशेषव्यतिरिक्तंजगदितियोगात्सूचितं तदाभगवान्कार्योन्मुखतांपरि
त्यज्यतूष्णीमास्ते॥दिनात्ययेसंध्याकाले २७ भगवतस्तूष्णींभावेप्रवाहलंभकाभावात्कालेनप्रेरिताभूरादयोलोकाः अन्वपिधीयंते॥
अन्वपिधीयंतेअव्यक्तेप्रविशंतितदातेषुअव्यक्तेलीनेषुनिर्मुक्तःशशिभास्करंयथाभवतितथानिशायामनुवृत्तायासम्यक्प्रवृ
त्तायां॥त्रिलोकामितितदनंतरंत्रिलोक्यांसंकर्षणाग्निनादह्यमानायांऊष्मणापीडिताःमहर्लोकेस्थिताःभृग्वादयःमहर्लोकं

तमोमात्रामुपादायप्रतिसंरुद्धविक्रमः॥कालेनानुगताशेषआस्तेतूष्णींदिनात्यये २७ तमेवान्व
पिधीयंतेलोकाभूरादयस्त्रयः॥निशायामनुवृत्तायांनिर्मुक्तःशशिभास्करं २८ ॥ ॥

परित्यज्यजनलोकंयांतीतिसंबंधः॥अत्रायंक्रमः॥यदाभगवान्शिशयिषुर्भवतितदातमोगृह्णातिपश्चाच्छेते॥एतावानेवव्यापा
रः॥अन्यत्सर्वंस्वयमेवभवति॥विक्रमोपसंहारश्चतमोग्रहणादालस्येन॥ततोरक्षकाभावात्कालस्यभक्षकत्वात्स्वयमेवजगल्लीय
ते॥कालस्यात्रनभक्षकत्वंकिंतुभयजनकत्वात्लयेनिमित्तत्वंजगतिस्वस्मिन्प्रविष्टेपिभगवान्नपरिपालनार्थंयत्नंकरोति किंतुतूष्णी
मेवतिष्ठति॥तस्यतूष्णींभावमनुभुवनात्मकाभूरादयःउज्जट्याप्रभिन्नयद्वतिरोहिताभवंति॥तदाआधारभूतानांलोकानामभा
वात्ज्योतिश्चक्रंध्रुवाद्विगलितंपतति तदामुख्योशशिभास्करौकीलाद्विगलितौनिर्मुक्तौभवतः तदांधकारेप्रवृत्तेरात्रिःसुत
रांप्रवृत्ताभवति २८ ॥ २८ ॥

Indira Gandhi National
Centre for the Arts

त०सु०११
१४९ तदासंकर्षणमुखात्उत्थितोऽनलः त्रिलोकीं दहति जनाभिमानिन्यो देवताश्च पूर्वमेव गताः॥ शिष्टमचेतनं अग्निर्दहति महरादीन्कथमग्निर्दहेदित्याशंक्याह सोग्निःशक्तिरूपइत्युक्तं॥ तस्याग्नेः प्राकृतवैलक्षण्याय माहात्म्यमाह॥ भृग्वादयः पीडिता भवंतीति २९ तदनंतरं भगवद्दृशा घनाः वर्षंतीत्याह तावदिति तावत्सिंधवः कल्पांतेन कालेन एधिताः मेधधाराः एव वडवानलशांतिद्वारा वा सिंधवः त्रिभुवनं प्लावयंति उत्कटो योयमाटोपः तत्सहितो योयं चंडो वातः तेन जनिताः ऊर्मयो येषु ३० तदा तस्मिन्सलिले॥ सलिले शेषः परमासनमनंतः अतः सर्वलोकानां दुःखहर्त्ता योगनिद्रया निमीलिताक्षः योगनिद्रयं कृत्वा निमीलनं निमीलः तद्युक्ते अक्षिणी यस्य जनालयैः

त्रैलोक्ये दह्यमानायां शक्त्या संकर्षणाग्निना॥ यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोर्दिताः २९ तावत्त्रिभुवनं सद्यः कल्पांतैधितसिंधवः॥ प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ३० अंतः स तस्मिन्सलिल आस्तेनंतासनो हरिः योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ३१ एवंविधैरहोरात्रैः कालगत्योपलक्षितैः॥ अपक्षितमिवास्यापि परमायुर्वयःशतं ३२

भृग्वादिभिः स्तूयमानः हिंडोलायां गायकैर्गीयमान इव निमीलिताक्ष आस्ते इत्यर्थः॥ ३१ एवं ब्रह्मणो रात्रिदिवाव्यवस्था निरूपिता तदनंतरं तादृशैरहोरात्रैः ब्रह्मण आयुरित्याह एवंविधैरिति॥ ननु द्वितीयदिवसस्य कथं प्रवृत्तिः कर्मसूर्यगत्यादीनां अभावादित्याशंक्याह कालगत्योपलक्षितैरिति॥ कालप्रवाहस्य विद्यमानत्वात् निर्विशेषं न सामान्यमिति न्यायेन सामान्येनोपलक्षिता विशेषा भवंतीति पुनरहोरात्रप्रवृत्तिः॥ एवमहोरात्रावृत्त्या पक्षमासवर्षावृत्तिः तदा ब्रह्मणो एम०
वर्षशतं भवति तावद्भिरपि वर्षैर्ब्रह्मण आयुः अपक्षितमिव भवति तस्यापि परमायुर्वर्द्धितमिति न बुद्धिः॥ किंतु अन्यदपि चेद्भवेत्तत १४९
दा समीचीनं भवेदितीछेवतिष्ठति॥ ३२ ॥ ॥

तदानीं तस्मिन्नायुषि स्थूलान्कल्पान्निरूपयितुं तस्यायुषो विभागमाह॥ यदर्द्धमायुषस्तस्येति॥ तस्य ब्रह्मण आयुषो यदर्द्धं तत्परार्द्ध इत्यभिधीयते ब्रह्मायुषः परशब्दवाच्यत्वात् परस्यार्द्धमिति॥ तत्र पूर्वपरार्द्धस्य आद्यंतौ ज्ञापयितुं पूर्वस्य समाप्तिमाह पूर्वःपरार्द्धोपक्रांतइति अद्य इदानीं अपरः प्रवर्त्तत इति ब्रह्मणोप्यायुर्गतप्रायमिति सूचयन्वैराग्यमुपदिष्टवान् साधारणानामिंद्रियाध्यासत्वात् ३३ तत्र मुख्यकल्पानां मध्ये आद्यो ब्रह्मकल्प इत्याह॥ पूर्वस्येति॥ तस्य कल्पस्य ब्राह्मत्वमुप

यदर्द्धमायुषस्तस्य परार्द्धमभिधीयते॥ पूर्वः परार्द्धोऽपक्रांतो ह्यपरोद्य प्रवर्त्तते ३३ पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत् कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ३४ तस्यैव चांते कल्पोभूद्यं पाद्ममभिचक्षते॥ यद्धरेर्नाभिसरस आसील्लोकसरोरुहं ३५ ॥ ॥

पादयति॥ स तु महान्कल्प आसीत् संवत्सरात्मको न तु दैनंदिनः॥ यत्र कल्पे ब्रह्मा स्वयमभूत् उत्पन्न इत्यर्थः तस्मिन्कल्पे भगवानेव ब्रह्मेति तस्य सर्वकल्पेषु साधारण्यं मन्यमानः कल्पप्रयोजकं ब्रह्मणो रूपमाह॥ शब्दब्रह्मेति यं विदुरिति॥ तस्मिन्कल्पे शब्दब्रह्मणः प्रकाशादेव सर्वोत्पत्तिः॥ तस्य शब्दब्रह्मणः स्वरूपं बुध्यध्यायेऽग्रे वक्ष्यत ३४ तस्यांतिमवर्षकल्पमाह॥ यं पाद्ममभिचक्षत इति स पाद्मकल्पः पूर्वमुक्तः॥ तस्य पाद्मकल्पत्वनिमित्तमाह यद्धरेर्नाभिसरस इति पद्मेन कल्प्यत इति कल्पः तस्मात् तस्य पाद्मकल्पत्वसिद्धेः पद्मोद्भव एव वक्तव्यः तदर्थं नाभिसरोरुहमित्युक्तं ३५ ॥ ॥

Indira Gandhi National
Centre for the Arts

अतिमार्थात्मकः २=    वर्षात्मक २=    मासात्मकः १२ दिनात्मः २

त॰मु११ १५० द्वितीयपरार्द्धस्य आद्यंसंवत्सरकल्पमाह॥ अयंतुकथितःकल्पइति॥तुशब्दोदिनंदिनंव्यावर्त्तयति॥ वाराहइति॥ आद्यस्याघो
ब्राह्मःवेदात्मकः द्वितीयस्याद्यःशब्दार्थात्मकःवाराहइतिलोकेविख्यातः॥ तस्यवाराहत्वमुपपादयति यत्रासीदिति वराहःसू
करः हरिरितिब्रह्मादीनांदुःखनिवारणंतथावतारेहेतुः॥ तत्राद्यिवाराहकल्पःप्रथमःवाराहोद्वितीयः तृतीयःश्वेतवाराहःसो
यंवर्त्तमानः ३६ एवंब्रह्मणआयुर्निरूप्यअरूरस्याप्यायुर्वक्तव्यमित्याकांक्षायामाह॥ कालोयमिति अयंद्विपरार्द्धाख्यःका
लःअरूरएयुष्योनिमेषोभवति अयंनिमेषःउन्मेषनिमेषात्मकः॥तेनापिप्रकारेणगणनानोचितापरिच्छेदासंभवात्॥सर्व

अयंतुकथितःकल्पोद्वितीयस्यापिभारत वाराहइतिविख्यातोयत्रासीच्छूकरोहरिः ३६
कालोयंद्विपरार्द्धाख्योनिमेषउपचर्यते॥ अव्याकृतस्यानंतस्यअनादेर्जगदात्मनः ३७

दात्मपरिछिन्नंस्वरूपंब्रह्मस्य अतआह॥ उपचर्यतइति॥ ब्रह्मायुर्निमेषउपचारादेवोक्तः नतुवस्तुतः॥ तत्रहेतुमाह॥ अव्याकृ
तस्येति॥ नकेनापिव्याकरणमाविर्भावोयस्य॥ आविर्भावतिरोभावयोर्मध्यवर्त्तीकालःआयुरित्युच्यते॥ तत्राविर्भावाभावे
तिरोभावोपिनास्तीतितस्यायुरेवनास्तिकस्यगणनास्यात्॥ किंच॥ परिछिन्नेहिगणनेतितदाह॥ अनंतस्येति अंतरहित
स्य॥ तस्मादुत्तरएवधभावात्नकालगणना॥ आरंभोपिनास्तीत्याहअनादेरिति॥ अनादित्वंनिरूपयति जगदात्मनइति एम॰
॥जगतामात्मायेपरिच्छेदकाःकालादयस्तेषामप्ययमात्मा॥ यथादेहस्यैवायुः नात्मनः॥ तथाअस्याकूरस्यनजगतामात्मानो १५०
देहस्थानीयाः॥ अतोदेहस्थानीयानामपिनियतत्वात्नाकूरस्यायुःकेनापिप्रकारेणसिध्यति ३७ ॥

कालादयः    देहस्थानरः=

किंच अयंकालःपरमाण्वादिर्द्विपरार्द्धान्तः।मनुष्यायुःपरिछेदकःसूक्ष्मोपाधिमारभ्यब्रह्मणःपरमायुरवच्छेद
कपर्यंतंकालःसर्वेषांधाममानिनांदेहाभिमानिनांईश्वरोपिसन्नियंतापिसन्भूम्नोकूरस्यप्रभुर्नभवति तत्रापिई
शितुंप्रभुर्नभवति॥ भगवंतंईशनंकर्तुंनसमर्थोभवेदित्यर्थः ईश्वरोधाममानिनामितिभिन्नंवाक्यंतेनेश्वरपदेन
पौनरुक्त्यं॥ पुनरीश्वरग्रहणंतस्यैश्वर्यस्थापयितुं॥ अन्यथामूलेअनीश्वरःसर्वज्ञानीश्वरःस्यात्॥ ३८॥ एवंकालपरि
छेदाभावमुक्त्वास्वरूपमाह विकारैरिति॥ विकारैःषोडशविकारैःएकादशेंद्रियाणिपंचतन्मात्राश्च आवरणेम

कालोयंपरमाण्वादिर्द्विपरार्द्धांतईश्वरः नैवेशितुंप्रभुर्भूम्नईश्वरोधाममानिनां ३८
विकारैःसहितोयुक्तैर्विशेषादिभिरावृतः आंडकोशोबहिरयंपंचाशत्कोटिविस्तृतः ३९

हाभूतानांविनियोगात्॥ महाभूतानिवा॥ उत्पत्तौतन्मात्राणांप्राधान्यात्॥ युक्तैर्मिलितैः अयुक्तैर्विशेषादिभिःपृथिव्यादिभिः
आवृतःअयमांडकोशः॥ वहिरावृतस्यस्वरूपंपंचाशत्कोटिविस्तृतं॥ बहिरेववापंचाशत्कोटिविस्तृतः॥ अयंगोलःपंचमस्कंधो
क्ततिर्यग्गोलादन्यः सएववाऊर्द्ध्वगोलःज्योतिःशास्त्रेगोलकवद्दूरप्रसिद्धत्वात्॥ पद्मकल्पेपंचाशत्कोटिविस्तृतंकमलंवाराह
हेभूमिरेवतावती अतोनानाप्रकारनिरूपणेनदोषाय नाप्यन्योन्यविरुद्धं ३९ श्रीकृष्णायनमः॥ श्रीराधावल्लभायनमः

Indira Gandhi National
Centre for the Arts

त॰सु॰११
१५१

तस्मब्रह्मांडस्यप्रकृतेनिरूप्यमाणस्यदेशावच्छेदकत्वाभावायस्थूलतामाह॥ दृशोत्तराधिकैरिति अंडात्परतःपृथिवीपंचाशत्को टिदृशगुणविशेषैर्दिभिरितिअजहत्स्वार्थवहुव्रीहिः गोलएववाष्पृथिवीजलादयएवदशगुणाइतिकेचित् तदातैरावरकैः हृ ष्टेः घटमध्येप्रविष्टःपरमाणुरिवलक्ष्यते॥तैःसहितोवारोमकूपेप्रविष्टःपरमाणुरिवदृश्यते॥ तस्यचकूपस्यमध्येअन्येप्येता दृशाःअंडकोशाःकोटिशोलक्ष्यंते ४० एवमनंतब्रह्मांडाहृतरोमकूपोभगवान्अक्षरशद्वेनोच्यतइत्याह॥ तदाहुरिति॥ अ क्षरस्यचब्रह्मत्वंसमन्वयेस्थापितं॥अक्षरमेवरंतधृतेःसाचप्रशासनादित्यधिकरणे॥सर्वकारणानांपुरुषादीनामपियतःका रणं॥तदेवाक्षरंमायाफलरूपेणद्विधायदासमभवततत्रैकोभागःपुरुषः अपरश्चप्रकृतिःअतःकारणकारणं॥तादृशमपितद्ब्र सद्रिपि॰१२-

दृशोत्तराधिकैर्यत्रप्रविष्टःपरमाणुवत्॥लक्ष्यतेंतर्गताश्चान्येकोटिशोत्पडराशयः ४० तदाहुरक्षरंब्र ह्मसर्वकारणकारणं॥विष्णोर्धामपरंसाक्षात्पुरुषस्यमहात्मनः ४१ इतिश्रीभागवतेमहापुराणे

रंपुरुषोत्तमस्यपरब्रह्मणोधामभवतिदेहस्थानीयंगृहस्थानीयंवा॥यथाजग ((तृतीयस्कंधेएकादशोध्यायः॥ ॥ दात्मानोक्षरस्यदेहस्थानीयाःतथाअक्षरमपिभगवतः॥अनेनभगवतः आयुःपरिमाणादिशंकैवनिवारिता॥ ततोप्यन्यद्भगव तोधामभविष्यतीत्याशंक्याह॥परमिति॥यथास्मदादीनांप्राणांतःकरणाव्यवहितानामेवदेहःस्थानंभ,वतिनतथाक्षरंभग वतःकिंतुसाक्षात्मूलभूतस्यसाकारत्वायाह॥पुरुषस्येति॥ उत्कर्षमपकर्षहेतुंचक्रत्वासंदिहानंप्रत्याह॥महात्मइति॥ राम॰ महांश्चासावात्मेति॥आत्मभूतःपुरुषोव्यापकइत्यर्थः॥समुदायेनापिमहानुभावःसर्वभवनसमर्थइत्यर्थः॥४१॥इतिश्री १५१ भागवतसुवोधिन्यांश्रीमद्वल्लभदीक्षितविरचितायांतृतीयस्कंधविवरणेएकादशाध्यायविवरणं ॥ ॥

दोषेनप्रपेद्धरि।ततोहीनैवसामध्यलोकिवा मोहिकापरा३

स्मा॰ प्रा१

साधारणानांवुद्धिर्याद्दशेसानिरूप्यते॥अष्टधासासर्गरूपाश्रेष्ठाचोत्तरतःपरा १ नामिधादिप्रकारेणप्रथमोक्तातीम तिःज्ञाननिष्ठाहितीयास्यात्सदोषासाप्रकीर्तिता २ [illegible] दोषोप्यत्रह रे॰संगात्ज्ञानादप्यधिकामता॥यथाहरस्तत्रश्रेष्ठाकृष्णस्याज्ञानुपालिनी॥सदोषासापितस्य लुदोषे ४ ततोवेद विनिष्णातानदर्थकर्मणिस्थितातततःश्रेष्ठावेदएवयोगवासनयायुता ५ सर्वतोप्युत्तमायातुक्रीडेच्छापूरिकाहरेः एव मष्टविधावुद्धिःसर्वेषांसर्गयोगिनी ६ एवंकालकृतंनिरूप्यब्रह्मकृतंजगदष्टधानिरूपयिष्यन्पूर्वोक्तिमुपसंहरतित

मैत्रेयउवाच॥इतितेवर्णितःक्षत्तःकालाख्यःपरमात्मनः
महिमावेदगर्भोथयथास्राक्षीत्रिवोधमे १ ॥

द्वेषत्वाभावार्थइतितेवर्णितइति॥यथाब्रह्माभगवतोगुणावतारःएवंकालोपिभगवतोमहिमागुणविशेषः॥तत्रलो कप्रसिद्धिर्गोणीवस्तुयाथात्म्यमेवमुख्यमितिज्ञापयितुंकालाख्यइत्युक्तं॥अक्षरादेर्धर्मत्वंवारयति परमात्मनइति॥ पुरुषोत्तमस्य॥अथभिन्नप्रकारेणकालस्यदशधासृष्टेः॥वेदगर्भइतिवेलरूपेहेतुः॥वेदानुसारिणीसृष्टिःब्रह्मणे वविनिर्मिता॥कालानुसारिणीकालात्पुष्यासाभगवत्कृता १ तत्रापिसृष्टिप्रकारःकठिनइतिभिन्नप्रकारत्वाद्वि वेकार्थसावधानतयाश्रोतव्यमित्याह निवोधेति ॥

Indira Gandhi National
Centre for the Arts

कोऽप्यागभावः ३ — यदि वस्तावजगद्वात्मानं वस्तुरूपं च जानीयात् तदा जगदेव नप्रसरेत् ४ =

त॰ सु॰ १२ तत्र प्रथमं पंचपर्वाऽविद्याधिष्ठातृदेवतानां सृष्टिमाह॥ ससर्जाग्रहइति॥ तत्रापि जातिहीनातामसीवृत्तिः तदधिष्ठातृदेवता

१५२ वा सा प्रथमा तामाह॥ ससर्जाग्रइति॥ अंधतामिस्रं अग्रेससर्ज॥ विषयः पुरुषश्चेति ज्ञानेकोऽपि द्वयं मतं॥ पुरुषे बोधकं चक्षुः वि

षयेव्यापिका प्रमा अग्रेतद्रूभयाभावः तेनांधत्वं तमस्तथा १ तदनंतरं तामिस्रं॥ विषयेष्वेव मोहः ननु स्वात्मनि॥ आदिकृदिति

भारंगृह्णीयात्॥इदंचलोकसिद्धं·नोपपादनीयं॥चरतीति॥यथासुखंपरिभ्रमति मुक्तोजायतेइत्यर्थः॥विज्वरइति· १७१
चिंतारहितः॥अन्यथाधनादिनिमित्तंसर्वत्रचिंताभवेत् १८ ॥

यासां३=

यामिति यांभार्यामाश्रित्यइंद्रियलक्षणान्शत्रून्अन्यायेनमारकान्भार्यासहितावयंहेलाभिरेवजयेम॥नहितेशत्रवः अन्याश्र
मैः जेतुंशक्याः॥अतइतराश्रमैर्दुर्जयान्सभार्यएवजयति॥भार्यावंतंइंद्रियाणिनवाधंतइतिकेचित्॥जयस्तुशत्रुत्वे भार्याव
तस्त्वदूपेक्षणान्तेषांनशत्रुत्वं शास्त्रतः शत्रुत्वेपिवहिःस्वानंदानुभवात्अनुषंगतएवहेलाभिरवजयैवेंद्रियाणांजयः॥वाधका
नामवाधकत्वमेवजयः असामर्थ्यजनकत्वंवा॥अवाधकत्वमात्रमत्रजयइतिवक्तुंदृष्टांतमाह इस्यून्दुर्गपतिरिति नहि
चोराणांजयेकश्चनपुरुषार्थः॥किंतुतेयथानवाधंतेतथादुर्गाश्रयणमेवकर्त्तव्यं॥नतुतेषांमारणंजयः अश्रमानत्वात्ज

यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रमैः॥वयंजयेमहेलाभिर्दस्युन्दुर्गपतिर्यथा १९ नवयं
प्रप प्रभवस्तांत्वामनुकर्त्तुंगृहेश्वरि॥अप्यायुषावाकात्स्न्येनयेचान्येगुणगृध्नवः २० ॥ ॥

यस्यकादाचित्कत्वाच्च॥१९॥किंचएकस्मिन्नपिदिवसेक्रियमाणस्यभार्योपकारस्यप्रत्युपकारेणाशक्तिमाह॥नवयमिति॥
तांपूर्वोक्तोपकारकारिणींत्वांप्रत्युपकर्त्तुंवयंनप्रभवामः यःउपकारःकर्त्तव्यःसोपिस्वार्थएवतीति॥यथालंकारः देहपोषो
वागृहेश्वरीति॥संबोधनात्प्रत्यहंतद्गृहेसर्वभोगान्भुंजानःकमुपकारंकुर्यात्॥कात्स्न्येनाप्यायुषेति तस्याभोग्यालंकिय
त्कालमेवेतितदनंतरंपरिपालनादिकंप्रत्युपकारसाधकंभविष्यतीतिसंभाव्यनिराकरोति॥तथापितावत्कालमुपकारकरणा
त्॥येचान्येदेवाअपिचिरजीविनः॥गुणगृध्नवइति॥तस्मादेकोपिगुणःपुत्रजननादिः प्रतिकर्त्तुमशक्यः॥अतोयेषांत
द्गुणाअपेक्षिताःइहपरत्रसाधकत्वेनतैःप्रतीकारोशक्यइत्यर्थः २० ॥
स्वभार्याकामतःपुत्रादिजनन
कृतोपकार३=

Indira Gandhi National Centre for the Arts

त·सु·१४ एवंतां कृत्वा कालविलंबं प्रार्थयति॥ अथापीति॥ प्रार्थितं तु यथेष्टं कर्तव्यमेव सुतरां प्रज्ञानिमित्तमलमत्यर्थं करवाणि॥
१७१ अथापि मुहूर्तं परिपालय यावत्संध्यागमो भवति॥ तत्र हेतुः॥ यथा मां नातिवोचंतीति॥ अतिक्रम्य निंदापूर्वकं यथा न वदंति॥ अस्मज्जातीयाः सर्वे सर्वज्ञाः तएव धर्मशास्त्रकर्तारः॥ तेषां महत्तां किमपि न भवतीति तत्कथनसंभावना २१ एवं तां प्रार्थयित्वा तस्य कालस्य स्वरूपतो दोषमाह एषेति॥ एषा वेला घोरतमा सर्वभोगविगर्हिता॥ नहि घोरं भोगाधिकरणं भवति॥ कालदेशयोः सर्वाधिकरणत्वात्तद्दोषोऽवश्यं परिहरणीयः॥ सर्वस्यापि कालस्य संध्या रजोरूपा संध्येव

अथापि कामये तं ते प्रज्ञात्येकरवाणपलं॥ यथा मां नातिवोचंति मुहूर्तं प्रतिपालय २१
एषा घोरतमा वेला घोराणां घोरदर्शना॥ चरंति यस्यां भूतानि भूतेशानुचराणिह २२ ॥

रात्रिः रजस्वला सा परिहरणीयेति॥ अतएव सा पुष्पिता भवति मत्स्यरूतश्चतस्याः रागो रजोरूपो दृश्यते॥ कामादिजनकत्वात् भयहेतुरपि भवति॥ अतो घोरतमा घोराणां भूतादीनां च संबंधिनी भवति॥ घोरदर्शना च सर्वत्रैवांधकारव्याप्त्या घोरसंबंधित्वमुपपादयति॥ ॥ चरंति यस्यां भूतानीति॥ तानि च भूतानि मंत्रादिभिः न निराकर्तुं शक्यानीत्यपपा एम०
दयति॥ भूतेशानुचराणीति महादेवस्य सेवकानि तानि भूतानि॥ हेत्वाश्चर्ये॥ कथमेतस्मिन् एवं काले प्रार्थितमिति त १७२
स्याभयं उत्पादयति २२ ॥

किंच अस्य कालस्याधिष्ठात्री देवता महादेवः॥ सकामनाशकः तच्छत्रुपरिग्रहः तस्य काले क्रियेत चेत्तदा स मारयिष्यतीति भयं जनयन् महादेवं स्तौति षड्भिः एतस्यामित्यादिभिः परिभ्रमो दर्शनं च संबंधाभावएव चं मारणे हेतुत्रितयं दोषाभावाय चापरे १ तत्र प्रथमं तस्य परिभ्रमणमाह देशांतरगमनाय एतस्यां संध्यायां साध्वि इति संबोधनं निषिद्धकामवत्त्वव्याहत्यर्थं भगवानित्यप्रतिहतगतिः परिभ्रमणमुपकारहेतुरित्याह भूतभावन इति भूतानि भावयति पालयतीति संध्यायामुत्पत्तिर्यदि भवेत् तेन तस्य च लोकस्य नाशो भवेत्॥ अतः सर्वत्र सन्मार्गवर्त्तिषु भोगनिराकरणार्थं भू

एतस्यां साध्वि संध्यायां भगवान्भूतभावनः॥ प
रीतो भूतपर्षद्भिर्वृषेणाटति भूतराट् २३ ॥

तपर्षद्भिः परीतः भूतरूपाएव तस्य परिषदः सत्सभापतयो भवंति॥ तैः सहितः वृषमारुह्यास्त्ययमटति॥ भूतानां राजा भूतानां स एव कालः॥ अतः स्वभत्सरत्वार्थं भूतराट् पर्यटति॥ यदि कश्चिदन्यायं कुर्यात्तदा पर्षद्भिः तं दंडयति॥ धर्मकारिणमपि संध्यायामधर्मकारिणं मारयतीति सूचयितुं वृषेणाटतीत्युक्तं॥ वृषो धर्मः यस्तमेवावरुह्य तिष्ठति स कथं त्वां तादृशं परिपालयेत्॥ धर्मस्य साक्षित्वार्थं वा २३ ॥

Indira Gandhi National Centre for the Arts

काद्यरंवशगतेनभजेतच मइतिश्लातरइ=

न·पु१४ १५२ एवंदेशांतरगमनाभावायतस्यपरिभ्रमणमुक्त्वाअत्रसइदानींस्वभावतःस्थितःपश्यत्येवेत्याह॥स्मशानेति अयंदेवोम
हादेवःत्रिभिरपिचक्षुर्भिःपश्यति गार्हपत्यादयःतस्यैवचक्षूंषि॥सचदेवःअतीन्द्रियमपिपश्येत् देवरइतिलक्ष्योत्याह
नं॥एकजामातृणांभ्रातृत्वव्यवहाराद्देवरत्वं पतिरपिदेवरउच्यते॥अग्निरूपत्वाद्भगवतः॥तृतीयोअग्निष्टेप
तिरितिश्रुतेः॥दैत्यानांचदेवंसुखंराती तितवोपास्योदेवरःतस्यातिक्रमःसर्वथानर्थहेतुस्तस्यस्वभावतएवमतस्या
नक्रीडापरत्वान्नतस्यमारणेकाचिछंकाइत्यभिप्रायेणाह॥स्मशानेयश्चक्रानिलःवात्यातेनोद्धतायाधूलिःतया
धूम्राधूसरवर्णाविकीर्णाविद्योतमानाश्चयाजटाःतासांकलापोयस्य॥प्रलयकर्तृत्वादस्यजटानांप्रलयहेतुत्वात्भस्म

स्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः॥
भस्मावकुंगुठामलहक्मदेहोदेवस्त्रिभिःपश्यतिदेवरस्ते २४

धूसरत्वाभावेविकीर्णाविद्योतमानाःप्रलयमेवकुर्युः॥भस्मांतरंचप्रलयमेधानलस्यशतिचक्रानिलादन्यःनस
वनोभस्मसंबंधंकारयति॥अतःतथाभावउचितएव॥किंच॥भस्मावकुंठामलहक्मदेहः भस्मनाअवकुंठःप्र
क्षालनंयस्य॥अमलंयद्रुक्मंसुवर्णरजतंवातद्वत्स्वनाद्यष्टमत्फज्वलंभवति॥अतस्तस्यभस्मापेक्षास्तीतिस्वल्पेण
पणधेमारयेदित्यर्थः देवरइतिकल्पांतरेप्राचेतसस्यदक्षस्यकन्यापत्न्योपिमहादेवायसतींदत्तवानित्यध्यवसेयं प्रथ एम० १५२
ममन्वंतरेयत्रसतीजन्मतत्रदित्यादीनांजन्म देवंपतिंराती तिदेवरःश्वसुरोवा।तथाच मरीचिभ्रातृत्वान्महादेवोपि
देवरः कन्यासमयेप्रार्थितोमहादेवःपतिंदत्तवानितिदेवरः २४ ॥

तथाचक·ष्टभगिनि॥ ॥गवदे·रत्नेन दक्षा:३ व्यवदियतोस्यापतिकाष्टभ्यां·वदिपणो·
मपितव्यस्त्वतथेतिभावः२= वउकन्यासेताटेदक्षाचितणादक्षेणदित्या१=

एवंलज्जाभयंचोत्पाद्यसंबंधेनापधसहनमाशंक्यतस्यसंबंधापेक्षानास्तीत्याह॥नयस्येति हीतियुक्तोयमर्थः॥यःउत्पद्य
तेसंबध्यतेवाक्कचिन्नस्यसंबंध्यपेक्षा॥महादेवस्यब्रह्मत्वेनतदुभयाभावात्नसंबंधापेक्षेत्यर्थः॥अतएवलोकेतस्यस्वज
नोनास्ति।स्वश्चासौजनश्चआत्मीयोनास्तीत्यर्थः।परःशत्रुःएतद्द्वयंदेहेधर्मः॥नात्साहतइति असंतंस्नेहपात्रंविगर्ह्यं
निंदितोद्वेषपात्रं॥एतदुभयमंतःकरणधर्मः॥स्निग्धएवाहतोभवति॥गर्हितःस्नेहरहितएव ननुतस्यविषयाणामपे
क्षितत्वात्यस्यएवविषयान्प्रयच्छतियोवाभिवर्त्नयतिसतथाभविष्यतीतिचेन्नत्राह॥वयंव्रतैरितितस्यसहजोविषयभोगःप

नह्यपस्यलोकेस्वजनःपरोवानात्साहतोनोतकश्चिद्विगर्ह्यः वयं
व्रतैर्यच्चरणापविद्धामाशास्महेजांवतभुक्तभोगां २५ ॥

तथाबयंर:
रतेनत्यक्तः॥तथापिसाअजाप्रकृतिःविषयरूपातस्यैवतद्दत्तैवप्राप्यतेसर्वैःयथामहाराजविभूतिःततएवात्मा मराराजएवजीवे:
भिःईश्वरसंबंधाद्यनयेदृंव्रतैर्नियमविशेषैःआराध्यपाशुपतादिभिर्वातद्दत्तांअजामाशास्महे।सहिसेवितःप्र
सादत्वेनतांप्रयच्छति॥साहिभोगार्थमुपस्थितापरयोःपतति॥तदास्यानभिप्रेतांमत्वातामुपासकेभ्यःपदेनाप
पविद्धांप्रयच्छत्यवज्ञयाभोगस्यानभिप्रेतत्वंमन्यमानःसतत्रापिभुक्तभोगामितिदृष्टदोषेणपरित्यक्तेतिज्ञापयति॥
अतएवतदपेक्षासर्वस्यनतस्यकस्यचिदपेक्षा॥सर्वेषामेवसेवकत्वान्नोपेक्षापि २५ ॥

Indira Gandhi National Centre for the Arts

तसु·१४
१७४

तर्हि विगर्हितरूपेण किमिति तिष्ठतीत्याशंक्याह यस्यानवद्याचरितमिति॥ यस्य महादेवस्य अनवद्यमाचरितं सर्वविषयत्यागेन स्वात्म
चिंतनरूपं मनीषिणो वुद्धिमंतः मोक्षोपायान्वेषिणः॥ अत एवाविद्यापटलं बिभित्सवः अविद्याभेदनार्थं प्रहृत्ताः॥ आचरितं गृह्णंति
॥ नहि महादेववद्यावन्मनुष्यो न तिष्ठेत् तावत्कस्यचिद्ज्ञानं भवति अत एवं भगवान् महादेवः नित्यनिवृत्तानर्थोपि लोकशिक्षार्थं पिशा
चचर्यामचरत्॥ मतांतरे महान् हीनभावं प्राप्नोतिचेत्तदमुच्यते समभावे संसारः उत्कर्षो हंकारे हीनभावः अतः स तां स्वयं तथा
भूत्वापि शिक्षक इति गति भवति॥ उपदेष्टा फलं वा॥ देवोत्तमस्य पिशाचत्वमेवापकर्षः॥ एवं मनुष्यैः गोमृगकाकचर्या कर्तव्येत्युप
देशः २६ ननु लोके निंदितो महादेवः कथमेवं स्तूयते तत्राह। हसंतीति तत्पदं गतं अशक्ताः तं हसंति निंदंत इत्यर्थः। यस्य सर्वोपि

यस्यानवद्याचरितं मनीषिणो गृह्णंत्यविद्यापटलं बिभित्सवः निरस्तसाम्यातिशयोपि यत्स्वयं पिशाचचर्यामचरद्गतिः
सतां २६ हसंति यस्याचरितं सु दुर्भगाः स्वात्मन् रतस्याविदुषः समीहितं॥ यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं

कारार्थं प्रवृत्तस्याचरितं सुदुर्भगा इति भाग्यरहिताः॥ सर्वोपि स्वसमानं दृष्ट्वा स्वाभिषितं वा लोके ति ((स्वात्मतयोपलालितं २७
तद्विपरीतं तु हसति चतेद्वैलक्षण्यमाह। सहि पूर्णज्ञान आत्मारामः इति तदाह आत्मन्निति अन्ये त्वज्ञा वहिर्मुखाः अत
एवाविदुषः अविद्वांसः सम्यगीहितं भगवच्चरित्रं न जानंति। वैलक्षण्याभिनिवेशस्य दर्निरायां हेतुरिति॥ निंदकानां विषयाभिनिवे
शमाह। येरिति॥ वस्त्राणि दुकूलादीनि माल्यानि पुष्पाणि आभरणानि कंकणादीनि च अनुलेपनानि चंदनादीनि॥ चत्वार ए
ते पदार्था देहोपलालनहेतवः ये पुनरेतदुपलालका देहात्माभिमानिन इति निश्चितं॥ वस्तुतस्त्वयं देहः श्वभोजनं ग्रा
म एव तेषां मरणसंभवात् नगध्रादिभिस्तद्देहग्रहणं॥ केवलमुपलालने धर्मो वा भवेदिति तन्निवृत्त्यर्थमाह॥ स्वात्मतयेति॥ एस॰
स्वपदेन भगवदीयत्वेन तदधिष्ठात्कत्वेन वा उपलालनं आवर्जितं॥ अन्यथा भोगे एतान् नमात्मनीति पक्षो विरुध्येत २७ १७४

नन्नु महादेवस्य पिशाचचर्यायां किमिति वेदः अभिप्रायः कल्पते शापात्पिशाचत्वं जातमिति वैवं कथं नोच्यत इत्याशंक्याह ब्रह्मादयइति॥
भवेदेतदेवं यद्युत्कर्षहेतुर्नस्यात्॥ सर्वोत्कृष्टा लोके ब्रह्मादयः ते येन महादेवेन कृता मर्यादामोकृमभिआयप्रवर्त्तत इति तेनुरूपाः तेषां
परिपालका आज्ञाकारिण इत्यर्थः इदं च विश्वं यत्कारणं या माया कारणं यस्य सा माया आज्ञाकारिणी आज्ञां चेत्स्वयं छेत्ता महादेव
भोगार्थं ब्रह्मांडकोटीः सृजेत्। एवं विश्वकारणं विश्वप्रवर्त्तकां श्वयो नियमयति॥ तस्य पिशाचचर्याविडंबनमेव अनुकरणं। यथा ब्राह्म
णः कौतुकाविष्टः पिशाचादिवेषान् करोति तदपि तस्यानुचितं यतो विभूमान् ततोन्यः कश्चिन्महानस्ति विडंबनेनयं रसयुक्तं कुर्यात्। तथा
पि करोतीत्याश्चर्यं तदाह॥ अहोइति २८ एवं महादेवभक्तो महादेवगुणकथनेन तत्परं करिष्यामीति कृते तेपि स्तोत्रे सातऊनकामा

ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया॥ आज्ञाकरी यस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनं २८
मैत्रेय उ॰ सेवं संवदिते भर्त्तर्यमन्यथोन्मथितेंद्रिया जग्राह वासो ब्रह्मर्षेः वृषलीव गतत्रपा २९ सविदित्वाथ भार्यायास्तं
ननिवृत्ताज्ञातेत्याह सेवमिति वाचनिकेने ((निर्बंधं विकर्मणि नत्वा दिष्टाय रहसि तयाथोपविवेश ह ३० ॥
वमतीकारस्य करणात् तत्परित्यज्य कायिकं आपारं कृतवती नच वक्तव्यं तदुक्तोर्थेन बुद्ध इति॥ एवं भर्त्तास्य सकृद्वादे कृते संवादे
वा कृते सम्यक् विदिते ज्ञाते सति वा॥ तथापि मन्मथोन्मथिता शया वासो जग्राह॥ एवं धार्ष्ट्यं वृषल्या भवतीति तदृष्टांतः॥ ब्रह्मर्षेरिति
॥ स्तोभकारणं मारणं च निवारयति॥ वस्त्रग्रहणे स्तो भोक्ता तो भविष्यतीति वासो जग्राह इंद्रियमथने विवेकधैर्याद्यनुत्पादनार्थं॥
एकांतत्वात् भर्तृत्वाच्च त्रपाभाव एव तस्या उक्तः २९ एवं तयाकृते यज्ज्ञातं तदाह सविदित्वेति अथेति वचनं वंचनाभावाद्यर्थं भा
र्यात्वादपि तदिच्छापूरणं॥ विकर्मणि कर्मनाशके काले कृतं तद्विदित्वा दिष्टाय कालायनत्वागत्यर्थः कर्मणि द्वितीया चतुर्थी विधा
नात् दिष्टायेति चतुर्थी। रहसि एकांते अग्निहोत्रगृहं परित्यज्य गृहांतरे॥ अथेति वैदिकप्रकारेण गर्भाधानप्रकारेण तया सह

उपविवेश॥ हेमाद्र्यंपम इतीविकर्मणिप्रहितिरं ३०

कश्चिपेत्र?=

Indira Gandhi National
Centre for the Arts

त.सु.१४ एवंगर्भाधानंकृत्वायत्कृतवान्तदाह॥ अथोपस्पृश्येति अत्रापिमित्रप्रक्रमः प्रायश्चित्तार्थः॥ कामाभावार्थंवा सलिलमु
१७५ पस्पृश्येतिस्नात्वा प्राणायामैर्दहेद्दोषानितिदोषाभावार्थंप्राणानायम्य॥ वाग्यतः तन्निर्भत्सनाद्यकृत्वा ध्यायन्भगवच्चरणार
विंदंज्ञानमार्गानुसारेणाब्रह्मज्योतिः सनातनंसर्वप्रकाशकंविरजमविद्यानाशकंध्यायन्जजापेति प्रणवार्थंध्यायन्प्र
णवंजजापेत्यर्थः ३१ एवंस्वस्यैःप्रायश्चित्तमुक्त्वातस्याअपियथोचितमपराधप्रायश्चित्तमाह दितिस्त्विति तुशब्दः

अथोपस्पृश्यसलिलंप्राणानायम्यवाग्यतः ध्यायन्जजापविरजंब्रह्मज्योतिः
सनातनं ३१ दितिस्तुव्रीडितातेनकर्मावद्येनभारत उपसंगम्यविप्रर्षिम
धोमुख्यभ्यभाषत ३२

पूर्वभावव्यावृत्त्यर्थः॥ कर्मणिअवद्यंकर्मविद्यंअग्निहोत्रमध्येनिंदितकरणंतेनव्रीडिता अभ्यत्तुनविगीतंअतस्तेनप्र
सिद्धेनअपराधेनव्रीडितासतीउपगम्यअभ्यभाषतेतिसंबंधः॥ भारतेतिसंबोधनंभ्रमाभावाय श्रोतएवचपरमेक एम० १७५
विधंमन्यते॥ दूरकत्वाद्भ्यर्थज्ञानाच्चविप्रर्षित्वं॥ अधोमुखीतिशंकोत्तराभावाय ३२ ॥ ३२

निषिद्धाचरणाभावात्तनाऽत्रस्वत्याधिक्यप्रायश्चित्तंअंगत्वात्कालस्यापिनसाक्षाद्धर्महेतुत्वं॥ यथाअकालेकृतोध
र्मः अकृतोभवतिएवमकालेकृतोगर्भः अकृतोभवेत्॥ तत्रकेवलकालस्यनबाधकत्वमपितुकर्मस्वभावानांबलिष्ठ
त्वात्दैत्यानांस्वभावनिष्ठत्वाच्च अतः कालाधिष्ठात्रीदेवतामहादेवःकदाचित्हन्यात्॥ तत्रापिब्राह्मणक्रोधसहितो
हन्यादेव॥ अतोब्राह्मणक्रोधाभावंप्रार्थयितुंव्याजेनमहादेवभक्तंतंज्ञात्वामहादेवंप्रार्थयति इयंचप्रार्थनानै
मित्तिकीतिनैमित्तकमनुद्यतदभावंकाम्यत्वेनप्रथमंनिर्दिशति मामेगर्भमिति इमंसंजातंगर्भंरुद्रोमावधीत्॥

दितिरुवाच मामेगर्भमिमंब्रह्मन्भूतानामृषभोवधी
त् रुद्रःपतिर्हिभूतानांयस्याकरवमंहसं ३३ ॥

ब्रह्मन्नितिसंबोधनंतत्प्रतीकारकरणसामर्थ्यंसूचयति॥ मारणेउपायः भूतानामृषभइति भूतप्रेरणयामा
रयेत् भूतानिहिगर्भंप्रविश्यस्रावयेयुः॥ ननुसप्रजापतिः प्रजानामुत्पादकःकथंप्रजाःमारयेत्तत्राह सभू
तानांपतिः यउत्पन्नाःतेषांस्वामीयतोरुद्रः।ऐंद्रयतीतिसहिबालकउत्पन्नएवरोदितिनगर्भस्थः अतोगर्भस्त
दीयोनभवतीति गर्भनाशयतीतिवा एवंगर्भनाशनेउपपत्तिमुक्त्वानिमित्तमाह॥ यस्याकरवमंहसमिति य
स्यापराधंकृतवत्यस्मि ३३ ॥

Indira Gandhi National
Centre for the Arts

ल॰सु१४ १९६ एवंसंकल्पमुक्त्वा तत्सिध्यर्थं रुद्रं प्रार्थयते॥ नमोरुद्रायेति॥ सहि गुणत्रयात्मकः अहंकारस्त्रिगुणत्वात्॥ अतोनवभिर्विशे
षणैस्तस्य प्रार्थना महत्त्वां नमनमेव प्रसादहेतुः॥ तत्र प्रथमं भूतानां कृपया यद्रोदनं कृतवान् सा कृपा त्वय्यप्यनुसंधेयेति ज्ञापना
र्थं रुद्रायेति आह॥ अपराधसहनार्थं महते॥ प्रार्थनया अपराधसहनार्थं देवाय॥ अनेन नामसादिभावास्त्रय उक्ताः॥ पुनः
तानाह उग्रायेति त्रिभिः॥ अन्यप्रेरणया मारयिष्यतीती मं परूत्वमावर्त्तयति उग्रायेति नहि उग्रस्याग्रे कश्चिद्दर्कुं शक्नोति॥
तर्हि प्रार्थितोपि मारयेदित्याशंक्य न केवलमुग्र एव किंतु सर्वेषां कामवर्षकोपीत्याह मीढुष इति मीढ्वान्वृषभः पतिः काम

नमोरुद्राय महते देवायोग्राय मीढुषे शिवाय
न्यस्तदंडाय धृतदंडाय मन्यवे ३४ ॥

वर्षक इतियावत्॥ किंच॥ न केवलं फलदाता किंतु फलरूपोपीत्याह॥ शिवायेति कल्याणरूपाय॥ अतः प्रार्थितो न मारयि
ष्यति॥ कल्याणं च करिष्यतीत्यर्थः॥ तृतीयपर्यायेस्तत्त्वादिभावानाह॥ न्यस्तदंडायेत्यादित्रिभिः॥ सहि पूर्वं दक्षं हत्वा महा
त्म्यपद्देवेज्ञाते दंडनं त्यक्तवान्॥ इदमपि ब्रह्मबीजं॥ अतः अमारणार्थं महादेवकृतमित्यमर्थं स्मारयति न्यस्तदंडायेति
॥ तर्हि प्रार्थनाव्यर्था त्वत एव दंडस्य त्यक्तत्वादित्याशंक्याह॥ धृतदंडायेति दुष्टमारणार्थं धृतो दंडो येन॥ तर्हि त्वत्त एस॰
व प्रार्थ्यतां किमस्माग्रे कथनेनेत्याशंक्याह मन्यव इति सहि ब्रह्मसमन्युरूपः ब्रह्मसमक्षं नैव प्रकटो भवति स नान्यथा॥ १९६
अतः त्वयि प्रसन्न एव सनिवर्त्तते नान्यथेत्यर्थः ३४ ॥

प्रेगर्भमाहात्म्या॥

व्याघ्रस्यो ब्रह्मा विह्नननं तत्कर्त्तकेऽत्रं मित्यर्थः॥५
एवं नमस्कारेण रुद्रं प्रार्थयित्वा पूर्वापराधं दूरीकृत्य भर्त्तारं प्रसादयितुं अहंकारे स्थिते प्रसादो शक्य इति तद्दहंकारनिवृत्त्यर्थं महा
देवमेव प्रार्थयति॥ सन इति सपूर्वोक्तो नः अस्मभ्यं प्रसीदतां यतो भामः भगिनीपतिः॥ न केवलं स्वतः प्रसादः किंतु भर्त्तारमपि
प्रसादयुक्तं करोत्विति॥ तत्सामर्थ्यार्थं भगवानित्यर्थः॥ ननु कृतेपराधे दंडाभाव एव भूयान् कुतोनुग्रहं करिष्यतीत्याशंक्याह उ
वं नुग्रह इति॥ उरुरनुग्रहो यस्य॥ प्रार्थितो न केवलं अबाधक एव किंतु फलदातापीत्यर्थः॥ किंच॥ अस्मास्वनुग्रहः कर्त्तुमेवो
चितः यतो वयं स्त्रियः॥ व्याधस्याप्यनुकंप्याः॥ पुरुषार्थहितस्यापि हननं अर्थापेक्षया कामो महान् स च स्त्रियायत्त एव॥ अतो व्या

सनः प्रसीदतां भामो भगवानुर्वनुग्रहः॥ व्याधस्याप्यनुकंप्यानां स्त्रीणां देवः सतीपतिः ३५
स्वसर्गस्याशिषं लोक्यामाशासानां प्रवेपतीं॥ निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः ३६

धस्याप्यवध्याः॥ यतः स्त्रियो नुकंप्याः॥ सर्वस्यानंददायिका अपि स्वयमकृतार्थ्या भवंति किंच॥ स स्त्रीणां देवः स्त्रियो हि गौरीमेव स
भर्तृकां पूजयंति॥ स एव क्रीडाकर्त्तेति वा॥ किंच॥ सतीपतिरिति॥ स्त्रीणां स्वभावज्ञ इति॥ ३५॥ एवं महादेवे स्तुते अर्द्धप्रसन्नः क
श्यपः क्रोधं प्रसादं च कृतवानित्याह स्वसर्गस्येति॥ स्वस्य सर्गस्य गर्भस्य लोक्यां॥ सर्वलोकप्रसिद्धां आशिषं आशासानां कामय
मानां किं भविष्यतीति प्रवेपतीं अतिकंपमानां स्त्रियं निवृत्तसंध्यानियमो भूत्वा भार्यात्वादवश्यवक्तव्यमाह प्रजापतित्वाद्व
वचनं निष्ठुरं अन्यथा सर्वा एव तथा कुर्युः ३६ ॥

Indira Gandhi National
Centre for the Arts

सामीचीन्येन। कस्यपस्य वचनेः। आपतित्वान्निषुरं१=

त॰सु १४ १९७ द्यावश्यकत्वात्सामीचीन्यकथनं प्रथमतो दोषफलमाह॥ अप्रायत्यादित्यादि चतुर्भिः। तस्मादोषचतुष्टयमनुवदति हेतुत्वे
न॥ प्रसादेपि विपरीतफलावश्यकत्वाय प्रथममाह॥ अप्रायत्यादिति॥ ते आत्मनो देहस्य अप्रायत्यात् अप्रयतत्वात् रजस्व
लात्वादित्यर्थः। मे हूर्त्तिको दोषः संध्यारूपः तत्रोत्पन्नो दुष्टो न जीवति च॥ उतेत्यप्यर्थे एको दोषः स्तकवत् न दोषान्तरं दूरी
करोति किंतु समुच्चीयत इत्यर्थः॥ तृतीयं दोषमाह॥ मन्त्रिदेशातिचारेणेति॥ ममाज्ञोल्लंघनेन॥ अत्राप्यतदेहलीत्वात्॥ च
तुर्थे दोषः देवानांचैव हेलनादिति॥ देवानां भूतानां गार्हपत्यादीनां वा हेलनमवज्ञा ३७ एवं चतुर्भिः दोषैः तव पुत्रद्वयं भ
विष्यतीत्याह॥ एकैकत्र दोषद्वयसंक्रमात्॥ तत्र हिरण्याक्षे प्रथमो तस्य शीघ्रं मरणात्॥ तपस्यादिकरणाभावाच्च॥ अभद्र

कश्यप उ॰ अप्रायत्यादात्मनस्ते दोषान्मौहूर्त्तिकादुत॥ मन्त्रिदेशातिचारेण देवानां चैव हेलनात् ३७
भविष्यतस्तवाभद्रावभद्रे जाठराधमौ॥ लोकान् सपालांस्त्रींश्चण्डि मुहुराक्रन्दयिष्यतः ३८ प्राणिनां ह
न्यमानानां दीनानामकृतागसां॥ स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ३९ ॥ ॥

तिसंबोधनं पुत्रस्यो भयांशत्वेषि मातृदोषे गौवदुष्टाविति ज्ञापयितुं॥ अतः तावभद्रौ॥ ननु मातामस्त्रा पितुः पुत्र इतिशा =
स्त्रात् वीजादुष्टुत्वे कथं तयो दोषवत्वमित्याशंक्याह॥ जाठराधमाविति॥ जठरे जातेन दोषेण अधमौ॥ उत्तमवीजम
पियथास्थ क्षुद्रायां प्रविष्टं क्षुद्रतामापद्यते तथेत्यर्थः॥ तयो दोषमाह॥ लोकानिति लोकपालसहितान् लोकान् मुहुराक्रं २ एम०
दयिष्यतः रुद्रकालज्ञानत्वाद्दोदयिन् त्वं चण्डि कोपनशीले अयमपि दोषस्तवैव ३८ एवं तयो दोषमेकमुक्त्वा अन्या ३ १९७
न्त्रीन् दोषानाह। प्राणिनामिति॥ प्राणिनां दोषवत्वेपि दीनानां वधो नुचितः॥ तत्राप्यकृतागसां वधइत्येको दोषः स्त्री
णां निगृह्यमाणानामिति स्वपरः पातिव्रत्यात् त्याजनं निग्रहः॥ कोपितेषु महात्मस्विति चापरः॥ तेषां भगवत्त्वेवाप्रतिबंधात् को
तत्संक्रमिष्यतइतिभावः२-

एवं दोषचतुष्टये जाते भक्तद्रोहे वधः स्यात् इति वाक्यात् परमेश्वरः तौ मारयिष्यतीत्याह तदेति॥ मारणे हेतुः विश्वेश्वर इति॥
न हि जगतीश्वरद्वयं भवति किंच॥ क्रुद्धः भक्तानां पीडनात्॥ भगवानिति वैकुंठापचारपरिहारार्थमपि ताद्दृश्योनेः त्याज
यिष्यतीति सूचयति॥ लोकभावन इति मर्यादारक्षार्थमपि तद्धननं॥ स्वामिनः सेवकवधः साक्षादनुचित इति अवतीर्य हनिष्य
ति वराहनरसिंहरूपेण॥ अस्मा वितिस्तोत्रे वतिष्ठतीति हननावश्यकत्वं सूचितं॥ शतपर्वधृगिति॥ यथा प्राणिनां क्लेशनिवृत्त्यर्थं
वज्रहस्ते नेन्द्रेण भारेण पततां पर्वतानां पक्षच्छेदः क्रियते तद्वदीश्वरस्तत्ताद्दृशवधआवश्यक इत्यर्थः ४० भर्त्राक्रोधेन अनि

तदा विश्वेश्वरः क्रुद्धो भगवान् लोकभावनः हनिष्यत्यवतीर्यासौ यथाद्रीन् शतपर्वधृक् ४०
दितिरु॰ वधं भगवता साक्षात् सुनाभोदारबाहुना॰ आशासे पुत्रयोर्मह्यं माक्रुद्धात् ब्राह्मणात् प्रभो ४१

ष्टे श्राविते सा दितिरनुभक्ता पुत्रयोर्भगवत्संबंधं श्रुत्वा संतुष्टा तथेत्यन्वमोदतेत्याह॥ वधं भगवतेति तेन एवं कोपितेषु महात्म
स्विति महापुरुषकोप उक्तः॥ स शापपर्यवसायी मा भवतु॥ तच्छाप्येन भगवतापि कृते वधे सामीचीन्यं न भविष्यतीति तदभावे
न केवलं भगवानेव ब्राह्मणप्रेरणाव्यतिरेकेण करोत्विति प्रार्थयति साक्षादिति स्वहस्तेन न तु कालादिना सुनाभोदारबा
हुनेति वधेपि सुदर्शनेनैव हस्तेनैव यतः हन्तस्य मोक्षादिसर्वपुरुषार्थदाता॥ आशासे॥ कामितोयमर्थो दुर्लभः॥ परम
नभिप्रेतः क्रुद्धाद्ब्राह्मणाद्वधः॥ तथा वरो देयइति॥ तत्र सामर्थ्यं सूचितं॥ प्रभो इति ४१ ॥ श्रीगोपालयनमः

तत्संबंधिजनान्नारकानानुग्रह्णाति ४=

नमु॰ १४ १९८ ब्राह्मणवधः अत्यंतं विगर्हितं इति वक्तुं तस्य परलोकबाधकत्वमाह ॥ न ब्रह्मदंडेति ॥ ब्रह्मदंडेन ब्रह्मशापेन अग्निरूपेण ॥ दंडो हि
दृढकाष्ठरूपो भवति ॥ तद्रूपोऽग्निः सर्वथैव दहेत् ॥ तत्र हेतुः भूतभयदस्येति ॥ ब्रह्मदंडदग्धस्यैवंभूतेभ्यो भयं प्रयच्छति नह्य
न्यः स्वयं दुःखाभिज्ञः परेभ्यो दुःखं प्रयच्छति ॥ ब्रह्मशापेन तु नानादीनां नाशात्तथा कर्तुं शक्नोति ॥ पृथग्वा हेतुः । चकारादुग्रवद्वेषि
णः ॥ नारका अपि तस्य संबंधिनः ॥ तांश्चानुग्रह्णाति द्वितीयार्थे षष्ठी चकारादन्येऽपि ॥ अप्यर्थे वा चकारः ॥ नारका अ
पि तं न स्पृशंतीत्यर्थः ॥ अतो ब्रह्मदंडदग्धादिर्यां यां योनिं गतः नारका द्विविधाः स्थानभेदाः योनिभेदाश्च ॥ तत्र योनिभेदे दै
हिकः संबंधः अधिको भवतीति कदाचिदनुग्रहो भवेत् तन्निषेधार्थमाह ॥ यां यां योनिमसौ गत इति ४२ कश्यपः तां भग
वद्भक्तो ज्ञात्वा स्वबीजस्यापि सात्त्विकतां विलोक्य वरं प्रयच्छति ॥ सप्तभिः । कृतशोकानुतापेनेति ॥ वरः पौत्रो वैष्णवः तव भवि

न ब्रह्मदंडदग्धस्य न भूतभयदस्य च ॥ नारकाश्चानुगृह्णंति यां यां योनिमसौ गतः ४२ कश्यप उ॰
कृतशोकानुतापेन सद्यः प्रत्यवमर्षणात् ॥ भगवत्युरुमानाच्च भवे मय्यपि चादरात् ४३ ॥

ष्यतीति ॥ कारणे षड्गुणाः हेत्रे कार्ये बीजस्वभावतः ॥ अष्टादशगुणा ज्ञाताः ते तेकीर्त्यंते क्रमादिमे १ तत्र प्रथमं तस्याः षड्गु
णानाह ॥ कृतं यत्कर्म तत्र शोकः स्वपुरुषार्थो मिथ्या नाशित इति यथा पुत्रादिनाशे शोकः ॥ एवं कृपि भोगे जन्ते पि गर्भे शोकेः
अनुतापः मया किमर्थं कृतमिति पश्चात्तापः ॥ द्वयोरेकवद्भावः कर्तुः दुःखजननसाम्यात् ॥ अन्यगुणमाह ॥ सद्यः प्रत्यवमर्ष
णादिति ॥ प्रत्यवमर्षणमपराधत्वमापनं ॥ अत्र विनयेनागमनं प्रार्थनाच प्रत्यवमर्षः ॥ भगवत्युरुमानं वधं भगवता साक्षा एम॰
दिति पुत्रापेक्षयापि भगवत्यधिकसंमाननं लोके पुत्रमारकोऽयं तं द्विष्टः सचेदयं तं मानितः ॥ तदायं महान्गुणः ॥ गुणाद्वय १९८
दिति पुत्रापेक्षयापि भगवत्यधिकसंमाननं लोके पुत्रमारकोऽयं तं द्विष्टः सचेदयं तं मानितः ॥ मय्यादरः प्रभो इति संबोधनात्
माह ॥ भवे मय्यपि चादरादिति पूर्वं न मे गर्भमित्यादिभावः सादरः सूचितः ॥

पुत्रस्य १

ब्राह्मणाधिक्याद्वा ४३ एतैः षड्भिः गुणैः कृत्वा एकस्य ज्येष्ठस्य पुत्राणां चतुर्णां मध्ये एकस्तृतीयः सतां मतो भविष्यति ॥
अनेन वंशवृद्धिरपि सूचिता सतां मतः तेषां प्रमाणभूतः अन्यथा सन्नूसत्तम इति वा वक्तव्यः स्यात् ॥ मतत्वमानेनैव ज्ञा
तः अनेन भगवन्मार्गे स प्रमाणमिति निरूपितं ॥ तस्य प्रमेयतामाह । गास्यतीति ॥ प्रमातुं तदेव योग्यं यत्कदाचिदपि विरु

पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः गास्य
ति यद्यशः शुद्धं भगवद्यशसा समं ४४

द्धज्ञानविषयो न भवति फलत्वं साधनत्वं च अतो भगवद्यशो यद्गागीयते तदा तदाधारत्वेन प्रह्लादयशो गीय
ते आधाराधेययोस्तुल्यत्वात्समत्वं ॥ भक्तानामाधारत्वं पूर्वं निरूपितं ॥ शुद्धमिति विशेषः ॥ खंडशः आधारत्व
व्यावृत्त्यर्थं सममित्युक्तं भगवद्यशसेति करणं वा शुद्धत्वे समत्वे च ॥ दैत्यानां यशः प्रायेण विषमं भवतीति प्र
तांतरत्वाच्च तुल्यत्वकथनमपि न दोषाय ॥ यथा पुण्यश्लोको नलो राजेति अत एव गास्यतीति लोकाः ४४ ॥

Indira Gandhi National
Centre for the Arts

त.सु. १४
१९९
साधारण्येनप्रमेयत्वमुपपाद्यअसाधारण्येनोपपादयति॥ योगेश्विति॥ यथाकुंदनकर्त्तारःकल्कादिभिःदुर्वर्णसु
वर्णंशोधयंतिसर्वथाचेतन्निर्दुष्टंतदासजातीयविजातीयान्परिगृह्णाति हृद्देपिसजातीयेभगवंतंयोजयि सवलेर
तुंशक्नोतीहीरकमिवतत्रनिकषज्ञातेतथात्वात्मानमपिलावयेत॥ अंतःसुवर्णरजतादिदोषाः यथादूरीक्रि
यंतेतथाआत्मन्यपिवैराद्दिदोषाः दूरीकर्त्तव्याः। अतोनिर्वैरितायाअवधिर्ज्ञातव्यः॥ प्रह्लादस्त्वौत्पत्तिकता

योगेर्हेमेवदुर्वर्णंभावयिष्यंतिसाधवः निर्वैरादि
भिरात्मानंयच्छीलमनुवर्त्तितुं ४५ ॥

दृशगुणयुक्तः॥ अतोयथाचितितन्मात्रेणतदात्मकत्वात्इतिन्यायेनब्रह्मचैतन्यमिवस्वचैतन्यंक्रियतेसाध
नैःभगवद्भावोवासंपाद्यतेभगवदनुग्रहात्तथासाधकत्वार्थअन्यत्रभगवद्भावसंपादनार्थप्रह्लादभावोपिसंपा एम०
द्यतेतदाह यथासुवर्णसुवर्णंसाधयंतितथायच्छीलमनुवर्त्तितुंनिर्वैरादिभिरात्मानंसाधयिष्यंति॥ साध १९९
वःपरोपकारनिरताः ४५ ॥
५१

वर्त्तमानसामीप्येवर्त्तमानवद्वा१

एवंप्रमेयत्वंनिरूप्यफलत्वंनिरूपयति॥ यत्प्रसादादिति॥ भगवान्येनाग्रेतोष्यते॥ यद्यपिसर्वेषामात्मत्वात्स्वरूपतःतु
ष्टएवतथापिसाधनेनतुष्टइतिरूच्यतेतदाह यस्मान्मयादृशेति प्राणिनांषोडशदृष्टयोभवंत्यंतर्दशेंद्रियाणि॥ अं
तःकरणचतुष्टयं आत्मादेहश्चेति॥ प्राणेनसहसप्तदशतत्संबंधिनःपुत्रादयोवातयाःसप्तदश॥ एवंचतुस्त्रिंशद्दृ
ष्टयोभगवद्विषयकाएवयस्यसोनमदृक्॥ सर्वभावेनप्रपन्नः तदासर्वभावमापन्नोभगवान्प्रसीदति ननुभगवत्प्रसा
दएवफलंकथमुच्यतेविश्वस्यैवफलत्वात् अन्यथाभगवानपिविश्वस्मिन्नरमेतअतआह यस्यभगवतःप्रसादा

यत्प्रसादादिदंविश्वंप्रसीदतियदात्मकं सत्वदृ
भगवानेवतोष्यतेनमयादृशा ४६ ॥

स्येन।यस्यपदृ:

दिदंविश्वमेवप्रसीदति॥ भगवत्प्रसादएवविश्वप्रसादः॥ अनुसंधानभेदात्कार्यकारणभावः अन्यथाकार्यसाधनांतरमप्यपेक्ष्येत॥
अतोभेदव्याहत्यर्थमाह॥ यदात्मकमिति भगवदात्मकमेवविश्वंभगवतिप्रसन्नेप्रसन्नमेवभवति॥ तदास्यसर्वत्रकामचारोभवति
भगवतइवननुभगवान्तंप्रतिकथंविषयत्वमापद्यतेहीनभावापत्तेःमर्यादाभंगश्चस्यात्इतिअतआह सत्वदृगिति। सभगवान्
सर्वमात्मत्वेनैवपश्यतिपश्यतियोत्रतस्यप्रसादेअयमप्यात्मत्वेनैवपश्येत्। अतोनहीनत्वंनवामर्यादाभंगःस्वतएवभगवत्त्वा
त॥ द्रव्यकामोपितदाह भगवानिति तस्मात्फलरूपःप्रह्लादः ४६ ॥

६१०१२

Indira Gandhi National
Centre for the Arts

तसु॰ १४ २०० साधनरूपतामाहत्रिभिः॥साधनानांत्रैविध्यात् गुणरूपाणिकानिचित्साधनानिदोषाभावरूपाण्यपराणि॥अंतरंगफल
रूपंचैकं॥तत्रप्रथमंगुणरूपाणिसाधनान्याह सर्वेमहाभागवतइति यस्तूपपन्नाउत्पन्नाचसाधनवान्सएवतच्छास्त्रेगु
णयुक्तः॥अतःप्रकारः ताहृशइति वैनिश्चयेन महाभागवतः यस्तुभगवदीयोभूत्वाभगवदीयमेवदेहादिभिःकरोति
जानातिसभागवतः॥यस्तुसर्वदैवतथाविधःसमहाभागवतः॥अनेनभगवच्छास्त्रसिद्धंसर्वमेवसाधनमुक्तं॥महात्मेति॥
ज्ञानगुणरूप ३= द्वितीयसाधनंज्ञानमार्गसिद्धं॥ब्रह्मभावेनसजीवोमहानात्माभवति अन्यथापरिछिन्नएवस्यात्।महत्वंचापरिमित गुणैः ज्ञानतोमने तिभावः२=
मेव॥महानुभावइतितृतीयंसाधनंकर्ममार्गानुसारेणोत्कर्षः॥तत्रह्यनुभावेनैवमहत्वं॥कर्मणोनित्यत्वेनमहत्वजनकाभा

सर्वेमहाभागवतोमहात्मामहानुभावोमहतांमहिष्ठः प्रवृद्ध
भक्त्याह्यनुभावितांतन्निंविश्यवैकुंठमिमंविहास्यति ४७ ॥ =

वात् कर्मजनितोनुभाव एवतथात्वबोधकः॥तस्यमहानुभावत्वमस्मादिभिर्दाहाद्यभावात्॥सर्वोत्कर्षोनुभावोमहान् शी ७
घ्रमत्ययहेतुः महत्प्रत्ययहेतुश्च। महतांमहिष्ठइतिचतुर्थः लोकेउत्कर्षहेतुः॥कीर्तिमतांमपिकीर्तिमानित्यर्थः।की ३
र्तिश्रियोवालोकेमहत्वहेतू।अतएवमहतांमध्येअत्यंतंमहान्महिष्ठः एवंचतुर्विधंसाधनमुक्त्वापचंमंपुरुषार्थरू पंच
पंभगवत्स्नेहंअ॰ लौकिकंसाधनत्वेनाह।प्रवृद्धभक्त्येतिपूर्वसाधनैःप्रकर्षेणवृद्धयाप्रेमलक्षणाभक्तिः तयानु मफल एम॰
भावितंयदंतःकरणंप्रेमणातदात्मकंसंजातं॥यथाभगवान्मातिसहितस्वाश्रयः अतएवस्वभावापन्नंतःकरणेसन्निवि २००
शते वैकुंठमिति॥यद्दर्शनार्थमेतावान्क्लेशोनुभूतःइमंदेहंविहास्यतिविदेहकैवल्यंप्राप्स्यतिदेहसंततिर्निवर्तिष्य

दोषाभावतयाऽलौकिस्वरूपाभवंति४:

एवंसर्वशास्त्रलोकसिद्धंसाधनंसफलमुक्तंगुणरूपं॥दोषाभावरूपमाह॥अलंपटइति॥लांपट्यंइंद्रियविषयासक्ति
दोषः॥शीलंसुस्वभावःतदेवधनंयस्यसर्वेभ्यएवचौरादिभ्यःधनंसंरक्ष्यते॥तथाहीनानामतिक्रमादिभिःस्वशीलंसंरक्ष्य
ते॥अनेनशीलनाशोदुष्टशीलताचनिवारिता॥गुणाकरइति॥गुणाःसत्यादयःप्रथमस्कंधोक्ताः॥तेषामाकरंस्थानं
तेसर्वेदोषाभावरूपाःलौकिका भगवत्कृपमानाःतथैवचभवंति॥सर्वेषुगुणेषुसमतादयाचउत्कृष्टेतितयोर्विवरण
लोकश्लिष्टा१

— अलंपटःशीलधनोगुणाकरोहृष्टःपरर्ध्याव्यथितोदुःखितेषु॥अ
भूतशत्रुर्जगतःशोकहर्त्तानैदाघिकंतापमिवोडुराजः ४८ ॥

माह॥हृष्टःपरर्ध्याव्यथितोदुःखितेष्विति॥स्वसमृद्धेवसर्वोहृष्यति॥अयंतुपरसमृद्ध्यापीतिसमः॥दुःखितेषुव्यथि
तःदयावानेवभवति॥परदुःखंदृष्ट्वाकारुणिकएवदुःखितोभवति॥अभूतशत्रुरितिनभूताःशत्रवोयस्य॥किंवहुना
यस्यकामादयोपिनशत्रवः॥जगतःशोकहर्त्तेतिसामर्थ्यं॥परदुःखप्रहाणेच्छासहजानिहता॥शोकस्त्वंतर्हितस्तापः
इतिअयंतथावहिस्तापमपिनिवारयतीतिदृष्टांतेनाह॥नैदाघिकंउष्णकालेसूर्यजनितंतथाकलिकालादौकालज
नितमपितापं॥उडुराजश्चंद्रःसहिनक्षत्रैःसहतापंदूरीकरोति॥तथासर्वपरिकरसहितःस्वसांनिध्येनअसंनिध्येन
वाप्तापंदूरीकरोतीत्यर्थः ४८ ॥

वर्तमानसीमीप्येवमानवद्धा२=

Indira Gandhi National
Centre for the Arts

अत्रेदृशेतिपदेन ३=

त॰सु॰१४ २०१ सर्वोत्कृष्टंसाधनमाह॥ अंतर्बहिरिति॥ तस्मिन्हि भगवत्प्रसादेन भक्त्या ज्ञानवैराग्याभ्यां च भगवत्साक्षात्कारो जायते॥ तत्र भग
वान्सर्वत्र साकारः सच्चिदानंदरूपः सर्वतः पाणिपादांतो मायाजवनिकाछन्नः तिष्ठति॥ तत्र प्रज्ञाद्दृष्टेः मायानं जवनिका
रूपां तां भित्वापि स भगवद्रूपं पश्यतीत्यर्थः॥ केचित्तु प्रसन्नो भगवान् तस्य दृष्टेरग्रे स्वस्यैकां मूर्तिं स्थापितवान् अत्र वर्णयंमा
नां॥ तद्यत्रैव दृष्टिं प्रसारयति तत्रैव तं पश्यतीत्याहुः॥ तत्र यदि तद्रूपं ब्रह्मस्वरूपं तदा न पूर्वस्माद्विशेषः॥ अथोपाधिरूपं त
दा न प्रज्ञादृसोत्कर्ष इति अंतः बहिर्दृष्ट्या दृसतीत्यर्थः॥ अमलमिति यथा मध्यंदिन सूर्यमंडलांतः॥ अनेन दोषाभावउक्तः
॥ अब्जनेत्रमिति दृष्टेव सर्वेष्टपूरकः॥ अनेन सर्वगुणाउक्ताः॥ एवं निर्दोषपूर्णगुणविग्रहत्वमुक्त्वा भक्ताधीनत्वमाह स्वपूरु
षेच्छेति॥ स्वस्य पुरुषाः भक्तास्तेषां या दृशी इच्छा तदनुसारेण गृहीतं रूपं येन॥ तव पौत्र इति भक्तांशः तस्माएव॥ श्रीः लक्ष्मीः

एवं रूपेण भगवल्लीलां संपादयतीति विहितभक्तिमार्गाभा
वे पि भक्तिः निमतांतरेण स्फपयोगित्वान्निरूपिता ५०

अंतर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपं॥ पौत्रस्तव श्रीललनाललामं दृष्टा स्फुरत्कुंडलमंडि
तानन्तं॥ ४९॥ मैत्रेय उ॰ श्रुत्वा भागवतं पौत्रममोदत दिति र्भृशं॥ पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महामनाः॥

रत्न॰टी॰१ ललनास्त्रीचिह्नरूपा तया ललामं॥ अनेन सर्वभाग्यरूपत्वात् तद्दर्शनेकिंरं ५० इति श्रीभागवते महापुराणे सप्तमस्कंधे चतुर्दशोध्यायः
चित्प्राप्तव्यं इष्टं वा नावशिष्यत इति निरूपितं॥ अनेन भगवत ऐहिकफलरूपत्वमुक्तं॥ स्फुरती ये कुंडले ताभ्यां मंडितमाननं
यस्य॥ स साधनी सांख्ययोगौ स्फुरत्कुंडले तत्सहितो यो यं भक्तिमार्गः स मुखमिति सोपायमोक्षदातृत्वं निरूपितं॥ ४९॥ ए
वं भगवन्माहात्म्यं तादृशं पौत्रं च श्रुत्वा सर्वचिंतारहिता जातेत्याह॥ श्रुत्वेति॥ विना पुत्रस्य भगवदीयत्वेन भागवतः पौत्रो न भ
वतीति पुत्रोपि भगवद्भक्तः परं निमित्तवशात् अन्यथा प्रतिभासत इति मत्वा भृशं अमोदत मुमुदे इत्यर्थः॥ तकारः छांदसः अ
लौकिकज्ञानबोधनार्थः॥ पुत्रयोरपि विनियोगः समीचीनः। भगवति प्रवेशात् भगवल्लीलासाधकत्वात्॥ अतो मम उद्योगः स
फल इति विदित्वा महामना आसीत्॥ यथा कश्चित् परमपुरुषार्थं साधयित्वा मुदितो भवति॥ अनेन दितिः परमभक्ता एम॰ २०१

निरूपित्वा =

निरूप्यते पंचदशेक्रोधेन ज्ञाननाशनं॥ वीर्ये जीवप्रवेशार्थं भक्तशापोनुवर्ण्यते १ इति हास प्रवृत्त्यर्थं संगतिश्चापि रूप्यते॥ ज्ञा
नमूलस्य सत्वस्य कार्यनाशकता पुनः वैकुंठेपरिहिंसर्वोर्गणांत्रीणां चापि निमत्सरः सर्वदोषविहीनत्वात् तत्र दोषो हरीच्छया॥ अ
तः सृष्टिप्रसिद्ध्यर्थं वैकुंठस्य च वर्णनं एवं पूर्वाध्याये दितेर्गर्भाधानमुक्तं॥ तदग्निमं वृत्तांतमाह॥ प्राजापत्यमिति॥ प्रजापतिः
संबोधि॰ कश्यपः तस्य तेजो वीजमेव॥ बीजस्य ब्रह्मत्वात्॥ अत एव परतेजो हनं ब्रह्मतेजसा हि अन्ये हन्यंत एव॥ इममेवार्थं हि शंकुआ
ह॥ तस्य मारकत्वं उत्पन्नो कालादि धर्मं जन्यमिति सूचयितुं तदित्युक्तं॥ शतंमानुषवर्षाणि गर्भं दधार॥ देववर्षाणि वा॥ तौ चेत्
गर्भे पुष्टो भवतः तदा देवैर्मारयितुमशक्यौ देवान्बाहृष्यामारयेतां दितिपदेन च तस्याः स्वाभाविकं सामर्थ्यं सूचितं॥ तस्याः सहैव ज१

मैत्रेय उ॰ प्राजापत्यं हि तत्तेजः परतेजोहनं दितिः दधार वर्षाणि शतं शंकमाना सुरार्दनात् १ लोके
तेन हतालोके लोकपाला हतौजसः॥ न्यवेदयन् विश्वसृजे ध्वांतव्यतिकरं दिशां २ ॥

सामर्थ्यानुसंधानात् भयं नास्त्येव॥ ब्रह्मबीजत्वाच्च नदेवैर्न वा हृष्यामारणं॥ तथापि भर्तृवाक्यात् शंका जातेत्याह॥ शंकमानेति १
तदा तस्मिन्बीजे द्विधाभूते जय विजययोः प्रवेशो जात इति ब्राह्मं वैष्णवं च तेजः एकीभूतं सूर्यादितेजः असहमानं स्वतेजसा एतत्
दूरीचकार॥ लोके तेनेति॥ तदा तेन बीजेन हतालोके सति लोकपाला अपि कालाधीनाः काल तेजसा गतेः यमपि हतौजसो
जाताः॥ ते हींद्रादयो बलकार्यरूपाः अतस्तेषामोज एव गतं॥ तदा बलप्रकाशयोः नाशात् निद्रानंदं ज्ञातुकामाः ब्रह्मलोकं गताः
ते रूपश्चं वा विश्वसृजे स्वदृष्टां तं न्यवेदयन्॥ स्वस्य ओजसः अभावः अप्रतिष्ठाहेतुत्वात् न निवेदितः किंतु ध्वांतमंधकारं॥
तेन दिग्व्यतिकरं च न्यवेदयन्॥ तत्र मूलं तम एव नेति ॥ २ ॥ २ ॥

त.सु.१५ २०२ तत्रनिदानंदर्शयंति॥ तमएवभरिति॥ देवाभीताब्रह्मणोवक्रियतेदैत्यवर्द्धनं॥ अतोदेवविनाशःस्यादितितेनैवमारणं१ ज्ञानंस
मर्थितंतस्यस्वदोषाभावएवच॥ विद्यमानेपितच्छांतिःतस्यभक्तकृपातथा २ भक्तानामभयंतस्मात्सेवकास्ववयंभृशं अतो
स्मासुकृपाकार्यादैत्योत्पत्तिर्हिज्ञायते ३ एवमष्टविधंवाक्यंब्रह्मणांप्रतिदैविकं॥ तत्रप्रथमंमहत्वात्प्रभुमप्यशक्ताः तमसो
ज्ञानंसंभावयंति हेविभोसर्वज्ञानादिसमर्थ-एततमःसर्वथावेत्थज्ञानासिअतोस्माज्ज्ञापयेतिभावः ज्ञापनेहेतुः॥ यद्यस्मात्त
महान्भृशंवयंसंविग्नाः अंधकारात्कृतसः अभावात्॥ तवत्वज्ञानंनभवतियदव्यक्तंभगवतोरूपंतत्त्वांप्रतिनअतोवासुदेव
गुणावतारस्यतवनास्त्यव्यक्तं॥ किंच॥ अव्यक्तेहेतुरपिनास्ति॥ कालेनहिसर्वमव्यक्तंप्रविलाप्यतेत्वंतुकालेननस्पृष्टवर्त्मयस्य
तादृशः ३ एवंज्ञानंतस्यसमर्थयित्वास्वदोषाभावंनिरूपयंतः तस्यसर्वहृदयाभिज्ञत्वमाहुः॥ देवदेवेति॥ अन्येषांभवान्न

देवाऊचुः॥ तमएतद्विभोवेत्थसंविग्नायद्वयंभृशं॥ नत्व्यव्यक्तंभगवतःकालेनास्पृष्टवर्त्मनः ३

देवदेवजगन्नाथलोकनाथशिखामणे॥ परेषामपरेषांत्वंभूतानामसिभाववित् ४ ॥

प्यपिवयंतुदेवाः अस्माकंतुत्वमेवोपास्यइतिसंबोधनं॥ किंच॥ वयंनिःकपटाएवत्वयोत्पादिताः शुद्धसत्वेनअतोपिज्ञाना
सीतिसंबोधनांतरमाहुः॥ जगन्नाथेति॥ जगतांत्वमेवविधाता॥ धारयितावातथापिहृदयज्ञानमुचितमेव॥ किंच॥
स्वामीहिसेवकस्यहृदयंजानाति॥ भवांस्तुसर्वेषामेवलोकानांयेनाथाइंद्रादयः तेषांशिखामणिः॥ लोकनाथाएवस्व
लोकस्याभिप्रायंजानंति॥ भवांस्तुतेषामपितत्रापिशिखामणिरितितेषामुपरितत्प्रकाशकत्वेनतत्कर्मसाक्षित्वेनच एम०
वर्त्तमानः॥ अतःप्रभुत्वेनजनकत्वेनप्रकाशकत्वेनचपरेषांअस्मदाद्यपेक्षयोत्कृष्टानांअपरेषांचहीनानांचकारद २०२
स्माकंच॥ सर्वेषामेवभूतानांत्वंभावविदसि॥ अतोस्मासुनकिंचित्तिरोहितं ४ ॥
द्रूप्यःतेननतत् हृदयमप्रविष्टःकदाचिन्नजाना६

एवंस्वदोषाभावमुक्त्वादोषेवाविद्यमानेतत्कृपांकारयंतोनमस्यंति॥ नमोविज्ञानवीर्यायेति॥ ननुभगवानेवनमस्करणीयःसर्वेषांस्वा
मित्वात्॥ गुरुर्वातन्मार्गोपदेष्टृत्वात्गौणः॥ अहंतोभयरूपइतिचेत्तत्राहुः नमोविज्ञानवीर्यायेति॥ विज्ञानंब्रह्मानुभवः वीर्यंपराक्र
मोयस्यलौकिकीक्रियालौकिकज्ञानसहितासर्वेषांपराक्रमहेतुर्भवति॥ ततोपिकेषांविदेवत्वबीलांवैदिकीक्रियापराक्रमहेतुः॥
ततोपिब्रह्मविदामेवतेजःसार्वत्रिकलक्षणःपराक्रमोज्ञानेनसिध्यति॥ तत्रसाक्षात्कारेणविज्ञानेनभगवतएववलंभवतितादृशंतवा
पिवर्त्ततइतिसिद्धमुपास्यत्वात्ध्यवसीयते॥ अतोभगवत्स्वरूपाभिज्ञत्वात्गुरुत्वेननमनमुचितमेवेतिभावः॥ ननुतादृशज्ञानेसंप
न्नेभगवत्सायुज्यमेवभवेत्कथमेवमधिकारःस्यादित्याशंक्याहुः॥ माययेति॥ इदंशरीरंउपेयुषे॥ स्वीकृतवते॥ यास्वेच्छिकारण

नमोविज्ञानवीर्यायमाययेदमुपेयुषे॥ गृहीतगुणभेदायनमस्तेव्यक्तयोनये ५

शरीरंद ब्रह्मणमम्रद् भूतामायातस्याःकरणत्वनिर्वाहार्थंकर्त्रपेक्षायांसेवकेविद्यमानेस्वामिनोव्यापृतिरनुचितेतिभगवत्तुल्यतायाज्ञातत्वात् जगद्व्यापा
रवर्णश्रवणाच्चतयैवमायपाकृतमिदंतयैवकृत्वास्वीकृतवानित्यर्थः॥ ननुद्वयीगतिः जीवानामकर्तृत्वंभगवतःकर्तृत्वंचेतितत्रा
पिकर्तृत्वेभगवतः शरीरयेज्ञानीवत्वेतुजातेपिशरीरेनकर्तृत्वंसेत्स्यतीतिआशंक्याहुः गृहीतगुणभेदायेति॥ गृहीतःगुणैर्भेदो
येन नास्यसहजोभेदः येनाकर्तृत्वंस्यात्नाप्यभेदःगुणैर्भेदस्यकृतत्वात्॥ गुणादिभेदरूपंभगवंतंचिद्रूपेनियोजितं॥ अत तवं४
स्तत्कृतभेदस्याविद्यमानत्वात्तत्साम्यकृतंदेहमवलंव्यजगत्करणंयुक्तमेव॥ नन्वव्यक्तादीनिभूतानीतिवाक्यात्अलौकिककर्तृ
कत्वादेवकार्यसिद्धेःपुनःकिंब्रह्मकर्तृकत्वेनेत्याशंक्याहुः॥ नमस्तइति॥ अव्यक्तस्यायंयोनिः अव्यक्तमस्मिन्जगत्प्रविश्यस्वयं
निवर्त्तते॥ अतएवांसरजोगुणरूपत्वं॥ यथामातापित्रोर्जगज्जायते॥ तथास्मादयंक्ताच्चजगज्जायतइतितस्यानुपयोगः॥ अ

ब्रह्मणः तोमातत्वात्पुनर्नमनं ५ ॥ ब्रह्मणःरजसस्त्व१ ब्रह्मणःप्रधान१:-

प्रधानात्मकंरजोब्रह्मणिजद्रूपंकामंतप्रविश्यस्वयंनिवर्तितइत्यर्थः:-

Indira Gandhi National Centre for the Arts

त.मु १५ २०३ एवमपराधक्षमापनं कृत्वा तस्य भक्तकृपालुत्वं प्रतिपादयंति येत्वानन्येनेति॥ अत्र वाक्यापरिसमाप्तिः कृपायाः सफलत्वप्रतिपादना
र्थो अतः कृपातो भक्तानामभयं वक्ष्यति अतः कृपाहेतुरेवात्रोच्यते॥ ये संतः त्वां सर्वभावेन हृदि भावयंति तेषां लब्धयुष्मत्प्रसादा अनेनेन आ॰ मनि २
नां न कुतश्चित्स एव भव इति संबंधः॥ ननु भगवत्येवानन्यभावः संभवति कथमन्यस्मिन् इत्याशंक्य अनन्यभावे हेतुचतुष्टयमाहुः आ
त्मभावनमित्यादिपदैः॥ आत्मानं भावकस्वरूपं भावकस्य देहादिकं वा भावयतीति तथा तेन कर्तृत्वं आत्मनिप्रोतं भुवनं ये
न॥ अनेन समवायित्वपरं नियंतारं॥ स्थितो सर्वप्रवर्तनादिकर्तारं॥ सदसदात्मकमिति॥ प्रलयकर्तारं॥ सदसदात्मकः प्रलयः सतामेव विघमानानां ध्वं
दात्मक इति मायात्मकत्वाद्वा प्रलयकर्तारं सर्वदातस्य स्थित्यसंभवात् जगदात्मत्वेपि प्राप्ताप्राप्तविवेकेन असत्स्वरूप इत्येव पर्यवस्यति॥ स॰ २

येत्वानन्येन भावेन भावयंत्यात्मभावनं॥ आत्मनिप्रोतभुवनं परं सदसदात्मकं ६ तेषां सुप
क्वयोगानां जितश्वासेंद्रियात्मनां॥ लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ७ ॥

स्वकीयानां सर्वेषामुत्पत्त्यादिकर्तृत्वात्तदधीनत्वात्स्वस्यापि सर्वभावेन भावनं संभवतीत्यर्थः॥ एवं सर्वभावेन भावनं प्रसादहेतुः ६
एवं कारणनिरूपणेन प्रसादं निरूप्य तेनाभयं निरूपयंति॥ तेषामिति॥ प्रसादेनाभयजनने अवांतरव्यापारमाहुः सुपक्वयोगा
नामिति॥ तस्य मुख्योत्मकत्वात् योगद्वारा सर्वसिद्धिहेतुत्वं॥ अन्यथा भगवत इव स्वतंत्रता स्यात्॥ सुष्ठु पक्वो योगो येषां स्वरूपक्वो हि
सर्वत्र नियोक्तुं शक्यते॥ योगपाके हेतुं दरत्नोव्यापारं तरमाहुः जितश्वासेंद्रियात्मनामिति॥ जिताः श्वासाः इंद्रियाणि आत्मां
तःकरणं च येषां॥ प्राणेंद्रियांतःकरणजयस्तदीयपदार्थानामस्पर्शहेतुत्वात् साक्षात्प्रीतिहेतुः देहगर्भत्वेन ज्ञानहेतुत्वात् एम॰
स्य कारणयोगो वांतरव्यापारमिति नानेकव्यापारत्वं॥ अत एव लब्धो युष्मत्प्रसादो यैस्तेषां न कुतश्चित्कालादेरपि पराभवोभिभ २०३
वः ७ ॥

ब्रह्मणो त्र प्राणात्मकत्वात्५ प्राणादिसंबंधिक्षुत्पिपासादिपदार्थानां२ =

एवं भक्तेषु सफलां कृपामुक्त्वा तस्य कृपावत्त्वं निरूपयन् तस्मिन् कृपां प्रार्थयितुं तस्य सेवकत्वमाहुः॥ यस्य वाचेति॥ यस्य ब्रह्म
णो वेदलक्षणया वाचा सर्वा एव प्रजाः कन्यका इव सर्वथा समर्थाः सेवकभूता अपि सकार्ये अतिनिर्बंधेन नियोजिताः बली
वर्दाः तंत्येव यंत्रिताः ब्रह्मवाक् वेदलोकात्मिका अत एव येषां वेदोपि न नियामकः तेषां लोकिकेन नियंत्रणं॥ अनेनैव सेव वे॰ १
कत्वं निरूपितं॥ सर्वे हि प्राणिनः फलार्थं कर्म कुर्वंति॥ तत्र निष्पन्ने फले अधिष्ठातृदेवताभिरुपस्थिते फले यः सारांशः त
न्नैरेव स्वार्थं भिन्नं करोति पश्चादसारं प्रयच्छति तथा च सर्वकर्मणां यन्मुख्यं फलं सृष्टिः भगवदाज्ञामुखं वा तद्ब्रह्मणे वलिद्य
ति॥ धर्मतपस्यादिनार्थे असारः नांतरीयकमलमूत्रादिरमणं तज्जीवेभ्यः प्रयच्छंतीति एवं ज्ञात्वापि तथैव करणं यंत्रणं॥ अ
त एव अधमा अपि गावो दुह्यंतीति क्रियंते॥ एवं ज्ञात्वा नेनिश्चिता इति॥ एवं सर्वदा कार्यकर्तृषु असारभक्तेषु कृपा उचिता॥

यस्य वाचा चाप्रजाः सर्वा गावस्तंत्येव यंत्रिताः॥ हरंति बलिमायत्तास्तस्मै मुख्यात्मने नमः ८
स त्वं विधत्स्व शं भूमन् तमसा लुप्तकर्मणां अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुं ९ ॥

किंच॥ वलीवर्दापि रूयापि सतेऽन्नमाः॥ यद्सारभूतमपि वलित्वेनतु भं प्रयच्छंति॥ अन्यथा तन्मध्ये मारयेत्॥ अतो भवान् मु
ख्यः प्रवर्तकोपि भूत्वा प्रजासु श्रेष्ठः॥ व्यंग्येन ब्रह्मणोप्युपहास एव उक्तः॥ आसन्यरूपत्वाद्वा बलिहानसात्त्विकत्वेन मुख्यतया नि
रूपणं॥ आसमंतात् यत्नाः सावधानाः अनेन कदाचित्करणं आवर्तितं ८ एवं स्वस्य सेवकत्वमुपपाद्य कृपां प्रार्थयंति स
त्वमिति हे भूमन् अधिककृपायां कृतां मपि न तव काचित्कृतिरित्यर्थः॥ अत एवास्मभ्यं शं प्रयच्छ॥ कल्याणं तदाहुः त्वंर्थ
यां४ स्याभिप्रेतमाहुः॥ लुप्तकर्मणां लोकानामंधकारेण सर्वकर्मरहितानां भुवनानां संबंधिनः आपन्नान् शरणागतान् अस्मान
दभ्रदयया दृष्ट्या ईक्षितुं दर्शनव्यतिरेकेण तत्र विद्यमानमपि दैन्यादिकं न प्रकाशते॥ अतः कृपादृष्ट्या द

भगवान् ३ प्राणात्मनो गावत्वा १ =

छन्नमिति हृदोक्तिमायः॥ साधारणलोकानां धीनत्वं इच्छाइयोत्सयद्यैः परं सामान्यान्तव्यवलितमदृष्टे इति विहितानां ॥ २ ॥

त-सु१५
२०४

कस्मान्निमित्तात्कृपाविधेयेतिशंकायांदैत्योत्पत्तिर्ज्ञायतइतिततः अभयंकर्त्तव्यमित्यभिप्रायेणाह॥ एषदेवेति दितेरेष
गर्भःकाश्यपंतेनैवार्पितमोजः दूरगतदिशलितिमिरयन्॥शुष्केएधसिकाष्ठेअग्निरिववर्द्धते॥ इदानींदितेर्गर्भः॥ अनेनस्वभाव ३९२३
तःक्रूरोभविष्यतीत्युक्तं॥ तत्रापिकश्यपस्यवीर्यंतद्र्योजोरूपंतेनैवचअर्पितंसमर्पितं॥दितेःस्थानेसमर्पितमितितत्रनको
पिप्रतीकारःकर्त्तुंशक्यः १० एवंमहाभयेनदेवानांवचनंश्रुत्वातत्रनिदानंहास्यरूपमितितत्स्मृत्वातद्वक्तव्यमितिवीज्ञग

एषदेवदितेर्गर्भजःकाश्यपश्यपमर्पितं॥दिशस्तिमिरयन्सर्वावर्द्धतेग्निरिवैधसि १० मै
त्रेयउ०सप्रहस्यमहाबाहोभगवान्शब्दगोचरः॥प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरयागि
रा ११॥

भयोर्हीनत्वात्तदतिरिक्तहेतुंतरंवक्तुंकथामारभतइत्याहमैत्रेयः॥सप्रहस्येति॥महाबाहोइतिविदुरसंबोधनंशूरत्वे
नक्वापिभयंनकर्त्तव्यमितिज्ञापनार्थं॥भगवानितितज्ज्ञानेहेतुःप्रतीकारकरणेच॥ शब्दगोचरइति॥ अलौकिकःवेदैकप्र
मधिगम्यः आधिदैविकोब्रह्मातत्राविष्टोवदतीतिज्ञापितं॥अनन्यभगवत्सेवकाद्यपकेर्षोवक्तुमयुक्तइत्येवंप्रत्याचष्टप्र एम०
त्युत्तरंदत्तवान्॥ब्रह्मणाकिंचित्कृतमितीयंशंकाव्यावर्त्तिता॥भगवांस्तद्विधित्सतीत्यग्रेवक्ष्यति॥आत्मभूरितितत्कथ २०४
नंनापराधहेतुः॥मानसाइत्यादिवाक्येभ्यः अन्यथैवेहचिरयागिरातेषांयथासुखंभवतितथाप्रीणन्प्रीतिंजनयन् ११

देवानां

शापाद्गतजयविजययोःनिस्तेजस्त्वेःतेजसाहृतत्वात्मितिवक्तुंशापार्थंउपाख्यानमारभतेमानसाइत्यध्यायद्वयेन॥ प्रसंगात्तेषांवैकुं
ठगमनमितिवक्तुंस्वभावतस्तेषांपरिभ्रमणमाह॥ मानसाःमेसुताइति॥भगवतामनसिकृतंतेकृतवंतइतिज्ञापयति॥ मत्सुताइतिस्नेह १३
हेतुत्वमुक्तं॥ युष्मत्पूर्वजाइतिभवतामज्ञानेहेतुः। देवाःपश्चादुत्पन्नाः॥ नत्वेतेकाश्यपाःतस्मिन्काले तथैवोत्पत्तिः। देवानांशुद्धसात्त्वि
कत्वात्॥ ततःपूर्वजागुणातीताः॥ अनेनस्वस्यद्रोषोनास्तीतिसूचितं॥ यथाममपुत्राःतथाभवतांज्येष्ठाइति॥सनकाद्यइति॥ तपोरू
पत्वात्नकस्यापिप्रतीकारःशक्यः॥विहायसाआकाशमार्गेणास्यप्रतिरोधःक्षमाभावश्चसूचितः॥सर्वेष्वेवलोकेषुविगत
स्पृहाःसंतःचेरुः गमनंकृतवंतः लोकानलोकान्वाप्रतिलोकोद्धारार्थमित्यर्थः॥लोकानित्यत्रनसंयोगेवाद्वितीया। पुनर्लोकग्र
हणंजनेषुप्रयोजनाभावार्थंतेषांपर्यटनंनित्यमितितेपरिभ्रमंतिअतोभुवनानामेवकर्मत्वंनतुजनानां १२ तेषांप्रसंगात्
वैकुंठगमनमाह॥ तएकदेति॥भगवतोवैकुंठस्येतिसात्त्वगुणपुरुषावतारोवैकुंठः तन्नाम्नानिर्मितोलोकोवैकुंठइत्युच्य

ब्रह्मोवाच॥मानसामेसुतायुष्मत्पूर्वजाःसनकादयः॥चेरुर्विहायसालोकान्लोकेषुविगतस्पृहाः १२
तएकदाभगवतोवैकुंठस्यामलात्मनः॥ययुर्वैकुंठनिलयंसर्वलोकनमस्कृतं १३ ॥

ते॥स्त्रीप्रार्थनयायलोकोनिर्मितइतिसोवताद्कामीतिशंकास्यात्तन्निवृत्त्यर्थमाह॥ अमलात्मनइति॥ अमलाआत्मानोयस्येति
वा॥ यथामत्स्यादिष्वविद्यावंतःतिष्ठंतिनतथातत्रेत्यर्थः॥वैकुंठनिलयमितिनित्यमेवस्थानं॥ कृत्रिमत्वेप्यापिवैकुंठएवतत्रनिविष्ट
इतितन्मुख्यमेववैकुंठं॥ अतःपुनःलोकायकल्पनामितिनविरोधः। चैद्योचसात्वतपतेश्चरणंप्रविष्टइतिचनविरुध्यते॥ प्रत्ये
ष्यतमितिच॥वैकुंठःकल्पितोयेनेतिवाक्यात्कृत्रिमत्वंच॥सनकादीनांगमनाच्चलोकसाधारणप्रसंगाच्च॥ अतःकृत्रिमेसहज
स्यावेशः॥ लोकावतारोवा वैकुंठस्यनिलयमितिपुनरुक्तं॥वैकुंठएवनिलयमिति॥सर्वेषामगम्यमितिसूचयितुमाह॥ सर्वलो
कनमस्कृतमिति॥ सर्वेषांजनानांनमस्करणीयं सर्वभुवनोत्कृष्टंवा॥ अन्यत्रलोकेविद्यमानालोकमुपद्रावयंति॥ अत्रत्य

कृदेवमितिभवैलोकाद्वैतेनमकुर्वत

Indira Gandhi National Centre for the Arts

नतुकामादि २=

त.सु.१४ २०४ सामान्यतः तंलोकंवर्णयति॥चिदानंदस्सदसद्देहैः॥तत्रप्रथमंतत्रत्याः चेतनाः आनंदरूपाइति॥स्वरूपोत्कर्षमाह॥वसंतियत्रपुरु
षाइतियत्रवैकुंठेपुरुषाइतिस्त्रीणांनसारूप्यमुक्तिः वैष्णवपतिव्रतानांतुतैः सहगमनं॥ तत्रचभगवद्गुणगानमितितद्ग्रेवक्ष्यति॥सर्व
इति नतत्रवर्णादीनांप्रयोजकत्वं॥वैकुंठस्येवमूर्त्तिर्येषां॥आनंदाकारएवतेषांदेहः॥ आनंदएवच॥तथापिस्वानंदस्यतथात्वात्तन्
भगवत्तुल्यत्वंतत्रतथात्वेहेतुमाह॥येऽनिमित्तनिमित्तेनेति येभगवतः अनिमित्तेननिष्कामेनधर्मेणहरिमाराधयन् आराधितवं
तः॥ननिमित्तंलोकप्रसिद्धंकामनारूपंनिमित्तंयत्रनिष्कामस्वधर्मेणश्रवणादिनाधर्मरूपेणयेभगवदाराधनंकृतवंतः १४ ए
वंजीवोत्कर्षमुक्त्वाभगवदुत्कर्षमाह॥यत्रेति॥यत्रानंदमयोभगवानस्तदंशस्यमुख्यभावरूपंसत्वंविष्टभ्यतिष्ठति॥वैकुंठलोकोयंस

वसंतियत्रपुरुषाःसर्वेवैकुंठमूर्त्तयः॥ येनिमित्तनिमित्तेनधर्मेणाराधयन्हरिं १४ यत्र
चाद्यःपुमानास्तेभगवान्शब्दगोचरः॥सत्वंविष्टभ्यविरजं०स्वानांनोमृडयन्वृषः १५॥

र्वलोकविलक्षणः॥अंतःचितःआनंदःशरीरंआनंदस्यसतःशरीरंसततश्चमोक्षरूपतेति॥अतएवसत्वादयोगुणाःसच्चिदानंदा
नामितिपूर्वमुक्तं॥सर्गस्थितिरूपइतिसच्चिदानंदानामावृत्तिरुच्यते॥अतएवाश्रयेआनंदेप्रतिष्ठाप्रतिष्ठांवक्ष्यति च॥चका
रश्चापिवैकुंठे॥आद्यःपुमान्पुरुषोत्तमः॥भगवानितितस्यधर्मः शब्दगोचरइतिलौकिकसंबंधाभावः॥सत्वस्यविशेषेणस्त
भनंकालप्रवाहेणरजोगुणादिभिःसहमिलनाभावार्थंपूर्वंत्वमिलितमित्याह विरजमिति॥ननुसत्वस्तंभनेकःपुरुषार्थइत्या
शंक्याह॥स्वानांनोवृषइति ब्रह्मादीनांभक्तानांस्वामी॥स्वभक्ताःकालाद्भिन्नतयासर्वेष्टैःसंयोज्याइतियतोवृषःस्वामी॥स्वामि एम.
नोमृडनमावश्यकं॥स्वाम्यविशेषोवा॥साधारणस्वाम्यपेक्षयाभक्तेषुमृडयन्॥अयंस्वामीअतःसत्वविष्टंभनमित्यर्थः १५ २०५

धातो ३=

एवमानंदस्यसत्वमुक्त्वासतामुभयविधपरमपुरुषार्थत्वमाह॥यत्रनैःश्रेयसंनामेति॥यत्रवैकुंठेउपवनमस्तितस्यनामनैःश्रे
यसमिति नैःश्रेयसशब्दोयोगरूढभेदेनद्विविधः॥तत्रप्रथमंयोगंसमर्थयति॥कामदुघैरिति॥यद्वनंद्रुमैर्विभ्राजत्सर्वएव
द्रुमाःकल्पवृक्षास्तएवतत्रत्याः परमपुरुषार्थरूपाः तत्रत्यानामपिकामितार्थदातृत्वात्॥द्रुमतावि ति तद्रहितादुमाःप्रतिष्ठि
ताः॥स्वतोपि तेषामुत्तमत्वमाह॥सर्वर्त्तुश्रीभिरिति सर्वेष्वेवऋतुषुनियतापुष्पादिसंपत्तिरूपाश्रीर्येषां॥एवंयोगार्थमुक्त्वा

यत्रनैश्रेयसंनामवनंकामदुघैर्द्रुमैः सर्वर्त्तुश्रीभि
र्विभ्राजत्कैवल्यमिवमूर्तिमत् १६ ॥

जीव:२=

रूढ्यर्थमाहमूर्त्तिमत्॥कैवल्यमिति॥केवलस्यभावःकैवल्यंचिद्रूपाणांस्वरूपेणस्थितिःपुनःसंघातसंबंधाभावः अ
नेनजीवपुरुषार्थताउक्ता॥तत्रगतःचिततन्मात्रेणेतिवत्कैवल्यमापद्यते॥तदप्येकंरूपंभगवतःयदोडुलोमिभते
नसिद्धंयदात्मत्वेनचआत्मवादिनोवदंति॥भगवांश्चअहमात्मागुडाकेशेतिप्रथमंविभूतित्वनोक्तवान्स्वाकैवल्यमूर्त्तिः
तदेवनित्तएंश्रेयोरूपं॥आत्मलाभान्नपरंविद्यतइतिश्रुतेः॥तस्मात्तत्रवनेप्रविष्टःआनंदमयोभवति॥ब्रह्मानंदंचप्रा
प्नोतीति सतःपरमपुरुषार्थत्वं १६ ॥ ॥

Indira Gandhi National
Centre for the Arts

त॰मु॰१५ एवंलोकस्यसर्वलोकवैलक्षण्यार्थंसच्चिदानंदवैशिष्ट्यंप्रतिपाद्यसर्वदोषाभावार्थंमोहाद्यभावमाह षड्भिः॥वैमानिकाइति॥
२०६ तत्रस्त्रीणांनमोहजनकत्वं तिर्यक्स्त्रीणांनामदः लतागुल्मानांपुष्पप्रधानानामपिनमात्सर्यं॥भगवद्भक्तस्त्रीणांनकामजन
कत्वं॥लक्ष्म्याअपिनाभिमानलक्षणोमानात्मकःक्रोधःलोभश्चतत्रैवप्रतिष्ठितइतिनतस्याःस्वस्मिन्परमपुरुषार्थबुद्धिःकिं भागवतेष्ठ ३=
तुभगवत्येवेतिसर्वदोषाभावउक्तोभवति तत्रप्रथमंस्वाभाविकस्त्रीणांस्वभावदुष्टानामपिस्वदोषपरित्यागेनभगवद्गुणपरता
च्यते॥विमानैकसिद्धावैमानिकाःगंधर्वादयःतेषामागंतुकाःस्वभावगमनबलाभावात्तल्लोकयोभावाच्चवैमानिकाएवभवंति॥
तेषांतत्रगमनेआदरेणगानमेवहेतुः॥सललनाःसस्त्रीकाः।अनेनउभयोःअन्योन्यमोहासंभवोनिरूपितः॥यत्रवैकुंठेभ
र्तुःचरितानिगायंति॥तेगंधर्वादयःतदीयाएव॥भर्तुरितिऐहिकपारलौकिकनिर्वाहकत्वेनतद्गुणगानमावश्यकमितिसूचितं॥

वैमानिकाःसललनाश्चरितानियत्रगायंतिलोकशमलक्षपणानिभर्तुः॥अं
तर्जलेनुविकसन्मधुमाधवीनांगंधेनखंडितधियोप्यनिलंक्षिपंतः १७॥

एवंगुणगानस्यस्वोपकारकत्वमुक्त्वापरोपकारकत्वमाह॥लोकशमलक्षपणानीति॥तस्यलोकस्यसर्वेषामेववाशमलंमार्गांतर
स्थितलोकसंबंधजातंनित्यंवातस्यक्षपणंतत्रैवविलयप्रापणंयैः।तेहिगंधर्वाःरूपरूपंभगवंतमुपासते॥अतोऽप्सरसःतेषु
प्रतिष्ठिताः॥गंधर्वेष्वपियोगश्चतत्त्वात्गंधवातीतिपृषोदरादित्वात्गंधर्वाभवंति॥अप्सरसस्तुगंधमेवभगवंतमुपासते॥उभयं
थापिसस्त्रीकाणांगंधपरत्वंअतोगंधेनखंडितधियोपिगंधवाहंवापुंसर्वदापरमाराध्यंक्षिपंतःसंतःगुणानेवगायंति॥गंधस्य रामं०
व्रसत्वायदोषाभावमाह॥अंतर्जलइति॥जलमध्येस्तुष्टुविकसत्विकासेनप्रसरद्रूपंमधुमकरंदोयासांमाधवीकाचिल्लता २०६
यत्रवसंतर्तुराधिदैविकःप्रतिष्ठितः॥सरसवसंतस्येतिविकसन्मधुत्वंअतस्तादृशीनांगंधोवरप्राप्तःपृथिवीसंबंधाऽभावा
त्अप्राकृतः अतस्तेषांसहजोपायोपिभगवद्गुणगानार्थंतैःपरित्यक्तइतिआधिदैविकोपिमोहोनास्तीत्युक्तं १७ ॥

ता॰ह॰पा॰१५.

एवंगंधर्वाप्सरसामुक्त्वापक्षिणांदोषाभावमाह॥पारावतेति॥एतेपारावतादयोनवगुणभिन्नाः तेषामपिस्वतःसिद्धावाक्ते
षांवागेवब्रह्मचित्रत्वनत्वमेवतेषांमाहात्म्यंअतएवचप्रातरनुवाकेतेषांवाक्यात्पूर्वमेवारंभः अन्यथादेवानांतद्वाङ्माधुर्यप
रत्वंस्यात्॥अन्यभृतःकोकिलःदात्यूहश्चातकःबर्हीमयूरः॥यइतिप्रसिद्धोपिकोलाहलःतद्वाक्येव्याकरणाभावात्पदवाक्या
नामभावेशब्दराशित्वात्अनभिव्यक्तःकोलाहलत्वेनोक्तः॥वस्तुतस्तुतेपिभगवद्गुणानेवगायंति॥नहितत्रत्याःपक्षिणःअ
ज्ञावदंति॥शुद्धसत्वस्यतथालोकत्वेनाविर्भावात्तत्रदृष्टरूपस्यादीनांसंभवः॥सोपिकोलाहलःक्षणमात्रमेवविरमते भृंगाधि

पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरबर्हिणांयः कोलाह
लोविरमतेचिरमात्रमुच्चैर्भृंगाधिपेहरिकथामिवगायमाने १८ ॥

पेभ्रमरश्रेष्ठेहरिकथामिवगायमानेसति॥अनेनतेषांस्ववाक्गर्वेनास्तीतिसूचितं भृंगाणाधिपत्यंचभर्मंतोतस्य
भगवत्सान्निध्यसंभवात्कुंतलानांतत्साम्याच्च भृंगाणामधिपोवाआधिदैविकः तस्यवाग्रागरूपेतिरागंकृत्वागास्यती
तिबुद्ध्याकोलाहलोविरमते तस्याप्यनभिव्यक्तवाक्त्वात्गपर्यवसानंज्ञात्वास्ववागिवतदपीतितदवधारणार्थंचि
रमात्रंभगवत्कथागानेसोप्योराणउपयुक्तइति॥यद्वातद्रागानुसारेणभृंगरवःउच्चैःशब्दाद्भगवदाज्ञाप्रायेणज्ञाते
तिसंदेहः १८ ॥ तद्वचनं॰

इवेतिनिर्देशात॰१

Indira Gandhi National
Centre for the Arts

त.सु १५
२०७

एवंपद्भिर्णांदोषाभावमुक्त्वालतादीनांपुष्पप्रधानानांमात्सर्यलक्षणदोषाभावमाह॥मंदारेति मंदारोदेवतरुर्भूमावप्रसिद्धः कुंदकु
रवकोत्पलचंपकाःसर्वत्रप्रसिद्धाः॥अर्णःकाश्मीरःप्रसिद्धः॥पुन्नागनागकेसरवकुलांबुजाअपिप्रसिद्धाः॥पारिजातोमंदारवत्॥ए
तेपुष्पप्रधानाः॥अतिपरिमलयुक्ताः॥तथापितुलसिकाभरणेनभगवतातुलस्यागंधेअर्चितेयस्मिन्वैकुंठेतस्याएवतपःसर्वेए
वसुमनसोभूत्वामंदारएदयोवद्भुमानयंति॥नकेवलंबहिर्बहुमाननंकिंतुअंतःकरणेपीतिसुमनसइत्यक्तं॥तपसाहिहीनउ

८

मंदारकुंदकुर वकोत्पलचंपकार्णपुन्नागनागबकुलांबुजपारिजाताः॥
गंधेर्चितेतुलसिकाभरणेनतस्यायस्मिंस्तपःसुमनसोबहुमानयंति १९

न्नमतांव्रजति॥तुलसिकाभगवतआभरणंवनमालातत्संभवेति॥तुलस्यमृतोद्भवा॥यथालक्ष्मीः॥भगवत्प्रसादात्चत
यातपःकृतमित्यवसीयते॥वृंदात्वेवातस्यांप्रसादः॥साहिजालंधरस्यभूतमधोःकन्या॥जालंधरवधार्थंचतांपरिगृहीतवा एम०
न् तस्याःपातिव्रत्यंतपस्तपएववापूर्वंसिद्धं॥गुणकृतसौंदर्याभावायभगवतासातथैवस्थापिता॥भक्तिमार्गेतस्यामा २०७
हात्म्यंसर्वतोधिकं १९ ॥

एवंप्रकारत्रयेणस्वभाविकसात्विकराजसतामसाअपिस्वदोषमभिमानंदूरीकृत्ययत्रवैकुंठेअस्वभाविकधर्ममंगीकृतवंतइ
त्युक्तं॥इदानीमुख्यतयास्त्रीणामेवसहजदुष्टत्वात्दोषाभावः प्रतिपाद्यते॥तत्रसर्वाःस्त्रियःअन्याःआधिभौतिकाः॥लक्ष्मी
द्विविधा॥आध्यात्मिकीलोकसंबंधिनीआधिदैविकीभगवद्भक्ताभगवदानंदरूपा॥त्रिविधानामपिस्त्रीणामानंदरूपत्वात्
सहजोदोषःसंभवतिसनिराक्रियते॥तत्रप्रथमंभगवदीयानांस्त्रीणांदोषाभावमाह तत्संकुलमिति तद्वैकुंठविमानैः
संकुलं॥तेषांविमानानांप्राप्त्युपायमाह॥हरिपदानतिमात्रदृष्टैरितिहरिपदयोरानतिमात्रंयेषांतेदृष्टानि॥भक्तिमार्गानु
सारेणभगवतिनम्रत्वेतादृशविमानदर्शनं॥श्रवणादिषड्विधभक्तिर्वामात्रशब्दोवधिवाची॥सख्याद्यभावेपिआनतिपर्यंतेनै
वभक्तिमार्गेणेतितत्प्राप्तिरितिवावैडूर्यमारकतहेममयैरितिविमानानांत्रैविध्यंउक्तं तत्रवैडूर्यंतामसमिवमारकतंसात्वि

तत्संकुलंहरिपदानतिमात्रदृष्टैर्वैडूर्यमारकतहेममयैर्विमानैः॥येषांबृह
त्कटितटाःस्मितशोभिमुख्यःकृष्णात्मनांनरजआदधुरुत्स्मयाद्यैः २०

कमिव हेमराजसमिवभक्तानामपित्रैविध्यात्त्रिविधप्राप्तिः॥अनेनभक्तानांतत्रविमानेषुस्थितिरुक्ताभोगातिशयाय॥ये
षांविमानानांसंबंधिन्यःभोगार्थमेवस्थिताः॥बृहत्कटितटाइतिपदंभोगमेवपोषयति॥मोहकत्वंचसहजमित्याह॥स्मितशो
भिमुख्यइति॥स्मितेनशोभायुक्तंमुखंस्मितशोभिस्मितशोभिमुखंयासामस्तीतिस्मितशोभिमुख्यः॥दर्शनेनैवमोहकत्वंउक्तं॥
रसद्वयसिद्ध्यर्थंवाविशेषणद्वयं॥अमोहकत्वेहेतुः॥कृष्णात्मनामिति भगवद्भक्तानांमनसितानरजआदधुः॥कामंनो
त्पादितवत्यः॥नचताविभावाद्यचतुरइतिमंतव्यं॥यतःउत्स्मयाद्यैरपिहास्यादिसर्वभावैरपिनरजआदधुः।वैकुंठस्यमाह
[illegible]

स्रि ४

भावात् नामविशेषककथनात्[illegible]हृतं वा॥
सदावैकुंठोक्तर्षस्वरूपवर्णि॥अस्मत्रापितस्यैनदोषत्वं॥
अस्मयातत्रतेषामेवकीर्तनंविदध्मेत २०
कामसप्र
श्री ग्रंथ

Indira Gandhi National
Centre for the Arts

त.सु.१५
२०८

एवंभगवदीयस्त्रीणांदोषाभावमुक्त्वालक्ष्म्याः तत्रगर्वःसंभवतितदर्थमेवतन्निर्माणात्‌अयापितस्यास्तद्दोषाभावमाह श्री
रूपिणीतिसर्वस्मिन्नेवजगतिविद्यमानलक्ष्म्याःसादेवताऽ तोरूपिणीत्युच्यते॥ब्रह्मानंदस्यनीरूपस्यरूपंसंजातमितिलौ
किकार्थवारूपवतीसानिरूप्यते॥यद्यपिसौंदर्यवत्‌आभरणादिकमप्यभिमानहेतुः अस्तितथापिनाभिमानइतिवक्तुंक्वण
यतीत्युक्तंचरणारविंदंनूपुरसिंजितैःक्वणयतीसशब्दंकुर्वती॥रूपिवंचरणक्वणनंलीलांबुजंचतस्याः सर्वेषांवेद्यमितिनाम
दर्शितं॥रूपवत्वंप्रतिमायाअपिभवतीतिक्वणनमधिकंनिरूपितं॥लीलांबुजेनाप्युपलक्षितात्मांतरआह्वानार्थं यतः सैवय
मकरणभवति मुक्तोदोषोययाभ्यिरा॥लोकेआधिभौतिकाः चांचल्यंदोषः लीलांबुजयुक्तेनप्रसारितहस्तेनोपलक्षितावा।
हरिसद्मनीतितत्रसर्वेषांसहजदुःखाभावः॥दुःखाभावपूर्वकविषयेसत्यवश्यंगर्वोभवत्येवतथापितत्रसंमार्ज्जतीवसंलक्ष्य

श्रीरूपिणीक्वणयतीचरणारविंदंलीलांबुजेनहरिसद्मनिमुक्तदोषा संलक्ष्य
तेस्फटिककुड्यउपेतहेम्निसंमार्ज्जतीवयदनुग्रहणेऽन्ययत्नः २१ ॥

ते॥ननुउचितमेवगृहिणागृहसम्मार्ज्जनमितितन्निवृत्त्यर्थंतस्याःप्रतिबिंबएवतथादृश्यतइतिज्ञापनार्थंगृहंविशिनष्टि॥स्फ
टिककुड्येउपेतहेम्नीति॥एकस्फटिकत्वेशोभानस्यादितिबहवःस्फटिकाःवक्तव्याः तत्रयोजकद्रव्यांतरसंबंधेपुनः रजःसंबं
धःस्यात्‌॥अतःउपेतंहेमसंधिषुयत्रेति·बिंबाधिक्यार्थंवा॥अतःतत्ररजःसंबंधाभावेपिसेवनिरभिमानातिष्ठतीतितथोक्तं।
सर्वस्यापिवैकुंठस्यातिशोभायुक्तत्वात्‌लक्ष्म्यैवशोभाक्रियतइतितथोत्प्रेक्षणं॥तत्रत्यानांनलक्ष्मीपरत्वंवा॥तेनतथोत्प्रेक्षा एष० 
॥अनेनलक्ष्म्याः अन्येषामपितत्कृतोदोषोनालीस्फक्तं आदराभावल्वत्यलौकिकइतिज्ञापयितुमाह यदनुग्रहणेन्ययत्नो २०८
इति॥यस्याअनुग्रहार्थंअन्येषांब्रह्मादीनांयत्नः २१ ॥

लक्ष्मीकृतोमदः २

एवमाध्यात्मिकाःगर्वाभावरूपंदोषाभावमुक्त्वाआधिदैविकाःमानाभिमानौनस्तइत्याह वापीष्विति॥निजवनेलक्ष्मीवनेतुलसीभिःसाधनैः
वापीषुईशमभ्यर्चतीस्ववक्त्रंभगवताउच्छेषितमित्यमंस्तसाहिभगवद्भजनंकुर्वाणाभजनस्यस्वस्यभगवच्चुवनमेवमहाफलत्वेनज्ञा
तवतीतितस्याःकथमभिमानःस्यात्‌तुलसीभिश्चपूजयतीतिनसापत्न्यादिभावः॥अवस्थास्मारकत्वेनवापीदासोहपयोगः॥कदाचिदे
वंभावव्यावृत्त्यर्थंवापीष्वितिबहुवचनं प्रवालाःतटेयासामितिप्रतिबिंबस्फुटताविद्रुमाःतटेषुयासांतटच्छायामालिन्याभावाय अ
मलमतिनैर्मल्यंमुखप्रतिबिंबेहेतुः॥अमृतजलत्वंचलवणजलेविवर्णप्रतीतेः॥जलेचपूजार्थंध्यातोभगवान्प्रेम्णप्रतिबिंबेस्फुरि

वापीषुविद्रुमतटास्वमलामृतासुप्रेष्यान्वितानिजवनेतुलसीभिरीशं॥
अभ्यर्चतीस्वलकमुन्नसमीक्ष्यवक्त्रमुच्छेषितंभगवतेत्यमतांगयच्छ्रीः २२

तः सकचग्रहचुंबनेऊर्ध्वमुखंभवति॥एतदेवमहापुरुषार्थइतिज्ञातवती॥प्रेष्यान्वितेतिशंकाभावार्थंच॥निजवनइतिभगवदागमना
भावाय॥यत्रतस्याएतावदेवमनोनत्यसिद्धंतत्रकथंगर्वादिभावः॥स्वलकमितिकचग्रहणार्थवचनं॥ऊर्द्धनास्तिकंमपितदेवभवति वक्रं२
॥उपविष्टायाःस्तुतावदेव॥यतइयंअभ्यर्चतीयस्यवैकुंठस्यश्रीः॥तुलसीभिरितिबहुवचनंलक्षादिपूजाद्यपलक्षकं ईशमिति
पूजायामपिपतित्वेननावहेला॥अभितः अंगादिसहितपूजनंमहाफलत्वाय॥चुंवनमात्रेणैववक्त्रतार्थताज्ञानंपरमभक्तत्वबोध
कं॥आत्मसमर्पणंतुज्ञातमिति उच्छेषितमममंस्तेतिक्रियाविरतिरपिसूच्यतेसाक्षात्फलेसंभवतिकिमित्येवंक्रियतइति १२ ॥
श्रीराधावल्लभायनमः ॥ ॥

Indira Gandhi National
Centre for the Arts

एवंसर्वदोषाभावमुक्त्वादोषवतांतत्रागमनमेवनास्तीत्याह॥यत्रव्रजंतीति॥अनेनसंस्काररूपाअपिदोषाःतत्रनसंतीतिसमर्थितं॥यद्वै कुंठंतेनव्रजंति॥येअवृभिदोरचनानुवादात्अन्यविषयाःकथाःश्रृण्वंति॥अन्यविषयकथाश्रवणंवैकुंठगमनेसाधनेसत्यपिप्रति बंधकं॥अन्यथासाधनाभावादेवनगच्छेयुःकिमेतत्कथनेन॥अघंभिनत्तीत्यघभित्भगवान्तस्यपापनाशकत्वंसहजंतस्यरचनाच रित्रंचरित्रस्यलातंत्र्यार्थीसमासः रचनायाअनुवादःश्रवणानुसारेणकीर्त्तनंकृतानुकीर्त्तनंवा॥नतत्प्रेरूपाश्रितद्धंकाव्यवत्तस्मादन्य विषयाःकथाइतिकेनापिप्रकारेणभगवत्संबंधरहिताःभगवद्विरुद्धदैत्यादिकथावाक्यासामप्येलनादन्यत्वं॥अतएवताःकुक थाः॥तेषांधर्माणांदोषत्वात्दैत्यानांपराक्रमोपिब्रह्महत्यादिरूपोभवति॥ननुभगवत्कथायाअपिश्रुतत्वात्कथंतासामेवफलं तत्राह मतिघ्नीरिति॥पूर्वसिद्धांभगवत्कथामतिंनाशयंत्येवयदिश्रुताभवेयुर्विषवत्॥किंचनतासांकेवलंप्रतिबंधकत्वंकिं

यत्रव्रजंत्यघभिदोरचनानुवादात्श्रृण्वंतियेन्यविषयाःकुकथामतिघ्नीः॥यास्तुश्रु
ताहतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपंत्यशरणेषुतमस्सुहंत २३ ॥

तुस्वतंत्रयाअनिष्टसाधकत्वंचेत्याह॥यास्तुश्रुताइति॥पुण्येविद्यमानेतेषांश्रवणमेवनसंभवतीतिहतभगैरित्युक्तं॥भाग्यंसुखानु भवहेतुरदृष्टंतद्यदाकेनापिनिमित्तेननश्यतितदाकुकथाश्रवणेमतिहत्यते॥ननुतेषांविवेकधैर्यादेःविद्यमानत्वात्कथाङ्ग वत्कर्षोश्रोष्यंतीत्याशंक्याह॥आत्तसाराइति॥नराणामल्पसारत्वात्तदपिकुकथाभिर्गृह्यतेतदातत्सामर्थ्यागतत्वात्तान्अशर णेषुतमःसुदैत्यस्थानेषुदूरादेवप्रक्षिपंति॥हंतेतिखेदेमहताकष्टेनश्रुताःयश्चाद्भुतकाज्ञाताइतितान्तान्इतिवीप्सा॥नको 
पितादृशोनिस्तरतीतिज्ञापितं॥श्रवणेसंपन्नएवमननाद्यपेक्षापिनास्तितद्देवक्षिपंतीतिनमुक्तिवत्एकसहायोपेक्षते॥ते 
षांचस्थितोमध्येकोवेदकिंभवेदितितादृशानांबहुत्वसंभवात्बहुवचनेनवीप्सा २३ ॥

एवंतामसानांदोषवत्तांतत्रागमनपूर्वकंतमःप्रवेशमुक्त्वाएतस्मानामूर्द्ध्वाधोगतिरहितानांमध्येपरिभ्रमणेनक्लेशंदृष्ट्वा श्रोचन्नाह॥येभ्यर्थितामपीतियेन्नगतिंप्रपन्नाःभगवतआराधनंनवितरंतितेनिश्चयेनअमुष्यमाययामोहिताः नगतिर्म नुष्यत्वं॥तस्यदुर्लभत्वमाह॥नःअभ्यर्थितामिति॥ब्रह्मादिभिरपिनृगतिःप्रार्थ्यतेसर्वस्यापिप्रकृतिरूपत्वात्॥यथाकन कात्सर्वमेवकुंडलादिकंभवति ननुकुंडलात् अतएवब्रह्मादीनामपिनृगतिः॥प्रार्थ्यानइतिषष्ठीसंबंधमात्रविवक्षयानृगतेः वेलक्षण्यप्रतिपादनार्था यान्नगतिःब्रह्मत्वंसंपादितवतीनासुरीतियावत् षष्ठ्यासूचितं विशेषमाह॥ज्ञानंचतत्ववि कामाण्ड्=

येभ्यर्थितामपिचनोन्नगतिंप्रपन्नाज्ञानंचतत्वविषयंसहधर्मयत्र॥ना
राधनंभगवतोवितरंत्यमुष्यसंमोहितावितत्तयाननुमायया ते २४ ॥

षयमिति॥यत्रन्नगतौतत्वविषयंज्ञानंतत्वज्ञानंभवति॥ब्रह्मज्ञानंसुलभंतद्भावापन्नानांप्रापंचिकपदार्थानांवैदिकानांवा ज्ञानंदुर्लभं॥तत्वविषयमितिविषयपदंतत्वेनज्ञानंवारयति॥तदाबाधितंस्वरूपमेवज्ञातंस्यात्॥तद्वैत्यज्ञानेपितुल्यं॥च काएत्स्वरूपज्ञानं॥सहधर्मेतिधर्मज्ञानसहितं॥एवमपिसतिभगवतआराधनाभावःमायाकार्यएव॥वितरणंनामसमर्पणा व्यतिरेकेणदानं॥तथासर्वेंद्रियैःसर्वथासर्वदाभगवद्भजनंनस्यात्तवतत्ज्ञामात्रंसकृदाराधनंवा मायामोहःशास्त्रेणनिव र्त्तयितुंशक्यतइतिहृष्टेपिशास्त्रेयदवितरणंतन्मायामोहकार्यंनभवतीत्याशंक्याह॥विततया॥नचितिकोमलसंबोधनं नात्रान्यथाकथनंशंकनीयमितिज्ञापितं॥साहिविततताशास्त्रेप्यन्यथाबुद्धिंसंपादयति॥सापिमाया वितएवतेषांस्वच्छ र्थंमोहाभावात् २४ ॥

चितइतिपाठेतुचिद्रूपस्यमायामो हिकानत्वानंदस्यस्ये ४७:१=

Indira Gandhi National
Centre for the Arts

त.सु.१५
२१०

तत्रागमनेसाधनमाह॥ यच्चव्रजंतीति॥ चकारएवापिवैकुंठं॥ यद्वैकुंठं हरेरनुवृत्त्याव्रजंति॥ हेअनिमिषामर्षभेतिइंद्रसंबोधनं॥ तस्य भगवदनुकंपयैवइंद्रत्वप्राप्तिः॥ सर्वदुःखहर्तुरित्यनुवृत्तौक्लेशाभावः॥ विमानदर्शनंभगवदानतिमात्रेणापिभवति प्राप्तिश्चस्वतो वैकुंठगमनंतुहरेरनुवृत्त्यैव॥ आनतिरेववानुवृत्तिः॥ अन्यार्थेतत्रकीर्तनात्पुनःस्वावसरेकीर्तनं तस्याअनुवृत्तेरत्रनिदर्शनमा ह॥ दूरेहमाइति अहंकारस्तेषांदूरे॥ हीतिभगवद्भजनस्यदोषनिवर्तकत्वात्तदाहंकारलक्षणोदोषोनिवर्ततएव॥ अनिवृत्तौतु ह॥ भजनंनास्तीत्यवगंतव्यमितिबोधयति॥ नःउपरिव्रजंतीति॥ सत्यलोकोपरिसवैकुंठलोकोवर्ततइतिबोधितं॥ येनिरंतरंहरेरनु भजनंनास्तीत्यवगंतव्यमितिबोधयति॥ नःस्पृहणीयंशीलंयेषांतादृशाभवंति॥ अतएवनउपरिगच्छंति यद्यपिवयमपि वृत्तिंकुर्वंतितेषुदूरात्सात्विकस्वभावाःभवंतीति॥ नःस्पृहणीयंशीलंयेषांतादृशाभवंति॥ अतएवनउपरिगच्छंति यद्यपिवयमपि हरेरनुवृत्तिंकुर्मः तथापिअस्माकंनतदेकस्वभावः अतएवनदूरेहमाः अतएवतेषांशीलंस्पृहणीयंतेषांपरिज्ञानार्थंलक्ष

यच्चव्रजंत्यनिमिषामृषभानुवृत्त्यादूरेयमाह्युपरिनःस्पृहणीयशीलाः॥ भर्तुर्मि
थःसुयशसःकथनानुरागवैक्लव्यबाष्पकलयापुलकीकृतांगाः २५ ॥

णामाह॥ भर्तुरिति॥ सत्यत्रापिपरिपालकः तेनदेहादिनिर्वाहचिंतापितेषांनास्तिअन्यथानिर्वाहोपिनभवेदितिच॥ मिथइति रसाविर्भावार्थमुक्तं॥ सुयशसइतिविषयोत्कर्षः॥ लौकिकानामपियशःकीर्त्यते॥ यशःकीर्तनेधर्मोभवतीतीदंपुनर्यशोधर्म ज्ञानभक्तिजनकत्वात्सुयशोभवति॥ अतएवकथनेअनुरागःकथानुरागेणैवकथयंति॥ ननुनिर्बंधेनफलांतरेणवाकथ नं सोप्यनुरागःनासक्तिमात्रंकिंतुसफलंसलक्षणंचेत्याह॥ वैक्लव्येति॥ अनुरागेणशरीरेवैक्लव्यंजायते॥ सर्वकार्यासामर्थ्यं भवति इदंफलं॥ लक्षणद्वयमाह॥ वाष्पकलयापुलकीकृतांगाइति॥ बाष्पाणांकलाउत्तरोत्तराभिवृद्धिः अंतस्थितोभगवदानं एप० २१०
दःसर्वमेवसंसारतापंबहिःकरोतितदातस्यबाष्पाःमुखतोनिःसरंति तेषांकलयासहतयाएवकलयाप्रकाशमानाःरोमांचयु क्ताश्चभवंति अतोवैकुंठगतानांदोषःशंकनीयोयिनेत्यर्थः २५ ॥

भगवतःशक्तिप्रसीद २=

एवंनवभिर्निर्दुष्टेवैकुंठेस्वतोनिर्दुष्टाःसनकादयःपरमंदोषंकृतवंतइतिमहदाश्चर्यमितिवक्तुमाह तद्वीति॥ तद्वैकुंठंयोगमा याबलेनापुरितिसंबंधः॥ भक्त्यैवगंतंतत्स्थानंहितकरंभवतिनतुस्वयोगबलेनगतं॥ तत्रापिसर्गकर्त्रीयायोगमायातयासृष्ट्य र्थंनीताःकथमनर्थंकरिष्यंतीतिभावः तद्भक्त्यैवगंतव्यमितिवक्तुंविशेषणमाह॥ विश्वगुर्वधिकृतमिति॥ विश्वगुरुणावे दादिप्रवर्तकेनअधिकृतमधिष्ठितंगुणैःस्थानेधार्ष्ट्येणनगंतव्यं॥ नापिरिक्तहस्तादिना किंचतत्स्थानंभुवनैकवंद्यंनतु

तद्धिश्वगुर्वधिकृतंभुवनैकवंद्यंदिव्यंविचित्रविबुधाग्र्यविमानशोचिः॥ आ
पुःपरंमुदमपूर्वमुपेत्ययोगमायाबलेनमुनयस्तदथोविकुंठं २६

पदाआक्रमणीयं॥ तथासत्यनर्थोपिवेदेव किंच दिव्यंतदलौकिकंलौकिकप्रकारेणनगंतव्यं॥ अतएवविरक्तानामपि लौकिकदृष्ट्यागमनेदोषोत्पत्तिः किंच विचित्रविबुधाग्र्यविमानशोचिः॥ विचित्राणियानिविबुधाग्र्याणांविमानानितैः शोचिःकांतिर्यस्य॥ ब्रह्मादयोपितत्स्थानंपदाअस्पृष्ट्वाअलौकिकानिविमानान्यारुह्यआलोकितास्थिताःतस्योत्कर्षसंपाद ७१३
यंति॥ विमानानांविचित्रताछंदोमयत्वादिना॥ नहितादृशंयथाकथंचिद्गंतव्यं एवंचतुर्विधोत्कर्षसहितंविकुंठंक दापिभंगरहितंस्थानमुपेत्यवापुर्दमापुः॥ तस्मालौकिकोधर्मःतैरपिप्रत्यक्षीकृतइत्यर्थः २६ ॥ २६

Indira Gandhi National
Centre for the Arts

त॰मु॰१५
२११

र्सहियोगमायाभगवतास्वच्छार्थमाज्ञप्तास्वयंसृष्टिंविधायतद्दर्शनार्थंभगवंतमाकारयितुंमीताताद्वारपालकौउपायेनतत्रनेतुंमु
नीनानीतवती बलाद्भगवतातयोर्द्वारपालकत्वंदत्तंतौचेद्भूमिपालकौभवतः॥तदाभूमिर्द्वारंभवेत् तदाभूमिमध्यात्द्वारत्व
सिद्ध्यर्थंभगवानाविर्भवेत्तदास्वरूपंपश्येतदितिगूढाभिप्रायेणतान् नानीययत्कर्तव्यंतत्कृतवतीत्याह॥तस्मिन्नतीत्येति॥त
स्मिन्वैकुंठेषट्चकरूपाःअतीत्यमुनयःसप्तमायांदेवावचक्षतेतिसंबंधः॥मुदमपिप्राप्यतन्माहात्म्यंदृष्ट्वातामप्यनुभूयमाया
मोहवशात्तौक्रोधदृष्ट्यादृष्टवंतःकरूरक्रूरकसहितद्वाराणि॥तत्रविरक्तत्वात्ऐश्वर्यादिषड्गुणप्रतिपादिकाःवैराग्यंताः
अतीताःभक्तिःसप्तमीभक्त्याश्वेतद्व्यतिक्रम्यगच्छेयुः॥तदभावात्तत्रक्रूरकौदृष्टौ॥असज्जमानाइतिषट्चकरूपातिक्रमेहेतुः॥समान

तस्मिन्नतीत्यमुनयःषडसज्जमानाःकक्षाःसमानवयसावथसप्तमायां॥देवाव
चक्षतगृहीतगदौपरार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ॥२७॥

वयसावितिवृद्धिक्षयहेतुकालाभावयुक्तौ॥वैकुंठेकालस्यानियामकत्वात्॥कालस्यतुल्यत्वेनतन्मेर्यकर्मस्वभावयोरपितुल्य
ता॥अथेतिभिन्नप्रक्रमे॥तेषामप्यसज्जमानतागता॥एतयोरपिपूर्ववदनिवारकत्वंगतं॥सप्तमायामिति॥नेयंपूरणीकस्तेतिज्ञा
पनार्थंडीप्प्रत्ययाभावः॥सप्तम्यप्येषाप्रथमाभवति॥तत्रात्ययोनालीतिसाधिकरणत्वेननिर्दिष्टा॥देवाविति वस्तुतएतेषाम
प्युपास्यौ एतेतत्तुल्याःतथामुनयइतितेषांतत्रगमनं॥किंच॥एतौगृहीतगदौ॥आत्मयःएतदधीनः तेनदैत्यनिवारणस
मर्थौ ततत्वयोरन्याकरणेकृतार्थाएवभवंति॥किंचभगवत्सारूप्यमपिप्राप्तौतावनुवर्णयतिपरार्ध्येति॥परार्ध्यानिकेयूरकुं
डलकिरीटानिहस्तकर्णशिरोभूषणानि॥अनेनतयोःकर्माणिसिद्धानि सांख्ययोगौज्ञानंच॥आत्मस्तुतदधीनएवेतिमत्स्त्वा
देत्यत्रयःस्वतःसिद्धः तैरपिविटंकौवेषौययोःतैरलौकिकप्रकारेणभगवद्द्वारपालकयोरपवेषौतयोःकर्मादिकमपिभक्त्युप

भूषणेक्तत्वात्

विलक्षणोविटंकःस्यादितिविश्वः१=

काटिकर॰=

एम॰
२११

किंच॥मत्तद्विरेफइति॥मत्तद्विरेफवनमालिकयानिवीतौ॥तयोःचतुर्विधान्यपिकर्माणिसिद्धानि॥उत्पत्तिस्थितिप्रलयामोक्षश्चे
ति॥लौकिकानिवैदिकानिदिव्यानिभगवदीयानिच॥तैःसंबद्धातयोःकीर्त्तिर्वनमालातामनुवर्णयति॥मत्ताद्येद्विरेफाःभ्रमराःद्विरे
फशब्दोरूढःसर्वेषांशीघ्रप्रतीतेः॥अन्यथाप्रतीतौवर्वरशब्दादिक्रमशब्दोपिनप्रतीयेत॥मत्तद्विरेफसहितावनमाला रेफौत्राग्नित
त्वःलौकिकवैदिकाग्नितेजोवह्निदसहितावनमालासापिप्रेमसंबंधात् मत्तभ्रमरैरिवसंवद्धा॥वनमालिकयेति॥ताभ्यांवनमाला
शोभा॥तयानिवीतौकंठलंवितौ॥साकीर्त्तिःतत्कर्मसहितेतिवक्तुंअसितचतुष्टयबाहुमध्येविन्यस्तयेत्युक्तं॥अनेनतयोर्हृदयेभ
गवान्वनमालाकमलंहस्तचतुष्टयंपत्राणीतिनिरूपितं एवंविधावपिवक्रंकुटिलयाभ्रुवाउपलक्षितं॥स्फुटनिर्गमाभ्यांश्वाससहि

मत्तद्विरेफवनमालिकयानिवीतौविन्यस्तयासितचतुष्टयबाहुमध्ये॥
वक्त्रंभ्रुवाकुटिलयास्फुटनिर्गमाभ्यांरक्तेक्षणेनचमनाग्रभसंदधानौ॥ २८

निविष्टो

ताभ्यांनासिकाभ्यांसहितंरक्तेक्षणेनचमनाग्रभसंक्रोधसहितंदधानौ॥एतावद्रूपंभगवत्सारूप्यातिरिक्तंमाययाकृतं॥वक्त्रं
दधानाविति भक्तिमार्गनिविष्टौ॥तत्रदोषत्रयंकामादिरूपं॥कुटिलाभ्रूःक्रोधस्यसूचिका॥नासिकाद्वयवायोःएतेनप्रवेश
नीयाइत्यंतःस्थितभगवद्दर्शनलक्षणमहाधनलोभेनचिंतयाश्वासौ तयोःस्फुटनिर्गमोलोभस्यसूचकःस्वस्याधिकारंमत्वास्व
यंपूर्णकामोभूत्वाकामितःसपदार्थःएतेषांमाभवत्विति कामभूलकःक्रोधसूचकःअरुणोरक्तिमा॥त्रिभिर्दोषैःकृत्वाम २८
नाग्रभसंउत्तरलंमुखं॥अतएतयोःभक्तावंतरायभूतंदोषत्रयंजन्मत्रयंसंपादयिष्यति॥मनाक्चसंरंभःतद्वहेलया

इषद्रोषावेषं१=

Indira Gandhi National
Centre for the Arts

त॰ सु१५
२१२

एवं तयोः गुणदोषौ निरूप्य मुनीनां गुणदोषान् निरूपयति द्वार्येतयोरिति ॥ ज्ञानमार्गे अविषमदृष्टिः शंकाभावः मननं आ
त्मज्ञानं चेति ॥ चत्वारो गुणाः ते यदि भगवन्माहात्म्यज्ञानपूर्वकाः ॥ तद्धर्मे चादरयुक्ताः तदा भक्तिमार्गेपि गुणा भवंति ॥ लौकिक
दोषनिवृत्त्य र्थमेव ते ज्ञानमार्गे गुणत्वेनोक्ताः ॥ अधिकृतयोः उल्लंघनं भगवतः स्थानस्य साम्यदर्शनं अंतरंगबहिरंगयोः तुल्य
तया ज्ञानं ॥ तद्गता साधारणगुणगणानं चेति चत्वारो दोषाः ॥ तेन दैत्ययोनिः स्वरूपज्ञानाभावो बहुकालं गर्भवासक्लेशो यातना
वेति अनिष्टचतुष्टयं फलितं ॥ दोषाणां प्राबल्यात् मार्गांतरगुणा अपि निवृत्ताः ॥ तेन क्लेशो न दोषाय ॥ एतयोर्मिषतोरेव सतोः
तावविगणय्य ॥ द्वारि अंतरंगभूतायां निविविशुः ॥ अदृष्ट्वेति किं भगवान् करोत्यवसरो नवसरो वेति प्रष्टव्यं तं दृष्ट्वा प्रविष्टा

द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिकायाः ॥ स ८
र्वत्र तेऽविषमया मुनयः स्वदृष्ट्या ये संचरंत्यविहता विगताभिशंकाः २९

इत्यर्थः ॥ पूर्वद्वारः यथा प्रविष्टाः तथेयमपि द्वाः पुरटवज्रकपाटिकायाः इति द्वारमाहात्म्यं । पुरटं सुवर्णं तत्सहितायेवज्राहीर
काणि तैः कपाटिकेवा ॥ एवं पूर्वार्द्धे दोषा निरूपिताः मार्गांतरस्यानुगुणानाह ॥ सर्वत्रेति ॥ ते अविषमया दृष्ट्या चरंति ॥ अत
एव केनाप्यविहता इति स्वस्मिन् विद्यमानमपि ज्ञानं परस्मिन् कार्यसंपादकमिति सानुभावं निरूपितं ॥ अत एव विगता अभिशं
काः विगता अभितः शंका येषां ब्रह्मविदश्चेत् तदा दोषो न भवेत् तत्रैवेते गुणत्वेनोक्ताः । एते त्वात्मविदः सच्चिद्रूपं ब्रह्म ॥ त
त्रापि मननपर्यंतं प्राप्ताः । तदप्यात्मरूपं न सर्वदा तेषामनुभवविषयः तत्र स्वरूपधर्मयोः मध्ये परिच्छेदधर्मस्य बलि एम॰
ष्ठत्वात् परिच्छेदाहंकाररहितमेवात्मज्ञानं गुणरूपं ॥ अन्यथा संसारिणामपि तत्संभवात् मोक्षः स्यात् ॥ आत्मा हि भगवद्वि २१२
भूतिरिति विभूतिमत्समीये परधर्मं न त्यजंतीति न तेषामस्यत्र प्रक्रमतिः २९ ॥

एवमेतेषां गुणदोषान् निरूप्य यथाक्रममतिक्रममाह ॥ तान्वीक्ष्येति ॥ तत्र प्रथमं द्वारपालकृतातिक्रमो निरूप्यते । तत्र तयोः सह
जत्वात् तेषां निवारणे हेतुः । वातरशनानिति ॥ ते हि दिगंबराः ॥ बालका अपि कटिसूत्रवंतो भवंति ॥ अत एवैतेषां रशनानि
षेधः भ्रांता इव तद्दृष्ट्या प्रतीता चत्वारोप्येकविधा इति आश्चर्यमपि ॥ कुमाराः पंचवार्षिकाः ॥ कालेन तेषां शरीरस्य कौमारप
र्यंतमेव भोगः कृत इति ॥ उत्पत्तिकालविचारे तु ते वृद्धाः परार्द्धमितायुषः ॥ ब्रह्मकल्पएवोत्पन्नाः ॥ अत एव दशार्द्धवयसः पं
चवार्षिका इति केचित् ॥ तेषां यामानुषदशापरार्द्धद्वयपरिच्छिन्ना तत्रार्द्धवयसः । एकस्य परार्द्धस्यातिक्रांतत्वात् तेषां ज्ञानवृ
द्धत्वमप्याह ॥ विदितात्मतत्वानिति ॥ विदितमात्मतत्वं यैरिति वेत्रं लकुटविशेषः चकारान्मुखेन च ॥ अस्खलयतामिति ॥
यथा ते स्खलिता भवंति तथा ऽग्रे दंडः प्रसारित इत्यर्थः । एवं कर्तुमनुचितास्ते इत्याह ॥ अतदर्हणानिति तत्स्खलन

तान्वीक्ष्य वातरशनांश्चतुरः कुमारान् वृद्धान्दशार्द्धवयसो विदितात्मतत्वान् वे
त्रेणचास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ३० ॥

नार्हंतीति ॥ ते हि स्थिरीकृत्य वा प्रष्टव्याः विज्ञापनेन वा अनवसरो ज्ञापनीयः ॥ तदुभयमकृत्वा स्खलनमेव कारितवंतौ ॥ तावि
ति पूर्वोक्तौ दोषसहितौ निरूपितौ ॥ तेजो विहस्येति ॥ सर्वथा नाहानात्र चाकरणं । किंतु ज्ञात्वैव ॥ यत्तेषां ज्ञानं सर्वपरित्यागल
क्षणः स्वधर्मः देहाद्यभिमानाभावश्च तत् तेजः तत् विहस्य ॥ दोषत्वेन पाखंडित्वेन वा तद्गणनं विहसनं ॥ तदविगणय्य
तेजः कृतं धार्ष्ट्यं दोषं मत्वा तत्र दंडचिकीर्षा हास्ये हेतुः ॥ न तु कौतुकमात्रं ॥ अत एव भगवतः प्रतिकूलं शीलं ययोः ॥ अ
नेन स्वाभिसेवकधर्मोपि तयोर्न सिद्ध इत्युक्तं ॥ सर्वं तु भगवत्प्रतिकूलो धर्मः । दैत्यधर्मत्वात् ॥ अत एव प्रतिकूलपदं ॥
शीलमिति तत्कर्मस्य दुर्लभ्यतामस्त्विता ॥ ३० ॥

Indira Gandhi National
Centre for the Arts

तमु० १५
२१२

एवंतयोरतिक्रममुक्त्वामुनिकृतातिक्रममाह॥ताभ्यामिति॥ताभ्यामितिचतुर्थीतयोरर्थेशापमूचुरित्यर्थः॥शापमितिनोक्तंविचारएवैक मग्रेवक्ष्यमाणत्वात॥इदानीमविचारितत्वात्क्रोधेनवचनमर्थात्शापरूपंभवतीतिज्ञातव्यं॥अतएवनिषिध्यमानाःमेवंशापोदेयइ तिगमननिषेधस्तुकृतएवेतिवर्त्तमानप्रयोगोनोपपद्येत॥अनिमिषेष्वनिमिषत्स्वितिदेवानामुभयसाक्षित्वंनिरूपितं॥तेष्वनिमि तिगमननिषेधस्तुकृतएवेतिवर्त्तमानप्रयोगो... तैरेवनिषिध्यमानाइतिनैकधाऽवसीयते॥तत्रतैःसर्वैरेववा॥ताभ्यामेवनिषिध्यमानाइतिताभ्यामितितृतीया वा॥वस्तुतस्तुप्रवेशनिषेधएवताभ्यांक्रियते॥वर्त्तमानसामीप्येपिवर्त्तमानप्रयोगउपपन्नः॥सुष्ठुअर्हत्तमाइतिनिषेधानौचित्ये हेतुः॥अर्हाःसदाचाराःतत्रापियथाशास्त्रंपरमहंसाअर्हत्तमाः॥तत्रापिज्ञानिनःस्वर्हत्तमाइति॥तर्हिनिषेधःकथंकृतइत्याशंक्याह हरेःप्रतिहारपाभ्यामिति॥सहिसर्वदुःखहर्त्ताअंतःप्रवेशेभगवदतिक्रमेमहान्दोषोभविष्यतीतितेनैवभगवताप्रतीहारः॥

ताभ्यांमिषत्स्वनिमिषेषुनिषिध्यमानाःस्वर्हत्तमाअपिहरेःप्रतिहारपाभ्यां॥ऊचुः
सुहृत्तमदिदृक्षितभंगईषत्कामानुजेनसहसातउपप्लुताक्षाः ३१ ॥

तद्देतियांक्रो रपालकाःरक्षिताःसर्वत्रबहवःतेषामेतावधिपतीअतोद्वारपालकानांरक्षार्थंतयोरपिरक्षार्थंनिषिद्धाइत्यर्थः॥ धेकोहेतुःतत्राह॥सुहृत्तमदिदृक्षितभंगेसतिईषत्कामानुजेनक्रोधेनतेउपप्लुताक्षाः॥तेषामात्मविदांसर्वत्रात्मबुद्धिरेव भगवत्यात्मबुद्धिर्भगवानप्यात्मविदितिसुहृत्त्वंतत्रापितद्गुणेअंतःकरणेनैर्मल्यंभवतीतिसुहृत्तमः॥स्वस्मानीप्सितज्ञान साधकत्वात्॥तस्यदिदृक्षितंदिदृक्षोदर्शनेच्छा॥यस्त्वस्मभ्यमेतावदुपकारंकृतवान्सद्रष्टव्यइतिफलस्यज्ञातत्वात्साधनेस्व ल्पःकामःदिदृक्षितस्यभंगेसतिअल्पत्वात्प्रतिबंधेभंगएवजातः॥नत्वेनतत्समाधानंकृत्वापुनर्द्रष्टव्यइतिइच्छातेषुस्थिता॥अ तएवईषत्कामस्यानुजःमहतिकामेप्रतिहतेपिक्रोधोनभवतिगोपिकानां यथेश्वरवाक्येअर्थार्थिनोवा॥तेषामपिविचा रेणोत्पन्नइत्याह॥सहसेति॥उपप्लुतानिअक्षीणियेषां॥अनेनतयोःगुणाअपितेषांनप्रत्यक्षाजाताइत्युक्तं उपप्लवः

प्रतयःसर्वेनाशरूपःस्तेषांज्ञानइत्यितस्थोकं ३२ ॥

ज्ञानमाषु १=

एम०
२१३

मित्रंभगवानतत्कर्त्तव्यंकृतं२=

भगवन्मित्रत्वात्१=

तेषांवचनमाह कोवामिहेत्यादित्रिभिः॥तयोःस्वाभाविकोदोषःस्वामिद्रोहस्तथापरःस्वर्गातरंगमित्रत्वात्तदुल्लंघनमेवच॥ दोषस्तृतीयोनात्रोक्तःमित्रकार्यपरंकृतं॥तथावचनसंदर्भात्मोक्षतेजन्मसंख्यया॥तत्रप्रथमंतयोःस्वाभाविकंदोषमाहुः॥ इहवैकुंठेउच्चैःभगवत्परिचर्ययापूर्वजन्मनिकृतयाभूमेःसकाशादिहागत्यनिवसतांभगवत्सेवकानांमध्येकोवांयुवयोरे वविषमःस्वभावः॥अस्मासुदोषबुद्धिनार्थदापुरुषद्विषामितिपुरुषद्वेषस्यनिंदितत्वात्॥केश्चित्सेव्यंकेश्चिन्नेतिकेचि

ब्राह्मणेषुसर्वभू तेषुच४=

कोवामिहैत्यभगवत्परिचर्ययोच्चैस्तद्धर्मिणांनिवसतांविषमःस्वभावः त
स्मिन्प्रशांतपुरुषेगतविग्रहेवांकोवात्मवत्कुहकयोःपरिशंकनीयः ३२

दाहुः॥तदाद्वारपालकाधिकारदानंभगवतोविरुध्येत॥आत्मीयानामपिमातापित्रोरपिअनवसरेगमनमुचितंनभव तीतिहिलौकिकार्थंतथाकरणंद्वारपालयोरुचितमेव॥तथानूतनानांउपहासःक्रोधःदर्शनंनवैकुंठवासिनामुचितं सामान्यधर्मानुरोधेनैवविशेषधर्माणांकर्त्तव्यतायाउचितत्वात् तेषांमतेसर्वकर्मज्ञानमेव॥तत्रापिभोगरूपंभक्ति मार्गस्याज्ञातत्वात॥अतोनिरंतरभगवत्सेवयात्रागत्यस्थितिर्भवतीतिमन्यंते॥तत्रापिवैकुंठेयेभगवत्समानधर्माःब्र
ब्रह्मलक्षणाःधर्मनिष्ठप्रीतियुक्ताःतेषांमध्येइतितेनैतयोःसहजवैकुंठाद्गमनंनिवा ॥

Indira Gandhi National
Centre for the Arts

त.सु.१५
२१४

रितंत्वस्समुखाद्वचनंनिःसरतीतिकोवेत्यधिक्षेपे॥कइत्यधिक्षेपेवेत्यनाह्रेवानतुत्रैविद्यात्केचनविषमस्वभावाअपिभवं
तीतिचेत्तत्राहः तस्मिन्प्रशांतपुरुषेगतविग्रहइति॥अयंविषमस्वभावःस्वार्थंभगवदर्थंवा॥स्वार्थंचेत्नयुवांभगवदी
यौ॥तत्रहेतुमाहः प्रशांतपुरुषइति॥प्रकर्षेनशांताःपुरुषायस्य॥तस्यहिसर्वेपुरुषाःशांताएवशांतिस्तुज्ञानएव॥
अतोवैषम्यंभगवदीयत्वाभीष्टोनोचितं-भगवदर्थंचनापेक्ष्यतइत्याहुः गतविग्रहइति- गतोविग्रहःकलहोयस्य।वि
शेषेणग्रह आग्रहोविग्रहोदेहोवाःदेहाभावात्नकेनाप्यनिष्टंकर्तुंशक्यं॥कलहाभावात्नकश्चित्द्विष्टः॥आग्रहा
भावात्नानौचित्यंभगवान्मन्यते॥अतोविषमस्वभावः उत्पन्नाचउपपन्नाचात्रबाधितः॥वांयुवयोःएवंतयोःवि
षमस्वभावंनिंदित्वास्वातिक्रमदोषंतयोरुपपादयंति॥कोवाआ त्मविदिति कुहकयोःवंचकयोःकोवा आत्मव
त्परिशंकनीयइतिदुष्टएवहिअन्यत्रदोषंमन्यते॥अतोयुवयोर्द्विषोलीत्यवसीयते॥परिचर्यायाहवैकुंठागमन
हेतुत्वंमन्यंते॥ननुनिःकपटपरिचर्यायाः अतःकपटेनपरिचर्यांकृत्वावैकुंठेसमागत्यअधिकारंप्राप्यस्वभावाद
धिकारच्युयथावयंतथान्योप्यत्रागमिष्यतीति यत्रैवस्वस्याधारस्यंतत्रैवविषमदृष्टिः नतुविषयपरिज्ञानादिति
तस्यपक्षस्याक्षेपःवयंतुनपरिशंकनीयाइतिभावः॥निषेधस्तुपरिशंकांगीकारेस्वस्यापिकुहकत्वंसेत्स्यतीतितस्मा
द्यंनिर्दुष्टाःयुवामेवचदुष्टोनिर्दुष्टेष्वेवदोषारोपात्॥आग्रहाविष्टबुद्धिर्नोत्तं तंयुक्तिमपेक्षते॥अस्मिन्पक्षेनसमं एम॰
घोपपत्तिः॥तथाग्रिमपक्षेप्यवगंतव्यं ३२ ॥श्रीराधावल्लभायनम श्रीगोविंदेतुअसरनवासुदेवायनमः २१४

स्वामिद्रोहमाहुः नह्यंतरमिति इहवैकुंठेमुद्रसत्वात्मकेरजस्तमसोरभावात्तत्कृतमुच्चनीचत्वमपिनास्तिकिंच॥भ
गवतिनास्त्यंतरंतेनयेज्ञानादिमंतःतेभगवद्रूपाइतितेषुभगवतिचअंतरकरणंस्वामिद्रोहः॥किंच॥समस्तकुक्षाविति॥
समस्तंकुक्षौयस्यवैकुंठवासिनः।सर्वेपूर्वंतस्यकुक्षावेवस्थिताः॥इदानीवानारायणोदरेसर्वेतिष्ठंतीति॥अतःप्रथ

नत्यंतरंभगवतीहसमस्तकुक्षौआत्मानमात्मनिनभोनभसीवधीराः॥पश्यं
तियत्रयुवयोःसुरलिंगिनोःकिंव्युत्पादितंह्युदरभेदिभयंपतोस्य ३३

मपक्षेवैकुंठवासिषुअंतरमनुचितं॥द्वितीयपक्षेसर्वेष्वेव॥तस्यसमस्तकुक्षित्वंश्रुत्यनुभवसिद्धं॥तत्रश्रुतिः
आत्मैवेदंसर्वं॥यस्मिन्निदंसंचविचेतिसर्वमितिच॥अनुभवंकीर्त्तयंति॥आत्मानमात्मनिनभोनभसीवधीराःप
श्यंतीति॥आत्मानंस्वात्मानंआत्मनिभगवति॥आत्मनश्चपुनःसर्वज्ञत्वज्ञानात्सर्वंभग ॥ ॥

Indira Gandhi National
Centre for the Arts

पद्यानि ३

तमु १५ २१५ वतिभविष्यति। स्वदृष्टांतेनवा॥ तत्रप्रथमपक्षोवादिनंप्रतिवक्तव्योनभवतीतिदृष्टांतपक्षमेवदृष्टांतेनस्पष्टयति॥
नभोनभसिइवेति यथाघटाकाशःविद्यमानेपिघटेमहाकाशएवंमहाकाशेवा॥ तथासर्वेआत्मानः सोपाधयो
पिभगवानेवंभगवतिवा॥ अत्रप्रमाणंधीराःपश्यंतीति॥ श्रुतिर्ब्रह्मवादेभगवद्वादेयन्नवादेवाप्युपपद्यते॥ तथा
प्यनुभवआत्मवादएवस्वाधीनः अतोधीरइत्येवाधिकारिविशेषणं॥ धैर्यंहिआत्मनोमहाफलत्वज्ञानात्फलां
तरेछाभावइर्वकेंद्रियादिजयः। चित्तस्थैर्यमेववाधैर्यं॥ एवंसर्वकुक्षित्वंप्रतिपाद्यतत्रापराधःक्षतइत्याह॥
यत्रभगवतिसुरलिंगिनोः युवयोःदेवानांलिंगमात्रंवस्तुतस्तुदैत्यौएव। तृतीयादेवगत्याधिकरणंसंभवतीति
नोक्तापष्ठ्यानुसदोषः तपोःसंबंधीतिबोध्यते उदरंप्रिनत्तिइतिउदरभेदीतस्यभयं॥ यदाह्येवेषएतस्मिन्नु
दरमंतरंकुरुतेअथतस्यभयंभवतीतिश्रुतिः॥ येभगवद्भावंप्राप्ताः तेउदरशब्देनोच्यंतेतेषांतरंकुर्वन्भयं श्रुतपदविवृतं ३
प्राप्नोतीत्यर्थः। उतऊहैलौकिकापेक्षयाप्यधिकंशास्त्रतोभेदसमर्थनंअरमीषत॥ भवत्यपराधेस्वामिवै राघ०
वंकरोतीतिलोकेप्रतीतिर्भवेततदाउदरभेदिनांयद्भयंतदस्मिन्नपिकृतंभवेदितियुक्तंएवंतुवांस्वामिद्रो २१५
होजातइतिहिशङ्कार्थः। सेवककृतत्वात्भगवतएवतदंगीकर्त्तव्यं॥ तथासतिभयंभवेदितिगूढाशयः
३३ श्रीराधावल्लभायनमः॥ ॥श्रीगोविंदेयनमः॥

अस्येतिमूलपदस्यविवृतं ३=

एतदनंगीकारेतुस्वामिनोभयंनभविष्यत्येवतदैतयोरेवभयंभवत्विति शास्त्रार्थसिद्ध्यर्थंभगवतिमैत्रीनिर्वाहार्थंचतयोः शापं
प्रयच्छंतितद्धामिति॥ अमुष्यभगवतः सर्वेषांपरमस्यस्वामिनः अस्मदाद्यनुग्रहार्थंविकुंठस्थानेस्थितस्य॥ विकुंठशब्देनभृद्रंसत्वं
तद्भर्तुरितिअस्मदादिसत्वस्यापिभर्तृत्वात्तस्यप्रकृष्टंकर्तुंइहास्मिन्नधैर्यंदुश्चितंतद्धीमहि॥ ध्यानेनसाक्षात्कुर्व्यामः॥ वांयुवाभ्यां
।मंदधीभ्यामिति। ताभ्यामेवचेदतिष्टंदीयतेतदाताभ्यामेवभगवतइष्टंभवतीतिचतुर्थीतृतीयेध्यानेननिश्चितमर्थमाहुः॥ लो

तद्धाममुष्यपरमस्यविकुंठभर्तुःकर्तुंप्रकृष्टमिहधीमहिमंदधीभ्यां॥ लोका
नितोव्रजतमंतरभावदृष्ट्यापापीयसस्त्रयइमेरिपवोस्ययत्र ३४ ॥

मनुष्य रक्षस ३ आसुरश
कानितोव्रजतमिति॥ अंतरभावेनयादृष्टिःकृताक्रूरातयाकृत्वोइतः अधस्तनान्लोकान्व्रजतं॥ इदंहिसत्वस्थानं॥ ततःअ
२ लोकाँदेहा: धस्तनाःरजस्तामसाः तत्रैकःकेवलंरजसःद्वितीयोरजस्तामसः तृतीयस्तामसइति॥ अवांतरलोकानांवक्तृत्वसंभवात्
त्रीनितिवक्तुंविशिंषंति॥ पापीयसस्त्रयइति॥ अस्यभगवतोरिपवः भगवदीयेद्वेषत्वेनख्याताःकामःक्रोधस्तथालोभस्तस्मा
देतत्त्रयंत्यजेदितिवाक्यात्। तेचपापीयसःसंबंधिनः नभगवदीयाःकिंतुतद्विरोधिनश्च॥ अतोभगवद्विरोधिकामादित्रयं
येषुतान्लोकानितोव्रजतमित्यर्थः ३४ ॥ ६८

विरोधिनः ३
आश्रयस्य ३=

Indira Gandhi National Centre for the Arts

त०सु०१५
२१६

पूर्वशापपर्यवसायित्वं मत्वात्कृतेति क्रमः। जाते च शापे अमूर्त्ताचाकृपादादिभिर्दूरीकर्तुमशक्यमिति तेषां प्रार्थनयैव शापोप
मिष्यतीति बुध्या तेषां प्रसादनं कृतवन्तावित्याह तेषामिति॥ शापस्त्वंगीकृतो ग्लानिहेतुर्न भवतीति तदंगीकारं दर्शितनोप्यधि
कंमावदंत्विति तेषां पदयोः पतितौ॥ इत्यमुना पूर्वोक्तप्रकारेण तेषामीरितमवधार्य तदुक्तश्चायं ब्रह्मदंड इति निश्चित्य अ
त्युग्रो श्चानिवारणं मत्वा हरेरनुचरावपि तेषां पदयोः अपततां॥ तत्रापि पादग्रहो तेषां पादानुग्रहीत्वात् तत्र पतितावित्यर्थः॥
समय इति विलंबे पुनः शापः भगवद्दंडो वा भवेदिति भयाद्वा ततो निर्गतेति॥ हरेरनुचरावितिभगवदभिप्रायाभिज्ञौ॥ स्थानांत
रेगमनमत्परिष्टमिति स हि सर्वदा हरिः अन्यत्र दुःखहर्ता कोपि नास्तीति तेषां वा मनसि ज्ञातं दुःखं दूरीकर्तुं तथा कृतवंतौ
यत एतयोः स्वामी हरिः किंचरहविमतः अधिकं च भयं प्राप्तवंतौ इत्यर्थः तदेव ज्ञात इति॥ अतिकातरेणेति तेषां दयोत्पा
तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्रपूगैः॥ सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामति
तिकातरेण ३५ भूयादघोनि भगवद्भिरकारि दंडो यो नौ हरेत सुरहेलनमप्यशेषं। मा वोनुतापकलया भगवत्स्मृति
दनार्थ स्वस्य दैन्यं ख्यापितवंतौ ३५ एवं चरणयोः पतित्वा एकं प्रार्थ्य घ्नो मोहो भवेदिह तु नौ व्रजतोरधोधः ३६ ॥
र्थयतः॥ भूयादघोनीति॥ अधोनिपातसहितं भगवद्भिः यो दंडः कृतः स भूयात् तथाकथने हेतुः यो दंडः नौ आवयोः सुरहेलनंम
वद्वयंभगवद्देवतावत्तां च अशेषं सर्वमेव हरेत॥ यदि तद्दत्तशापो नांगीकृतः स्यात्तदावरमपि न मयं छेयुरिति तदंगीकर
णप्रार्थनामाह तु मावोनुतापकलयेति॥ वो युष्माकं यो नुतापः हि थैव शापो दत्त इति तस्य कलया लेशेन नौ आवयोः अधोधः
व्रजतोरपि मोहो मा भवतु काम क्रोध लोभैः नरक एव भवति मोहेन संसारो भवति अतस्तत्प्रार्थनमुचितमेव॥ जायमानोपि
मोहः आवश्यकत्वात् तत्तज्जन्मनि भगवत्स्मृतिघ्नो मा भवेत्॥ किं तु जायमानमप्यज्ञानं मोहात्मकं भगवत्स्मरणमेव सं
पादयतु। न पुनः इह भगवति मोहो भवतु॥ भगवद्वैरभ्यं मा भवत्विति व्रजतं इति भगवैवद्वाक्यात् फलं शीघ्रमेव भविष्यतीति ज्ञा

ब्रह्माघाःसु२५

चितं तथाप्युत्तमपि भवतीति प्रार्थनायां भावः। अधो
धः इति। दिष्टं हि ... इत्यादि क्रमाभिक्रुष्टाः तेऽमोघिमत्
थ्या इति॥ एकस्मानामपि द्वैवयोनित्वात् ३६ ॥

त०प०
२१६

विचिंतनेन १ः

एवं प्रार्थितेपि प्रसादे अंगीकारेण दत्तेपि हा कृपार्दानं पश्चात्तापव्याकुलानामुचितमेव॥ विवेके न सर्वप्रतिरोधो वा। एवं सति सर्वनि
र्धारणार्थं भगवानागत इत्याह॥ एवं तदैवेति॥ एवं सति तदैव भगवान्विबुध्य तस्मिन्स्थाने यया वितिसंबंधः॥ तदैवेति न ज्ञापनापे
क्षातेत्र हेतुः भगवानिति॥ तर्हि पूर्वमेव कथं न प्रतीकारं कृतवानित्याशंक्याह॥ अरविंदनाभ इति। सृष्टिजनको यं यतः कमलना
भः अतः पूर्वं न कृतवानित्यर्थः॥ तत्रैवं संदेहः किं भगवता मुनीनामपराधो बुद्धः आहोस्वित्सेवकयोरिति॥ उभयत्र युक्तौ नांस
भवात्॥ तत्र निर्धारणार्थमाह॥ स्वानां विबुध्य सदतिक्रममिति॥ स्वसेवकानामेवापराधः यतः सतामतिक्रमः कृत इति॥ अनेन
प्रथमापराधस्तयोरिति सूचितं॥ लोकेपि यः प्रथममपराध्यति स दंड्यः॥ ननु तेषामेव कथं नापराधः यदृष्ट्वैव प्रविष्टा इति तत्रा
ह॥ आर्यहृद्य इति॥ आर्याः सन्मार्गवर्तिनः मर्यादायां श्रेष्ठाः तेषां हृद्यः यस्य अतो भगवदर्थं तः करणे तेऽचं न इति तेषां मागमनं
नापराध इति॥ आर्याणां हृद्यो वा अतोप्यागमनं तेषामुचितमेव॥ तस्मिन्स्थाने ययौ॥ उभयोः कृतिसमर्थनार्थं॥ यत्सेवकाभ्यां
एवं तदैव भगवानरविंदनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः॥ तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीय
चरणौ चलयन्सहश्रीः ३७
निवारितास्ते पुनः अंतः प्रवेशयितुं न युक्ता इति स्वयमेव तत्रागतः न त्वाकारितास्तेन वा पश्चात्तेसमागताः चरणौ चलयन् तत्रागतः एवं सत्फभयेषां खेदो भवेत् सेवकानामु
नीनां सत्कृतावा तेषामपि चरणारविंददर्शनाकांक्षावर्त्ततइति चरणावेव चालयन्तत्रागतः एवं सति परमहंसाश्च ते महामुनयश्च परमहंसा इत्यनेन धर्मनि
चितस्वखेदः मुनीनामपि परमहंसमुनीनामन्वेषणीयो तो चरणाविति परमहंसाश्च ते महामुनयश्च परमहंसा इत्यनेन धर्मनि
ष्कर्षः उक्तः महामुनीनामिति ज्ञानोत्कर्षः उभयोत्कृष्टानां विशिष्टस्यैव भगवतः चरणावन्वेषणीयौ भवतः कांडद्वयार्थस्य सिद्ध
त्वात् भक्तिरेवावशिष्यत इति चलयन्निति॥ चालयन्नित्यर्थः॥ सहश्रीः लक्ष्मीसहितः॥ तयापि सहागमनं तथा तस्याः स्थितत्वा
न वसरत्वमिति॥ सा पुनर्बहिरप्यानीता तेन सेवकानां खेदः॥ अनवसरबोधात् मुनीनां लक्ष्म्याः संतोषार्थमिति केचित्॥ कदाचिल्ल
क्ष्मीगर्वे जाते तन्निरहंकारार्थं लोकांतरं परिकल्प्य तत्र जयविजयौ द्वारपालकौ निवेश्य स्वयं प्रविष्टः ताभ्यां लक्ष्म्या निरोधं कारितवा
न् ततः प्रभृति तस्याः मनसि तयोरत्वरसोस्तीति केचित् ... सुदर्शनाभ्यागतानी सा

तथाहि ३७

न-सु१५
२१७

समागतंभगवंतंवर्णयति। तंत्वागतमित्यादिपंचभिः पूर्वंवैकुंठवर्णनायांभगवान्नवर्णितइतिपंचविद्याप्रवर्त्तकत्वेनात्रवर्णितः। स जयादिवृत्२
मागमक्रियायुक्तंसमागमनहेतुकं समागत्यस्थितंचापिदृष्टंनतमितिक्रमः १ तत्रसमागच्छंतंवर्णयतितंत्वागतमिति॥ तंभगवंतंसे
वकवत्रभवतीतितुशब्दः॥ आगतमितिदृष्टिपर्यंतंशीघ्रमेवसमागतं॥ स्वपुंभिःस्वसेवकैःप्रतिहतमग्रेस्थापितंगमनेपथिकंपा
दुकादियस्तंतयोश्चरणपतितत्वात्तेमुनयएवाचरुत॥ तैःपूर्वमपितथैवत्हृदयेदृष्टंतेतथापिइदानींअत्रविषयंअचरुत॥
सहिस्वेच्छयाअचरुर्विषयोपिचरुर्विषयोजातः॥ तेषांप्रत्यभिज्ञामाह॥ स्वसमाधिभाग्यमिति॥ स्वस्यसमाधिंभक्तइतिसमाधे
र्वाभाग्यं॥ कदाचित्समाधौएवंभूतोभगवानाविर्भवतितदासमाधेर्भाग्यंभवतीति॥ एवंसमाधावपिदुर्लभः इदानींचरुर्विषयो

तंत्वागतंप्रतिहृतौपयिकंस्वपुंभिस्तेऽचरुतांक्षविषयंस्वसमाधिभाग्यं॥ हंस
श्रियोर्व्यजनयोःशिववायुलोलभ्रुभ्रातपत्रशशिकेसरशीकरांबुं ३८ ॥

जातइतितेषांभाग्यं॥ समागमेऽप्रमाभावायछत्रेणचामराभ्यांचसहितंवर्णयति॥ हंसस्येवश्रीर्ययोः॥ उभावपिश्वेतौचामरौ रत्नदं चामरयोस्त्रियां१
डौअग्रेनम्रौनम्रपुच्छाविवभासेते। तयो र्व्यजनयोर्यःशिवोवायुः तेनलोलाः शुभ्रंचयदातपत्रंछत्रंसएवशशीअमृतस्रावीचं
द्रः तस्यकेसराः अमृतविंदुयुक्तकिरणइवपरितोबद्धाः मुक्तमालाः तद्गतामुक्ताएववायुनालोलाः शीकरांबुप्रायाः भवंति॥ शी
कराः अल्पकणाः वायुनाभगवंतमलंस्पृशंति॥ अतःशीकरांबुत्वं॥ अत्रांबुपदंशैत्यसूचनार्थं॥ सर्वत्रैवशीकरएवअजलप्राया
जाताइतिवांबुपदं॥ केसरपदेनसौरभ्यंलक्षितं मांद्यंशैत्यंसस्टं॥ शशित्वात्तापहारित्वंसिद्धं॥ अंबुत्वात्तत्वापि॥ आतप ८५०
त्रत्वादेवछाया॥ हंसत्वात्लीलाजनकत्वं॥ कल्याणोवायुरितिउत्कृष्टसर्वगुणोवायुरत्रनिरूपितः॥ अतएवव्यजनयोःसंबं २१७
धीउक्तः॥ अन्यथामहाभूतोवायुःचालनेनाभिव्यक्तोभवेत्॥ सचकालादिधर्मरहितइतिननिसर्गःतंशीतलः ३८ ॥

प्रकृतेप्रसादसुमुखतांकृत्स्नपदेन४

एवमागच्छंतंवर्णयित्वातस्यागमनहेतुरूपंवर्णयति॥ कृत्स्नप्रसादसुमुखमिति॥ भगवतोवैकुंठेस्थितिः वैकुंठनिर्माणंविवाद
स्थानेसमागमनंचसर्वेषामुपकारार्थं॥ ब्रह्मांडेयदिवैकुंठस्थानंनभवेत्तदाब्रह्मादयःकुत्रगत्वानिवेदयेयुः॥ यदिवातत्रभगवा
न्नतिष्ठेत्तदानिवेदितेकार्येकथमवतरेत्यदिवातत्रभगवानागच्छेत्तदाकथंसर्वसमाधानंभवेदितिअतःसंपूर्णएवब्रह्मांडेये
वर्त्ततितेषांप्रसादार्थंसुमुखं अनेनभगवदागमनंकस्यापिनापकारिमुनीनांजयविजययोश्च॥ अंगमित्यस्यसर्वाणिविशे वक्ष्यमाणस्य१८

कृत्स्नप्रसादसुमुखंस्पृहणीयधामस्नेहावलोककलयाहृदिसंस्पृशंतं॥ श्यामे
पृथ्वावुरसिशोभितयाश्रियास्वश्चूडामणिंसुभगयंतमिवात्मधिष्ण्यं॥ ३९ ॥

षणानि॥ स्पृहणीयधाम॥ स्पृहणीयंधामतेजोयस्यदीपादिकांतिःसर्वेषांनस्पृहणीयानापिसर्वदा॥ इदंत्वानंदरूपमि
तिस्पृहणीयत्वं-धामपदंकांत्यैवानंदजनकमिति- अनेनपर्यवसानविचारभावेपिदर्शनेनापिसर्वेषांप्रसादहेतुर्भव
तीत्युक्तंकिंच॥ स्नेहावलोककलयाहृदिसंस्पृशंतमिति॥ कालांतरेफलदानं दूरेतिष्ठतु॥ इदानीमेवस्नेहपूर्वकंयदव
लोकनंकरोतितस्यावलोकनस्यएकदेशेनापिभावितेनभगवा ॥

त॰सु॰१५
२१८

नत्हृदयेनिविशति॥कलयासहवात्हरिसम्यकूस्पर्शतं॥अनेनसर्वेषांहृदयेतापापनोदोज्ञानजननंचसूचितं॥एवंविशेषण
नत्हृदयेनिविशति॥कलयासहवात्हरिसम्यकस्पर्शतं॥अनेनसर्वेषांहृदयेतापापनोदोज्ञानजननंचसूचितं॥एवंमंगमात्रस्यैवगुणानुक्त्वाआभरणानामुपयोगमाह॥श्यामे
त्रयेणकार्यतोवहिरंतश्चसर्वसुखदायिभगवदंगमित्युक्तं॥एवमंगमात्रस्यैवगुणानुक्त्वाआभरणानामुपयोगमाह॥श्यामे
इत्यादिना श्यामवर्णेवक्षस्थलेकषयाबाणेसुवर्णरेखेवश्रीवत्सेयालक्ष्मीः तयाकृत्वाल्वचूडामणिंवैकुंठंसुभगयंतं
सौभाग्ययुक्तंकुर्वंतंआत्मधिष्ण्यंस्वस्यनिवासस्थानं॰ भगवान्यतश्रीवत्सोकलरूपेणस्वस्यासाधारणरूपंगृहीत्वाति
ष्ठतितद्वैकुंठशोभार्थं॥अन्यथातादृशंरूपंकिमर्थंगृह्णीयात् सर्वस्यापिजगतःशोभास्वर्गः तस्यापिमुकुटमणिःवै
कुंठः तस्यापिशोभावक्षस्थलस्थितलक्ष्म्या॥अनेनलोकवत्स्थानादिसौंदर्येणभगवत्सौंदर्यंनकिंतुभगवतएवसर्वंसुं
दरंभवतीतिनिरूप्यते॥वैकुंठस्यशोभांकुतोजनयतीत्याकांक्षायामाह॥आत्मधिष्ण्यमिति॥इवेत्यनेननैतावदेव
प्रयोजनंकिंतुअन्यदप्यस्तीतिसूचितं॥श्रियाविनानह्यपिशोभा॥साचचंचलेतितस्यारमणार्थंश्यामंशृंगाररूपं
स्थूलमालिंगनयोग्यं तस्याःस्थानंदत्वात्उरःस्थलमासनंकृतं हृदयेहिसर्वस्यसुखं॥सर्वमेवभगवद्धृदयेवर्त्ततइ
तिसर्वस्यापिसुखमपिजनयति॥इदमपिवचनमात्रं॰वस्तुतस्तुब्रह्मांडमध्येआनंदोऽभिव्यक्तस्तिष्ठतिभगवद्रूपंते स्म॰
नसर्वंसुखितमिति एवंश्रीवत्सस्यप्रयोजनमुक्तं ३९ ॥श्रीगोविंदायनमः ॥श्रीगोपालायनमः ॥ २१८

पीतांबरादीनांप्रयोजनमाह॥पीतांशुकइति॥पीतमंशुकंयस्यएतादृशेस्थूलनितंबयुक्तेकटितटेपीतांबरेपरिविस्फुरंत्याकांच्याभ्रमरैर्विशे
षेणहतयावनमालयाचआत्मधिष्ण्यंसुभगयंतमितिसंबंधः॥आत्मनःस्वस्यपुरुषोत्तमस्यधिष्ण्यंजगद्रूपंवा॥पीतमंबरंवेदः तद्भूमौप्र
सृतंयज्ञादिद्वाराहृदयादि॰शुद्धंसंपाद्यआत्मनामात्मनोवाधिष्ण्यत्वं॥धिष्ण्यमंतःकरणादिकंवाशोधयंत॥नितंबाःहिमालयादिसमीपभू
मयःतेपृथवःसर्वफलजनकत्वात्कर्मभूमिरूपाःतद्यदिभगवानाधिदैविकेरूपेपीतांबरंस्थापयतितदैवात्रवेदःप्रचरति॥तदैवच
भगवतःअधिष्ठानंसर्वेषांहृदयंभवति॥तत्रविस्फुरंतीयाकांचीकांचननिर्मितंदामउपनिषदर्थरूपंतयाप्रुतएमेवमहतांहृदयमधि
ष्ठानंभवति विस्फुरंत्येतियोगादिसहितया॥यद्येतादृशीब्रह्मविद्यानभवेत्तदाकुत्रापिभगवत्स्थितिर्नभवेदिति॥वनमालयाचभगवद्गु
णकीर्त्तनरूपया॥अलयोभ्रमराःमत्स्वरहिताःषड्गुणयुक्ताः भगवद्भक्तास्तेषांगुणानांवक्तारःसत्कीर्तितभगवद्गुणव्यतिरेकेणपिनभगवा
पीतांशुकैःपृथुनितंबिनिविस्फुरंत्याकांच्यालिभिर्विहतयावनमालयाच व
ल्गुप्रकोष्ठवलयंविनतासुतांसेविन्यस्तहस्तमितरेणधुनानमब्जं ४०॥
नत्हृदयेतिष्ठति अतोमूलेपीतांबरकांचीदामवनमालानांधारणेभूमौमार्गत्रयंप्रसिद्धंतिष्ठतीत्यर्थः॥चकाराद्भगवत्कृपयाच॥उप
वीतादिरूपया॥एवंत्रयाणांविनियोगमुक्त्वावलयादित्रयस्यविनियोगमाह॥वल्गुप्रकोष्ठेषुवलयायस्य॥चत्वारोभगवद्धस्ताःचतुःपुरुषा
र्थरूपाःतत्रतत्रक्रियाःतत्तत्साधकाःहस्तरूपाःतेषांशोभाभगवतश्चतुर्मूर्तेर्ज्ञानेभवति॥वलयाःतद्भूनात्मकास्तचेत्तत्रनप्रतिष्ठिताःत
दानकोपिपुरुषार्थःसिध्येदितिपुरुषार्थसिद्ध्यर्थंवलयोपयोगः॥गरुडोहिकालात्मासभगवत्पराक्रमेणप्रतिरुद्धः॥अन्यथाभक्तानपि हस्तगतेन४=
भक्षयेत्॥विशेषेणनतायाभगवन्मायातस्याःपुत्रोगरुडःकालःसेवश्रद्धेतिवैष्णवतंत्रेतस्यांसेस्कंधेप्रालिनामहष्टेप्रवाहेवाविन्यस्तो
हस्तोयेनइतरेणेतिवचनात्भक्तानामर्थेएकोव्यापारः लोकानांश्रामणार्थंचापरइतितदाह॥इतरेणधुनानमब्जमिति इतरेणेतिवि
शेषतोभगवत्संबंधरहितानेवमोहयतीतिज्ञापितं॥अब्जंजगदात्मकंकमलं॥भगशब्दार्थवालीलाकमलंइतरेणकंपयति ४०॥

Indira Gandhi National
Centre for the Arts

तसु१५
२१९

कुंडलादित्रयस्यविनियोगमाह विद्युत्क्षिपदिति विद्युतमपिक्षिपतीयेमकराकृतेकुंडलेतयोर्मंडनमर्हंतियद्गंडस्थलंऊर्ध्वनासिकाच ताभ्यांयुक्तंमुखंयस्य॥ मणियुक्तंकिरीटंयस्येतिचशिरोद्विधावर्णितंतत्ररूपंकेशस्थानरूपंच॥सांख्ययोगौकुंडलेविद्युत्त्वंतुःकपोलद्वयं वप्रेमप्रपन्नौसांख्ययोगौतयोरंगंवेत्स्येभगवत्संरणेचोपयुज्येते॥तौचेन्मृत्स्नभिवारकौभवतःतदेवालिनशास्त्रेउपयुक्तौ॥मकरोहिज लग्राहःप्राकृतशरीरादिकंग्रहति॥तथाभिमानंशरीरंचसांख्ययोगौग्रसतः॥ताभ्यांकृतमंडनस्यअप्राकृतरूपस्ययोग्यंभवतिगंडस्थलंता दृशोएवभक्तिमपत्नीउत्पद्यते॥यतःसर्वदोषाभावानासिकास्थानेदृढ्याभवतितदाभक्तिमार्गःशोभते॥अपनिषदंज्ञानंशिरःतत्स्वाध्यंपार मेष्ठ्यंवा॥तदपिमणियुक्तकिरीटयुक्तं मणिरूपास्तत्रभगवत्स्थानेगच्छंतोभक्ताःतेचेत्तत्रनगच्छेयुःतत्पलोकस्यशोभैवनस्यात॥अतो मणिभक्तिरीटंयन्मस्तकेस्थापयतितेनभक्तास्तत्रप्रतिष्ठिताभवंति॥हारस्यप्रयोजनमाह॥दोर्दंडखंडविवरेहरतापरार्ध्यहारेणेति दो र्दंडाश्चत्वारःतेषांखंडंसमूहःतस्यविवरेमध्येहरताहरतीतिहरन्मनोहरेणत्रैलोक्यशोभांवाहरता॥उपलरूपेणततीया॥मुक्ताहारैः

विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखंमणिमत्किरीटं दो
र्दंडखंडविवरेहरतापरार्ध्यहारेणकंधरगतेनचकौस्तुभेन ४१ ॥

मुक्ताःसर्वेहरणएवेतितेहिस्वसंघातंहरंतितेषांसमूहोहारतेचास्मिन्ब्रह्मांडेपरार्धाःपरंब्रह्मणआयुःतदर्धमूल्यंयेषांब्रह्मणाऊ त्यन्तिरूपणमारभ्यतत्समाप्तिपर्यंतंब्रह्मांडांतरेकृतपुण्यपुंजायेतेपरार्धाः॥परार्ध्येतिपाठे अस्मिन्नेवब्रह्मांडेपूर्वोक्तन्यायेपरार्द्धमायुःहरं तीतिपरार्ध्याःतेचतेहरश्चेतितेभगवतामहताप्रयत्नेनसंरक्षिताःतेभ्यःपरितोदोर्दंडाःअशक्यप्रतीकारदोषनिवृत्त्यर्थपुनःविवरेस्थापि ताःदोषांदंडत्वंबाधकत्वेनसमागतानांप्रहरणार्थं॥ननुरत्नमात्रार्थत्वं एवंहारविनियोगमुक्त्वाकौस्तुभविनियोगमाह॥कंधरःकंठः कंशिरोधारयतीतिसुखधारकश्चतऊतेनकौस्तुभेनाप्युपलक्षितः॥कौपृथिव्यांस्तोत्रेणभांतीतियेभगवद्भक्ताःमुक्ताःचेत्यस्यतत्वात्म काःतेषांसमूहःकौस्तुभंतेचानंदधारकेयोजिताः॥कौस्तुभंचेद्भगवान्नस्थापयेत्।भक्तानांब्रह्मानंदोनस्यात्।चकारादन्यदपिकंठा भरणंलक्ष्यते॥गोपिकादितत्वरूपं यथास्थितचकाराच्चवहृत्स्थलेपिकौस्तुभस्यस्थितिर्बोध्यते॥तदागोपिकादीनांअन्येषांवाभ ॥ ४१

कानंदाजतत्प्रकाशकवंग्रमिकृति

एप०
२१९

एवमाभरणादीनांविनियोगमुक्त्वाअंगगतसौंदर्यस्यमाहात्म्यस्यचविनियोगमाह अत्रोपसृष्टमितिइंदिरायाःउत्स्मितंसौंदर्यग र्वोवाअत्रउपसृष्टंवत्सइवस्तनपानार्थंभगवत्सौंदर्यलेशप्राप्त्यर्थंप्रस्थापितमित्यर्थः॥इतीतिसमाप्तिसूचकं॥हस्तेनदर्शयतिच॥ त्रैलोक्यसौंदर्यंचअत्रोपसृष्टं॥चकाराद्ब्रह्मांडारंभकतमपि स्वानांतत्क्तानांनिश्चयात्मिकयाबुध्याचयद्विशेषेणरचितंध्यानादिना
उपक्षारगं१ वैकुंठपं१

अत्रोपसृष्टमितिचोत्स्मितमिंदिरायाःस्वानांधियाविरचितंबहुसौष्टवाढ्यं॥
मह्यंभवस्यभवतांचभजंतमंगंनेत्रैर्निरीक्ष्यनवितृप्तदृशोमुदाकैः ४२ ॥

भगवदंगं१

परिकल्पितं॥सौंदर्यजनितगर्वश्चोपसृष्टःसौंदर्यमेवोपसृष्टंगर्वोवा॥ततोप्युत्कर्षंप्राप्स्यतीति॥येपुनःलक्ष्म्याभगवतिगर्वप्रति पादयंति॥तेलक्ष्म्यादोषमेवकथयंतीत्यपेक्षणीयाः शंकितमपिजडदितिभक्तैःकथमेवंधियाक्रियेत॥भगवत्सौंदर्यप्राकट्यस्य यंविनियोगःस्पष्टएवोक्तः॥संस्थानविशेषस्यचविनियोगमाह॥बहुसौष्टवाढ्यमिति॥सौष्टवमवयवविन्यासप्रकारःतच्चसौष्ट वंब्रह्मणानिर्मितंलोकमल्लादिषुवर्तते॥तद्यावत्ब्रह्मणाज्ञायतेतावत्सौष्टवंतस्यत ॥ श्रीगोपालायनमः ॥ ॥ ब्रह्मणोगविषयं१-
भगवत्२ तदुल्लिखितं२ परिमितं शिल्पिनेपुराणं सौंदर्यं२-

Indira Gandhi National
Centre for the Arts

ब्रह्मलोकापरमपि२

त·मु·१४ २२० तोप्यधिकं वक्रसौष्ठवं तेन च तद्रूपमाधुर्यं तादृशमपि सौष्ठवं पूर्णमित्यर्थः॥ अनेन ब्रह्मांडे अस्मिन् ब्रह्मनिर्मितातिरिक्ता अ
पि भगवदीया बहवः पदार्था भवंतीति सूचितं॥ अन्यथा मूले तथा सौष्ठवं न प्रकाशितं स्यात्॥ एतावद्दूरे सृष्टिपदार्थानामुप
योग इति नाधिकं वर्ण्यते॥ मूलत्वख्यापनाय माहात्म्यमाह॥ महत्संभवस्संभवतां च भजं तमंगमिति महत्संभवमिति षष्ठ्यर्थे च तुर्थी
भगवत्स्वरूपस्य स्वफलत्वख्यापिका॥ एजसतामस सात्विकानामाधिदैविकादिभेदभिन्नानां सर्वेषामेव भजनीयमंगं भजनी
यमिति वक्तव्ये भजं तमिति लिंगं फलं भजनं निरूपयति॥ ये यथा मां प्रपद्यंते इति वाक्यात्॥ भजनीयमिति पाठस्तु स्पष्टः सर्वे
षां भजनीयरूपप्राकट्येन सर्व एवानीश्वरवादा निरस्ताः॥ अन्यथा प्राप्तमहाफलानां कथं भजनीयः स्यात्॥ मोक्षोपयोगिप ब्रह्मज्ञानवतां
दार्थाश्चैते तेन भवंतीति॥ अधिकारिणां कथं भजनीयः स्यात्॥ सृष्टौ च कथनं विरुध्येत॥ नित्यं च ब्रह्मादीनां भगवद्भजनं॥
अतो महत्तां तराद्यत्यर्थमेव भगवत्साकट्यमिति सर्वेषां भगवद्भजनं सूचयति तेन सनकादयो भगवंतं दृष्ट्वा तथात्वं ज्ञात
वंत इति निरीक्षणे मुरित्युक्तं॥ सर्वे विशेषास्तेषां दृष्टौ स्फुरिता इति नमनं कृतवंतः॥ नमने प्राप्तं दोषं वारयति नविन्न्वप्र दर्शनेप्रतिबंधत्पप४=
दृश इति॥ न विशेषेण तत्प्रादृशो येषां॥ नमस्कारस्य दर्शनप्रतिबंधकत्वात्त्वास्ते तेषां नरस इति नमस्कारे ज्ञापयेत् तद्धा
दृत्यर्थमविनृप्तदृश इत्युक्तं॥ ननु तथापि साधनात्फलमुत्कृष्टमिति दर्शनं परित्यज्य कथं नेमुस्तत्राह॥ मुदेति॥ सकृद्
दर्शनेन एवं पूर्णानंदे। गंगायां घट इव निमग्ना अतो मुदैव नेमुः॥ मुदैव हितेनामिताः पूर्णानंदाः चरणयोः पतिता इ ला० २२०
त्यर्थः तथापि दृष्टिर्न तृप्तेति तेषां तुच्छत्वं निराकृतं॥ कैः शिरोभिः शिरसा नमस्कारे ब्रह्मविदां ब्रह्मत्वसूचकः ४२

ज्ञानिनां स्थूलतनुबाधाति तेन भुक्तत्वं१=

---

एवं कृते भगवद्धर्माः प्रविशंतीति ज्ञापनार्थं तेषु भगवद्धर्माः प्रविष्टा इत्याह॥ तस्यारविंदनयनस्येति॥ तेषां चित्ततन्वोः भगवच्च
रणसंबंधी वायुः संक्षोभं कृतवान् तच्चायुक्तं॥ यतः ते अक्षरोपासकाः आत्मरूपब्रह्मण उपासकास्ते देहेंद्रियांतःकरणाध्या
सरहिताः अतस्तेषां न कोपि क्षोभः। भक्तिरसस्तु नास्त्येव तथापि भगवत्सान्निध्यात् भगवदीयाधर्मीयप्यासहादोषं दूरीकुर्वंति
तथातिशयमप्यादधते॥ तत्र ते षु तिशयाधानसंस्कारा उच्यंते॥ तस्यारविंदनयनस्येति॥ स हि प्रसिद्धः सर्वानेव स्वापेक्षितान्
भक्तान् करोति तथैते पि भगवदपेक्षिताः॥ अनेनेच्छयैव ते भक्ताः कृता इति ज्ञापितं किंच॥ अरविंदनयनस्येति॥ कमलन
यनस्य दृष्ट्यैव ते संस्कृता इति॥ अरविंद्यतीति रविमतिरिक्तं खंडयति उपजीव्यातिरिक्तधर्मं तेषामपि द्यति दूरीकरोतीति
तेषां विरुद्धधर्मान् निवर्त्तयति॥ नयनं हि प्रापकं प्रमाणरूपत्वात्॥ अतो दृष्ट्या बाधकाधर्मा दूरीकृताः प्रयोजकाश्च स्थापिता इ

तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः॥ अंतर्ग
तः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ४३ ॥

सु·प्र·४४ तिउक्तं। किंच पदारविंदेति पदयोः स्पर्शः तेषु कृतः पद्यते ज्ञाप्यते इति पदं ज्ञानात्मकं तत्स्पर्शे तेषां विशेषज्ञानमपिगतं॥ ब
यमात्मविद एवेत्याग्रहो निवृत्त इत्यर्थः तदप्यरविंदं स्वप्रकाशकातिरिक्तं आत्मनि दूरीकरोतीति ज्ञानधर्मो निरूपितः॥ त
तस्य किंजल्काः केसराः खंडशो दोषनिवर्त्तकाः तैरौषधैरिव मिश्रो यो भक्तिनिष्ठभक्तत्वापादकशरीरजनकरजोमिश्रो वायुः
घ्राणमार्गेणांतः प्रविष्टः स्थूलशरीरनिरपेक्षमेव मध्ये शरीरमुत्पादयति तदा चित्तदेहयोः पूर्वयोः अंशतो ग्रहणत्याग
करणात् संक्षोभो युक्त एव गंधस्य हि द्वारं नासिका॥ अतः तत्रौधस्य प्रतिबंधो न जातः अयं च गंध आधिदैविक इति स्व
शब्दप्रयोगः॥ तेषां सर्वेषामेव साधनस्तुल्यत्वात्॥ अत एव चतुःसनोपि सक्कादोमतोजाताः॥ तत्र त्रिनयगता भक्तिः

गर तुलसी ४=

चतुर्दश्यामितित्यर्थः॥ तानं तेषां तामांदृत्तमिति ४२ गे१

Indira Gandhi National Centre for the Arts

त० सु० १५ २२१

ततः भक्तवत्नेप्रणामंकृतवंतइत्याह॥ तेवाइति॥ तेचत्वारोपिवैनिश्चयेनभक्त्याव्याकुलिताः भगवदीयमंघ्रिद्वंद्वंनिरुध्युः॥ भक्तिर्हि भगवत्संबंधं सर्वतः प्रापयितुंसकृदेवसर्वदेहेंद्रियादिक्षोभयति॥ तत्रज्ञानादिनानिवृत्तिः॥ अन्योन्यविरोधात्तन्नसमाधानं॥ अतः केवलंसर्वसमाधानकर्तृभगवच्चरणारविंदद्वंद्वंनिरुध्युः॥ ध्यानात्पूर्वंतेषामनिवृत्तौहेतुमाह॥ अमुष्येति॥ स्वस्यभक्तत्वंउत्पादितवतः वदनमेवासितपद्मकोशं॥ नीलकमलमुकुलमुद्वीक्ष्यलब्धाशिषोभूत्वा अनुरागदृष्टिंप्राप्यपुनरवेक्ष्यवक्रुधानमस्कारणात् बक्रुधाचमुखदर्शनंमाहात्म्यज्ञानंस्वरूपसौंदर्यंच अंतःकरणंदृष्टिंचवशीचकार॥ जीवस्तुतदुभयानुरोधीपर्यायेणतयोः समाधानंकृतवान्॥ तथापितद्द्वयंनसमाहितं॥ उभयोरेकदासमाधानाभावादेकोपद्रवः सिद्धएइव॥ असितपद्मकोशमित्यसंभृतोपमा॥ देशांतरेचतादृशकमलसंभवः॥ ऊर्ध्वीकरणेनेयनेसहेतुत्वार्थंतथोक्तं॥ तद्भिन्नसर्वकृत्यं॥ रूपतोज्ञानंतच्च असतथात्वंभविष्यतीतिख्यापनार्थंपद्मकोशपदप्रयोगः॥ सजातीयाः स्वजातीयबोधकाइति॥ कोशपदेनतकृतानांरक्तास्तुचिताः॥ ऊर्ध्वीकरणेनचर

तेवाअमुष्यवदनासितपद्मकोशमुद्वीक्ष्यसुंदरतराधरकुंदहासं॥ लब्धाशिषः पुनरवेक्ष्यतदीयमंघ्रिद्वंद्वं
णख्योः पतितास्एवतेमुखारविंदंपश्यंतीत्युक्तंसुंदरतरंयतअधरंधारण नखारुणमणिश्रयणंनिरुध्युः॥ ४४ ॥ ॥
मधिगतंकुंदपुष्पंतद्वत्हासोयस्यद्वयमेवचाशीः सुंदरत्वेनपूर्वावस्थानिवारकमायाप्रवृत्तावपिपूर्वावस्थाकृतसुखनिवृत्त्यभावउक्तः॥ तरप्रत्ययेनचाधिक्यमुक्तं॥ ब्रह्मानंदात्भजनानंदस्यमहत्वात्॥ सुंदरतरमधरंवा॥ तदातत्रपरमानंदादधिकरसोल्लासकः स्थापितइतितद्रसस्पर्शीहासः गोपिकानामिवसुखदः तस्यसुंदरतरत्वं आनंदमूर्तेररुणएनंदात्भजनानंदाच्चमहानानंदइतिज्ञापयति॥ अन्यथाकेवलमोहः अनिष्टहेतुः स्यात्॥ कुंदपुष्पसाम्यताचभौतिकरागव्याहत्यर्था मोहोपिभक्त्यर्थमेवनविषयार्थं॥ कुंपृथ्वींद्यतिखंडयतीतिकुंदं॥ एतादृशंप्रसादंप्राप्यपुनरवेक्षणंस्वहृदयेभगवच्चरणारविंदाविर्भावार्थं॥ अतएवतदीयमंघ्रिद्वयमाविर्भवच्चित्तेनगृह्यतेइतिनिरुध्युः॥ द्वंद्वपदमवताराभिप्रायं॥ साकारब्रह्मवादेनान्यथासिद्धिः स्यात्॥ तस्यचरणस्यभक्तिमार्गसिद्धस्यसर्वपुरुषार्थदातृत्वज्ञापनार्थंनखाएवयेअरुणमणयः तेषामाश्रयणंयत्र॥ तेहिचिंतामणिरूपाः अरुणवर्णानु

कृष्णदर्शनात्ते कमलायाः कृपाप्राप्तिः सर्वाभोप्यकृष्णप्रसर्वापरः

एम० २२१



एवंतेषांभक्तकृत्यमंतरुक्त्वास्तोत्रादिलक्षणंबाह्यमाहुरित्याह पुंसामिति॥ भगवतिस्तुतिर्युक्तैवनत्वसद्गुणोपभृता॥ ननुज्ञात्वाहिभगवद्गुणावक्तव्याः भक्तैरेवज्ञायंतेगुणाः एतेचपूर्वंनभक्ताइतिकथंगुणज्ञानमित्याशंक्यभक्तत्वाभावेपिपूर्वंमतेयोगिनः तत्रयोगसिध्यादिकंभगवताज्ञातमितितेनमार्गेणतादृशीमाहात्म्यंज्ञायतइतिवक्तुंयोगोपयोगित्वेनभगवंतंविशिनष्टि॥ पंचभिर्विशेषणैः॥ योगेप्रथमंध्येयंरूपं॥ अंतेचयोगसिद्धिप्रदं॥ मध्येत्रीणिरूपाणि॥ निरंतरध्यानेनतस्मिन्नादरः तदाबक्रुमतंतद्भवति॥ ततोभगवत्साक्षात्कारः॥ तदातदुक्तप्रकारकंदेहांतरपिस्वदेहांतर्हृदयेप्रादेशमात्रंद्वितीयस्कंधोक्तंपुरुषंपश्यंति॥ तदातदुक्तप्रकारतदानयनाभिरामोभवति॥ बहिर्दर्शनंदत्वाअंतरपिस्वदेहांतर्हृदयेप्रादेशमात्रं॥ योगस्यबहुविधत्वात्तत्फलदानार्थंइदमेवरूपंध्यायतइतिरेणफलंभवति॥ अवांतरफलंचाणिमादिरूपंभवतीतितत्रैवोक्तं॥ योगस्यबहुविधत्वात्तत्फलदानार्थंइदमेवरूपंध्यायतइति पुंसर्वफलदातृत्वंतस्यज्ञायतइतिवक्तुंनानाविधगतिंमोक्षरूपांवामृगयतांपुंसांध्यानास्पदंइत्युक्तं॥ पुरुषाएवयोगिनइतिपुं

पुंसांगतिंमृगयतामिहयोगमार्गैर्ध्यानास्पदंबहुमतंनयनाभिरामं॥ पौंस्नंव
पुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ४५ ॥

सामित्युक्तं॥ बहुकालंयोगंविधाययोगबलेनसार्वज्ञेजातेप्राणिनांकागतिरित्यपेक्षायांतन्निश्चयार्थमपिभगवान्ध्यायतइतिमृगयतामित्युक्तं॥ पुरुषरूपंअंतर्यामिरूपमेव॥ साक्षात्फलसाधकत्वेनतस्यैवोक्तत्वात्॥ बहुमतः अणिमाद्यष्टैश्वर्येप्रयत्नअपिस्वयंरिक्तोनभवतीतिविज्ञापनार्थंअनन्यसिद्धैरित्युक्तं॥ भगवतोऽणिमादयोनान्यत्रसिद्धाः अतः दीयमानाअपिनान्यत्रस्वतोगच्छंतिकिंत्वंशतएव॥ तत्रहेतुरौत्पत्तिकैरिति॥ नहिस्वाभाविकागच्छंति॥ अष्टभोगाअणिमादयः भनसासहवद्दृज्ञानेंद्रियसुखानिगुणवागभोगोवाअष्टभोगाः अष्टभोगैरित्यपिपाठंसएवार्थः॥ सम्यकृगृणनमग्रेस्पष्टीभविष्यति ४५ ॥

Indira Gandhi National Centre for the Arts

स्तोत्रमाहुः पंचभिः॥ योगं तर्हि तदिति॥ योगेलोके तथाभक्तो भवान्विख्यातमंगलः॥ सर्वात्मनावयं दासास्तस्मिंस्तत्र च यत्फलं १
॥ एतावत्तैवतैः स्तोत्रं कृतं भक्त्यातिविह्वलैः॥ अपराधस्य करणात्तन्नाधिकं स्फुरितं हृदि २ तत्र प्रथमं भगवंतं ब्रह्मत्वेन स्तुवंतः
शास्त्रार्थपरत्वं स्तुतिपरत्वं वा माभवत्विति पूर्वदर्शनेन यो दृष्टः स एवायमिति प्रत्यभिज्ञां वदंतः तस्यां तथ्यामितत्वं समर्थयंति॥ योगं
तर्हि तदिति॥ यः त्वं दुरात्मनां हृदि गतोऽप्यं तर्हि तः सः अद्यैव नः अस्माकं नयनमूलं नोरुद्धः न सिद्धः किंतु यत्र्यैव कर्णविवरेण तु
दयं गतः तदैव परं इष्टं न चक्षुषा दृष्ट इति नयनमूलं तदैव रुद्धः॥ ब्रह्म प्रकार द्वयेन निश्चीयते शास्त्रतोनुभवतश्च॰ तत्र शास्त्र
दुष्टानां ब्रह्म साक्षात्कारेण न भवतीत्याह न तु सत्तां साक्षात्कारो भवतीति तथा स त्यनुवादकत्वं स्यात्॥ अत उपनिषदामात्मब्रह्मवा
क्यरूपाणां अनधिकार्यसाक्षात्कार विषय प्रतिपादकत्वं॥ तदेव प्रथममत्राप्याहुः॥ यस्त्वं दुरात्मनां हृदि गतोऽप्यं तर्हि तदिति सत्य

कुमारा ऊचुः॥ योगं तर्हि तोऽहृदि गतोऽपि दुरात्मनां नः सोऽद्यैव नो नयनमूलमनं ४८
नं तरुद्धः॥ यर्ह्येव कर्णविवरेण गुहां गतो नः पित्रानुवर्णितरहो भवदुद्भवेन ४०

मेव॥ अनेन शास्त्रप्रतिपाद्यो भगवानेवेति निरूपितं स एव हृदये प्रकाशन इत्यनुभवमाहुः॥ सोऽद्यैवेति॥ बहिरिंद्रिय विषयत्वे
अनात्मत्वं स्यादिति॥ इदमप्यस्माकं चक्षुरात्मदर्शनाभ्यासवतामाहृत मेवेति न बहिर्दर्शनमिति वक्तुं पूर्वदर्शनेन सह साक्षा अंतरदृष्ट्यासंभवस्य ४-
त्वं प्रतिपादयंत आहुः॥ अद्यैव नयनमूलं रुद्ध इति। एतद्दर्शनस्य प्रथमदर्शनत्वात् अनादर एव॥ प्रथमदर्शनस्यैव अन
धिगतार्थज्ञानत्वेनादरविषयत्वात्। भक्तिमार्गानुसारेणापि अंतर्भगवत्साक्षात्कारो जात इति वक्तुं कर्णविवरेण गुहां गत इ
त्युक्तं॰ अन्यथा अंतरेव तस्याविर्भावकत्वं स्यात्। प्रविष्टः कर्णरंध्रेणेति तु भगवच्छास्त्रं॥ पूर्वमपि वयं भगवदीया एव अन्य स्म॰ २२२
था ऽस्मत्पिता ब्रह्मा भवद्रहस्यमस्मासु न वदेत्॥ न च ब्रह्मा शास्त्राधिकारं न जानातीति वक्तव्यं॥ यतस्तव साक्षाद्देहः स पुत्रः॥ अ
तः स्वानां भावसरोहमिति न विरोधः ४६

तत्र स्थितस्यांतर्या मिणः तत्र बहिः प्रदेशाद
तराणतस्येति भाव:२=

---

एवं भगवंतं परब्रह्मत्वेन स्तुत्वा आरोपेणैवं कथनमित्याशंकां व्यावर्त्तयंति॥ तं त्वां विदामेति॥ तमेव परब्रह्मरूपं त्वां विदामः॥ अन्यथा ज्ञा
त्वा अन्यथा कथनार्थमुत्सेकूभवति॥ तथा प्रकृतेनास्ति किंतु त्वां परमात्मतत्वमेव जानीमः॥ एते हि सांख्यानुसारिण इति एतेषां तत्व
परप्रयोगः॥ सर्वत्र तत्वं सहजं रूपं॥ तत्र सर्वेषामात्मस्वेकं तत्वं॥ तत्र तेषामप्यात्मन स्त्रैविध्यं॥ अस्मदादिजीवा अंशप्रायाः॥ ते यात्मा
न इत्युच्यंते॥ यश्च प्रकृत्यधिष्ठाता मुख्यः सोऽप्युच्यते॥ पंचविंशति तत्वेषु परः श्रेष्ठः॥ ततोऽप्युत्तमः असंगोदासीनः परमात्मा स एव प्राप्य
इति तं त्वां जानीम इत्यर्थः॥ ननु तस्य स्वप्रकाशत्वमात्म हृत्रि वेद्यत्वं वा संभवति तन्नु चक्षुर्विषयत्वमित्याशंक्य तत्तन्मतानुसारेणापरिह
श्यमानत्वं समर्थयंति॥ सत्वेन संप्रति रतिं रचयंतमेषामिति इदानीं वैकुंठे स्थितानामेषां भक्तानां प्रीत्युत्पादनार्थं शुद्धसत्वं पुरु
षरूपं कृत्वा तिष्ठसीत्यर्थः॥ असंगोदासीन एव स्वभक्तानुरोधेन तथा करोति॥ अन्यथा तस्य फलत्वं शास्त्रार्थत्वं च न स्यात्। किंच॥

तं त्वां विदाम भगवन् परमात्मतत्वं सत्वेन संप्रति रतिं रचयंतमेषां यत्ते
नुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयो हृदि विदुर्मुनयो विरागाः ४७

यदि भगवान् सत्वाविर्भावं न कुर्यात् तदा ज्ञानमपि न सिध्येदित्याहुः॥ यत्ते नुतापविदितैरिति॥ यदा जीवात्मा संचरन् बहुकालं बहून्
क्लेशान् प्राप्नोति तदा भगवतः कृपा उत्पद्यते॥ अयं स्वानंदानुभवयोग्यः क्लेशं प्राप्नोतीति स क्लेशो भगवते वज्ञात इति कृपानुताप
रूपेण निरूप्यते॥ अन्यथा ऽलौकिका योगप्रकाराः लौकिकबुद्धिगम्या न भवंतीति भगवत्कृपयैव तादृशयोगमार्गाणां परिज्ञानं॥
तत एव दृढा भवंति भक्तिप्रधानाश्च भक्तिमार्गसिद्धयोगा वा॥ भगवतः सत्वाविर्भाव एव तद्भवति॥ किंच॥ उद्ग्रंथयोऽपि कृपयैव भवंति॰
अहंकारग्रंथिः रजस्तमोभ्यां दृढो भवति॥ तद्भगवत्सत्वप्राकट्येनैव शिथिलो भवतीति॥ किंच॥ मुनयोऽपि भवंति ते नैव विरागाश्च॥
भक्तियोगैश्च वेदनं न केवलैः॥ किंतु भगवत्सत्वसहितैरेवं अतः सर्वोपकारित्वात्सत्वप्राकट्यमित्यर्थः ४७ ॥ ॥

Indira Gandhi National
Centre for the Arts

प्रसाद६३

त्रसु १५ २२३ एवं सन्मार्गानुसारेण सत्स्वरूपमेतदिति निरूप्य भक्तिमार्गानुसारेण तद्रूपं परमपुरुषार्थरूपमेवेत्याहुः॥ नात्यंतिकमिति॥ हे अंगये
त्वदंघ्रिशरणास्ते आत्यंतिकमपि न विगणयंति॥ निहतसजातीयस्य संसारस्य पुनः तत्रात्मन्यनुत्पाद इति मोक्ष आत्यंतिक उच्यते॥ सो
पि स्वकृतसाधनसाध्यो न भवति किंतु भगवान् प्रसन्नः सिद्धवत्कारेण तं प्रयच्छति तादृशीं ते न गच्छंतीति दूरापास्तं॥ यतो गणयंत्यपि न॥
ननु भक्ताः भगवत्प्रसादं कथं न गणयेयुस्तत्राहुः॥ विगणयंतीति॥ गणयंत्यपि परं यथा भक्तिविशेषाकारेण प्रसादत्वेन गणयंति त
[redacted] ष्या आत्यंतिकं न गणयंतीत्यर्थः॥ अत्रागणना नावगणना॥ किंतु भगवत्स

नात्यंतिकं विगणयंत्यपि ते प्रसादं किंत्वन्यदर्पितभयं भ्रुव उन्नयैस्ते येंगत्वदं
घ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ४८ ॥

सादेषु गणपमानेषु नांतरीयकमितितद्गणनां न कुर्वंति॥ यत्र मोक्षस्यैवैषावस्था तत्र किंत्वन्यत्॥ तु शब्दः विषयासक्तिं परं व्या
वर्त्तयति॥ अत्यंतविषयासक्ताः मोक्षं न मन्यंत इति॥ ननु भक्त्युपयोगिपदार्थाः भगवत्सेवौपयिकाः भक्तैरपेक्ष्यंत एव कथं ते
षा पागणनेत्याशंक्याहुः॥ अन्यदिति॥ अस्मद्भगवत्सेवानौपयिकं परं परोपयोग्यपि न भवतीति ज्ञापनार्थं॥ विशेषणांतरमाहुः
॥ अर्पितभयमिति॥ भयं मृत्युः भगवदीयपदार्थानामिदमेव निदर्शनं यद्भयजनकं न भवति॥ न वा नश्वरं॥ तत्र हेतुः भ्रूक्षवे
उन्नयैस्त इति॥ ते भगवतः या भ्रूः स एव कालः तस्योर्द्ध्वनयनं सर्वप्रतीकारातिक्रमेण कार्यसाधनं॥ न हि भगवान् स्वाभिप्रेतान् एम० २२३
विषयान् तथा करोति॥ मोक्षस्यागणनायां उपपत्तिमाहुः॥ येंगेति॥ अंगेति संबोधनं श्रवणादिभावे भगवतः तुल्यतया कोम
लसंबोधनम्

चमत्कृति ३=

अंघ्रिशरणागमनस्य भक्तिरूपस्य १=

तिपादकं तादृशभक्तेरंगभावाद्॥ अनेनापि मोक्षस्यागणना निरूपिता॥ मोक्षदाता भगवानेव यस्यांगमिति॥ तेषां सर्वामेव साम
श्री मोक्षाद्यधिकामाहुः तत्र तेषामाहोस्विदहं निरूप्यते॥ त्वदंघ्रिशरणा इति तवांघ्रिद्वयमेव तेषां शरणं रक्षकं वा॥ एकत्राधारत्वं ग ह
अपरत्र नियोज्यत्वं यच्चरणप्रसादलेशरूपाः सर्वे मोक्षादयः। भगवद्भक्तिः स्वतंत्रा सा द्विविधा उत्तरा ऐत्र एधिकाच। तत्र प्रथमकक्षाया
मेव स्थिताः न गणयंति किमुत चरमकक्षायां स्थिता इति सूचयितुमाहुः भवतः कथाया इति येकथायारसज्ञाः॥ भगवदीयो रस
उभयत्र प्रतिष्ठितः रूपलीलायां नामलीलायां च॥ तत्र रूपलीलायामासक्ताः भगवदनुरोधमपि कुर्वंति॥ अन्यथा सेवायाः कर्तु
मशक्यत्वात् अतोत्र कथारस एव निरूप्यते॥ कथारसः अनुभवेनैव ज्ञायत इति रसज्ञा इत्युक्तं यथा कामादिषु तद्दयेविद्यमाने
ष्वेव सत्सु कामिन्यादिनामरूपरसा अनुभूयंते नापि रसास्वादनव्यतिरेकेण किंचिद्रसज्ञाने दृष्टं प्रमाणमस्ति॥ न वा अधिकारिणि
कामाद्यभावे सरसः स्फुरति रसानामधिकारिण्यप्रत्येव स्फुरणनियमात्॥ अतो रसज्ञा एव निरूपिताः स चाधिकारः शास्त्रानुभवाभ्यां
प्रेमज्ञानाभ्यामेव संभवति रसांतरविष्टचित्तानामत्र रसो नोत्पद्यत इति तद्व्यावृत्त्यर्थं भगवतो विशेषणमाहुः॥ [redacted] की
र्तन्यतीर्थयशस इति कथा हि यशः प्रतिपादिका॥ यशो हि सर्वेषां भगवतः श्रवणे रसजनकं भवति स्वाभाविकोन्योरसः प्रथम
रसासक्तिं वारयतीत्यनुभवसिद्धं॥ विशेषाकारेणापि स्वर्वरसनिवर्त्तकमिति विशेषणद्वयं॥ कीर्त्तन्यं तीर्थरूपमिति॥ कीर्त्तनीयं तद्दे
व भवति कीर्त्तयितुर्येन रसो जनितो भवेत्। शास्त्रतो वाऽनुभवतो वा॥ अनुभवतः रसजनका वर्ण्यकामौ शास्त्रतः धर्ममोक्षौ॥ यत
सर्वानुगुणं तत्कीर्त्तनीयं तल्लोके नास्तीति रसचतुष्टयप्रतिपादकं भगवद्यश एवेति कीर्त्तन्यपदेनोक्तं॥ तीर्थं हि द्विविधं गुरुरू
पं जलरूपं च॥ वाह्याभ्यंतरोपकारजननभेदेन निरूपितं॥ सर्वपुरुषार्थाभीप्सुः तदुभयं सेवते विशेषसाधनासमर्थः स्थितिनिर्वा
हकेवते॥ अतो मरणांतं तत्र स्थितो सुखेनैव पुरुषार्थो भवतीति यत्र क्वापि पुरुषार्थे आसक्तो भगवद्यश एव शृणुयात् तीर्थरूप
त्वादित्यर्थः॥ अत्रत्वान्यादिरूपधिकारस्वजनकं विशेषणमाहुः॥ कुशला इति नैपुण्यं बुद्धितीक्ष्णता चापेक्ष्यत इत्यर्थः ४८

Indira Gandhi National
Centre for the Arts

एवंभक्तिमार्गानुसारेणभगवंतंस्तुत्वास्वस्यापराधाभावायस्वदोषंकीर्त्तयंतिशपथप्रकारेण कामंभवइति जयविजयावस्माभिर्भ्रां
तेनशप्ताविति परंतुनास्तिकिंतुभगवद्दर्शनलालसतयाअन्यथाअस्माकमनिष्टंभवत्वित्याहुः॥कामंभवइति॥स्वद्दृजिनैःस्वकृतपा
पैः॥नियतदुःखदंपापंदृजिनमुच्यते नियमेनदुःखदंवा॥अतोयःपरस्मैदुःखंप्रयच्छतिसहिस्वयमपिदुःखंप्राप्नोति॥अतोनोस्मा
कंभवोनिरयेषुस्तात्कामादीनांनिरयद्वारत्वश्रवणात्पापीयसस्त्रयइतिवाक्यात्तयोःकामादिद्वारं निरयेष्वितिबहुवचनंनत्रित्वपरं =
॥देशादिविशेषेदानस्याधिकफलजनकत्वात्‌ स्तादितिप्रार्थनायांलोट्॥अंगीकारेअनंगीकारेचोभयथाहेतुमाहुः॥चेतोलिवदिति॥
यथाभ्रमरोरसाविष्टःकालमपिनगणयति एवमपितत्रास्थितोबद्धोभवति॥तथानश्चेतस्तेपदयोर्यदिरमेततदादेहस्यनरकेस्थि
तिःनास्माकंबाधिका॥किंच॥तदैवास्माकंनिरयेवासोभविष्यति॥अलिवत्यदिपदयोःनःरतिर्भवेत्सहिमधुलोभेनपुष्पपी

कामंभवःस्वद्दृजिनैर्निरयेषुनःस्तात्चेतोलिवद्यदिनुतेपदयोरमेत वाच
स्तुनस्तुलसिवद्यदितेंघ्रिशोभाःपूर्येततेगुणगणैर्यदिकर्णरंध्रः ४९ ॥

डामपिविगणय्यमधुपिबति॥तथावयमपिफलार्थिनश्चेत्दर्शनार्थंद्वारपालयोरपराधंकृतवंतः॥अन्यथामाभवत्वित्यर्थः॥
एवंमानसमुक्त्वावाचनिकमाहुः॥वाचस्त्विति॥यदिनोवाचःतुलसीवत्स्वरूपगंधादिरहिताअपिचरणारविंदेशोभंते।यथा
तुलसीतथावाचोपिपदचातुर्याद्यनपेक्षाःभगवद्गुणप्रतिपादकत्वेनैवयदिशोभायुक्ताःस्युःतदापिनरकेवासोनबाधकः॥तुश
ब्दःपूर्वपक्षंव्यावर्त्तयति॥तेननसमुच्चयः॥किंच॥यथातुलसीपरप्रेरणयाचरणविष्ठाभवति॥एवमन्यप्रेरणयाभगवद्गुण
अस्मद्वाचिनिविष्टाभवेयुःतदानरकोभवतु यदास्वतएवनिविष्टाश्चेत्तदानभविष्यतीत्यर्थः।कायिकमाहुः पूर्येततेइति गुण
समूहैर्गुणानामवांतरजातिभेदैर्वायदिकर्णरंध्रःपूर्येतनअलमितिमन्यतेसर्वदावाहरितमेवतिष्ठेत्निरंतरश्रवणेनयथा

मंतमविशेत्वाद्वर्वादिन्यर्थः ४९



एवंस्वापराधेस्वयमेवस्वदंडमनूद्यसमागतानांकिमेतदेवफलमितिशंकायांसमागमनफलंजातमित्याहुः॥प्रादुश्चकर्थेति॥यतइ
दंरूपंहेपुरुहूतप्रादुश्चकर्थ तेनप्रादुर्भूतरूपेणहृशःनिर्वृतिमवापुः॥हृशीनांपरमसंतोषोजातइत्यर्थः॥एवंसुखदानुःप्रत्यक्षका
दरूपं हेपुरुहूत प्रादुश्चकर्थ तेनप्रादुर्भूतरूपेण दृशः निर्वृतिमवापुः ॥
रणपिनमस्कारेणैवेत्याहुः॥तस्माइदमिति तस्मैभगवतेइदंनमइद्विधेम नहिशास्त्रानुसारेणकर्तुंशक्यतेअतअनुकरणमात्रमितिडि
दित्यक्तं॥इदित्यव्ययंइवार्थे।पुरुहूतेति॥यज्ञात्मकत्वात्पुरुभिर्हूयतइतिपुरुधावाइंद्रादिरूपेणहूयतइति॥स्वार्थेप्रादुर्भावआगम

प्रादुश्चकर्थयदिदंपुरुहूतरूपंतेनेशनिर्वृतिमवापुरलंदृशोनः तस्माइदंभ
गवतेनमइद्विधेमयोनात्मनांदुरुदयोभगवान्प्रतीतः ५० इतिश्रीभागव
तेमहापुराणेतृतीयस्कंधेपंचदशोध्यायः॥ ॥ श्रीगोपालायनमः ॥

नमेव॥अंतःकरणेतुसुखंनजातमितिभावः।शापदानेनचित्तेग्लान्यनुत्पत्तेः॥नचैतत्फलमल्पमितिमंतव्यं यतःअनात्मनांभ
वान्दुरुदयःप्रतीतःदृष्टः।नविद्यतेआत्मायेषांयैरात्मैवनाश्रितोबहिर्मुखत्वादिभिःतेषांदुरुदयःदुःखार्थमनुदयोवा इद
मितिप्रदर्शयन्तोनमस्कुर्वंति भगवानुपकारकर्त्तेतिआश्चर्यार्थंतस्मैभगवतेइत्यक्तंप्रतीतइतिप्रमाणं ५० इतिश्री
भागवतसुबोधिन्यांतृतीयस्कंधविवरणेपंचदशाध्यायविवरणं॥ ॥ श्रीगोविंदजीवयनमः ॥ ॥

Indira Gandhi National
Centre for the Arts

जयविजययोर्वक्तॄरध्यायस्य भगवत्प्रसादः २

त.स्कं.१६ २२५ मुनिमानससंतोषसतःस्तोत्रंतथाविधं॥शापस्थापननिर्याणेषोडशेविनिरूप्यते १ भक्तानांतुकृतिःसत्यासत्यावाकृब्रह्मवादिनां॥
मनोभगवतःसत्यमितिस्मध्यायविनिर्णयः २ मननसःप्रबलत्वाद्धितेषांनान्यविरोधिता पूर्वयोरनभिप्रेतंतत्तृतीयादेवसुस्थिरंत् ३ भगेनानैव—
अतोभगवतःसर्गलीलायांदुर्बलारतिः॥एवंपूर्वाध्यायेऽरुद्धतुष्टानांमुनीनांस्तोत्रमुक्तं तयोःशापंश्रुत्वासंतोषार्थंभगवान्ब्राह्मणस्तोत्रं
कृतवानित्याह इतितद्गुणतामिति पूर्वोक्तप्रकारेणगृणतांतेषांभीतानांमुनीनांशापस्यानुसारिणंवचनंप्रतिनंद्य तच्छ्रेष्ठेनवचनंप्रा
प्यते॥प्रतिनंदनंबहिरेव कृतप्रतिनंदनस्येवाग्रेवक्ष्यमाणत्वात्॥इदंवक्ष्यमाणंजगाद॥ननुकिमित्येवंजगादयतोभक्तानांदुःखंभ
वतितत्राह वैकुंठनिलयइति वैकुंठस्थानंनिलयोयस्य॥गृहागतानांसंतोषःकर्त्तव्यः॥नन्वेवंसतिभक्ताःपीडिताभवेयुरित्याशं
क्याहाविभुरिति स्वभृत्यान्सर्वप्रकारेणापिमोचयितुंसमर्थइत्यर्थः १ प्रथमतःसेवकयोरपराधंसमर्थयति॥एताविति॥एतौ
श्रीब्रह्मोवाच॥इतितद्गृणतांतेषांमुनीनांयोगधर्मिणां प्रतिनंद्यजगादेदंवैकुंठनिलयोविभुः १ श्रीभगवा
नु॰एतौतौपार्षदौमह्यंजयोविजयएवच॥कदर्थीकृत्यमांयद्वोबह्वक्रातामतिक्रमं २ श्रीगोपालयनमः
तप.वेनपकीवद्यावंतौ१ जयविजयौतौपूर्वकल्पेमधुकैटभौमत्तोवरदानात्मद्रूपत्वंगेमत्तावितिमयावैकुंठेसमानीतौ·तदानींबहूनांसेवकानांविद्यमान
त्वात्तस्यदेहनिर्देशस्यार्थनामग्रहणाति॥जयोविजयएवचेति॥मदर्थंयोजयःस एकः जयनामाच— इंद्रियादीनामस्मार्थंजयोज्ञानमा
र्गेमदर्थंजयोभक्तिमार्गेऽन्तःकरणजयइत्यर्थः विविधोजयइंद्रियादीनांद्वितीयः॥अतएवएतौममपार्षदौपर्षदिसभायांयो
ग्यौ॥यथांतःकरणेतुजयोभगवत्स्थितौहेतुर्भवतीतितथावैकुंठस्थितावेतावेवहेतुभूतौ॥अतएवैतयोरुत्पत्तिविमर्शनेनअ मधुकैटभत्व
पराधकरणंयुक्तमेव॥नहिसाक्षान्मनसाभगवान्गंतुंशक्यःकिंतुजयेनैवशक्यइति॥भगवतआनंदरूपस्यसहजसुखत्वेनमन एस॰
सःप्रवृत्तियोग्यत्वेपिजयप्रतिबंधात्नभगवद्गमनं॥अतएवमांकदर्थीकृत्यव्यवहारेपिब्रह्मण्यत्वादिमद्धर्मान्दूरीकृत्यवः युष्मा २२५
कंअतिक्रमंबह्वक्रातां २ ॥

अंतःकरणेंद्रियजयोविजयःस्रोतःर्थः३

वसतिरपाऽ

वहुक्त्वनाभिप्रायः—

अतएवएतयोर्दंडउचितइत्याह यस्त्वेतयोरिति तुशब्दोदंडांतरव्यावृत्त्यर्थः।योजन्मत्रयात्मकोदंडःसएवानुमतोस्माभिः भव
द्भिर्मयाचेतिसेवकसहितेनमया उभावपिदंडनीयावितिएतयोरित्युक्तं अनुव्रताःसधर्माः मत्कार्यंकृतमितिमन्मात्रमहान्सं
तोषइतितेषांकृत्यभिनंदनं मुनयइतिसंबोधनंकाकतालीयकरणव्यावृत्त्यर्थं॥अभिप्रायज्ञानार्थंवा॥नचैतयोःकोप्यप
राधः
द्वाररक्षानुस्वधर्मइतितत्राह देवहेलनादिति अस्मद्देवाब्राह्मणाःपरोक्षदेवोयज्ञःप्रत्यक्षदेवोयज्ञाधिष्ठाताविष्णुरिवेति॥
सएवैतेसेवकारेणइदानीमन्योनवक्तव्यइतिसूचितं ३ एवमपराधदंडौनिरूप्यसेवकापराधंदूरीकृत्यस्वापराधंचदूरीकरो
तिप्रार्थनया॰ तद्वःप्रसादयामीति युष्मानद्यप्रसादयामियतोऽपराधोजातइति॥अपराधोहिमहत्त्वस्यभवतिप्रकृतेतुकथमप
राधइतिचेत्तत्राह॥ब्रह्मदैवंपरमिति ममदैवंदेवताब्रह्मब्राह्मणजातिः परमितिविष्णुपेक्षयापि आधिदैविकोविष्णुर्देवोभव
यस्त्वेतयोर्धृतोदंडोभवद्भिर्मामनुव्रतैः सएवानुमतोस्माभिर्मुनयोदेवहेलनात् ३
तद्वःप्रसादयाम्यद्यब्रह्मदैवंपरंहिमे तद्धीत्यात्मकृतंमन्येयत्स्वपुंभिरसत्कृताः ४

ति विष्णुर्वाअकामयतपुण्यंश्लोकंशृण्वीयमामपायात्कीर्तिरणच्छेदिनिसएतंविष्णवेश्रोणायैवपुरोडाशंत्रिकपालंनिरवप
यदितिश्रुतेः तद्व्यावृत्त्यर्थमाह॥परमिति॥प्रत्यक्षश्रुतौदेवापेक्षयाब्राह्मणानामुत्कर्षविधानात्॥एतेवैदेवाःप्रत्यक्षं
यद्ब्राह्मणाइतितदाहहिशब्देन॥ननुभवतःकोपराधस्तत्राह तद्धीत्यात्मकृतंमन्यइति॥यतस्वपुंभिःस्वसेवकैरसत्कृतंत
दहमात्मकृतमेवमन्ये हियुक्तोयमर्थः भृत्यकृताएवस्वामिकृताभवंतिइति॥अस्मधामत्यापराधेस्वामिनोदंडोनस्यात्॥
यत्नेनमयैवभवंतोनिवारिताइत्युक्तं॥कृतमपितद्युक्तमेवद्वारपालकधर्मत्वात्॥अतएवहिद्वयमन्योन्यहेतुभूतं॥यद्य
प्येताहशेलोकःस्वाम्यपराधंनमन्यते॥तथाप्यहंमन्येयतःतेस्वपुरुषाः ४ ॥

एतान्पांइ—

Indira Gandhi National Centre for the Arts

भस्मा१६
२२६

प्रसादश्चात्रसर्वथाकर्तव्यः अन्यथामहदनिष्टंस्यादित्याह। यन्नामानीति। महतामपिलोकापवादाद्भयंभवति अतएवभक्तेक्ष्णतागसिलोकः यस्यस्वामिनोनामग्रहणानिनामानीतिबहुवचनंतस्यसर्वसंबंधिनांअधिक्षेपार्थं। सर्वाण्यपिवनामानिगृह्णातिचकारेणतस्यगुणान्कर्माणिचनिंदार्थमुद्घाटयति॥ किमतोयद्येवमतआह॥ सोसाधुवादइति॥ सइतिसलोकेनहार्यमाणः असाधुवादस्तस्यगुणान्कर्माणिचनिंदार्थमुद्घाटयति॥ किमतोयद्येवंमतआह॥ सोसाधुवादइति॥ सइतिसलोकेनहार्यमाणः असाधुवादस्त्वाद्गुणान्कर्माणिचनिंदार्थमुद्घाटयति
असाधुत्वेनकीर्तनमपकीर्तिरितियावत्तत्कीर्तिंहंतिस्वस्यतद्विषयकःस्वयं॥ ननुविद्यमानांकीर्तिंप्रसिद्धांकथंहन्यादित्याशंक्याह
घ्नंतेनसमर्थयति॥ हंतित्वचमिति। आमयोरोगःश्वित्रादिःयथाशरीरेविद्यमानएवतस्यत्वचंहंति स्वस्वरूपमेवप्रकटयति ५
नन्वीश्वरस्यसर्वनियंतुःदासानुदासस्यतुच्छस्यांतःप्रवेशाभावेकोवाअपराधः लोकोहितुमहापराधहेतुःद्वाराणांप्रवेशोनास्तीति
कथंअपकीर्तिर्वरेदित्याशंक्याह-यस्येति-उपजीव्यत्वाद्ब्राह्मणातिक्रमेममापकीर्तिर्वरेदेवउपजीव्यत्वंचममकीर्तिस्तदधीनेतितदे

यन्नामानिचगृह्णातिलोकोभृत्येकृतागसि॥सोऽसाधुवादस्तत्कीर्तिंहंतित्वचमिवामयः ५ यस्यामलामृतयशःश्रव
णावगाहःसद्यःपुनातिजगदाश्वपचाद्विकुंठः॥सोहंभवद्भ्यउपलब्धसुतीर्थकीर्तिश्छिंद्यांस्वबाहुमपिवःप्रतिकूलवृत्तिं ६॥

वाह यस्येति यस्यममअमृतममलंयद्यशःतस्यश्रवणावगाहःआश्वपचात्श्वपचंमर्यादीकृत्यजगदेवसर्वंपुना
ति॥ एवंजगत्पवित्रकीर्तित्वात्। अहंविकुंठःकुंठरहितःकस्मिंश्चिदंशेदोषरहितइत्यर्थः॥ एतादृशोप्यहंपुरुषोत्तमःभवद्भ्यएव
उपलब्धासुतीर्थरूपाकीर्तिर्यस्यतादृशः। यशःपराक्रमजन्यं कीर्तिःसदाचारजन्या॥ ममयशःजगतिपावित्र्यमपिसंपादयति
मन्नाम्नाडुष्टरूपपापनिग्रहात्। पराक्रमोहिदोषनिवारणरूपःसचेद्दोषःसहजोपिभवेत्सोपिमद्भयान्नश्येत्॥ अतश्चंडालदेहेअ
त्यादिकोपिदोषोनश्यति अतोवैकुंठस्यानंतयशःपुंजेनविराजमानंममसामर्थ्यसूचकंवर्त्तते॥ तथापिकीर्तिःसाधवश्चेत्तांकी
र्त्तयेयुःतदैवभवति॥ तेनकीर्त्यायेममसेवकाःसदाचाराःतेमत्परायणाभवंति निरंतरंकीर्तनेनकृतार्थाश्चभवंति अत रमा.
सुतीर्थभूतकीर्तिसंपादकत्वेनउपजीव्याब्राह्मणाः अतस्तेषुयोऽपराधंकरोतिमद्बाहुरूपइंद्रोपितमपिछिंद्या अतएवदृहस्यात २२६
तिक्रमेइंद्रस्यमहतीपीडासंवृत्ता राज्यभ्रंशादिरूपा॥ अतोयुक्तमेवप्रसादनमित्यर्थः ६ ॥

महाराजस्वर: [illegible]

कीर्तिर्लक्ष्मीलक्ष्याभोगस्वयंविप्रप्रसादतः॥ भगोःकस्मायतोलक्ष्मीर्मुखंचापिद्विजाममं तत्रकीर्तिनिरूपणब्राह्मणादीनांलक्ष्मीनि सफ्लायतिलोकरीत्वेनीचरि
रूपयति स्त्रियःस्वभावतोदुष्टाश्चंचलाश्चापितिस्यशः॥ आचारजनिताकीर्तिर्ब्राह्मणीश्चनियामकाः ईश्वरस्यतुयाःपत्न्यस्ताविति
रक्तेनहिस्थिराः भगोरण्यांततःश्राम्यस्थिरलक्ष्मीलतोमधि॥ स्वोत्कर्षवर्णयति॥ ब्राह्मणोत्कर्षार्थं येषांब्राह्मणानांसेवयाच
रणपद्मेपवित्रोरेणुर्यस्य सेवाजनितःसंस्कारश्चरणे-तिष्ठतीतिचरणसंबंधीयकःश्चनरेणुःसगंगावत्पवित्ररूपोभवति रे
णुरितिपाठेएतावद्भिन्नंवाक्यं॥ द्वितीयांतपाठेतुपूर्वार्द्धविशेषणानुद्देश्यानिब्राह्मणसेवासाध्यानिविरक्तिरपितत्तएवरवि
रक्तिविरोधीनियतःलक्ष्मीस्थितिलक्षणोधर्मोपितत्तएवलक्ष्म्यामाहात्म्यंब्राह्मणमाहात्म्यार्थं। सद्यःकृतमखिलानांमलंये

यत्सेवयाचरणपद्मपवित्ररेणुंसद्यःकृताखिलमलंप्रतिलब्धशीलं नश्री
र्विरक्तमपिमांविजहातियस्याःप्रेक्षालवार्थमितरेनियमान्वहंति ७

नप्रतिलब्धंशीलंयेन॥ यस्याःलक्ष्म्याःप्रेक्षालवार्थेइतरेब्रह्मादयःनियमान्कृच्छ्रादीन्भगवद्भ्रतानिवावहंतिलक्ष्मीकटा
क्षकामनयातपःकुर्वंतीत्यर्थः पापनाशकमपिब्राह्मणसेवयातद्वाक्यादेवनियमात्सारस्वतकल्पेसर्वस्यब्राह्मणाधीन
त्वाच्च वस्तुतस्त्वयहतयाप्याभगवान्अतस्वलोकानामपितत्संबंधात्पापनाशःलक्ष्म्याअपिदोषनिवृत्तिः॥ प्रभूणांभो
गाभिनिविष्टानांसदाचारपरिपालनलक्षणःसुस्वभावःमहापुरुषागमनेनमहापुरुषसेवयासंपद्यते- एगनिवृत्तिरपि
तदनुरोधादेववस्तुतस्तुधर्मोभगवत्येवप्रतिष्ठितइतिनिर्दिष्टत्वाच्चराणानाचारभावः ७ श्रीगोपालयनमः ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰१६ २२७ ब्राह्मणाधीनं स्वस्य भोगमाह॥ नाहं तथाद्मीति स्वभावतोहं स्वमुखेनानश्नन्नेव तिष्ठामि॥ अनश्नन्नन्योभिचाकशीतीति श्रुतेः
गोणं च मम मुखद्वयं अग्निर्ब्राह्मणश्च कार्यरूपं॥ तत्राग्न्यपेक्षया विप्रब्राह्मणो मम मुखं समीचीनं तदाह॥ नाहं तथाद्मि हुतभुग्मु
खेन अग्निः तर्हि यज्ञानां वैफल्यं स्यादित्याशंक्याह। अदन्नपि तथाना द्मीति अदनमपि वह्नेः सर्वभक्षकत्वात् काष्ठादि भक्षक
त्वाच्च॥ तस्य मुखत्वं तु अनिष्टं भविष्यतीति न निषिध्यते किंतु निषेधे अयमेव हेतुरिति वक्तुमाह यजमानहविर्वितानेश्च्योत
घृतप्लुतमिति यजमानपदेन सत्रनिषेधः क्रूरत्वान् बहुकर्तृकत्वाच्च॥ किमेते सत्रिण इति श्रुतेः॥ गणान्नत्वाच्च॥ हविर्यज्ञः
पश्वादिव्यतिरिक्तः। अतो हविःशब्देन पश्वादिकं निषिध्यते वितानेविस्तारयज्ञे॥ च्योतत् घृतप्लुतमिति उभयत्र श्चोतनाद्य

नाहं तथाद्मि यजमानहविर्विताने च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन यद्ब्रा
ह्मणस्य मुखतश्चरतोनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ८ ॥

तेन प्लुतं हविः हुतभुङ्मुखेन अदन् अग्नौ प्रथमतः आज्यश्चोतनं पश्चात् हविषः प्रक्षेपः पुनश्चोतनमिति तथापि हुतं
तेन प्लुतं हविः हुतभुङ्मुखेन अदन् अग्नौ प्रथमतः आज्यश्चोतनं पश्चात् हविषः प्रक्षेपः पुनश्चोतनमिति तथापि हुतं
भक्षयतीति मंत्रहोत्राद्यपेक्षितत्वात् महताशब्देन हुतत्वाच्च तथा न भक्षणं॥ ब्राह्मणमुखे तु नायं दोषः॥ ब्राह्मणस्य विशेष
णमनुघासं चरत इति॥ प्रतिकवलं भक्षयतः॥ तत्र पुरोनुवाक्यायैयाज्यायै देवतायै वषट्कारायेति एकस्मान्मा हुतौ च तुर्णां
भागः॥ अत्र एक एव प्रतिकवलं भक्षयति॥ स हि मुखतस्य वभक्षयति मुखस्यापि मुखमिति विशिष्ट यथाग्नेर्विशेषणं उक्तः
तथा ब्राह्मणमपि विशिनष्टि॥ तुष्टस्येति॥ मयि तुष्टस्य विषय अतिरेकेणापि केवलं मय्येव प्राप्ते तुष्टस्य अवहितैरपि निज टमा॰ २२७
कर्मपाके लुष्टस्येति कर्मवशात् प्राप्ते पि दुःखे अनुद्विग्नस्य भगवति वासमर्पितैः॥ कर्मसमर्पणं कृत्वा तुष्टस्येत्यर्थः ८ ॥

लौकिकं च २ महान् २

एवं स्वोपकारेण ब्राह्मणान् स्तुत्वा स्वरूपतोपि ते महान्त इत्याह॥ येषामिति महत्त्वं महतामनुहत्या महत्त्वं हि द्विविधं॥ लौकिकम
लौकिकं च लौकिकमुत्तरोत्तरभावापत्त्रं भगवति विश्रान्तं सर्वलोकप्रसिद्धो हि भगवान् पुरुषोत्तमः वेदप्रसिद्धोपि तेन ज्ञापनं ब्रा
ह्मणाधीनमिति अलौकिकज्ञानं येषां वर्त्तत इति ते भगवद्ज्ञापका इति येयथा मां प्रपद्यन्त इति न्यायेन तदनुहत्तिमपि भगवान् क
रोति तेषामवयवत्वात् तदुत्कर्षः तत्स्थापकत्वं करोति॥ अधिकारोपि स्वेनैव दत्त इति स्वधर्म एव तत्र विद्यत इति स्वोत्कर्ष एव॥ य

मुखं

येषां बिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजः किरीटैः॥ विप्रां
स्तु को न विषहेत यदर्हणांभः सद्यः पुनाति सहचंद्रललामलोकान् ९ ॥

येषाममलांघ्रिरजः किरीटैरहं बि
भर्मि अग्रे ब्राह्मणहृदंगद्रहतरजउत्थापयति तद्रजः किरीटेषु संबद्धं भवति पावित्र्यं नाम एकं भगवत्स्वरूपं सर्वपदार्थेषु सहजं
तिष्ठति संस्कारेणाधीयते च तत्र ब्राह्मणेषु पावित्र्यं पादयोः सहजं अतस्तेषां चरणरजः अमलं भवति किरीटैरिति सर्वदा धार
णं सूचितं॥ अवतारभेदैर्मूलरूपेण वा तथा करोतीति वा॥ अखंडाविकुंठा योगमाया विभूतिश्च यस्य॥ मायया त्वत्ति स्थितिप्रल
याः। विभूत्या सर्वसौख्यं॥ एवं सति न कस्याप्यपेक्षा सर्वैरपेक्षित एव भवति न च तयो श्रीगोपालय नमः ॥

भगवान् १:

Indira Gandhi National
Centre for the Arts

र्नित्यशक्त्योर्विछेदोवाकार्याक्रमतावासंभवति॥ येषामितिनाम्यद्विप्रत्वात्तेषांगुणांतरमपेक्ष्यतइतिज्ञापितं॥ विप्रपदेन
योगोपिसूचितः विशेषेणपूरणंच तेषांमहज्ञोधर्मः॥ ज्ञानभक्तिव्यतिरेकेणचिदानंदोनपूरितोभवतइति॥ ज्ञानभक्तिम
तएवयोगेनविप्राइतितिनिरूपितं॥ एतदुभयसद्भावेनाम्यदपेक्षितमितिसंस्कारस्त्वानुषंगिकः॥ अनेनैवोपकारेणभग
वतातथाक्रियते॥ तुशब्देनयोगरहितान्व्यावर्त्यते॥ एतादृशान्ब्राह्मणान्कोनविशेषेणसहेत॥ कोवातद्वारंनांगी
कुर्यात॥ भारस्त्वतिक्रमादिरूपएवभवति॥ अतस्त्वन्यलभ्यत्वात्तविप्रापणधइतिनोक्तं येषामतिक्रमोमयासह्यते॥
तत्रकथमन्योनसहतइत्यर्थः॥ ननुमायाविभूत्योर्विद्यमानत्वेपिपाविन्यस्याभावात्भगवान्विप्रापणधंसहतांनामक
थमन्येनसोढव्यइत्याशंक्याह॥ यदर्हणंभइति॥ यस्यममार्हणंभचरणोदकंगंगासहचंद्रललामलोकान्महादेवसहि
तान्त्रीनपिलोकान्पुनाति॥ धर्मःकृतःकर्त्तारमेवपुनातिसंबद्धंवाननुमहत्कालपर्यंतंपरंपरासंबद्धान्दूरस्थान्बहू
न्सर्वतामममभेदसहितान्यत्पुनातितदर्हणसंबंधेनैवेतिज्ञापयति अर्हणंभइतिसद्यइति सद्यःपुनातिगांगेयमि
तिवाक्यात्भगवतःकालनियामकत्वात्नतत्संबंधिनांकालापेक्षा चंद्रललामेतिसर्वदाहकत्वेनतामसीशक्तिःस्वीकृते
तितत्तापव्याहत्यर्थंअमृतमयश्चंद्रःस्थापितः॥ क्रियाजनितोदोषस्तुनतेननिवृत्तइतिगंगास्थापिता अन्यथाता एम•
वान्दोषोनान्येननिवर्त्ततइतिसूचयति ९ ॥ श्रीगोपालयनमः एम एम एमः एमः एमः २२८

एवंब्राह्मणातिक्रमःसोढव्यइत्युक्त्वायेनसहंतेतेषांविपक्षेबाधकमाह येमेतनूरिति॥ येद्विजवरदीनभेदबुध्याद्रक्ष्यंति
तान्यमलोकेगध्राःकुर्वंतीतिसंबंधः॥ मृत्योःसमृत्युमाप्नोतिइतिश्रुत्याक्वचिदपिभेददर्शनेसंसारोभवतिइत्युक्तं॥ एता
दृशेषुभेददर्शनेनियमयातनाभवतीत्यधिकमुच्यते॥ यदेत्येवैषइतिश्रुतेः॥ अत्रभेदोभगवद्भेदःस्वभेदस्यपूर्वसिद्धत्वात॥

येमेतनूर्द्विजवरान्दुहतीर्मदीयाभूतान्यलब्धशरणानिचभेदबुध्या॥
द्रक्ष्यंत्यघक्षतदृशोह्यहिमन्यवस्तान्गृध्रारुषाममकुर्षंत्यधिदंडनेतुः १०

ननुविद्यमानेभेदेलोकप्रसिद्धेदुर्द्रष्टृणांकोदोषइत्याशंक्याहमेतनूरिति॥ यद्यपियोगीसहस्रंशरीराणिगृह्णातितथापिस
एकएवजीवस्यैकत्वात् तथानंतमूर्त्तिः तत्रापियत्स्वरूपः आधिभौतिकंशरीरद्वयंगृह्णातिहविर्मंत्रात्मकत्वात्याग
स्य तत्रमंत्राब्राह्मणेषुप्रतिष्ठिताः॥ हविर्धेनुषुतेचेद्ब्राह्मणागावश्चामेभवेयुः॥ तदातेभ्यःउक्तेषुमत्रत्वंहविष्ट्वंचनस्या
त्भगवद्व्यतिरिक्तास्तेलो ॥ गोपालयनमः ॥

Indira Gandhi National
Centre for the Arts

किकाएवभवंतीतिअतएवान्यैरुच्चारितांमंत्राएवनभवंतिलौकिकवाक्योच्चारितत्वात्॥ अतस्तेमम्मैवतन्वस्तास्त्रिर्दिशति
द्विजवराद्दुहतीरिति॥यज्ञोपयोगित्वात्नात्रविप्रपदं॥द्विजत्वमेवात्रोपयोगि॥जन्मोत्कर्षार्थंद्विजपदं॥कर्मोत्कर्षार्थंव
रपदंच दुहतीरितिकर्त्तरिदुहधातोरिकप्रत्ययःसहजदोहार्थः तास्त्वेवहविषउत्पत्तेः अग्निहोत्रार्थमेवचवत्सोत्पत्तेः॥
मदीयाइतिगवामधिकोगुणः॥मित्रत्वाद्भगवतोपि॥सर्वस्वत्वात्तद्धर्मप्रतिष्ठयातदीयत्वं॥अथवा॥मदीयाइतिभि
न्नएवनिर्देशः॥भक्तिमार्गानुसारेणभगवद्भोगोपयिकहविर्दोहकर्तृत्वात्॥ तृतीयलक्षणानीतिरक्षकत्वेनज्ञानमा
र्गानुसारेणधर्मोनिरूपितः॥तत्रापिरक्षकत्वंभगवन्निष्ठमितिभेदाभावउचितएव॥एवंमार्गत्रयोपयोगिपदार्थान्येमत्तो
भिन्नान्जानंतितेषांविशेषभयं॥ननुभगवत्त्वाज्ज्ञानेपिवस्तुतस्तेषांभगवत्वान्नदृशनेकथंनरकपातस्तत्राह॥अघदृतद
श इति॥अघेनभेदज्ञानितेनदृतादृष्टिर्येषां॥ब्रह्मवधइवभेदोप्यधर्महेतुः॥अयंवधोज्ञानभयकस्तथापिक्रियाभ
याद्विशिष्टोमूलविषयत्वाद्दंडोपिचदृष्टएव॥ननुव्यवहारेभेदोपेक्षितइतिकथंतस्यदोषजनकत्वंतत्राह अ
हिमन्यवइति॥नव्यवहारमात्रंनिषिध्यतेकिंत्वंतःकरणारूढदोषत्वेनसर्पैः स्वल्पोप्यपराधोनविस्मर्यतइतिवधा
र्तंचप्रयत्नंकुर्वंतितथात्रदृयेनचेद्दर्शनंतदादंडइत्यर्थः॥गृध्रमुखेप्रविष्टंचक्षुःनकदाचिद्व्याहृतंभवतीत्यनिर्मो
क्षःसूचितः॥रुषेतिचक्षुषोविद्यमानत्वादेवतेभगवदपराधःकृतइतिचक्षुर्विरोषःममहयाससहितावाग्धाःकुशं 
तीतितैर्जन्यतेनाशएवनतूपघातमात्रं॥अकिंधेदंडान्नयतीत्यधिदंडनेतायमः। अल्पदंडास्तुएणमाधादिभिरेवक्रि 
यंतइतिनिरूपयेति १० ॥

एवंविपरीतेबाधकमुक्त्वासम्मननायांप्रसादमाह।येब्राह्मणानिति।क्षिपतोपिब्राह्मणानर्चयंतितैरहमेवोपाहृतःसर्वपुरुषार्थरू
पोहं तत्समीपेचेत्स्थितःसिद्धाएवसर्वेपुरुषार्थाः तेषुबंधुत्वेनापकारभयाल्लोकापकीर्त्तिभयाद्वादंभेनवायद्यर्चयंतितदानेदंफलंकिंतुम
यिधियाभगवद्विषयिकबुध्यामन्तनूरिति।अथवामयियाबुद्धिरस्तिब्राह्मणाःसर्वदृष्यास्म इति।तादृशबुध्याक्षिपतोगालीःप्रपठतोऽर्च
यंतीतिविरोधप्रदर्शनेनायमर्थः क्वचित्तेस्यतीतिभगवदुपकृतिर्नातिप्रसक्तेतिसूचितं।तत्रापितुष्यद्धृदः।तेचेत्क्रोधमंतरेवस्थापयेयु
स्तमहदनिष्टंस्यादितितेषांक्रोधस्यबहिर्निर्गमनेमहान्ममोपकारोजातइतिज्ञानंतदृदयतोषेहेतुःइदमपिमहात्म्यज्ञानेभवति।किंच॥
स्मितेनसुधारूपेणोक्षितंपद्मसदृशंवक्त्रं येषांमाहात्म्यज्ञानेविद्यमानेपिस्नेहेनैवरोषसहनंमंदहासस्त्वंतःक्षोभाद्यजननज्ञायकः तद्
स्मितेनसुधारूपेणोक्षितंपद्मसदृशंवक्त्रंयेषांमाहात्म्यज्ञानेविद्यमानेपिस्नेहेनैवरोषसहनं
नस्नेहरसस्तन्निष्पंडनेनप्रकटोभवतीतिबालवत्तेषामाक्रोशःपरमसंतापहेतुर्भवतीतिस्मितसुधत्वंतस्यामृतत्वंस्वकार्यंजनयतीति

येब्राह्मणान्मयिधियाक्षिपतोर्चयंतः तुष्यद्धृदःस्मितसुधोक्षितपद्मवक्त्राः॥ वाण्या
नुरागकलयात्मजवद्गृणंतःसंबोधयंत्यहमिवाहमुपाहृतस्तैः ११ ॥

तदुक्षितवक्त्रत्वमुक्तं।तथासतिचक्रमतिविकसितंभवतीतिवर्णस्यशाखाद्धर्मजनितयोराविर्भावइतिज्ञापनार्थंपद्मपदं।एवंमंतः
करणकायिकसंतोषमुक्त्वावाचनिकसंतोषमाह।वाण्येति।वाण्याअनुरागःकलाभवंतिचंद्रमसइवहृद्धिहेतवः।एवंकायवाङ्मनः
प्रीतिःपुत्रएवभवतीतिदृष्टांतनतथाकर्त्तृणांब्रह्मभावोनिरूपितः अर्चनंकायिकद्रव्यैर्गृणनंवाचासंबोधयंतीतिमवहारार्थंसम्य
ग्बोधयर्थंवाआक्रोशेपिनतेषुवैषम्यंकदाचिद्पीतिसूचितं।एतादृशानांदृष्टांतोऽहमेवस्तानार्थमेवमुक्तं।नतुस्वोत्कर्षार्थंय
थाभगवतिक्रमेमयाकृतमित्यर्थः।अहमुपाहृतइतिफलवाक्यंभिन्नमतोनपौनरुक्त्यं॥तेषामुत्कर्षार्थंप्रतिकीर्त्तनम्॥ ११ ॥

ग्र २ ६

Indira Gandhi National
Centre for the Arts

जीवभावात्मकं ५

एतन्निरूपणस्य प्रकृतोपयोगमाह॥ तन्मे स्वभर्तुरिति॥ यत एवं ब्राह्मणानां स्वरूपं मया वर्ण्यते तद्दानात् तौ युष्मद्व्यतिक्रमगतिं
नसु·१६ प्रतिपद्य भूयो मम अंतिकमितां॥ अयं मम अनुग्रहो भक्तिरहार्थः॥ अत्र हेतुर्नास्तीति मम इच्छैवायमनुग्रह इत्यर्थः॥ अधिकोप्यनुग्रहः कर्त्त
२३० व्य इति चेत्तत्राह॥ यत्कल्प्यतामिति॥ यस्मादनुग्रहाद् तयोः भक्त्योर्भगवत्यां हरि॰ तयोर्वा विवासः परदेशवासः अचिरतः कल्प्यतां
शीघ्रमेव परिसमाप्यतां॥ जन्ममरणक्लेशाभावात् शापो हि विवासत्वेनैवोक्तः॥ ममांतिकमिति पुनर्ब्रह्मभावं प्राप्नुतां॥ जीवानां तु त्र
योभावा उत्कर्षोत्कर्षहेतवः॥ जीवाः स्वभावतो दासा देहभावो धर्मतः १ ब्रह्मभावः स्वतः श्रेष्ठः ते स्वभाव इहैं स्थिताः देहभा जीवाः भागवद्भ्रात्र॰ वैकुंठे॰

तन्मे स्वभर्तुरवसायमलक्षमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य भूयः सद्यो म
मांतिकमितां तदनुग्रहो मे यत्कल्प्यतामचिरतो भृतयोर्विवासः १२ ॥

वस्तुतश्चापः स्वभावोनुग्रहः स्मृतः॥ सायुज्यब्रह्मभावः स्यान्नान्यथेति विनिश्चयः॥ सायुज्ययोग्यताकाले ब्रह्मभावो निरूप्यते॥ ३
भगवानेव हि ब्रह्म नान्यो भवितुमर्हति॥ एकं च ब्रह्म सर्वेषां तथात्वे तु विरुध्यते ४ भगवत्करणाल्लोके भावना दुर्बला मता॥
दासभावादतो नास्य कार्यं भक्तिकस्यचित् ५ अतो हि भगवान्भर्त्ता जीवानामिति निश्चयः अभिप्रायस्तु तस्यापि ब्रह्मभाव एम॰
मभीप्सुभिः॥ ६॥ ब्राह्मणातिक्रमो नैव कर्त्तव्य इति निश्चयः॥ अतो दंडस्तु सोढव्यो नो चेदग्रे फलं न तत् ७ एवं तयोर्भगव २३०
तां ब्रह्मशापः स्वीकृतः १२ ॥ व्याविवैकुंठे फलं दास्य१=
टी१४

एवं भगवान्प्रसन्नो जात इति ज्ञात्वा गर्तधियो मुनयः सम्यक् स्तोत्रं कृतवंत इति वक्तुं प्रथमं भगवद्वाक्येन तेषामाधिर्गत इत्याह॥
अथ तस्योशतीमिति त्रिभिः॥ भगवतो वाक्यं शब्दार्थभेदेन चिंतानिवारकं तत्र शब्देनैव निःसंदिग्धचिंता निवारिता॥ अर्थस्तु भगव
द्वाक्यानां सर्वतोमुखत्वादनिर्द्धारित इति स्वरूपतो निर्द्धारितोपि फलतो न निर्द्धारित इति सम्यक् चिंतां न दूरीकृतवान्॥ तथापि
दृष्टसामग्र्या बलवत्वात् सर्वमेवांतःकरणं चिंतावत्वेपि निर्मलं जातमिति श्लोकत्रयं॥ शब्दार्थसामग्रीभेदात्॥ प्रथमं शब्देन
तेषां सुखं जातमित्याह॥ अथेति भिन्नप्रक्रमोर्थपर्यालोचनाभावाय। उशतीं कमनीयां अनेन तस्य दुःखदूरीकर्तृत्वरूपमुक्तं॥
युक्त्यर्थविशेषणांतरमाह॥ ऋषिकुल्यामिति॥ ऋषिकुलयोग्यां ऋषयो हि मंत्रद्रष्टारः अलौकिकानुभवाश्च मंत्राः तत्र हितक

ब्रह्मोवाच॰ अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीं नास्वाद्य
मन्योर्दष्टानां तेषामात्माप्यतृप्यत १३ श्रीगोपालय नमः ॥

री॰ ततोप्यलौकिकानुभावा भवतीति स्वसामर्थ्यात् दुःखदूरीकर्तृत्वं॰ किंच देवीमिति द्योतकत्वात् कांत्यर्थाभवतिकाऽन्यथा
हृदयप्रकाशिका भवति॥ अतोपि दुःखदूरीकरणं॥ किंच॥ सरस्वतीमिति॥ सर इत्युदकनाम तद्वत्याधिदैविकी तितदुदकमप्य
तं भवति तेषां हृदयं मन्युनादष्टं मृतप्रायं तदमृतेन जीव्यते कांत्या प्रकाश्यते अलौकिकभावेन कार्यसमर्थं क्रियते परमानं
दश्च प्राप्यत इति चत्वारि विशेषणानि॥ एतादृशीं सरस्वतीमास्वाद्यापि स्थितानां आत्मा नात्यप्यत अलमिति नोक्तवान्॥ य
द्यथार्थकृतं सा तदार्थः पूर्णइति इच्छा पूर्येत॥ स्वरूपतः श्रवणे तु आनंदे अलंबुध्यभावात् न निवर्त्तते॥ सर्प दष्टे हि मंत्रेणाज
तं प्राप्यते न तु मृतत्यति विषज्वालाया भूयस्त्वात्॰ आत्मनोपि दंशो सर्वांगेष्वाला जातेति तस्य वदष्टा निरूपिताः १३ ॥

Indira Gandhi National
Centre for the Arts

न॰सु॰१६
२३१

एवंशहृतः फलमुक्त्वाअर्थानुसंधानेनापियज्ज्ञातंतदाह॥ सतीमिति॥साहिसन्मार्गप्रतिपादिकाअतःसमुदायार्थपरिज्ञानेनसुखं ज्ञातमेव॥व्यारायश्रवणमयाहृतकर्णरंध्रैः श्रवणेलब्धीसास्वरूपतः तैनालोचयितुंशक्यतइतिसुखदायिनी॥ एवंविशेषणाद्वये नार्थद्वारेणापिसुखदातृत्वंनिरूपितं॥ फलतःसाधनतश्चनसुखदातृत्वंज्ञातमित्याह॥ गुर्वर्थगह्वरमगाधगंभीरमिति॥ अर्थोहिगं भीरः पुरुषोत्तमस्यभगवतः हीनानांसेवकजीवानांचविपरीतधर्मप्रतिपादकत्वात्॥ अतपदार्थानांकृतार्थापत्त्यानिर्णयंकृत्वा संदेहोदूरीकर्त्तव्यइतिचेत्तत्राह॥ अगाधगंभीरमिति॥ अगाधत्वात्नतत्रकृतार्थापत्तिःकल्प्यतेपदार्थानांतलस्पर्शेतत्कल्पना युक्ता॰गंभीरत्वाच्चमज्जनेनापितलस्पर्शोनभवति। एतावताभगवान्किंचित्गंभीरमुक्तवानित्यध्यवसीयते॥ तथापिकिमर्थमे

संनीयादाययमस्रवंतोलब्धीगुर्वर्थगह्वरं॥ विगाह्यागाधगंभीरंनविदुस्तच्चिकीर्षितं १४
तेयोगमाययारब्धपारमेष्ठ्यमहोदयं॥ प्रोचुःप्रांजलयोविप्राप्रहृष्टाःकुपितत्वचः १५

वंवदतीतितच्चिकीर्षितंनविदुः विगाहनमंतःप्रवेशःविचार्यापिनविदुरित्यर्थः १४ एवंवाक्यंकिंचिद्ज्ञात्वाकिंचिदज्ञात्वापिभगवंतंद्द ष्ट्वामुदिताःसंतःस्तोत्रंकृतवंतइत्याह॥ तइति॥ योगमायाहिभगवद्योग्यान्पदार्थान्सृजतिनतेप्राकृताःनापिब्रह्मसृष्टाः॥ अतः परमेष्ठ्येकृयापिमहोदयरूपाःयोगमाययाआरब्धाःपारमेष्ठ्यमहोदयाःयस्यअतःसामग्रीदृष्ट्वापरमानंदोबहुविधोभास तइतिप्रहृष्टाजाताः॥ स्वयंविप्राअपिमनसाअपिताहृशंनाकलितमितिमाहात्म्यज्ञानात्प्रांजलयः तद्दर्शनेनांतःपूर्णानंदःऐ एव॰ मकूपद्वारेणनिर्गच्छन्कुपितांत्वचंकृतवान् साहिवायुदेवताकावायोश्चसंचारेणाल्लीतिकोपउचितएव॥ कुभितइतिपाठेपिस २३१
मानोर्थः १५ ॥ ॥

नदा२

विरोधंपरिहरंतएवस्तोत्रंकुर्वाणाःप्रथमंविरोधमनुवदंति॥ नवयमिति॥ विरुद्धार्थप्रतिपादकत्वेसतिनविरोधःकिंतुमनसातद्व्यवस्था ऽअशक्तौसत्यां॥ मनोहिवाचोभर्त्तासचेत्तन्मध्ये अविरोधसंपादयति किंदासानांविरोधेनतदृपिनास्तीतिस्वानुभवेनाहुः॥ हेभगव न्सएवतदनंतरंदेवतवचिकीर्षितंनविद्मः ज्ञानेत्वभिप्रायःकल्प्येतअकल्पनायांहेतुभूतंविरोधमाहुः कृतोमेनुग्रहइति॥ यत् त्वमध्यक्षःसर्वसाक्षीप्रभुःसेवकान्प्रतिवदसिअनुग्रहःकृतइतितदर्थतोविरुद्धं १६ विरोधांतरमाहुः ब्रह्मण्यस्येति॥ त्वंतुब्रह्म

मुनयऊचुः॥ नवयंभगवन्विद्मस्तवदेवचिकी षितं॥ कृतोमेनुग्रहश्चेतियदध्यक्षःप्रभाषसे १६
ब्रह्मण्यस्यपरंदैवंब्राह्मणाःकिलतेप्रभो॥ वि प्राणांदेवदेवानांभगवानात्मदैवतं १७ ॥

कर्मज्ञानमार्गेर

ण्यःब्राह्मणानांहितःतेषांपुरुषार्थसाधकत्वेनतदुपास्यः अथापिब्राह्मणाःकिलतेपरंदैवतमितिमतिभाषसे॥ किलेति प्रसिद्धौनहितद्वाक्येनब्राह्मणप्रभुत्वप्रतिपादकेनयेषांबिभमीत्यत्रसंदेहोस्ति मार्गभेदेनतदुभयंसंगच्छतइतिपक्षंखंडयंति॥ प्रभोइति॥ सर्वसमर्थोभवाननकेनाप्यंशेनब्राह्मणापेक्षातेयुक्तेत्यर्थः॥ किंचविप्राणांदेवानांदेवदेवानामपिभगवानात्मदैव तंआवश्यकउपास्यश्चआत्मनोवादैवतंचिदंशानांभगवत्सेवकत्वात् १७ ॥ श्रीगोपालनमः ॥ श्रीगोविंदयनमः ॥

ब्राह्मणदेवकत्वंब्राह्मणदेवत्वंचभगवतः

तमु १६
२३२
निर्विशेषम १८१

नन्वस्य तुक्तप्रकारेणैव वेदो वदतीति तथैव शास्त्रार्थोऽस्त्वित्याशंक्याहुः ॥ त्वं न इति ॥ त्वमेव नः सनातनो धर्मः यज्ञरूपत्वात् ब्रह्मस्वरूपत्वाच्च ॥ यज्ञेन यज्ञमयजन्त देवाः ॥ अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति ॥ त्वय्येव तनुभिरवतारैः स्वधर्मो रक्ष्यते ॥ यदा यदा हि धर्मस्येति वाक्यात् किंच ॥ त्वं धर्मस्य परमो गुह्यः धर्मस्यात्यंतं गोप्यस्त्वमेव ॥ धर्मो ह्यन्यगतः धर्मिणं गोपायति यथा जलगतमोह्यं वह्निं गोपायति ॥ तथा जीवेष्वागतो धर्मः ब्रह्म गोपायति ॥ स हि तस्यैव ॥ क्रियाशक्तिरूपत्वात् ॥ तस्य गोप्यो हि भक्तियोगो पि भवति ॥ तथापि भगवान् परमो गुह्यः ॥ तस्य ब्रह्मैव गुह्यमिति कथं भवानित्याशंक्याहुः ॥ भवानेव निर्विकल्पो मत इति ॥ पूर्ववद्वेति सिद्धांते न सर्वकल्पनाशून्यं

श्लो १

त्वं नः सनातनो धर्मो रक्ष्यते तनुभिस्तव ॥ धर्मस्य परमो गुह्यो निर्विकैभवान्मतः १८ तरं-
तिह्यंजसामृत्युं निवृत्ता यदनुग्रहात् ॥ योगिनः स भवान् किंस्विदनुगृह्येत यत्परैः १९

ब्रह्म तदेव पश्चात् धर्मरूपेण विर्भूयत तस्य हि तं भगवानित्युच्यते ॥ भगवतो वा एकं रूपं निर्विकल्पकं ब्रह्म उभयथापि धर्मस्य परमो गुह्यः १८ ज्ञानस्यापि गुह्य इत्याहुः तरंतीति निवृत्ताः परमहंसाः यस्यानुग्रहं प्राप्य अंजसा मृत्युं तरंति ॥ उभयतः कूलंकषा नदीव मृत्युः सर्वेषां मज्जनकर्त्री अतस्तस्य तरणमुक्तं ॥ योगिन इत्यधिकारिविशेषणं मनुग्रहे ॥ एं तु तरणे योगो हेतुः ॥ एतादृशो भवान् सर्ववेदरहस्यं ॥ किमन्यैरनुगृह्येत तत्रापि परैः अप्रयोजकैः ॥ गृह्णीत इत्यपि पाठे परैः कृत्वा यत्कर्म किमर्थं स्विदिति निश्चये अनुगृह्णीत किमर्थमनुगृह्णीयात् ॥ अन्यैः स्वस्य माहात्म्यं संपाद्य परैः अनुग्रहं किमर्थं कुर्यादित्यर्थः ॥ एतादृशस्यास्यानुग्रहवचनं बाधितार्थमिति प्रभाति ॥ हत्यवाक्यत्वाच्च तदपि न संगच्छते इति अतः अज्ञानमेव १९ ॥ श्रीगोपालाय नमः ॥

एम० तत्प्रति
२३२

---

ग्रहदारे

लक्ष्म्या

किंच ब्राह्मणकृपया लक्ष्मीः स्थिरेति वचनं बाधितार्थमिति प्रतिभातीत्याहुः ॥ यं वै विभूतिरिति विभूतिर्लक्ष्मीः यं भगवंतमनुवेलं अन्यैरर्थार्थिभिः शिरसा धृतपादरेणुरपि उपयाति सेवार्थं गच्छति ॥ तत्रापि भक्तेव तां च भवान् नात्याद्रियत ॥ स कथं द्विजानुपथपुण्यरजसा पूतः सन् श्रीवत्सलक्ष्म अगा इति श्लोकद्वयान्वयः ॥ विप्रप्रसादाल्लक्ष्म्याः स्थैर्यमिति पक्षो न संगच्छते ॥ भक्त्यैव तस्याः स्थिरत्वात् न च तस्याः भक्तिः ब्राह्मणसाध्या भक्तौ ब्राह्मणानामपि भक्तत्वेनैवोपयोगात् ब्रह्मभावानंतरं भक्त्यधिकारात् ब्रह्मभावप्रपन्नार्थं तदपेक्ष्येति चेत् ॥ तस्याः सिद्ध एव ब्रह्मभावः ॥ मम योनिर्महद्ब्रह्मेति वाक्यात् ब्रह्मानंदरूपत्वाच्च तच्छरीरस्य ॥ अतः सा कृतार्थपरया वा तस्याः भक्तौ ब्राह्मणानामनुपयोगात् ॥ भक्त्यैव च स्थैर्यात् भगवद्वाक्यं चिंत्यं ॥ किंच ॥ ब्राह्मणाः भिक्षुकाः ४ अर्थार्थिनामिं-

यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः ॥ धन्या-
र्पितांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना २० ॥

तं पादरेणुभिः स्पृ:

इंद्रादय १= द्वारीनामुपसर्पकाः ते च लक्ष्म्याश्चरणरेणूपासकाः अतः उपजीव्योपजीव्यत्वात् तस्याः कथं ब्राह्मणाधीनत्वं किंच सा हि भोग्यभावमेव त्यक्तवतीति न तस्याः फलत्वमेव नास्ति सा हि रसांतरप्रविष्टा न हि भक्तिरसे कामरसः प्रविशति ॥ भगवानपि येयथा मां प्रपद्यंत इति वाक्यात् भक्तत्वेनैव तां स्वीकरोति ॥ यथा तुलसी ॥ अतः तस्या गुणा अपि नापेक्ष्यंते ॥ सा हि तुलसीमपि निर्गुणां वकृम्यते ततोऽपि हीनभावं च भ्रमरनानापुष्परसेष्वासक्ताः ते पियदि भक्तिमाहात्म्यात् तुलसीरसे एवं मकरंदाभासे व्यासक्ताः तदा मयापि तथैव विधेयमिति भ्रमरलोकमेव कामयते ॥ एवमपि सति लक्ष्मपदासा पुनः स्वभावं प्राप्स्यतीति भक्तत्वेपि तां नात्याद्रियत ॥ तदपेक्ष्यापि स्वभावतस

भक्तस्वरूपं १

Indira Gandhi National Centre for the Arts

भागवति २

तस्मु १६ २३३ वनिर्दिष्टाभागवतिलक्षपदा अपिहेतुभावात् नपूर्वावस्थां प्राप्नुवंतिपरमभागवताः॥ तेष्वेवप्रकृष्टः संगोयस्यएताद्दशलक्ष्म्याःक
च्यप्रसाधारणधर्मत्वं तत्राहयतस्त्वंभगभाजनइतितत्रापिभगवान् भगवच्छब्दार्थःनित्याएवभगवतिषड्गुणाः॥ ब्राह्मणानुग्रहजन्म
त्वेकृत्रिमतास्यात्॥ व्यामोहनलीलापरत्वेनतुअलौकिकप्रकारेणवर्यनव्यामोहनीयाःसाधारणेनतुविशेषज्ञानस्यज्ञातत्वात्न
व्यामोहोभविष्यतीतितात्पर्य॥ विशेषेणभूतिर्यस्येतिभगवद्भजनेभगवदुपयोगिनीसर्वासामग्रीनिरूपिता॥ तस्याःसमीपगमनमेवन
तुभोगपर्यवसानमित्युक्तं॥ अस्मैरतिभगवद्विमुखैःभगवद्वैमुख्येहेतुः॥ अर्थार्थिभिरिति॥ धनाभिनिविष्टचित्तानभगवत्संमुखा
भवंति॥ बालाएवलालनपात्राग्राःमातरमेवमन्यंते स्वशिरसाधृतपादरेणुरिति॥ भक्त्यैवान्येषांप्रवृत्तिःतेषांच येषामुपास्यदेवता
तस्याअपिचरणरेणवःतदीयशरीरसंपादकाः शिरसास्थापनंतेषामेवप्रथमसंबंधार्थं॥ तुलस्याअलौकिकत्वेतल्लोकाकांक्षित्वं
नभक्तिहेतुकमितिधन्यार्पितेत्युक्तं॥ कृत्रिममात्रत्वेभगवत्संबंधोनसंभवतीतिधन्येतिधनमर्हतीतिधन्याःलक्ष्म्याआधिभौति
करूपमर्हतीतिभगवद्भूतानिसेवकाधन्याः अन्येधनिनोपिनधनमर्हंति॥ स्थानइवगंगाजलं॥ अतएवनतस्यधनस्यभगवदुप
योगःधनस्यस्वोपयोगात्तदधिकातुलसीभक्तैर्भगवतिसमर्प्यते॥ अंघ्रौसमर्पणंभक्तिहेतुकं॥ तुलस्यानवदामचरणेसमर्प्य
ते॥ [redacted]
॥ अन्यथाबकृतुलसीदानेचरणआच्छन्नःस्यात्॥ तद्भगवच्चरणारविंदएवतिष्ठति॥ भक्तप्रसादेवातत्कंठेषु॥ उभयथापिन्ने
ताद्दशंस्थानमन्यत्रलीतितद्दामभ्रमरस्य॥ तथात्वेहेतुमाहुः॥ मधुव्रतपतेरिति॥ मध्वेवव्रतंयस्यनियमाद्धर्मइतिपरस्मैमधुव्र एम॰
तेपिधर्मःमधुव्रतानांपतिरितिव्रतिनामिवतत्संबंधित्वेनकृतार्थःपरंपरयापीतिसूचितं॥ इवेतिब्रह्मानंदस्यहीनभावव्याहृत्य २३३
र्थमुपमानिरूपिता॥ कामयानेवेतिकामितोर्थःश्रद्धायुक्तोभवतीति २० ॥ श्रीगोपालयनमः ॥

१४

भागवतं २

एवमपिभजनेभगवतश्चेत्तत्फलंभवेत्तदापिब्राह्मणवाक्यहेतुत्वंकल्प्येतापितदपिनालीत्याहुः॥ यस्यामिति॥ यः प्रसिद्ध
लक्ष्म्याःप्रसादत्वंवदति॥ सोपिवरस्त्रैवनतुतांमन्यते यतःतांनात्याद्रियत तत्रहेतुः परमभागवतेषुप्रकृष्टःसंगोयस्येतितेहि
परमाःअसाधारणाःलक्ष्मीसहितंनोपासते॥ अंशेनसेवायाव्यभिचारात्॥ अतस्तदनुरोधेनापिनलक्ष्म्यासहरमणं॥ एताद्द
शःत्वंद्विजानामनुपथ्यंयत्पुण्यरजनैनेवहूतःकिंतत्रभगवतोद्विजानुगमनमेवनसंभवति॥ ईश्वरत्वात्॥ नेहियादृचारिणः॥ अ
भागवतं

यस्यांविविक्तचरितैरनुवर्त्तमानांनात्याद्रियत्परमभागवतप्रसंगः॥ सत्वं
द्विजानुपथपुण्यरजःपुनीतःश्रीवत्सलक्ष्मकिमहोभगभाजनस्त्वं २१

र्थार्थ्यनुवर्त्तकाश्च॥ दूरेतद्रजसः पुण्यत्वंमार्गरजसः अपवित्रत्वात्तेनचपावित्र्यंततोपिदूरे॥ श्रीवत्सरूपंलक्ष्मचिह्नंकि
किमर्थंत्वमगाःप्राप्तवानसि॥ यतस्त्वंभगभाजनःसहजश्र्यादिधर्मयुक्तः २१ एवंदिएधमुक्त्वातस्यतात्पर्यंकल्पयंतोधर्म
रक्षार्थवचनमितिकल्पयितुंधर्मोभगवतासर्वथारक्षितइतिधर्मरक्षाहेतुत्वार्थमाहुः॥ धर्मस्येति॥ हेत्रियुग युग
त्रयएवभगवद्वाविर्भावो॥ नकलौ॥ अतएवकलौधर्मोपि ॥ ॥

Indira Gandhi National
Centre for the Arts

श्रीर.

स्क० १६ २३४ नास्तिरक्षकाभावात्॥ युगत्रयएवभगवदाविर्भावेतत्रैवरक्षायांचहेतुमाहुः त्रिभिः स्वैःपद्भिरिति॥ भगवान्त्रिपात्यज्ञस्स
वनत्रयात्मकत्वात्॥ स्वैरसाधारणैः॥ अतोद्विपात्चतुष्पाच्चलोकस्तिद्ध इतितद्बलरूपंनदोषाय॥ पद्भिरितिवाद्वित्वसंख्या॥
तेनपद्भुणेषुद्वाभ्यांद्वाभ्यामेकैकस्मिन्युगेधर्मरक्षा॥ ज्ञानवैराग्याभ्यांसत्ये॥ यशःश्रीभ्यांत्रेतायां। ऐश्वर्यवीर्याभ्यांद्वापर इति॥
कलौनकोप्यवशिष्यते॥ धर्मोधर्मरक्षकः किंच। सत्वेनपाल्यतेधर्मः॥ केवलसत्वस्यप्रवृत्तिःसत्ये रजसासहितस्यत्रेता
यां॥ सत्वसंबंधयोग्येनरजसातमसाचद्वापरेधर्मरक्षा॥ कलौतुसत्वस्यतत्संबंधिनश्चाभावात्नरक्षा॥ जगदपिभगवताध
र्मार्थमेवरक्षितंइत्याहुः॥ चराचरमिति॥ यद्यपिधर्मोपिभगवान्जगदपितथापिधर्मार्थमेवजगत्पाल्यतेतदाहुः द्विजानांदे
पद्मि ७१८ धर्मस्यतेभगवतस्त्रियुगत्रिभिःस्वैःपद्भिश्चराचरमिदंद्विजदेवतार्थं
नूनंभृतंतदभिघातिरजस्तमश्चसत्वेननोवरदयातनुवानिरस्य २२ ॥
वानांचार्थइदंजगत्नूनंभृतमिति॥ ननुस्वरूपेणैवात्रधरणंकिंसत्वेनगुणैर्वेत्याशंक्याहुः तस्यजगतः अभिघातिनाश
कंरजश्चतमश्च विक्षेपेणमारयतिरजः।आवरणेनतुतमः॥ उभयथापिजगत्धर्मार्थंनभवति॥ अतोरजस्तमश्चसत्वे
ननिरस्यनूनंभृतमितिसंबंधः॥ सत्वस्योभयनिराकरणेसामर्थ्यमाहुः।नोवरदयातनुवेति॥ ब्रह्मादीनांवेदानांऊर्ध्वगति
दातृत्वात्वरद त्वंअन्यदपीष्टंप्रयच्छतीतिचतदेवसत्वंतनूरूपंजातं॥ तनोतीतितनुः।अतोऽनंतस्वरूपजननसाम स्क०
र्थ्यात्तयोर्निरसनसामर्थ्यंअतत्वंधर्मरूपःदेवब्राह्मणेषुप्रतिष्ठितइतिब्राह्मणोत्कर्षःतद्रक्षापरनामेतिअंतःप्री २३४
तिहेतुत्वात्तथोक्तइतिभावः॥ २२ ॥ २२ ॥

अनन्तभवानेवगोपायक्त्वकोपप्यत्तयास्तिर

विपरीतेबाधकमाहुः॥ नत्वमिति॥ यदित्वंद्विजोत्तमकुलंनगोप्तातर्हितववशिवोवेदपंथाःनंस्यति॥ तत्रहेतुः॥ लोकोग्रहीष्यदि
ति॥ ऋषभस्यप्रभोःयत्प्रमाणंतल्लोकःअग्रहीष्यत्॥ द्विजोत्तमानांधर्मज्ञानसहितानांकुलंसमूहः यद्यस्माकारणात्यद्वाकुलंआ
त्मगोपंआत्मानंस्वात्मानंवाभवंतंगोपायतीतिआत्मास्थितश्चेत्स्वमार्गंगच्छेत्॥ अतश्चात्मप्रयत्नतोरक्षणीयः॥ तदंनंतरंस्वमा
र्गरक्षा॥ स्वात्मानंप्रतियेसमायांतियेनमार्गेणसस्वमार्गः॥ तत्रापिभक्तानामागमनप्रतिबंधकनिवृत्तिरेवरक्षातेचेद्भगवद्रूपकाभ
वेयुःधर्मज्ञानयुक्ताश्चेत्भक्तिमार्गप्रवर्त्तकाः तदातेरक्षणीया इत्यर्थः। तेषांरक्षा त्रिविधास्वरूपतःहंतोवर्जनंनेतःप्रतिष्ठांज
ननेचबहिः। तत्रस्वरूपतोरक्षावक्तारैःक्रियतएव॥ अथावशिष्यतेअंतर्बहिश्चतदाहुः स्वर्हणेनसस्रुत्ततेनेति॥ सुष्ठुअर्हणंपू
नत्वंद्विजोत्तमकुलंयदिहात्मगोपंगोप्तावृषःस्वर्हणेनससूनृतेनं तर्ह्येविनं
क्ष्यतिशिवस्तववेदपंथालोकोग्रहीष्यदृषभस्यहितत्प्रमाणं २३ ॥
द्विजो ना १ जाकायिकीतेनबहिरक्षातेषांप्रयोजनसाधिका॥ अन्यथालोकसंमाननाभावेभगवन्मार्गोपदेशेनस्यात्सूनृतेनचअंतःप रि
तोषोनेनोक्तः एतस्यसहभावः अंतस्तोषस्यभगवत्कार्यहेतुत्वायअतोमार्गप्रवर्त्तकरक्षाभावेमार्गोनश्येदेव॥ तर्ह्येवेतिपाखंडप्र
वृत्तेः सुगमत्वात्॥ ननुबहूनांमार्गाणांविद्यमानत्वात्किंवेदमार्गेणेत्यतआहुः शिवइति॥ अन्येयादृच्छिकाः॥ कस्यचिद्देवदुःखे
नापिफलसाधकाः वेदमार्गस्तुशिवःकल्याणरूपः।ननुब्राह्मणानांसम्माननाभावेकथंवेदोनरक्षितःस्यादित्याशंक्याहुः लोको
ग्रहीष्यदिति॥ लोकस्तुस्वामीभगवान्यंमन्यतेतमेवमन्यते॥ ब्राह्मणैरेववेदमार्गोबोध्यतेनान्यैरितितेषांसंमाननाभावेअप्र वे ८५०
वृत्तिःपाखंडतुल्यतावास्यात्तदृषेतिसंबोधनंधर्मरूपत्वायवर्णणाद्वा २३

Indira Gandhi National
Centre for the Arts

नम्र१६
२३५

नन्वेवंसतिवैषम्यप्रतिपादनात्ममब्रह्मत्वंनस्यादित्याशंक्याहुः तन्नेनभीष्टमिति॥तद्ब्रह्मणानांरूपार्थसम्मानतनंतेन भीष्टमिव॥अथवापूर्वश्लोकेवेदमार्गनाशउक्तः अतस्तद्वेदनाशनंतेनभीष्टमिव·सर्वथाभीष्टाभावः अनभीष्टंअ त्याभीष्टाभावत्वनभीष्टमिव॥प्रथमपक्षेदृष्टेवार्थः द्वितीयेनाशस्यकालत्वात्सर्वकर्तृत्वाच्च॥तत्रहेतुः॥सत्वनिधेरिति॥ अथवासत्वनिधेः रक्षाभीष्टानाशत्वनभीष्टः।विधित्सोरितिसएवतथाविधातुमिच्छति।जनायहिक्षेमंविधातुमिच्छ ति॥जायमानाःस्वकृतेनैवसम्पग्रवंतीति॥अथवा॥सत्वनिधेर्नाशः अनभीष्टः जनानांक्षेमकरणेतन्नाशः।उत्पत्तेवे दनाशएवभवति उत्पत्त्यर्थेक्षेमंचेत्उत्पन्नानांवैदिकसंस्कारत्वेपाखंडादुर्बलत्वं॥पुरुषार्थप्रतिपादकत्वेदेहनिर्वा हकपाषंडात्बलिष्ठत्वं॥निजशक्तिभिःउद्धतारेरित्कभयत्रहेतुः॥स्वस्यासाधारणसामर्थ्येनैवउद्धताअरयोयेन॥उभ

तन्नेनभीष्टमिवसत्वनिधेर्विधित्सोः क्षेमंजनायनिजशक्तिभिरुद्धतारेः॥नैतावता
त्र्यधिपतेर्बतविश्वभर्तुस्तेजःक्षतंत्ववनतस्यसतेविनोदः २४ श्रीगोपालयनमः

यत्रापिप्रतिबंधकाभावोभगवंतक्तेवसिद्धः॥ननुतथापिस्वस्यदोषजननेपरोपकारःसिध्यति॥धर्मरक्षायांत्वेकएवदो षइतिचेन्नत्राहुः नैतावतेतिस्वस्यनमनमात्रंनूदाषः नम्रतानमनमितिक्कत्वतेः तन्मम्भावोहीनानामेवहीनत्वबोधकः॥ उत्कृष्टानांतुभारसूचकएव येहिमहाभारवंतोभवंतितेनम्राभवंति॥अतोनम्रत्वमनम्रत्वंवानैकांततोदोषरूपंगुणरू पंवा॥अतस्तवमहत्वंसिद्धमितिहीनावनतिःकौतुकार्थंभवतिअभिनयरूपत्वात्॥सएवहिरसजनकः॥महत्वमाहुः त्र्यधि पतेरिति बतेतिहर्षः स्वस्तिस्मानतापरिज्ञानात्॥विश्वभर्तुरितिभर्तुरित्यपिमाहात्म्यं॥विश्वंहियोबिभर्तिसहिलोकेभा एक्रांतइवनम्रोभवति॥अन्यथालोकाभर्तुर्भारंनज्ञापयेयुः॥अतोनमनस्यप्रयोजनद्वयंलोकेस्वस्यभर्तृत्वज्ञानंस्वार्थेतु

विनोदः। अवनतस्यापिवनतिरूपः परार्थ्यविनोद
इतिसंबंधः अतेनदीपःपरिहृतः २४ सत्वनाशः

एम०
२३५

पप्रकरणस्या लेख२

एवंपूर्णांतःकरणभूत्वाभगवतायोदंडःस्थापितः तत्राप्यभिप्रायापरिज्ञानात्स्वापराधंदूरीकुर्वंति॥यंवानयोरिति हेअधीश अस्माकंतयोश्च अधिकेशत्वंनामवेदयुक्त्याद्यपेक्षयापिवेदादीनांनियामकत्वंवा॥अतएवअस्मदुक्तमप्रयोजकं॥अनयो र्भवानहर्त्ता।यंवादमंविधत्तेतदनुमन्महेहर्त्ताजीविकांद्वारिस्थित्वासर्वेषांनिवारणंकर्त्तव्यंतदानिवारिताःस्वप्रवेशार्थंस्वकी यंचनंधर्मंवादास्यंतीतिहर्त्तादानं।स्वयंवाद्वारेपरिपालनंकरोतीतिस्वतंत्रतयाहर्त्तादानं॥अस्मदुक्तोवादंडः अन्योवायमे वदंडंभवान्विधत्तेतदनुमन्महि॥भवदिच्छानंतरमस्माभिरपिस्वीक्रियतइतिअनुमननं॥तदपिनानुरोधात्किंतुनिर्व्यली

यंवानयोर्दममधीशभवान्विधत्तेहर्त्तिनुवातदनुमन्महिनिर्व्यलीकं॥अस्मा
सुवायउचितोध्रियतांसदंडोयेनागसोवयमयुंत्महिकिल्बिषेण २५ ॥

कं॥स्वस्यापिअपराधात्दंडश्चेत्तदप्यंगीक्रियतइत्याहुः॥अस्मास्विति॥वेत्कभयत्रानादरे॥संकोचोनकर्त्तव्यइत्यभिप्रा यंणाहुः॥यउचितइति॥ध्रियतांसदंडइति इदानीवाक्यमात्रमुक्त्वाअन्येनतत्फलंसंपादनीयमितिनकिंतुइदानीमेवस येणाहुः॥यउचितइति॥ध्रियतांसदंडइति इदानीवाक्यमात्रमुक्त्वाअन्येनतत्फलंसंपादनीयमितिनकिंतुइदानीमेवस दंडोऽस्मासुस्थापनीयः॥अथवासएववादंडः जन्मत्रयात्मकः अस्मासुस्थापनीयः॥तत्रस्वस्यापराधमाहुः॥येनकारणे नअनागसोनिरपराधोवयंकिल्बिषणेअयुंत्महियोजितवंतः॥सदंडःसहैवोभयेषांजन्मत्रयमिति॥अस्मासुवेतिप क्षेतेषांदंडोस्तुवेत्यौदासीन्यं॥एवंसर्वभावेनभगवतोमाहात्म्यंनिरूपितं॥२५ ॥

Indira Gandhi National
Centre for the Arts

त०स्पु०१६
२३६

भगवांस्तुशापात्भीताइतितान्ज्ञात्वाशायभवनंस्वकृतमित्याह॥ एताविति॥ सुरेतरगतिं दैत्यत्वंराक्षसत्वंमनुष्यत्वंच॥ इतरत्वं समानंभवतीतिअसुरमनुष्ययोर्देवतुल्यत्वंद्वयाह प्राज्ञापत्याइत्यत्रनिरूपितं॥ एकस्याअपिवीजपराक्रमाभ्यांदेवतुल्याइति॥ यक्षाद्यस्तुनत्वंत्राः॥ कुवेरस्तुदेवएव॥ अतस्त्रिविधामेवसुरेतरगतिंप्रतिपद्यसद्यभूयोपमांतिकमुपयास्यतः॥ योवःयु ष्माभिर्दत्तः शापः समयैवनिहितइतितद्वैत॥ निमितइतिपाठेतुनितरांमयैवमितः॥ विप्राइत्यदीर्घदर्शित्वं॥ ननुसुरेतरगति प्राप्तौशीघ्रंकथंभवत्समीपागमनंतत्तज्जन्मकर्मणांभोक्तव्यत्वातइत्याशंक्याह॥ संरंभसंभृतसमाध्यनुबद्धयोगाविति॥ क्रोध संरंभेणसम्यक्भृतोयःसमाधिस्तेनानुबद्धोयोगः॥ योगेनसर्वपापक्षयइतिश्रुर्वमवोचाम॥ भूयःसकाशमुपयास्यतइति॥ शा पांतःपरिमितशापस्थानंमत्कृतःशापइत्यवेतइतिनिर्भयार्थः॥ २६॥ एवमागतानांमुनीनांसर्वदुःखदूरीकरणमुक्तं॥ इदानीस

श्रीभगवानु० एतौसुरेतरगतिं प्रतिपद्यसद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ भूयःसकाशमुपयास्यतआशु

योवःशापोमयैवनिमितस्तदवैतविप्राः २६ ब्रह्मो० अथतेमुनयोदृष्ट्वानयनानंदभाजनं॥ वैकुंठंतदधिष्ठानं

विकुंठंचस्वयंप्रभुं २७

वैष्यांयथायथंप्रतिगमनमाह॥ अथेति॥ तत्रप्रथमंयोगिनांप्रतिगमनंद्वाभ्यामाह कृतकरि

ष्यमाणप्रमेयभेदेन अथेति पुनस्तेस्वभावंप्राप्ताः॥ यतोमुनयः॥ यस्यानिष्ठातस्यसएवगुणः॥ विपरीतोदोषः॥ तेदृष्टंतरेवभगवंतं पश्यंति॥ नबहिः॥ बहिर्दर्शनंचनोपकारीतिप्रतिजग्मुः॥ बहिर्दर्शनेएकोगुणोजातइत्याह॥ नयनानंदभाजनमितिइंद्रियाणिहि परमैश्वर्यसंबंधात्सुखंपंचधाविभज्यरूपादिभेदेनतस्मानंदमनुभवंति॥ करणत्वाज्जीवस्यापिसुखजनकानि॥ अयंचभगवाना नंदमूर्त्तिलावण्यपूरइतिनयनानंदस्यभाजनं॥ तद्भाजनंद्वयमपीत्याह॥ वैकुंठंतदधिष्ठानंविकुंठंचेति॥ ननुउभयोस्तुल्यतयान यनानंदभाजनत्वंकथमुच्यतेतत्राह॥ स्वयंप्रभुमिति॥ लोकःस्वयमेववैकुंठेपिस्वयंतथापिप्रभुत्वेनभगवत्स्फुरणेलोकत्वेनत

तत्स्फुरणात्अक्रूरस्यभगवत्वाच्चउभयोस्तथात्वमित्यर्थः २७ ॥

स्क०
२३६

१

अग्रिमकृत्यमाह॥ भगवंतंपरिक्रम्येति॥ प्रदक्षिणानमस्कारआज्ञाप्रार्थनमेवच॥ आगत्यतोषभावश्चगमनेस्तोत्रमेवच॥ समा गतानांपंचांगंतोषलक्षणमुच्यते॥ यथाऽगतिगतिःकार्येप्रसंगंवारयेदिति २ प्रतिजग्मुः आगमनप्रकारेणैवपुनर्गताइत्य र्थः॥ बहिर्दर्शनस्यअधिकत्वात्प्रकर्षेणमुदिताः॥ वैष्णवींश्रियमितिशांतिप्रसादलक्षणा सर्वस्मादयमेवविशेषः २८ भग वतोनिर्गमनंवक्तुंसेवकयोःसमाधानमाह॥ भगवानिति॥ अनुरोधेहेतुः अनुगाविति॥ तेषांवाक्यविश्वासेकारणंभगवानिति॥ यातमित्याज्ञा शापेनगमनाभावार्थः॥ अनेनतयोःस्वधर्मोरक्षितः॥ अतएवमाभैष्टंशापेनगमनेस्वतिभयंभवति॥ ननुकृतेका

भगवंतंपरिक्रम्यप्रणिपत्यानुमान्यच॥ प्रतिजग्मुःप्रमुदिताःशंसंतोवैष्णवींश्रियं २८

भगवाननुगावाहयातंमाभैष्टमस्तुशं ब्रह्मतेजःसमर्थोपिहंतुंनेच्छेमतंतुमे २९

रणेकथंफलंनभविष्यतीत्याशंक्याह॥ अस्तुशमिति॥ भवतांकल्याणमस्तु॥ इदानींसालोक्यंगतानांतुसायुज्यंभविष्यतीत्य र्थः॥ इदानींलोकेकौचिद्भवंतौपश्चाल्लोकरूपावेवभविष्यतइतिलोकायकल्पतामितिवाक्यंचरणपदमपितमेवार्थवक्ति॥ प्रविष्टयोश्चरणाभावश्चसिद्धः॥ नेकर्यंतुतदामहत्॥ किंब्राह्मणानामनुरोधेनैवंक्रियतेनेत्याह॥ ब्रह्मतेजइति॥ ब्रह्मास्त्रं किलदूरीक्रियतेआधिदैविकंब्रह्मतेजः॥ इदंत्वाधिभौतिकं॥ अतःसमर्थोपिब्रह्मतेजःहंतुंनेच्छेस्वस्यानुपयोगित्वात्॥ अ तोमममतं॥ तुइतिनिश्चयेन॥ अभिप्रायंतुभगवानेवजानातिवचनात्नकल्प्यतेकल्प्यमानोपिकार्यानुरोधेनकल्पनीयइ

ति २९ श्रीराधावल्लभायनमः ॥ ॥

म१

कोधस्तुपंतेजः २८

Indira Gandhi National
Centre for the Arts

हेतुनाहोमीद–

न॰सु॰१६ २३७ तर्हिब्रह्मशापस्यकागतिस्तत्राह॥ मयीति॥ ब्रह्मशापस्यप्रायश्चित्तंकर्त्तव्यं।प्रायश्चित्तानंतरंहिपुरुषःशुद्धः शुद्धस्यैवहिविहितंक
र्त्तव्यं॥भगवद्भक्तानांचप्रायश्चित्तंभगवत्स्मरणमेव॥ तच्चस्मरणंलौकिकंभवति॥शुद्धस्यैवहिवैदिकेधिकारःतल्लौकिकत्वात्प्रा
यश्चित्तत्वंचनिस्यतानुस्मरणस्यप्रथमप्रवृत्तानांपावद्भगवदीयाभवंति पश्चात्तुपापमेवनोत्पद्यते॥भगवदिच्छयातुतदुत्पत्तिः
स्मरणे४ तदिच्छायावलिष्ठत्वात्स्मरणंनसंभवति॥ लौकिकेतुबाधाभावात्भगवत्सायुज्यादिसाधकत्वाभावेपिप्रायश्चित्तत्वमखिलदोषनि
घातकत्वस्यस्मरणसहजधर्मत्वात्।कामादयोहिकेवललौकिकाः लौकिकपोषहेतवः॥क्रोधोत्रशापहेतुर्ज्ञातइतिक्रोधेनैव प्रजापतिमनसाध्यायन्
स्मरणंभविष्यति॥ अन्यथाविस्मरणमेवस्यात्सर्वंगोपिकानांकामोपि॥ब्रह्मणाहिकामेनवाकृशप्ता॥अतएववाचानप्रजापते प्रजापतयेस्वाहेतिश्रुतेः१

मयिसंरंभयोगेननिस्तीर्यब्रह्महेलनं॥ प्रत्येष्यतंनि
काशंमेकालेनाल्पीयसापुनः ३० श्रीकृष्णायनमः

हेतुनाहोमी१– होमः॥वाक्मनश्चाधीयेतामित्यपाख्यानेतथानिरूपणात्॥सैववाक्गोपिकाः भयेनभुक्ताचार्यगणशप्ताकालनेमिप्रभृतयः
तेहिबृहस्पतिमुरगैरुक्तवंतःस्वपोरोहित्यगमनभयात्क्लिप्ताइतिभयेनैवस्मरणंकंसस्य। अन्येचदेवायथायथंतत्रसंब
धिनःबृहस्पतिदुर्वासःप्रभृतिभिःशप्ताइतिसंबंधस्नेहादेवस्मरणंयादवादीनां॥एतेचत्वारोपिशापात्तयोत्पन्नाःतथास्मरणेनत
त्त्वापंहित्वास्वभावंभगवदीयेनैवरूपेणभगवत्पदंप्राप्ताः॥तथात्रापिअलुशमितिवाक्यात्भगवत्पदप्राप्तिः॥भगवतिचक्रोध
संरंभयोगेनब्रह्मावहेलनरूपंदोषंनिर्हृत्यमे निकाशंसमीपंअतिनैकट्यंवाद्वारपरूपयावरणंअल्पीयसाकालेनपुनःप्रत्ये एम॰ २३७
ष्यतमिति क्रोधसंबंधस्यलोकेअपुरुषार्थत्वात्पुरुषार्थत्वाययोगपदं ३० ॥श्रीगोपालायनमः ॥ ॥

उपाशान्तवतीद

एवंतयोःशांत्वनमुक्त्वाभगवानन्यथास्थानंगतइत्याह॥ द्वास्थाविति॥ आदिश्येतिवचनात्तन्नान्यथाकरणंसंभवति॥भगवतःखेदोभ
विष्यतीत्याशंक्याह॥भगवानिति॥ऐश्वर्यज्ञानवैराग्यपूर्णःखेदनाशकत्वात्॥नन्वेतावुभौनिष्कासितौदुष्टौचेत्॥अन्येपितथाभविष्यंती
ति तन्निष्कासनमपिकर्त्तव्यं॥अन्योचद्वारपालकौकर्त्तव्यौतदुभयमकृत्वाकथंगृहेप्रवेशोभगवतइत्याशंक्याह॥विमानश्रेणिभूषण
मिति विमानानांश्रेणयस्तासांभूषणमलंकारभूतं।वैकुंठस्थितानिविमानानिसार्थकानिअतोविगतोमानोयेषामितितदतिरिक्ताः
सर्वेभिमानरहिताः अतोनिर्दुष्टाइत्यर्थः॥अतएवतत्रसाधारणाअपीतिश्रेणिपदंतेषामपिभूषणमितिसर्वथासर्वदोषरहितंस्था
नमित्यर्थः।अतएवान्येनविनियुक्ताःएतौसदोषावितिपरंद्वारस्थत्वेननियुक्तौनतत्स्यप्रतिरोधार्थं॥मुनीनांवाक्येनतथानिर्णयात्पुन

द्वास्थावादिश्यभगवान्विमानश्रेणिभूषणं॥सर्वातिशययालक्ष्म्यायुक्तंस्वंधिष्ण्यमाविशत् ३१
तौतुगीर्वाणऋषभौदुस्तराद्धरिलोकतः॥हतश्रियौब्रह्मशापादभूतांगतविस्मयौ ३२ ॥

स्तत्रैवगमनेहेतुः॥सर्वातिशययालक्ष्म्येति॥सर्वेभ्योऽतिशययालक्ष्म्यायुक्तंलक्ष्म्यर्थंकृतत्वात्तंलक्ष्मीःतंसर्वभावेनालंकृतवती॥
अतःसर्वातिशययाशोभयायुक्तंभवति॥स्वकीयंस्वरूपभूतंचततस्थानमितिनान्यत्रगमनं॥ ३१ ॥एवंभगवतोगृहप्रवेशमुक्त्वा
तयोरन्यत्रगमनमाह॥तौत्विति॥ तत्रतयोर्विलीयस्थितिंव्यावर्त्तयतितुशब्दः।तौहिविचारकौभगवद्दाज्ञापरिपालनादेवनिस्ता
रइति॥तथाज्ञानेहेतुः॥गीर्वाणऋषभाविति॥दुस्तरादितितस्यलोकस्यतरणंदुःखेनाप्यशक्यं॥तत्रापिहरिलोकतःसहिसर्वदुःख
निवारकः तत्रापिप्रकाशमानोलोकः अस्मात्स्थानमेवेतिभावः।वैकुंठस्थितयोर्याशोभास्थितासाब्रह्मशापाद्धृता॥ अतः तत्रस्था
तुमपिनशक्यते॥तत्रत्यैःसहसाधर्म्याभावात्॥किंच॥विगतःस्मयोगर्वोययोः अतएवतेतयोःसर्वगर्वःस्थितः।नतुनिर्दुष्टौत
त्रेतिनिष्कासितावितिः॥लोकस्योपकारित्वख्यापनार्थंलोकतएवविगतस्मयावितिहेतुमद्भावोनिरूपितः ३२ ॥

तस्य३

Indira Gandhi National
Centre for the Arts

श्री

त्रस्कं १६ २३८ एवंतत्कृतमुपकारं प्राप्यतौगतावित्याह॥ तदेति॥ वैकुंठधिषणात्तयोर्निपतमानयोः सतोः तदाहाहाकार आसीत्॥ अयु
क्तंजातमिति विमानाग्र्येष्वितितेषांदर्शनयोग्यतानिरूपिता॥ हाहाकारवर्णनंतयोर्दयासूचकं॥ अतएवात्रप्रतीकारेण
कर्त्तव्यः क्लिष्टयोरधिकक्लेशापत्तेः॥ पुत्रका इतिस्नेहेनसंबोधनंस्वस्वदयावत्त्वज्ञापनार्थं ३२ तयोर्निरूपणस्यप्रकृ
तोपयोगमाह॥ तावेवेति॥ अधुनातावेवदितेर्जठरनिर्विष्टंकाश्यपंतेजः प्राप्तौगर्भप्रवेशएवात्रनतुप्रकारांतरेणात्रा
दिषुसंक्रमः सुरभावान्निर्गतत्वात् असुरत्वं॥ तयोर्योग्यंबीजमित्याह॥ उल्वणमिति॥ स्वभावतएवोल्वणं अन्यायेन

तदावैकुंठधिषणात्तयोर्निपतमानयोः॥ हाहाकारोमहानासीद्विमानाग्र्येषुपुत्रकाः॥
३३ तावेवह्यधुनाप्राप्तौपार्षदप्रवरौहरेः॥ दितेर्जठरनिर्विष्टंकाश्यपंतेजउल्वणं॥
३४ तयोरसुरयोरद्यवर्चसायमयोर्हिवः॥ आक्षिप्तंतेजएतर्हिभगवांस्तद्विधित्सति

निर्गतत्वात्॥ तत्रापिदितेर्जठरनिर्विष्टं॥ तयोरपदर्शयमितिख्यापनार्थंपूर्वावस्थाकीर्त्तनं॥ हरेः पार्षदप्रवरावितिं॥ ३४॥
तर्ह्यधिकारेकिंकारणंतत्राह॥ तयोरिति॥ तौह्यधुनाऽसुरौअतस्तत्तेजसाद्विवः युष्माकंतेजः आक्षिप्तं॥ भगवत्तेजसादैत्य
तेजआक्षिप्तंभवति॥ दैत्यतेजसाचदेवानां॥ किंच॥ मुनीनामपकारसंस्मरणात्द्विवइत्युक्तंः यमयोर्हिवइतिपाठेभव
तामेवयमौ॥ अतएवभवतांतेजआक्षिप्तंभवति॥ तर्हिप्रतीकारः कर्त्तव्यइतिचेत्तत्राह॥ भगवांस्तद्विधित्सतीति। एतर्हि एभ॰
इदा नीभवतामुपद्रवंभगवानेवविधित्सति॥ केनप्रतीकारः कर्त्तव्यइत्यर्थः ३५ ॥ श्रीगोपालयनमः॥ २३८

तर्हिकागतिरित्याकांक्षायामाह॥ विश्वस्येति॥ काभवतांचिंतासएवशांतिंतत्रकरिष्यति॥ तत्रहेतुः यः विश्वस्यस्थितिलयोद्भवहेतुरिति॥
यस्मात्पारयतिसएवपालयतीत्यधुनापिसएवपालयिष्यति॥ अथयदिनपालयिष्यतितदाप्रलयकर्तृत्वात्प्रलयंकरिष्यतीतिनचिंता
कर्त्तव्या॥ प्रलयस्यावश्यंभावात्॥ तथापिक्लेशच्छित्तेतिचेत्तत्तर्ह्युत्पादनमपिकरिष्यतीतिनचिंताकर्त्तव्या॥ किंच॥ नकेवलंभवतामे
वतेनकार्यंकर्त्तव्यंकिंतुविश्वस्यैवसत्त्वात्यादिकर्त्ता॥ ननुसाधारणादाहेपियथापलायनेनत्राणंद्यालुर्नदृश्यतेएवतथास्मासुप्रतीकार
स्त्वयाकर्त्तव्यइत्याशंक्याह॥ योगेश्वरैरपिदुरत्ययोगमायइति॥ भगवतोयोगमायासर्वक्लेशहेतुः साहिदुरत्ययासाधनेषुयोगो
महान्तस्यापियेईशाःस्वाधीनयोगाः तैरपियोगमायातिक्रमः कर्तुमशक्यः॥ अतोनमयाप्रतीकारः॥ तर्हिततोप्युक्तं श्रेयःकर्त्तव्यइति

विश्वस्ययः स्थितिलयोद्भवहेतुराद्योयोगेश्वरैरपिदुरत्ययोगमायः॥ क्षेमंविधास्यतिसनोभगवांस्त्र्यधीशस्त
त्रास्मदीयविमृशेनकियानिहार्थः ३६ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेषोडशोध्यायः॥ ॥

चेत्तत्राह॥ आद्यइति॥ नहितदपेक्षयाकश्चिदाद्योस्तियोवक्तव्यःस्यात्तर्हिसएवोक्ततामित्याशंक्याह॥ क्षेमंविधास्यतीति॥ सत्रानुक्तोपिस्व
यमेवक्षेमंविधास्यति॥ तत्रहेतुः॥ त्र्यधीशइति॥ अन्यथालोकत्रयमेवस्यात्॥ यदितौभ्यांद्विवोनाशःस्यात्॥ ननुताभ्यांनाशेकृतेपश्चात्क प्रश्वा॰ २
थंपालयिष्यतीत्याशंक्याह॥ भगवानिति॥ ननुतथापित्वयाशुभाशंसनंकर्त्तव्यंअस्माभिर्वात्वद्वचनेनतपसादिकंकर्त्तव्यमितिचेत्त
त्राह॥ तत्रास्मदीयविमृशेनेतियथापर्जन्येवर्षतिततः पूर्वंघटेनक्षेत्रसेचनंयदिदेवोनवर्षेत्सेकेनापिनसस्योत्पत्तिः॥ दृष्टोह
त्पां सेकोव्यर्थएव॥ तत्रास्मदीयेनविमर्शेनतत्रसर्गेइहेदानीकियान्वार्थः॥ ससर्वार्थमेवशुभंकरिष्यतीतिकिंप्रत्येकप्रयासेन
फलासाधकेनेत्यर्थः ३६ इतिश्रीभागवतसुबोधिन्यांतृतीयस्कंधविवरणेषोडशोऽध्यायः॥ ॥ एभः ॥

लोकत्रयाधीशस्ता भावे ५=

Indira Gandhi National Centre for the Arts

दितिविछेन१=

कामफलं१

कामादिनामार्गनाशाः उपोद्घातेनवर्णिताः॥सृष्टिमात्रप्रयोगायतत्फलंवर्ण्यतेशुभं १ उत्पत्तिलामसीप्रोक्ता स्थितिर्वैरेणजसीम
त्रसु१७ २३९ कामादिनामार्गनाशाः ... सात्विकः प्रलयश्चेतिविपरीतंफलंतयोः २ उत्पत्तिर्द्विविधाप्रोक्ता स्वरूपानिष्टभेदतः॥यावद्बुद्धिरिहोत्पत्तिः कायवाग्दोष
ता॥सात्विकःप्रलयश्चेतिविपरीतंफलंतयोः ... 
वर्णनं ३ सजातीयविजातीयक्लेशदानायजन्मनः॥शापत्वेकइतिप्रोक्तो हिरण्याक्षोनचापरः ४ आधारस्तुसएवोक्तो द्वितीये
दोषवर्णनं॥उत्पत्तिरेवशापेननीचयोनौनिरूपिता ५ स्थितिनाशौतयोस्तस्मात्हरएवेवात्रवर्ण्यते॥हृत्स्नेनसहितालीला

मैत्रेयउ० निशम्यात्मभुवागीतंकारणंशंकयोज्झिताः ॥
ततःसर्वेन्यवर्त्तन्तत्रिदिवायदिवौकसः १ ॥

जन्म

स्थितिस्तस्यमहात्मनः ६ निधनंचापितस्यैवंकल्याणवचनान्मतं॥ स्वरूपोत्पत्तिरन्यत्रहेतुरित्यच्यतेबुधैः ७ अनिष्टसू
चकंतत्रसानंदुःखप्रणाशनं अतःसप्तदशेध्यायेदुःखाभावस्तथोद्गमः ८ अनिष्टसूचकोदोषोवर्ण्यतेपंचसंभवे ९
तत्रप्रथमंनिदानज्ञानेनभयनिवृत्तिमाह॥निशम्येति॥ आत्मभुवाब्रह्मणागीतंकारणंशंकयोज्झिताज्ञाताः॥ आत्मभुवेति एम०
कारणंगीतमितिहर्षेणसर्वजनीनमुक्तमितिफलेनिःसंदेहः शंकास्वनाशे पीडामात्रंतुपरिछिन्नत्वात्सोढव्यमितिशं २३९
कयैवोज्झिताः इष्टानिष्टयोःकालस्यचनिर्धारितत्वात्॥शंकानिवृत्त्यनंतरंचसर्वेत्रिदिवायन्यवर्त्तंत दिवौकसइतितत्रागम
नमावश्यकं १ ॥ तदेयुक्तम०५४

उत्पत्तिमाह दितिस्त्विति॥ स्वधिविचारेणसद्यएवोत्पादनीयौतथापिदित्यातथानकृतमितितुशब्दः॥भर्तुःकश्यपस्यआदेशा
त्वाक्यात्आज्ञारूपात्॥अपत्यविषयेपरितःशंकायुक्ताजाता॥तयाशंकयातयोर्देवनिवृत्त्यर्थंमारकःकालःप्रतीक्षितः॥
सहिवर्षशतात्मकोभवति॥अतःपूर्णेवर्षशतेपुत्रौप्रसुषवे॥उभौपुत्रौजनितवती॥तौयमलावपिदुःखदात्वात् यमावि
त्युक्तौ॥पुत्रापराधेनभर्त्रास्वात्मानंस्पृश्यतीतिभयात्शतवर्षधारणमितिबोधयति॥साध्वीति॥ एतेवर्षाःमानुषाणांस

दितिस्तुभर्तुरादेशात्अपत्यपरिशंकिनी पूर्णेवर्षशतेसाध्वीपुत्रौप्रसुषुवेयमौ २
उत्पातावहवस्तत्रनिपेतुर्जायमानयोः दिविभुव्यंतरिक्षेचलोकस्योरुभयावहाः ३

वमुत्पत्तिमुक्त्वातस्यास्तामसत्वंज्ञापयितुंअनिष्टसूचकान्बहूनुत्पातान्वर्णयति॥ कालप्रतीक्षाकृतेतिसंवत्सरात्मकःकालः
तत्रानिष्टसूचकइतिद्वादशभिरनिष्टानिफलंचैकेनउच्यते २ तत्रप्रथमंसामान्यमनिष्टमाह॥उत्पाताइति तत्राश्रमेतदा
वातयोर्जायमानयोःसतोःत्रिविधाअपिजाताः॥तेषांदेशभेदेनचत्रैविध्यमाह॥दिविभुव्यंतरिक्षेचेति॥ सात्विकराजसता
मसक्रमोत्र॥चकारएतान्निभूतकृतानिचतेषांफलमाह॥लोकस्योरुभयावहाइति॥लोकस्येतिसामान्यतःसर्वांवाउरुभ
यमावहंतीतिअधिकंभयंलोकनाशात्धर्मनाशाद्वा ३ ॥

मैत्रिकाः१

Indira Gandhi National
Centre for the Arts

उद्देशतउत्कास्वरूपतस्त्रिविधानाह॥सहाचलाइति॥एतेपिदिव्याइतिकेचित्॥पर्वतसहिताभुवःखंडशश्चेलुः॥अनवच्छिन्नाचेत्
भूःचचालेतिवदेत्सहाचलेत्यचलानामपिपृथक्चलनं॥दिग्दाहोंतारिक्षस्थः अंतरिक्षेप्रतिष्ठितादिशइतिसर्वाअपोजज्वलु
रितिनधूममात्रं॥दिव्यानाह सोल्काश्चाशनयइति॥उल्काअग्निसदृशानकृत्रलूपासत्सहिताअशनयोवज्राकेतवःशतंधू
मकेतुप्रभृतयःसर्वेषांसाधारणेपिनभयजननकत्वेपिकेतूनामार्तिजननकत्वमधिकं।यैःपातोदृश्यतेतेषांशरीरेपीडाभवतीति

सहाचलाभुवश्चेलुर्दिशःसर्वाःप्रजज्वलुः सोल्काश्चाशनयःपेतुःकेतवश्चार्तिहेतवः ४
ववौवायुःसुदुःस्पर्शःफट्कारानीरयन्मुहुः।उन्मूलयन्नगपतीन्वात्यानीकोरजोध्वजः ५

विशेषः॥आर्तिहेतवोयमदूतादयोवा ४ भौतिकमाह॥वायुरिति॥वायुर्द्विविधःवात्यारूपःसदागतिश्चउभयविधोप्य
निष्टसूचकइत्याह॥तत्रसदागतेरनिष्टसूचकरूपमाह सुदुःस्पर्शइति॥निरंतरगमनमेवस्वभावतोनिष्टसूचकं॥
तत्रापिसुदुष्टःस्पर्शोयस्यफट्कारानीरयन्निति दुष्टशब्दाननुकुर्वन्वातीत्यर्थः॥मुहुरितिएकस्मिन्नपिधाराप्रवाहे एम० २४०
बहुधाशब्दजननं॥वात्यारूपस्यानिष्टलक्षणमाह॥उन्मूलयन्निति॥नगपतीन्वृक्षश्रेष्ठान्मूलतउत्पाटयन्भ्रमणवा
युःगगनपर्यंतंरजउत्थापयतीत्यर्थः ५ ॥

मेघानामनिष्टलक्षणमाह॥ऊर्ध्वहर्संत्यइवयातडितःतत्सहितायेअंभोदाःतेषांयाघटासमूहःतयाकृत्वानष्टोभासांगणस्तेजस्स
मूहोयत्र॥एतादृशेव्योम्निप्रविष्टंयत्तमस्तेनकृत्वाकिमपिपदंज्योतिषामन्येषांवानव्यादृश्यतेस्मस्मेतिलौकिकंप्रमाणंसमत्यर्थमु
च्यते॥तडितोहासतुल्यतात्रानिष्टंअत्यंततमश्च॥तमसइतिपाठेतमसःपदंमेघादिकंनदृश्यतइत्यर्थः ६ समुद्रस्यानिष्टलक्षण
माह चुक्रोशेति॥विमनाइववार्द्धिःसमुद्रःचुक्रोशऊर्ध्वऊर्मयोयस्यक्षुभितमुदरंयस्य॥मकरायुद्वेगेनज्ञायते॥सोदपानाःकूपा

उद्यत्सत्तडिद्भिर्मेघघटयानष्टभागणे॥व्योम्निप्रविष्टतमसानस्मव्यादृश्यतेपदं ६ चुक्रोशविमनावार्द्धिरुदूर्मि
क्षुभितोदरः सोदपानाश्चसरितश्चुक्षुभुःशुष्कपंकजाः ७ मुहुःपरिधयोभूवन्सराह्वोःशशिसूर्ययोः निर्घा
तारथनिर्ह्रादाविवरेभ्यःप्रजज्ञिरे ८ अंतर्ग्रामेषुमुखतोवमंत्योवह्निमुल्बणं॥शृगालोलूकटंकारैःप्रणेदु
रशिवाःशिवाः ९ ॥

दिसहिताःसरितःपुष्करिण्यश्चशुष्कपंकजाजाताः॥सरितएववा ७ चंद्रसूर्ययोरेकदैवरा
हुग्रस्तयोरहमुहुरिति॥मुहुःपरिधयःअभूवन्निर्घातानिरभ्रविद्युत्पाताजाताइत्यर्थः॥निर्ह्रादाःशब्दाःरथघोषसदृशाः
विवरेभ्यःप्रदरेभ्यःकंदरादिभ्यःपातालादिभ्योसर्पादिबिलेभ्योवाप्रकर्षेणजाताः ८ अंतर्ग्रामेषुमुखतःउल्बणंवह्निंवमंत्यःशि
वाःशृगाल्यःशृगालोलूकटंकारैःसहिताःप्रणेदुःप्रकर्षेणनेदुः॥अशिवाइतिलोकेपितासाममंगलत्वंप्रसिद्धमितिज्ञापितं॥
९ ॥श्रीराधावल्लभायनमः॥ ॥

वा२

Indira Gandhi National
Centre for the Arts

भ.पु. १७
२४१

श्रुनामाह॥संगीतवदिति॥यथालोकेगीतंभवतियथावाऽऽरोहणंनर्पश्चात्पानां॥शिरोधरंग्रीवायुत्रमप्यविविधावाचो॥व्यमुंचन्॥
ततलतः परितः ग्रामसिंहाः श्वानः।गर्दभानामनिष्टलक्षणमाह॥खराश्चेति गर्दभाः कर्कशैः खुरैः धरणतलं घ्नंतः तज्ज्ञातिशद्वे
नवोकारेणरभसमत्यंतमामत्ताः रभसावा॥मत्ताः पर्यधावन्॥ ११॥ तद्वदेनानिष्टांतरमाह रुवंतः खगाः एसभवनत्रलान्संतःनी
डाद्ध्वंअपतन्‌एसभशद्वेनतेपिभीताइत्यर्थः॥पशूनामनिष्टलक्षणमाह॥घोषेआभीरगांगृहेअरण्येवंभयात्‌शकृन्मूत्रंच
अकुर्वत॥गोमययुक्तंवामूत्रमकुर्वत॥गावश्चआसन्‌असृग्दोहारुधिरदोग्ध्र्यः॥तोयदामेघाश्चपूयवर्षिणोजाताः॥पूर्वं

संगीतवद्रोदनवदन्नमप्यशिरोधरं॥व्यमुंचन्विविधावाचोग्रामसिंहाल्ततलतः १० खराश्चकर्कशैः क्षत्तः
खुरैर्घ्नंतोधरणतलं खोकाररभसामत्ताः पर्यधावन्वरूथशः ११ रुवंतोरासभत्रस्तानीडादुदपतन्खगाः॥
घोषेरण्येचपशवः शकृन्मूत्रमकुर्वत १२ गावश्चासन्नसृग्दोहास्तोयदाः पूयवर्षिणः॥व्यरुदन्देव
लिंगानिद्रुमाः पेतुर्विनानिलं १३ ग्रहान्पुण्यतमानन्येभगणाश्चापिदीपिताः॥ अतिचेरुर्वक्रगत्या
युयुधुश्चपरस्परं १४ दृष्ट्वान्यांश्चमहोत्पातानतत्त्वविदः प्रजाः ब्रह्मपुत्रानृतेभीतामेनिरेविश्वसंप्लवं

तेषामाश्चर्यकत्वमेवोक्तंदेवलिंगानिदेवप्रतिमाविशेषेणाअरुदन्‌शद्वंनेत्राज्जलंचात्यजन्॥द्रुमाश्चानिलव्यतिरेकेणपेतुः
१२ १३ ग्रहयुद्धंचजातमित्याह॥पुण्यतमान्शुक्रादीन्॥अन्येशनैश्चरादयः॥आलक्ष्यपेतुरितिसंबंधः॥अपीडय
न्नितिवार्थ्यात्भगणाः सर्वाण्येवनक्षत्राणिदीपिताज्जाताः॥केनचित्‌ज्वालिताइवजाताइत्यर्थः १४ एवंनिमित्तान्युक्त्वा
तेषांफलमाहदृष्ट्वेति अन्यानानुक्तानपिमहोत्पातान्सूर्यपातचंद्रपातरूपान्‌अतत्त्वविदः प्रजाः। अस्यविश्वस्यसंप्ल
वंप्रलयमेवमेनिरे पर्यवलोमूलभूताःसनका
द्यः नद्यतिरेकेणसर्वप्रभीताउनाताःप्रलयंचमेनिरे १५ ॥

पेनुइतिपाठः
अपीडयन्निति पाठः
पाठः २
एम०
२४१

एवमनिष्टलक्षणानिसफलानिनिरूप्यहृद्धिरूपामुत्पत्तिमाह॥ताविति मधुकैटभौआदावेवदैत्यत्वंप्राप्ताविति वा॥दि
तिपुत्राणामादिभूतौवा॥सहसाकारणकालविलंबव्यतिरेकेण॥अज्यमानमात्मनिपूरुषपौरुषयोः॥अज्यमानात्पानौ
पुरुषाविति वा॥तोहिपूर्वजन्मनिभगवत्साक्ष्यंप्राप्तोइदानीमपितथैवअज्यमानदेहोहंतोपुरुषौजातौनतुरूपांतरेणेत्य
र्थः॥ अथवाअज्यमानआत्मनिपुरुषोयाभ्यां॥अंतश्चेत्भगवान्तादृशरूपोभवति॥तदेववहिरन्यः चतुर्भुजादिरूपो

तावादिदैत्यौसहसाअज्यमानात्मपूरुषौ॥वहृधातेश्मसारेणकायेनाद्रिपतीइव १६ वि
स्पृशोहेमकिरीटकोटिभिर्न्निरुद्धकाष्ठौस्फुरदंगदाभुजौ॥गांकंपयंतौचरणैः पदेपदेकद्यासु
कांच्यार्कमतीत्यतस्थतुः १७ ॥

भवति॥तथैमावपिवैजयंत्यादियुक्तौ॥अश्मवत्सारेणदृढेनकायेनअद्रिपतीइवमेरूइववहृधाते १६ तयोर्द्धिवर्ण
यति॥दिविस्पृशाविति॥हेमकिरीटयोः कोटिभिर्द्दिविस्पृशौद्वितीयार्थेसप्तमीअलुक्‌ स्फुरदंगदयुक्तौभुजौययोः अंगदा
वित्यंगदासुयांसुलुगित्याकारादेशः। पदेपदेगांकंपयंतावितिभूमिंरसातलंनेतुंउद्यताविवकार्येणतयोरूपमनुमेयमित्य
र्थः॥सुकांच्याशोभनाकांचीयत्रतादृशपाकद्याअर्कमतीत्यतस्थतुः एतावद्दूर्ध्वप्रमाणौयावतानाकटिः सूर्यमंडलाद्दूर्ध्वंभवति
१७ ॥

Indira Gandhi National
Centre for the Arts

त.सु.१७ २४२ एवंतयोर्वृद्धिमुक्त्वानामकरणादिसंस्कारमाह प्रजापतिरिति॥प्रजापतिःकश्यपःतयोर्नामअकार्षीत्तन्मध्येप्राक्यःस्वदेहाद्दे तोरूपेणअजायतायद्यपिस्वस्मिन्प्रवेशः तथापिपश्चाद्‌पितयोत्पन्नबीजसंबंधात्स्वदेहाद्‌जायतेत्युक्तं॥ तत्रबीजमेवपुत्रत्वेकारणं॥यमयोर्मध्येयःपश्चाद्‌त्पद्यतेमाततःसपितःप्रथममुत्पन्नइतिज्ञेयं॥ क्रमेणप्रविष्टयोर्वैपरीत्येनैवनिर्गमनसंभवात् तंहिरण्यकशिपुंविदुःप्रजाः॥यादितिर्यमग्रेअसूततंहिरण्याक्षंविदुरित्यर्थः॥ अतोहिरण्याक्षःप्रथमतः

प्रजापतिर्नामतयोरकार्षीद्यःप्राक्स्वदेहाद्यमयोरजायतः॥तंवैहिरण्यकशिपुंविदुःप्रजायंतंहिर
ण्याक्षमसूतसाग्रतः १८ चक्रेहिरण्यकशिपुर्दोर्भ्यांब्रह्मवरेणच॥वशेसपालांल्लोकांस्त्रीनकुतो
मृत्युरुद्धतः १९ ॥

उत्पन्नोपिकनिष्ठः॥१८॥तत्रहिरण्यकशिपोर्दैर्घ्यस्वरूपंवासनायांवक्तव्यमितिस्थितिमात्रमत्रसूच्यतेद्वितीयस्यातिक्रमाभावाय॥चक्रइति॥ अयंद्विभुजोपिभुजद्वयेनब्रह्मवरेणवसपालानलोकपालसहितांस्त्रीन्लोकान्वशेचक्रे॥ तस्यधर्मोमोक्षश्चनास्तीत्याह॥अकुतोमृत्युरुद्धतश्चज्ञातइतिमृत्युरेवनास्तीतिमृत्युविशेषोमुक्तिःसुतरामेवनास्ति॥उद्धतत्वान्नधर्मः॥नम्रीभावएवतदुत्पत्तिः १९ ॥ ॥ ल.म.० २४२

एवंप्रासंगतोहिरण्यकशिपुपराक्रममुक्त्वाहिरण्याक्षस्यदोषवत्त्वज्ञापनायतत्कृतमुपद्रवंस्वर्गादावाह॥हिरण्याक्षोनुजइत्यादिषड्भिः प्रयत्नश्चभयोत्पत्तिरूपंकार्यंचतस्यतत्।तेनगर्वस्ततोमादस्तस्मात्सर्वभयंपुनः १ प्रथमंतस्यदेवविरोधार्थंयत्नमाह॥हिरण्याक्षोनुजइति॥हिरण्यकशिपोरनुजः॥तस्यैवास्यापिजगत्त्रयंवशइतिउक्तंभवति॥प्रियइतितस्यप्रीतिविषयत्वात्हिरण्यकशिपुकृतंजयादिकमप्येतत्प्रीत्युक्तं अयमपिप्रीतिकृत्।समानशीलव्यसनाभावेप्रीतिर्नोत्पद्यतेति

हिरण्याक्षोनुजस्तस्यप्रियःप्रीतिकृदन्वहं॥गदापाणिर्दिवंयातोयुयुत्सुर्मृगयन्रणं २०
तंवीक्ष्यदुःसहजवंरणत्कांचननूपुरं॥वैजयंत्यास्रजाजुष्टमंसन्यस्तमहागदं २१ ॥

ज्येष्ठप्रीत्यर्थंदेवविरोधार्थंयत्नंकृतवानित्याह॥अन्वहंगदापाणिर्भूत्वारणंमृगयन्तदर्शनार्थंनारदवत्॥किंतुयुयुत्सुःदेवैःसहयुद्धंकरिष्यन्दिवंययौ॥२०॥ततोदेवानांभयोत्पत्त्यर्थंयत्नंकृतवानित्याहदेवदृष्टंतस्यरूपमनुवर्णयति॥ तंवीक्ष्येति॥प्रथमतएवतस्यदुःसहोजवोवेगःदूराद्दृष्टएवंरूपोनैवागत्यमारयतीतिमतीकारणमर्थ्यं॥रणत्कांचननूपुरमितिविरुदावलीतस्यनिरूपितावैजयपरंपराप्रतिपादिका॥वैजयंत्यास्रजाजुष्टमितिभगवदीयत्वज्ञापकं सएवहिवैजयंत्याजुष्टोभवति॥अंसन्यस्तमहागदमितिश्रमःसाधनाधिक्यंचोक्तं २१ ॥ श्रीगोपालायनमः श्रीगोविंदायनमः ॥

Indira Gandhi National Centre for the Arts

भसु १७
२४२

एवंचतुर्भिर्विशेषणैर्भयजनकरूपमुक्त्वा भीता देवाः पालयितव्यं तत्राह ॥ मनोवीर्येति ॥ मनउत्साहः वीर्यं पराक्रमः महोगर्वः तैः कृत्वा
उत्सिक्तं उच्छलितं ॥ मर्यादामतिक्रांतमिति यावत् ॥ अत एव निरंकुशः भ्रातुर्नियामकत्वेपि तस्यैव तथाकारकत्वाद्दोद्धत्यैनैव ननियाम
कत्वं ॥ स एव निरंकुशः अत एव न विद्यते कुतश्चिद्भयं यस्य ॥ एवं त्रिदोषयुक्तं दृष्ट्वा भीताः संतः युद्धमकृत्वैव निलिल्यिरे लीना जाताः
ननु स्त्रीधनादिकं विहाय कथं लीना इत्याशंक्याह ॥ तार्क्ष्यत्रस्ता इवाहय इति ॥ गरुडो हि सर्पान् जीवग्राहं मारयति न धनादि
हानेनापि त्यजति तथायमिति मत्वा स्वप्राणरक्षार्थं लीना जाता इत्यर्थः २२ ततोपि गर्वेज्ञात इत्याह ॥ सवा इति समानतायां

मनोवीर्यमदोत्सिक्तमस्यापमकुतोभयं ॥ भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः २२
सवै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्यराट् ॥ सेंद्रान्देवगणान्क्षीबानपश्यन्व्यनदद्भृशं २३

शत्रुत्वं ॥ पुरुषस्य पुरुषो भवति समानो न नु क्लीबः ॥ देवत्वं शूरत्वं वा दूरे ॥ महानिर्मनश्चैवं मन्यते ॥ ननु कालादिना सर्व एव
तिरोहिता न तु तत्किमाश्चर्यमिति चेत्तत्राह ॥ महसा स्वेनेति ॥ अयुध्यमाना अपि तत्तेजसैव ते तिरोहिताः ॥ यथा सोरमभयां
धकारः इंद्रसहितान् सर्वानेव देवविशेषान् स्ववीर्येणापि कार्यसाधकान् स्वरूपेणाप्यनुपयुक्तान् अत एवापश्यन् भृशं
व्यनदत् ॥ तिरोहितज्ञानं क्लीबज्ञाने हेतुः ॥ स्वेनैव महसा तिरोहितान् दृष्ट्वा स्वेनैव महसा दैत्यराट् ज्ञात इति भिन्नं वाक्यं ॥ अत
एव क्लीबादिधर्मयुक्तानपि तान् अपश्यन् भृशं व्यनदत् ॥ निकटस्थाश्चेत्ते नादेनैव मरिष्यंतीति २३ ॥ ॥

एम०
२४३

भ२

एवं हित्वा सुतरां गुर्गीस्थान्महागर्वेण ज्वलद्देहः समुद्रे जलक्रीडां कृतवानित्याह ॥ तत इति ॥ महाभर्दं त्रापयति ॥ क्रीडिष्यन्निति स्व
र्गात्क्रीडार्थमेव समुद्रे आगतः ॥ क्रीडा हि कामसाध्या भवतीति स्थिते क्रोधे युद्धाभिनिवेशे वा क्रीडानं भविष्यतीति ततोभावान्निर्ह
तः देवापेक्षया समुद्रं महांतं ज्ञात्वा समागत इतिव कुं समुद्रं विशिनष्टि ॥ गंभीरं भीमनिस्वनमिति ॥ भयजनकमगाधजलं गंभीरं ॥
अनेन समताशोभाभावश्च तस्य सूचितः ॥ भीमनिः स्वनमिति प्रतिपक्षवाक्यजननात् युद्धार्थित्वमपि ज्ञातं ॥ मत्तत्वाद्देवं ज्ञानं ॥ तथा
पि न युद्धरसेन समागतः किंतु क्रीडिष्यन्नेवेति तदाधिक्यं ॥ विगाहनं मध्ये पातः ॥ तथाकरणे सामर्थ्यमाह ॥ महासत्त्व इति ॥ महत्स
त्वं यस्येति ॥ तत्रैवं ज्ञातमंपद्यकल्पे एतावुत्पन्नौ मत्स्योश्च जयान्नकल्पांते मरणं तद्दैवलोकत्रयं वशे कृतवान् ॥ ततो मोहग्र
स्तयो रसातले शयनमादिवराहकल्पे प्रलये च ॥ तत्रादिवराहकल्पः संपूर्णो न हत इति भूम्युत्पत्तिः देवानां कियत्प्रजानां च सृष्टिं

जेष्ट २

ततो निर्हृतः क्रीडिष्यन् गंभीरं भीमनिस्वनं ॥ विजगाह महासत्वो वार्धिं मत्त इव द्विपः २४ ॥

कृतवान् ब्रह्मांतरायं कनिष्ठः ज्येष्ठेशयान एव ब्रह्मणः प्रातःकाले स्वर्गं गतः ॥ स्वामित्कृतत्वात्तन्मध्ये पुनर्भूमिर्निमग्ना ॥ ततोपि निर्हृ
तः प्रलयोदक एव पतितः देवानां स्थित्वा दैत्याधिपतित्वाच्च वरुणो रसातले समानकदाहां शपश्चिमभागे वा स्थितः ॥ मन्वादीनां
ज्ञातत्वात् नारदाद्योपि पद्मकल्प एवोत्पन्नाः उपरिस्थिताः दितिश्च रसातलेकश्यपस्तु उपरि मायां पृथिव्यां जलस्य बाधकत्वाभा
वात् दैत्योपभोगः अतो नारदवाक्यात् वराहसंबंध इति सर्वमेव युक्तं ॥ युगानि च एक चतुर्युगवार्त्तामेव कथयंति विशेषतः सा
मान्यधर्मश्चानूद्यंते ॥ चतुर्युगांतरवार्त्ता कल्पांतरवार्त्ता च मतांतरमिति न तद्विरोधः शंकनीयः ॥ अतार्थापत्तिरत्र प्रमाणं ॥ महा
मत्तत्वाद्देववार्धिमपि प्रविष्टस्तत्र जलं निरंतरमुत्पद्यते तो विवेकसहितमदोन्मत्त इवेत्युक्तं अन्यथा द्विप इत्येव वदेत् ॥ महा
घोषं जनयन्नित्यर्थे दृष्टांतः द्विपशब्देन च तस्य मज्जनाभावः सूचितः पुंडव्यतिरेकेण तस्यांतर्जलप्रवेशात् ॥ २४ ॥

३

Indira Gandhi National
Centre for the Arts

स्क०४ अ०१७
२४४

तत्रापि तत्रत्यानां महानुपद्रवो जात इत्याह ॥ तस्मिन्निति ॥ हिरण्याक्षे प्रविष्टे वरुणस्य सैनिका युद्धकुशला याद्गोगणाः ज
लेबलवंतः निधिसहिताः सर्वाधिव्यतिरिक्ताः सर्वतः क्षुब्धाः एतादृशा अपि ससाध्वसा जाताः ॥ अत एवाहन्यमाना अपि देव
वत्तस्य वर्चसा तेजसैव प्रकर्षेण धर्षिताः गतसत्वाः कृता इति दूरतरं प्रदुद्रुवुः ॥ २५ ॥ एवं तस्य सर्वोपद्रवकारित्वेन काथिकीं
चेष्टामुक्त्वा वाचिकीं वदन् पूर्वचरित्रसंबद्धमेव वदति ॥ स वर्षपूगानिति षड्भिः तत्र पूर्वं समुद्रं आत्मानं महांतं मन्यत इति ज्ञा

तस्मिन् प्रविष्टे वरुणस्य सैनिका याद्गोगणाः सन्नधियः ससाध्वसाः ॥ अहन्यमाना अपि
तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः २५ स वर्षपूगानुदधौ महाबलश्चरन् महोर्मी
न् श्वसनेरितान्मुहुः ॥ मौर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः २६

त्वा तस्य हलमार्या तरंगान् गदया ताडितवानित्याह ॥ कल्पांतपर्यंतं महाबल इति ॥ कालेन तस्य बलक्षयाभाव उक्तः ॥ तत्रैव स
मुद्रे चरन् श्वसनश्वासवायुना निर्मितान् पूर्मीन् तद्बलान् ज्ञात्वा मौर्व्या तत्रण विशेषवद्धया महागदया अभितो जघ्ने ऽग्रस्था
से नैव यदूर्मयः ईरिताः तदा चलने ताडनेवा किं वक्तव्यं ॥ एवं समुद्रनिग्रहे क्रियमाणे ततोप्यधिको मीनदृष्ट्वा तस्या
धिपतिं वरुणं ताडयितुं तत्पुरीं आसेदिवान् पुर्यानिकटं प्राप्नवान् तत्र स एव वा तद्देहेगत इत्यर्थः ॥ प्रचेतस इति ॥ प्र
कृष्टचित्तत्वात् न तस्य भयं पलायनं वा २६ ॥

तत्र गत्वा तमुपहसतिस्मेत्याह ॥ तत्रोपलभ्येति ॥ मारये देवतं परं दैत्यानां रक्षक इति न मारितवानित्याह ॥ असुरलोकपालकमिति ॥
असुराणां यावंतो लोकास्तातलादिस्थिताः तेषामयं पालकः ये असुरलोके ऽपद्रवकर्त्तारः तन्मारका याद्गोगणाः लोकपोषका ॥
अत्र लोके गत्वा श्वा इव तिपि वरुणस्यैव वशे भवंति ॥ अतो न हंतव्य इत्याह ॥ याद्गोगणानामृषभमिति ॥ किं च ॥ स्वभावतोपि प्रकृ
ष्टचित्तयुक्तः गर्वादिरहितः अतो मारणा घकृत्वा ततोपि गर्वयुक्तः स्मयन् अत्यं हसन् प्रलब्धुं वक्रोक्त्या वंचयितुं नमस्कृत्य
सेवकादपि हीनवद्भुणाद्द । अत्याक्षरैर्विनयपूर्वकं किंचिदुक्तवानतदेवाह ॥ हे अधिराज संगरं देहीति ॥ अयं मां न जानातीति
हास्यं कार्यं तेनतज्ज्ञापनीय इति प्रलंभवचनं प्रणिपातो गर्वोत्साहनार्थः ॥ त्वत्सनी चानुकरणं अवगणनार्थं ॥ अन्यथा संयुगेन प्र =
हृष्टो भविष्यतीति । अधिराजेति संबोधनं तव भयं नास्तीति ज्ञापनार्थं ॥ त्वयैव सह युद्धं कर्त्तव्यमिति वरप्रार्थना ॥ संगरं युद्धं ॥

तत्रोपलभ्यासुरलोकपालकं याद्गोगणानामृषभं प्रचेतसं ॥ स्मयन् प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संगरं ॥
२७ त्वं लोकपालोधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनां ॥ विजित्य लोकेखिलदैत्यदानवान् यद्राजसूयेन पुरा
२७ एवं याचयित्वा तूष्णींभूते तस्मिन्नुत्साहयति गुणान् वदन् ॥ त्वं लोकपाल इति त्वं यथा भगवा ऽयजत्प्रभुः २८
न् तथा षड्गुणैश्वर्ययुक्तः तस्य षड्गुणानाह ॥ आदौ त्वं लोकपालः ईश्वरः सर्वपत्यये रूपाधिपतित्वं सर्वे पतिः स्यादिति वीर्यवा
नेवाधिपतिर्भवति अत एव बृहच्छ्रवाः ॥ अधिककीर्त्तिमान् स्पष्टमेव यशः ॥ दुर्मदवीरमानिनां वीर्यापह इति श्रीः शत्रुजये श्री
र्भवतीति दुर्मदा वीरा एव यमिति मानिनश्च ये यावता चतेषां वीर्यं गच्छति तावल्कर्त्रीति ते च निःश्रीका भवेयुः तदेवमिति स्वस्य श्रीमत्वं ॥ ज्ञानमाह ॥
विजित्य लोके किल दैत्यदानवमिति मिथ्याज्ञाने च तमः ज्ञाने न च परं पदमिति वाक्यात् दैत्यानां ज्ञाने प्रतिपक्षत्वं ॥ तत्र दैत्या राजसाः दानवा
स्तामसा इति उभयेषां द्वैकं ज्ञाने नैव हि ते निराकर्तुं शक्यं त इति ॥ किं च ॥ कर्मणापि ते निराकर्तुं शक्या इति ॥ यद्राजसूयेन पुरा यजत् इत्या
ह देवानां लोकपालानां वीर्याधिकारात् तत्र वैराग्ये तेषां परमोत्कर्षे दैत्यानामगइति तेन दैत्यजयः ॥ प्रभुरिति वैराग्यं ॥ मायेकृममप

Indira Gandhi National
Centre for the Arts

त्र·सु१७ २४५ एवंकृते स्तोत्रे प्रार्थितमभिधातुं मुखं सम्भ्रुतो ऽष्वर्यसंपन्नमेव निर्दिष्टं प्रलंभवाक्येनोत्पन्नमपि क्रोधं दूरीकृत्य तथोक्तवानित्या
ह स एवमिति॥ ननु स्वयं दैत्यपतिः कथं दैत्यानामहितमुक्तवान् तत्राह॥ उत्सिक्तमदेनेति॥ दैत्यानां मदे विद्यमाने पि सर्वम
ज्ञानार्थे न तदुत्सेकः अस्मत् उत्सेकात् सर्वनाशं करिष्यतीति तन्नाशः कर्तव्य इत्यर्थः॥ शिक्षाभावायाह विद्विषेति॥ विशेषे
ण द्वेष्टीति तथा दृढमर्माछादनं॥ अशक्तो ऽन्यथा कथयतीत्याशंकाव्याहत्यर्थमाह भगवानिति॥ तर्हि कथं न मारयतीत्या

मैत्रेय उ० स एवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपांपतिः॥
रोषं समुत्थं शमयन् स्वपाधियाव्यवोचदंगोपशमं गतावयं २९

ह॥ अपांपतिरिति॥ न हि जलस्थितो वह्निर्ज्वलति॥ अत एव समुत्थितमपि रोषं अशमयत् आत्मज्ञानेन तदाह॥ स्व
याधियेति विशेषेण स्पष्टतया अवोचत् किं त्वया युद्धमात्रमपेक्ष्यते मया सह युद्धं वा॥ तत्र द्वितीये उत्तरमाह॥ हे अं रम० २४५
गेति कोमलसंबोधनं ज्ञानपूर्णत्वबोधकं॥ न हि स्वांगं केनचिदुपहन्यते॥ वयमुपशमं शांतिं गताः॥ शस्त्रसंन्यासं गृ
हीतवंत इत्यर्थः २९ ॥

युद्धमात्रं चेदपेक्ष्यते तदा अन्य एक एवास्ति सर्वेच्छापूरको नान्य इत्याह पश्यामीति॥ तुच्छा हि त्वां नमस्यंते ज्ञानी हि आक्रोशं न
करोतीत्याराधयिष्यती त्यर्थः॥ अन्यस्तु अनात्मा न पूजयिष्यतीति॥ अत्र प्रमाणं मम ज्ञानं तदाह॥ पश्यामीति॥ पुरुषात् पुराण
ता दन्यं न पश्यामीति भिन्नं वाक्यं ज्ञानं परं अन्यथैवं भगवानवदेत् पुरुषो हि पौरुषयुक्तः॥ अन्ये सर्वे प्राकृतशरीरसंबंधात्
स्त्रियः॥ स एव हि परिदृश्यंत इति पुरातनादिति॥ बलाधिक्यज्ञापनार्थं कालेन हि बलह्रासो भवतीति॥ अत एव पः संयुगे
युद्धे त्वामाराधयिष्यति॥ संतोषोत्पादनं स्यादाराधनं संतोषस्तु स्वज्ञानादधिकज्ञाने॥ तदर्थं तस्य ज्ञानमाह॥ रणमार्गकोवि

पश्यामि नान्यं पुरुषात् पुरातनाद्यः संयुगे त्वां रणमार्गकोविदं॥ आ
राधयिष्यत्यसुरर्षभेहितं मनस्विनो यं गृणते भवादृशाः ३० ॥

दमिति॥ युद्धमार्गेषु परं पराणि द्वेषु प्रकारेषु कोविदं॥ असुरर्षभेति संबोधनमात्मत्वे पि मारणार्थं तमिहीभिन्नवाक्यं यं य
द्वा आसमंतात् ईहितं यस्य सर्वप्रकारेण युद्धाभिज्ञं॥ असुरर्षभेषु वा ईहितं यस्य॥ यथा महांतः सुराभवंति तथा त्वमित्य
र्थः॥ असुरर्षभा ईहितं यस्येति वा॥ वधे हेतुः॥ एतद्वधे सर्वे एवासुराहता भवंति॥ असुरर्षभे वा हिरण्यकशिपो अहितं
विधेयविशेषणमेतत्॥ तस्यैवं करणे किं सामर्थ्यमित्यत आह॥ मनस्विनो यं गृणंत इति मनस्विनः शूराः दृढमनसो यं भ
गवंतं गृणते तेन सह युद्धं कृत्वा पराजिता अपि तमेव स्तुवंति॥ एतद्वचनं प्रोत्साहकं महता हि सह युद्धं कर्तव्यं भवादृ

॥ शाङ्करसुतः ३०

निमित्त सम मीप

Indira Gandhi National Centre for the Arts

तसु० १७ २४६

एवंयुद्धार्थंप्रतियोगित्वेनभगवंतंनिरूप्यतस्यप्राप्तिमाह॥ तंवीरमिति॥ सोपिभगवान्वीरःयुद्धमेवाभीप्सते॥ तदर्थमेव शापादिदानमितिभावः कालविलंबोपिनास्तीत्याह॥ आरान्निकट एवेति॥ अभिपद्येति॥ यथाशलभोग्नौपततितद्वत् तिष्यसीतिभावः॥ तथापित्वंनिर्भयःमत्कभयरहितः नहिभगवंतंप्राप्यकश्चिन्मत्कनाग्रस्यते अतोमत्कभयरहितइ त्यर्थः॥ विस्मयइतिपाठेविगतगर्वइतितावदेवगर्वइतिभावः ततःकस्यजयोभविष्यतीत्याशंकायामाह॥ त्वमेववीर शयेशयिष्यसइति रणांगणेशयनंकरिष्यसिइत्यर्थः। ज्ञित्वापिनिर्भयत्वाज्ञापनार्थं॥ रणांगणेशयनंसुखादपिसंभ विष्यतीतितन्निदर्शनार्थमाह श्वभिर्वृतइति॥ मत्तमेवश्वानोवेष्टयंतिइतिननुयुद्धमात्रेप्रार्थितेकामितपूरकोभगवा

तंवीरमारादभिपद्यविस्मयः शयिष्यसेवीरशयेश्वभिर्वृतः॥ यस्त्वद्विधानामसतांप्रशांतये रूपाणिधत्तेसदनुग्रहेच्छया ३१ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेसप्तदशो [illegible]

न्किमितिमारयेदित्याशंक्याह॥ यस्त्वद्विधानामिति॥ यद्यपित्वयाकाषितंतावदेवतथापिदेवानांकामितंत्वन्मरणमि तिमारयिष्यतियतः असतांप्रशांतयेसएवंनानाविधानिरूपाणिभगवान्बिभर्तिवराहादीनि॥ अन्यथाअवतारप्र योजनंनस्यात्॥ नन्वात्माभगवान्किमितिमारणार्थमेवरूपाणिकरोतीत्याशंक्याह॥ सदनुग्रहेच्छयेति॥ सतुरूपाणि सतामनुग्रहार्थमेवगृह्णाति॥ धर्मरक्षार्थमेवप्रवृत्तिः आनुषंगिकंत्वसतांमारणं॥ नांतरीयकमिति॥ अनेनपुन स्क० रपिकामोनोत्पत्स्यतइत्युक्तं॥ अन्यथापुनःकालांतरेएवंभावेकःसमाधानंकुर्यादितिभावः ३१ इतिश्रीभागवततत्त्व २४६ बोधिन्यांतृतीयस्कंधविवरणेसप्तदशोऽध्यायः ॥

अष्टादशेस्थितिलस्यभगवत्संनिधौस्फुटा। निरूप्यतेतथाशापात्स्वहर्ष्यंविज्ञयस्ततः १ स्थित्यध्यायोयमाख्यातोब्रह्म णाततस्थिरीकृतं। उभयत्रावेवशापोहिमारणंब्रह्मवाक्यतः २ युद्धमात्रेहरीच्छाहिकायवाङ्मनसाहिसा॥ उभयोरुद्यमो क्तिश्चयुद्धंमानसमीरितं ३ कायिकंचाग्रिमाध्यायेमध्यमंमध्यमेमतं॥ अतोविरोधवाक्यानामुभयेषांनदूषणं ४ प्रसंगो दर्शनंवाक्यंत्रिभिर्भक्तानुरोधवं॥ पुनराक्षेपवाक्यंचप्रारब्धकरणंतथा ५ वाक्योपक्रमणंवाक्यंत्रिभिर्मानसयोद्यमः॥ युद्धं षड्भिर्भगवत्वात्ब्रह्मप्रार्थनयाततः ६ उभयोर्वचनंषड्भिः युद्धंचैवतथोभयोः स्थितिरेषातस्यहरैतत्पोषकमिहापरं ७ प्र यो

मैत्रेयउ तदेवमाकर्ण्यजलेशभाषितंमहामनास्तद्विगणय्यदुर्मदः हरेर्विदित्वागतिमंगनारदाद्रसातलंनिर्विविशेत्वरान्वितः १

थमंयुद्धार्थंतयोःप्रसंगमाह॥ तदेवमिति॥ जलेशोवरुणः॥ तस्यएवंतद्वचनमाकर्ण्यमहामनाउत्साहयुक्तोजातः॥ यद्यपिमरणंश्रुतंतथापितद्विगणय्यैवमहामनाजातइतिसंबंधः॥ तत्रहेतुः॥ दुर्मदइति॥ दुष्टोमदःस्वानिष्टंनवो धयतीतिभगवंतंभक्तएवजानातीतिनारदः प्रष्टः॥ भगवत्कार्यकर्तृत्वान्नारदस्यापिसमागमनं अतोनारदाद्धेतोःह रेर्गतिंविदित्वातसद्भावदेशस्यश्रुतत्वात्युद्धाभिनिविष्टःत्वरान्वितोरसातलंनिर्विविशे १ श्रीगोपालयनमः

Indira Gandhi National
Centre for the Arts

अथ देश्वरदृश्यते ४

त्रसु० १७ ततो दर्शनमाह ददर्शेति यथास्मद्दर्शने तस्माद्वज्ञोत्पन्नानतथा भगवद्दर्शने इति ज्ञापयितुं भगवंतं विशिनष्टि॥ तत्र रसातले
२४७ अभिजितं धरणिधरं प्रोत्त्रीयमाणावनिं मुस्तं तमिति च तुर्थ्यो एकमलया कार्यमतिस्फूरत्वबोधनं शत्रोः पराजयश्चेति सह
जं तञ्चतुष्टयं १ अभितोजितं यस्य॥ आकारदर्शनेनैव तस्य सर्वतो जयो लक्ष्यते॥ धरणिं बिभर्तीति तथा धरण्या वा अधरं
यस्य तत्र दृश्यत इति॥ अतोपि भगवद्दर्शनेनास्मिन् भगवति बालो भक्त्यन्तः॥ दंष्ट्रया अग्रे अग्रदंष्ट्राग्रे पूर्वं निरूपिता।
तया प्रोत्त्रीयमाणा अवनिर्येन॥ अनेन शत्रुः कार्याशक्त इति सूचितं॥ स्वस्य हिरण्याक्षस्य हृचः अहरणस्त्रिया अक्ष्णा मुस्तं

ददर्श तत्राभिजितं धरणिधरं प्रोत्त्रीयमाणावनिमग्रदंष्ट्रया मुस्तंत
मक्ष्णा स्वरुचोहरणश्रियाजहास चाहो वनगोचरो मृगः २ ॥

तं दैत्यः सुवर्णवर्णः कार्याभिनिविष्टस्य भगवतोक्ष्णा अहरणवर्णो रजोगुणप्राकट्यात्॥ अनेन भगवद्गृहीतात्मानं भग
वंतं चन दृष्टवान् इत्युक्तं॥ एवं ज्ञात्वापि अग्रिमभगवल्लीलेच्छायाः प्राधान्यात् जहास दृष्ट्वा सजहास च चकाराद्दग्रिम
वचनान्यपि संगृहीतानि॥ तान्याह॥ अहो वनगोचरो मृग इति॥ हास्यरूपं चैतत्॥ अहो आश्चर्यं मृगः अरण्यस्य वा एम०
वचनान्यपि संगृहीतानि॥ सोऽवनगोचरः वनरहितभूमौ तिष्ठतीति वने जलेवा चरतीति तादृशो मृगोयमिति भगवद्बुध्या समागतं अयं तु वनगोच २४७
कारणीयाहेति सो अवनगोचरः वनरहितभूमौ तिष्ठतीतिवनेजलेवाचरतीति ताहशो मृगोयमिति भगवद्बुध्या समागतं
रो मृग इत्यर्थः २ ॥ श्रीगोपालायनमः ॥
बा १ नार

अस्तु यथा तथा रूपं युद्धं तु कर्तव्यमित्यभिप्रायेणाह॥ आहेति॥ एनं भगवंतमेवमाह॥ हे भगवन् एहि कदाचिदात्मा
नं न जानातीति तथा संबोधनं॥ युद्धार्थमाकारयामि॥ कार्यांतरेहं व्याप्त इति चेत्तत्राह॥ महीं विमुंच न इति॰ ननु प्रा
रब्धं कर्म परिसमाप्य पश्चाद्दन्यत्कर्तव्यमिति चेत्तत्राह नो रसौकसां विश्वसृजेयमर्पितेति॥ इयं भूमिरस्मदीया रसौ
कसामर्थे विश्वसृजा अर्पितत्वात्॥ अतोन्यस्य भूमिर्न नेया॥ कृत्रिमधर्मेण चेन्नीयते तदा युद्धं कृत्वा नेतव्येति उभयथा

आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां विश्वसृजेयमर्पिता न स्वस्तिया
स्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ३ ॥

पि एनां विमुंच॥ अस्मदीयैवेति न चिंताप्येतस्याः कार्याय तो नोस्माकमेषा न हि त्वामिनिविद्यमानेन्यस्य स्पर्शितायुक्तेति भा
वः॥ शरीरवत् न्यायतश्चेयं प्राप्तेति ज्ञापनार्थं ब्रह्मणा समर्पितत्वकीर्तनं॥ तथाप्यसज्जं तं प्रत्याह न स्वस्तियास्यसी
ति॥ मम ईक्षतः सतः अनया सह स्वस्ति यथा भवति तथा नयास्यसीत्यर्थः॥ संबोधनद्वयमधिक्षेपज्ञनकं क्रोधोत्पा
दनार्थं महद्भिरपि देवैः अस्मद्विरोधे कार्यं कर्तुं न शक्यते॥ येषां रूपमत्युत्तमं॥ रूपेणैव हि महत्वममहत्वं च ज्ञा
यते आसादिता स्वीकृता सूकरवदाकृतिर्येन पूर्वस्य हेतुः ३ ॥

देवप्रेरणायासमागतमिति चेत्तत्राह। त्वंन इति॥ नः सपत्नैर्दैत्यैः त्वं किं अभवाय भवतइति अधिक्षेपप्रश्नः॥ कार्यंतु
महद्भिर्देवैनभविष्यति॥ कथं त्वयेति॥ तेदेवाः असाध्यकार्ये नियोजकाः नवाहिताएवेत्यर्थः॥ नन्वहं विष्णुः स्वतंत्र
तयाभवद्भ्रः कथं देवप्रेरितइत्युच्यतेइति चेत्तत्राह॥ योमाययाहंसीति त्वंहिज्ञातोविष्णुरेवसत्यं॥ अभिज्ञानमा
ह॥ यस्त्वमसुरान्माययाकापट्येनैवहंसि॥ मायैवकरणं॥ येयथामांप्रपद्यंतइतिवाक्यात् मायेत्यसुरा इतिश्रुतेः॥
मोक्षाभावार्थं च अनिष्टनिवृत्त्यर्थं वा माययैवहंसि॥ कापट्ययुद्धं न वीरत्वबोधकं तेतदाह॥ परोक्षजिदिति परोक्षेसमा

त्वंनःसपत्नैरभवाय किंभृतो योमाययाहंससुरान्परोक्षजित् त्वांयो
गमायाबलमल्पपौरुषंसंस्थाप्यमूढप्रमृजेसुतहृक्षुचः ४ ॥

गत्यजयंसंपादयसीति॥ अतः प्रत्यक्षेयुद्धं न कर्तव्यं भूमिं त्यक्त्वागच्छेत्युपदेशः॥ तथानक्रियतइति चेत्तत्राह॥ त्वांयोग
मायाबलमिति तवतु न सहजं बलं किंतु योगमायया। सा त्वल्पदीयेति अस्मत्स्थाने स्थानं भविष्यतीति॥ अल्पमेव 
पौरुषं स्वतो भविष्यतीत्यर्थः॥ अतएवसंस्थाप्यापयित्वा सुतहृक्षुचः प्रमृजे। येत्वयामारितास्तेषामनृणो भविष्यामी 
त्यर्थः॥ अहं मारितशत्रूणां संबंधीति मां न जानासीति तत्र्यैसंबोधनं ४ ॥

म्र्टति१

ननुदेवानां विद्यमानत्वात्कथं दैत्यानां शोकाभावस्तत्राह॥ त्वयीति॥ अस्मद्भुजच्युतया गदया शस्त्राभेद्येपि शरीरेप्रहारेणाव्य
थितेसम्यक्स्थितिः॥ अस्मद्भुजच्युतयेति महाबलसंबंधउक्तः॥ ततः किं मे तत्राह॥ येचतुभ्यं बलिं हरंति क्षपयो देवाश्च अ
न्येपि त्वं तत्राये भिमानिनः तेपि सर्वे भवन्मूलकाएवेति स्वयमेवमारिताअपि नभविष्यंति उद्भवं न प्राप्स्यंतीत्यर्थः॥ तत्रहेतु

त्वयिस्थितेगदयाशीर्णशीर्षण्यस्मद्भुजच्युतयायेचतुभ्यं बलिंहरंत्यृषयोये
चदेवाःस्वयंसर्वेनभविष्यंत्यमूलाः ५ मैत्रेयउक्तस्तुद्यमानोऽरिदुरुक्तितोभ
रैर्द्दुरामगांगामुपलभ्यभीतां॥ तोदंमयन्निरगादंबुमध्यात्ग्राहाहतःसकरे
णुर्यथेभः ६

रमूलाइति ५ एवंदुष्टवचनान्यपिभक्तहितार्थं अंगीकृतानीत्याह॥ सइति॥ अरिर्हिरण्याक्षः तस्यदुरुक्तयएवतो
मराः भल्लविशेषाः यैर्गजस्तुद्यते- तथातुद्यमानोपिभीतांगामुपलभ्य तोदं मृषन्नेव अंबुमध्यान्निरगात्- अयुक्तेपित
थानिःसरणेदृष्टांतः ग्राहेणाहतोतिताडितः करेणुसहितो यथेभइति ६ ॥ श्रीगोपालयनमः ॥

Indira Gandhi National
Centre for the Arts

नसु० १८
२४९

[illegible]
अत्रभगवतोयुद्धलीलाप्रतिपाद्यत इतिविरोधिनोश्वयुद्धसंभवात्गदाप्रहारइवविरोधिवचनान्यपियुक्तान्येव॥यदिव
चनान्यन्यथाव्याख्यायंतेतदान्यथाक्रियापिव्याख्येया साचेन्नटवद्व्याख्यातातुल्यंवचनेष्वपि॥तथापिभक्तानांश्रवणक
टुत्वात्वचनान्यन्यथाव्याख्यायंते ननुसभागवतार्थः॥वस्तुतोहिरणाक्तोभक्तोभारतीच॥तथासतितानिवाक्यानिस्तु
तिपराण्येवेतिपुनर्व्याख्यायंते॥अहोइतिस्वभाग्यमभिनंदति वनेगोभिरुपनिषद्भिः चर्यतेज्ञायतइति॥अधिकारिवि
शेषेणवेद्यंतत्समधिगम्योयः सोस्मानिदानीमगयतीत्याश्चर्यं॥अतएवभगवंतंप्रत्याहहेभगवन्एहिअस्मद्गृहाद्यर्थंत्रा
गछ पृथिवीगमनंनमन्यतइतिचेत्तदाह॥अत्रमहीविमुंचेति॥अत्राचाहोमहीच साह्यस्मदुःखंनजानाति॥भक्तोहि
परदुःखाभिज्ञः अतःसात्यक्तव्या॥नोरसोकसामर्थ्यरसएव ओकःस्थानंयेषां॥वयंरसिकाःभक्ताः अतोस्मद्गृहंप्रथम
तःकुर्वित्यर्थः॥तर्हिपृथिव्याःकागतिरितिचेत्तत्राह॥विश्वस्रजेयमर्पितेति॥इयंस्वभावतः नतवस्थानेसमागताकिंतुब्र
ह्मणार्पिता॥अर्पितत्वात्पुनःप्रत्यर्पणंकर्तव्यं॥तदाब्रह्मैवतद्गृहंकरिष्यतीत्यर्थः॥वयंत्वनन्यगतिकाःइयंतुस
गतिका॥इयंतुसगतिकेत्यपिविशेषः॥किंच॥यद्यस्मद्गृहमकृत्वातयासहगमिष्यसितदापरमदयालोस्तवसुखंनभवि
ष्यतीत्याह नस्वलियाससीति॥अनुद्धतस्समर्मइकृतएवसतः अनयासहसुखंनयाससीत्यर्थः॥नहिभक्तमनुद्धृत्य
सदयःकश्चिद्भार्ययासुखमश्नुते॥देवासद्गृहंनमन्यंतइतिचेत्तत्राह॥सुरधमेति॥सुराअधमायस्मात्तेहिनिकृ
ष्टाः किंतेषांसंमत्येत्यर्थः ननुश्रांतोहंभूम्युद्धारेणरूपांतरेणोद्धरिष्यामीतिचेत्तत्राह॥असादितश्शूकरणकृतेइतिसंबोधनं॥
नसादिताश्रवसादंप्रापिताश्शूकराकृतिर्येन॥इदानीमप्येतद्रूपंनावसन्नं॥अतोभूम्युद्धारमकृत्वामामुद्धरेत्यर्थः॥ननुदेवैःभूम्युद्धार
र्थंप्रार्थितोहंतेहिभूमौमामाराध्यमुक्ताभविष्यंति॥अतोबहूपकारसिद्धेःभूमिरेवोद्धर्तव्येतिचेत्तत्राह॥त्वंनःसपत्नैरिति॥नःसपत्नैः

एम०
२४९

---

रसु० १८
२४९

त्वंप्रयछसि यतस्तेअसुराःअसून्प्राणान्रांतिशहृयंति॥शहृयुक्तान्कुर्वंति॥प्राणघोषंश्रवणंतियोगिनइत्यर्थः॥प्राणंस्तुवंतीतिवा
॥नह्यासन्योपासकास्तताभवंति॥म्नत्फमत्यमुच्यतेतिश्रुतेः॥किंच॥परोरुजिद्वान्परःपराणिअरूणिइंद्रियाणियेषांतानेवजय
तीतिपरोरुजित्॥इंद्रियाणमानेवमारयसीत्यर्थः॥असुरान्वापरोरुजित्॥असुरान्लक्षीकृत्यपरोरुंयथाभवतितथाजयतीति
लोकानांस्थानेअसुराजितइतिवदतिवस्तुतस्तुतदधीनोभवति॥यथाबलिस्थानेतर्हिसमागतेनत्वयाकिंकर्तव्यमित्यपेक्षायामाह॥
त्वामिति॥त्वांसंस्थाप्यमुत्कुचोम्नजे तर्हिसमागतेनकिंयोगेनशास्त्रेणवासम्यक्स्थापनंक्रियतामित्याशंक्याह॥योगमायाव
लमिति योगमायायाअपिबलंयस्मात्॥ज्ञानिनामपिचेतांसीतिवाक्यात्॥योगादिभ्योपियोगमायैवबलिष्ठातस्याअपिबलंत्व
त्तःसकथंयोगेनवशीक्रियतइत्यर्थः ननुपुरुषरूपंहृदयेचिंत्यतांपुराधारणयेतिवाक्यानुसारेणतत्राह॥अल्पयोरुषमिति॥पुरु
षसंबंधिरूपंपोरुषंअल्पंपोरुषंयस्मात् ब्रह्मांडकोटिविग्रहोभवान्॥अतएवत्वामेवसंस्थाप्यसकुटुंबःकृतार्थोभविष्यामि॥ननु
ज्ञानाभावात्तवकथंमोक्षःतत्राह॥हेमूढप्रेति॥मूढेष्वपिप्रकर्षोयस्यअतःत्वंमूढानपिकृतार्थान्करोषि॥इतिनभक्तिमार्गेज्ञा
नापेक्षेत्यर्थः किंच नकेवलमहमेवसकुटुंबोमुक्तोभविष्यामिकिंतुसर्वएवभक्ताः॥एवंकृतेपरमविश्वासेनकृतार्थाभविष्यंती
त्याह॥त्वयिस्थितइति॥अस्मद्वेतोः त्वयिस्थितेसतिभुजचक्रतयागदयाशीर्णशीर्षाणिचसतियेचतुर्भ्यंरूपयोर्देवाश्चवलिंह
रंतिचकाणड्क्तेभ्योपितेसर्वेअमूलानभविष्यंतिसर्वएवसमूलाभविष्यंतीत्यर्थः॥भगवांश्चेद्धृदयेस्थिरोभवतितदागदासुषुम्ना
नाडीगतिंददातीतिभुजानांक्रियाशक्तीनांचक्रतिर्ययातयाब्रह्मरंध्रभेदेसतिप्राणादीनांतेनमार्गेणगमनेस्वस्यभगवतियोगेसर्व
एवसायुज्यंप्राप्ताः समूलाएवभविष्यंतीत्यर्थः॥एवमन्यपराणांशङ्कानामन्यपरतायोजनीया॥तुद्यमानाव्यथायुक्तायेदैत्याःत
त्सहितोभगवान्भक्तैःकृत्वार्जितः अरेयोद्धरुक्तितोमरणयेषामितियेषांपरभेदकान्यसह्यकानिकदापिनसंतितेहिभक्तानारदा
दयःतैःहताहिरणाक्तादिसहितोभगवान्ज्ञातइतितत्संबंधेनस्वविस्मरणंभवतीतिभूमेर्भयं॥दंष्ट्रायाश्चयमत्वात्तदंतेस्थि

श्रीः रसेनताम्मारः=

त.सु.१८ तोहात्मकः तंभगवान्वस्तुतोनसह तेतेषांतद्भावदूरीकरणार्थं यदि दृष्टिर्ध्याय्येत तदाभूमेर्भयंभविष्यतीतितेषांतोदृं सहस्त्रे
२५० वांबुमध्यान्निर्गतः जलेतेयद्यापिसंस्कर्त्तव्याः॥ ननु किमितितथाकृतवानित्याशंक्यदृष्टांतमाह ग्राहेणहृतः तंगृहीत्वैवय
थाकरेणुसहितोमहागजः गजस्तुकालाधीनएवेतिग्रहात्तत्रबाधकाभवंतितेचेद्बाधकालदाकरेणुभिःसहितोमोदृत
इति द्वैत्यत्वंभगवतोनबाधकमितिसुखक्रियासाधकत्वात्सेवकस्त्रीसहितएवनिर्गतइत्यर्थः ६ एवमुभयसहितस्यभगवत

तंनिःसरंतंसलिलादनुद्रुतोहिरण्यकेशोद्विरदंयथाझषः॥ करालदंष्ट्रोऽ
शनिनिस्वनोब्रवीद्गतह्रियांकिंत्वसतांविगर्हितं ७ ॥ ॥

अरित्रमुभयेषांहितरूपमाहद्वाभ्यां तमिति प्रथमंहिरण्याक्षस्यकृतार्थतामाह॥ तंभगवंतंसलिलान्निःसरंतंअनुद्रुतः यदे
वभगवान्सलिलान्निर्गतः तदेवभगवत्सायुज्यार्थंसैंधवखिल्यवत्अनुपश्चात्द्रुतः॥ कठिनभावंत्यक्तवान्द्वैत्यत्वंगतमि
त्यर्थः। यथाग्निसंनिधानेघृतंविलीनंभवतितथेतिद्रुतपदंज्ञापयति॥ मातीतिकार्थेतुसंगेधावन्आगतइत्यर्थः॥ ततः
किंज्ञातमित्याकांक्षायामाह॥ हिरण्यकेशइति॥ सूर्यमंडलस्थितामूर्त्तिः भगवतोहिरण्यकेशरूपाभवतिअतस्तादृशं एम०
रूपंगृहीतवानित्यर्थः॥ ननुभगवत्संनिधिमात्रेणकथमसदिव्यरूपप्राप्तिरित्याशंक्याह॥ द्विरदंगजेंद्रमनुयथाझषः २५०
हूहूगंधर्वो ॥

दिव्यरूपंप्राप्तवान्तथेत्यर्थः॥ प्रासंगिकंफलमेतज्ज्ञातमित्युक्तं॥ उत्तमंफलंवस्त्यतिसायुज्यात्मकं॥ ननुतस्यमत्फः किंज्ञातइत्याशंक्या
ह॥ करालदंष्ट्रइति॥ करालेषुदंष्ट्रायस्येति॥ करोभगवदीयः अलंयेषांतेभगवद्ध्यास्तेष्वेवदंष्ट्रारूपोयमागतइत्यर्थः॥ अथवा
करालेषुसुदर्शनादिष्वेवास्याप्यस्फःस्थितः॥ ननुबाधकाग्रहाः किंज्ञातास्तत्राह॥ अशनिनिःस्वनइति शनिरहितानामदुष्टानांग्र
हाणांनितरांस्वनोयत्र॥ सर्वएवग्रहाएकीभूताइतिग्रहदोषोनिवृत्तइत्यर्थः॥ अतएवभगवंतंमत्याह॥ गतह्रियांइति॥ स्त्रीशद्वे
नदेहाद्यभिमानरूपाः सर्वएवधर्माउक्ताः। तुशद्वेनतेषांपूर्वधर्मएहित्यमुक्तं॥ एवंमुक्तजीवानांनिस्त्रैगुण्येविचरतांकिंविगर्हितंइ
तिप्रश्नार्थः॥ तत्राद्यः अःकृष्णः तस्यसतांपरमभक्तानांयद्यपिनैस्त्रिगुण्यात्तथापिभक्तिविरोधिनः पदार्थाः कर्त्तव्याः नवेतिसंदेहात्
प्रश्नः॥ प्रतीयमानपक्षेतुशीघ्रंभगवंतमनुद्रुतः॥ तस्यतथात्मामर्थ्यसूचकंहिरण्यकेशइतितस्यगतिप्रतिबंधकोपिज्ञातइतिदृष्टांतः॥
ननुयुद्धार्थिनोयुद्धादानेकथंक्रोधस्तत्राह॥ करालादंष्ट्रायस्येतिस्वभावतः क्रोधयुक्तइत्यर्थः॥ अनेनमारयितुमेवप्रवृत्तइत्युक्तं
भवति॥ तथापिस्वस्यवीर्यगर्वान्मारणमकृत्वैवममवचनमेववज्रतुल्यमितिदुष्टेनैवबचनेनतथोक्तवानित्याह॥ अशनिनिः
स्वनोब्रवीदिति॥ आहूतोननिवर्त्तेतिशास्त्रात्युद्धार्थमाकारितस्यपलायनंशूरणांलज्जाजनकमपिभवतिअतोमुख्यधर्मे
लज्जापरित्यागेकेवलंप्राणरक्षाणांकिंविगर्हितमित्यपहासः॥ असत्पदेनधर्मएहित्यमप्युक्तं॥ अनेनस्वनिवृत्त्यर्थंयु
द्धायोग्यतानिरूपिता॥ अतएवभगवान्सनिवर्त्तिष्यतइतितदाक्षेपकाणिवचनान्युक्तवान्॥ यथाननिवर्त्तेत ७
एमनाम श्रीकृष्णायनमः॥ ॥ एमनामगतिर्हरी॥ ॥ ॥

Indira Gandhi National
Centre for the Arts

नसु १८ २५१ एवमुक्तो भगवान् शीघ्रं भूमिस्थापनकार्यं कृतवानित्याह॥ सगामुद्धृत्येति॥ स भगवान् सलिलस्य उद्धृत्य उपरि गोचरे निर्भये देशे तत्रैव हि गावश्चरन्तीति वैकुण्ठे वा स्थित्वा यत्र पश्यति तत्स्थानं गोचरमित्युच्यते॥ ज्योतिर्मण्डलमध्ये वा॥ अत एव तत्रातिप्रकाशः तादृशे स्थाने गां विन्यस्य तत्स्थाने रसकरे वैकुण्ठ्याः समिव स्थापयित्वा तस्यां देवानां भगवदीयमिदमिति ज्ञापनार्थं स्वसत्त्वमदधात्॥ अत एवास्यां पृथिव्यां सर्वत्र भगवन्मूर्तयः भगवद्गुणा भक्ताश्च तिष्ठन्ति॥ स्वसत्त्वं नाम स्वमुद्धृत्सत्त्वगुणं तद्वेव हि धारकं सामर्थ्यरूपं च॥ एवं कृते देवानां संतोषो जात इति तैः स्तोत्रं पुष्पवृष्टिश्च कृतेत्याह॥ अभिष्टुत इति॥ विश्वसृजा अभिष्टुतः विबुधैः प्रसूनवर्षैश्चाभिवर्षितः॥ उभयमुभयेषां वा॥ एवं हिरण्याक्षस्य युद्धाकरणे अवज्ञा ज्ञाता तां निराकर्तुमाह॥ पश्यतो रेरिति॥ उ

सगामुद्धृत्य सलिलस्य गोचरे विन्यस्य तस्यामदधात् स्वसत्त्वं॥ अ
भिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोरेः ८

त्कर्षे ह्यरिदृष्टः परममुत्कर्षं संपादयतीति च॥ स्तुतिपक्षे किमिति देवैरभितः स्तुतः पुष्पवृष्टिश्च कृतेत्याकांक्षायामाह अरेः पश्यत इति॥ नैतत्स्तोत्रादिकं काम्यं नित्यत्वात्तातिरिक्तं॥ अतो नैमित्तिकमिति ज्ञापयितुं निमित्तद्वयं निर्दिशति भूमेः समागतायां सर्वत्र यागादिधर्मा भविष्यन्तीति ते सर्वे देवास्तथानुग्रहार्थं स्तोत्रकरणं पश्यतो हेतोः स्वस्मै वरूपं पश्चाद्भविष्य त्यम० तीति स्तुत्या प्रसन्नः तथाकरिष्यति प्रसूनवृष्टिश्च अरेर्हेतोर्देवानां शत्रुभयं महत्तद्यावृत्त्यर्थं अस्मत्तस्मद्धिर्भवन्निमित्तमि २५१
ति ज्ञापयितुं तथाकरणं ८    ॥ श्रीगोपालयनमः ॥

प्रातीतिकमर्थं विहाय वा स्तवमर्थमाह

भगवानेवं भूमिकृतार्थां कृत्वा भक्तहिरण्याक्षप्रश्नोत्तरं दानमुपक्रमं कृतवानित्याह॥ पराणुषक्तमिति॥ ननु भगवान् किमर्थमुत्तरं प्रयच्छति इत्याशंक्याह· पराणुषक्तमिति· परस्मि न्ब्रह्मण्यनुषक्तं योहि सन्मार्गेगंतुमिच्छति स उपदेष्टव्य इत्यर्थः॥ ननु तथापि भगवदुक्तं न ग्रहीष्यतीत्याशंकां वारयति॥ तपनीयोपहकल्पमिति अत्यंतं तापयोग्यउपहकस्पो यस्येति॥ तस्य देहेन्द्रियप्राणश्रीमन्त्वापि परमतपसा सिद्धा अतस्तत्तथा एव तन्नाश्रुते॥ किंच महागदमिति॥ महानगदो यस्य॥ स

पराणुषक्तं तपनीयोपहकल्पं महागदं कांचनचित्रदंशं॥ म
र्माण्यभीक्ष्णं प्रतुदंतं दुरुक्तैः प्रचंडमन्युः प्रहसंस्तं बभाषे ९

वैरोगनिवर्तिका महती भक्तिस्तस्य वर्तन इति॥ स एव तस्य महानगदः॥ तथापि कालादिजनितबुद्धिदोषसंभवात् कथमेको ततो वाक्यग्रहणमित्याशंक्याह कांचनचित्रदंशमिति कांचनात्लौकिकी भक्तिं प्रति विचित्रो दंशो यस्य भगवताहि तथा चिह्नं कृतमस्ति येन परमा भक्तिर्हन्यत्स्यते॥ मुनीनां शापबलदृ ... णो दंशः विचित्रो भवति देहस्थितमसमीचीनं दूरीकरोति स्वतंत्रभक्तिं च स्थापयति॥ लोको हि सर्पादिनादष्टो विपरीतो भवति अतस्त्वमर्मा णिस्वस पाय॥

Indira Gandhi National Centre for the Arts

तमु॰१८
२५२

छिद्राणि अभीत्तां प्रकर्षेणातुदंतं परमं इंद्रियनिग्रहं कुर्वंतं॥ अतः सर्वसाधनयुक्तत्वादयमुपदेष्टव्यः॥ नन्वीश्वरएत
ज्ज्ञानमस्ति वेदितिवाक्यात्महादेवस्य तमुपदेक्ष्यति किं स्वोपदेशेनेत्याशंक्याह॥ दुरुक्तैः प्रचंडमन्युरिति॥ यद्यपिम
हादेवो गुरुर्भवति तथापि दुरुक्तैः प्रचंडो भवति अवाच्यानि बहूनि सं तीति प्रकृष्टा चंडिका यस्य तत्र गते सायामोहये
त॥ लोकाश्चास्य यावदेयुः॥ प्रचंडो मन्युर्यस्येति॥ मन्युः शिवः सर्वथा गुणातीतस्य भक्तिरसास्वादनेन भविष्यतीति प्र
कर्षेण हसन्व्यामोहनमपि फलपर्यवसायीति प्रकर्षः तं पूर्वप्रश्नकारिणं बभाषे उत्तरदानेन संदेहं दूरीकृतवानि
त्यर्थः॥ कथापक्षे तु भगवान्भूमिं स्थापयित्वा तद्वधं करिष्यन्वचनैः कुद्धं करोतीत्याह। परानुषक्तमिति॥ परेण दृष्टतः =
अनुषक्तं॥ यदि देवानां पुरस्कारं द  ष्टा गच्छेदेव॥ न गच्छतीति मारणीयः॥ ननु सर्वात्मा भगवान्कथं नोपेक्षते तत्राह॥ २
तपनीयोपकल्पमिति॥ तपनीयं सुवर्णमयमुपकल्पमंगदादिकं यस्य॥ अनेन तस्य बाहंकारो निरूपितः॥ तस्य वा उप
कल्पं प्राप्तं देत्यादिसामग्री सम्यक्तपनीया अतो मारणीय इत्यर्थः॥ युद्धयोग्योपि भवतीत्याह॥ महागदमिति॥ महती ग
दा यस्य॥ कांचनं सुवर्णमयं विचित्रं दंशं यस्य॥ खरं रूपं कवचं परमारणार्थं गदा॥ परप्रोत्साहनार्थं च अभीक्ष्णं
मर्माणि प्रकर्षेणातुदंतं॥ भक्तानुरोधेन यद्भगवान लौकिकं करोति तन्मर्मेत्युच्यते॥ लौकिकभक्तवाक्यव्याहत्यर्थं॥
दुरुक्तैरिति॥ एक एवार्थः सुशब्दैः अनिष्टशब्दैश्चोच्यते॥ इष्टद्विष्टभेदेन॥ यथाज्ञेनाय यथा घातुकइति॥ अतोनि
र्दुष्टपूर्णगुणोपि भगवतैं दुरुक्तैः उच्यमानो मर्मरूपतामापन्नाः अतएव तत्स्पर्शेनुदंति॥ भगवदपकर्षश्रुत्वा अ
तः स्थितो महादेवः तद्वधार्थं प्रचंडो जात इति प्रचंडमन्युरित्युक्तं॥ प्रहसितं युद्धसमारंभोत्साहरूचकं॥ तमिति पूर्वोक्तदुष्ट्वा

एम॰
२५२

मृगयायां मृगयावपि येहन्यंते पशवस्तेपि सिंहाः ४=

शत्रुभावं पुरस्कृत्य यथा तेनाबद्धा मुक्तानितथा भगवानप्याह त्रिभिः॥ सत्यमिति॥ भो इति सामान्यतः संबोधनं भगवद्विरोधिनो
नाम न ग्राह्यमिति ज्ञापनार्थं॥ वयं वनगोचरा दृश्याः॥ ननु गृहे॥ सत्यमेवैतत्॥ वने जलेवा तव गोचरा ज्ञाता इत्यपि सत्यं॥ मृ
ग इति यदुक्तं तदपि सत्यमेव॥ मृगयंतीति मृगाः अस्मासु सर्व एव यौगिकोर्थः सिध्यति॥ यतो वयं सर्वकर्त्तारः सर्वशब्दवाच्या
श्च॥ प्रकृते यदुक्तं मृगावध्या इति तत्राप्यस्माकं यौगो लीत्याह॥ मृगा इति॥ मृगयंतीति मृगाः परिधावपि येहन्यंते ग्रामसिं
हा न्नैमृगयंति श्वानो हि तन्मारकाः न हि तद्व्यतिरेकेण पारधिर्भवति श्वा मृगग्रहणे शुचिरिति वाक्ये शुद्धत्वात् परमत्र कश्चन
विशेषो लीति सिद्धमर्थमनुवदति॥ युष्मद्विधानिति॥ यादृशा वयं मृगास्तादृशा एव ग्रामसिंहा भवंतीति॥ यदि मृगत्वेन लूयते तदा
श्वा भिरपि सिंहत्वेन लूयत इति तथावचनं॥ अथ यदि निंदार्थमुच्यते तद्बाधितार्थत्वात् विपरीतार्थत्वाच्च अप्रमाणमिति न =

श्रीभगवानुवाच॰ सत्यं वयं भो वनगोचरा मृगाः युष्मद्विधान्मृगये ग्रामसिंहा
न् न मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव गृह्णंत्यभद्र १०

भगवतैव १=

ग्रह्णीम इत्याह॥ नमृत्युपाशे रिति॥ देवदैत्ययोः साधारणाविरोधप्रतिपादनार्थं बहुवचनं॥ उत्तरार्द्धेतु निंदनं तेनैव कृतमि
त्येकवचनं॥ सर्वे च निंदिता इति देवपक्षे बहुवचनमेव॥ यदि कोपि त्वद्वचनमंगीकुर्यात्तदा चास्माभिरप्यंगीक्रियेत॥ अ
नंगीकारे हेतुः॥ मृत्युपाशैः प्रतिमुक्तस्येति॥ यथा सन्निपाती वल्गति तदा मृत्युपाशैः प्रतिमुक्तो बद्धः एकेनापि पाशेन बद्धो न
मुच्यते किं पुनर्बहुभिः॥ तस्य तस्मिन्दिवसे कालकर्मस्वभावा भगवांश्च सर्व एव मारकत्वेनोपस्थिता इति पाशा बाहुल्यं॥ प्रति
कूलतया मुक्तः प्रतिमुक्त इति किंच वीरा हि वाक्यं न गृह्णंति॥ किं तु कृतमेव तत्रापि विकत्थनं न गृह्णंति॥ युद्धभूमौ सिद्धं जयादि
कमन्यत्र कीर्त्यते तैर्व विकत्थनं ... ... ... ... कर्तु

हिरण्याक्षस्य ३

यद्यप्यधर्मकर्तृत्वेन वयं निर्दिष्टा महीं विमुंचेति तत्राप्युत्तरमुच्यते॥ एते वयमिति॥ येभवत्संबंधिनो न्यासहराः ते वयमेवेति स्व
तसु १८ २५३ रूपदर्शनेन चौरत्वं निराकृत्य प्रभुत्वं स्थापितं न तु चौरत्वस्यैवानुवादः॥ अनेन यज्ञो हमित्युक्तं न वा यद्योचितं कर्तव्यमिति निवेद
नमर्थः॥ वक्रोक्त्वावपि सत्यत्वात् न्यासहरणस्य एते वयमिति निर्देशः दूषणांगीकारपरः स्यात् अनुवादकत्वाभावात्॥ यदुक्त
क्तं गतह्रियामिति तत्राह गतह्रिय इति युद्धमकृत्वा ये पलायंते विकत्थंते च ते गतह्रियः एतदपि सत्यमेव॥ नहि ह्रीमान्स्वेव
केन युध्यते॥ गता प्राप्ता ह्रीर्येनेति वा॥ त्रयो वेगतश्रिय इत्यत्र तथा निर्णयात्॥ अंतर्बाधहेतावपि स्वकीय एव बाधहेतुपरा
र्थपरित्यागो गतह्रीत्वं॥ बहिल्लत्वमाह॥ गदयाद्राविता स्ले इति॥ अयुध्यमानस्य ततो ऽपसरणं पलायनमेव म्लगाहि लकु

एते वयं न्यासहरा रसौकसां गतह्रियो गदयाद्राविता स्ले॥ तिष्ठाम
हे थापि कथंचिद्राज्ञोऽस्थेयैः क्रयामो वलिनो त्पाद्य वैरं ११ ॥

टं दृष्ट्वा पलायंत इत्युक्तं चितमेव द्रावणं लज्जाभावश्च॥ तर्हि नूद्यत एवं किमिति पलायनं न क्रियत इत्याशंक्याह॥ तिष्ठामहे
थापीति अथापि स्वापकर्षे विद्यमानेपि उत्कर्षो भविष्यतीति वुध्या आज्ञो संग्रामे कथंचित्तिष्ठामहे॥ कथंचिदिति
कियत्कालं सज्जानाति॥ भगवांस्तु संग्रामे बहिर्मुखानां पुरतो न तिष्ठति तथापि भक्तानां ग्लानिग्राहत्वर्थं कथंचित्तिष्ठाम इ
त्यर्थः किंच बलिना वैरमुत्पाद्य क्रयामोगं तमदेशाभावादपि स्थीयत इत्यर्थः॥ बलिष्ठो हि पलायनेऽप्यन्विष्यापि मारयेत् एम०
तो निग्रहस्य सिद्धत्वात् युद्धमेव क्रियत इति कथंचित्स्थीयत इति वक्रोक्तिः न्यासहरणेन आज्ञाकरणेन च वैरोत्पादनं २५३
॥ ११ ॥

एवमुक्ते तद्बुद्धौ दीनभावः समायास्यति ततो युद्धमकृत्वैव गमिष्यतीत्याशंक्याह त्वं पद्मानामिति पत्तीनां चरयाना
पे यूथपाः तेषामपि भवान् किलाधिपः॥ पादरूपा रथा येषामिति वा॥ अनेन यथा सुखं रथबलेसामर्थ्यं वंत इत्युक्तं॥ ते
षां यूथपाः सेनापतयः॥ अतस्त्वया एकाकिना युद्धं न कर्तव्यं किंतु सर्वैः संभृत्यागंतव्यमिति स्वोत्कर्षः सूचितः॥ नः अस्मा
न् घटस्व वयमपि बहवः महता हि महद्भिः सह युद्धं कर्तव्यमिति॥ तदपि युद्धं न कौतुकरूपं किंतु अस्वस्त्वये अकल्याण
य एकतरमारणसावश्यकत्वात्॥ अथवा॥ न इति संबध्यते॥ तदा हि सः प्रोत्साहितो भवति विपरीतवाक्ये वंचनोक्तिः॥
उभयथाप्यस्माकं स्तुतिरेव तुच्छजयात् सेवकमारणाच्च॥ अत एव भगवतानइत्युक्तं॥ अस्तु यथा कथंचित् अनूहः सन्

त्वं पद्मानां किल यूथपाधिपो घटस्व नोऽस्वस्त्वय आश्वनूहः संस्थाप्य
चास्मान्प्रमृज्याश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः १२ ॥

आशु घटस्व कस्मिन्नप्यंशे विचारेण न कर्तव्यः॥ ऊहो विचारः विघ्नाऽभावयुक्तो वा॥ अनूहः अप्रत्यूह इत्यर्थः॥ अ
तः किं स्यादत आह वक्रोक्त्या संस्थाप्य च अस्मान् च कारात् देवान् पित्र्यकानां मम्नु प्रमृज्य संस्थापनमात्रेणैव अश्रूणि नि
हत्वानीति कथंचित् क्लेशः शाम्यतीति बहूनां संबंधि एकमस्त्वित्युक्तं॥ अथ युद्धकरणपक्षे बहूनामुपकारः स्वस्य परमल्प
मारणेन मनसि हीनता॥ युद्धे गुणांतरमप्यस्तीत्याह॥ यः स्वां प्रतिज्ञामिति॥ यस्तु स्वस्य प्रतिज्ञाधिक्येन न पियर्ति न पूर
यति स असभ्यः अतोस्मिन् पक्षे प्रतिज्ञापूरणात् सभ्यत्वस्य सिद्धत्वात् बहूनामुपकारश्च युद्धं सर्वथा कर्तव्यमित्यर्थः १२

Indira Gandhi National
Centre for the Arts

एवमन्योन्यंवाक्युद्धंनिरूपितं॥ततःकायिकंयुद्धंजातमित्याह॥सोधिक्षिप्तइतिषड्भिः॥द्वाभ्यांयुद्धंतुदैत्यस्यआरंभोयुद्धमेवच प्र
तीकारश्चयुद्धंचद्वयंभगवतःपुनः॥मिश्रयुद्धंततःस्थूलमुपसंहारएवच १ तत्रप्रथमंहिरण्याक्षयुद्धंश्लोकद्वयेनाह॥युद्धेहि
क्रोधोमुख्यसामग्रीसाप्रथममुच्यते॥सोधिक्षिप्तइति॥भगवताअधिक्षिप्तइति क्रोधेहेतुः सतुभक्तोवाअल्पेवानभवतीतिस
इत्यक्तं॥सतुदैत्योमहाबलश्चेतद्भगवताखभावआविर्भावितइतिभगवतेत्यक्तंअधिक्षेपः ग्रामसिंहानितिप्रलब्धःवक्तो
क्त्यावंचितएतेवयमित्यादिभिः॥चकारएतद्युद्धार्थमाकारितश्च॥तत्रापिरोषेणप्रलब्धःनतुहितोपदेशेन॰अतोदोषत्रयस्यज्ञा
तत्वात्तस्यत्रिदोषरूपोमहान्क्रोधोजातइत्याह॥आजहारेति कश्चित्स्थापितमिवानीतवानित्यर्थः॥उल्बणमनिष्टपर्यव

मैत्रेयउ॰सोधिक्षिप्तोभगवताप्रलब्धश्चरुषाभृशं॥आजहारोल्बणंक्रोधंक्रीड्यमा
नोहिराडिव। १३ सृजन्नमर्षितःश्वासान्मन्युप्रचलितेंद्रियः॥आसाद्यतरसादै

सायीसहजक्रोधयुक्तःसाधनैःअनर्थपर्यवसायीभविष्यतीतिकिंवक्तव्यमित्यत्रदृष्टांतमा १३ त्योगदयाभ्यहनद्धरिं १४
हा॥क्रीड्यमानइति॥यथाअहिराट्सर्पश्रेष्ठःकालीयोऽन्योवासर्पबालरोषंप्रकटयति। तथाप्रकटितवानित्याह॥१३॥सृजन्निति
॥अत्यमर्षितःश्वासान्विसृजन्गदयाभ्यहनदितिसंबंधः॥अंतःस्थितक्रोधेनश्वासाउत्पन्नाबहिःस्थितेनतुक्रोधेनमन्युशब्द
वाच्येनप्रकर्षेणचलितानींद्रियाणियस्यतादृशोजातः एवंतस्यक्रोधव्याप्तिरुक्ता॥अतएवशीघ्रमासाद्यभगवन्निकटेसमाग
त्यभगवतासहयुद्धमयुक्तमित्याशंक्यतस्यजातिंनिर्दिशतिदैत्यइति॥ महांस्तुपश्चाद्देवमारयतिनप्रथममितिभगवदुत्कर्षक 
ज्ञानार्थंतस्यप्रथमंमारणमाह॥गदयाभ्यहनदिति॥सिंहोवाडुःखनिवारकोवामारितश्च खसेवानिष्ठहेतुरितिसूचयितुंह 
रिमित्युक्तंएवंमारणेतंतस्ययुद्धंनिरूपितंः १४ ॥

भग
तु

भगवत्कर्तृकंयुद्धंश्लोकद्वयेनाह॥भगवांस्त्विति॥तुशब्दः तद्वत्क्रोधंनकृतवान्॥किंतुशांतएवतत्प्रतीकारंकृत्वायुद्धंकृत
वानित्याह॥भगवतःप्रतीकारेसामर्थ्यंशिष्टेनोक्तं गदावेगमिति गदात्यप्रत्याख्येयवेगानिकटेहिहन्यतेइति॥ तत्रापि
उरसिविशेषेणास्यं तत्रापिरिपुणेतिअवंचनेहेतुत्रयंनिरूपितं॥तथापिवंचनंकृतवानित्याह॥अवंचयदिति कथ
मवंचयदित्याशंक्यप्रकारमाह॥तिरश्चीनइति॥ अतिवेगेनभगवान्तिर्यग्जातः॥ननुनिकटेजायमानःप्रहारःकथंतिर्यग्मा
त्रेणगच्छेत्तत्राह॥योगारूढइवेतियोगोहिप्राणवशीकरणेहेतुः॥ अंतकोहिप्राणहारकः॥सहियोगेनप्राणंलीनंक

भगवांस्तुगदावेगंविसृष्टंरिपुणोरसि॥अवंचयत्तिरश्चीनोयोगारूढइवांतकं १५ पुन
र्गदांस्वामादायभ्रामयंतमभीक्ष्णशः॥अभ्यधावद्धरिःक्रुद्धःसंरंभाद्दष्टदच्छदं॥ १६ ॥

रोतितदाप्यंतकःप्राणमन्वेषयन्नपिनप्राप्नोतिएवंभगवान्शत्रोःसमर्थंस्वरूपंकृतवान् तावत्तेवतिरोहितइतिप्रहारस्या
नेलीनत्वात्तद्वंचनंजातमित्यर्थः १५ एवंपूर्वमकृतप्रतीकारइतिकृत्वातूष्णींस्थितेपिपुनर्मारणार्थंप्रवृत्तःपश्चाद्भगव
ताताडितइत्याह।पुनर्गदामिति स्वांमौर्वीअभीक्ष्णशोभ्रामयंतमितिदृढप्रहारार्थंपरिभ्रमणस्यपूर्वकालताचनिरूपि
ता॥हरिर्वराहःमारयितुमभ्यधावद्धावनंकृत्वानिकटेगतइत्यर्थः॥तस्यपूर्वप्रयासवैयर्थ्यात्अत्यंतंक्रोधसंरंभेणदष्टद
च्छदंतानांच्छादनरूपमोष्ठंयेन॥ येयथामांप्रपद्यंतइत्येतदर्थंकृतवानितिभावः १६ ॥ श्रीगोपालयनमः ॥

त्र·मु१८
२५५

ततः किंकृतवानित्याकांक्षायामाह ततइति गदयाकौमोदिक्यादक्षिणस्यांभ्रुवि असुरीमत्कः तस्यनश्यवितिपुरूषत्वा त्रदक्षिणस्यांभ्रुवि ताडितः ननुकथंसूक्ष्मेस्थानेताडयितुंशक्यतइत्याशंक्याह॥ प्रभुरिति॥ तांकौमोदकींगदां हेसौम्य ॥स्वगदयासौम्यौ॥गदायुद्धेकोविदःपंडितः अहनत् १७ एवमन्योन्यंयुद्धमुक्त्वाऽपसंहरति॥एवंगदाभ्यामिति॥ बहु कालयुद्धोपयोगायगुर्वीभ्यामिति॥ हर्यक्षोहिरण्याक्षः हरिरेवअक्षरूणियस्यवर्ततइति॥समानत्वायहर्यक्षपदप्रयोगः॥ हरिर्भगवानुभयत्रहरिपदप्रयोगः अवध्यत्वायजयार्थमेवयत्नोनवधार्थमितिजिगीषयेत्युक्तं॥सुष्ठुसंरब्धाविति उ भयोर्युद्धेहेतुरुक्तः अन्योन्यमभितोजघ्नतुः १८ एवंभगवतोयुद्धलीलामुक्त्वातांवर्णयति॥ तयोरिति॥ अन्योन्यस्पर्द्धिनोः

ततःस्वगदयाऽरातिंदक्षिणस्यांभ्रुविप्रभुः॥आजघ्नेसतुतांसौम्यगदयाकोविदोहनत् १७ एवंगदाभ्यां गुर्वीभ्यांहर्यक्षोहरिरेवच जिगीषयासुसंरब्धावन्योन्यमभिजघ्नतुः १८ तयोःस्पृधोस्तिग्मगदाहतां गयोःक्षतास्रवघ्राणविवृद्धमन्व्योः॥विचित्रमार्गांश्चरतोर्जिगीषयाव्यभादिलायामिवशुष्मिणोर्मृधः

तिग्मगदाभ्यामाहतेअंगेययोः॥दुःखानुभवेनयुद्धान्निवृत्तिमाशंक्यक्रोधाधिक्यस्यहेतुकमाह॥क्षतास्रवघ्राणविवृद्धमन्व्योः ॥गदाप्रहारेणयत्क्षतंतस्मात्स्रवत्रुधिरंतस्यघ्राणेनमात्राद्गंधेनविवृद्धोमन्युर्ययोः॥गदयाविचित्रमार्गांश्चरतोरि तियुद्धलीलायांरसाभिनिवेशउक्तः॥अत्रापिजिगीषैवहेतुः॥स्वरूपतोभिमायतश्चजिगीषेति॥ ननुवैरिणोःकथं जयमात्रंहेतुरित्याशंक्याह॥इलायामिवशुष्मिणोरिति॥इलाभूमिः॥एकत्राधिकरणसप्तमीइतरत्रनिमित्तसप्तमी॥ यथापृथिव्यांकामगतोवृषभावतिपुष्टोअन्योन्यंजिगीषयायुद्धंकुरुतः॥वासितार्थेवातयोर्मृधःयथातथाव्यभातयुद्धं ॥ श्रीधरी ला० २५५

एवंलीलयायुद्धेक्रियमाणेभगवतातस्यमृत्युर्नभविष्यतीत्याशंक्यब्रह्मास्वयमागत्यतद्वधार्थंप्रार्थयतिद्वाभ्यां॥दैत्यस्येतिदैत्य त्वमे वयुद्धाद्वावुपयोगीतितदेवोक्तं॥यज्ञाअवयवायस्य॥अनेनक्रियाशक्तिस्तत्रपूर्णेत्युक्तं॥ननुयोयज्ञावयवःसकथमेवंरूपइति दृष्वर्णंदूरीकुर्वन्नेवसामर्थ्यविशेषमाह माययागृहीतवाराहतनोरिति महात्मनइति॥तादृशस्ययुद्धकरणेहेतुर्नज्ञायतइ तिसूचितंकौरव्येतिसंबोधनंमहतांचरित्रेविश्वासार्थं अल्पयुद्धपक्षेतुतेननदृश्यतइति तद्याहृत्यर्थं॰ मह्यांपृथिव्यांद्विष तिसूचितंकौरव्येतिसंबोधनं ... द्विषतोर्विशेषेणमर्दनंदिदृक्षुःस्वयमभ्यगात् ननुब्रह्मणोहिरण्याक्षवधेकिंप्रयोजनंसिद्ध्येदित्यतआह स्वराडिति सहिसर्वस्मा तोर्विशेषेणमर्दनंदिदृक्षुःस्वयमभ्यगात् ननुब्रह्मणोहिरण्याक्षवधेकिंप्रयोजनंसिद्ध्येदित्यतआह स्वराडिति सहिसर्वस्मा पिस्वर्गस्यराजाइंद्रादयःतदंशाःसाक्षित्वायऋषीणांआगमनं २० तयोर्युद्धंदृष्ट्वालीलांकुर्वाणंदेवताविमत्वावधार्थमर्थ

दैत्यस्ययज्ञावयवस्यमाययागृहीतवाराहतनोर्महात्मनः कौरव्यमह्यांद्विषतोविमर्द्दनंदिदृक्षुरागादृषिभि र्वृतःस्वराट् २० आसन्नशौंडीरमपेतसाध्वसंकृतप्रतीकारमहार्यविक्रमंविलोक्यदैत्यंभगवान्सहस्रणीर्ज गादनारायणमादिसूकरं २१ ॥

यत्तदित्याह आसन्नशौंडीरइति भगवतउत्कर्षोयुक्तःतस्यायुक्तमिति॥भगवतःसकाशाद्दयालंसाध्वसंयस्य कृतःप्रती तितद्देववर्णयति॥आसन्नंस्वीकृतंशौंडीरंयेन॰शौंडीरंसाहसोत्साहः॥भगवतःसकाशाद्दयालंसाध्वसंयस्य कृतःप्रती कारोयेन नकेनापिहार्यःहर्तुंयोग्योविक्रमोयस्य एतादृशंदैत्यंविलोक्यअयमजयइतिज्ञात्वास्वपितरंभगवंतंसर्वावता राणांप्रथमावताररूपं॥भगवांश्चेन्मारयितुमिच्छेत्तदैवास्यमरणंभवेत्॥नत्वोदासीनतयेतिमत्वाआदिसूकरमाहेतिसं बंधः॥तादृशंज्ञानमस्तीत्यत्रहेतुः॥भगवानिति॥नन्वेवमुच्यमानेसचेद्ब्रह्माणमेवमारयेत् तदाकागतिःस्यादित्यशंक्याह॥ सहस्रणीरिति सहस्रंनयतीति॥ब्रह्माहिस्वसदृशान्सहस्रंयोद्धान्नयतिअतोनास्यभयमित्यर्थः २१ ॥

Indira Gandhi National
Centre for the Arts

त्मु १८
२५६

ब्रह्मामारणार्थं तस्य दूषणान्येवाह॥एष इति॥ द्वाभ्यां॥भक्तद्रोहेव धः स्यात् इति भगवद्धृदयमिति अयं भक्तद्रोहमेव कृतवानित्या
ह॥ अस्य हिरण्याक्षः॥ हे देवेति संबोधनं देवपदकृयात बोधनार्थं॥ देवद्रोहात्तवधो न दोषायेति ज्ञापयितुं देवानामित्युक्तं॥ अंघ्रि
मूलमुपेयुषामिति मुख्यो हेतुः विप्राणां सोरभेयीणामिति॥ब्राह्मणानां गवां च ज्ञोपयोगित्वान्तद्विरोधेन यज्ञ वराहेणावश्यं मा
रणीयमिति प्रकृतावतारोपयोगित्वेनोक्तं सामान्यतः विष्णोः रक्षाकर्तृत्वात् तत्वेन रक्षार्थं भूतानामप्यनागसामिति उक्तं॥ निर
पराधीनि भूतानि सर्वथा रक्षकेन रक्षणीयानीति च तुर्भिर्हेतुभिरयं मारणीय इति हेतवो निरूपिताः २२ तस्यापि दोषचतुष्ट

ब्रह्मोवाच॥एष ते देव देवानामंघ्रिमूलमुपेयुषां॥ विप्राणां सोरभेयीणां भूतानामप्यनागसां २२ ॥
आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोसुरः अन्वेषन्नप्रतिरथो लोकानटति कंटकः २३ ॥ एमः ॥

स्म।
यमाह॥ आगस्कृदिति प्रथमतो निरपराधिनं सापराधं बोधयति मिथ्यैवापराधं संपादयतीत्यर्थः॥ ततो भयं जनयति नि
र्भत्सनादिभिः॥ ततो दुष्टं मारणं सर्वस्वहरणादिकं वा करोति॥ अन्येषामपि दोषाणामुत्पत्त्यर्थं तस्य बलमाह॥ अस्मद्राद्धव
र इति॥ अस्मत्तः एद्धः सिद्धो वरो यस्येति॥ देववरं प्राप्य कथं दुष्टो जात इत्याशंक्याह॥ असुर इति॥ सर्पाणां पयः पानवत्॥
चतुर्थं दोषमाह॥ अयं कंटक इति॥ गतिमेव नाशयति॥ अल्पोपि परम दुःखद इत्यर्थः॥ अप्रतिरथश्चायं॥ न विद्यते लो एम०
के प्रतिरथो युद्धसमानो यस्य॥ अत एव प्रतिरथमन्वेषयन् लोकानटति॥ अतो दृष्टो दुष्टात्माहंतव्य इत्यर्थः॥ २३॥ ॥ २५६

अस्मायेद्धान कर्तव्येत्याह॥ मैनमिति॥ एनं माक्रीडयेत्यर्थः॥ एनं वालः सर्पीकृत्य क्रीडां मा कुर्वित्यर्थः॥ तत्र हेतवश्चत्वारः॥ मायाविनमि
ति अयं च मायावी अस्य बलं न ज्ञायते॥ अतो यदेव क्षीणबलो भविष्यति तदैव पलायनं करिष्यतीति इदानीमेव हंतव्यः॥ किंच॥
दृप्तोयं अतिमत्तः॥ उपेक्षायां जगद्देव मारयिष्यतीति॥ किंच॥ निरंकुशमिति त्वद्व्यतिरिक्तो न्योस्य न नियामको सि अतोऽस्य नान्यः
कात्म्य हेतुकप्र प्रतीकारः॥ स्वयमेव कालांतरे बाल्यं त्यक्ष्यतीति न मंतव्यं॥ यतोयमसत्तमः॥ अत एव बालवद्देव माक्रीड॥ बालो ह्यदर्केन विचारय
पद्रवम् ति किंचायं त्वय्यप्यपकारं करिष्यतीत्याह॥ यथाशीविषमुत्थितमिति॥ उत्थितसर्पः चेष्टया यथाशयानः सर्पस्तथापितश्चेत्

मैनं मायाविनं दृप्तं निरंकुशमसत्तमं॥ आक्रीड वालवद्देव यथाशीविषमुत्थितं २४ नया
वदेष वर्द्धेत स्वां वेलां प्राप्य दारुणः॥ त्वां देवमायामास्थाय तावज्जह्यघमच्युत २५ ॥

हंतव्य एव॥ अन्यथापकारं कुर्यात् २४ स्वभावत एवायं बलिष्ठः॥ संध्याकाले अत्यंतं बलिष्ठो भविष्यति॥ अतो यावद्दस्य
वृद्धिकालो नायाति तावद्देव हंतव्य इत्याह॥ नयावदिति॥ दृष्टो दोषमाह॥ दारुण इति॥ स्ववेलां संध्यात राहिते दैत्यादयस्तयोः॥
एतयोरपि तद्देवजन्म॥ कथं तर्हि मारणीय इत्यत आह॥ त्वां देवमायामिति॥ देवमाया त्वमसुर बाधिका रजस्तमश्चाभिभूय
सत्वं भवति भारतेति वाक्यात्॥ वधे दोषो भविष्यतीति न मंतव्यं॥ यतोयमघरूपः॥ एतद्धद्वित्वस्मिन् संदेहो न कर्तव्य इत्याह॥
अच्युतेति २५ ॥

Indira Gandhi National
Centre for the Arts

त.सु.१८ २५७ संध्याख्यतोपि नाशिकेत्याह॥ एषेति एषा देवानां संध्या ज्योतिश्चक्रस्यस्थितत्वात् मध्ये चपृथिव्याः स्थापितत्वात्॥ ब्रह्मादीनां
देवतात्वात् देवमानेनेत्यध्यवसीयते॥ अथवा॥ ब्रह्मणो वा एतद्दिनं लोकक्षयंकरी इतिवचनात् तस्य संवत्सरांतदिन एव कल्पप्रल
यात् प्रथमपक्षे संध्यायां लोकनाशकत्वं स्वाभाविकमिति तथोच्यते॥ ज्योतिश्चक्रपरिवृत्त्या मानुषमेव वा मानं॥ अधिष्ठात्री
देवता वा भगवत्सेवार्थमागतस्य कालस्य परं परयैवाविर्भवंतीति संध्यासैवोच्यते॥ तथैवाभिजिदपि॥ एवं च तुर्थपिपक्षेषु स
माधातुं शक्ये घप्ययमेव व्याख्यानं क्षयंकरी शब्दो वैदिकः नाशवाचकः रिक्तपर्यायः॥ तेनेक्याष्टकानक्षयंकुर्वंतीति श्रुतेः॥ अ

एषा घोरतमा वेला लोकक्षयंकरी विभो उपस
र्पति विश्वात्मन् सुराणां जयमावह २६ ॥

तएव संध्यापि लोकनाशिका दैत्यो पि॥ उभयोर्मिलनं महानन र्थो भविष्यतीति॥ ततः पूर्वमेव दैत्यो मारणीय इत्यर्थः॥ न
न्वहमेव सामर्थ्यं सूचयति॥ प्रभुरिति सर्वेष्वेवावतारेषु सत्वांशव्यवधानात् ज्ञानतिरोभावमिव मन्यते॥ ततो बोधनं॥ प्रहर एम० २५७
त्रयं जातमस्ति॥ अतो निकट एव संध्या भविष्यतीति उपसर्पतीत्युच्यते॥ सर्वरूपात् वा वस्य कीति तथा संबोधयति॥
सर्वात्मन्निति॥ एकमारणेन बहूनां रक्षणात् सर्वात्मकत्वेपि मारणं न विरुद्धं॥ तथापि सर्वथा न मारणीयः र
क्षामात्रमेव कर्त्तव्यमिति चेत्तत्राह॥ सुराणां जयमावहेति॥ तत्काले सुराणां जयः कर्त्तव्यः २६ ॥ ॥

नन्वहमेवमारयिष्यामि किमिति बोध्यत इत्याशंक्याह॥ अधुनैष इति॥ तदधिष्ठात्री देवता प्रत्यक्षेति एष इत्युक्तं॥ अभिजि
न्नक्षत्रं मध्याह्न एव शिखाण मिलतीति तथोच्यते॥ तुलासंक्रमणस्य दिनाष्टके गते तस्मिन्नेव दिवसे उत्तराषाढा चतुर्थपादे मध्यं
दिने सति मुहूर्त्तमात्रमभिजिद्योगो भवति॥ ते देवास्तस्मिन्नक्षत्रे भजयन् इत्युपाख्याने अभिजिन्नक्षत्रे देवानां जय उक्तः॥ स
तु निकट एव गतः तदैव मारणीयो भवेदिति॥ अजय्यजयत्वात्॥ अथवा पापपराजितमिव त्विति श्रुतेः॥ अभिजिन्नक्षत्रं

अधुनैषोभिजिन्नाम योगो मौहूर्त्तिको ह्यगात्॥ शिवाय नस्त्वं सुहृदामाशु निस्तर =
दुस्तरं २७ दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयं विक्रम्यैनं मृधे हत्वा लो
कानाधेहि शर्मणि २८ इति श्रीभागवते महापुराणे तृतीयः स्कंधे अष्टादशोध्यायः

नात्यंतमुत्कृष्टं॥ पापेन पराजितत्वात् तस्मात्सोपि गतः संध्या च नागता अतो मारणीय इत्यर्थः॥ सुहृदां देवानां नः
शिवाय एवं दुष्टं दुस्तरं मृत्युरूपं आशु निस्तर नितरां तर २७ नन्वस्य जीवनादृष्टे विद्यमाने कथं म्रियत इत्याशं
क्याह॥ दिष्ट्येति॥ यदयमेतस्मिन्नवसरे त्वां प्राप्तः॥ तेन ज्ञायते नास्य जीवनादृष्टमिति॥ अस्य मृत्युः त्वमेव अतोयं
स्वयमेव त्वां मृत्युं दिष्ट्या आसादितः प्राप्तवान्॥ यथा मृत्युः रोगादिना पराक्रमेण तं हंति॥ एवमेनमपि विक्रम्यैव संग्रा
मे हत्वा परमसुखे सर्वानेव लोकान् स्थापयेति प्रार्थना॥ युद्धे मारणान्न दोषोपि॥ २८॥ इति श्रीभागवत सुबोधिन्यां तृ
तीयस्कंधविवरणे अष्टादशोध्यायः ॥

Indira Gandhi National Centre for the Arts

त०सु०१७
२५८

एवंस्थितिर्हरेस्तस्यपूर्वाध्यायेनिरूपिता॥प्रलयोब्रह्मणोवाक्यात्भगवत्कृतईर्यते १ एकोनविंशेभगवान्क्रीडन्निवमहासुरं॥सु
रगणांहृदर्थायहतवानितिवर्ण्यते॥एवंब्रह्मणास्तोत्रेक्रियमाणेपिभक्तत्वात्कारयिष्यतिनवेतिसंदेहेसत्याह॥अवधार्येति॥भग
वांस्तद्वाक्यंविचारितवान्॥किमयंदेवभावात्द्वेषेणवदति॥आहोस्विदेवमेवेतितन्निश्चित्यतथैवकरिष्यामीत्यंगीकृतवान्।विरं
चश्शब्देनापितस्यास्यवाक्यत्वंनिराकृतं॥रविशब्दोविपरीतःविरंरविंचिनोतीतिविरंच्यः॥सूर्यादिनिर्मातायौंनांधकारनिर्मातेति
॥अतोनिर्व्यलीकंअमृतंहितकारिमिष्टंच॥एवंगुणयुक्तंवचःसत्यमित्यवधार्यब्रह्माणंभीतंमत्वाप्रहस्यसान्निध्येज्ञातोत्पन्न
भावायवाप्रेम्णागंभीरंतद्वचःकटाक्षेणैवाग्रहीत॥प्रेमगर्भेणेतिपाठेदृष्टिःप्रेमसहिताअधिकंचप्रेमोत्पादयिष्यतीतितेषांनि
र्भयत्वंबोधयति॥सइतिभगवान्नृसुखरंकृत्वानांतर्हितःतस्मिन्रूपेचनांतःप्रवेशितइतिबोधयति १ एवंवैपूर्वभावेभगव ध१

मैत्रेयउ० अवधार्यविरंच्यस्यनिर्व्यलीकामृतंवचः॥प्रहस्यप्रेमगंभीरंतदपांगेनसोग्रहीत् १ ततः
सपत्नंमुखतश्चरंतमकुतोभयं जघानोत्पत्यगदयाहनावसुरमक्रूजः २ श्रीगोपालयनमः

रिव्यामुत्काहननात्पूर्वंसर्वात्मत्वात्तस्यकामनांपूरयति॥तस्यहियुद्धंकर्तव्यमितिमहतीकामनाजयश्चभवत्विति अतःप्रथ
मंतदुभयंसंपादयति॥तत्रप्रथमंयुद्धेतस्यजयंसंपादितवानित्याह॥ततःसपत्नमिति॥पंचभिःदैत्यजयोग्रेवक्तव्यइतिप्रथमंभ
गवत्कर्तृकंयुद्धमाह॥युद्धंतस्यप्रतीकारोदैत्यधर्मश्चसाधकः॥सर्वलोकप्रसिद्धिश्चभक्तानामाशिषस्तथा १ सर्वेषामेवहरे
येजयस्तस्यसमागतः॥इतिदर्शयितुंदेवास्तदाकुरितिरूप्यते॥अतोब्रह्मवाक्यानंतरंसंपत्नंशत्रुंजघानेतिसंबंधः॥प्राप्तम्धे
मुखतश्चरंतमिति।मुखतइतिसंमुखे॥मुख्यत्वेनवा॥मुखादेवचरति अंतस्यमारणेछायामुत्पन्नायांतस्यापितद्दयेमर राम०
णंसमागतमितिमुखतएवयुद्धेचरणमुक्तं॥एवंज्ञात्वापिनिर्भयमितिपलायनाभावायोक्तं॥उत्पत्योत्प्लुत्यउपरियतित्वा २५८
वाअक्रूजोभगवान्ब्रह्मणोनासापुटाज्जातइति॥ गदयाहनावताडयत् हनुर्मुखाधोभागोस्ति २ ॥ ॥

ततःप्रतीकारमाहतदासाकौमोदकीतेनहताभगवत्करद्विगलिता॥आकाशेभ्रमणंप्राप्यविघूर्णिताभ्रमंतत्भूमौपतिता॥
नतुभिन्नाकिंतुभूमिंप्राप्यरेजे॥भगवतोहस्तात्कौमोदकीपातःअत्यद्भुतमित्याह तदद्भुतमिति॥अद्भुतादृष्यान्याश्चर्यमिवे
त्यनेनोक्तं॥भगवद्धस्तादेवपातआश्चर्यंततोपिकौमोदिक्यास्तत्यासन्यरूपादेत्यालतस्यविहताभवंति॥सहिअपहतपाप्मा॥
अतोत्याश्चर्यादृष्याश्चर्यंभगवताचेत्कामनापूर्यतेतदामर्यादामुल्लंघ्यापिपूर्यतइतितथाजातं २ भगवत्कृतमेवैतदितिज्ञा
पयितुंतस्यधर्मबुद्धिरुच्यते अन्यथादुष्टोनिष्कारणंलोकेषुआगस्कृतभयकृतदुःकृतकथंतदातूष्णींभवेतनाप्याहभगवत्ता

साहतातेनगदयाविहताभगवत्करात् विघूर्णितापतद्रेजेतदद्भुतमिवाभवत् ३ स
तदालब्धतीर्थोपिनवबाधेनिरायुधं॥मानयन्समृधेधर्मंविष्वक्सेनंप्रकोपयन् ४ ॥

मर्याद्रितिअतोधर्मोनिरूप्यते॥सतदेति॥तदाकौमोदकीपातानंतरंलब्धतीर्थोपिभगवानशस्त्रःइदानीञ्जेतुंशक्यतइति
लोकदृष्ट्याजयावसरेविद्यमानेपिनिरायुधंभगवंतंनबबाधे॥ननुजयाकांक्षीकथंनबबाधेतत्राह॥मानयत्समृधेधर्ममि
ति॥संग्रामेनिरायुधःशत्रुर्नमारणीयइतिधर्मःतंधर्मंपरिपालयन्नमारितवानित्यर्थः॥इमंधर्मंभगवत्कृतजयार्थंप्रतिपाद्य
तस्यधर्मस्यसहजत्वाभावायतस्याभीष्टमन्यदित्याह॥विष्वक्सेनंप्रकोपयन्निति॥विष्वक्परितःसेनायस्य॥अनेनतस्यभ्रांत
त्वंसूचितं॥तूष्णींभावोपिजयप्रतिपादकःभावंवोक्तिरतिजितंमयेति॥एवंदैत्यस्यजयबुद्धिर्निरूपिता ४ ॥

Indira Gandhi National
Centre for the Arts

स्कं १७ २५७

लोकानांजयबुद्धिमाह गदायामिति अपविद्धायांताडनेनपतितायांसत्यां॥लोकेसर्वत्रहाहाकारेविनिर्गतेसतिगदापातहेतुको हाहाकारः॥भगवानपिलोकानुसारीतस्यजयमंगीकृतवानित्याह॥मानयामासतद्धर्ममिति॥तस्यायुधरहितवधाभावलक्षणं धर्ममानयामास॥अन्यथाभगवदनंगीकृतोधर्मःफलदायीनभवेत्॥ततःकिंकृतवानित्याह॥सुनाभंचास्मरदिति॥सुनाभंसु दर्शनंचक्रायुधंतत्स्वस्मभावंच॥ननुस्मरणमात्रेणकथंस्वभावस्यभगवत्त्वस्य सुदर्शनस्यचागमनमित्याशंक्यबोधयति॥वि भुरिति॥सहिसर्वसमर्थः ५ तदाभगवद्भक्तोनामपितस्यजयःहृदयेसमागतइतिपुनर्भगवंतंसायुधंदृष्ट्वाऽज्जीविताअवि लंबेनतद्वधार्थंप्रार्थयंति॥तंव्यग्रचक्रमिति॥तंपूर्वोक्तप्रकारेणक्रीडाकारिणंसुदर्शनमपिभगवल्लीलांनहृदयेनमानयति॥ नवागदायाःपातं॥अतोदैत्यवधार्थमग्रंचक्रंयस्य॥ननुभगवान्स्वस्थार्थप्रवृत्तःकथंतंमारयति दैत्यासृग्युत्पादनीया

गदायामपविद्धायांहाहाकारेविनिर्गते॥मानयामासतद्धर्मंसुनाभंचास्मरद्विभुः ५ तंव्यग्रचक्रंदितिज

पुत्राधमेनस्वपार्षदमुख्येनविषज्जमानं चित्रावाचोतद्विदांखेचराणांतत्रस्मासन्स्वस्तितेऽमुंजही ६

इत्याशंक्याह॥दितिपुत्राधमेनेतिदितेःपुत्राणांमध्येअधमेननत्वधमेनस्वपिहन्तव्यमानवतिअधमत्वंचदैत्यमर्यादाभावा दअतोवध्यइतिसुदर्शनादिस्मरणं॥ननुहीनेनतेनसहयुद्धंकिमर्थंकरोति सुदर्शनेनवधएवपरंकर्तुमुचितइतिआशंक्या ह॥स्वपार्षदमुख्येनेति॥सहिपार्षदानांमध्येमुख्यःअतःस्वसेवकमुख्येनसहक्रीडाउचितेत्यर्थः॥युद्धार्थंतेनसहविशेषेण सज्जमानेआसंगयुक्ते॥अतएवदेवानामेतन्मर्मज्ञानतांकेवलमाकाशेस्थित्वापश्यतांतत्रतस्मिन्नवसरेविचित्रावाचोजाताः॥ कश्चिदाहमारयिष्यतिकश्चित्नेतिकश्चित्शक्तःकश्चिदशक्तइतिएवंचित्रावाचः।स्वेतिप्रसिद्धो॥आशीर्वादमाहुःव्यग्राःसंतः तेस्वस्त्यस्तुअमुंजहीतिकुशलंशत्रुजयश्चहृदयंप्रार्थयं–ति॥चित्रावागेववैयग्र्येहेतुः॥येयग्राश्चतथावचनं॥इदंतुवचनंन

स्कं० २५७

विष्णु०

१६२

एवंसर्वजनीनंतस्यजयंनिरूप्ययुद्धंनिरूपयति॥सतंनिशम्येतिअष्टादशभिः॥सर्वत्राक्रान्तिपाद्याहिभगवतोलीलेति॥दशभिःस्तव युद्धंतुमायायुद्धंतथाष्टभिः॥विविधेनापियुद्धेनक्रीडतिस्मेतिवर्ण्यते १ दैत्यस्ययुद्धसंरंभःपश्चाद्धन्द्वस्यवाचकं॥प्रतीकारोक्ति भिश्चैवंक्रोधात्युद्धंपुनस्तथा २ ततःपौरुषनाशोभूत्भगवल्लीलयारिपोः॥एवंषड्भिर्गदायुद्धंद्वाभ्यांशूलेनचैवहि ३ मुष्टिभि श्चतथाद्वाभ्यांस्वदेवास्त्रान्तथास्वतः॥युद्धंनिरूपितंतस्यमायाद्वाभ्यांप्रवर्णनं ४ चतुर्भिस्तद्विशेषाश्चतस्यायुक्ताप्रतिक्रिया ॥मायायुद्धंततःषड्भिर्द्वयंतूत्तरहेतुकं ५ दुर्निमित्तंदशि ॰ युद्धमारणार्थमिहोच्यते॥एकेनमारणंचैवमरणंचततोमहत् ६ ॥मायायुद्धंततःषड्भिर्द्वयंतूत्तरहेतुकं ५ दुर्निमित्तंदशि ॰ युद्धमारणार्थमिहोच्यते॥एकेनमारणंचैवमरणंचततोमहत् ६ स्तोत्रंभगवतोयानमुपसंहारएवच ७ माहात्म्यंद्विविधंतस्यश्रवणस्यनिरूपितं॥गुणो स्तस्यवर्णनंचैवत्रिभिरित्येषसंग्रहः पसंहृतिश्चैवहृष्टांतार्थमिहोच्यते ८ जातंजनिष्यमाणंचफलमत्रनिरूप्यते॥द्वाभ्यांद्वाभ्यांततःषड्भिःश्रवणस्यफलंततः ९

सतंनिशम्यात्तरथांगमग्रतोव्यवस्थितंपद्मपलाशलोचनं विलोक्यचामर्षपरिप्लुतेंद्रियोरुषास्वदंतच्छदमा

दशच्छ्वसन् ७ ॥

प्रथमंत्वायुधगदयायुद्धमाह द्वाभ्यां॥उद्योगयुद्धभेदेन॥सतंनिशम्येति॥जयानंतरंहिमा प्रथमंत्वायुधगदयायुद्धमाह द्वाभ्यां॥उद्योगयुद्धभेदेन॥सतंनिशम्येति॥जयानंतरंहिमा स्यायुधः॥सदैत्यःअग्रेअग्रतःतंभगवंतं णिनउत्साहोभवति॥अकस्माद्भगवतःसाधनांतरमासीत्भगवदुत्कर्षंदृष्ट्वाक्रुद्धोजातइत्याह॥ पद्मपलाशलोचनमिति॥चक्रायुधः आत्तरथांगंनिशम्यश्रुत्वाक्रोधादृष्टमपिश्रुतमिवमन्यते॥निशाम्येतिवापाठः स्पष्टः॥ कमलनयनःतस्यांतकालेध्येयइतिवर्णितं॥शत्रोर्जयेजातेप्यक्षोभदृष्टिर्वा॥तादृशंदृष्ट्वाभगवतःअक्षोभलक्षणमुत्कर्षं मसहमानःअमर्षपरिप्लुतेंद्रियोजातः॥अमर्षेणक्रोधेनपरिप्लुतानिमग्नानिइंद्रियाणियस्य॥पुनरुद्धतेनक्रोधेनस्वदंतच्छ दमधरंअदशत्दष्टवान्॥पुनःअंतःप्रवृद्धेनक्रोधेनश्वसन्नपिजातः॥एवंयुद्धार्थंक्रोधत्रयेकारणंनिरूपितं॥उत्कर्ष दृष्टोमात्सर्यात्चक्रदृष्टेस्तुघातकः।स्वाभिमानान्महान्एषोविलंबनसहेत्तथा १ एवंयुद्धार्थंतस्यक्रोधोनुवर्णितः ७

Indira Gandhi National
Centre for the Arts

दस्कु१७
२६०
गोविं

युद्धमाह॥करालेति करालदंष्ट्रायस्य दैत्यस्यंयमस्यदंष्ट्रायामागत इति स्वाधिदैविकसामग्रीसहितउक्तः॥चक्षुर्भ्यां चरुणा इति प्रर्णदृष्टिःतत्रैव निरूपिता॥तेनास्यत्रदृष्टिर्व्याविर्भुतेइतिविचारांतरेणापियुद्धभावशंकाव्यावर्तिता॥संतीदृष्टिंव्याव र्तितुमाह॥दहन्निवेति॥स्वाविर्याज्जगद्धा रूपवइस्सस्पर्शोपिचक्षुषोर्जात इतिदहन्नित्युक्तं॥यथास्यग्निरश्रयंदग्धेवपु रंदहतीतिइवेत्युक्तं॥एवंक्रूरदंष्ट्रादंष्ट्रास्वगदयासहितः आभिमुख्येनगत्वाश्रतोहतोसीत्यहनत्॥अयंहियज्ञः यथा स्वधितिनैनंहिंसीरितिनवाउचेतन्म्रियसइतिविपरीतमिवववदन्अहनत्॥ननुविपरीतवादेकोहेतुस्तत्राह हरिमिति॥ सहिसर्वदुःखहर्ताकथंवाहतोभवेत्॥अथवा॥अयुध्यमानंकथंमारयिष्यसीत्याशंक्याह आहतोसीत्यहनत् हूर्वं

करालदंष्ट्रश्चक्षुर्भ्यांसंचक्षाणोदहन्निव॥अभिद्रुत्यस्वगदयाहतोसीत्यहनद्धरिं ८

पदासव्येन तांसाधो भगवान्यज्ञसूकरः॥लीलयामिषतः शत्रोःप्राहरद्वातरंहसं ९

आसमंतात्हतवानसीत्यर्थः॥मुखेनापिमारणंकृत्वामारयतीतिकेचित्॥स्तुत्यर्थत्वेहतोसिप्राप्तोसीत्यागमदित्यर्थः॥ ८ एवंतस्ययुद्धमुक्त्वातस्यप्रतीकारमाह॥पदासव्येनेति॥पश्चात्तनोवामपादःसव्यपदुच्यते॥तांपदाभगवाल्लीलया प्राहरत्॥पादघातेनतांभूमौपातितवानित्यर्थः साधोइतिसंबोधनंविश्वासार्थं॥साधूनांरक्षार्थंवातथाकृतवानितिस्व चितं॥भगवानितिअवज्ञयाप्रहारेणतथाकरणेसामर्थ्यंयज्ञसूकरइति॥तदर्थमेवावतारइतिअवश्यंप्रतिक्रियाकर एम०
णं लीलयेतिपुनःक्रोधोत्पादनार्थं मिषतइतितस्यास्तथात्वाय वाततरंहसंइतिगदायाउत्कृष्टत्वंप्रतिक्रियाभावाय ९ २६०

एवंप्रतीकारंकुर्वन्नेवक्रोधंजनयित्वावाचापिक्रोधंजनयति आहचेति॥उक्तवानपि॥आयुधंगृहाणतदनुघटस्व॥युद्धं कुरुयुद्धार्थंवासज्जोभव॥यतस्त्वंजिगीषसि॥वचनत्रयंतस्याभिमानभंगार्थं॥निरभिमानस्यकार्यंपतितस्यग्रहणं॥निर्लज्जस्य कार्यंपुनर्युद्धकरणं॥अतोतस्यकार्यंएतादृशोयमहंजेष्यामीति एवमुक्तोपिक्रोधवशात्तमंगपमद्गत्वासएवदैत्यः तयैवगदयाभू यस्ताडयन्भृशमनदत्॥इदंतस्यद्वितीयंयुद्धंमध्यमभावेन १० अस्यापिप्रतीकारमाह॥पूर्वंतस्यविचारेदैवगत्याभूमौप

आहचायुधमाधत्स्वघटस्वत्वंजिगीषसि॥इत्युक्तःसतयाभूयस्ताडयन्व्यनदद्भृ
शं १० सतामापततींवीक्ष्यभगवान्समवस्थितः॥जग्राहलीलयाप्राप्तांगरुत्मानि
वपन्नगीं ११

तितागदानतुबुद्धिपूर्वकंतेनतथाकृतमितिअतोमारणं॥एतत्ज्ञात्वाद्वितीयवारंभगवान्प्रकारांतरंकृतवानित्याह॥सतां तितागदानतुबुद्धिपूर्वकं तेनतथाकृतमिति... मापततीमिति॥गदामुपरिपततींवीक्ष्यतिरोभावादिकमकृत्वायथापूर्वमेवसम्यगवस्थितः॥ततःप्राप्तांस्वोपरिसमागतांतां मापततीमिति॥गदामुपरिपततींवीक्ष्य... गदांलीलयाजग्राह॥उभयोरभिप्रायंसमर्थयन्तथाकरणमुपपादयतिदृष्टांतेनगरुत्मानिवपन्नगीमिति॥पन्नगीहिगरु डोमपाभक्षणीयःअस्मत्पतिपुत्रादिहंतीतिशीघ्रमायाति॥गरुडस्तुभक्ष्यंमयाप्राप्तमितिमोदकवत्तांगृह्णाति॥एवंवेगेनस मागतांमारणार्थमागतांक्रीडार्थंगृहीतवानित्यर्थः ११ ॥

त्रमु·१७ एवंप्रतीकारमुक्त्वा तेन तस्य मध्यमभावोपि गत इत्याह॥ स्वपोहस्वइति॥ पुरुषो हि स्वतंत्रः तस्य परप्रतिबंधरहितं यत्सामर्थ्यं तत्
२६१ पौरुषं यदा पुनः पुरुषांतरसामर्थ्येनोपहन्यते तदोपहतं भवति॥ अतस्तस्य नाशो बहिश्च कार्यं न भवति पौरुषं तु पूर्वमेव नष्टं
इदानीं ज्ञातमित्यर्थः॥ बलवता वा प्रतिबद्धं॥ स्वशब्देनात्र गदाकृतं तद्बाणस्वगतं॥ असकृत्त्रियत्वात् शस्त्रद्वारैवाभिमानो मुख्यः
अतः तस्मिन्प्रतिहते हतमानोपि जातः॥ तदाभिमानाभावात् पराश्रयं कृतवान्॥ असुरस्तु क्रूरः शरीरबलमपि तस्य सहजं भवति॥
अयं तु महासुरः असुरदेवाल्लब्धवरः अतोस्य पौरुषद्वयमविशिष्य तद्दत्तं भवति अत एव पुनर्दीयमानामपि गदां नैच्छत्॥
यदि गृह्णीयात् कियत्कालं युद्धमपि कुर्यात् भगवत्तेजसा संबद्धत्वात् देवतांतरसामर्थ्याविर्भावाद्ग्रहणं एवं ज्ञात्वैव भगवता
पिदीयते देवतांतरसंबंधोमास्त्विति वा दाने हेतुः हरिणेति तदा भगवतो दयात स्मिन्ज्ञातापूर्वैर्विहस्यं तेजः तस्मिन्स्थितमिति

स्वपौरुषे प्रतिहते हतमानो महासुरः नैच्छद्दीयमानां हरिणा विगतप्रभः १२ जग्राहत्रि

ज्वलज्वल२ शीर्षं [redacted] शूलं नैलोलुपं॥ यज्ञाय धृतरूपाय विप्रायाभिचरन्यथा १३ ॥

प्रभास्थितागदाबाणचसमागतापुनः चेतगृह्णीयात् पुनः प्रतिसंक्रामेत्॥ तदभावात् विशेषेण गतप्रभायस्मात् दृशो ज्ञात इत्यर्थः
१२ तदा देवांतरवरप्राप्तं शूलं गृहीतवानित्याह॥ जग्राहेति॥ शूलं सत्त्वग्रं भेदकं अग्रत्रयं ततः द्युक्तं त्रिशिखं त्रिशूलमिति या २ब
वत् शिखापदप्रयोगोग्निवद्दाहकमपि तदिति सूचयितुं॥ अन्यथा देवताप्राप्तं नस्यात् ज्वालनयोज्वालनः तद्वल्लोलुपं॥ अ
नेन सुदर्शनवदस्यापि लक्षुतेव जाता॥ न चेत्प्रतीकारार्थं स्वयमेव प्रवर्तितुमिच्छति देवतां प्रेरणायेति सूचितं॥ तामसीशक्तिर्वा
नेन सुदर्शनवदस्यापि ... तथात्वात् देवतारूपजीव्यव्यतिरेकेण मंत्रशक्तेः सर्वासामेव देवतानां यदुपजीव्यः तत्रापि सा
कृत्या रूपात्र प्रवर्तत इति तथात्वात् देवतारूपजीव्यव्यतिरेकेण मंत्रशक्तेः सर्वासामेव देवतानां यदुपजीव्यः तत्रापि सा एम०
कृत्याकरः तद्विरोधेस्वात्मैव नसिद्ध्येत् तमेव मारयितुं तेनैव योयततेस भ्रांतः॥ उपजीव्यत्वं दृष्टांतेन स्पष्टयति विप्रायाभि २६१
चरन्यथेति॥ अभिचारे हि मंत्रसाध्यः स च ब्राह्मणाधीनः तेनैव मंत्रेण तस्यैव ब्राह्मणस्यापराधकरणं न युक्तमित्यर्थः १२

तत्साधनेनैव१२- स्वकार्यकर्तुं२

ततः किं जातमित्याकांक्षायामाह॥ तदोजसेति ओजोत्र देवताप्राप्तं तेजः मनसि स्थितं देवताप्राधान्यख्यापनाय दैत्यभटत्वं॥ दे
वतायाः प्रेरणासामर्थ्याय महाभटत्वं॥ भगवति विरोधख्यापनाय दैत्यत्वं अर्पितमिति समर्पितं॥ अन्यथा देवतांतरभजनदो
ख्यामिति॥ आलस्यनिद्रयाहिसमागतायांजृंभाभवतीति असमीचीनायाअपिग्रहणेहेतुः॥ प्रभोरिति द्वितीयांपूर्वसंदिग्धामिस्पष्टीलक्षयतिनिद्रामिति निद्राएवतनुर्द्वितीया॥ पूर्वानुजृंभणाख्या॥ तस्यादेवतारूपायानिद्रायाः कार्यद्वाएलक्षणंनिरूपयति॥ इंद्रियविक्लेदोययाभूतेषुदृश्यतइति॥ निद्रयाहिइंद्रियाणिसर्वाणिलीनानिभवंतिस्रवंतिच॥ निद्रयातयैवाधिदैविकयाचक्षुःस्रावादिकमपिभवति अतस्त्रिविधमपिकार्यइंद्रियविक्लेदशब्देनोच्यते ४१ ॥ गम० २७८

तांयेगृहीतवंतस्तानाह॥ येनोच्छिष्टानिति सगणास्तुन्मादलक्षणः येनसागृहीतेत्यर्थाद्युक्तंभवति॥ अन्यथानिरूपणवैयर्थ्यापत्तेः॥ तेषामुन्मादसंज्ञाकथंजातेत्याशंक्याह येनकारणेनउच्छिष्टान्भोजनादिनामलोत्सर्गादिनावाउच्छिष्टाभवंतितांस्तेधर्षयंति तत्तेनकारणेनतंगणमुन्मादंप्रचक्षते॥ उक्तोमादोयस्येति॥ उन्मत्ताएवस्वनवहितान्धर्षयंति अतस्तंगणमुन्मादंप्रचक्षते॥ यद्वा॥ भूतपिशाचाएवजृंभणाख्यांनिद्रांचगृहीतवंतः॥ निद्रयाद्वितीययातन्वाउत्पादितंचगणंधर्षणार्थंकरणत्वेनगृहीतवतः तथासतिसगणःपिशाचमध्यएवांतर्भूतोज्ञेयः॥ धर्षयंतिपिशाचाआचक्षतेअभिज्ञाः एवंतामसींसृष्टिमाह उर्जस्वंतमिति इदूर्जः शब्दौशक्तिविशेषवाचकौ। इंद्रियाणांविषयग्रहणसामर्थ्यविशेषसंपादिकाआत्मनिष्ठाशक्तिःविचा

येनोच्छिष्टान्धर्षयंतितमुन्मादंप्रचक्षते ऊर्जस्वंतंमन्यमानआत्मानंभगवानजः
साध्यान्गणान्पितृगणान्परोक्षेणासृजत्प्रभुः ४२ ॥ श्रीगोपालयनमः

रकारणभूतावाऊर्जःशब्देनोच्यते॥ क्षुत्पिपासाभिवृद्धिकर्त्रीतुशक्तिःइद्शब्देनोच्यते॥ अतएवर्शब्दाच्छेदनेएतेकाम्येइष्टेत्वोर्जेत्वेति॥ हतेशक्तीभगवतएवजीवेअभिधिवनसतिषुचप्रतिष्ठिते॥ ऊर्वाअन्नाद्यंदधि· ऊर्वेदंबरइतिच॥ इषेप्राणायऊर्जेपानायेतिच यस्तुऊर्ग्युक्तःसऊर्जस्वान्॥ यदेवंब्रह्मणोभिमानोजातः॥ भगवानितिमूलसंबंधज्ञापकः॥ अजइत्यभिमानेहेतुः॥ अन्यथाभगवान्सर्वरूपोनात्मानंतथाभिमन्यते तदापरोक्षेणभावेन॥ साध्यान्गणान्पितृगणांश्चासृजत॥ अदृष्टंसर्वपरोक्षंअतएवसाध्याअतिरिक्तभागिनोजाताः॥ पितरश्चस्वधाभागिनः परोक्षभागिनश्चइत्यौकाइतिश्रुतेः॥ अतउभयेषांसृष्टिरदृष्टैवहेता॥ तथाहस्योसामर्थ्यप्रभुरिति॥ ४२ ॥

Indira Gandhi National Centre for the Arts

तापु२०
२७९

तामपितनुं विससर्ज॥ तं त्वात्मेति॥ अतएवते उभये आ त्मसृष्टेस्तोत्याहृकं तस्य ब्रह्मणः कार्यं शरीरं मुख्यतया पितरः प्रतिपेदिरे ॥ लोके यंतं पितर एव प्रसिद्धा इति तेन शरीरेणोभयेषां विनियोगमाह॥ साध्येभ्यश्च पितृभ्यश्चेति॥ यद्येन शरीरेण वितन्वते लोका अतिरिक्ते न श्राद्धेन च ४३ पुनस्तृतीयं गुणत्रयसर्गमाह॥ सिद्धानिति॥ एते सात्विकाः सिद्धा ज्ञानसिद्धा विद्याधराः कर्मसिद्धा उ भयानपि तिरोधानेनैवासृजत॥ तिरोधान विद्यारूपो योभावः तेनासृजदित्यर्थः॥ तां च तनुं पूर्ववन्न त्यक्तवान् किंतु तेभ्यो दत्त वानित्याह॥ तेभ्य इति॥ आत्मानं देहमददात्॥ अंतर्देहार्थं नामाह॥ अंतर्धानमित्याख्यायस॥ अद्भुतमिति स्वतो दाने हे तुः ४४ राजसीमाह॥ सकिंनरान् इति॥ किंनराः किंपुरुषाश्च देवगायकाः तान् प्रत्यात्मेन प्रतिबिंबेनासृजत् प्रभुरि

तेत्वात्मसर्गं तत्कार्यं पितरः प्रतिपेदिरे॥ साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते॥ ४३॥ सिद्धान्विद्याधरांश्चैव ति
तारे
रोधानेनसोसृजत् तेभ्योददात्तमात्मानमंतर्धानाख्यमद्भुतं ४४ सकिंनरान्किंपुरुषान्प्रत्यात्म्येनासृजद्विभुः
मानयन्नात्मनात्मानमात्माभासं विलोकयन्॥ ४५॥ ते तु तज्जगृहू रूपं यत्यक्तं परमेष्ठिना॥ मिथुनीभूयगायंतस्त
रमेवोषसिकर्मभिः ४६ ॥

तिपूर्ववत्॥ न प्रतिबिंबमात्रेण तेषां सृष्टिः किंतु सन्मानपुरःसरमित्याह॥ मानयन्निति॥ आत्मनात्मप्रतिबिंबरूपेण आत्मानं बिंबरूपं मानयन्नसृजदिति संबंधः॥ लोकोपि दर्पणादौ मुखं पश्यन्नात्मानं बहुमन्य ते॥ किंच नापि सन्माननमात्रस हितेन किं त्वाभासं विलोकयन्नेवासृजत्। तेन दर्शनेन सन्मानेन सहितप्रतिबिंबेनासृ जदित्यर्थः ४५ तेन कार्येत्रिरूपतां जाते त्याह॥ तेत्विति॥ इदं रूपं ब्रह्मणा त्यक्तमेव यतः सपरमेष्ठी परमांनि ष्ठां प्राप्तवा निति॥ तेन सपरमां काष्ठामग बुद्धि तिष्ठते॥ ततो यज्जातं तदाह॥ मिथुनीभूयेति॥ ते उभयेपि स्त्रीपुरुषरूपेण जाताः मानन स्यायंधर्मः॥ उषसि च प्रातः काले कर्म ब्रह्मकृत्यै हत्कर्षहेतुभिः॥ मिथुनीभूयेव रसाभिव्यक्त्यर्थं तमेव ब्रह्माणं

गायंतोऽनगृहृ इतिसंबंधः॥ गानंदर्शनहृतं॥ ४६ ॥

तप•
२७९

तामसीं सृष्टिमाह॥ देहेनेति॥ भोगवता स्थूलेन देहेन भोगो विषयभोगः तद्वान् स्थूलो भवत्येव इदं लोकप्रसिद्धमिति वै निश्चये ने त्यक्तं॥ बहुचिंतया शयानो जातः पतित्वा स्थित इत्यर्थः॥ चिंतायां हेतुः॥ सर्गेऽनुपचित इति॥ कामस्याप्रूर्तेः क्रोधो जातः क्रोधाच्च तद्वपुरुत्ससर्ज॥ ४७॥ त्यक्तात्तद्वपुषः सृष्टिर्जातेत्याह॥ येहीयंतेति॥ अमुतः शरीरात् ये केशा अहीयंत॥ अनेन क्रोधात् स्वके शाकर्षणमपि कृतवानिति ज्ञायते॥ तएव केशा अहयो जाताः॥ अहयः सर्पा नागा इत्यवांतरभेदाः॥ क्रियावंतो फणाद्याश्च सफ णास्तु तथापरे नागा अजगराः प्रोक्ताः मध्यमासविषास्मृताः १ यतः अहीयंत अतः अहयः क्रोधात् यद्भावनं कृतवान् ततः प्रस र्पतो देहाद्ये जाता ते सर्पाः पतितात् क्रियारहिताद्ये जाताः तेनागाः स्थूलाकारात् देहात् क्रियारहितात् यज्जाताः अतोभोगोरुकं धराः महान्भोगः उरुकंधराश्च येषां कंधराः फणास्थानानि॥ उरुशब्दस्य मध्ये प्रयोगाद् उभयत्र संबंधः भोगार्थवा उरुकंधराः भोगाये

देहेन वै भोगवता शयानो बहुचिंतया॥ सर्गेनुपचिते क्रोधादुत्ससर्ज तद्वपुः॥ ४७॥ येऽहीयंतामुतः केशा अहयस्ते
गज्ञिरे॥ सर्पाः प्रसर्पतः क्रूरा नागा भोगोरुकंधराः ४८ सआत्मानं मन्यमानः कृतकृत्यमिवात्मभूः॥ तदा मनून्स
सर्ज्जांते मनसा लोकभावनान् ४९ तेभ्यः सोत्यसृजत् स्वीयं पुरं पुरुषआत्मवान् तान् दृष्ट्वा येपुरा सृष्टाः प्रशशं
सुः प्रजापतिं ५० ॥

रूयावा ४८ एवं नवविधां सृष्टिमुक्त्वास्य सगुणातीतभावनया कांचित् सृष्टिं कृतवान् तामाह॥ सआत्मानमिति॥ यदैव पुरुषः स्वस्मिन् गुणातीते वतिष्ठते॥ तदैव कृतकृत्योहमित्यात्मानं समन्यते॥ इवेति भावनया तथात्वात्॥ ए वंभावे हेतुः॥ आत्मभूरिति॥ आत्मनो भगवतः सकाशाज्जातः तदा मनून् ससर्ज॥ मनसा शरीरस्थानीयेन लोकभावनानिति॥ लोकान् भावयंति धर्मादिभिरिति॥ तदा ब्रह्मा स्वसामर्थ्यं तेभ्यो दत्तवानित्याह॥ मनवोऽत्र चतुर्दश मुख्याः॥ अन्येपि बहवः तद्विधाः॥ स्वसृष्टे रंते नातः परं ब्रह्मणः सृष्टिः रूषि सृष्टिस्तु वेदात्मक भगवतः ४९ एतेषामुत्कर्षमाह॥ तेभ्य इति॥ पुरं ब्रह्मांडात्मकं तदेव तेभ्यः का र्यतो निःभ्यस्तत्सृजत् अतः सपुरुषः तेरिपुरं पालयिष्यंति स्वयं शायिष्यत इति तदा बहवो मनवः ब्रह्मस्थानीया जाता इति पूर्वसृष्टानां सु

॥ स्त्वाःपुरस्रष्टकृन्यवेमष॥ ति ॥
स्वेज्ञानाति महि॥ नातदृष्ट्वा ५०
तेप्रजापतिं प्रशशंसुः

Indira Gandhi National
Centre for the Arts

त॰सु२॰ २८०

प्रशंसामेवाह अहोइति स्थिरत्वं ताश्चर्यरूपावयमपितेनैवस्पृष्टाः एतेपि तथापिकारणतुल्यत्वेष्फलमाजाताइति॥ एतत्कृतमेवज
गत्स्रष्टुःसुकृतं बतेतिहर्षेस्वकारणदुत्तमंजातंइति हेत्वंतरमप्याहुः प्रतिष्ठिताःक्रियायस्मिन्निति यस्मिन्कृतेमनुरूपेक्रि
याधर्मादिरूपाप्रकर्षेणस्थिता॥ अनेनधर्मोमोक्षश्चसिद्धउक्तः साकमन्त्रमरामहइतिचार्थःकामश्च एवंसर्वपुरुषार्थसाधक
त्वात्उत्कृष्टता ५१ भगवद्भावेनस्थितिमाह तपसेतिज्ञानकर्मभक्तिभिः हृषीकेशोभगवान् ऋषीन्सर्ववेदादिप्रवर्त्तकान्अ
भिमतप्रजारूपान्ससर्ज्जतपोत्रज्ञानं विद्याभक्तिःयोगेनयुक्तःभगवद्भावंप्राप्तः समाध्यंतेनयोगेनवायुक्तः सर्वैःभगवतावा
इंद्रियपतित्वात्स्रष्टुः स्वबिलंत्वत्य–पियोगाद्वितेंद्रियास्त्रिविधाश्चज्ञाननिष्ठाःकर्मनिष्ठाभक्तिनिष्ठाश्चेति॥ ऋषिश्चासोहृषीश
केश्चशब्दार्थब्रह्मस्वरूपइत्यर्थः ५२ भगवतःअङ्गुणाःएकीभूताःकर्त्तविशेषणभूताइतिस्पष्टेभ्यःएकैकंअंशमदादित्याह॥ तेभ्यइति॥

अहोएतज्जगत्स्रष्टःसुकृतंबततेकृतं॥ प्रतिष्ठिता।क्रियायस्मिन्साकमन्नमदामहे ५१ तपसाविद्ययायुक्तोयोगे
नसुसमाहितः ऋषीन्ऋषि–षीकेशःससर्ज्जाभिमताःप्रजाः ५२ तेभ्योत्येकैकशःस्वस्यदेहस्यांशमदादजः॥ ज
न्तत्समाधियोगर्द्धितपोविद्याविरक्तिमत् ५३ इतिश्रीभागवमहापुराणेतृ॰ति॰पस्कंधेविंशोध्यायः ॥ ॥

हियुक्तश्चायमर्थः॥ यदंशपुरस्कारेणयेसृष्टाः तेभ्यःसोंशोदेयइतिस्वार्थतुनापेक्ष्यते॥ यतोयमजः अतःपरंसुत्रादिरूपेणनभवि
ष्यतीति तानेवांशानाह यत्तदिति॥ यावदस्यतदेवतस्येत्यर्थः॥ ऐश्वर्यादिषुवक्ष्ण्सुसमाध्यादयः षडंतर्भाव्याः तत्वेनवाव्याख्येयाभि
ज्ञावाएतेप्रकृतोपयोगिभगवत्ख्द्वाच्याः समाधिश्चित्तैकाग्र्यं योगस्तस्योपायः ऋद्धिः फलंतस्यइतित्रयमेकाकोटिः॥ तयोज्ञानं एम॰
विद्याभक्तिःवैराग्यंचेत्यपरवीद्यैवयशः ऋद्धिरेव।श्रीःयोगोबलंसमाधिरैश्वर्यंइतिसम्पगाधिः शत्रूणांयस्मादितियोगश्च॥ ऋष २८०
योहिभगवतएकैकमंशंसंपादयंतीति ५३ इतिश्रीभागवतसुबोधिन्यांतृतीयस्कंधविवरणेविंशोध्यायः ॥ ॥

कर्द्दमक॰त॰१:                कर्द्दमव॰च॰:

एकविंशेतुसफलोधर्ममार्गोनिरूप्यते॥ भूतसंस्कारकर्तृत्वाद्भूतसर्गोयमुच्यते १ षड्विधंरूपमस्यापितयोर्दर्शनसंलवाः त्रिविधाः
कारणोयुक्ताःवाक्यागमसम्द्भयः २ फलेपित्रिविधाःप्रोक्ताः ऋषिवाक्यंसमन्वये॥ एवंसकलोब्रह्मसृष्टिंपूर्वाध्यायेउक्त्वातद्विशेषं
श्रोतुंमनोर्वंशंपृच्छति स्वायंभुवस्येतिपंचभिः॥ अस्यविशेषत्वंमैथुनजनितत्वमेव॥ स्वयंभुवोवंशःश्रुतः॥ स्वायंभुवस्यमनोर्वंशः
श्रोतव्यः तत्रहेतुः॥ परमसंमतइति परममत्यर्थसंमतः सर्वसंमतंचश्रोतव्यं॥ यतइदानीतनानांतथैवजन्मततदाह मैथुनेनै
धिरेप्रजाइति भगवन्निति ज्ञानार्थसंबोधनंमैत्रेयस्य १ एवंवंशसामान्यतः पृष्ट्वापुत्रयोर्विशेषंपृच्छति॥ प्रियव्रतेति॥ योस्वायंभु

विदुरउ॰ स्वायंभुवस्यचमनोर्वंशः परमसंमतः॥ कथ्यतांभगवन्यत्रमैथुनेनैधिरेप्रजाः॥ १॥
प्रियव्रतोत्तानपादौसुतौस्वायंभुवस्यवै॥ यथाधर्मंजुगुपतुःसप्तद्वीपवतींमहीं २ तस्य
वैदुहिताब्रह्मन्देवहूतीतिविश्रुता पत्नीप्रजापतेरुक्ताकर्द्दमस्यत्वयानघ ३ ॥

वस्यसुतौप्रियव्रतोत्तानपादावुक्तौतौनिश्चयेनधर्ममनतिक्रम्यसप्तद्वीपवतींमहींजुगुपतुः॥ जन्ममात्रंश्रुतंयुक्त्यारक्षाच
निर्द्धारिता॥ तयोर्वंशस्तुंक्तव्यःइतिभावः २ कन्यकानांवंशंपृच्छति॥ तस्येति॥ मध्यमायाद्वयेनशिष्टयोरेकेन॥ मध्यमासर्वत्रमू
वर लभूतेतितस्याःप्रशंसातन्मोक्षावधिरेवसर्गः॥ ब्रह्मन्नितिसंबोधनमविकृतत्वायदेवानांहूतिर्यस्याइति॥ सर्वदेवमयीसर्वदेवता
धिष्ठितावा॥ सर्वतर्पणार्थंवादेवानामाह्वानं॥ उपभोगार्थंवामोहितारूपेणसमाहूताइति॥ सर्वथाविशेषेणश्रुताप्रसिद्धा॥ तस्याःवि
वाहश्चश्रुतः॥ कर्द्दमस्यप्रजापतेःत्वयापत्नीतिनिर्दिष्टा॥ अनघेतिसंबोधनात्स्त्रीकृतोभावःहृदयेनोत्पत्स्यतइत्युक्तं॥ पापयु
क्तानामेवताद्दशःकामोभवतियोलौकिकेनक्षुभ्यति ३ ॥ ॥



Indira Gandhi National Centre for the Arts

त.सु.२१
२८१

अनुघप्रश्नमाह॥ तस्यामिति॥ तस्यमहायोगित्वात्‌बीजावापोयोगप्रतिबंधकइतितादृशस्यापिबहुपत्यजनकत्वमाश्चर्यमितिप्रश्नः॥ सापियोगलक्षणैर्युक्ता द्वात्रिंशल्लक्षणयुक्तायोगसाधिष्ठानंभवतीतिकर्दमस्यतुसिद्धोयोगःतस्यालुलक्षणानिसंतियोगस्त्वग्रेस्तस्य ति॥ अतउभयोसंगेसृष्टिविरुद्धत्वात्‌प्रश्नः॥महायोगित्वाचसर्गोपिनकाचित्‌क्षतिरिति॥वैनिश्चयेनतस्यांकतिधावीर्यंससर्जेति॥सं ख्यायांप्रकारविशेषेचप्रश्नः॥उत्तरेहेतुः।शुश्रूषवइति॥श्रोतुमिच्छवे॥वदेतिप्रार्थना ४ अवशिष्टयोरपिवंशप्रश्नमाह॥रुचि र्यइति।रुचिर्ज्ञानपूर्णइतिपूर्वकल्पेपूर्वरितःब्रह्मन्निति सर्वार्थपरिज्ञाने॥दृक्षस्तृतीयायाग्रतिःभूतानीतितत्कन्यासुनानाविधोत्प

तस्यांसवैमहायोगीयुक्तायांयोगलक्षणैः ससर्जकतिधावीर्यंतन्मेशुश्रूषवेवद ४
रुचिर्योभगवान्‌ब्रह्मन्‌दक्षोवाब्रह्मणःसुतः॥यथाससर्जभूतानिलब्ध्वाभार्यांचमानवीं
५ मैत्रेयउ॰प्रजाःसृजेतिभगवान्‌कर्दमोब्रह्मणोदितः॥सरस्वत्यांतपस्तेपेसहस्राणांसमा

त्रिःसूचिता॥मानवीमितिमनोःपुत्रीभार्यात्वेनलब्ध्वाचकाणब्रह्मणआज्ञां ५ सर्गेकर्दमस्यैवोपयोगात्‌देवहूत्याःसकाशात्‌ सृष्टिमाहचतुर्भिरध्यायैः॥प्रजाःसृजेति॥साधनंचविवाहश्चसृष्टिर्द्विधाविभेदतः॥विसर्गसर्वबलूनांधर्मादावुपयोगिनां॥ सर्गविसर्गभेदतः३-
निरूपणंहिसर्गेतुसर्वंसर्गार्थमेवहि १ ब्रह्माभगवद्रूपःकर्दमोपिभगवद्रूपः॥अतःस्वकर्तव्यस्श्लोकर्दममेवप्रेरितवान्‌ एम॰
स्वतुल्यत्वात्‌ सृष्ट्युपयोगिनीहिब्रह्मदेवत्यासरस्वतीतस्यातीरेदृशवर्षसहस्राणिदिव्यानितपस्तेपेएतावताचतुर्युगा ६ ॥ २८१
नामाहतिर्ज्ञाता स्वतंत्रब्रह्मसृष्ट्यर्थमपिसहस्रवर्षमात्रंतपःइदंतुततोप्यधिकमितितत्रहेतुंवक्ष्यति

देशत्युक्तं।

नकेवलंतपसाभगवान्‌परितुष्यतिकिंतुभक्त्येतिभगवद्भजनमाह॥ततइति समाधौभगवानाविर्भावितःतत्रक्रियायोगःपरिचर्या अतःसमाधिनायुक्तेनक्रियायोगेनेत्युक्तं॥एवंपरिचर्ययासम्यक्‌प्रपेदे॥ततोभजनक्लेशनिवृत्तिर्भजनीयगुणास्तदाह हरिमि ति ततःप्रेमभक्तिःतयापिसंप्रपेदे भगवान्‌वातयाकृत्वाप्रपन्नानांवरदातान्ज्ञातः दाशुर्वदातारं ७ ततोभगवत्साक्षात्कारोज्ञात इत्याह तावदिति॥तावताकालेनप्रसन्नःप्रेम्णावाप्रपन्नवरदातारंयावत्सेवतेमनःपूर्णसेवायावन्नजातातन्मध्यएवभगवान्प्रस न्नोजातइत्यर्थः विलंबेकारणंकृतयुगइति सहिसत्ययुगेतपःकर्तुमुपविष्टःसत्येतपसाशुद्धांतःकरणोजातः॥ततस्त्रेतायां

ततःसमाधियुक्तेनक्रियायोगेनकर्दमः॥सम्प्रपेदेहरिंभक्त्याप्रपन्नवरदाशुषं ७ ॥
तावत्प्रसन्नोभगवान्‌पुष्कराक्षःकृतेयुगे दर्शयामासतंक्षत्तःशाब्दंब्रह्मदधद्वपुः ८

योगसिद्धोजातःतपस्त्वनुवर्ततएवसर्वत्र॥ततोभगवदाविर्भावः॥ततोद्वापरेपरिचर्या॥ततःप्रेमकलौ॥तत्रचेदाविर्भावं प्राप्नुयात्‌॥ततःकलावुत्पन्नास्थिरसंगतास्यात्‌ ततोजातेपिस्नेहेप्रपन्नानांवरदातेतितद्नाशार्थंकृतयुगेप्रादुर्भूतोज्ञा तः॥तत्रतुनविलंबइतिद्योतितं॥तावदिति॥पुष्कराक्षइतिदृष्टौवाध्यायनजनकः॥शब्दब्रह्मणावेदेननिष्पादितंछंदोमयं वेदपुरुषोभगवान्‌तादृग्रूपंगृहीत्वाआविर्भूतस्तंदर्शयामास॥क्षत्तरितिसंबोधनमंतःपुराणबहुप्रकारेणप्रभुराविर्भ राजा२
वतीतिभगवतोरूपविशेषेसंदेहाभावायोक्तं॥यद्यपितदतींद्रियमेवतथापिभगवानेवदर्शयामास॥नहिभगवतोऽशक्यं
किंचित्‌स्वरूपमेवबहिरनेकधाकृतवतः ८ ॥

Indira Gandhi National
Centre for the Arts

तस्तु२१
२८२

एवंदृष्टंभगवत्स्वरूपमनुवर्णयतित्रिभिः सतमिति॥स्वरूपाभरणोपकल्पैःप्रथमंस्वरूपमनुवर्णयति॥सकर्दमसंप्रसिद्धंदृष्ट्वाजातह
र्षःसन्मूर्ध्नाअपतदितिसंबंधः॥सच्चार्थपुरुषार्थार्थचतुर्दशविधोहरिः॥सच्चिश्चद्विविधातस्मात्अतोह्याभांतुपंचधा १ दशाप
त्यानितस्माद्धिएकएवपुमान्यतः॥सर्गेचदोषयात्रैपुरुषार्थेषुचस्त्रयं २ मुक्तोहरिःप्रादुरासीतआद्योनवहितःस्मृतो ३ प्रथम
तोदोषाभावमाह॥विरजमिति॥रजोगुणोरागःकालुष्यंचनास्तीत्यर्थः॥अज्ञानांधकारजडत्वाद्यत्यर्थमाह अर्काभमिति॥अ
र्कोहिदेवतामंडलंनारायणश्च अर्कस्येवाभायस्य सितानिपद्मानिउत्पलानिचतेषांस्त्रक्यस्य॥अहोएत्रविकासयुक्तगणस
मूहवान्भगवानुक्तः॥स्निग्धानीलायेअलकव्रातास्तैरावृतंवक्त्राब्जंयस्य॥अनेनभक्तिःसर्वसुखसहितातस्मिन्प्रकाशिता॥सु

॥सतंविरजमर्काभंसितपद्मोत्पलस्रजं॥स्निग्धनीलालकव्रातवक्त्राब्जंविरजांबरं ९
किरीटिनंकुंडलिनंशंखचक्रगदाधरं॥श्वेतोत्पलक्रीडनकंमनःस्पर्शस्मितेक्षणं १०

खंचेहिकामुष्मिकमितिअलकेविशेषणद्वयं॥विरजंशुक्लमंबरंयस्य॥शुद्धाएववेदभागास्तेनगृहीताइति॥अनेनपूर्णज्ञा
नशक्तिरुक्ता॥एवमेकेनदोषाभावोगुणाश्चत्रिविधाउक्ताः ९ पुनर्द्वितीयेनएजलान्गुणान्दोषाभावोचाह॥किरीटयुक्तंकुंड
लयुक्तंचक्रादियुक्तंच॥वेदांतैःपरमंवेद्यंप्रमेयबलमीरितं सांख्ययोगौप्रमाणंचतत्त्वानांकार्यतोबलं त्रिविधान्यपितत्त्वानि
प्रोक्तानित्रिभिरायुधैः भूमाववतीर्णोलीलांकुर्वाणःतत्कृतदोषयुक्तोभवेदितितन्निराकरणार्थंचतुर्थमायुधंपद्ममपिपरित्य
ज्यश्वेतंयदुत्पलंतदेवक्रीडनकंयस्यतथाज्ञात।क्रीडनकमितिवचनात्भ्रामणंलक्ष्यतेकमलेचभ्रामितेजगद्देवभ्रामितंस्यात्।
उत्पलेस्वज्ञानंअतोलीलाप्यज्ञाननाशिकैवेत्युक्तं॥मनःस्पृशतिमनोहरंयत्स्मितंतत्सहितमीक्षणंयस्यःभगवतोमायास्पष्टि एम० २८२
उत्पलेस्वज्ञानंअतोलीलाप्यज्ञाननाशिकेवेत्युक्तं॥अनेनायंपुत्रोयोगभक्तिज्ञानानिचनेष्यतीत्यपिसूचितं १० ॥
श्चमनस्येवास्मिंकिंचिद्विकारंजनयतिनतुकायिकादि

न्
भगवान्कपिलःसन्

१०श्वेतोत्पलक्रीडनकं०

कर्दमस्यभगवदीयस्य शुद्धिमार्गेहरेःस्वयंधर्मार्थादिरहितमुक्तः यो हरिःस्वयं

भगवद्रूपंवर्ण्यते=

गा२
पुरुषार्थेषुदोषान्निराकुर्वन्नाह विन्यस्तेति धर्मोहिमृत्युःआत्मकोमृत्युरूपश्चनिमित्तभूतस्यकालोवाधकोभवतीति=
तन्निराकरणार्थंहृत्मतिकालेचरणकमलंभक्तिमार्गेविन्यस्यस्थितं अंसदेशइतिमोक्षपर्यंतंभक्तिरुक्ता॥शिरश्चतुर्थो भाग:१=
स्सइति खेआकाशेअवस्थितंआकस्मिकोर्थःतस्यनिरूपितः।वक्षसिश्रीर्थस्यकामोयथेष्टंनिरूपितः॥कौस्तुभोमणिः
मुक्ता४ कंधरायांयस्य॥जीवाःसर्वेस्त्रोपरियथासुखंयथार्थस्थापिताइतिसर्वविधामुक्तिरुक्ता ११ जातहर्षइति अतएवजा

विन्यस्तचरणांभोजमंसदेशेगरुत्मतः॥दृष्ट्वाखेवस्थितंवक्षःश्रियंकौस्तुभकंधरं ११
जातहर्षोपतन्मूर्ध्ना क्षितौलब्धमनोरथः।गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्माकृतां
जलिः १२

तोहर्षोयस्यमूर्ध्नाक्षितावपतत् उपरिस्थितस्यनिरुद्धेवचरणंनस्पृष्टवान्दर्शनाकांक्षीचशिरेणनामयेदितिदोष
श्चव्यावर्तितःसमागतोमदर्थमेवेतिलब्धोभगवद्रूपोमनोरथोयेन॥एवंकायिकंमानसिकंचभजनमुक्त्वावाचनिकंभ
जनमाह गीर्भिस्त्वभ्यगृणादिति अभितोगृणानंसर्वसिद्धांतनिरूपणपूर्वकं॥भगवतिप्रीतिःस्वभावेएवयस्य अतो
भक्त्याग्रणनंवक्तव्यं सर्वकर्मणांवभक्तेर्विनियोगात्ताद्दशआत्मायस्य॥जीवांतःकरणस्वभावएताद्दशइतिदेहकार्ये
राद्दकार्यवाले होनवच्छिन्नो निरूपितः॥प्रार्थनार्थंकृतांजलिरिति॥प्रस्तुतांजलिरुक्त४ प्रसादग्रहणार्थं १२ ॥

Indira Gandhi National
Centre for the Arts

२ आद्येस्त्रिभिः श्लोकैः प्रथमपुरुषार्थ्यते एवमन्यत्

त्रिभिः श्लोकैः रजसा योजितं सत्वमिति सहयुक्त रजः इत्यर्थः तमसा योजितं शुद्धं वा। द्वाभ्यां गुणाभ्यां सहं सहरजः श्लोच्यते। अतिमस्तमो द्वाभ्यामवशिष्टाभ्यां गुणाभ्यां संयुक्तमतति व्याप्नोतीति स
लादित्तमो विशेषगुणगुणत्वेनानुमानशुद्धं ३ क्रमः एकेन १=

रजोमिश्रं रजः २ फलरूपभाग २

नवधा वर्णयामास स्वष्टार्थगुणभावतः॥ आद्यौ तु रजसा सत्वं तमसाप्यत्रयोजितं॥ द्वाभ्यां सत्वं रजः सत्वात् त्रिभिरंतिमं ईर्यते॥ सत्वमिश्रं
रजः पूर्वं तमोमिश्रं तथापरं॥ फलं तु भगवानेव सर्वोत्कृष्टमिति स्थितिः॥ तं परित्यज्य तस्मात् द्विप्रार्थ्यं प्रथमम् उच्यते दोष ज्ञाने तथा कामेवि
रमाने तु मध्यमः विचार्य भगवान् दाते त्यस्य वैशारण्यंगतः प्रथमं सत्वयुक्तरजो भावेन भगवानेव परमपुरुषार्थ इति निरूपयति
जुषमिति॥ नः अस्माणां सांसिध्यं सम्यक् सिद्धेर्भावः तव दर्शनादेव जुष्टं सेवितं॥ सिद्धिरनुत्तमा सर्वफलात् यतः सर्वाणि फला
नि त्वाधीनान्येव भवंति सा च सिद्धिरस्माकं जातेति सर्वप्रकारेण भविष्यतीति ज्ञायते॥ यतः प्रथमम् अस्माणां सिद्धिर्जाता स्माभिर्ज्ञाता
नहि असिद्धादृष्टिः अधोक्षजं द्रष्टुमर्हतीति ते न ज्ञायते अस्माभिः सांसिध्यमाधिदैविकी सिद्धिः सेवितेति॥ अत एव वदतीति हर्षे॥

कर्दम उ० नुष्टं वताद्याखिल सत्वराशेः सांसिध्यमस्माणां त्वदर्शनान्नः॥
यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो योगरूढाः १२ ॥

अद्येति अलभ्यलाभोक्तिः सिद्धयः सर्वाः सत्वकार्याः अखिलानि च सत्वानि त्वयि एकीभूतानि चेत् निकटे दृष्टानि तदा का सिद्धिरव
शिष्यते इत्यभिप्रायेणाह॥ अखिलसत्वराशेरिति नः इति सर्वानेव सिद्धानात्मत्वेन ज्ञात्वा वदति॥ एवं दर्शनान्यथानुपपत्त्या च
स्तुवोः सिद्धिरुक्ता॥ इदानीं दर्शनमेव सर्वसिद्धीनां फलमित्याह॥ यद्दर्शनमिति॥ ईड्येति संबोधनात् नेदं स्तोत्रं क्रियते किंतु वस्तु
स्वरूपमेव तथेति ज्ञापितं॥ भगवत्स्तोत्रं नित्यसिद्धं सर्वैरेव क्रियत इति अतः स्तोत्रस्याश्चर्यत्वाभावात् न वाक्यानां स्तोत्रपरत्वं॥ सद्भिः
रूढयोगा अपि बहुभिर्जन्मभिः कायव्यूहमपि कृत्वा देहदेशकालकृतसंदेहव्यावृत्त्यर्थं सद्भिरपि जन्मभिः यद्दर्शनमाशासते॥ २८३
तेषां सिद्धयः स्वतः सिद्धाः दर्शनं तु दुर्लभमाकांक्षितमेव १२ ॥

एवं भगवद्दर्शनं सूचकत्वेन फलत्वेन च निरूप्य दर्शनानंतरं दर्शनदातुः सकाशात् ये स्वत्कामयंति तान्निंदति॥ येमाय
येति॥ चेतव पादारविंदं कामलवाय उपासते ते मायया हृतचेतसः बालो हि मायया मोहितो बहुसुवर्णं दत्वा भस्समुष्टिं गृह्णा
ति तद्वदिति तथाग्रहणे हेतुः॥ हृतचेतस इति॥ पादारविंदमिति सुसेव्यता॥ ननु ये भजंति ते कार्यार्थमेव अतो वरप्रा
र्थनोचितेत्याशंक्याह॥ भवसिंधुपोतमिति॥ सिंधौ पोतो हि तत्तीरवासिनां पारे तरणहेतुः तदर्थमेव तस्य निर्माणात्
न तु ग्रामवद्भोगार्थं अतो ये पारगमने छ्वः तैरेवारो ष्टव्यः न तु ग्रामवत् स्थित्यर्थं॥ तत्रार्थमारोहे कर्णधारः कुध्यति॥

यैर्मायया ते हृतचेतसस्त्वत्पादारविंदं भवसिंधुपोतं उपा
सते कामलवाय तेषां रासीश कामान्निरयेपि ये स्युः १४

ये पुनस्तत्र कार्यार्थं स्थापिताः ते भोगं प्राप्नुवंतोपि निरोधेन क्लिष्टा याताया मभोगानेव भुंजते ते तु नरकेपि भवंति॥ नि
रोधादीनां विद्यमानत्वात्॥ अतः पोतारूढः यथा कथंचित् पार एव गच्छेत् न तु ततो विषयभोगं वांछेत् तत्र निरोध
स्य सहजस्य विद्यमानत्वात् स्पर्शमात्रं प्राप्नोति काम लवः एव तत्र भोगो न भवति परमदयालुस्तु भगवान् तदपि प्रयच्छ
ति॥ ॥ यथा महता कष्टेन पोतारूढस्तत्र स्थित कर्णधाराय तत्स्पर्शमात्रं प्राप्नोति महानगराद्यपेक्षया तु नरकता
दिकमप्युत्कृष्टमेवेदं दद्दिरित्यर्थः १४ श्रीकृष्णायनमः ॥

२१

एवंगुणदोषानूज्ञात्वापिगत्यंतराभावात् उद्यतकामस्यप्रतीकाराभावाच्चआत्मार्थमपिभगवंतंप्रार्थयति॥ तथेति॥



एवंगुणदोषानूज्ञात्वापिगत्यंतराभावात् उद्यतकामस्यप्रतीकाराभावाच्चआत्मार्थमपिभगवंतंएवप्रार्थयति॥ तथेति॥ स्वयोगबलेनकामिनीर्निर्मायनभोगकार्मेनवातथोत्पादिताः सचाहमिति॰ज्ञात्वापिप्रकटकामः अतएवपरिवोढुकामः ब्रह्मणः कार्यप्रयोजकाः भवेयुः हीनात्तेनछ्यादृत्यर्थमाह। समानशीलामिति॥समानंशीलंयस्याः॥तदाहूर्णामपत्यंभ वति॥अनेनभगवतासदानंदेनैवसानिर्मिताभवतीतिज्ञापितं॥ किंचनकेवलंकामार्थाः किंतुधर्मादयोप्यपेक्ष्यंते अ

तथासचाहंपरिवोढुकामः समानशीलांगृहमेधिधेनुं उपे
यिवान्मूलमशेषमूलंदुराशयः कामदुघांक्रियस्य १५

नोयेगृहमेधिनः गृहस्थितबुद्धयः धर्मार्थकामपराः नेषांधेनुं। धर्मादिरोगंध्रीनादृशींपरिवोढुकामः॥ नेकामदुघां ग्रिपस्यमूलमुपेयिवान्॥ कल्पद्रुरुस्यमूलेगतः सर्वंप्राप्नोति॥ यावतीशक्तिः कल्पद्रुरुभगीवदतस्यापितावदेवतत्र सिद्धंभगीवच्चरणारविंदद्वयंनुतत्तोपिविशिष्टमित्याह॥ अशेषमूलमिति॥ नहिकल्पद्रुरुः सर्वस्यमूलं॰ नहिदेवहूतिं दातुंसमर्थोवाभवति॥ ननुचित्तशुद्धिंप्रार्थयसंपादयवाकिमनयेत्याशंक्याह॥ दुराशयइति॥ अंतःकरणाशु ध्यभावात्नसपद्रुः सिध्यति॥ यथाभवसिंधुपोतः तथाकल्पद्रुरुपिभवान्॥ अतोभार्यार्थमपिभजनंयुक्तमितिभावः॥ १५ ॥





नन्वंतुःकरणशुद्धिरेववरः कथंनप्रार्थ्यतेकिंकामपूरणेनेत्याशंक्याह॥ प्रजापतेरिति॥ नकेवलंकामः किंतुपितुराज्ञा चसचैवैष्णवः त्वत्पुत्रः अतस्तवयः प्रजापतिः तस्यवचसालोकापेक्षयावास्यवभवान्॥ यथाग्रामवासिनांग्रामाधिप तिरेवमहाराजः॥ लोकानांब्रह्मवाक्यमनुल्लंघनीयमित्याह तैवचसानंत्याअयंसर्वोलोकः कामहतोनुबद्धः। ऋणत्र यमपाकृत्यमनोमोक्षेनिवेशयेत्॥ जायमानोवैब्राह्मणः त्रिभिर्ऋणवान्जायतेइतिच एवंविधानिश्रुतिस्मृतिवाक्यानिस

प्रजापतेस्तेवचसाधीशतंत्यालोकः किलायंकामहतोनुबद्धः॥
अहंचलोकानुगतोवहामिवलिंचशुक्लानिमिषायतुभ्यं १६

कामपराणि॥ अतः सकामश्चेदन्यथाकुर्यात्पतेरेव॥ अतोहेअधीशअनुल्लंघ्यसामर्थ्यः सर्वएवलोकः कामहतोऽ नुबद्धएव॰ एवंसामान्यतः कामहतस्य ऋणत्रयापाकरणंकर्तव्यमित्फक्त्वास्वस्यलोकत्वाभावेपिसकामत्वंलोकानु गतत्वंचवर्न्नतइत्याह॥ अहंचेति॥ हेशुक्ल॥ तेचबलिंवहामि इदमधिकं॥ भक्तोहमपियतः अनन्यित्वयकार्या र्थंमह्यंस्त्रीदेयेतिभावः॥ शुक्लेतिसंबोधनात्नसंसारकृतः कश्चनक्लेशोभविष्यतीतिसूचितं ॥ १६ ॥

त्व॰सु॰२१ एवंलोकानुसारिणांसकामभक्तमात्मानंनिरूप्यमुख्यभक्तान्निरूपयितुंतेषांधर्ममाह॥लोकांश्चेति॥मुख्याभगवद्भक्तास्त्रिधर्माभ
२८५ वंति।प्रथमतोलोकानत्यजंति॥तदनुतेचरणातपत्रमाश्रिताभवंति॥निरंतरंचतादृशैःसहतथाभगवद्गुणपानंकुर्वंतियथादेहा
दीनामस्मरणंभवति यद्येतन्मध्येएकमपियस्यनूनंभवेत्नसवैहमवोमुख्य॥यथालोकास्त्यक्तव्याएवमेवभगवद्भक्ताअपिलो
कानुगताश्चेत्त्यक्तव्याएव लोकापेक्षयाप्येतेविशेषतस्त्यक्तव्याइत्यत्रहेतुमाह॥पश्यन्निति॥अंधश्चेत्कूपेपततीतियुक्तमेतत्॥
चक्षुष्मांश्चेत्पततितिसमहानंधइतिज्ञेयं॥पश्चाच्चरणशरणगताः॥आतपत्रग्रहणात्।इदानीमिवभगवान्यस्यप्रसन्नोभवति

लोकांश्चलोकानुगतान्पशूंश्चहित्वाश्रितास्तेचरणातपत्रं परस्परं
त्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्माः १७ ॥ ॥

तथासतिशरणागतश्चेत्समुख्योभवतिस्तएवंगुणकथनेरसाविर्भावोनस्यात्अभिमानश्चस्यादिति॥समानाःचेत्परस्परंवदे
युः॥तत्रापित्वद्गुणानांवादोयत्र॥तादृशवाक्सुमुद्रएवमधनादिवोद्धृतंयदमृतंतेनकृत्वानितएंनिः शेषंयापिताश्चेत्
कृत्स्मियास्यादयः॥तएवभगवद्भक्ताःयेकथामृतेपीयमानेदेहधर्मरहिताभवंति॥अमृतंचतदेवंयद्देहधर्मनिवर्त्तकं॥
येषांचनिवर्त्तेतेतएवत्यक्तलोकाभवंति॥अन्येषांतदपेक्षायाविद्यमानत्वात्वादस्तदेवांतस्तापंदूरीकुर्यात्।यद्दिचरणच्छा एम॰
यामाश्रितोभवेत्॥यस्तच्छायांतरेणधर्मनिवृत्तिःअन्नादिनाचक्षुन्निवृत्तिःतेचेल्लोकाननुगताःपतिताएवतदाउभयभ्रंश २८५
त् अतोलक्षणत्रयमुक्तं॥ १७ ॥ १७ ॥

प्रष्टपस्य१

तथाविधानांफलंवदन्कालादीनामबाधकत्वमाह॥नतेजरेति॥तत्त्रिणाभिकालचक्रंएषामायुःआच्छिद्यधावत्नभवतीतिसंबंधः।
कलस्यबलिष्ठत्वमनन्यप्रेर्यत्वंबकुंप्रवाहत्वेनोच्यतेस्वरूपं॥चक्रेत्वन्यप्रेरणंभवति॥चक्रस्येववागतिविशेषस्यप्रवाहत्वंविधीय
ते॥कालचक्रंसंवत्सरात्मकंअविकृतेअकृतेअकृरूपेप्रोतंत्रमतिसर्वनाशकमिति॥समलंत्रयोदशारमुच्यते॥त्रयोदशमासा
एवाराःस्यारमितच्चक्रंनतुप्रधियुक्तं।एकैकस्यारस्यत्रिंशत्पर्वाणिभवंति॥तथासतित्रिशतंषष्ठिचपर्वाणियस्य॥इदमाधिदैवि
कंचक्रंतुल्यमेव॥अन्यथातस्यैवपरिवर्त्तेनस्यात्॥आधिभौतिकेहिदृष्टिरूपोअतस्तावत्सर्वत्वंनानुपपन्नं षट्रूतवएवनेम

नतेजरणकृत्रिमिणयुरेषांत्रयोदशारंत्रिशतषष्ठिपर्व॥षण्नेम्यनंतछ
दियत्रिणाभिकरालश्रोतोजगदाच्छिद्यधावत् १८ ॥

योयस्य॥आरास्तुनाभिंनेमिंचप्रविशंति॥आयंचत्रिणाभिर्भवति॥सर्पकुंडलिकर्वन्नाभित्रयं परंचत्वारएवाराःएकस्यां
नाभौप्रविशंतिअतएवास्यकरालत्वं॥तेचवर्षातपहिमाख्यानाभिस्थानीयाः।किंच॥अनंतच्छदिवज्जवति॥प्रहोहात्मा
यंसंवत्सरः यतोयस्यपत्राणिसंतिनतुप्राकृतचक्रवत्शुष्ककाष्ठवत्जनितं॥अतोनास्यकदापिक्षयःकरालंवास्यश्रोतः॥अ
तएवजगदाच्छिद्यधावद्भवति॥लोकमध्येस्थितोअवर्जनीयतयापितस्यायुराच्छिद्येत्॥तच्छायाश्रयणेपिकदाचित्यातयेत्॥
परिहृत्तौतद्गतानांवैकल्यसंभवात्॥तदपेक्षयातत्रिकदगमनेपातयेदेव॥अपेक्षाचकथायांचेदेहधर्मनिवृत्तिःतदैवनिवर्त्तते॥
एवंद्वाभ्यांभक्तिमार्गनिष्कर्षोनिरूपितः १८ ॥ १८

Indira Gandhi National
Centre for the Arts

तामसभावेन जगत्कर्तृत्वेनोक्तानं त्वल्लीलाविग्रहं मत्वा तेन च वरं प्रार्थ्यते॥ एक इति त्रिभिः॥ त्वमेक एव स्वयं यदा जगतः सिसृक्षा जा
ता॥ तया तादृशोपि सन् आत्मनि स्वाधिष्ठाने अधिकायोगमायानिर्मिता॥ तदा सा द्वितीयाकरणत्वेन प्राप्ता॥ तया सर्वमेव जगत् अ
दः अव्यक्तरूपमपि सृजसि पासि पुनश्च ग्रसिष्यसे॥ असहाय एव करणमात्राये त्वर्था दृष्टांतः॥ यथोर्णनाभिरिति॥ तथा करणे साम
र्थ्यं भगवानिति॥ कर्णांशाः स्वत्राक्रयः सत्वादयः सर्वकर्तृत्वात्पालकत्वाच्च॥ स्मादिदाने न सृष्टिकरणे नाश्चर्यं॥ १९॥ तथापि भक्ति
मार्गे तथा करणं तस्याप्याश्चर्यमित्याह॥ नैतदिति॥ एतद्धि वा हादिलक्षणं परं तवाभीप्सितं न भवति॥ बतेति खेदे॥ यत् त्वमधीशः॥ अ

एकः स्वयं सन् जगतः सिसृक्षयाद्वितीययात्मन्नधियोगमायया॥ सृजस्यदः पासि पुनर्ग्रसिष्यसे
यथोर्णनाभिर्भगवान्स्वशक्तिभिः॥ १९॥ नैतद्बताधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसू
क्ष्मं अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः २० श्रीगोपालयनमः

यद्यपि सर्वां सृष्टिं कर्तुं शक्तः भक्तेभ्यश्च संसारदायकं भूतसूक्ष्ममहंकारं तन्मात्रं वा यन्नस्तनुषे विस्तारयसि॥ एतन्न तवेप्सितं
सहजं जगन्निर्माणेन भक्तार्थं त्वया सृष्टा इत्यर्थः॥ नन्वेवं सत्यस्मार्थं निष्पादिता विषयाः कथं प्रार्थ्यंते तत्राह॥ अनुग्रहायास्त्वि
ति॥ अस्मार्थं कृता अप्यनुग्रहेणास्मभ्यं देयाः॥ अत एतद्दानमनुग्रहाय भवतु॥ अपीति संबोधनं स्नेहेन॥ अपयं चैतत्॥ न
त्वनुग्रहेणापि कथमस्माकं तुं शक्यते॥ तत्राह॥ यर्हि मायया कृत्वा लसत्तुलस्या तनुवा भवान्विशेषेण लक्षितः त्वया न भक्तार्थं स्वा
र्थं वा किंचित्सृष्टं तत्र परार्थं सृष्टैरेव सत्वकार्यैः स्वस्य तनुं संपाद्य तुलस्याद्याभरणानि वगृहीत्वा विहरुरयसीति विशेषात्मानं प्रकाश
यसि॥ तथा भक्तमपि यथाभिलषितविषययुक्तं संपादयेत्यर्थः॥ तामसभावेत्वेवं विधेव सृष्टिः २० ॥ २०॥ 

एवं स्वाभिलषितं ज्ञापयित्वा तद्दानार्थं नमस्यति तं सर्वप्रकारेणोक्तं त्वां नमामीति संबंधः॥ भगवान्हि स्वतो बोभूयमानस्वानंदेन पूर्णः स्वार्थं का
मपि क्रियां न करोति॥ अत अनुभूत्यैव उपरतक्रियार्थो भवति॥ क्रियायाश्चार्थद्वयं दुःखाभावः सुखं चेति॥ जगत्करणं च अपि निरपिन
तस्य स्वतः किं तु माययेत्याह॥ स्वमाययेति॥ बहुधा आवर्तितं लोकतंत्रं लोकरचनायेन॥ स्वाधीनया मायया एव बहुधा सृष्टिः क्रिय
त इति अत एतादृशमभीक्ष्णं नमामि॥ इदं च नमनं नापूर्वमित्याह॥ नमनीयमेव पादसरोजं सर्वेषामयस्येति॥ प्रकृतोपयोगाय विशि
नष्टि अल्पीयसि कामवर्षमिति॥ अल्पीयस्यपार्थे पुरुषे वा काममपयेष्टं वर्षतीति॥ मयानुगार्हस्य मात्रं प्रार्थ्यते अलौकिकं दास्यसी

तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतंत्रं नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पी
यसि कामवर्षं २१ मैत्रेय उ० इत्यव्यलीकं प्रणुतोब्ज नाभस्तमाबभाषे वचसामृतेन सुप
र्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः २२ ॥ श्रीगोपालयनमः ॥

तिभावः २१ अद्भुतकर्मा भगवान्प्रार्थितेसतिकिंकृतवानित्याकांक्षायामाह॥ इत्यव्यलीकमिति॥ यथा हृदयं कथनात् अव्यलीक
त्वं॥ स्वरूपनिरूपणमेतत्॥ भगवांस्तु प्रकर्षेण नुतः स्तपो भक्त्यादिकं त्वग्रे फलिष्यति॥ इदं तु स्तोत्रफलमेवेति ज्ञापितं॥ अब्जना
भ इति॥ जगत्कर्तृत्वादेवं करणमभीष्टमेव विषयदानेक दाचिन्न तु भवेदित्याशंक्यामृतेन वचसेत्युक्तं॥ तथा त्वसिद्धार्थं सु
पर्णपक्षोपरि रोचमान एव बभाषे॥ पक्षपदेन कालपक्षयातोपि लक्षितः येन परित्यागादि साधनानि कृतवान्॥ भगवता सह हर्ष
वादे असमायापगतिर्मा भवत्विति स्मितपूर्वं दर्शनं॥ संसारभावापत्तिव्याहृत्यर्थं प्रेम च॥ उद्वीक्षणमुत्कर्षाधायकं॥ तदर्थं विभ्र
मगुरुकामूर्ध्यसमोहे देहपरित्यागउत्कर्षाधायको भवति॥ एवं सर्वमेव भाष्यर्थं सूचयन् बभाष इत्यर्थः॥ २२ ॥ ॥

कर्दमः

कर्दमस्वरः

वद्धिविधं स्वसितः तवधुरेण स्वद्धिविधं भाविकामपूरणं १ =

तमु·२१ स्वसिद्धांतकामनायाः पूरणं द्विविधं तथा॥ तव चत्वपि तुश्चैवं मंद्राज्ञान्यास एव च॥ एवं कृते त्वहं तुष्टः पुत्रत्वे भविता प्रभुः १ द्वा
२८७ भ्यां भगवच्छास्त्रसिद्धांतमाह॥ विदित्वेति भक्तस्य हृदयेकामस्तद्देवस्याग्रदा पुरा॥ भगवान्पूरकं कुर्यात्सिद्ध एव हि साधनं १ अतो
हि सर्वमार्गाणां भगवन्मार्ग उत्तमः॥ सफलान्येव सर्वाणि साधनान्यत्र सर्वदा २ तव चैत्यं चित्तभावं विदित्वा त्वद्याचनात्पूर्वमेव तन्म
यासम्यग्योजितं किं त्वया योजितमित्याशंकाभयाभावार्थमाह॥ यदर्थमिति॥ यत्कामनार्थं आत्मनियमैः तपआदिभिः सह भक्त्या त्व
यैवाहं समर्चितः॥ यदि मया तत्र कृतं स्यात्तदा तर्यामिप्रेरणया अहमेव त्वया कथमर्चितः स्यां॥ अतो मदर्चनायाः सफलत्वाय
पुरैव मया कृतं॥ सफलैवोत्पत्स्यतामिति॥ २३॥ नन्वर्चनायाश्चात्कुतो न फलमित्याशंक्याह॥ न वा इति॥ मदर्चनं कदाचिद कामवत्१

श्रीभगवानु· विदित्वा तव चैत्यं मे पुरैव समयोजि तत्॥ यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः
२३ न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणं॥ भवद्विधेष्वतितरां मयि संगृभितात्मसु २४ ॥

पि न मृषा फलरहितं न स्यात्॥ कालभेदेनापि मद्भजनस्य न फलाभावसंबंधः॥ भगवच्छास्त्रे ऽदृष्टादेरभावात्॥ भगवतो व्यापारत्वा
भावात् तदानीं फलानि भवेयुः॥ भजनस्य निहत्त्वात्तामग्री पूर्वसिद्धा कामितेति न समकालमपि फलोत्पत्तिः॥ सर्वेष्वेव पक्षेषु
फलस्यैकोंऽशो बाध्येत यदि पूर्वं न क्रियेत॥ अतो मद्भजनस्य स्वभाव एवतादृश इति पूर्वमेव फलजननं॥ किंच॥ अभक्तेषु मदर्ह एम०
णमन्यथापि भवेत् भक्तविरोधाद्भवद्विधेषु त्वन्यथाभावशंकानास्त्येवेत्याह॥ भवद्विधेष्विति॥ अतितरां सर्वथा नकेनाप्यंशे २८७
नान्यथाभावः तमेव प्रकारमाह मयि संगृभितात्मस्विति मयि सम्यक् गृभितः गृहीतः आत्मा येषां तेषु २४ ॥

एवं सिद्धांतकथनेन सामान्यतः तस्य कामनां पूरयित्वा विशेषतः पूरयति॥ प्रजापतेः सुत इति चतुर्भिः॥ स्वभुणाधिक्यकथनं तस्य
मागमस्य च॥ कन्यादानं ततः कन्यारुचिस्त्वयि च वर्ण्यते १ प्रथमं मनोहत्कर्षमाह॥ प्रजापतेर्ब्रह्मणः सुतः॥ अनेनोत्तमोदंशो
निरूपितः॥ सम्राडिति राज्य संपत्तिरुक्ता॥ मनुरिति धर्मः॥ विख्यातमंगल इति कीर्त्तिः॥ विख्यातं मंगलं सदाचारो यस्य॥ देशस्व
धर्मावाह॥ ब्रह्मावर्ते देशे अभितो वसन् सप्तार्णवामेव पृथ्वीं शास्ति॥ सरस्वती दृषद्वत्योर्देवनद्योर्यदंतरं तं देवनिर्मितं देशं
ब्रह्मावर्तं प्रचक्षत इति॥ इदानीं कुरुक्षेत्रमिति प्रसिद्धं॥ एवं मनुः सर्वतउत्कृष्ट उक्तः २५ तस्यागमनमाह॥ स चेति॥ न हि भक्ताः
स्वयं याचंते॥ विप्रेति संबोधनं॥ आगतेस्त्वागतकरणार्थं विप्रा हि पश्चिमबुद्धयः असमाने अभिमानो दोषो भवेत्तदभावार्थं
संबोधने नोपदेशः॥ राजर्षिरिति योग्यता भार्यया अपि संमत्यर्थं तया सहागमनं तस्याः प्रतिबंधकत्वाभावाय विचक्षणत्वनि

प्रजापतेः सुतः सम्राड्मनुर्विख्यातमंगलः॥ ब्रह्मावर्तं योऽधिवसन् शास्ति सप्तार्णवां महीं २५ स चेह विप्र राजर्षि =
र्महिष्या शतरूपया॥ आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः २६ आत्मजामसितापांगीं वयःशीलगुणान्वितां २
मृगयंतीं पतिं दास्यत्यनुरूपाय ते प्रभो ॥

रूपलावण्यशतरूपा इत्युक्तं विवाहस्य ज्ञातत्वाद्दिदृक्षुरेव त्वा आयास्यति॥ अयं चा
र्थो नातिदूर इत्याह॥ परश्व इति॥ धर्मकोविद इति॥ अभिगम्य स्वयं कन्यामलंकृत्य यथाविधि॥ सदृशाय प्रयच्छेद्यः स कोविद इति
स्मृतः अतोपि कन्यादानधर्मं जानातीति २६ आगत्य कन्यां दास्यतीत्याह॥ आत्मजामिति॥ पिता हि कन्यादाने मुख्याधिकारी॥
असितापांगीमिति स्वभावतो नेत्रप्रांतकार्ष्ण्यं सर्वसल्लक्षणसूचकं॥ वयसा हरणं शीलं पातिव्रत्यं गुणाः स्त्रीलक्षणानि॥ विरक्ता
या विवाहानौचित्यात् पतिं मृगयंतीत्वमपि तादृश इति अनुरूपाय ते दास्यति॥ प्रभो इति संबोधनं स्वसामर्थ्यं तत्र दत्त्वा निरित्रा
पनार्थं॥ अतः स्त्रीणां यावान् अपेक्षते भोगपदार्थः स सर्वोपि मया दत्त इति बोधितः २७ ॥ श्रीलोपाद्धत्रप्रः ॥

त॰मु२१
२८८

एतद्ज्ञानेपिसात्वांभजिष्यतीत्याह॥समाहितमिति॥यस्माद्देवहूत्यांतेत्वद्रयंसम्यगाहृतं॥इमामरिवत्सएनिति॥दशसहस्रसंख्या
न् अतंतसंयोगेद्वितीया॥सादेवहूतिस्त्वांभजिष्यति॥त्वषिर्हिएजकन्यायाःनरोचते तथापिमद्दिछयाभजिष्यति॥ब्रह्मन्निति नि
रूपितार्थसंवादार्थं नृपवधूर्नृपकन्यावधूरिवसुरत्तितापितृगृहेचांचल्यसंभवात् तन्निहत्यर्थमुक्तं कामंयथासुखंनत्वति
क्रमेणरतिःप्रीतयोर्भवतीत्युभयोरितिहृक्ता॥२८॥यातइति॥ततस्त्वयासर्वभावेनसाभोक्तव्या॥भिन्नभिन्नभावेनसापितान्यपि कादम्बरहल:
वीजानिस्वसामर्थ्यादेकधाएकभावापन्नंआत्मनिधृतंनवधाप्रसविष्यति॥तानवापिकन्याएवभविष्यंति॥ततस्त्वदीयेवीर्येकन्या

समाहितंतेहृदयंयत्रेमान्परिवत्सरान्॥सात्वांब्रह्मन्नृपवधूःकाममाशुभजिष्यति २८
यातआत्मभृतंवीर्यंनवधाप्रसविष्यति॥वीर्येत्वदीयेऋषयआधास्यंत्यंजसात्मनः २९
त्वंचसम्यगनुष्ठायनिदेशंमउशत्तम प्रयितीर्थीकृताशेषक्रियार्थोमांप्रपत्स्यसे ३०॥

सुमरीच्याद्योयस्त्वषयः आत्मनःपुत्रान्आधास्यंति॥अतस्तेभ्योदेयाइतिभावः २९ त्वयाचततःसंन्यासोग्राह्यइत्याह॥
त्वंचेति॥ननुयावज्जीवश्रुत्यनुरोधेनगार्हस्थ्येनैवस्थातव्यमितिभावः॥ममाज्ञापूर्वोक्तैव॥त्वंचेतिचकारस्तत्वदृर्थेसापिप्रप
त्स्यतइतिज्ञापितं॥निदेशमाज्ञांसम्यगुक्तप्रकारेणानुष्ठायमांप्रपत्स्यतइतिसंबंधः॥उशत्तमेतिसंबोधनंमत्प्रवेशायोग्यार्थं॥ राम॰
ननुकर्मणांविद्यमानत्वात्कथंभगवतिप्रवेशइत्यत्राह॥प्रयीति तीर्थीकृताःस्तीर्थेइवसमर्पिताःअशेषक्रियार्थायेनताहशो २८८
मांप्रपत्स्यसइत्यर्थः ३० ॥ ३० ॥

स्वप२१:

ततःपूर्वमभिज्ञापकंतवज्ञानंभविष्यतीत्याह॥कृत्वेति सर्वसाक्षात्कारोहितस्याभिज्ञापकं ब्रह्मविदएवभगवत्प्राप्तिःज्ञानस्यचनिदर्श
नं॥यस्मिन्विदितेसर्वमिदंविदितमितितस्यापिनिदर्शनमाह जीवेषुदयांकृत्वाअभयंचदत्वेति॥स्वयंहिब्रह्मभावमापन्नःअन्येनुतद्धि
तादीनादयापात्रंभवंति॥आत्मत्वेस्फुरितेतुअभयदानंचआत्मविदोहितत्कृत्यंतदाह॥आत्मवानिति आत्मत्वंनाममूलचिद्रूपस्य
स्वस्मिन्नाविर्भावः इंद्रियजयस्तत्रनोपयुज्यतएव पूर्वमेवसिद्धत्वात्॥तदासर्वाधिष्ठानत्वेनमांद्रक्ष्यसीत्याह॥मय्यात्मानंसहजगदिति॥
भगवतिस्वात्मानंजगच्चद्रक्ष्यसिआत्मनि॥चकाराज्जगतिचमांद्रक्ष्यसि॥एतावताआधाराधेयभूतोभगवान्ज्ञातःस्वाधारश्चेतिपूर्णब्र
ह्मज्ञानंतस्योक्तं ३१ एवंतस्मैआज्ञामुक्त्वातदंगीकारेस्वस्यप्रसादमाह॥सहेति॥स्वांशकलयासह॰अंशाःआनंदरूपाःभगवतस्तएवस्वां

कृत्वादयांचजीवेषुदत्वाचाभयमात्मवान्॥मय्यात्मानंसहजगद्द्रक्ष्यस्यात्मनिचापिमां ३१
सहाहंस्वांशकलयात्वद्वीर्येणमहामुने॥तवक्षेत्रेदेवहूत्यांप्रणेष्येतत्त्वसंहितां ३२ ॥

शभूताः॥जीवास्त्वंशाः॥कलाःज्ञानक्रियाशक्तयः तत्रानंदांशोज्ञानकलासहितःत्वद्वीर्येणसहतवक्षेत्रेदेवहूत्यांतत्त्वसंहितांसांख्यसि
द्धांतप्रतिपादिकांप्रकर्षेणनेष्येकथयिष्यामि॥वीर्यक्षेत्रसंबंधएवनतुजीववदुत्पत्तिरस्तीति॥पुराणेवेदवन्मूलसंहिताश्चतस्रःसांख्य
योगपशुपतिमतवैष्णवसिद्धांतप्रतिपादकमंत्ररूपाः॥सर्वाण्येवपुराणानितस्यापेक्षितषडंगभूतकालादिप्रतिपादकानिब्राह्मण
स्थानीयानितत्रमूलसंहिताःकालेनग्रस्तास्ताद्याःप्रकाशयिष्यामीत्यर्थः॥स्वस्यांशस्यवीर्यस्यचाभेदप्रतिपादनायप्रथमतएवसहे
त्युक्तं महामुनइतिसंबोधनंतथात्वाधिकारज्ञानाय ३२ ॥

मंत्रतत्त्वस्य३=

Indira Gandhi National
Centre for the Arts

रमु २१
२८७

एवंकामनांपूरयित्वास्वसंनिधानेजीवस्यकामनानस्थितीतिभगवान्वरंदत्वाप्रस्थितइत्याहद्वाभ्यांएवमितितंकर्दममभिभाष्य करिष्यतिसर्वंस्वयमेवअनुभावणमात्रंतुक्रियते॥अथभिन्नप्रक्रमेणपूर्वंदृष्यापरीतः समागतःइदानींभक्तमुद्धृत्यपूर्णमनोरथइ वगतः अतोभिन्नप्रक्रमः॥तस्मिन्स्थापितंब्रह्मभावंगृहीत्वागतइतिज्ञापयितुंभगवानित्युक्तं॥ पुनराविर्भावःकदाभविष्यतीत्याशं क्यतामेवावस्थांकथयन्निवभगवंतंविशिनष्टि॥प्रत्यगात्तजइति प्रत्यग्भूतेष्वन्तेष्वाविर्भवतीति यदैवायमंतर्मुखोभविष्यतितदै वभगवदाविर्भावइत्यर्थः तद्धितीर्थंबिंदुसरइतिभगवतैवनिर्मितं सरस्वतीचब्रह्मदैवत्वात्तयाचपरिश्रितं॥भगवद्भावःस्वच्छिद्रह्व यंतत्रसिद्धंभविष्यतीतिस्थानादेवतस्यहृदयंस्थेत्स्यतीतिसरस्वतीपरिवेष्टितबिंदुसरसोजगामेत्युक्तं ३३ अमचिन्तेतदानींदेवो प्यनुपयुक्तोभविष्यतीतित्वरयेभगवत्स्थापनार्थंचनिर्गत्तत्पवतस्यसतोययावित्याह॥अशेषसिद्धेश्वरैरभिष्टुतःसिद्धःस्वत =

एवंतमनुभाष्याद्यभगवान्प्रत्यगात्तजः॥जगामबिंदुसरसःसरस्वत्या परिश्रितात् ३३ निरीक्षतःतस्यययावशेषसिद्ध
श्वरभिष्टुतसिद्धमार्गः आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितंस्तोममुदीर्णसाम ३४ ॥ श्रीगोपालयनमः ॥

एवसिद्धोमार्गोयस्य वैकुंठमार्गोवासिद्धैःप्राप्यतइतिभगवतोगमनागमनेचसिद्धानांसंमते॥अतोभगवतिगतेनतस्यकाचिद प्रतिष्ठापुनरागमनसंभवात्।सिद्धैःसहभगवतोव्यवहारएवतादृशः सर्वसंमतिरत्रैत्यशेषपदं॥येषामपिसिद्धिर्जाता स्वयंच सिद्धिदातारःतेषामपिभगवन्मार्गोभिष्टवः॥ततोप्यधिकफलापेक्षितत्वात् ननुसिद्धेश्वरभगवंतंनिरंतरंस्तुवंतीतितेषांस्तो त्रमपश्रुत्वाकथंगतइत्याशंक्याह॥पत्ररथेंद्रस्यगरुडस्यपक्षैःपक्षरूपैर्बृहद्रथंतरादिभिरुच्चारितंस्तोमस्तोत्रियसमुदायोयस्मि न् उदीर्णयित्सामस्वगधिरूढगीतं॥त्रिवृदादयःस्तोमाः चत्वारः बृहद्रादयोपितत्रऋचः प्रधानभूताइतिपक्षेरुदीर्णयत्सामत दाकर्णयन्नितिवासंबंधः॥उच्चारितस्तोममितिविशेषणं॥अतोवेदैःसाक्षाद्भगवानेवस्तूयते तदेवचश्रृणोति॥अमेतुमार्गोने

भागवतटी० ॥ ३३ ग्म० २८७

एवंभगवत्कृतमुक्त्वातदुक्तंतथैवजातमित्याह॥अथेति॥अथानंतर्यवाचकः यस्मिन्नेवक्षणेशुक्लनारायणः प्रस्थितःतदैवम नुःस्वमहान्निर्गतः॥कर्दमोपिस्वस्थितत्वान्नमयंज्ञानम्भगवत्वाच्चआसीनःसन् तंकालंपरिपालयन्एवस्थितः॥कदादिनद्वयंया स्यतीति॥दीनोहितत्रप्रयत्नंकुर्यात्कामापेक्षयापिभगवद्वाक्यंमहदितिविश्वासोभगवद्भावापन्नस्यैव ३५ मनुस्तुसभार्यःस मागतइत्याह॥मनुरितिशातकौंभपरिच्छदमितिसौवर्णपरिकरयुक्तंस्यंदनंविवाहंसूचयति॥आरोप्यस्वांदुहितरमिति॥विवा हेकृतनिश्चयः अंतर्यामिप्रेरणयातत्तथैवभविष्यतीतिविनिश्चितस्वकन्यायांनास्यःप्रष्टव्यइतिदंपत्योःप्राधान्यात्सभार्यःदे

अथसप्रस्थितेशुक्लेकर्दमोभगवान्षिः॥आस्तेस्मबिंदुसरसितंकालंप्रतिपालयन्॥ ३५॥
मनुःस्यंदनमास्थायशातकौंभपरिच्छदं॥आरोप्यस्वांदुहितरंसभार्यःपर्यटन्महीं ३६ ॥
तस्मिन्सुधन्वन्नहनिभगवान्यत्समादिशत्॥उपायादाश्रमपदंमुनेःशांतव्रतस्यतत् ३७

यत्वेनतांगृहीत्वातामाज्ञापयन्तस्याःपश्चात्कौतुकदर्शनंनभविष्यतीतिमहींपर्यचरत्॥उत्तमस्थानानिसर्वाणिप्रदर्शितवा न्नैत्यस्याजितेंद्रियत्वंबोधयतीतिविदुरप्रीत्यर्थंसंबोधनं॥भगवदाज्ञानान्यथाभवतीति॥तस्मिन्नेवदिनेसमागतः यद्भगवा न्समादिशत्ननुकाकतालीयन्यायेनतदासमागतः एतद्याहृत्यर्थमेवभगवदाज्ञाकीर्तनं आश्रमोयस्मिन्प्रदेशेशेतमुपा यात् तस्यनिकटेसमागतः ननुतपस्यात्प्यमानेतस्मिन्तत्रेजसाकथंनिकटेसमागतइतितत्राह॥शांतव्रतस्येति॥ परिसमा प्तंतपोलक्षणंव्रतंयस्य॥तत्रासिद्धंनज्ञानार्थंप्रश्नापेक्षा ३७ ॥

×२ इत्यर्थः ३६ एवंदिनद्वयमतीतंतृतीयेदिवसेकुरुक्षेत्रात्बिंदुसरसिसमागतइत्याह॥तस्मिन्निति॥हेसुधन्वन्निति

भागवतटी० ३ स्कं०

भगवन्निरूपितः कालः स एवेति निरूप्य देशोपि भगवत्कृत इत्याह यस्मिन्निति विंदुसरो निरुक्तिलतएव विंदवः संस्रिय
त॰सु२१ स्मिन्निति तेषां विंदूनामुत्पत्तिमाह यस्मिन्सरसि भगवतो नेत्रादश्रुबिंदवोन्यपतन् विंदुपातेनिमित्तं कृपयासंपरीतस्ये
२७० ति॥कृपायांनिमित्तं प्रपन्नेऽर्पितयेति शरणागतश्चेत्क्लिष्टः तदा तत्र कृपा भवति कृपयायोव्याप्रियते स्वस्थानात्प्रच्याव
ते तदा नेत्रात् विंदवो भवंति॥भगवान्स्वकृपां शरणागते स्वेवार्पितवान्॰ अतो नदीनमात्रे भगवतो दया॰ यतः प्रपन्नाय दत्तवान्
तदाहार्पितयेति॥भृशमिति सर्वभावेन ३८ एवं देशकालयोर्भगवन्निरूपितत्वमुक्त्वा भगवत्कृपाकार्यं तस्मिन्देशे वर्ण
यति॥कस्यायाः सुखस्थितयः॥तद्वै विंदुसर इति षड्भिः भगवद्गुणकृतत्वाय यत् विंदुसर इति नामप्रसिद्धं सरस्वत्या परि

यस्मिन्भगवतो नेत्रान्न्यपतन्नश्रुबिंदवः॥कृपयासंपरीतस्य प्रपन्नेऽर्पितया भृशं ३८ तद्वै विं
दुसरो नाम सरस्वत्या परिप्लुतं॥पुण्यं शिवामृतजलं महर्षिगणसेवितं ३९ पुण्यद्रुमलता
जालैः कूजत्पुण्यमृगद्विजैः सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियान्वितं ४०

श्रितमिति तत्र धर्मसिद्धिः॥परिप्लुतमिति पाठे सरस्वतीमध्यस्थ एव कालीयह्रद इव तत्कुंडं॥प्रथमतो जलं वर्णयति॥पुण्यमदृष्ट
जनकं॰ शिवमारोग्यकरं॰ अमृतं स्वादुजलं यस्य तत् प्रमाणमाह॥महर्षिगणसेवितमिति॥महर्षयो ये सर्वपदार्थयाथात्म्य
द्रष्टारस्तैर्यासेवनात्सेवितं॥अतो महाफलमेवैतज्जलं ३९ जलप्रांतभागं त्वृषिगणसेवितत्वेनोक्त्वा तस्यापि वेष्टनरूपं वन
मनुवर्णयति॥पुण्येति॥द्रुमाः वृक्षाः लताश्च स्वभावतोपि पुण्याः आम्रादयः द्राक्षादयश्च॰ पुण्यजनकाश्च पुण्याः तत्फलभ
क्षकाः कूजंतो मृगा हरिणादयः द्विजाः मयूरादयश्च यत्र तत्र तादृशानि द्रुमलतानां जालानि तैः कृत्वा सर्वर्तुषु तत्स्थानं॥फलैः स्म॰
पुष्पैश्चाढ्यं वनपंक्तिश्च तत्र शोभमाना परितस्तदाह॥वनराजिश्रियान्वितमिति ४० ॥श्रीगोपालयनमः ॥ २९॰

एवं धर्मजनकत्वं वनस्य विनिरूप्य रसालत्वं निरूपयति॥मत्तेति द्विजगणाः पक्षिगणाः सर्व एव तत्रत्यरसेन मत्ताः अनेन तल्लो
भेन सेवंत एव॰ अत स्तैर्जुष्टं॥मत्तानां भ्रमराणां विभ्रमो विलासो मधुरं रणनं गतिविशेषो वा यत्र॥मत्ताये बर्हिणस्त एव नटाः नर्त्तका
स्तेषामाटोपः संभ्रमो यस्मिन् निश्चिंततात्र अहिंसकत्वात्तेषां निरूपिता आह्वयंतो मत्ताः कोकिला यस्मिन् ४१ एवं रसाल
तां निरूप्य पुष्पप्रधानान् वृक्षान्गणयति॥कदंबेति असनोपि वृक्षः पुष्पप्रधानः॥चूतपोताः स्वल्पाम्राः तैरलंकृ
तं ४२ कारंडवैरिति॥कारंडवादयः पक्षिविशेषाः तैरुपकूजितं हरिणादयो मृगविशेषास्तैर्जुष्टं॥श्वाविल्॰ शल्यकः

मत्तद्विजगणैर्जुष्टं मत्तभ्रमरविभ्रमं॥मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलं ४१ कदंब
चंपकाशोककरंजबकुलासनैः॥कुंदमंदारकुटजैश्चूतपोतैरलंकृतं ४२ कारंडवैः प्लवैर्हं
सैः कुररैर्जलकुक्कुटैः॥सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितं॥४३॥तथैव हरिणैः क्रोडैः
श्वाविद्गवयकुंजरैः॥गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतं ४४ प्रविश्य तत्तीर्थवरमादि
राजः सहानुगः॥ददर्श मुनिमासीनं तस्मिन्हुतहुताशनं ४५ ॥श्रीगोपालयनमः ॥

गोपुच्छादयो मर्कटविशेषाः॥हरयः सिंहा वानरा वा नाभिभिः कस्तूरीमृगैः ४४ तादृशं वनं निःशंकं प्रविश्य तत्र विद्यमा
नं मुनिं दृष्टवानित्याह विंदुसरो निकटे तस्य पर्णशाला अत एव तीर्थवरं प्रविश्येत्युक्तं॥नदीमुत्तीर्य तदाश्रमे गत इति प्र
विश्येति पदात् ज्ञायते॥तीर्थश्रेष्ठपरिज्ञानार्थमादिराज इत्युक्तं॥आदिराजो मनुः सहानुगः ससेवकः॥राजत्वपरिज्ञा
नार्थं दूरादेव ददर्श॥हुतो हुताशनो येन ॥श्रीरामचंद्रायनमः श्रीराधावल्लभायनमः ॥

Indira Gandhi National Centre for the Arts

तभु.२१
२७१

[illegible]

॥ अनेनकर्मसमाप्तिश्चसूचिता ४५ कस्माद्दानयोग्यत्वायवर्णयतिसार्द्धाभ्यां॥उग्रयुजातपसिवपुषाविद्योतमानं॥उग्रोयुक् योगोयस्य॥तपसितस्यमहान्योगः॥तपसः परमधर्मत्वात्॥चिरकालकृतेनापितपसावपुर्विद्योतमानमेव॥अनेनवर्णो नमतानिरूपिता॥कृशत्वंपरिहरति॥नातिक्षाममिति॥भगवतोयत्स्निग्धापांगावलोकनं तेनात्यंतंनकृशः दुरंतस्यगोयद् पांगमोक्षइतिवाक्याद्भगवत्कटाक्षः सर्वपदार्थजनकोभवति।सहिदेहपुष्टिमपिजनयेत्॥दुरंतत्वमाहात्स्यर्थस्निग्धतानि रूपिता॥देहेस्थूलत्वायादकाऽवयवाः भगवत्स्नेहसहितदृष्ट्याजनिताइतिनोत्तरत्रामध्याभावः॥तेचावयवाः कियंतएव भवंतिइतिनातिक्षामता साक्षाद्दृष्टिजनितत्वायसर्वावयवेषुदृष्टिसंबंधार्थंबहुवचनं॥तथाप्यासन्नोनत्यजतीति कारणांतरमप्याह॥भगवतोयद्ध्यातृतंवाक्यंसएवामृतकलः चंद्रः तस्यासमंताद्यत्पीयूषंतस्यश्रवणेनचभगवद्वाक्यं

विद्योतमानंवपुषातपसुग्रयुजाचिरं॥नातिक्षामंभगवतःस्निग्धापांगावलोकनात् ॥तद्ध्यातृतामृ
तकलापीयूषश्रवणेनच ४६ प्रांशुंपद्मपलाशाक्षंजटिलंचीरवाससं उपसंसृत्यमलिनंयथार्ह
णमसंस्कृतं ४७

निरंतरमृतोत्पन्निरूपमितिवाक्यश्रवणेनापिपुष्टिप्रतिपादनार्थममृतकलत्वेननिरूपितं॥ श्रवणमात्रमितिनातिक्षामता॥अन्यथा अतोनात्रइविडमंडकः॥तत्रापिप्रयोजकंरूपंवक्तुंअमृतकलप्रयोगः।तस्यचश्रवणमात्रमितिनातिक्षामता॥अन्यथा पुष्टिरेवोक्तास्यात्॥चकारद्लौकिकरूपयाः॥४६॥एवंदोषाभावमुक्त्वागुणान्वर्णयति॥प्रकृष्टाअंशकंपर्वाणियस्य·आजा नुबाहुत्वंयतियत्वंचनिरूपितं॥पद्मपलाशवद्दक्षिणीयस्येति॥सौंदर्यंप्रकृतोपयोगि·जटिलंचीरवाससमितितपोधन त्वंखपितत्तापकंसत्वाय उपसंसृत्यनिकटेगत्वादर्शतिपूर्वेणैवसंबंधः॥अथवा।उपनिकटेसंसृत्यसंसारंप्राप्यमलिनं॥ कामेनहिप्राणीमलिनोभवति॥धूमेनाव्रियतेवह्निरितिवाक्यात्।तत्रदृष्टांतमाह॥सहजदोषत्वाभावाय॥यथार्हणमसंस्कृ

नमिति॥महारत्नमिवमिलिनंकंयथाप्रभावतउज्ज्वलमपि
वह्निः संस्काराभावेनधूमवर्णोयोगीतथेत्युक्तंभवति· तथात्र अपांगवचनं

एम·
२७१

एवंदूरादृष्टंतंवर्णयित्वातस्यलौकिकधर्मंवक्तुमाह अथोटजमिति पर्णशालांप्राप्यायांतंप्रणतंपुरःपादसमीपेप्रणतंक्षत्रिय स्ततथैवधर्मइतिप्रणम्यनार्थंपूर्वमेवसंपादितयासपर्ययापर्यग्रहणात्॥प्रतिनंद्याशीर्भिःकुशलप्रश्नैर्वा॥तुल्यताज्ञानार्थंचा नुरूपयामहाप्रणयोग्ययाअर्घ्यादिरूपयाइत्यर्थः॥परिग्रहोत्वात्मीयतयागृहेनयनं· ४८ एवंबहिस्तत्पूजांविधायाधि निप्रकरणार्थंसर्वलंदेहनिहत्यर्थंचवाचापूजांकृतवानित्याहगृहीतार्हणमिति स्वपित्दत्तांपूजांस्वीकृत्यस्थितंज्ञात्वाअग्रिम मपिस्वीकरिष्यतीतिनिश्चित्यसम्यकूयतंसावधानंविनीतं॥प्रीणयन्निति प्रथमंस्तोत्रंकुर्वन् मुनिरितिभावार्थज्ञानात् तथापि निश्चयरूपेणकथंतदुक्तंकरिष्यामीतिप्रतिजानीते॥सचेदस्मदेवकिंचिद्वदेदित्याशंक्याह स्मरभगवदादेशमिति॥आत्मज्ञा

अथोटजमुपायांतंनृदेवंप्रणतंपुरः॥सपर्ययापर्यगृह्णात्प्रतिनंद्यानुरूपया ४८ गृ
हीतार्हणमासीनंसंयतंप्रीणयन्मुनिः स्मरन्भगवदादेशमित्याहश्लक्ष्णयागिरा॥ ४९ क
ईमह· नूनंचंक्रमणंदेवसतांसंरक्षणायतेवधायचासतांयत्त्वंहरेः शक्तिर्हिपालिनी ५०

प्रमितापांगीमितिभगवद्वाक्यात्कस्मादानुमेवायमागतः॥लज्जयाचस्वयंनवदति॥अतःस्वयमेवश्लक्ष्णयायामनोहरयावा चा·अग्रिमवाक्यरूपमिदमाह ४९ वाक्यमेवाहसप्तभिः॥यद्यपित्वयाकिमर्थमागतमितिनप्रष्टव्यंप्रसंगादस्यागमनसंभवा त॥प्रसंगश्चवक्तव्यःषड्भिः॥तथापिविशेषाकारेणमत्समीपमागतइतिलक्षितइति— तथात्वेयद्भवानाज्ञापयिष्यतितत्करि ष्यामीतिसमुदायार्थः॥प्रसंगमाह नूनमितिहेदेवतवचंक्रमणंसतांसंरक्षणायाऽसतांवधायच॥देवेतिसंबोधनमुपपाद यति॥यद्यस्मात्त्वंहरेः पालिनीशक्तिः।स्थानेचधर्मेतिवाक्यात्सतामसतांचानुग्रहनिग्रहौस्वतंत्रौधर्मत्वात्॥नत्वेकार्यमस्त

Indira Gandhi National
Centre for the Arts

ननुलोकपालकैरेवपालनेसिद्धेकिंमन्वादिभिरित्याशंक्यपरिपालिकांशक्तिंनिरूपयन्तथाकर्त्तारंभगवंतंनमस्यतियोर्क्केति
त॰सु॰२१ ॥अयःर्क्कादीनांलोकपालादीनांरूपाणिस्थानेतत्रत्कार्यावसरेमनुत्रादिरेवाआधत्तेतस्मैतेभुल्लायनमइति॥अयंभुल्लना
२९२ एयएएवमनौतिष्ठतीतितस्मैनमः॥सर्वाणिरूपाणिअन्यस्तत्रस्थापयितुंनशक्नोति॥नवाभगवत्स्थितिव्यतिरेकेणतत्रसर्वदेव
तासान्निध्यंभवति॥अतोमनुमधिष्ठायपालनार्थंभगवानेवस्थितः ५१ विपरीतेबाधकमाहचतुर्भिः॥साधनाभ्यांफलाभ्यांच॥
त्वतश्चसेनयाचपरिपालनंद्वयेन॥सेतुधर्मरक्षाअधर्मनिवृत्तिश्चफले।प्रथमतःस्वतोरक्षाभावेबाधकत्वेनाह॥यदात्वंजैत्रं
रथमास्थायनपर्यटसितदासेतवोमिथोरक्षितिसंबंधः॥रथस्समुत्थासनत्वं।जैत्रमितिजयशीलं॥अनेननकापियएभवशंका।
योर्क्केद्वग्नीद्रवापूनांयमधर्मप्रचेतसां॥रूपाणिस्थानआधत्तेतस्मैभुल्लायतेनमः ५१
नयदारथमास्थायजैत्रंमणिगणार्पितं॥विस्फूर्जच्चंडकोदंडोरथेनत्रासयन्नघान् ५२
स्वसैन्यचरणक्षुस्सवेपयन्मंडलंभुवः॥विकर्षन्बृहतींसेनांपर्यटस्यंशुमानिव ५३
मणिगणार्पितमिति॥महारणयोग्यत्वात्॥दृष्टोवभयमस्तांज्ञापितं॥विशेषेणस्फूर्जन्चंडःकोदंडोयस्य॥अनेनधनुष्टंका
रेणदूरादेवभयंजनयतीतिज्ञापितं॥पापानांपापिष्ठानांनमारणंशस्त्रेण।किंतुरथेनैवत्रासंजनयन् ५२ दुष्टानांवक्र
त्वात्तद्र्थंसाधनांतरमाह स्वैस्यानांचतुर्विधानांचरणैःक्षुस्सीभुवोमंडलंवेपयन्॥महतींसेनांदृष्ट्वामहांतोदोषानिवर्त्तंत
इति॥भूकंपनेनिमित्तांतरत्वज्ञानाभावायदृहतींसेनांविकर्षन्तत्रतत्रनयन्॥पूर्वोक्तिधर्मंधर्माधर्मनिवृत्तिसाधकत्वेननि एम॰
रूपयन्दृष्टांतमाह॥अंशुमानिवेति॥सहिसहस्रकिरणःतमोदूरीकरोतिअग्निहोत्रादिधर्मंचजनयति नहिसूर्येअनु २९२
दितेकश्चनधर्मादिःसेत्स्यति ५३ ॥

तदैवसर्वेसेतवोमर्यादावर्णकृताःआश्रमकृताश्चभगवद्रक्षिताः ओदासीन्याभावायएजन्निति॥तस्यस्वधर्मइतिज्ञापितं॥दस्यु
भिरेवभिद्येरन्चौरभयेवर्णाश्रमवतांभीतत्वात्नमर्यादाहिद्यतीति॥५४॥नकेवलंधर्महानिरेवकिंतुअधर्मश्चसमेधेतवृद्धिं
गच्छेत॥चकाएत्याषंडधर्मोअपितत्रहेतुः॥लोलुपैरिति॥धर्मैनिरंतरंक्रियमाणेइंद्रियाणिव्याप्तानिभवंति।तदालौकिके
भोगेनासक्तानिभवंति अन्यथात्वासक्तानि॥योग्यैःकामैरपूर्णानिअयोग्येलोलुपानिभवंति॥तथापिराजभयंचेन्नकार्यनिष्प
त्तिःस्यात॰ अन्यथात्वतिप्रसंगःस्यादेवेत्याह।व्यंकुशैरिति।विगतोंकुशोनियामकोयेषांतैर्नरभिरिति॰ तएवाहिभगवदाज्ञोल्लं
तदैवसेतवःसर्वेवर्णाश्रमनिबंधनाः॥भगवद्रचिताराजन्भिद्येरन्बतदस्युभिः ५४ अधर्मश्च
समेधेतलोलुपैर्व्यंकुशैर्नृभिः॥शयानेत्वयिलोकोयंदस्युग्रस्तोविनंक्ष्यति ५५ अथापिदृष्टे
त्वांवीरयदर्थंत्वमिहागतः॥तद्वयंनिर्व्यलीकेनप्रतिपद्यामहेहृदा ५६ इतिश्रीभागवतेमहापु
राणेतृतीयस्कंधेएकविंशोध्यायः
ह्यकावेदैनोक्ताः॥अन्यानप्रसंगे॥एज्ञोह्यव्यवस्थाविषयभोगःपरिपालनंच॥ २१एणेतृतीयस्कंधेएकविंशोध्यायः
स्वर्थेवशयनंयदिचोभयोःसमतायदिवाकालविभेदेनव्यवस्थायदिवाभोगप्राधान्यंसर्वप्रकारेणापित्वयिशयानेसतिअयंलो
कोदस्युभिरेवग्रस्तआछिन्नदारद्रविणःस्वरूपादपिविनंक्ष्यति॥अतस्त्वयापर्यटनमवश्यंकर्त्तव्यं॥अतःप्रसंगात्आगमनं॥अत्रा
पिचोणदिनिराकरणार्थंच॥५५॥हेवीरस्वधर्मनिष्ठयदर्थंत्वमिहागतःतत्प्रयोजनंएव्छाभिमांप्रार्थयितुमितियदातदातद्व
यंनिर्व्यलीकेनहृदाप्रतिपद्यामहे॰स्वीकुर्महे॥ननुत्वत्प्रार्थनांनकरिष्यामीतिसंदेहः॥एवंवचनंहिभगवत्प्रसादादेव॥महा
एज्ञाद्य्युक्तर्थवचनात्॥५६॥इतिश्रीभागवतसुबोधिन्यांतृतीयस्कंधविवरणेएकविंशतितमोध्यायः॥ ॥

Indira Gandhi National
Centre for the Arts

मनुः

त॰मु॰२२ २९३ मनुश्वशुर

द्वाविंशे कर्दमस्यार्थः सिद्धस्त्रीधनरूपवान्॥ अयमेवेंद्रियगणः कृत्स्नार्थसुविनिश्चितः १ अर्थस्य सत्वं चाख्यातुं मनोर्दर्मस्य वर्ण
नं भगवत्कृपयैवार्थ उत्तमो नान्यथेति च २ आकूतिः पुत्रिकात्वेन दत्ता येन निजेच्छया॥ स एवास्तं तदन्येन ददे वहूतिं प्रयच्छति ३
कृतकृत्यं च मनुं ततो धर्मं च सेवते॥ यत्तु श्रवणभेदेन द्विरूपमपि सर्वदा ४ पूर्वाध्याये तेन दातव्यं कन्यामिति तत्र विमुखा
कृत्वा संतुष्टः विज्ञापयितुमादौ तं स्तौतीत्याह एवमिति आविःकृताः प्रकटीकृताः सर्वे गुणाः कर्माणि अभ्युदयाश्च गुणकर्मणो
वाभ्युदयो यस्य गुणोदयः सर्वदेवाधिष्ठानात्॥ धर्माधिपालनात् कर्माभ्युदयः॥ अन्यथा कथनं व्यावर्तयति॥ मुनिमिति॥ सव्री

मैत्रेय उ॰ एवमाविःकृताशेषगुणकर्मोदयो मुनिं॥ सव्रीड इव तं सम्राडुपारतमुवाच ह १ मनुरुवा॰
ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया॥ छंदोमयस्तपोविद्यायोगयुक्तानलंपटान् २

ड इति स्वकीर्तिश्रवणात्॥ प्रत्याख्यानशंकया वा॥ कन्यार्थं प्रार्थनायामपि॥ सम्राडिति॥ महतः सर्वमेव वचनं शोभाकरं॥ उ
पारतं तूष्णींभूतं॥ उपसमीपे कन्यायामासमंतात् दत्तं वा हित्याश्चर्ये॥ नहि महाजनः कंचिदेवं प्रार्थयति १ प्रथमं ब्राह्मणक्ष
त्रिययोर्विवाहो नोचित इत्याशंक्य भगवत्कृत एव तयोः संबंध इत्यन्योन्योपकारेण तुल्यतामापादयति॥ ब्रह्मासृजदिति त्रि
भिः। प्रथमतो ब्रह्मा वेदमयः स्वमुखतो युष्मान् ब्राह्मणानसृजत्॥ आत्मपरीप्सया आत्मनः स्वस्य वेदस्य पर्याप्तुमिच्छया रक्षार्थं
वा ब्राह्मणव्यतिरेकेण वेदानां यज्ञानां वा पर्याप्तिर्न प्रवृत्तिर्भवति छंदोमय इति सर्ववेदात्मकः। ते ब्राह्मणास्त्रिविधास्तपोयु एम॰
क्ता योगयुक्ताः ज्ञानयुक्ताः भगवदुपासनायुक्ता वा। त्रितययुक्ता मुख्याः अलंपटानिति। विषयलंपटं ब्राह्मणानां दोषः २९३
तपस्याद्योगुणाः २ ॥

कर्दमीयवा एम॰

एवं गुणदोषाभावयुक्तान् ब्राह्मणान्निरूप्य क्षत्रियान्निरूपयति॥ तत्त्राणायेति॥ ब्राह्मणानां त्राणाय अस्मान् क्षत्रियान्
दोःसहस्रात् वरेण्यस्यापि सहस्रबाहवो भवंतीति तद्यादृश्यर्थमाह॥ सहस्रपादिति॥ वेदो हि ब्राह्मणेषु स्थितो भगवता
रक्ष्यते रक्षणे बाहवः कारणं तत्र जाताः क्षत्रियाः॥ शब्दप्राधान्येन ब्राह्मणानां सृष्टिः अर्थप्राधान्येन क्षत्रियाणां इति योनिभे
दोपि विवाहार्थः सूचितः॥ उभयोरन्योन्याश्रययोगमाह॥ हृदयं तस्य हि ब्रह्मेति॥ तस्य भगवतः ब्रह्म ब्राह्मणाभिमानिनी देव
ता हृदयं अंतःकरणं आत्मा मध्यमितियावत्॥ क्षत्रं क्षत्रियाभिमानिनी देवता अंगमवयवाः प्रचक्षत इति प्रमाणं॥ यथा

तत्त्राणायासृजच्चास्मान्दोःसहस्रात्सहस्रपात्॥ हृदयं तस्य हि ब्रह्म क्षत्रमंगं प्रचक्षते ३
अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः॥ रक्षति स्माव्ययो देवो सः यः सदसदात्मकः ४ ॥

गव्यतिरेकेण आत्मा वसीदति एवमात्मव्यतिरेकेण अंगानि अवसीदंति ३ अतो हीति॥ अतोऽन्योन्यं ब्रह्म क्षत्रं च रक्षतः
॥ तथा सत्यात्मानमेव रक्षतः॥ हि युक्तोयमर्थः। यो हि आत्मार्थं अन्यान् पालयति॥ स ह्यात्मानमेव पालयति॥ एवमन्योन्य
पालनमुक्त्वा उभयोः सकर्तृत्वेन पालकत्वमाशंक्य स्वतंत्रेण भगवता पाल्यमानाः अन्योन्यं पालयंतीति वक्तुमाह। रक्ष
रक्षति स्मेति॥ स हि देवः स्वतंत्रः सर्वानेव पालयति॥ पालने हेतुः॥ सदसदात्मक इति॥ सर्वात्मकोपि निर्विकार इत्याह॥ अव्यय
इति॥ स्मेति प्रमाणं॥ एवं च भगवता कृत्वा यथान्योन्यरक्षा तथा कामकन्यका आवयोरुभयोः रक्षाकर्त्री आत वकामोऽस्माभिः
पूरणीयः॥ कन्यादानेन अस्मत्कामो पितृयापूरणीयो विवाहेनेति भावः ४ ॥ श्रीगोपालाय नमः ॥

Indira Gandhi National Centre for the Arts

सकामोविवाहात्मकएवेतिवक्तुंअन्यानिफलानितवबचनादेवसिद्धानीतितानिगणयति॥तवसंदर्शनादेवतित्रिभिः॥ब्राह्म
णानांस्थानेराजादयोधर्मनिर्णयार्थमप्यागछंति॥तदस्माकंप्रथमतएवजातं॥यतःसंदर्शनादेवसर्वेसंशयाःमछिन्नाः॥एव
मेवतपःकार्यंभगवत्सेवाच॥तथाहस्तेवंप्रसन्नेभगवतिसर्वएवपुरुषार्थःसेत्स्यतिनान्यथेति पूर्वंयेसंदेहाःसंस्थिताःसर्वार्थं
श्रुतेसर्वेत्वद्दर्शनेनैवजातेननिश्चयेनछिन्नाइत्यर्थः॥कोधर्मोराज्ञामित्यपिसंदेहोगतइत्याह॥यत्त्वयमिति॥यद्यस्मात्संदर्श
नानंतरंप्रीत्यादिरक्षिषोःपालकस्यपालनेछोर्वा–भवानेवधर्ममाह॥अतःक्षत्रियाणांधर्मःप्रजापालनंपरमोधर्मइति॥
अतोवाक्यादेवधर्मसंदेहोगतः ५ महापुरुषाणांदर्शनमेवस्वतंत्रफलमितिचेत्तदपिवचनव्यतिरेकेणैवजातमित्याह॥

तवसंदर्शनादेवछिन्नामेसर्वसंशयाः॥यत्त्वयंभगवान्प्रीत्याधर्ममाहरिरक्षिषोः ५ दि
ष्ट्यामेभगवान्दृष्टोदुर्दर्शोयोऽकृतात्मनां दिष्ट्यापादरजःस्पृष्टंशीर्ष्णामेभवतःशिवं ६

दिष्ट्येति॥भगवान्अकृतात्मनांदुर्दर्शोपिमेपयादिष्ट्यादृष्टः येःसंख्यातात्पृथगात्मानकृतःभगवदर्थंवांतःकरणंनकृ
तंतेऽकृतात्मानः आत्मयोऽपदेहार्थंवायैर्भूतानिनसंस्कृतानितेषांतादृशस्यतवदर्शनेपरलोकोपयोगिसर्वमेवकार्यं
सिद्धमितिपरलोकसंदेहोपिगतःपापक्षयार्थंप्रायश्चित्तमितिकिमपिनप्रष्टव्यंइत्याह॥दिष्ट्येति॥तेपादरजएवशिवं किं
कल्याणरूपंमेमयाशीर्ष्णास्पृष्टंमछिरसावा॥पुनंतुमांब्राह्मणपादपांसवइतिसर्वप्रायश्चित्तापेक्षयाइदमेववरं किं
चनकेवलंपापनिवर्त्तकंकिंतुकल्याणकरमपीतिशिवमित्यक्तं।शिरसाचेत्स्पृष्टंअंगानामपिपापंगछत्येवप्रधानत्वा
त ६ ॥



देवगत्याज्ञातमितिदिष्ट्याब्राह्मणोहिक्षत्रियमनुशास्ति॥यथाचार्येतिवासिनंसत्यंवदेत्यादिभिःतदपिअवचनादेवज्ञातमित्याह॥दि
ष्ट्येतिवचनव्यतिरेकेणप्रजापालनंकर्त्तव्यमितिधर्मोप्युपदिष्टः॥तद्ययंनिर्व्यलीकेनेतिवाक्यात्अनुग्रहश्चकृतः॥महतांमुखात्भ
गवद्गुणाःश्रोतव्याइत्यप्यस्माकंज्ञातमित्याह अपावृतैरिति योर्केद्धर्मीदेति – एतेहिभगवतःसर्वपालकागुणास्त्वत्प्रतिपादि
काएवकमनीयागिरः।ताःपुनःशश्वंतरैःआवरणरहितैःकर्णरंध्रैःअकस्माद्राप्पैवजुष्टाःसेविताः ७ एवंसद्दर्शनेनयावद्वा
च्छंतावत्सर्वंजातंअतःपरमन्यत्विज्ञापयामीत्याह॥सभवानिति॥सामामतःइयंप्रार्थनासमहान्भवान्कस्यापित्वंदुःखाये
तिस्मायेनदुहितृस्नेहेनपरितःक्लिष्टःआत्मायस्य॥नकेवलंमद्भक्तमात्रंबाधकंकिंतुस्नेहइतितथोक्तं॥ममेतिदीनतायामत्री

दिष्ट्यात्वयानुशिष्टोहंकृतश्चानुग्रहोमहान्॥अपावृतैःकर्णरंध्रैर्जुष्टादिष्ट्योशतीर्गिरः
७ सभवान्दुहितृस्नेहपरिक्लिष्टात्मनोमम श्रोतुमर्हसिदीनस्यश्रावितंकृपयामुने ८
प्रियव्रतोत्तानपदोःस्वसेयंदुहितामम॥अन्विछतिपतिंयुक्तंवयःशीलगुणादिभिः ९

ग्यता अतःकृपा।मुनइतिप्रकृतार्थपरिज्ञानायसंबोधनं॥श्रावितंविज्ञापितं॥नारदादिद्वाराभगवतावापूर्वंश्रावितं॥
श्रवणार्थमुक्तंवा ८ एवंश्रोतव्यमित्यक्त्वातद्वाक्यमाह॥प्रियव्रतेति॥यस्मात्तुनभवेद्भ्राताविज्ञायंतवैपिता॥नोपय
छेततांप्राज्ञःपुत्रिकाधर्मशंकया१भ्रातुरभावेविवाहस्थानभवतीतिप्रियव्रतोत्तानपदोःस्वसेत्युक्तं।उभयोस्तुकीर्तनंनैकःपु
त्रःपुत्रोभवतीतिवाक्यात्॥पितामसिद्धइतिवक्तुंदुहितामममेत्युक्तं।अकामायाःकाननयुक्तमितिस्त्वन्विछतिपतिमितिहो
त्रःपुत्रोभवतीतिवाक्यात्॥पितामसिद्धइतिवक्तुंदुहितामममेत्युक्तं।अकामायाःकाननयुक्तमितिस्त्वन्विछति पतिमिति हो
यामावायुक्तमितिकामार्थंयोगोमास्त्वितिवक्तुंवयःशीलगुणादिभिरित्युक्तं।वयःकामार्थंशीलंधर्मार्थंगुणाःअर्थार्थाः
आदिशब्देनमोक्षार्थंयोमोक्षार्थाः।एवंचतुर्विधपुरुषार्थसिद्ध्यर्थंस्त्रियाःसर्वपुरुषाधीनमितितादृशंपतिंवांछति ९ ॥

Indira Gandhi National
Centre for the Arts

त·मु २२ ताद्दशश्चेद्रमलयामनसास्वीकृतःस्यात्तथापिनिषिद्धेतितत्रिहृत्त्रिंवदन्त्वद्ग्रहणेनालीवास्याःपतिरितिअभिप्रायेणा
२७५ ह यद्दात्विति॥सर्वान्वराम्त्स्वयोग्यान्श्रोतुंप्रवृत्तायंयदानुभवतःशीलादिकंश्रुतवतीततःप्रभृतित्वय्येवकृतनिश्चयाश्र
सीत् शीलमाचारःश्रुतंविद्यादिजनितज्ञानं॥रूपंसौंदर्यं॥वयस्तारुण्यंगुणाऔदार्यादयःएतान्यदाअशृणोत् नारदोहि
देवकार्यकर्त्ताप्रसंगमुत्पाद्यवदति· त्वय्येवकृतःनिश्चयोययामममायमेवपतिरितिरिति १० एवमपिसतिपित्रदानाधीनाकथं
तिपित्रादेयाइतिमयादीयमानांगृहाणेत्याह॥तत्प्रतीछेति॥द्विजाग्र्येतिब्राह्मणानांपित्रादिदत्तविवाहोमुख्यःनतुगांधर्वादिरि
तिसूचितं॥इमामितिकालांतरविवाहंआवर्त्तयति रूपप्रदर्शनेनप्रलोभयतिच॥अद्ध्येत्यादिनाभिप्रेतमपिगृहस्थायादितिग्रह
शादिरहितैः भगवद्ध्यानरूपैः चिंतनदृशायां प्राणायामादिरूपैर्वा यतिष्यते अतो भक्तौ सिद्धायामितरत्सुलभमिति भ ३२७
त्रिंवपंचमीविद्यामोक्षेऽनंतरंगा २६॥

२

एवं ससाधनं शास्त्रार्थमुक्त्वा साधनपरंपरां निरूपयन् फलकीर्त्तनेनोपसंहरति॥ असेवयेति॥ अयं पूर्वोक्तः अधिकारी मां
प्रत्यगात्मानं इहैव देहे जन्मनि वा ब्रह्मलोके भेदनादिकमकृत्वा अवरुंधे सद्यो मुक्तिं प्राप्नोतीत्यर्थः॥ तस्य प्रथमं प्रकृतेर्गुणाना
मसेवा प्राकृतविषयाणां बंधकानामसकृदनुभवाभावः ततो विषयाभिनिवेशाभावे अंतर्मुखं चित्तं आत्मानं गृह्णाति तदा
ज्ञानं भवति आत्मकामस्य तदा विषयगतो रागो निवर्त्तते तेन च पुनर्ज्ञानमुल्लसितं भवति त्रयमेतदेकं योगः स्वतंत्रः चां

असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन॥ योगेन म
य्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुंधे २७॥

चल्यनिवृत्तिहेतुः मय्यर्पितया भक्तिः विषयवशीकर्त्री विषयेभ्य आत्मानं विमुच्य भक्त्या च भगवंतं वशीकृत्य लक्ष्यमिव
स्थापयित्वा तत्र सर्वमेव प्रकारं ज्ञात्वा जीवं च संघातात् तल्लक्ष्यप्रापणयोग्यं च ज्ञात्वा योगारूढं विधाय लक्ष्ये योजनं यु
क्तमेवं अतो विषयभेदात्पंचानामुपयोगः॥ मामिति प्राप्यरूपो हमेवं तत्वतु सिद्ध इति शास्त्रार्थज्ञापनमात्रं क्रिय
त इति बोधितं॥ बहिः प्रवेशशंकां वारयितुमाह प्रत्यगात्मानमिति॥ प्रत्यगंतर्मुखतया परिस्फुरन्नपि स्वात्मनो भिन्न
त्वं २७॥

Indira Gandhi National
Centre for the Arts

त.सु.२५
३२८

पूर्वमत्रभक्तिर्भजनमात्रमुक्तंनविशेषितइतिविशेषतोभक्तिंपृच्छति॥काचिदिति॥श्रद्धाआराध्यत्वेनज्ञानंसेवामाहात्म्यज्ञान
पूर्वकःस्नेहश्च॥तेषुत्वयियुक्तःकोभक्तिशब्दार्थइतिप्रश्नः॥यद्यपिक्रमाच्चत्वारोपियुक्ताःतथापियःसाक्षात्त्वांविषयीकरो
तिसवक्तव्यइतिसप्तम्यासूचितं भक्तियोगोबहुविधइतिजीवाधिकारमपुरस्कृत्यत्वद्योग्याकेतिप्रश्नः॥उचितेत्यविहिता
भक्तिर्यावर्जिता॥कीदृशीसगुणाअगुणावा॥तत्रापिममयोग्याकीदृशीत्याह ममगोचरेति॥गोचरशब्दोविशेष्यनिघ्नोपि
भवति त्वयैवसर्वेमार्गाःप्रवर्त्तिताःभवांश्चसर्वस्वरूपः॥अतःसर्वएवभक्तिमार्गायद्यपित्वयियुज्यंतेतथापिययाभक्त्यानि
र्वाणरूपंतेपदंअंजसाअनायासेनैवअहमश्नवैअश्नवानीतिवापाठः।दैवगत्यासर्वेपिमार्गाःकदाचित्सुगमाभवंतितद्याहत्य

देवहूतिरु॥काचित्त्वय्युचिताभक्तिःकीदृशीममगोचरा ययापदंतेनिर्वाणमंजसात्वश्नवाअहं
२८ योयोगोभगवद्बाणोनिर्वाणात्मंस्त्वयोदितःकीदृशःकतिवांगानियतस्तत्वावबोधनं २९

र्थमाह॥ययेति।निर्वाणाख्यंपदंव्यापिवैकुंठस्तत्रयाभक्तिःसर्वाधिकारस्वस्यमपिपुरुषंनेयतितामश्चतल्लोकेआनंदानुभव
समर्थोभवतितत्रत्याएतादृशीवक्तव्येत्यर्थः २८ योगंचपृच्छति॥योयोगइति॥भगवल्लक्षणेलक्ष्येआत्मनोयोजनार्थयो
बाणरूपोयोगःसोपिवक्तः॥भगवान्सर्वत्रनयेदित्यत्रभक्तिर्हेतुःस्वतोगमनेसामर्थ्यहेतुःयोगः॥त्वयोदितइतियोगे एप०
नमामवहंधरत्यत्रतस्वरूपमंगानिचवक्तव्यानि·शास्त्रेनानाविधानांनिरूपणात्स्वतंत्रतयायोगस्यकारणत्वाभावा ३२८
तभक्तेश्चपृष्टत्वात्किंयोगेनेत्याशंक्याह॥यतस्तत्वावबोधनमिति॥ज्ञानसाधनंयोगः अनेनचत्वारोर्थाःपृष्टाः॥भ अंगा६७
क्तियोगःस्वरूपतस्तदंगानिफलसाधकत्वेनतदंगंसांख्यंज्ञानंचयोगोयोगांगानिचेकं अंगानित्रीणि २९ ॥

स्व...पिवंकु...द...    ज्ञान...ख्य...गि...णि १

एतत्सर्ववक्तव्यमितिनिरूप्योपसंहरत्यावश्यकत्वाय॥तदेतन्मइति॥शास्त्रप्रसिद्धंअनुभवारूढपर्यंतंचवक्तव्यं॥वि
जानीहिज्ञापय॥ज्ञापनेप्रपन्नाधिकार्थस्वस्यनिकृष्टाधिकारमाह मंदधीरहहरे।सुखंस्वरूपंसर्वैरेवदुर्बोधंभवदनुग्र
हात्बुध्येयं॥हरेःसंबंधिवापूर्वोक्तंसुखंयथाभवतितथाबुध्येयमिति नापिवचनमात्रेणबुध्यतेकिंत्वनुग्रहादेवेतितत्यो
क्तं ३० यद्यपिमात्रागूढतयानिर्दिष्टंचतुष्टयंतथापिज्ञात्वातन्निरूपयतीत्याह॥विदित्वेति॥योगोभक्तिःक्रियारूपा
ज्ञानंसांख्यंचवेदनं॥तेषांयत्रोपयोगःसात्तदन्येवरूपतेस्फुटं १चतुर्ष्वायत्मयोजनंसोर्थः॥विवेचनंतुसंघातात्सांख्य

तदेतन्मेविजानीहिययाहंमंदधीर्हरेःसुखंबुध्येयदुर्बोधंयोषाभवदनुग्रहात् ३० मैत्रेयेउ॥
विदित्वार्थकपिलोमातुरित्थंजातस्नेहोयत्रतन्वाभिजातः॥तत्वाम्नायंयत्प्रवदंतिसांख्यंप्रोवाच
वैभक्तिवितानयोगं ३१ ॥

कार्यप्रवदृते·विविक्तस्यतुविज्ञानंज्ञानकार्यंनिरूपितं· भक्त्याप्रसन्नेतुहरौतंयोगेनैवयोजयेत् १ एतज्ज्ञानेसामर्थ्यं
कपिलइति॥मातुरितिकथनावश्यकत्वं॥जातस्नेहइतिगुप्तकथनेहेतुः॥यत्रमातरितन्वाकपिलदेहेनाभिजातःअ
धिकस्नेहेहेतुः॥यद्दृश्यतितत्परिगणयति॥तत्वाम्नायंतत्वानामाम्नायःआवृत्तिर्यत्र॥उद्देशलक्षणभेदेनकारणत्वे
नकार्यत्वानुप्रवेशेनबहुधाआम्नातंतस्सलोकेसांख्यमितिप्रसिद्धिः॥वदंतीतिप्रमाणं॥भक्तिवितानोयोगश्चप्रोवाचे
तिज्ञानंप्रार्थः॥ ३१ ॥ ॥

Indira Gandhi National
Centre for the Arts

त्र॰सु२५ ३२७ तत्रभक्तिं लक्ष्यति॥देवानामितिद्वयेन॥तस्यचपरिकरःसर्वोप्यग्रेवक्ष्यतेएकादशभिः॥एकमनसःपुरुषस्यसर्वेंद्रियाणांसत्व
मूर्तौभगवतियास्वाभाविकीवृत्तिःसाभक्तिरिति॥इंद्रियाणिहिद्विविधानिस्वभावतःद्वयाह प्राजापत्याइत्यत्रनिरूपिता
नि एकानिदेवरूपाणिएकान्यसुररूपाणि॥यान्यलौकिकंवेदोक्तमेवकर्मज्ञानंवाजनयंति तानिदेवरूपाणियानिलौ
किकंकर्मादिजनयंतितान्यासुराणितेषामन्योन्यंस्पर्द्धा॥तत्रबलिष्ठान्यासुराणितैर्देवरूपाणिनस्वकार्येप्रवर्त्तितुंश
क्नुवंतितानिचेदाप्तस्योपासनादिनाआसंगादिदोषान्निवृत्तानिस्वस्यदेवभावंप्राप्नुवंतितदाकार्यतोपिदेवरूपाणिभ
वंति तत्ररुक्मीणांबहुजन्माभ्यासात्इंद्रादिदेवानांचदेवरूपाण्येवेंद्रियाणिभवंति येवादैव्यांसंपदिजाताः तेषामपि

श्रीभगवानुवाच॥देवानांगुणलिंगानामानुश्रविककर्मणां॥
सत्वएवैकमनसोवृत्तिःस्वाभाविकीतुया॥ ३२ ॥

देवरूपाणिभवंतिआसुराण्यपिभवंति॥एकस्मिन्नेवगोलकेउभयमपितिष्ठति॥यानिनिषिद्धादिचिकित्स्यंते यथामेध्यं
दृष्ट्वातथाकामिन्यामपिदृष्टायांयानिपुनःनिषिद्धेलौकिकेचरम्यंतेतानिबलाद्विहितेप्रवर्त्त्यमानान्यपिनपरितुष्टानिभवं
तिइतिआसुराणि॥तत्रभक्तिर्दैवैरेवभवतिनासुरैरितिदेवपदेनकरणानिनिर्णीतानितेषांपरिज्ञानार्थंलक्षणमाह गु
णलिंगानामिति॥गुणारूपादयःतेर्लिंग्यंतेगुणालिंगानिवायेषामितिदेवरूपाणामिंद्रियाणामेतल्लक्षणं॥तानिलय ट्ट एम॰ ३२९
विक्षेपशून्यानिततोविक्षेपाभावात्नकार्येष्वप्रवृत्त्यास्पष्टमुपलभ्यंते॥नापिलयाभावात्मूढानिपदार्थमपिनगृह्णं

८

त्यपिकिंतुरूपमात्रंचक्षुर्गृह्णातिपश्यतीतिकृत्वाचक्षुरस्तीतिज्ञायते॥एवमन्यानितादृशानिकथंभवंतीत्याकांक्षा
यामाह॥आनुश्रविककर्मणामिति गुरोरुच्चारणानंतरंश्रूयतइतिअनुश्रवोवेदः तेनप्रोक्तानिकर्माणिआनुश्र
विकाणितान्येवकर्माणियेषांलोकेनैर्गुण्यादिमात्रंकार्याणितुवैदिकान्येवतेषांदैवात्येषामेतादृशानींद्रियाणिभवंति
तेष्वांभक्तिर्भवतीत्यर्थः॥किंच॥तान्यपिकर्मयोगज्ञानादिवक्ष्यरूपेवैदिकेकर्मणिप्रवर्त्तमानानिपूर्ववासनयाभ्यासात्
भवंतितेषामपियदिफलावस्थाभवति तदासत्वएवशुद्धसत्वरूपेभगवत्स्वरूपेप्रवर्त्तमानानिस्वभावतोभवंति सत्व
इतिसांख्यमतानुसारेणोक्तंवस्तुतस्तुगुणातीतेभगवतिस्वाभाविकीवृत्तिरितिभगवच्छास्त्रं॥सत्विस्थंनिर्गुणंस्पृतं हरिर्हि
निर्गुणःसाक्षादित्यादिवाक्यैःसर्वभगवतःसामग्रीनिर्गुणा॥एवकारेणजलस्तामसव्युदासार्थः॥एकमनसइति॥एक
मेवमनोयस्य॥मनोपिद्विविधंदैवासुरविभेदेन॥तत्रासुरंसंकल्पविकल्पात्मकंनानाभावापन्नंगुणैश्चक्षोभमेति॥दै
वंतुएकस्वभावापन्नंमननात्मकमेव॥इंद्रियाणितुउभयविधान्येवभवंतुनामकार्यमेवआसुराणांबाध्यते॥मनसा
तुद्वितीयेननभाव्यमेव॥तथासतींद्रियाणांपूर्वोक्तावृत्तिर्नस्यात्॥अतएकमेकस्वभावापन्नंमनोयस्यतस्यैवभक्तिः॥
आसुरे आसुरे(?) आसेषांतुयथाकथंचिक्रियमाणाभगवतिदेवशोवृत्तिः अरूपत्वात्बहुभिर्जन्मभिःपुष्टिगताअंतिमजन्मनिभ
क्तिरूपांवृत्तिंजनयिष्यतीतिनकाप्यनुपपत्तिः॥वृत्तिःतन्निष्ठतानतुग्रहणमात्रं॥सापिवृत्तिः त्यत्रिकीयथाभक्ता
दस्यआसेषांवाभक्तानांएतदेवदूरेनास्मिन्जन्मनिसाधनसाध्यताकिंतुपूर्वजन्मवशादैवेवंभूतोभवति अग्रेवि
शेषंवक्तुंतुशब्दमाह जन्मांतरेणाप्यवधानात्पूर्वजन्मवृत्तिर्यद्वद्देनपराम्रश्यते ३२ श्रीगोपालयनमः

Indira Gandhi National
Centre for the Arts

ननुस्वस्यभक्तस्यसकाशात्फलान्यप्रार्थितत्वात्१=

अस्य१

त·सु२५ फलरूपेन्यजन्मनियांनिमित्ताभवति॥एवंतत्रांभगवन्निमित्तावा॥भगवतःसकाशात्फलानिनिमित्तानियस्याःसात्र
३३० निमित्ताभक्तिर्भवतीतिउत्तरेणसंबंधः॥किंचसाभागवतीसान्द्राद्भगवंतंविषयीकरोति॥भगवद्भावंवषड्गुणरूपतामा
पद्यते॥पूर्वंसत्वरूपेदेवेविहितोवृत्तिःसैवजन्मांतरेभागवतीभवतीतिवा पंचाग्निविद्यायांपंज्ञानोपयिकदेहसिद्धि
र्निरूपिता तस्मिन्देहेज्ञानेजातेमुक्तिर्भवतीति तस्यचब्रह्मविदोजीवतोम्रियमाणस्यगच्छतःसंगतस्यचव्या

अनिमित्ताभागवतीभक्तिःसिद्धेर्गरीयसी जरयत्याशुयाकोशंनिगीर्णमनलोय
था ३३

पारेनिरूपितः॥सद्योमुक्तावपिसायुज्यंनिरूपितं॥तद्वस्तुतोभक्तानामेवभवतीतिसिद्धांतः॥प्रकारांतरेणप्राप्त्याभि
व्यक्त्यभावात् तथापिमुक्तेःसायुज्यादपिइयंभक्तिर्गरिष्ठेत्याह॥सिद्धेर्गरीयसीति·सिद्धिःपूर्वोक्ता·गरीयस्त्वंनिरू ज्ञानोपैकदेहसिद्धि:४
पयति॥जरयतीति॥याकोशंलिंगशरीरंजीर्णंकरोति॥बीजात्मकमित्यन्ये॥यद्यपिसिद्धावपिकोशजीर्णतावर्त्तते
तथापिआशुजरयति॥अनायासार्थेदृष्टांतः निगीर्णमनलोयथेति॥नहिभुक्तकवलस्यपरिपाकार्थं दृर्या एस०
दग्नेरत्साधनंविधीयते यथाग्निकमप्यग्निमेवबोधयति॥एतयामेपरंप्राप्यतइतिभावः ३३ ॥ ॥ ३३०

जीवतांसेवमानावस्था।फलरूपापरा
दर्शनादेवा!१=

जीवानां

तादृशभक्तानांज्ञानिनामिवाग्रिमकृत्यमाह॥प्रकारद्वयेन॥तत्रप्रथममाहत्रिभिः॥नैकात्मतामित्यादिभिः॥साधनावस्थाफ
लरूपातथापरा सायुज्यंचतत्तीयंस्यातत्रातोनोक्ताविप्रापणे १ तत्रप्रथमंभक्तानांसाधनावस्थामाह नैकात्मतामिति॥इ
यंहिफलरूपाभक्तिर्जीवतआतेभक्ताःयावज्जीवंतितावत्फलरूपांभक्तिंकुर्वतीत्यर्थः फलरूपतातदैवभवतियदाभजनादुःखोभिव्य
क्तोभवति बहुधातस्याऽभिव्यक्तेर्निदर्शनं॥भगवतएकात्मतांसायुज्यरूपफलंनस्पृहयंतिप्रार्थनाद्दूरे तेभक्तेषुविरलाः
प्रसंगान्निरूप्यंते केचिदितिदुर्लभाःतेषांकायवाङ्मनोवृत्तिःस्वभावतएवभगवतिभवतीत्याह मत्पादेत्यादिना॥ममपा

नैकात्मतांमेस्पृहयंतिकेचिन्मत्पादसेवाभिरतामदीहाः येन्योन्य
तोभागवताःप्रसज्यसभाजयंतेममपौरुषाणि॥ ३४ ॥

दसेवायामभिरतिर्मनोवृत्तिर्येषां॥सर्वतोगत्वाभगवत्कार्यकर्त्तव्यमितिपद्भ्यांवासेवेत्यर्थः॥अन्यत्तुसुगमंगमनानंत
रसाध्यं इयंमनोवृत्तिर्निरूपिता॥कायिकीमाह॥मदीहाइति ममसंबंधिन्येवईहाचेष्टायेषां॥तेषांवाचनिकीमाह॥
येअन्योन्यतइति॥सर्वेभागवताएकरूपाःभगवदीयाःप्रसज्यासक्तिंकृत्वाममभगवतःपौरुषाणिसभाजयंते अन्योन्य
मुक्तान्यपिपौरुषाणिसंमानयंतिप्रकटंसुहृष्टाः॥स्वकार्यनिर्द्धारविचारहेतोःप्रमाणमेवंगणयंतिनात्मत् १ ३४ ॥

जीवोद्धाररूप१: इदंपद्यंप्रायंणचतत्रयंतिदर्शितं२

Indira Gandhi National
Centre for the Arts

त्मु २५ तेषां फलावस्थामाह पश्यंतीति ते मे रूपाणि पश्यंति निरंतरं भगवत्साक्षात्कारो भवति॥ यथा मित्रैः सह क्रीडति प्रथमतः प
३२१ श्यंति भगवतो रूपाणि वर्णयति॥ रुचिराणि अवतंसानि कर्णाभरणानि येषां अनेन दृष्टिदानदो भगवत्साक्षात्कारो भव
तीत्युक्तं प्रसन्नानि वक्त्राणि अरुणानि लोचनानि येषामिति रागमपि वन्तं सिंहमिव पश्यंतीत्यर्थः॥ तेषामिष्टोत्पादनार्थं
रजस्तभावं दृष्टानां स्थित्यर्थं च सात्विकभावं प्रकटयंतीति वा॥ रूपाणीति॥ परमोपासकानामेकं रूपं कदाचित्साक्षात्कृतं भ

पश्यंति ते मे रुचिरावतंसप्रसन्नवक्त्रारुणलोचनानि रूपा
णि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदंति ३५ ॥

साक्षात्कृतानि भ[...]

वति तेषां तु बहूनि तानि च दिव्यानि लौकिकबुद्ध्या न गृहीतानि॥ अलौकिकभावं वा प्रकटयंति तान् प्रत्येव प्रकटानीति
तथा सति नातिप्रसक्तिः॥ तेषामस्मदीयमाहात्म्यार्थं निदर्शनांतरमाह वरप्रदानीति॥ न ह्यस्मेन वरं दातुं शक्यते प्र
सन्नात् रूपादेः॥ तेषां वेलक्षण्यमाह॥ साकं वाचमिति॥ जीवंत एवेति एतस्मिन्नेव लोके भगवता सह स्पृहणीयां वा एम०
चं वदंति रूपविशेषणं वा यथा मित्रैः सहेष्टालापाः क्रियंते ३५ ॥ ३३१

भक्ति २

ततस्तेषां सायुज्यमाह तैरिति पूर्वोक्तरूपैः अनुभवसमय एवानंदजनकैः दर्शनीया अवयवा येषां उदारो वि
लासः हासपूर्वकमीक्षितं वामं मनोहरं सूक्तं वाक्यं च येषां तैर्हृतांतःकरणानां वशीकृतेंद्रियाणां सा पूर्वोक्ता भक्तिः ता
न निच्छतोपि अण्वीं गतिं सायुज्यं प्रापयति॥ भक्तस्य चतुर्विधपुरुषार्थसिद्ध्यर्थं वक्तृरूपत्वं च साध्यते तत्र दर्शनीया
अवयवाः कामपूरकाः। उदारो विलासोर्थजनकः॥ हासपूर्वकमीक्षितं धर्मजनकं॥ वामसूक्तानि मोक्षजनकानि॥
कामो हि विषयसौंदर्येण अंतः एतत्याच सिद्ध्यति अतो दर्शनीयेति विशेषणं बहिरलौकिकसौंदर्यार्थं॥ विलासोप्य
र्थस्य नानाप्रकारत्वाय॥ उदारत्वं तस्य सर्वोपकारकत्वाय भगवतो हि लीला सर्वेषां सर्वपुरुषार्थदायिनीति भगव

तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः॥ हृतात्मनो
हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते ३६ ॥

त्वं हासो हि हावभावजनकः अन्यथा निरंतरं धर्मो न सिद्ध्येत् हासपूर्वकं चज्ञानं धर्मजनकमेव सूक्तं हितका
रि अविद्यानाशकं वामं परमानंददायकमिति॥ सूक्ष्मा हि गतिः एकरूपानंदस्वरूपा रूपाणि वा नंतानंदरूपाणि॥
अत एवानिच्छा॥ अत एवांतःकरणेंद्रियाणां चैतैरेकर्षणं सर्वेंद्रियसुखरूपत्वात्स भगवान् स्वगृहं गच्छन् तान् पिन भक्तानपि २
यति॥ तेषु इंद्रियाणि मनश्च नयति॥ भक्तिस्तु फलावश्यंभाविनी कालादीनामगम्यं अतिसूक्ष्ममेव भगवदात्म
कं फलं प्रयच्छति ३६ ॥

Indira Gandhi National
Centre for the Arts

तमु २५ ३३२ एवंसायुज्यरूपंफलमुक्त्वासालोक्यादिरूपंफलमाह॥ अथोइति॥ साचेद्भक्तिर्मध्यमाभवेत् ततोयंभिन्नःप्रक्रमः अथोममगाया
विनोविभूतिंपुत्रधनादिरूपांसूर्गादिरूपांचनतत्रभोग्यमस्तीतिमायाविनइत्यर्थः॥ सर्वस्यापिविषयस्यभगवदधीनत्वात्मषष्ठी॥
तामित्यलौकिकीं॥ सर्वलोकप्रसिद्धांवा॥ ऐश्वर्यमणिमादिअष्टांगानियस्यइतितवैश्वर्यप्राप्तिः॥ भगवद्भजनमनुभगवंतमनुवा
प्रविष्टांश्रियंसर्वांएवसंपत्तिमोक्षपर्यंतांभागवतीचभगवत्कृतसंपत्तिंचवेत्यनादरे सर्वमेवबास्पृहयंति॥ भद्रांमोक्षसंपत्तिम
पि मध्यमाभक्तिःफलमवश्यंप्रयच्छतीति यद्यन्यत्रतेषांभोगोनऐचतेतदावैकुंठएवतेभ्योभोगंप्रयच्छतीत्याह॥ परस्मिते
श्रूवतेनुलोकइति॥ परस्यकालादरूपब्रह्मलोकेव्यापिवैकुंठेसर्वमेवैश्वर्यादिकमश्नुवतइत्यर्थः ३७ ननुलोकानांकालभ
यस्यविद्यमानत्वात्क्षीणेपुण्येमर्त्यलोकंविशंतीतिन्यायानत्यागात्किंवैकुंठलोकेविषयानुभवेनेत्याशंक्याह॥ नकर्हिचिदितिहे
पूर्णतद्रूपेमातःशांतरूपंयस्येतिसर्वदोषविवर्जितेवैकुंठेवाअहमेवपरंयेषांतेननंक्ष्यंतिक्षीणपुण्यानपतंतिवा॥ नवाहेतिः
अथोविभूतिंममगायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तं श्रियंभागवतींवास्पृहयंतिभद्रांपरस्यमेतेश्नुवतेनुलोके॥
३७ नकर्हिचिन्मत्पराःशांतरूपेनंक्ष्यंतिनोमेनिमिषोलेढिहेतिः॥ येषामहंप्रियआत्मासुतश्चसखागुरुःसुहृदोदै
कालचक्रंतान्लेढि॥ कालोपितान्नभक्षयति तत्रहेतुः॥ येषामहमिति॥ कालस्ययत्रविषयःतत्रप्रवर्ततेदेवमिष्टं ३८ ॥
॥ तस्यांषडेविषयाःविषये देहः पुत्राः मित्राणिगुरवः संबंधिनःइष्टदेवताकामश्चेति॥ तस्मिंल्लोकेनएतेसंतिकिंत्वेतेषांकार्यमहमे
वकरोमि॥ अतएवतेषामहमेवाष्टविधः नहिकालोमांविषयीकरोति तेषांमदन्यःकोपिनास्तिदेहादिः प्रियोहिविषयोभव
ति वैकुंठस्तुमद्रूपइति॥ तत्राहमेवविषयःसारूप्यस्यचप्राप्तत्वात्॥ देहोप्यहमेव देहेनविषयेषुभुज्यमानेषुप्रकृतिःस्त्रयतइ
तिसुताभवंति॥ ततोत्रविषयभोगेनाप्यहमेवभवामि॥ पुत्रस्नेहस्तत्रतैर्मय्येवक्रियते॥ तत्रबाल्योपिसखाअहमेव॥ तत्रत्यानांपु
रुषाणांमद्रूपत्वात्॥ एतेचत्वारःऐहिकाः॥ पारलौकिकाश्चत्वारः॥ तत्रगुरुरुपदेष्टावैकुंठेत्वहमेव॥ गुरोरुपदेशानंतरंयेनत्र

१वि० (margin)

एम० ३३२ (margin)

भा०

ततोपिप्रथमांभक्तिंसफलांनिरूपयति इमंलोकमिति॥ येपूर्वोक्ताधिकाररहिताःतादृशशरीरादिरहिताश्चकेवलंपुण्यपरिपाक
वशात्एवंभूतंवस्तमात्प्रकारेणोपासतेतेषांभक्त्यभावात्अहंतान्मृत्योरतिपारयइतिद्वयोःसंबंधः सांख्यसिद्धांतत्वात्परित्यागो
त्रमुख्यः मुख्योसिद्धांतेतुइहलोकादिषुअपेक्षाभावएवहेतुः त्याज्यान्गणयति॥ इहलोकस्यात्यः चतुर्धाप्रमाणप्रमेयसाधनफ
लभेदेन॥ ऐहिकाणांप्रमाणानिप्रमाणानियदेषांप्रमेयंविषयाःज्ञेयाःग्रात्यावार्तेनग्राह्याः॥ यदेषांफ लसाधनंयद्वाफलंतदु
भयमपिनतेषां। यत्त्वेवंकरोतिसइमंलोकंत्यजतितथैवामुंचतुर्धालोकंत्यजतिउभयलोकगामीलौकिकोवैदिकश्चउभयस्व
भावापन्नआत्मा देहादिचतुर्विधः॥ सर्वत्रत्यागउदासीन्यं॥ आत्मानंदेहादिकमनुयेपुत्रादयःचकारात्गृहपरिच्छदादयश्च

इमंलोकंतथैवामुमात्मानमुभयायिनं आत्मानमनुयेचेहयेरायःपशवोगृहाः ३९ विसृज्य
सर्वानन्यांश्चमामेवंविश्वतोमुखं॥ भजंत्यनन्ययाभक्त्यातान्मृत्योरतिपारये ४० ॥ ॥

॥ इहेतिसर्वएवममतास्पदाःमत्प्रकृतउपलभ्यंतइतिसूचितं॥ रायोधनानिपशवोगवादयश्च॥ ३९॥ विसृज्येति॥ एतान्विसृ
ज्यअन्यांश्चानुक्तान्प्रतिष्ठादीन्धर्मान्॥ सर्वानितिसर्वत्रविशेषणं॥ चकारादभिमानादि॥ ननुसर्वत्यागेसर्वैःक्रियमाणाना
मुपकाराणामुपेक्षितत्वात्कथंनिस्तारोभविष्यतीत्याह॥ मामेवंविश्वतोमुखमिति॥ अहंहिसर्वात्मामदर्थेयावत्त्यजंतितते
षांमदर्थेतावद्रूपोभवामीति॥ एवंरूपमांयेभजंतिविश्वतोमुखमिति॥ नूतनतयाभगवतोनकिंचित्कर्तव्यमस्तीतिसूचितं॥
भक्तौ तत्रभजनेसाधनंभक्तिरेवतत्रानन्यतापेक्षते॥ परलोकार्थंभगवद्रूपार्थंअन्यार्थंभक्तिव्यतिरेकेणभगवद्व्यतिरेकेणवायेत
षामन्यन्नास्ति॥ मृत्योरतिपारणंपुनः तस्यात्मनोमृत्युफलदेहसंबंधाभावः॥ नमुक्तिर्नापिमृत्युरितिसनकादयइवतिष्ठंति
॥ इयंभेदत्रयंनिरूपितं॥ मायुज्यंवैकुंठोजीवन्मुक्तिश्चेति ४० ॥

श्रीनादयो त्र मार्गाभवंति भगवन्निष्ठाः स्वसंति



मार्गांतरेणाप्येतत् भविष्यतीत्याशंक्यनिराकरोति॥नान्यत्रेति॥ भक्त्यैवतुष्टिमभ्येतिविष्णुर्नान्येनकेनचित्॥सएवमुक्तिदाताच
तसु२५ भक्तिस्तत्रैवकारणंमतमतः अन्यस्मात्तीव्रंसंसाराख्यमर्कंभयंननिवर्त्तते॥ संसारनिवृत्तिर्ज्ञानादिना॥तेचभगवद्भावाचाःभगवत्ये
३३३ वभवंतितदाह भगवतइति॥किंचसंसारेजायतेप्रकृतिपुरुषाभ्यांतयोर्येनियामकः तस्मादेवनिवर्त्ततइतियुक्तं॥ किंच॥आ
त्मनःसर्वभूतानामिति॥आत्मैवतादृशंउपकारंकरोति॥नह्यन्योन्यस्माउपकरोतिस्वार्थव्यतिरेकेण॥अतोज्ञानादिरूपत्वात् ति४
निवर्त्तकरूपत्वंप्रकृत्यादिनिवारकत्वात्पुनःसंसाराजननं॥आत्मत्वात्स्वर्शपंहितकारित्वंचभगवतएवेति अन्यस्माद्भयं
ननिवर्त्तत[redacted]इतियुक्तं॥तीव्रमिति शीघ्रंमार्गांतनिकटस्थितादेवनियामकान्निवर्त्ततइति॥निकटस्थितत्वमा

नान्यत्रमद्भगवतःप्रधानपुरुषेश्वरात् आत्मनःसर्वभूतानांभयंतीव्रंनिवर्त्तते॥
४१ मद्भयाद्वातिवातोयंसूर्यस्तपतिमद्भयात् वर्षतींद्रोदहत्यग्निर्मृत्युश्चरतिम
द्भयात् ४२

त्मत्वात्सिद्धं ४१ नियामकत्वसाधयतिमद्भयादिति भीषास्माद्वातःपवतेभीषोदेतिसूर्यःभीषा
स्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचमइतिश्रुत्यर्थमाह॥मद्भयादेवायंवातोवाति॥अन्यथातस्यगमनेप्रयोजनाभावात्सर्वदान
वायात्॥सूर्योपिमद्भयादेवतपतिश्रुतावुदेतीत्युक्तं तत्रोदयशब्देनतपनमेवोच्यते अन्यथाज्योतिश्चक्रगत्याप्युदयोभवती
त्यर्थभयंस्यात्॥अग्नींद्रयोःक्रियानोक्तेतिस्वयमाह॥वर्षतींद्रइति॥अन्यथास्वगृहस्थंजलमिंद्रःकथंव्ययीकुर्यात्॥दहत्य एम०
ग्निरिति सर्वानेवाशुचिपदार्थानसंमतानपिकथंदहेत् मृत्युरपिदयालुःमद्भयादेवचरतिमारयितुंयतते॥वाधाद्यपास ३३३
नयामृत्युर्दूरीकर्त्तव्यइतिमतमपास्तं॥अन्येननिवार्यमाणोपिमृत्युर्ननिवर्त्ततइतिअपिसूचितं ४२ ॥ ४२

एवंइतरनिषेधेनस्वसिद्धांतंनिरूप्यतत्रपूर्वाचारंप्रमाणयति ज्ञानेति॥ज्ञानवैराग्येभक्तेःसहकारिणी॥योगोधिकारिविशे
षणं भक्तिरेवकरणं क्षेमायमोक्षाय॥स्वरूपसंरक्षार्थवामेपादमूलंपादपीठं अक्षरंप्रविशंति॥नविद्यतेकुतश्चिद्भयं
यस्मात्प्रवेशेहेतुः॥४३॥एवंसर्वशास्त्रार्थंनिरूप्यसम्यक्परिज्ञानार्थकर्त्तव्यमनुवदन्नुपसंहरति॥एतावानेवेति॥पुंसांपर
लोकार्थयततांअस्मिन्लोकेएतावानेवनिश्रेयसोदयः॥निश्रेयसस्योदयोयस्मात्मोक्षहेतुरेतावानेव॥पूर्वमनोमूलकः

ज्ञानवैराग्ययुक्तेनभक्तियोगेनयोगिनः क्षेमायपादमूलंमेप्रविशंत्यकुतोभयं ४३ एतावा
नेवलोकेस्मिन्पुंसांनिःश्रेयसोदयः तीव्रेणभक्तियोगेनमनोमय्यर्पितंस्थिरं ४४ इति
श्रीभागवतेमहापुराणेतृतियस्कंधेपंचविंशतितमोध्यायः ॥ श्रीगोपालयनमः ॥

संसारउक्तः मोक्षेपितदेवनिमित्तमुक्तमितितच्चेद्भगवतिस्थिरंभवतितदाकृतार्थतेतितत्स्थिरीकरणार्थंभक्तिरेवेत्याह॥
तीव्रेणेति॥ शीघ्रंफलसाधकेनभक्तियोगेनसर्वप्रतिबंधकरहितेनमनश्चेन्मय्यर्पितंसत्स्थिरंभवेत्एतावानेवनिःश्रेय
सोदयः॥केनापिप्रकारेणभगवतिस्थिरंमनःपरमपुरुषार्थसाधकमितियोगसिद्धांतः॥तत्रभक्तिरेवस्थिरीकरणहेतुरिति
स्वसिद्धांतानुसारेणापिभक्तिर्निरूपिता॥भगवतानुसारेणापि॥तस्माद्भक्तिःसर्ववादिसंमतेतिसैवकर्त्तव्येतिसिद्धं ४४ इ
तिश्रीभागवतसुबोधिन्यांतृतीयस्कंधविवरणेपंचविंशतितमोध्यायः॥ ॥श्रीगोपालयनमः ॥ ॥

Indira Gandhi National
Centre for the Arts

त्र्यु २६ आत्मानात्मविवेकाय षड्विंशेसोऽस्यमुच्यते॥ तत्वानां लक्षणान्यत्र निहृतिश्रेयसत्रया १ जीवब्रह्मविभागार्थप्रक्रि
३३४ याद्वितयंस्मृतं संसारेमूलभावेचपुरुषः प्रकृतिर्मता २ पूर्वाध्याये उत्तमभक्त्या हृदयप्रविलापनमुक्त्वा अन्यासांच फ
लंनिरूप्य सात संगादेवभवतीति देवहूतेसहृदंभवात् शास्त्रार्थपरिज्ञानार्थमेवतन्निरूपितमितिमत्वा सांख्यं तदर्थमेवक देवहूत्यर्थमेव३
थयितुमाह॥ अथेति॥ अथेत्यपराधीनत्वायभिन्नः प्रक्रमः॥ सांख्यं तेतुभ्यमेवाभिधास्यामि सांख्यस्वरूपमाह॥ तत्वा

श्रीभगवानुवाच॥ अथ ते संप्रवक्ष्यामि तत्वानां लक्षणं पृथक्
॥ यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः १ श्रीगोपालयनमः

नां लक्षणं पृथगिति॥ यथान्योन्यसंश्लेषो न भवति तथा तत्वानि लक्षणीयानि लक्षणैरेवेतरभेदपरिज्ञानमित्यवोचा
म॥ यतः तत्वानां लक्षणं पृथक् पृथक् वक्ष्यामि॥ नन्वंतःस्थितसंसारस्य बहिःस्थितैः तत्वादिपदार्थैर्ज्ञातैरपि किंस्या एम०
तत्राह॥ यद्विदित्वेति॥ पृथक् पृथक् लक्षणं विदित्वा स्वयं पुरुषः प्राकृतैर्गुणैः आध्यात्मिकतत्वैः विमुच्येत संघा ३३४
ते विद्यमानः तत्तल्लक्षणैः तं तं पृथक् कृत्य केवलो भवितुं शक्नोति १ श्रीगोपालयनमः ॥ ॥

एतदात्मानात्मविवेचनं यदर्थं तच्च ज्ञानं तुभ्यं कथयिष्यामीत्याह ज्ञानमिति॥ यज्ज्ञानं निःश्रेयसार्थाय पुरुषस्य मोक्षं साध
यति तत्तेवर्णयिष्यामीति संबंधः॥ नन्वात्मज्ञानात् न संसार इति आत्मज्ञानमेव वक्तव्यं किमन्येन ज्ञानेनेत्याशंक्याह॥ आत्म
दर्शनं यदाहुरिति॥ आत्मनो दर्शनं यदाहुरिति॥ आत्मनो दर्शनं यस्मादात्मसाक्षात्कारहेतुः साक्षात्कार एव वा तत्स्वरूपतः का

ज्ञानं निश्रेयसार्थाय पुरुषस्यात्मदर्शनं॥ यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनं २

रणतश्च तेतुभ्यं वर्णये॥ एतदपि भक्तिवत् हृदयप्रविलापकमित्याह॥ हृदयग्रंथिभेदनमिति॥ हृदयेविरचितो योग्रंथिः चिदात्मनोर्ग्रंथनंय
मोहः शोकोवा तस्य भेदनं यस्मादिति॥ सांख्येनसहितं ज्ञानं स्वतंत्रं साधनमित्युक्तं २ तत्र प्रथमं पुरुषस्य लक्षण स्मात्स हृदयग्रंथि
माह अनादिरिति यस्मिन् ज्ञाने इतरभिन्नतया ज्ञानमिति तल्लक्षणं यत्रैव न भविष्यति तदेव दूरीकर्तुं शक्यत इति र्मोहः ५८
मुख्यतया आत्मलक्षणं पुरुषो लक्ष्य आत्मेति लक्षणं [redacted] योयमहंप्रत्ययवे
द्यः देहेंद्रियांतःकरणानि लोकाममतास्पदाः पुत्रादिसाध्याः परलोकाश्च स्वोपरिसर्वमेव ॥ ॥

Indira Gandhi National
Centre for the Arts

देववागुणान्समादिमत्त्वेस्यापिप्रसंगीतिशंक्याह॥प्रकृतेःपरइति॥नहिप्रकृति नियंताप्राकृतैर्गुणैःसंबध्यते॥प्रकृते ४४ अनात्मनिदेहादिपक्षेकेवला त्मवादेवेदांते ३=

त-सु२६ ३३५ अततिव्याप्नोतीइति आत्मा॥अस्मत्प्रत्ययवेद्यः सएवपुरुषइति॥तस्यदेहाद्यस्तत्वात्जीवभावापन्नस्योत्पत्तिर्भविष्यतीतितद्या हत्यर्थमाह॥अनादिरिति॥जननंसमागमोविर्भावभेदेनभिन्नाकाप्युत्पत्तिर्यस्य नास्तिसअनादिः॥तस्योत्पत्त्यभावेहेतुमाह नि र्गुणइति निर्गतागुणायस्मात्सर्वोत्पादकाःगुणाःतेचेत्तएवोत्पन्नाःकस्तस्योत्पत्तिंसाधयिष्यति सुतरामेवनिर्द्वैतिपक्षेगु

गति ४- णसंबंधरहितइत्यर्थः स्वस्यगुणहेतुत्वेस्वतोवागुणसंबंधाभावेप्रकृते[illegible]रन्यःप्रकृतिसंबंधरहितोवा॥तत्रप्रमाणमा ह प्रत्यग्धामेति॥प्रत्यक् अंतर्मुखंतयाधामस्फूर्तिर्यस्य अहंवित्तिवेद्यइत्यर्थः॥नन्वहंकारोपिताहशोभवतीतिचेत्तत्रा ह स्वयंज्योतिरिति स्वयंज्योतिःप्रकाशरूपं अनेनप्रमाणांतरंतत्रनास्तिनापेक्ष्यतइत्यर्थः॥अहंकारस्तुप्रकाश्यभव तितदुत्तराध्यायेवक्ष्यते॥आत्मनःअसाधारणंधर्मांतरमाह॥विश्वंयेनसमन्वितमिति येनात्मनासर्वमेवविश्वमन्वितं॥

अनादिरात्मापुरुषोनिर्गुणःप्रकृतेःपरः॥प्रत्यक् धामास्वयंज्योतिर्विश्वंयेनसमन्वितं ३

तत्वानामन्योन्यव्यभिचारित्वात्स्वभावकालकर्मणांनानात्वात्एकेनसर्वजगतःसम्यक्संबंधःआत्मनैवभवतिनान्ये नेति॥सम्यगन्वयश्चतत्कृतगुणदोषसंबंधाभावेनसमन्वितमित्येवसंसर्गः॥अत्रपुरुषस्यआत्मनोलक्षणंआत्मनःसं घातव्यावृत्त्यर्थमस्यानिलक्षणानि॥अनादिपदेनदेहोव्यावर्तितः॥निर्गुणपदेनप्राकृताःसर्वे॰प्रकृतेर्नियामकत्वेनप्र कृतिर्व्यावर्तिता प्रत्यग्धामत्वेनकालोव्यावर्तितःएवंचत्वारिपदान्येकंलक्षणंलौकिकं॥स्वयंज्योतिरित्यलौकिकंलक्ष णं ज्ञानेनानुपयोगिलक्षणं—विश्वंयेनसमन्वितमिति॥एवमात्मनःत्रीणिलक्षणानि ३ ननुप्रत्यग्धामत्वंदेहा त्मविवेकात्पूर्वंदेहेपिभवतीतिप्रत्यग्धामेतिनदेहव्युदासःतथाप्रकृतेःपरइत्यनेनकालादयश्चनव्यावर्तिताभवंतिशा एम॰ ३३५

स्वप्रकृतकबुद्धेरपिस्वभावनियामकत्वदर्शनादित्म

तस्यस्यात्मरूपस्यपुरुषस्यवस्तुतोनिर्लेपत्वात्प्रकृतिनियामकत्वाच्चजीवत्वंसहजंनभवतीतिवक्तुंजीवोपाधिमाह॥स एषइति सएवंलक्षितःकारणत्वेनोक्तःपुरुषःएषआत्माअहंप्रत्ययवेद्यः तस्यकथमेवंविपर्ययइत्याशंक्यप्रकृतिरा त्मव्यतिरिक्तासांख्यैकदेशिनोमतेपुरुषवन्नित्या॰भगवदीयमतेत्वितुभगवतःशक्तिः।सांख्यशास्त्रेतुनभगवंतंविषयी

व॰कृ॰वी॰हि॰रत्नेत्त प॰४ करोतितत्प्रवर्तकत्वात्तन्नियामकत्वाच्च॥अतएवदर्वीगेवतद्यत्रप्रवृत्तेः॥पंचधाभगवाननादिरितियत्पुरुषोत्तमः अक्षरंकालःप्रकृतिपुरुषाविति इमंमतमाश्रित्यात्रसांख्यसिद्धांतप्रवृत्तिः ननुप्राकृतंतत्रपुरुषस्यैवप्रकृतिनिय पुरुषकर्तृकेसां ख्ये१=

१प्राहतमतमाश्रित्य

सएषप्रकृतिंसूक्ष्मांदैवीगुणमयींविभुः॥यदृच्छयैवोपगतामभ्यपद्यतलीलया ४ ॥

मनावस्थांपरित्यज्यप्रकृत्यधीनावस्थयाजीवत्वंतदुच्यते॥प्रकृतिमिति॥सूक्ष्मादुर्ज्ञेयाकोमलांगीतांएषइत्यनेनका मोप्यस्यप्रथमंभगवदिच्छयासंजातइतिज्ञातव्यं॥अन्यथातस्यामासक्तिर्नस्यात्॥कामनयएवायंपुरुषइतिश्रुते श्च अतःकामवशात्भगवच्छक्तिरूपांप्रकृतिंदेवस्यसंबंधिनींमोहिकांबंधनहेतुभूतगुणमयींआदौविभुःस मर्थःतांभोक्तुंयदृच्छयेति॥सापिभगवत्प्रेरणयात्स्वयमेवभोग्यत्वेनसमागतातांभोक्तुंप्रभोःसालीलाउचितेति तामभ्यपद्यत॥उपभोक्तुंतयासहैकंप्राप्तवानित्यर्थः ४ ॥ श्रीगोपालयनमः ॥ ॥

Indira Gandhi National Centre for the Arts

छ

त॰मु॰२६ तयोपभुज्यमानस्यावस्थामाह॥गुणैरिति॥साहिगुणैः कृत्वानित्यनूतनाविचित्राभवतिवशीकर्तुंसरूपाप्रजाः सृजतीमि
३३६ ति॥पुरुषांतरंगभूतानंशान्स्वसदृशान्करोतीतिअंशद्वारा पुरुषस्वरूपापादनं॥अतएवसर्वे[illegible]शेषुतद्भावापन्नेषु
सत्सुस्वयमपितद्भावापन्नोजातइत्याह॥विलोक्यमुमुहइति॥ नन्वस्यभगवद्रूपत्वेननित्यसिद्धज्ञानशक्तिमत्वात्कथं
तस्यादृर्शनेमोहः तत्राह॥ज्ञानगूहयेति॥ज्ञानंगूहतेआच्छादयतिस [illegible]इतिविचारस्फुरणंसइतिविभुरपीहस्मां

गुणैर्विचित्राः सृजतीसरूपाः प्रकृतिंप्रजाः विलोक्यमुमुहेसद्यः सइहज्ञानगूहया ५
एवंपराभिध्यानेनकर्तृत्वंप्रकृतेःपुमान्॥कर्मसुक्रियमाणेषुगुणैरात्मनिमन्यते ६

प्रविष्टः मोहः स्वरूपविस्मृतिः ५ मोहानंतरपूर्णोजीवभावोजातइत्याह॥एवमिति॥परास्वतोभिन्नायाप्रकृतिः तस्या
अभिध्यानेनतामेवात्मत्वेनमन्यतइतिआत्मत्वेनध्यानमभिध्यानंसाहिसर्वंकरोतिक्रियाशक्तिस्तदीयेतिपुरुषस्यतुज्ञा
नशक्तिरेवसामोहेनकृशरीभूताप्रकृतेः कर्तृत्वमात्मनिमन्यते॥यतोयंपुमान्लोकेपिपुमान्स्त्रीकृतमात्मकृत एम॰
मेवमन्यते साहिगुणैः कृत्वाकरोतितत्फलमुखंकर्तृत्वमात्मनिमन्यतइत्यर्थः ६ ॥श्रीगोपालयनमः ३३६

[illegible]
[illegible]

श्रौचपुरुषइत्यमयोर्लिंङ्गाणुक्तेभवति ||तद्धिरोपयंक्तोभोक्तृत्वंभवतिक्षतोभोगइत्याप्रकृ
आत्मनिकर्तृत्वाभिमानएवसंसारमूलमित्याह तदस्येति॥तत्कर्तृत्वमेवास्यजीवस्यसंसृतिः संसरणंमतकर्मभिर्बंधः प्रकृति
पारतंत्र्यंचतदपिकर्तृत्वाभिमानकृतमेवनतुकेवलंप्रकृतिकृतं॥ ततएवंतस्यस्वाभाविकंनभवतीतिवक्तुंआत्मनोविशेषणा
निचत्वारि॥सहिसच्चिदानंदरूपः भगवदंशरूपत्वात् ऐश्वर्यादियुक्तश्च।दोषाभावार्थमकर्तुरितिईशस्येतिभगवत्संबंधात्।सा
क्षिणइति॥चिद्रूपत्वात्निर्हृतात्मनइत्यानंदरूपत्वात्अकर्तुः संसारः ईशस्यबंधः साक्षिणः पारतंत्र्यंनिर्हृतात्मनः त्रितयं च
कारणदुक्तंदुःखित्वंवा ७ ननुज्ञानेच्छाप्रयत्नानामेकाश्रयत्वात्उपादानगोचरापरोक्षज्ञानवतएवकर्तृत्वात्कथमन्यगतंक
र्तृत्वमित्याशंक्याह॥कार्येति यद्यपिकर्तृत्वभोक्तृत्वयोः सामानाधिकरण्यप्रतीयतेतदुभयोर्मिलितत्वात्कस्यकिमितिनिश्चेतुं
नशक्यते भगवतितुसर्वमूलभूतेकर्तृत्वंभोक्तृत्वंसहजमेवतथापिकर्तृत्वंप्रकृतिगतंभोक्तृत्वंपुरुषगतमेव॥ तत्रहेत्वावि
दुरितिप्रमाणं कर्तृत्वप्रकृतिधर्मत्वेहेतुः॥कार्यकारणकर्तृत्वइति॥कार्यमधिभूतंदेहः कारणानींद्रियाणिआध्यात्मिकानिक
तदस्यसंसृतिर्बंधः पारतंत्र्यंचतत्कृतं॥भवत्यकर्तुरीशस्यसाक्षिणोनिर्हृतात्मनः ७ कार्यकारणकर्तृत्वेकारणंप्रकृ
र्त्ताअंतः करणमाधिदैविकं चिद्रूपस्यपुरुषस्यत्रिविध(भोक्तृत्वं)तिंविदुः॥भोक्तृत्वेसुखदुःखानांपुरुषंप्रकृतेःपरं ८ ॥
जडभावापन्नोप्रकृतिरेवकारणं॥नहिनिश्चाकारणमन्योन्यंभवति भगवदिच्छाकारणत्वेनकल्पेत यदित्रिविधाधर्माः प्राकृतान
सुःप्राकृतत्वेनस्वरूपापत्तौस्वयमेवहेतुरस्तुकिंविशेषकल्पनया।भोगस्तुसुखदुःखसाक्षात्कारात्मकः तत्रसत्वात्संजायतेज्ञान
प्रकृतिरेव ५८ मितिज्ञानमपिप्रकृतिगतंकल्पेत॥यदिपुरुषोज्ञानरूपोनस्यात् अतःपुरुषसंबंधादेवप्राकृतमपिज्ञानमित्याह भोक्तृत्व
॥ इतिसुखदुःखानांभोक्तृत्वेपुरुषमेवकारणंविदुः ज्ञानरूपत्वात्॥सत्वात्संजायतइतितुसत्वोपाधौपुरुषस्यज्ञानमुदेतीत्यु
च्यते॥नतुज्ञानंप्रकृतेः स्वरूपंधर्मोवाननुमध्यमकर्तृत्वंतुप्रकृत्यध्यासेनप्रकृतिविशिष्टश्चेत्पुनःप्रकृतावध्यस्यतेतदाभो
क्तृत्वंतथासतिनज्ञायतेकिंगतंभोक्तृत्व[illegible]तथापिकुलनमेवयुक्तमित्याशंक्याह प्रकृतेःपरमिति

मितिचतेनैवभवति नहिस्वात्मनोभोगोभवति

Indira Gandhi National Centre for the Arts

प्रकृतिःपुरुषश्चेतिद्विधासमभवद्धृदितिवाक्यादक्ष्यः
भगवद्रूपत्वात्तयोरित्यर्थः२

देहादिरूपजीवरूपयोरेव२=

त्.सु२६ तत्रदेवहूतिराशंकते प्रकृतेरिति देहभावेनिष्पन्नेपश्चात्कर्तृत्वंदेहएवतुकथंनिष्पद्यते नानात्वाच्चजीवानांस्वतःकारणेज देहकरण१=
३३७ गदानंतसहितादिकरणंअसंबद्धकरणंवापद्येत॥अतएतद्रुक्तंकर्तृत्वंभोक्तृत्वंचप्रकृतिपुरुषांशयोरेवनतुमूलभूतप्रकृ
तिपुरुषयोरितिअतस्तयोर्लक्षणप्रश्नः॥उभयोरपिभगवद्रूपत्वात्नसंबंधोविचारणीयः॥पुरुषोत्तमेतितस्मादपिभ

देवहूतिरुः॥प्रकृतेःपुरुषस्यापिलक्षणंपुरुषोत्तम ॥
ब्रूहिकारणयोरस्यसदसच्चयदात्मकं ९ ॥

गवंतंपरमाह परिज्ञानार्थंअस्यजगतःकारणभूतयोः उपादानभूतावपितावेवेत्याह सदसच्चयदात्मकमिति॥ एम॰
कार्यकारणंमोक्षहेतुर्बंधहेतुर्वाअलीकंसद्वासर्वमेवयदात्मकं-मूलभूतप्रकृतिपुरुषात्मकं अतस्तयोर्ज्ञानेस ३३७
र्वंज्ञातंभवतीत्याशयः ९ ॥एमनाम ॥

यद्यपिप्रकृतिर्मूलभूतातथापिदेहादिरूपेणपरिणता (कृता)
ननुपुरुषः१=

आत्मापुरुषःस्वरूपभूतिः२=

परिछिन्नापरिछिन्नतोमूलप्रकृतिव्यामोहिके३=

ननुरूपांरत्वलेनरक्षेणइवभवतीत्यर्थः३=

स्त्रीत्वेनअभिमन्यते२=

पुरुषस्त्वेकएवपुरुषेश्वरयोस्तुनवैलक्षण्यमएवपितदन्यकल्पनापार्थेति अतोजीवेश्वरावस्थाभेदेनैवभिन्नौनतुस्व
तइतियद्देवपुरुषलक्षणंतद्देवलक्षणंप्रकृतेरपिसैवयुद्विभवेत्अवस्थाभेदोनस्यात्॥साहिव्यामोहिकेवभेदेतुप
दातांमभिमन्यतेतदाजीवावस्थांप्राप्नोति यदातुमूलभूतांप्रकृतिंतदास्वरूपस्थितएवजगत्कारणंभवति॥प्रदेशभेदेनवातेउ
भेपुरुषसंगतेयथाआकाशेकचिद्धृहादिकचिन्नेति॥अतःतस्यापिमोहकप्रकृतिव्युदासेकारणतुल्यतैवभवति॥परंमूलभू
जीवस्य जगत्कारंपुरुषः१

कपिलउ॥यत्तत्त्रिगुणमव्यक्तंनित्यंसदसदात्मकं॥प्र
धानंप्रकृतिंप्राहुरविशेषंविशेषवत् १० ॥

जगत्कर्तृत्वं१
तप्रकृतिसंबंधभावात्नकर्तृत्वं॥उभयोःसंबंधोयथैवापद्यतेतादृशएवपुरुषइतिमंतव्यंउभयोःइष्टत्वाज्जीवानां
एषत्वेश्रुतिस्मृतिविरोधआपद्येत॥प्रपंचस्यमिथ्यात्वेशास्त्रविरोधः अनिर्मोक्षः एकमुक्तौचसर्वमुक्तिः अविश्वास
श्चस्यात्॥अतउभयंयथाएवोपपद्यतेतथामूलपुरुषःप्रकृतिद्वयंगृह्णातीतिमंतव्यं[redacted]

जीवानांपुरुषतःपृथक्ते२=

मूलप्रकृतिव्यामोहिकयोः२=

कार्यकारणोपाधिरूपयोर्जीवयोरशास्त्रे२

तविशेषस्य२.

Indira Gandhi National Centre for the Arts

न॰मु॰२६ मू
३३८

मूलभूतांप्रकृतिंलक्षयति यत्तदिति यत्तत्पूर्वमुक्तं तदेवैतादृशगुणविशिष्टंमूलप्रकृतिर्भवतीतियत्त्रिगुणं॥सा प्रकृतिः सत्वर
जस्तमोगुणाः यस्यामूलभूताः यथासच्चिदानंदंब्रह्मक्रियाज्ञानानंदाः धर्मा अपिभवंति॥तथासच्चिदानंदरूपंप्रधानंउक्तं
त्वंशतोगुणअपिभवंति अव्यक्तंनकेनापिप्रकारेणाभिव्यक्तंकार्यमेवतस्याभिव्यक्तंनत्वयमितिनित्यंसदेकरूपं। सद्
सदात्मकंकार्यकारणरूपंप्रधानंमुख्यंप्रकृतिमितिलक्ष्यं॥प्राहुरितिप्रमाणं॥अस्मवदविशेषंविशेषाः सर्वेगुणकृताः त
स्माएवंअतोविशेषवत्प्रधानमितिलक्षणमेकमेवप्रधानमितिमुख्यंभगवताजगत्कारणत्वेननिर्मितंतद्रूपंवा॥तस्यजग
त्कर्तृत्वनिर्वाहार्थंभगवतःस्वषड्गुणानाह त्रिगुणादिषड्भिःपदैः।त्रिविधाहिसृष्टिरन्यथानभवेत्यथाभगवतऐश्वर्यंअ
न्यथासमानेपिकर्मणिउच्चनीचगतयोनस्युः॥मूलधर्माएतेसच्चिदानंदाभासाः भगवतउपन्यायांप्रतिष्ठिताः॥एवंसत्येव
मुख्यंभवति॥यद्यप्येकैकमेवलक्षणंतथापिभगवत्वायषडुच्यंतेअव्यक्तमितिद्वितीयं॥तस्यहिएवंसामर्थ्यंनकेनाभिव्य
क्तंभवति अन्यथाकालादिनाभिव्यक्तौअनित्यतायांपुनःसृष्टिर्नस्यात्नित्यंसदेकरूपमितिकीर्तिः।तस्यायावज्जीवप्र
कृतियुदासार्थमितिकेचिदाकूलडुत्तएध्यायेनविरुध्यतेनित्यत्वादुभयोरिति॥सदसदात्मकमितिश्रीः तस्यैवाशोभाय
त्सर्वात्मकमिति अविशेषमितिज्ञानहेतुः॥अन्यथासंसारिणोमुक्तानस्युःसर्वकारणत्वात्विशेषवदिति सर्वेविशे एम॰
षाइतीमाः॥नतस्यकिंचिदाश्चर्यकरमितिवैराग्यहेतुः १० ॥श्रीकृष्णायनमः ॥ ॥ ॥ ३३८

प्रधानंलक्षयित्वाप्राधानिकंनिर्दिशति॥पंचभिरिति॥प्राधानिकंगणंचतुर्विंशतिकंप्राहुः॥चतुर्विंशतिभेदभिन्नं॥चतुर्विंशतीनांस
मुदायःप्राधानिकोगणः विदुरितिप्रमाणं॥चतुर्विंशतिसंख्यासिद्धियैःतान्याहगणशः पंचभिःपंचभिर्ब्रह्मेति॥परिज्ञानार्थंएतच्चतु
र्विंशतिभेदभिन्नंजगत्ब्रह्मैव॥चतुर्भिर्दशभिरितिचतुर्णांप्रवर्तकत्वात्प्रथमंनिर्देशः॥सांख्यशास्त्रत्वात्संख्येयेवपूर्तिः ११ ता
निनामतोनिर्दिशतिमहाभूतानीति प्रथमंपंचसंख्यापूरकाणिमहाभूतानि॥एवकारेणदिगादीनामाकाशादिष्वंतर्भावः सूचितः
तानिगणयति भूरित्यादि॥अग्निःतेजः॥अग्निरेववा॥सौरादीनितेजांसिअग्नावंतर्भवंतीत्येकेभगवत्तेजइत्यपरे॥महद्वायुः॥

पंचभिःपंचभिर्ब्रह्मचतुर्भिर्दशभिस्तथा॥एतच्चतुर्विंशतिकंगणंप्राधानिकंविदुः ११ महाभूतानिपंचैवभूरापोऽग्निर्मरु
न्नभः॥तन्मात्राणिचतावंतिगंधादीनिमतानिमे १२ इंद्रियाणिदशश्रोत्रंत्वग्दृग्रसननासिकाः॥वाक्करौचरणौमेढ्रं
पायुर्दशमउच्यते १३ मनोबुद्धिरहंकारश्चित्तमित्यंतरात्मकं॥चतुर्धालक्ष्यतेभेदोवृत्त्यालक्षणरूपया १४ ॥

नभआकाशंतन्मात्राणिशब्दादीनितावंतिपंचैव॥स्वरःसर्वेशब्दमध्येगंधादीनिगंधरसरूपस्पर्शशब्दाः॥मेमतानीति॥अस्मत्सिद्धां
तेगंधादीनांतन्मात्रत्वं॥अन्येषांमतेगंधादयोगुणाःभूतेभ्यउत्पद्यंतेभूतसमवेताइति १२ दशसंख्यांपूरयति॥इंद्रियाणीति॥
ज्ञानेंद्रियाणिप्रथमंगणयति श्रोत्रंशब्दग्राहकं॥त्वक्त्वगिंद्रियं॥दृक्दृष्टिःचक्षुरितियावत्॥रसनेंद्रियंघ्राणेंद्रियंचेति॥
वागादीनिकर्मेंद्रियाणिमेढ्रंगुह्यं॥१३॥चतुष्टयंगणयति॥मनोबुद्धिरिति॥ननुपर्यायाएतइत्याशंक्याह॥अंतरात्मकमिति
॥एकमेवांतरात्मकमंतःकरणंमनोबुद्ध्यादिभेदेनचतुर्धालक्ष्यते॥एकस्यानेकधालक्षणेहेतुः॥लक्षणरूपयावृत्त्याभेदोल
क्ष्यतइतिवृत्तिभेदाद्भेदः॥वृत्तिश्चलक्षणरूपा॥आवर्तकंहिलक्षणंसामान्यवृत्तेर्भेदकत्वाभावात्॥१४॥श्रीगोपालयनमः॥

Indira Gandhi National
Centre for the Arts

त्मु २६
३३९

नन्वयं चतुर्विंशतिभेदभिन्नोगणितः अपरश्चगणनीय इत्याशंक्याह॥ एतावानेवेति॥ सगुणस्य ब्रह्मणः एतावत्येवसंख्या॥ शास्त्रेए
तावानेववासंख्यातः सगुणस्य ब्रह्मणः संनिवेशः सम्यङ्गिवेशो नाम असंभावितासप्रवेशोस्यधर्मवत्तयानिरूपणं॥ नन्वस्ति कालोधि
कस्तत्राह॥ यः कालः प्रोक्तः सपंचविंशकः प्राकृत एवेत्यर्थः॥ प्रकृतेः प्रथमोभावः कालः अन्यानि चतुर्विंशतिरिति॥ १५॥ एवमेक
देशिमतेन कालं निरूप्य पुनरेकदेशिमतेनैव निरूपयति॥ प्रभावमिति॥ केचित्पौरुषं प्रभावं कालं प्राहुः॥ पुरुषस्य धर्मः कश्चि
त्सामर्थ्य विशेषो वा तथात्वे हेतुः॥ यतो भयमिति॥ यस्मात्कालात्लोके भयं भवति॥ कस्य भयमित्याशंक्याह॥ अहमिति॥
अहंकारेणायो विमूढः वंचितः॥ आत्मानमेवाहंकारं मन्यते॥ अहंकारविमूढत्वे हेतुः॥ कर्तुरिति॥ यः कर्मादिकर्तासोहंका

एतावानेव संख्यातो ब्रह्मणः सगुणस्य च॥ संनिवेशो मया प्रोक्तो यः कालः पंचविंशकः १५ प्रभावं पौरुषं प्राहुः
कालमेके यतो भयं॥ अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः १६ प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि चे
ष्टायतः स भगवान्काल इत्युपलक्षितः १७

रविमूढो भवति॥ कर्मकर्तृत्वेपि हेतुः॥ प्रकृतिमीयुष इति॥ यस्तु
प्रकृत्या सहैक्यं प्राप्य कर्माणि करोति पश्चादहंकारेण विमूढो भवति॥ तस्य कालाद्भयं भवतीत्यर्थः १६ स्वमते कालं लक्षयति॥
प्रकृतेरिति॥ गुणानां साम्यावस्था प्रकृतिः प्रकृतेः संबंधिनो ये गुणाः सत्वादयः तेषां साम्यं गुणक्षोभात्पूर्वावस्था॥ सच क्षोभा
त्पूर्वं निर्विशेषमानवीति संबोधनं महतउत्पत्त्या अलौकिकं ज्ञानासीति॥ एतादृशस्य तस्य चेष्टा स कालः कालादेव गुणानां
क्षोभः सकालो भगवानेव॥ रूपपंचकमध्ये गणनात्॥ ननु भगवतः काल इति संज्ञा कुत इत्याकांक्षायामाह॥ इत्युपल
क्षित इति॥ कलयत्याकलयतीति॥ सर्वो हि प्राणी येन रूपेण कृत्वा सर्वमाकलयति॥ मत्युभीत एव हि सर्वमाकलयति॥
अतः काल इति भगवानेवोपलक्षितः॥ उपलक्षणविधया बोधितः॥ नहि काल इति साक्षाद्भगवन्नाम॥ किंतु प्राणिनां

ग्रासकेन कालेन२ चेततेर

बोधनहेतुत्वेनानिरूपितमइति॥ १७ ॥

एम०
३३९

एवं कालं भगवद्रूपत्वेनोक्त्वा तस्योपलक्षणतां निरूपयति॥ अंतः पुरुषरूपेणेति॥ एक एव भगवान्सर्वप्राणिनामंतः पुरु
षरूपेणावर्तते॥ वहिः कालरूपेण॥ अन्यथा भगवतो व्याप्तिर्न स्यात्॥ बहिर्मुखान्कालरूपेण भक्षयति॥ अंतर्मुखान्पुरुष
रूपेणाप्याययतीति॥ अत एव सत्वानां सर्वेषां भगवान्स्वमायया सर्वभवनसामर्थ्येन उभयविधो भूत्वा समन्वेति सम्यगन्व
यं प्राप्नोति॥ बहिः कालेलयं प्राप्नोति अंतः पुरुष इति॥ कालो भयजनकः अभयरूपश्च पुरुष इति शेषः १८ एवमुद्देशे
न तत्वानि निरूप्य उत्पत्तिपूर्वकं लक्षणान्याह॥ दैवादिति॥ प्रथमतः चित्तस्योत्पत्तिमुक्त्वा तस्याधिदैविकादिभेदान्निरू
वि२

अंतः पुरुषरूपेण कालरूपेण यो बहिः॥ समन्वेत्येष सत्वानां भगवानात्ममायया १८
दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान्॥ आधत्त वीर्यं सासूत महत्तत्वं हिरण्मयं १९

पयन्लक्षणान्युच्यंते॥ आदावुत्पत्तिः॥ तत आध्यात्मिकस्य लक्षणं॥ तत आधिदैविकस्य॥ तत आधिभौतिकस्येति॥ एव
मेकः परार्थश्चतुर्भिरुच्यते॥ तत्र प्रथमं महत्तत्वस्योत्पत्तिमाह॥ दैवात्कालात् क्षुभिता धर्मा यस्याः सा पुरुषस्य योनिः क्षे
त्रं तस्यां परः पुमान्प्रथमपुरुषः वीर्यमाधत्त॥ यथा स्वभार्यायां पुरुषः तस्येंद्रियाणि भगवत इवानंदमयानि॥ रे
तस्तु सच्चिदंशः चिदंश एवेत्येके॥ सदंशस्तु प्रकृतेः सकाशात्संबध्यते॥ ततः सा प्रकृतिर्महत्तत्वमसूत॥ तस्य श
रीरं हिरण्मयं॥ यथा सूर्यो तर्गतस्य नारायणस्य आनंदतनोः क्षेत्रे हिरण्यरूपता भवति १९ ॥ ॥

Indira Gandhi National
Centre for the Arts

त्नमु॰२६
३४०

आध्यात्मिकंलक्षयति॥विश्वमिति॥सहिमहान्सर्वजगत्प्रसवहेतुः॥विश्वाधारत्वंतस्यलक्षणं॥ब्रह्मांडस्याप्यंशताभवतीति
कूटस्थइत्युक्तं॥प्रकृतिर्बुद्ध्यासार्धंजगदंकुरइत्युक्तं॥यथाहृद्यस्यप्रथमावस्थाअंकुरः तथाजगतः॥सहिविश्वमात्मगतं
व्यनक्ति॥तत्किंकुर्वन्नित्याकांक्षायामाह॥स्वतेजसाआत्मप्रस्वापनंतमःपिबन्निति॥येनतमसापूर्वंमहत्तत्वंप्रस्वापितंल
यंप्रापितमासीत्तन्मूलभूतंतमः महत्तत्वेनपीयते॥अन्यथानजगत्केनापिप्रकारेणाभिव्यक्तंस्यात्॥अस्यमहत्तत्वस्यमा
हात्म्यत्रयमुक्तं॥जगत्प्रकाशकत्वेनजगज्जनकत्वेनअतिसमर्थतमोनाशकत्वेनच॥त्रीण्यप्येतानिलक्षणानिकारण
गुणत्रयस्यसूचकानिसात्विकराजसतामसानिक्रमेणैव २० तस्याधिदैविकलक्षयतियत्तदिति॰तस्याधिदैविकरूपंवासुदेव
इति॥वासुदेवाविर्भावस्थानत्वात्॥वसुदेवेआविर्भवतीतिवासुदेवः॥विशुद्धंसत्वंवसुदेवः॥तदेवास्याधिदैविकंरूपंयत्सर्वो

विश्वमात्मगतंव्यंजन्कूटस्थोजगदंकुरः स्वतेजसापिबत्तीव्रमात्मप्रस्वापनंतमः॥ २० ॥
यत्तत्सत्वगुणंस्वच्छंशांतंभगवतःपदं॥यदाहुर्वासुदेवाख्यंचित्तंतन्महदात्मकं २१ ॥

पास्यत्वेनप्रसिद्धंतदेवैतत्॥सत्वंगुणोयस्य॥सत्वस्यापिसत्वं॥तस्यरूपत्रयमाहसच्चिदानंदत्वाय॥तत्रसद्रूपतामाह॥स्व
च्छमिति॥स्वच्छमितिनिर्मलं॥शांतंचिद्रूपं॥ज्ञानमेवहिशांतरूपं॥भगवतःपदं॥पुरुषोत्तमस्यपरमानंदरूपं॥एवंसच्चिदा
नंदरूपंसत्वस्यसत्वंतच्चित्तं॰सर्वेषुप्राणिषुचेतनारूपेणस्थितं॥तस्योपासनार्थंनामांतरमाह॥यदाहुर्वासुदेवाख्यमितिवा =
सुदेवइत्याख्यायस्य॥वासुदेवशरीररूपत्वात्वासुदेवाधारत्वाद्वायस्मादितिविग्रहः॥आहुरितिप्रमाणं॥ननुचित्तस २९ एम॰ ३४०
तादृशस्योत्पत्तिर्नोक्तेत्याशंक्याह॥तन्महदात्मकमिति॥महत्तत्वरूपमेवचित्तंतेनमहदुत्पत्त्यैवतस्योत्पत्तिरुक्तेत्यर्थः

[illegible]
आधिभौतिकंलक्षयति॥स्वच्छत्वमिति॥स्वच्छत्वंनिर्मलत्वंअविकारित्वंसर्वविकाररहित्यं॥शांतत्वंज्ञानरूपत्वं॥बुद्धिमनो
हंकारबुद्ध्यासार्धंत्रीणिविशेषणानि॥बुद्धिर्ज्ञानरूपाविषयाकारेतिनस्वच्छा॥चित्तंतुनिर्विषयंकेवलात्मावबोधरूपमिति
स्वच्छं।मनसस्तुविकारात्मकत्वंस्पष्टमेव शांतत्वंनाहंकारस्य॥सात्विकाहंकारस्यतथात्वेपिपदार्थस्यैकत्वात्शांतघोर
विमूढत्वात्केवलशांतत्वंव्यावर्त्यतएव॥अतएवचेतसोवृत्तिभिर्लक्षणंप्रोक्तं॥नेताहृत्त्रयअहंकारादेर्भवंति॥ननुचि
त्तमपिबुध्यादिभिर्विषयग्रहणेकलुषितंजायतेअन्यथानन्निरोधेयत्नोनकर्त्तव्यःस्यादतआह॥यथापामिति॥यद्य
पिफेनतरंगादयोप्ययांभवंतितथापिनतासांसहस्वभावोयंकिंतुवाय्वादिकृतंस्वभावतोनिर्मलमेव॥अतएवपराप्रकृति
रपांस्वच्छत्वंलक्षणंत्वकृत्रिमं औपाधिकास्तुकृत्रिमाः॥नहिकदाचिदपिपृथिवीनिर्मलाभवति॥वायुर्वाविकाररहितोभव

स्वच्छत्वमविकारित्वंशांतत्वमितिचेतसः॥वृत्तिभिर्लक्षणंप्रोक्तंयथापांप्रकृतिःपरा २२ महत्तत्वाद्वि ९

ति॥तेजोवाशांतंभवति॥अतस्तत्संबंधेअ(कुर्वाणाद्भगवद्वीर्यसंभवात्॥क्रियाशक्तिरहंकारस्त्रिविधःसमपद्य ॥८
पांतद्भावापत्तिः॥२२॥अहंकारस्योत्पत्तिपूर्वकंपूर्ववल्लक्षणान्याह॥महत्तत्वादितिचतुर्भिः विकुर्वाणात्कार्योन्मुखात्का
लेनहिगुणक्षोभेविकृतंसत्कार्यमुत्पादयति॥नकेवलंविकारमात्रेणकिंत्वंतर्भगवच्छक्तिरपिसर्वजनिकापेक्षते।तदाह॥
भगवद्वीर्यसंभवादिति॥भगवद्वीर्यस्यसंभवोयस्मिन्॥नहिजलेमथ्यमानेतत्राविद्यमानंघृत[illegible]मुत्पद्यते॥किंतु
दुग्धेदध्निवा॥अनेनेवदेवेनाशिकप्रक्रियानिराकृता॥अन्यथासर्वस्मादेवसर्वंजायेत॥स्वभावस्यनियामकत्वेतुस्वभावस्या
पिअन्यथात्वेपिप्रमाणंवक्तव्यं॥अचेतनानांहिस्वतैनियंतुंशक्याः॥ईश्वरएवकेवलमनियम्यः॥शास्त्रतःस्वभावस्यान्य
थाभावोपिनोपपद्येत॥पटाद्दीतंत्वादिसामग्रीचिंतामण्यादयश्चकारणत्वेनकल्प्यमानाःव्यभिचारिणःस्युः॥अतोभगवच्छक्तिरे
केवसर्वभवनरूपाप्रतिनियतासमुदायंप्रत्येकंवायत्रैवावतिष्ठतेभगवान्नियमात्ततएवोत्पद्यतइतियुक्तं॥भगवानेवतन्मा

२३ ॥

Indira Gandhi National
Centre for the Arts

त.मु.२६ ३४१

आध्यात्मिकस्वरूपमिव तान्भेदान्गणयति॥ वैकारिक इति॥ वैकारिकः सात्विकः तैजसो राजसः तामसश्च॥ आध्यात्मिके गुण एव स धर्मो लक्षणानि यत स्त्रिविधस्तमनस इंद्रियाणां भूतानां च संभवः॥ महतामिति॥ तन्मात्राणां महतामपि इति कार्यजननमपि लक्षणं॥ मनः प्रभृति कार्यजनकत्वादिगुणवत्त्वं वा लक्षणमव्यभिचारात्॥ २४॥ आधिदैविकं लक्षयति॥ सहस्रशिरसमिति॥ यथा पूर्वं वासुदेवः तथात्र संकर्षणः स्वभावतोयं तामसः प्रलयकर्मा च॥ अहंकारेणोत्यादितं नाशकमेव॥ तस्मान्नैकधोत्पत्तिज्ञापनार्थं देवतायामनंतानि शिरांसि निरूप्यंते॥ सहस्रशिरसमिति मुखभेदो वा सहस्रसंमितः स्व॥ तस्मान्नैकधोत्पत्तिज्ञापनार्थं ... अनंतशब्दः काले संकर्षणे शेषे च प्रवर्त्तते॥ अनंतो लोक इति श्रुतेः॥ अत एवाहंकारेण कालनिरूपित कर्माणि सफलान्यनंतानि॥ अनंतशब्दः काले संकर्षणे शेषे च प्रव

वैकारिकस्तैजसश्च तामसश्च यतो भवः॥ मनसश्चेंद्रियाणां च भूतानां महतामपि २४ सहस्रशि
रसं साक्षाद्यमनंतं प्रचक्षते संकर्षणाख्यं पुरुषं भूतेंद्रियमनोमयं २५ कर्तृत्वं कारणत्वं च कार्य
११त्वं चेति लक्षणं॥ शांतघोरविमूढत्वमिति वा स्यादहंकृतेः २६ ॥

र्त्तते॥ प्रचक्षत इति प्रमाणं॥ सात्वतायं संकर्षणाख्यं प्रचक्षत इति संबंधः॥ साकाचिदन्या देवता भविष्यतीत्याशंक्याह॥ पुरुषमिति॥ पुरुष एव संकर्षणः॥ न मूल भूतः कालः॥ तस्य त्रिधाहंकाराधिष्ठातृत्वाय रूपत्रयमाह॥ भूतेंद्रियमनोमयमिति॥ तत्र विद्यमानानि भूतेंद्रियमनांसि कार्ये आविर्भवंति॥ मयट् प्रत्ययः प्रत्येकमभिसंबध्यते॥ प्राचुर्ये चायं २५ आधिभौतिकं लक्षयति॥ कर्तृत्वमिति॥ कर्तृत्वं प्राणिषु विद्यमानाहंकारस्य सात्विकस्य लक्षणं॥ कारणत्वं राजसस्य॥ कार्यत्वं तामसस्य॥ एतद्धर्मपुरःसरं लक्षणं॥ धर्मिपुरःसरमाह शांतघोरविमूढत्वमिति॥ शांतत्वं सात्विकस्य स्वरूपलक्षणं॥ अत एवाहंकारेण शांतिरप्र योजिका॥ घोरत्वं राजसस्य॥ विमूढत्वं तामसस्य॥ निरहंकारस्यनैते भावा उत्पद्यंते॥ अत एव भगवत्परः त्रितयविल क्षणो भवति॥ वेति विकल्पार्थः॥ अहंकृतेरहंकारस्य भौतिकस्य दुर्बलत्वात्स्त्रीत्वं २६ श्रीगोपालाय नमः ॥ एम० ३४१

मनस उत्पत्तिमाह वैकारिकादिति द्वयेन॥ अर्द्धेनोत्पत्तिः आध्यात्मिकलक्षणं चार्द्धेन चरणत्रयेणाधिदैविकलक्षणं॥ चरणं चान्यत्॥ वैकारिकात्सात्विकाद्विकुर्वाणात्कालकृतगुणक्षोभयुक्तात् भगवद्वीर्यसंभवादिति सर्वत्रानुसंधेयं सात्विकस्य विकारेण भविष्यतीत्याशंक्य पुनरुक्तं विकुर्वाणादिति मनसोऽदुष्टत्वमन्नमयत्वं चाशंक्यत त्रिएकरणार्थं तत्त्वपद प्रयोगः॥ मनस्तत्वमजायतेति तस्यापि आध्यात्मिकस्य कार्यस्वरूपलक्षणे आह यत्संकल्पविकल्पाभ्यामिति यत्संकल्पविकल्परूपत्वं स्वरूपलक्षणं कामजनकत्वं कार्यलक्षणमिति २७ आधिदैविकं लक्षयति यद्विदुरिति अनि

वैकारिकाद्विकुर्वाणान्मनस्तत्वमजायत॥ यत्संकल्पविकल्पाभ्यां वर्त्तते कामसंभवः २७ ॥
यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरं शारदेंदीवरश्यामं संराध्यं योगिभिः शनैः २८

रुद्धः पालकः तस्य देवस्य यतः न केनापि निरुद्धः स एव पालको भवति यद्यस्मात् हृषीकाणामिंद्रियाणामधीश्वरमनिरुद्धाख्यं विदुरिति संबंधः॥ इंद्रियनियामकत्वं तस्य लक्षणं॥ बलिष्ठत्वं प्रभुत्वं च॥ तस्मात्नौकारकणार्थमाधिदैविकलक्षणं॥ तत्रमती कारणार्थं भगवदुपासनेनैवेति कल्पयति॥ शारदेंदीवरश्याममित्युक्तं शारदेंदीवरं एत्रिविकाशि शरत्स्वसर्वदोषविवर्जितं श्यामः स्वगुणः श्यंगारात्मको भवति तेनत्वेहेन सर्वकालेषु सर्वदोषाभावेन भगवत्सेवायां मनोदोषा निवर्त्तंत इत्युक्तं॥ भौतिकं लक्षयति॥ योगिभिः शनैः संराध्यं वशीकरणयोग्यं मनः॥ देवतानुशासनके एएध्यादी कालादरनैरंतर्याणां सर्व
वमननहेतुत्वेन निरूपणात् २८ ॥

Indira Gandhi National
Centre for the Arts

तमु॰ २६ ३४२

उद्दे२

बुद्धेरुत्पत्तिमाह॥तैजसादिति तुशब्दः सात्विकोत्पत्तिपक्षं व्यावर्त्तयति विकुर्वाणाद्यात्तैजसाद्बुद्धितत्वमभूत्॥ सतीतिसंबोधनं तै जसत्वेपि सद्बुद्धिरेवोत्पद्यत इति निरूपणार्थं सतिविशेषत एकैव बुद्धिरुत्पद्यत इति॥ अतएवासौ आधिदैविकं रूपं न निरूप्यते आ ध्यात्मिकं लक्षयति द्रव्यस्फुरणविज्ञानमिति यथेंद्रियप्रेरकत्वं मनसः तथेंद्रियानुग्राहकत्वं बुद्धेः॥ बुध्यैवानुगृहीतानींद्रियाणि पश्यंति कुर्वंति च अतएव बुद्धितारतम्येन ऐंद्रियज्ञानक्रिययोस्तारतम्यं। एतत्कार्यानुसारिलक्षणं॥ द्रव्यस्फुरणविज्ञानमिति स्वरूप लक्षणं द्रव्यस्यघटादेः स्फुरणोसतिशब्देन संस्कारेण आलोकेन वायद्विशिष्टज्ञानं यस्मात्केवलं चक्षुष्मात्ज्ञाने तारतम्यं न स्यात् स्वतः स्फु रणं योगजधर्मादिभिरपिभवति अतो द्रव्यस्फुरणएव विज्ञानं बुद्धेर्लक्षणं २९ आधिभौतिकं विभागनिरूपणेनैव लक्षयति॥ सं

तैजसात्तु विकुर्वाणाद्बुद्धितत्वमभूत्सति॥ द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः २९ संशयोथ

विपर्यासो निश्चयः स्मृतिरेव च स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३० ॥

शय इति द्रव्यस्फुरणतारतम्यात् वृद्धिर्नानाविधा॥ संस्कारतेजसोः तुल्यप्रकाशकत्वे विशेषास्फूर्तौ मिथः संशयः अल्पविशेषस्फूर्तौ उ त्कटकोटिकः॥ विपर्यासः संस्कारप्राबल्यात्तेजस्तेनुगुणमेवधर्मं प्रकाशयति अथैतेकस्फुरणनियामकत्वाय विपर्यासे भिन्ना र्थप्रतिपादकः क्रियाज्ञानयोश्च भिन्नविषयत्वं अनेनान्यख्यातिरेव सिद्धांत इत्युक्तं॥ अन्यथात्वेयथार्थत्वं स्यात् रजतम हं जानामीत्येवानुभवो न तु रजतत्वेन जानामीति बुद्धेस्तत्वरूपत्वान्नात्मख्यातिः॥ संस्कारशब्दयोः पदार्थमात्रापेक्षितत्वान्न देशकालादिवैशिष्ट्यं नियामकं रजतमनुभवामीत्यनुव्यवसायात् न प्रमुष्टतत्तारूपा स्मृतिः॥ एकज्ञानतुल्यत्वाच्च न ज्ञानद्वयं सं

विवेकन्यायाभावे पदार्थ ... एव तत्

आत्मख्यातिरसत्ख्यातिरख्यातिरन्यथाख्यातिरन्या॥ अनिर्वचनीयख्यातिरित्येता ख्यातिपंचकं मतं वा॥ ३

संस्कारालोकयोः संस्कारानुगुणं

बुद्धितत्वा...

एम॰ ३४२

प्रमाणिकाः

उपाधिविभागः २

स्कारप्राबल्यात् न त्वनिर्वचनीयरजतापेक्षा अतएव नासत्ख्यातिः तस्मादन्यख्यातिरेव सर्वजनीना निश्चयो यथार्थानुभवः अर्थो हि ज्ञा नस्यार्थभंगं अतएव स्मृतिर्न निश्चयात्मिका अर्थाभावात्॥ अनुमितिरपि संबंधिव्यवधानेनार्थजनितैव सादृश्यं चरूपादिवत्पदा र्थो धर्मरूपः निरूपकभेदस हि तत्र भुः तद्धर्मसजातीयो वा सलक्षणत्वेन ज्ञायते द्रव्यस्फुरणेन स्फुरितः संस्कारेण शब्दाभिव्यक्तो वाक्य प्रमाणं पादध्यवसीयते गवयो यमिति चक्षुः सहकारि वाक्यं वाक्यसहकृतं सादृश्यं वा। अनुग्राहकाणां प्रमाणांतरत्वं। शब्दोपि निश्चय ए वधर्मसादृश्यातिरिक्तसंस्कारजनकत्वात् शब्देन च द्रव्यस्फुरणात् चक्षुषोपेक्षाभावात् प्रमाणांतरं॥ त्रीण्येव प्रमाणानि इंद्रियाणि शब्दो मनश्चेति चक्षुः श्रोत्रं मनो वा स्पर्शादीनां अन्यशेषत्वं। मनस्तु योगजधर्मसहितमेव प्रमाणं॥ अन्यत्रत्वप्रमाणं अतएव स्मृतिर प्रमाणं। संघाताज्ज्ञानं चाप्रमाणं। विपर्ययरूपत्वात् स्मृतिः स्वतंत्रा बुद्धिः संस्कारजनिका॥ स्वापः स्वप्नरूपः भिन्नसृष्टिविषयत्वात् न प्र र्वोक्तेष्वंतर्भावः॥ सुषुप्तिस्तु न बुद्धिः मौढ्यत्वेन परं बुध्यवस्था॥ आत्मनः स्फुरणं तु स्वतः स्वप्नभेद एव वा निद्रानिमित्तत्वात् एवं पंच

७ धा बुद्धेर्वृत्तितः लक्षणं पृथक् ज्ञेयमित्यर्थः॥ अनेन भयमेकं जानामीति पक्षो निवारितः॥ अतइदं शेषपि रजतमिति ज्ञानमप्रमा णं॥ न हि ज्ञाने अंशोलिंसो यं देवदत्त इत्यनुभव एव अभ्यासज्ञाने पूर्वज्ञानसंस्कारवत् पूर्वस्मृतिरपि च चक्षुषः सहकारिणी। अप्रम माप्रमूहावलंबनं एकदेशविकृतमनन्यवद्भवतीति न्यायेन भ्रमाधिक्ये विपर्यय एव प्रमाधिक्ये निश्चयः॥ समानरूपत्वे तु संभावना संशयः॥ संभावनादीनां संशयांतःपातित्वमप्रमाणमेव॥ ततसिद्धार्थवाक्येनुप्रत्यक्षसहकारित्वात् प्रत्यक्षहेतुत्वमेव॥ साध्यार्थे तु लौकिके वाक्यार्थे बुद्धिकल्पित इति प्रमाणाभावेनाप्रमाणेपि प्रमेयबलात् प्रमाणमेव लोके वाक्यार्थो नापूर्वः॥ वक्तृज्ञानविष यिविषयत्वात् तद्बोधनसमर्थपदसमूहस्यैव प्रयोगात् पदेभ्यः पदसमूहो भिन्नः स एव वाक्यार्थे करणं अन्यथा पदेष्वतिद्वय मापद्येत । पदार्थकरणपक्षे तु वाक्यार्थः शाब्दो न स्यात् संभावितं सर्वमेवाप्रमाणमित्यग्रे वक्ष्यते ३० ॥

Indira Gandhi National Centre for the Arts

त्भ०२६ ३४२ एवमंतःकरणचतुष्टयोत्पत्तिमुक्त्वा इंद्रियोत्पत्तिमाह॥ तैजसानीति॥ ज्ञानकरणकानि क्रियाकरणकानि च उभयविधान्यपि एजसा
न्येव ननु ज्ञानकरणकानि सात्विकानि क्रियाकरणकानि तामसानि वा ज्ञानक्रियान्यतरकरणमिंद्रियमिति करणमंतींद्रियमिं
द्रियमितिवा॥ तत्वानि दशापि भिन्नानीति नैकं लक्षणं निर्दिष्टं॥ उभयेषां एजसत्वे हेतुमाह॥ प्राणस्य हीति क्रियायां प्राणो मूलं॥
ज्ञाने बुद्धिः॥ उभयं एजसमिति अर्थाद्युक्तं भवति प्राणो नाम सम्यः महत्तत्वभेदः भगवद्रूपो वा॥ एजसाहंकारे तु तस्यावतार इति न तत्वतः॥ ना
प्युत्पत्तिर्निरूपिता मतांतरसिद्धानां वैदिकानां वा प्राणानामत्र ग्रहणं॥ इंद्रियाणामध्यात्मिकरूपो वा प्राणः बुद्धिः एजस इति तदनुग्र

तैजसानींद्रियाण्येव क्रियाज्ञानविभागशः॥ प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३१

तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगं ३२॥

हीतानि सर्वाणि एजसानि॥ प्राणस्तु क्रियाप्रधान इति एजसत्वं॥ प्राणोपि सर्वेंद्रियानुग्राहकः॥ क्रियाजनिका शक्ति विज्ञानरू
पा शक्तिर्यस्याः तस्या बुद्धेर्भावः तत्त्वं ततश्च इंद्रियाणां लक्षणानि भिन्नानि ३१ भूतानां सृष्टिमाह तामसादिति तामसाहं
कारणत्पूर्ववद्विकुर्वाणात् तामसत्वादेव भगवद्वीर्येण प्रेर्यमाणेन तु भगवद्वीर्यसत्तामात्रं प्रथमतः शब्दमात्रमभूत्तस्मात्तस्मान्नभः
॥ शब्दे प्रमाणमाह श्रोत्रं तु शब्दगमिति॥ श्रोत्रस्य गम्यं॥ श्रोत्रस्य मधिगम्यः शब्दः शब्दधर्मा अपि शब्द एवेति लक्षणं नाति त्भ० ३४३
प्रसक्तं॥ श्रोत्रं गच्छतीति वा शब्दाधारणं नखलु तत्र तयागतिरिति ध्याहृतिः ३२ ॥ श्रीगोपालयनमः ॥

शब्दस्य लक्षणान्याह अर्थाश्रयत्वमिति॥ अर्थो हि शब्दमाश्रित्य तिष्ठति अर्थस्य घटपटादेः रूपत्रयं तत्र यदाधिदैविकं
रूपं तच्छब्दनिष्ठं शब्दैकसमधिगम्यं शब्देन नित्यसंबद्धं आधिभौतिकं तु प्रकटरूपं तस्य न शब्दाश्रयत्वं किंतु पृथिव्याद्याश्रि
तमेव आध्यात्मिकं तु ज्ञानेच्छाप्रयत्नाश्रितं त्रितयमभेदेन सर्वत्र लक्ष्यते शब्दस्यार्थाश्रयत्वं लक्षणं न त्वाकाशस्य लक्षणं
तदमाह दृष्टलिंगत्वमेव चेति॥ दृष्टस्य त्वर्थानां आध्यात्मिकं त्वर्थसंबंधित्वेन ज्ञापयति॥ यथा भित्तिव्यवहितो गजं दृष्ट्वा ग
जोयमिति वदति तदंतः स्थितो वाक्यप्रयोक्ता गजदर्शनवानिति लक्ष्यते॥ स्वरद्वारा देवदत्तोयमिति धर्मतो लक्षणं चकाराद्द्र
ष्टृज्ञापकत्वं च भौतिकमपि घटादिकं बोधयतीत्यर्थः॥ लक्षणांतरमाह॥ तन्मात्रत्वं च नभस इति॥ नभसः तन्मात्रत्वं सूक्ष्मरूपत्वं शब्दस्य
ज्ञापकत्वं च भौतिकमपि घटादिकं बोधयतीत्यर्थः॥ केचिदन्यथा मन्यंते इति स्वोक्ते प्रमाणमाह॥ कवयो विदुरिति ३३ आकाशलक्ष
लक्षणं सूक्ष्मावस्था शब्दः स्थूलावस्था नभ इति॥

अर्थाश्रयत्वं शब्दस्य द्रष्टृलिंगत्वमेव च॥ तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ३३ ॥

भूतानां छिद्रदातृत्वं बहिरंतरमेव च प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणं ३४ ॥

ति॥ भूतानामिति भूतानां प्राणिनां छिद्रदातृत्वं बहिरंतः स्वरूपत्वं॥ प्राणेंद्रियांतःकरणाधारत्वं चेति नभसो लक्षणत्रयं॥ छिद्रमव
काशः बहिरंतर्व्यवहार आकाशविषय एव पृथिव्यादेः आवरणरूपस्य न बहिरंतर्व्यवहारविषयत्वं परिच्छेदकत्वं परं प्रदेशोपि न व्यवहा
रहेतु तुल्यत्वात् विवरे च व्यवहारः॥ अत आकाशस्यैव चकारात् पृथिव्यादिसर्वाधारत्वं च लक्षणं॥ लक्षणांतरमाह प्राणेंद्रियात्मधिष्ण्य
त्वमिति प्राणानामिंद्रियाणामंतःकरणस्य च धिष्ण्यमाधारभूतं स्थानं॥ धिष्ण्यशब्देन वैदिकत्वं तस्य स्थानस्य द्योतितं॥ नभसो वृत्ति
लक्षणमिति नभो हि त्रिधा वर्त्तते॥ स्वस्याधिभौतिकं रूपं प्रयच्छतीति आधिदैविकत्वं॥ बहिरंतर्व्यवहाराश्रयत्वमित्याध्यात्मिकत्वं॥
देहांतः स्थितपदार्थाश्रयत्वेन भौतिकत्वं ३४ ॥

Indira Gandhi National
Centre for the Arts

तं.सु.२६ ३४४ स्पर्शवायोरुत्पत्त्यादिकमाह॥नभसइति शब्दतन्मात्रादिकेनविशेषणं॥किंतुस्थूलात्सूक्ष्मादपिनभसःस्थूलंसूक्ष्मंकार्यंभवतीतिज्ञापनार्थं॥कालगत्याविकुर्वतइति कालप्रेरणयाजातगुणक्षोभादितुभयोर्विशेषणं॥प्रथमंस्पर्शतन्मात्राअभवत्ततोवायुःत्वगिंद्रियंस्पर्शस्यसंग्रहोयस्मात्त्वगेवसंग्रहः॥चकाराद्द्वयोरपिनतुश्रोत्रवच्छब्दमात्रग्राहकं ३५ स्पर्शभेदाएवप्रत्यक्षसिद्धाःस्पर्शलक्षणानीतितानगणयति मृदुत्वमिति स्पर्शश्चतुर्विधः।मृदुत्वंकार्पासादौ॥कठिनत्वंपाषाणादौ॥

नभसःशब्दतन्मात्रात्कालगत्याविकुर्वतः॥स्पर्शोभवत्ततोवायुस्त्वक्स्पर्शस्यचसंग्रहः ३५
मृदुत्वंकठिनत्वंचशैत्यमुष्णत्वमेवच एतत्स्पर्शस्यस्पर्शत्वंतन्मात्रत्वंनभस्वतः ३६ ॥

शैत्यंशीतलताउष्णत्वंचेति॥एतच्चतुर्विधंकारणरूपमेवकार्यएकैकंअभिव्यक्तं॥उष्णत्वंतेजसि॥शीतलत्वंजले॥पक्वपृथिव्यांकठिनत्वं॥अपक्वेमृदुत्वमिति॥एतत्स्पर्शस्यस्पर्शत्वमिति॥स्पर्शोनामस्पृश्यतइतिव्युत्पत्त्यास्पर्शेंद्रियग्राह्यत्वे वायावपिस्यात् व्याकरणदोकादृयोपिस्पर्शाः॥संयोगोपिस्पर्शइतिलोकः॥तदेकमप्यस्माकंविवक्षितंनभवति॥ एम॰ ३४४
किंतुयदेवास्माभिरुक्तंमृदुत्वादिकंतदेवस्पर्शस्यस्पर्शत्वं॥लक्षणांतरमाह॥तन्मात्रत्वंनभस्वतइति॥नभस्वतोवायोःतन्मात्रत्वंसूक्ष्मरूपत्वं ३६ ॥ ॥

वायोर्लक्षणमाह॥चालनमिति॥वायोःकर्मलक्षणं॥तत्कर्मपंचविधमितिपंचलक्षणानि॥चालनंशाखादेः॥व्यूहनंपतितत्तृणादेःवात्यायेवमेलनं॥प्राप्तिर्गंधस्यघ्राणप्रापणं॥द्रव्यशब्दयोर्नेतृत्वं॥देशांतरस्थितवस्त्रादेर्देशांतरेनयनं॥शब्दश्चभेरीदंडसंयोगेजातःकर्णशष्कुलीपर्यंतंस्वभावतोगच्छतितत्प्रतिकूलवायोनगच्छतिनिकटेपिनश्रूयते॥अनुकूलेतुदूरादपिश्रूयतइतिशब्दस्यापिदेशांतरप्रापणं॥सर्वेषामिंद्रियाणामात्माचायं॥एतदभावेकिमपींद्रियंनकार्यक्षमंभवतीति॥एतत्पंचविधंवायोःकर्मतःअभिलक्षणं ३७ तेजसउत्पत्तिमाह॥वायोरिति पूर्ववत्स्पर्शतन्मात्रादिति रूपतन्मात्रंदैवेनकालेनईरितादितुभयोर्विशेषणं॥प्रथमतोरूपं

चालनंव्यूहनंप्राप्तिर्नेतृत्वंद्रव्यशब्दयोः॥सर्वेंद्रियाणामात्मत्वंवायोःकर्माभिलक्षणं ३७ वायोश्च
स्पर्शतन्मात्राद्रूपंदैवेरितादभूत्॥समुत्थितंततस्तेजश्चक्षूरूपोपलंभनं ३८ द्रव्याकृतित्वं
गुणताव्यक्तिसंस्थात्वमेवच तेजस्त्वंतेजसःसाध्विरूपमात्रस्यवृत्तयः ३९ श्रीगोपालयनमः

समुच्छ्रितं॥ततस्तेजःचक्षुस्तुरूपोपलंभनं॥रूपमुपलभ्यतेऽनेनेतिरूपेप्रमाणमुक्तं॥३८॥रूपस्यलक्षणान्याह॥द्रव्याकृतित्वमिति॥द्रव्यस्यघटादेःयाआकृतिःसैवरूपस्य॥पृथुबुध्नोदराकारंरूपमपि॥अतोनविताना॥तत्मकंच॥द्रव्यस्यैवाकृतिरितिद्रव्यस्यतुनोपमेयत्वं॥अतोरूपस्यैवलक्षणं॥गुणत्वात्सर्वदोपसर्जनतयाप्रतीतिः॥नैवंशब्दादिषुस्वतंत्रतयापिप्रतीयमानत्वात् व्यक्तेःसंस्थाएवसंस्थायस्य॥यद्व्यक्तिर्वक्राभवेत्तद्रूपमपिवक्रंभवेदिति॥उपविष्टेरूपवतिउपविशतिरूपमुपविष्टंभवति॥आतानविताना त्मकसंकुचीकरणयोर्भेदात्तेजसश्चतेजस्त्वंरूपतन्मात्रत्वंसूक्ष्मावस्थेत्यर्थः॥साध्वीतिसंबोधनंरूपस्यामोहार्थं॥रूपमात्रस्यसर्वगतरूपस्यवायतत्वात्त्वयः॥ ३९ ॥ ॥

Indira Gandhi National
Centre for the Arts

तत्त्व-२६
३४५

तैजसोलक्षणान्याह॥ द्योतनंप्रकाशनंसूर्यादेरिव॥ पाचनमौदर्यवह्नेःपाककरणंवावह्नेः पानंजलादेः तेजोव्यतिरेकेणनान्यःपिवति॥ अदनंभक्षणं॥ अन्नाग्नेरिवहिममर्दनंहिमदूरीकरणं शोषणंचेतितेजसः पंचवृत्तयःपंचकार्याणि॥ तत्रत्रयंप्रत्यक्षसिद्धं॥ द्योतनंपाचनंहिममर्दनमिति शोषणंचानुमीयते॥ वाय्वपेक्षया आतपेवस्त्रादिषुजलाकर्षणस्यशैघ्र्यात् र्पनमदनंचन तेजः कार्यंचेतनकर्तृत्वात्क्षुत्पिपासाभ्यामेवतज्जननाच्चेत्याशंक्याह क्षुत्तृडेवचेति॥ क्षुत्तृड्रूपंतेजएव॥ अतःपानमदनंचतस्यैवकार्यमितियुक्तमित्यर्थः ४० जलस्योत्पत्तिमाह॥ रूपमात्रादिति॥ रूपमात्रात्तैजसःविकुर्वाणात्तदैवनोदितादित्युभयोर्विशेषणे॥ प्र

द्योतनंपाचनंपानमदनंहिममर्दनं॥ तैजसोवृत्तयस्त्वेताः शोषणंक्षुत्तृडेवच॥ ४०॥ रूपमा
त्राद्विकुर्वाणात्तैजसोदैवनोदितात्समात्रमभूत्तस्मादंभोजिह्वारसग्र ४१ कषायोम
धुरस्तिक्तःकद्वम्लइतिनैकधा॥ भौतिकानांविकारेणरसएकोविभिद्यते ४२॥ ॥

यमतोरसमात्रमभूत्तस्मादंभःजिह्वारसंगृह्णातीतितयारसेजिह्वैवप्रमाणं ४१ रसानांभेदकथनेनैवलक्षणमाह॥ कषाय इति॥ कषायःखदिरादिः॥ मधुरोगुडादिः॥ तिक्तोनिंबादिः॥ कटुर्मरिचादिः॥ अम्लःतिंतिणयादिः॥ इतोप्यनेकप्रकारोस्तीत्याह॥ इतिनैकधेति॥ एवमनेकप्रकारोभवतीत्यर्थः॥ ननुयदिरसःस्वभावत एवंविधः स्यात् जलेप्युपलभ्येत॥ मधुरःपाकादिनातिक्तश्चनभवेत्तत्राह॥ भौतिकानांविकारेणेति॥ एकएवरसःभौतिकानांपृथिव्यवयवानांसं एम०
श्लेषात् अनेकधाभिद्यते॥ वस्तुतस्तु अव्यक्तमधुरएवरसः ४२ ॥ ३४५

अथांभसोलक्षणान्याह॥ क्लेदनमिति॥ क्लेदनमार्द्रीकरणंवस्त्रादेः पिंडनंचूर्णीभूतानांपिंडतासंपादनं॥ यथासक्तूनां॥ तृप्तिः क्षुधादिनिवृत्त्यापुरुषसंतर्पणं॥ भुक्त्वापिजलेअपीतेनतृप्तोभवतीति॥ प्राणनाप्यायनंप्राणनंजीवनंआप्यायश्चप्राणसंतर्पणं उदनंप्रेरणं-जलेनहिपदार्थाः प्रवाहेणनीयंतेकूलादिश्चपात्यतइति॥ तापापनोदःसंतापदूरीकरणं॥ भूयस्त्वंएकस्मिन्देशेसजातीयप्रचुरतमैवावस्थानं॥ यद्वा॥ यत्रापः प्रविशंतितद्भूयोभवतीति अंभसइमाअष्टौवृत्तयः ४३ पृथिव्याउत्पत्तिमाह॥ रसमात्रादिति स्थूलसूक्ष्मादंभसःक्षुभितगुणात्कालप्रेरितात्प्रथमतोगंधमात्रमभूत्॥ तस्मात्पृथ्वीघ्राणंइंद्रियंगंधग्राहकमितिप्रमाणं ४४ गंधस्यभेदानाह॥ करंभेति॥ करंभोमिश्रगंधः॥ व्यंजनादिषुप्रसिद्धः॥ पूतिर्दुर्गंधः॥ सौरभ्यंचंदनादिगंधः॥ पूतिसौरभ्य

क्लेदनंपिंडनंतृप्तिःप्राणनाप्यायनोदनं॥ तापापनोदोभूयस्त्वमंभसोवृत्तयस्त्विमाः ४३ रसमा
त्राद्विकुर्वाणादंभसोदैवनोदितात्॥ गंधमात्रमभूत्तस्मात्पृथ्वीघ्राणस्तुगंधगः ४४ करंभपूति
सौरभ्यशांतोग्राम्लादिभिःपृथक्॥ द्रव्यावयववैषम्यात्गंधएकोविभिद्यते ४५ ॥

योरवशांतोग्रौभेदौ॥ शतपत्रादिगंधःशांतः॥ उग्रः चंपकादेः लसुनादेश्च॥ अम्लः पर्युषितसूपादेः॥ आदिशब्देनधूपादीनामनेकविधोगंधउक्तः॥ गंधादीनांनजातित्वंकथंकिंतुतेभेदाः पृथगेव॥ चित्ररसइवचित्रगंधस्याभावात्॥ सजातीयरसस्यगंधस्यवाकारणगंतस्यानभिव्यक्तस्यकार्येरसगंधजननात्॥ अतएवहरीतक्यादेरपिरसोमिश्रः॥ धूपादेश्चगंधः॥ अवांतरएनंतंनदोषाय॥ अन्यथापदार्थविभाजकोपाधीनांपंचविंशतिभेदानस्युः॥ एतदाह॥ पृथगिति॥ तत्रहेतुमाह॥ द्रव्यावयवेति॥ द्रव्यस्याधारभूतस्यये ऽवयवाः ते विजातीयरसगंधवंतइतिगंधोपिभिद्यते॥ अथवा॥ यथायोजिताः अवयवाः गंधमुत्पादयंति॥ स्वभावतः सुरभिताचेत् विषमायोजिताभवंतितदातंगंधंनोत्पादयंतीतिगंधनाशः ... वैषम्यात्तेनैकविधत्वात्तज्जातादीनांवहूनांतत्संख्यादृष्टान्तात्‌
तद्गंधांतरमेव॥ तदाह॥ एकोपिभिद्यतइति॥ ४५ ॥

National Centre for the Arts

त०सु२६ ३४६

पृथिवींलक्षयति॥भावनमिति॥पृथिव्याः पंचवृत्तयः स्वभावतः॥आधारभूताभवंति॥आधेयभूताचदेहवृक्षादिरूपा तेषांकारण
भूताचप्रतिमारूपाचमनसोपासनार्थंकल्प्याच॥एवंपंचविधंभवति तत्रभावनंमानसं॥ब्रह्मणः स्थानंप्रतिमा धारणंस्थूल॥
सतांघटादिपदार्थानांविशेषणंनानाविधकारणरूपता॥सर्वेषांसत्वानांजीवानांयेगुणाः स्थूलसूक्ष्मनीलपीतादिभेदायस्मात्
॥अथवा॥ब्रह्मणोभावनंप्रतिमा स्थानंजलादीनां॥धारणमाधारत्वंअनियतंसर्वेषांभवति॥स्थानंनियतमितिविशेषः॥
सतामाकाशादीनांअवच्छेदकत्वं॥सर्वेषांसत्वानांप्राणिनांतत्तद्गुणानांपुंस्त्वादीनामुद्भेदः परिणामविशेषैः प्रकटीकरणं॥
वस्तुतस्तुपूर्वमुत्पन्नायाः पृथिव्याएतानिलक्षणानिजलादिभ्योव्यावृत्तानिवक्ष्यामि॥प्रतिमाचित्रादेश्चाकृतिमात्रेणभव

भावनंब्रह्मणः स्थानंधारणंसद्विशेषणं सर्व
सत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणं ४६

तीति॥ब्रह्मणइतिवैयधिकरण्यंस्यात्॥नापिस्थानंपृथक्क्रयास्थितंतत्सूर्यादेरपिसंभवतीतिनपृथिव्याविशेषलक्षणं॥
तस्माद्भावनंसर्वरूपापादकत्वंसर्वमेवभावयतीति॥ब्रह्मणः शब्दब्रह्मणः परब्रह्मणश्चहृदयकंठादिस्थानरूपत्वं॥
धारणंसर्वस्यापिजगतः सतांसर्वेषामेवतत्वानांविशेषणंआवर्तकंअवयवभूतंवाकाष्ठादावग्निंप्रकटीकृत्यइत
रव्यावृत्तिंजनयति॥इतरथातेजसः स्वरूपमेवव्यापिनाभिव्यक्तमितिकुतोव्यावृत्तिर्भवेत्॥एवंजलमपित्वांतर्गतं
रसरूपंनद्यादौप्रकटीकृत्यप्रदर्शयति॥एवंव्यजनादिनावायुंगर्तादिनाआकाशं॥शरीरएवअहंकारादिसर्वाणी
वेंद्रियाणिप्राणानंच॥किंच॥सर्वसत्वानांजीवानांयावंतोगुणाः आब्रह्मस्तंबपर्यंतंभेदाः तेषामुद्भेदः

पृथिव्यादि ४७ ॥

एम० ३४६

श्रोत्रादीनांशब्दादिग्राहकत्वंप्रमाणत्वेनोक्तंतद्वत्तेषांलक्षणानीत्याहसार्द्धद्वाभ्यां॥नभोगुणइति॥तन्मात्ररूपोविशब्दः आकाशस्य
गुणभूतोभवति॥यथाकार्यकारणप्रतीतिः॥पटेतंतुप्रतीतिवत्॥तथाआकाशस्यशब्दोगुणः॥एवमग्रेपि॥नभोगुणः शब्दः नतुसंयो
गादिरूपः सएवार्थोविषयोयस्यतच्छ्रोत्रं॥उच्यतइतिप्रमाणं॥अनेनान्येव्याख्याताः॥वायोर्गुणविशेषः स्पर्शः॥तेजोगुणविशेषोरूपं
॥अंभोगुणविशेषोरसः॥एवंभूमेर्गुणविशेषोगंधः ४८ कारणानुप्रवेशात्उत्तरोत्तरंधर्माधिक्यमाह॥परस्येति॥परस्यकारण
स्यधर्मः अपरस्मिन्कार्यकारणसमन्वयात्धर्मोदृश्यते॥अतः स्वधर्मः कारणधर्मश्चकार्येभवति॥सर्वेपिविशेषाः पंचापिगुणाः अं
तिमकार्येपृथिव्यामेवेत्याह अतोविशेषइति॥सांख्यशास्त्रात्नास्यविशेषतः सर्वबोधकत्वं॥वीणादिशब्दः वाग्निमित्तकइतिकार

नभोगुणविशेषोर्थोयस्यतच्छ्रोत्रमुच्यते॥वायोर्गुणविशेषोर्थोयस्यतत्स्पर्शनंविदुः॥४७॥तेजोगुणविशेषोर्थोयस्य
तच्चक्षुरुच्यते॥अंभोगुणविशेषोर्थोयस्यतद्रसनंविदुः॥भूमेर्गुणविशेषोर्थोयस्यतद्घ्राणमुच्यते ४८ परस्यदृश्यते
धर्मोह्यपरस्मिन्समन्वयात्॥अतोविशेषोभावानांभूमावेवोपलभ्यते ४९ एतान्यसंहत्ययदामहदादीनिसप्तवै॥
कालकर्मगुणोपेतोजगदादिरूपाविशत् ५०

णसंबंधेनतथात्वं॥चित्राणिचरूपाणिवरसाम्नानि॥सर्वेपिविशेषाभू
मावेवोपलभ्यते दृश्यते ४९ एवंतेषामुत्पत्तिस्वरूपलक्षणान्युक्त्वाकार्यजोपितानिवक्तुंतेभ्योब्रह्मांडोत्पत्तिमाह॥एता
नीति यद्यचेतनेभ्यएवतत्वेभ्यः कार्यमुत्पद्येततदातस्मिन्संघातेनात्मास्पर्शः स्यात्॥सर्वस्यैवब्रह्मकृतत्वात्॥अतः संघातस्य
चेतनसहितानामितिवक्तुंकेवलानामकारणत्वमाह॥एतानियदाअसंहत्यअमिलित्वामुख्यानिसप्तमहदादीनिस्थितानीत्य
र्थात्।तदाभगवान्कालमायापदृष्टसत्वादिगुणैर्मिलितः सर्वजगत्कारणभूतः एतान्युपाविशत्॥अत्रैवंवाक्यार्थबलाद्विस्थ्य
ते॥अथवा॥भगवानेवअसंहत्यएतानिनमेलयित्वापश्चादुपाविशदिति॥अग्रेउत्पद्यमानंजगत्यथाचतुर्मासमधीनंभव

ति आत्मकालकर्मस्वभावानां॥तदर्थंकालादिभिः स
हप्रवेशः ५० ॥

श्रीत्माः

त॰ मु॰ २६
३४७

ततोब्रह्मांडमुत्पन्नमित्याह॥ ततइति॥ ततः भगवत्प्रवेशानंतरं तेनभगवता अनुविद्धेभ्यः योजनार्थगुणान्गृहीत्वाल्लब्धेवविद्धेभ्यः प्रथमतः अचेतनमेवांडमुत्थितं॥ यस्मादंडादसौपुरुषः पूर्वंतत्वेषुप्रविष्टः सएवविराट्रूपोभूत्वाउदतिष्ठत्॥ ५१॥ ब्रह्मांडेचेतनाचेतनोत्पत्तिमुक्त्वातस्यनामस्वरूपेआह॥ एतदंडमिति॥ विशेषइत्यस्यनाम॥ स्वयंसर्वतःपंचाशत्कोटियोजनविस्तृतं॥ स्वतः ततः उत्तरोत्तरंपूर्वस्मात्दशगुणाद्वृद्धैःतोयादिभिः सर्वतःपरिवृतं॥ अंततः प्रधानेनचआवृतं॥ एवमस्यमहत्वंअत्रस्थितसर्वजगतः॥ भगवत्वेनापिमहत्वमाह॥ यत्रलोकवितानोयमिति॥ अयंसर्वोपिलोकविस्तारः भगवतोरूपं॥ तस्माद्देतद्भगवदाधारभूतं ५२ सवहुकालंपुरुषत्वसंपादनार्थंतस्मिंपुरिशयनंकृतवान्। पुरिशेतइतिपुरुषपदनिर्वचनात्यावदयंशयनंकृतवान्तावत्पूर्व

ततस्तेनानुविद्धेभ्योयुक्तेभ्योंडमचेतनं॥ उत्थितंपुरुषोयस्मादुदतिष्ठदसौविराट् ५१ एतदंडंविशेषाख्यंक्रमाद्वृद्धैर्दशोत्तरैः॥ तोयादिभिःपरिवृतंप्रधानेनावृतंबहिः॥ यत्रलोकवितानोयंरूपंभगवतोहरेः ५२ हिरण्मयादंडकोशादुत्थायसलिलेशयात्॥ तमाविश्यमहादेवोवहुधानिर्बिभिदखं ५३

मनुवेदरूपेणप्रविष्टाःभगवदंशाभोगंनप्राप्नुवंतः॥ यदानुपुनस्ततउत्थाय तस्मात्पृथग्भूतःसन्तत्रनिविष्टः तदासर्वांशानांभोगार्थंतत्रस्थानानिज्ञातानीत्याह॥ हिरण्मयादिति॥ प्रकाशबहुलात्सुवर्णमयात्सलिलेविद्यमानत्वात्नारायणशब्दवाच्यात्विराड्देहादुत्थायपुनःतमाविश्यसर्वत्रविद्यमानमाकाशंवहुधानिर्बिभेद॥ बहूनिछिद्राणिकृतवान्भगवदुत्थानेपिकोशस्यनाशाभावार्थंहिरण्मयत्वमुक्तं॥ रक्षांसांबाधभावार्थंसलिलेशयत्वमुक्तं॥ महादेवोहिअल्पनिरूप्योभवतीति॥ अलैः सहितः समर्थः तत्रशरीरेछिद्राणिकृतवान् पुनरपिप्रविष्टोयंभेदमात्रंकृतवानितिपुरुषत्वमेवस्थितंनानेनैवविराजःकार्यकरणसामर्थ्यं भवति यथार्थमासौभगवान्तिष्ठतितथैवायंस्थितइतिज्ञातव्यं॥ अन्यथातत्वेभ्यआत्मविवेकोनस्यात् ५३ ॥ ॥

त्म॰
३४७

ति॰ मध्यकेडभादीनं

स्य

छिद्राणांविनियोगमाह निरभिद्यतेत्याद्यष्टभिः॥ प्रथमतआस्यंनिर्भिन्नंविवरात्मकं॥ तस्यमुखमितिनाम॥ अस्येतिपाठः॥ प्रथममस्यमुखंनिर्भिन्नं॥ ततोवाणीवागिंद्रियंतत्राभवत्प्रविष्टं॥ वाणयासहवह्निरपितत्राभवत्॥ अथोछिद्रांतरेभिन्नप्रक्रमेणनासापुटेनिरभिद्येतांतयोर्घ्राणइंद्रियंनिर्विष्टं॥ तद्वदेवतयाविद्धमित्याह॥ प्राणोतइति॥ प्राणेनकृतःकृतःसंबद्धः उभयोरेकएवनिविष्टः॥ अयंप्राणःनेंद्रियदेवतारूपः किंतुसर्वनियामकः आत्मात्मकः ५४ तस्यतत्रकथनेपयोगमाह॥ प्राणाद्वायुरिति तस्मात्प्राणाद्वायुः इंद्रियदेवतारूपःनिरभिद्यत॥ भगवत्कृतस्यसोअश्विनीकुमारौइंद्रियदेवते भगवदर्थस्यसोतुवायुरितिविशेषः

निरभिद्यतास्यप्रथमंमुखंवाणीततोभवत्॥ वाण्यावह्निरथोनासेघ्राणःप्राणोतएतयोः ५४ प्राणाद्वायुरभिद्येतामक्षिणीचक्षुरेतयोः॥ तस्मात्सूर्योन्वभिद्येतांकर्णौश्रोत्रंततोदिशः ५५ निर्बिभेदविराजस्त्वकूरोमस्मश्र्वादयस्ततः॥ ततओषधयश्चासन्शिश्नंनिर्बिभिदेततः ५६ रेतस्तस्मादापआसन्निरभिद्यतवैगुदं॥ गुदादपानोऽपानाच्चमृत्युर्लोकभयंकरः ५७

ततअक्षिणीगोलके॥ उभयोरपिचक्षुरित्येकमिंद्रियं॥ तस्मात्सूर्यआविर्भूतः कर्णावन्वभिद्येतांततःश्रोत्रंततोदिशः ५५ विराजस्त्वकूनिर्भिन्नानिर्बिभेदआविरभूदित्यर्थः तत्रलोमइंद्रियंस्मश्रुकेशाश्चलोमविशेषाः तत्रदेवताओषधयः अस्मिन्स्थलेत्वकूचर्मणोरैक्यं॥ स्पर्शः त्वगिंद्रियेणवायुदेवताकेनगृह्यतइतिपूर्वमुक्तं शिश्नंगोलकं ५६ रेतइति रेतइंद्रियंआपोदेवता आपएवपुरुषाकारणंभवंतीति॥ पूर्वकोदेवःसर्वत्रवेलक्षणेपेस्यभेदोनियामकः॥ गुदंपायुःस्थानं अपानइंद्रियंतत्रमृत्युर्देवः सचलोकभयंकरइतिवैराग्यार्थमुक्तं॥ मृत्युरूपयेवतिष्ठतिमध्येमृत्युरिति ५७

स्कंदपर्व२

Indira Gandhi National
Centre for the Arts

त.सु.२६
३४८

हस्ताविति हस्तौगोलकस्थानीयौ बलमिंद्रियं ताभ्यांसहैवनिर्गतमितितत्तीया ततोबलात्स्वराडिंद्रः एवंपादावपि ग
तिरिंद्रियंततोगतिरूपात्हरिर्विष्णुर्देवः नाड्योगोलकं॥आसमंतात्भृतंलोहितमिंद्रियं आभृतंजातमितिवा नद्योदे
वता उदरंगोलकं ५७ क्षुत्पिपासेइंद्रियं समुद्रोदेवता हृदयंचतुर्णांगोलकं तत्रैकंमनइंद्रियं॥मनसः सकाश
ज्जातोयंचंद्रमाः तस्यदेवः बुद्धिरिंद्रियं गिरांपतिर्देवः अहंकारइंद्रियं रुद्रोदेवता॥चित्तमिंद्रियंचैत्योजीवोदेवता

हस्तौचनिरभिद्येतांबलंताभ्यांततः स्वराट्॥पादौचनिरभिद्येतांगतिस्ताभ्यांततोहरिः ५८ नाड्योऽस्यनिर
भिद्यंतताभ्योलोहितमाभृतं॥नद्यस्ततः समभवन्नुदरंनिरभिद्यत ५९ क्षुत्पिपासेततः स्यातांसमुद्रस्त्वेत
योरभूत् अथास्यहृदयंभिन्नंहृदयान्मनउत्थितं ६० मनसश्चंद्रमाजातोबुद्धिर्बुद्धेर्गिरांपतिः॥अहंका
रस्ततोरुद्रश्चित्तंचैत्यस्ततोभवत् ६१ एतेह्यभ्युत्थितादेवानैवास्योत्थापनेशकन् पुनराविविशुःखानि

ति ६१ एतेसर्वेतत्तत्स्थानेअभिव्यक्ताःभगवदंशाःचैत्योमुख्योभगवदंशः॥सर्वे ((तमुत्थापयितुंक्रमात् ६२
व्यस्तंविवेकुंपुनःसर्वेषांनिर्गमनप्रवेशावाह॥एतइति॥एतेदेवाःस्वयमभ्युत्थिताः अस्यदेहस्योत्थापनेनशक्ताः॥
यएवेमंदेहमुत्थापयतिसजीवआत्मेतिज्ञातव्यं॥सामर्थ्येविद्यमानेपिनोत्थापयंतीतिनमंतव्यं किंतुसामर्थ्यमेव त.म०
नास्तीतितदर्थमुपाख्यानमाह पुनराविविशुरित्यादिना॥तदेवशरीरंस्वस्वस्थानेपूर्वंभगवतासहनिविष्टाअपिपुन ३४८
राविविशुःखानिछिद्राणि॥प्रयोजनंतमुत्थापयितुमिति॥ क्रमादितिस्वस्वबलपरीक्षार्थं ६२ ॥

बोधिन्यांतृतीयस्कंधेषड्विंशाध्यायविवरणं॥

वह्निर्वाचेंद्रियेणसहप्रथमतोमुखंभेजे ततोनिर्गत्यतस्मिन्प्रविष्टः॥तस्मिन्प्रविष्टेविराट्सलिलान्नोदतिष्ठत् सर्वत्रेंद्रियेणसह
देवतागोलकेनिविष्टाःविराट्ततोनोत्थितः॥विष्णुर्गत्यैवेति॥इंद्रियेणसहप्रविष्टोविष्णुः तावन्मात्रप्रयोजकोनाधिकंकरोति एवंस
र्वत्रज्ञातव्यं मंत्राधिष्ठातृरूपेष्वपिमर्यादैषा॥पुरुषोत्तमस्तुसर्वंकरोतिसचेत्तेविदितुंशक्यतेप्राप्यतेवा रुद्रपर्यंतंसर्वेनिविष्टाःप्र
त्येकंततोविराट्नोदतिष्ठत् ६९ चित्तेनेति॥यदापुनःचित्तेनेंद्रियेणसहहृदयंचैत्योजीवःक्षेत्रज्ञःदेहाभिमानीयदैवप्राविशत्
तदैवपुरुषःभगवत्सहितोदेहःसलिलादुदतिष्ठत ७० अंतरंगएवसेवकःमहाराजमुत्थापयितुंशक्नोतिनान्यइतिदृष्टांतेनस्पष्ट

वह्निर्वाचामुखंभेजेनोदतिष्ठत्तदाविराट् घ्राणेननासिकेवायुर्नोदतिष्ठत्तदाविराट् ६३ अक्षिणीचक्षुषादित्योनोदतिष्ठ
त्तदाविराट्॥श्रोत्रेणकर्णौचदिशोनोदतिष्ठत्तदाविराट् ६४ त्वचंरोमभिरोषध्योनोदतिष्ठत्तदाविराट् रेतसाशिश्नमापस्तु
नोदतिष्ठत्तदाविराट् ६५ गुदंमृत्युरपानेननोदतिष्ठत्तदाविराट् हस्ताविंद्रोबलेनैवनोदतिष्ठत्तदाविराट्॥६६ विष्णुर्गत्यै
वचरणौनोदतिष्ठत्तदाविराट्॥नाडीर्नद्योलोहितेननोदतिष्ठत्तदाविराट् ६७ क्षुत्तृड्भ्यामुदरंसिंधुर्नोदतिष्ठत्तदाविराट्॥
हृदयंमनसाचंद्रोनोदतिष्ठत्तदाविराट् ६८ बुद्ध्याब्रह्मापिहृदयंनोदतिष्ठत्तदाविराट्॥रुद्रोभिमत्याहृदयंनोदतिष्ठत्तदा
विराट् ६९ चित्तेनहृदयंचैत्यःक्षेत्रज्ञःप्राविशद्यदा॥विराट्तदैवपुरुषःसलिलादुदतिष्ठत ७० यथाप्रसुप्तंपुरुषंप्रा
णेंद्रियमनोधियः॥प्रभवंतिविनायेननोत्थापयितुमोजसा ७१ तमस्मिन्प्रत्यगात्मानंधियायोगप्रवृत्तया॥भक्त्याविरक्त्या
ज्ञानेनविविच्यात्मनिचिंतयेत् ७२ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेषड्विंशोध्यायः ॥

यति॥यथेतिद्वाभ्यांयथात्वसामर्थ्यात्प्रसुप्तंपुरुषंबहिःस्थिताःप्राणेंद्रियमनोधियःयेनअंतःस्थितेनजीवेनविनाउत्थापयितुंनप्रभवं
ति तमेवप्रत्यगात्मानंशरीराभिमानिनंजीवंतस्मिन्संघातेइतरस्मात्पृथक्त्वाविविचिंतयेत् तत्रचिंतनेबुद्धिःकरणंसापिनप्राकृतीकिं
तुयोगेनविपक्षयोगेनसहतथायोगःसिद्धोलर्थः।तस्यसहायभूतंभक्त्यादित्रयं॥तैःसहितयाबुद्ध्याइतरस्मात्दूरीकृत्यतमेवचिंत

तेनदुःखमाप्नोतेनकुर्यात्॥तथासमुत्तरंतत्वसमा
वोनाविद्यतेहकरद्वितिभावः ७२ इतिश्रीभागवतसु

Indira Gandhi National
Centre for the Arts

त॰मु॰२७ सांख्येनेतरभिन्नस्यान्नेत्ज्ञातितथात्मनः॥ब्रह्मरूपेणतज्ज्ञानंसप्तविंशेनिरूप्यते १ साधनानिस्वरूपंचचर्चितमार्थमिहोच्यते॥यु
३४७ क्तयोप्यत्रकथ्यंतेविपर्ययनिवृत्तये २ पूर्वाध्यायेसंघातेविद्यमानआत्माभिन्नतयानिरूपितः॥तस्यमोक्षोनिरूप्यते॥सचेदृक्
कालंप्रकृतौस्थितः मंजिष्ठादिभिरिवरंजकद्रव्यैःवस्त्रमिवरक्तःस्यात्॥तदातस्यमोक्षोनसंभावितइतिसूचयन्तस्यस्थितिमाह॥प्रकृ
तिस्थोपीति सर्वदायंजीवःप्रकृतावेवमाकृतसंघातेवर्त्ततेतथापिप्रकृतेःसत्वरजस्तमोगुणैःनाश्यतेअक्तोनभवति॥यथापुष्
पलेलादिनाऽत्यते॥अंजनाभावेहेतुचतुष्टयमाह॥अविकारादित्यादिचतुर्भिःपदैः॥प्रकृतेर्गुणाःस्वस्मिन्प्रविष्टंचमनःअंजं गुरो॰
कुर्वंतिस्वयंवातत्रप्रविष्टाःतत्रप्रवेशोविकृतमेवप्रविशतीतिविकाराभावात्नप्रवेशःभावस्यहिविकारभवंतियोहिभवनमनु उत्पत्तिः
मनसि श्रीभगवानु प्रकृतिस्थोपिपुरुषोनाज्यतेप्राकृतैर्गुणैः॥
आत्मा अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् १ ॥
भवतिसतुनकेनापिप्रकारेणभवतीतिविकाराभावः॥किंच॥कर्त्ताहिक्रियाधर्मैरदृष्टप्रकारेणरज्यते॥अकर्तृत्वात्नादृ
हेतोर ष्टप्रकारेणापिविकाररहितोपिसजातीयग्राहकइतियदिसगुणःस्यात्तदापरगुणैरपिस्वसजातीयैःविद्यानिवरक्तोभ
वेत् एतद्दर्शमिनिवेशाइंजनंफलतोरंजनमुच्यते॥साधनतोव्यापारफलतश्चरंजनाभावउक्तः॥स्वस्मिन्प्रवेशेसति
रंजनंभविष्यतीत्याशंक्यप्रवेशंदृष्टांतेनान्यथानिरूपयति॥जलार्कवदिति सहिप्रकृतौप्रतिबिंबन्यायेनप्रविशति॰ननुकुं एम॰
डेबदरमिव॥अन्यथाप्रकृतौतत्प्रतीतिर्नस्यात्॥सर्वत्रचतत्प्रतीतिर्नस्यात्प्रकृत्यपेक्षयाव्यापकत्वाच्च अतःस्वच्छाप्र ३४७
कृतिःपुरुषच्छायांगृह्णातीतिपुरुषोनतद्धर्मैःसूर्यवत्रज्यते १ ॥

गुणाभिगमतोरज्यते।तिन्यायेनतत्पेपर्थः४=

तर्हिकथंसंसारइत्याशंक्याह॥सएवेति॥सएवमाकृतगुणैःअसंबद्धोपिएषःसंसारीभवति कथमित्याकांक्षायामाह यहीति प्र
कृतेर्गुणेषुयर्हिस्वयमभिरज्यते यद्यपिगुणाःकिंचित्कर्त्तुंनशक्ताःतथापिस्वयंचेतनःतान्गुणानवशीकर्त्तुंस्वधर्मेणरंजयि
तुंशक्नोति यथासूर्योजलंस्वगुणैःसंपंकरोतिजलंतुसूर्यंशीतलंकर्त्तुंनशक्नोति॥तदाकिरणैःशुष्यत्जलंसूर्येप्रविशति॥तदात
त्रगतंबद्धधमसूयते॥एतदेवगुणेषुअभिविषक्तिर्नाम तदावशीकृतेषुअहंकारेणविमूढःसन्कर्त्तास्मीतिआत्मानमभिमन्य
ते॥प्रकृतेर्गुणाःस्वात्मन्यागताःसर्वमेवकार्यंकुर्वंति॥तत्रकर्त्ताअहंकारोगुणव्याप्तः॥सचाहंकारोमोहात्मकोभवति॥ततोजीवोमूढः
सन्अहमित्यात्मानंमन्यते॥अहंक्रियाअहंकारःमोहेस्त्रियाउपयोगात्स्त्रीलिंगनिर्देशः॥अहंक्रिययाविमूढःआत्माअंतःकर
सएवयर्हिप्रकृतेर्गुणेष्वभिविषज्जते अहंक्रियाविमूढात्माकर्त्तास्मीत्यभिमन्यते २
तेनसंसारपदवीमवशोभ्येत्यनिर्वृतः॥प्रासंगिकैःकर्मदोषैःसदसन्मिश्रयोनिषु ३ ॥
णंस्वरूपंवायस्य अहंकरोतीत्यहंकारः॥तेनकर्तृत्वमहंकारस्यैव॥तेनतदैक्यादात्मानमपिकर्त्तास्मीतिमन्यते २ ततःकि
मतआह॥तेनसंसारपदवीमिति॥कर्तृत्वाभिमानात्कर्त्ताभोक्ताभवतीतिसंसारभोगार्थंसंसारपदवीमेति॥अवशःकर्मा
धीनः अतएवाभिमुख्येनेतिनन्वेवंसतिनित्यःसंसारःस्यादतआह अनिर्वृतइति कर्मफलेनिवृत्तिरहितः निवृत्तस्य सं संसारे२
सारहिमुच्यतइत्युक्तंभवति ननुसंसारमार्गेगमनमात्रेणकिंस्यादित्यतआह प्रासंगिकैरिति प्रसंगेणहिकर्मणोदोषा
जायंतेस्वभावतःकर्माणिनदुष्टानिकिंतुप्रसंगादेव यथान्नभोजनंननिषिद्धंकिंतुदुष्टान्नभोजनमेव॥कर्ममार्गस्तुस
दसन्मिश्रयोनिरूपः॥सदसदादियोनिर्देवतिर्यङ्मनुष्ययोनिः ३ ३ ॥

विच्युतोमतिनकलादधा॰ *स्वकामेंद्रियप्रसंगात्कृता।नर=

Indira Gandhi National
Centre for the Arts

तमु २७
३५०

नन्वयंसंसारः किंसत्योमिथ्यावा आद्येअनिर्मोक्षः द्वितीयेसाधनवैयर्थ्यमित्याशंक्याह॥ अर्थेहीति॥ यद्यप्यत्रसंसारेसंसरणरूपो
येनास्तिदेवतिर्यङ्मनुष्ययोनिषुदेहएवोत्पद्यतेदेहेचआत्मनोनकोपिसंबंधः॥ असंगत्वादात्मनः संयोगोनास्ति॥ पृथक्सिद्धत्वात्समवायः
॥ स्वरूपसंबंधोपिनास्ति॥ उभयोरेकत्रनिरूपणाभावात् महाराजवरएकयोरिव किंत्वाध्यात्मिकः॥ सतुमोहाद्दित्यलीकः॥ अतः
संसारः अलीकभूतएव॥ तथापिननिवर्त्तते॥ योहिमिथ्याभूतः सन्बाधतेसकथंनिवर्त्तते॥ अन्यथाबाधनमेवनस्यात् नन्वेता
दृशस्यबाधनेकिंबीजंतत्राह॥ ध्यायतोविषयानस्येति॥ अस्यसंसारस्ययेविषयाः तान्भोग्यत्वेनध्यायतः॥ विषयभोगवासनायां
सत्यामविद्यमानोपिसंसारोबाधतइत्यर्थः॥ असतोपिबाधकत्वेदृष्टांतः॥ यथास्वप्नेअनर्थागमः॥ स्वप्नस्तुमायिकइतिसिद्धांतः॥
यद्यपितत्रतादृशंमिथ्याभूतंतथापिजागरणात्पूर्वंननिवर्त्ततएव॥ अतःसंसारनिवृत्त्यर्थंयत्नः कर्त्तव्यइतिसिद्धं ४ तत्रस्वप्न

अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्त्तते॥ ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा ४ ॥
अतएवशनैश्चित्तंप्रसक्तमसतांपथि॥ भक्तियोगेनतीव्रेणविरक्त्याचनयेद्वशं ५ ॥

दृष्टांतेनैवबोधस्यनिवर्त्तकइत्यवसीयते॥ सबोधः कथंभवतीत्याकांक्षायामंतर्मुखेचित्तेभवतीतिवेदान्तिनिश्चितं॥ कश्चिद्धी
रः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्इतिश्रुतेः॥ संसारान्निवृत्तंचित्तंआत्मनाभिभवतीतिनिश्चितं॥ तदसन्मार्गे
प्रवृत्तंननिवर्त्ततएव॥ नापिनिवर्त्तयितुंशक्यते॥ असतांबहुत्वात्बलिष्ठत्वाच्च॥ तत्रापिप्रकर्षेणासक्तं॥ तथाप्येतादृश
मपिनिवर्त्तनीयमितिआदौतस्यवशीकरणेहेतुमाह॥ अतएवेति॥ यतःअनिवृत्तंअनर्थहेतुः॥ अतएवबहुकालमा एप०
सक्तत्वात्शीघ्रमनिवृत्तावपिशनैर्निवर्त्तनीयंयथाअसंतःपरिपंथिनोभवंति॥ यथावाचित्तंआसक्तिंत्यजति तत्रद्वयंहे ३५०
तुः॥ भक्तियोगोविरक्तिश्चेतिभगवतिस्नेहः विषयेषुरागाभावश्चपूर्वस्माद्विपरीतं॥ उभाभ्यांचित्तंवशेनयेत्॥ ५॥ ॥

विष्

उभयोःसाधनान्याह॥ यमादिभिरिति॥ पूर्वंभक्तिसाधनान्युक्तानिसत्संगादीति॥ तानिदुर्लभानीतिज्ञानमेवभक्तिसाधनमितिनि
रूप्यते॥ यमादिसाधनैरात्मानंचेज्जानातितदाभगवतिस्नेहः पश्चाद्भगवतिचित्तस्थैर्यंतदाविषयध्यानाभावात्संसारोनिवर्त्तते॥ त
त्रप्रथमंयमाः अहिंसादयः॥ ततोनियमाःस्नानादयः॥ ततआसनादियोगमार्गाः तैः कृत्वाचित्तंअभ्यसेत॥ चित्तंतत्परंकुर्यात्॥ संय
मनाभ्यासंवा मार्गेसाधनेषुयः श्रद्धयान्वितः॥ मयिभगवतिभावेन-श्रद्धादिनासत्येनसत्यभावेनकायवाङ्मनःसुसत्यप्रतिष्ठया
॥ निरंतरंभगवत्कथाश्रवणेन॥ चकारात्कीर्त्तनेन॥ ६॥ सर्वभूतेषुसमदृष्ट्या॰ सर्वप्राणिषुवैराभावेन॰ सर्ववस्तुषुसर्वप्राणि
षुचप्रसंगाभावेनअष्टांगब्रह्मचर्येण॥ मौनेनवृथालापपरिवर्ज्जनरूपेण महीयसानिष्ठाप्राप्तेनस्वधर्मेणवत्सा॥ अप्रधर्मेण
यदृच्छयाउपस्थितेनान्नादिनासंतुष्टोभवेत्॥ एतानिसर्वाणिसाधनानिपूर्वेणपूर्वेणसिद्धानुत्तरोत्तराणिद्वादशभवंति अन्येःस

यमादिभिर्योगपथैरभ्यसेत्श्रद्धयान्वितः॥ मयिभावेनसत्येनमत्कथाश्रवणेनच ६ सर्वभूतसमत्वेननिर्वैरेणाप्रसंगतः॥
ब्रह्मचर्येणमौनेनस्वधर्मेणमहीयसा ७ यदृच्छयोपस्थितेनसंतुष्टोमितभुग्मुनिः॥ विविक्तशरणः शांतोमैत्रः करुणआ
त्मवान् ८ सानुबंधेचदेहेऽस्मिन्अकुर्वन्नसदाग्रहं॥ ज्ञानेनदृष्टतत्वेनप्रकृतेःपुरुषस्यच

हितेन ७ यदृच्छयोपस्थिते
नान्नादिनावासंतोषःसाध्यः॥ पूर्वोक्तानिस्वरूपोपकार्यंगानि॥ कस्यचिन्मतेसंतोषएवमुत्कंगमितिफलोपकार्यंगानिवा॥ अतः
संतोषस्यकरणतानोक्ता॥ पृथक्स्थित्यभावार्थंवाकर्त्तृविशेषणत्वेनोक्तं तत्रापिमितभोजनंमननंच॥ एकांतेस्थितिःपरमाशां
तिः॥ सर्वत्रमैत्री॥ करुणा॥ स्वाधीनांतःकरणत्वं॥ पुत्रादिसहितेदेहेमिथ्याभिनिवेशाकरणंचेति॥ अंतरंगाण्यष्टावंगानि॥ यमा
दयोद्वादश॥ एकःसंतोषःमितभोजनादीन्यष्टौ॥ एवंत्रिविधैःसाधनैः अत्यंतरंगसाधनैःत्रिभिश्चआत्मदृग्भवति ८ तानित्री
ण्याहज्ञानेनेति॥ सांख्यमेकंतुरीयावस्थाभेदज्ञानाभावश्च॰ प्रकृतेःपुरुषस्यचदृष्टंतत्वंयेनतादृशेनज्ञानेनसांख्यजनितेन ९

Indira Gandhi National
Centre for the Arts

तम्.२७
३५१

निवृत्तेति॥ निवृत्तं निवुध्यवस्थानानियस्य दूरीभूतमन्यदर्शनंयस्य॥ एवंक्रमेण ज्ञाते आत्मनैवात्मानमुपलभ्य आत्मदृग्भवति॥ एक स्यैवकरणत्वंकर्मत्वंकथमित्याशंक्य दृष्टांतमाह॥ चक्षुषेवार्कमिति॥ चक्षुरपि तेजसमर्कोपि परमिदमध्यात्मभूतंआधिदैवि कश्चसूर्यः॥ तत्रयथावत्त्वंतरग्रहणेविषयप्रकाशकत्वेनसूर्यमपेक्षते एवंनसूर्यग्रहणेसूर्यापेक्षा॥ नापिचक्षुर्गतांधकारनिवृ त्यर्थंतदपेक्षा किंतु तेनैवप्रकाशितंचक्षुस्तदंशभूतंआत्मानंगृह्णाति॥ एवंजीवेनभगवदंशभूतेनसर्वात्मस्वरूपंभगवल्लक्षण मात्मानंयःपश्यतिसआत्मदृग्भवतीत्यर्थः १० नन्वेवमात्मदर्शनेकिंस्यात्तत्राह मुक्तलिंगमिति॥ एवंमानसभावनाज्ञानेन॥ अ सति अस्मिन्संघातेमुक्तलिंगंसदाभासंप्रतिपद्यते॥ मुक्तंलिंगंयस्य॥ अंतःकरणंलिंगात्मकंतस्यनिवर्त्तते॥ तदासतोमूलजीव स्यआभासरूपंशारीरंआत्मानंप्रतिपद्यते अयमहमितिसाक्षात्प्रतिपद्यते एतावत्कालमाभासस्यापिनसाक्षात्कारः॥ बहिरव

निवृत्तवुध्यवस्थानोदूरीभूतान्यदर्शनः॥ उपलभ्यात्मनात्मानंचक्षुषेवार्कमात्मदृक्

१० मुक्तलिंगंसदाभासमसतिप्रतिपद्यते सतोवंधुमसच्चक्षुःसर्वानुस्यूतमद्वयं ११

रणनाशनिवृत्तत्वात्॥ नन्वाभासेप्राप्तेकःपुरुषार्थस्तत्राह॥ सतोवंधुमिति॥ अयमाभासःसतोमूलभूतात्मनःबंधुर्भवतिपुत्रो भ्रातेववाभवति॥ तत्प्रतिबिंबत्वात्सम्यक्मूलज्ञापकोभवतीतिभावः॥ नन्वस्यसतोवंधुत्वेकिंप्रमाणंतत्राह॥ असच्चक्षुरिति॥ अ सतोदेहादेश्चक्षुःयथाआभासरूपमपिचक्षुःविषयप्रकाशकंभवति तेनज्ञायतेसूर्याभासोयमिति॥ नन्वसत्प्रकाशकत्वमात्रे णसोपाधितुल्यत्वात्नसदाभासत्वंसिध्यतीत्याशंक्याह॥ सर्वानुस्यूतमिति॥ सर्वत्रैवसंघातेअनुस्यूतःसंबद्धोवर्त्तते॥ व्यापका भासव्यतिरेकेणसर्वत्रानुस्यूततानभवतीति॥ आभासभेदेतदुपपद्यतइतिचेत्तत्राह॥ अद्वयमिति॥ सर्वत्रसंघातेएकएवप्र तिबिंबः॥ अन्यथायएवाहंपश्यामिसएवाहंशृणोमीत्यनुसंधानंनस्यात्॥ एवमसच्छरीरस्यसदाभासतानिरूपिताः ११ तम्० ३५१

हृद्दिप ... दात्मनोम ... नयमानेयमा ... ते वे...

तेनात्मज्ञाननिरूपणार्थदृष्टांतोपपत्तीनिरूपयतिद्वाभ्यां। यथेति गृहमध्येस्थितःपुरुषोवहिर्जलादौसूर्यप्रतिबिंबेसंमुखगृहो न भित्तौतत्प्रतिफलनंभवति घर्मइवतत्रभवतितेनसजानातिसाक्षादत्रसूर्यसंबंधोनसंभवति। किंतुबहिर्दर्पणादौप्रतिबिंबि तस्येदंप्रतिफलनमिति एवंचक्षुरादौप्रतिफलनंपूर्वोक्तसाधनैरेवनान्यथेतिमंतव्यं। नहिबहिःपीठादौघर्मरूपेणसंबद्धो पिसूर्योदर्पणादिस्थितइवप्रतिफलतितथासतिसर्वएवसंघातोऽतःसाक्षात्क्रियेतैवअतःसाधनेष्वेवजातेषुयद्भविष्य तितद्दृष्टांतेनप्रथममसंभावनानिवृत्त्यर्थंप्रदर्श्यते॥ स्थलस्थेनांतरमित्यादिप्रतिफलितेनवहिःस्थितोजलस्थ आभासो वद्दृश्यतेज्ञायतेतेनापिजलस्थितेनस्वाभासेनदिविस्थितःसूर्योविदृश्यते॥ १२॥ एवंत्रिवृदहंकारस्थितआत्मासदाभासो भूतेंद्रियमनःसुप्रतिफलितैःस्वाभासैर्लक्ष्यते। तेनत्रिवृदहंकारस्थितेनसतआभासरूपेणसत्यदृगात्माजीवभूतश्चल

यथाजलस्थआभासःस्थलस्थेनावदृश्यते॥ स्वभासेनतथासूर्योजलस्थेनदिविस्थितः १२

एवंत्रिवृदहंकारोभूतेंद्रियमनोमयैः॥ स्वाभासैर्लक्षितोनेनसदाभासेनसत्यदृक्॥ १३॥ भू

तसूक्ष्मेंद्रियमनोवुध्यादिष्विहनिंद्रया॥ लीनेष्वसतियस्तत्रविनिद्रोनिरहंक्रियः॥ १४ ॥

क्ष्यते॥ १३॥ एवंदृष्टांतेनासंभावनांदूरीकृत्यदृष्टांतस्याप्रामाण्यमाशंक्यानुभवेनोक्तमर्थंद्रढयति॥ भूतसूक्ष्मेति॥ ॥ जाग्रद्द शायांसंघातेनसहस्फुरणात्कोयमात्मेतियद्यपिविशेषतोनज्ञायतेतथापिसुषुप्तौकेवलआत्मासंघातव्यतिरिक्तोभासतइ तितन्निरूपयति। भूतानिस्थूलानिसूक्ष्माणिचतन्मात्रारूपाणिइंद्रियाणिमनोबुद्धिश्चआदिशब्देनाहंकारःस्वप्नरहितनिद्र येतेषामाभासाहूरीक्रियंतेततदैतेनप्रकाशंतेआभासलयएवैषांलयःतदाभासप्रकाशरहितेअसतिमूढेदेहेयस्तत्रप्रका शतेसआत्माज्ञातव्यइतिमंतव्यं॥ ननुतत्रनकोपिभासतइतिचेत्तत्राह। तत्रविनिद्रइति। तस्यतुनिद्राव्याप्तिर्नास्ति। नन्वहंप्र

हरि

र्थी

त॰सु॰ ३५२ ननु तत्र स्वात्मानमास्त एवेति चेत्तत्राह ॥ ॥ मन्यमान इति ॥ तदात्मानमनष्टमपि नष्टं मन्यमानो भवति । यत्तु मन्यते सआ
त्मा नष्टत्वेन यन्मन्यते । तेन प्रकटप्रकाशः । अन्यथा नष्टं को वा मन्येत स्वप्ने शिरसश्छिन्नत्वे वा शिरः छेदं पश्येदन्तः कुक्षि
दलितं तद्द्रष्टाय आत्मानमनष्टमपि नष्टं मन्यते नाहमस्मीति ॥ अनष्टस्य नष्टप्रतीतावुपपत्तिं दृष्टांतमाह । नष्टेहंकरण इति ॥ मलिना, मनिति
न त्वहंकारसंवलिते ऽहंकारे नष्टे तद्भेदप्रतीतिर्द्रष्टा आत्मानमेव नष्टं मन्यते यथा अहंकारद्रष्टत्वस्यैव दृश्यत्वात् स केवलं त
द्द्रष्टा अतः आत्मानं दृश्यरूपमहंकारसहितं नष्टं मन्यत एवेत्युक्तं ॥ अन्यनाशे ऽन्यनाशप्रतीतिमाह । नष्टवित्त इति । धना
त्मा यथा पुरुषो लौकिको धने नष्टे तद्व्यतिरेकेण स्वनिर्वाहाभावादात्मानमेव नष्टं मन्यते ॥ आतुर रोगी वा स यथा देहेन ष्टआ

मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा ॥ नष्टे ऽहंकरणे द्रष्टा नष्टवित्त इवातुरः ॥ १५ ॥
एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते ॥ साहंकारस्य द्रव्यस्य यो ऽवस्थानमनुग्रहः ॥ १६ ॥

त्मानमेव नष्टं मन्यते । आतुर एवा भवति वित्ते नष्टे १५ एवमात्माननिरूप्योपसंहरति । एवमिति ॥ पूर्वोक्तप्रकारेणात्मा
नं प्रत्यवमृश्य असावेवात्मानं प्रतिपद्यते नन्वहंकारनाशो ऽपि न प्रतीयते स्मरणे ऽहंकारस्य स्मरणात्सुखमहमस्वाप्स मि
ति नाहंकारनाश इति चेत्तत्राह । साहंकारस्येति । अहंकारसहितस्य द्रव्यस्यात्मनो ऽवस्थानं पश्चात्स्मरणं मनुग्रहो भ एम॰
वति पश्चादहंकारः संबद्धः यथा सो ऽयं देवदत्तः पूर्वं कुंडली तिष्ठ्वे कुंडलाप्रतीतावपि प्रतीयते यो ऽनुग्रहस्तदवस्था ३५२
नमिति संबंधः अनुग्रहस्य प्रसिद्धिः प्रकृतोपयोगिनी १६ ॥

देप्रन ... ग्र घ्रतप्र ... य ... त ... स्ति
रणे मत्वान्यथानं

---

एवमात्मज्ञानं मोक्षार्थमुपदिष्टं तत्प्रकृते नोपयुज्यते ॥ प्रकृतिसंबंधो हि संसारे हेतुः ॥ सांख्ये प्रकृतिर्नित्या पुरुषो ऽपि नित्यः संबधश्च ॥
तत्र ज्ञानं किं करिष्यति नहि ज्ञानेन प्रकृतिः संबंधो वा नाशयितुं शक्यते ॥ अतो ज्ञानं कर्मवदभ्युदयहेतुरेव न मोक्षहेतुरित्या
=३ देवहूतिः शंकते पुरुषमिति चतुर्भिः ॥ प्रकृतिपुरुषयोः नित्यः संबंधः ॥ नापि कश्चित्प्रकृतिपुरुषविशेषः अनित्यो भवति ॥ नापि प्रकृ
तिसंबंधः कश्चिद्वाधकः ॥ अथ ज्ञानेन प्रकृतेर्बाधकत्वमपोद्यत इति मतं ॥ तदपि त्रितृणवत्स्थायित्वात् ज्ञानस्य तस्मिन्नि
वृत्ते पुनः प्रकृतिर्बाधिष्यत इति मोक्षमार्गो ऽसंगतः । स्वेच्छया पुरुषप्रकृत्याः संबंधः ॥ तत्र प्रथमं संबंधे पुरुषो हेतुः कामो नि
मित्तं तत्र हि पुरुषः काममय एवेति स्वयं प्रकृतिर्न मुंचति ॥ प्रकृतिरेव कदाचित्पुरुषं परित्यज्य प्रत्यवगच्छेत् चेत्तदा मुक्ति

देवहूतिरुवाच ॥ पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित् ॥
अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो १७ ॥

र्भवेदित्याशंक्याह ॥ पुरुषं प्रकृतिः कदाचिदपि न विमुंचतीति ॥ ब्रह्मन्निति संबोधनं प्रकृतिपुरुषयोः स्वरूपपरिज्ञानार्थं
॥ उभयोरुभयापेक्षितत्वात् किंच ॥ अन्येनाप्युभयोर्विश्लेषः कर्तुं न शक्यते । अन्योन्यापाश्रयत्वात् ॥ यद्युभौ स्वभावतो भि
न्नौ मिलितौ स्यातां तदा विश्लेषः कर्तुं शक्यो ताविमौ तु परस्परं मिलितौ संगौ संबद्धौ यथा पट कार्पासयोः मेकत्वं तु रूपं स्यातां । तेन नि
र्मिते पटे तंतुद्वयविश्लेषे ऽपि न पट कार्पासयोर्विश्लेषः ॥ तथा प्रकृतौ प्रविष्टः पुरुषः प्रकृतिरूपो जातः प्रकृतिरित्युच्यते ॥ पुरु
षे ऽपि प्रकृतिः प्रविष्टा पुरुषरूपा जाता पुरुष इत्युच्यते ॥ एतादृशयोश्च संबंधः स कथं त्याजयितुं शक्यत इत्यर्थः ॥ नाप्येकस
नाशे ऽपि विश्लेषः संभवति ॥ उभयोर्नित्यत्वात् ॥ प्रभो इति संबोधनमघटनघटनासमर्थो भवानिति बोधयितुं १७ ॥

Indira Gandhi National
Centre for the Arts

न.सु.२७
३५३

नायिकं चित्पुरुषं कदाचित्प्रकृतिस्त्यजतीति शंकनीयमित्याह॥ यथा गंधस्येति॥ भूमेर्गंधः स्वाभाविको गुणः स कदाचिदपि भूमिं न त्यजति आश्रयपरित्यागे स्वरूपनाशप्रसंगात्॥ तदाह॥ व्यतिरेकतो न भाव इति॥ न हि भूमिव्यतिरेके गंधः कस्यचिद्गुणो योन्यत्र तिष्ठेत्॥ गंधस्य चंदनादौ कदाचिद्गुप्तत्वेन व्यतिरेकश्चेच्छंकेत तदा दृष्टांतांतरमुच्यते॥ अपां रसस्य चेति॥ न कदाचिदपि जले रसः अनभिव्यक्तो भवति अपाकजत्वेन नियतसंबंधत्वात्॥ तथैव बुद्धेः परस्यापि॥ प्रकृतिसंबंधो दूरे प्राकृतीया बुद्धिस्तस्याः अपि संबंधः सहज इत्यर्थः १८ न च संबंधे सत्यपि मोक्षो भविष्यतीति मंतव्यमित्याह अकर्तुरिति॥ अयमात्मा स्वभावतः अ

यथा गंधश्च भूमेश्च न भावो व्यतिरेकतः अपां रसस्य च यथा तथा बुद्धेः परस्य च १८
अकर्तुः कर्मबंधोयं पुरुषस्य यदाश्रयः॥ गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं १९
कचित्तत्वावमर्शेन निवृत्तं भयमुल्बणं अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते २० ॥

कर्ता प्रकृतिसंबंधादेव कर्तृत्वं कर्तुः कर्माण्यनंतानि॥ तेषां च फलभोगेन विनाशे पुनस्तद्धेतुना कर्मांतराणीति न कदाचिदपि मोक्षः॥ तदाह॥ अकर्तुरात्मनः अयं संसारलक्षणः कर्मबंधः प्रकृत्याश्रयः॥ तस्याश्च प्रकृतेर्गुणेषु सत्सु कथं कैवल्यं॥ न च बंधका गुणा अन्ये मोचकाश्चान्य इति मोचकसंबंधे मुक्तिः स्यादिति चेत्तत्राह॥ तेष्विति॥ य एव बंधकाले ते एव सत्सु कथं मुक्तिरित्यर्थः १९ न च तत्वज्ञानेन प्रकृतिबाधकत्वं कृतं क्रियत इति मंतव्यमित्याह॥ कचित्तत्वावमर्शेनेति॥ क्वचित्पुरुषविशेषे अवस्थाविशेषे वा उत्पन्नं ज्ञानं संसारभयं निवर्तयति॥ तदपि न संगच्छते॥ भयहेतोः प्रकृतिसंबंधस्यानिवृत्तत्वात् पुनर्भयं प्रत्यवतिष्ठत एव॥ उल्बणमसह्यं २० ॥ एम ३५३

ज्ञानस्य क्षणिकत्वेपि संबंधस्य नित्यत्वेपि प्रकृतेरपि नित्यत्वे तथापि कानिचित्साधनानि संति यैः कृत्वा प्रकृतिस्तिरोभावं प्राप्नोति संबंधश्च पुनर्नोद्भूतो भवति तानि साधनान्याह अनिमित्तेति द्वाभ्यां॥ अनिमित्तेन निष्कामेन निमित्तेन कर्मणा सर्वत्र कर्मैव निमित्तमिति निमित्तपदप्रयोगः स्वधर्मः वर्णाश्रमधर्मः निर्मलांतःकरणं च साधनं उभाभ्यां वा निर्मलांतःकरणत्वं एतानि ज्ञानोत्तरं पुनः कर्तव्यानि॥ अंतःकरणस्य च नैर्मल्यतारतम्येन भगवतो भक्तिश्च तीव्रा निरंतरं सर्वभावेन महत्ता स्नेहपूर्विका सेवा॥ स्नेहपूर्वकश्रवणादिकं वा चकारात् गुरुभक्त्या॥ सापि भक्तिः निरंतरसाधनेन पुष्टा कर्तव्येत्याह॥ श्रुतसंभृतयेति चिरकालं भगवद्गुणश्रवणेन सम्यक् संभृता पूर्णा हृदये आपूरिता वा २१ ज्ञानेनेति सर्वतत्वसाक्षात्कारेण सांख्यानुभावेन यज्ज्ञानितं ज्ञानं तत्पुन एव ज्ञनीयं साध

श्रीभगवानु अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं २१
ज्ञानेन दृष्टतत्वेन वैराग्येण बलीयसा तयोयुक्तेन योगेन तीव्रेणात्मसमाधिना २२ प्रकृतिः पुरुष
तदान्यहं पाठः स्येह दह्यमाना त्वहर्निशं तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः २३ श्रीगोपालयनमः ॥

नानुवृत्त्या बलीयसा वैराग्येण विषयैः कदाचिदपि रागजननासंताभावयुक्तेन॥ तपसा युक्तेन योगेन च अष्टांगेन॥ आत्माविर्भावसमर्थेन समाधिना एवं दशसाधनानि उत्तरोत्तरं संजातानि मिलितानि वा पुरुषस्य संबंधिनीं प्रकृतिं अन्वहं दहंतीति २२ तथा सति यत्स्यात्तदाह प्रकृतिरिति अन्वहं दह्यमाना अहर्निशं वा दह्यमाना शनैस्तिरोभवित्री नन्वेतानि साधनानि प्राकृतान्येव कथं तैः प्रकृतिर्नश्यति प्रत्युत पुष्टैव भवेदित्याशंक्य तथात्वे दृष्टांतमाह॥ अग्नेर्योनिरिति यद्यप्यरणेः सकाशादेवाग्निरुत्पद्यते तथापि सा तं नाशयत्येव न तु वर्धयति॥ तथैव तानि साधनानि॥ न तु काष्ठादि निर्मितं पीठादिकं यथा काष्ठपोषकं तथाग्निर्भवति तस्माल्लौकिकान्येव कर्माणि॥ नि प्रकृतिपोषकाणि न दैवानीति भावः २३ श्रीरामचंद्राय नमः ॥ ॥

Indira Gandhi National
Centre for the Arts

तसु:२७ तस्याः पुनरहङ्क्रमशंकांवारयति॥भुक्तभोगेति॥अभुक्ताचेत्वासनयाहृदयंप्रविश्यकथंचिन्ननिवर्तेत॥भुक्तभोगातुनिवृत्तैवभवे
त्॥तत्रापलब्धापरित्यक्ता तत्रापिदृष्टदोषा॥यथाअमेध्यत्वेनपरित्यक्तमन्नादिकंनरागंजनयति॥कदाचिद्वेषस्फुरितेपिरा
३५४ गश्चेतन्नांतःस्थाननिवर्तेत कदाचित्तस्यादोषोनस्फुरत्यपि॥तस्मात्तस्यार्थमाह॥नित्यशइति सर्वदादृष्टदोषा तथात्वेतस्यांरागा
भावोहेतुः किंच॥यथागृहस्थस्यभार्यागृहस्थंबाधतेनतथेश्वरंशतशोपिभार्याबाधितुंशक्नुवंति॥तथेयंप्रकृतिरपिदासभू
तमेवजीवंबाधतेनत्वीश्वरभूतं॥ऐश्वर्यंचभगवत्कृपयातद्धर्मप्राप्त्याभवति तदाह नईश्वरस्याशुभंधत्तइति किंच स्वेमहिम्नि
स्थितस्यचअशुभंनधत्ते॥यस्तुस्वानंदएवरमतेतंप्रकृतिर्नबाधतेप्रकृत्यपेक्षाभावात् यथासर्वतोविरक्तंभार्याबाधितुंनशक्नो
ति नात्मात्मारामभितिचशब्दार्थः २४ किंच॥इयंप्रकृतिर्निद्रावत्पुरुषस्यबाधिका॥तथाहतियथानिद्रास्वप्नंजनयित्वाबाध

भुक्तभोगापरित्यक्तादृष्टदोषाचनित्यशः॥नेश्वरस्याशुभंधत्तेस्वेमहिम्निस्थितस्यच २४ यथात्यप्रतिबुद्धस्य
प्रस्वापोबह्वनर्थकृत्॥सएवप्रतिबुद्धस्यनवैमोहायकल्पते २५ एवंविदिततत्त्वस्यप्रकृतिर्मयिमानसं युंज
तो नापकुरुते आत्मारामस्यकर्हिचित् २६ ॥

ते तथेयमपिसंसारंजनयित्वाबाधते सोपिस्वप्नोभगवन्मा
याजनितसर्वप्रपंचात्मकः॥भगवदिच्छयाविद्यमानोपिअप्रतिबुद्धस्यैवबह्वनर्थकृद्भवति॥नतुप्रतिबुद्धस्यकस्यचिदपि॥कदाचि
त् एकस्मिन्नपिदेशेनिश्चयेनमोहायनकल्पतेकिंतुस्मृतिमात्रंजनयति २५ एवंविदिततत्त्वस्यापिपुरुषस्यप्रकृतिःसंसारजनने
ननापकारंकर्तुंशक्नोतीत्याह॥एवमितिविदिततत्त्वस्येतिस्वभावस्यमोहकत्वाभावेहेतुः॥भगवतिमानसंयुंजतइति॥बलादृष्ट एम०
ष्टादिद्वाराप्यपकाराभावेहेतुः॥कामादिजननद्वारापिनापकर्तृत्वमित्याह॥आत्मारामस्येति॥आत्मन्येवरमणंयस्य॥अतए ३५४
वप्रकारत्रयेणापिबाधाभावात्कर्हिचिदित्युक्तं २६ ॥ २६

एवंप्रकृतेर्बाधकत्वाभावमुक्त्वाविदिततत्त्वस्यप्रकृतिबाधाभावानंतरंसाधनपूर्वकंभगवत्प्राप्तिलक्षणंमोक्षमाह चतुर्भिर्यदै
वमित्यादिभिः साधनंचफलंचैवफलत्वंचापितस्यच प्रतिबंधनिवृत्त्यैवतत्प्राप्तिर्बाधनाशनः १ एतच्चतुष्टयंप्राहचतुर्भिर्नान्य
थाफलं तादृशस्याविहिभवेदितिज्ञानोत्तरक्रिया २ प्रथमंसाधनमाह यदैवमिति॥पूर्वंयावंतिसाधनानिनिरूपितानिज्ञा
नार्थंप्रकृतिजयार्थंचतान्युभयविधान्यपिबहुजन्मसुआवृत्तानिभवंतितैःअध्यात्मेआत्मज्ञानेरतिहृत्पद्यते॥ज्ञानंतुबहुधा
जायतेप्रमाणवस्तुपरतंत्रत्वात्ज्ञानसंततिस्तुकदाचिदेवजायते॥तस्याःकालनियमाभावात्यदैवमित्युक्तं॥एवमाकांक्षायुक्तः

यदैवमध्यात्मरतःकालेनबहुजन्मना॥सर्वत्रजातवैराग्यआब्रह्मभुवनान्मुनिः २७
मद्भक्तःप्रतिबुद्धार्थोमत्प्रसादेनभूयसा निःश्रेयसंस्वसंस्थानंकैवल्याख्यंमदाश्रयं २८

बहुजन्मनाकालेनअध्यात्मरतोभवेत्तदैवसर्वत्रजातवैराग्योभवेत्॥ततोपिवाबहुजन्मनासर्ववैराग्यं॥क्रममुक्तावा
पिवैराग्यमित्याह॥आब्रह्मभुवनादिति तत्रापिनिरंतरंमननंसाधनंबहिःपदार्थनिवृत्तेरावश्यकत्वात् २७ एवंबहु
जन्मनिज्ञातेमद्भक्तोभवति पश्चात्प्रतिबुद्धार्थोभवति॥तावत्कःपुरुषार्थइत्येवनज्ञाततियावद्भगवतिभक्तिर्नभवति॥त
दाभगवानेवपरमपुरुषार्थइतिज्ञानेमहान्भगवत्प्रसादोभवति॥तदावैकुंठंप्राप्नोति तदेवहिनिःश्रेयसंश्रेयोरूपं॥स्वस्यभ
गवतोजीवस्यापिसम्यक्स्थानभूतं॥तत्रैवहिपुरुषःकेवलोभवति॥सर्वस्मात्मत्वात्प्रतीतत्वाच्च॥तदेवहिममस्थानं २८

Indira Gandhi National Centre for the Arts

प्राप्नोतीति॥ यत्तु ममस्थानं प्राप्नोति सोहमेव भवति॥ अंजसा अनायासेन इहैव शरीरेन तु ब्रह्मांडभेदाद्यपेक्षा ननु वैकुंठस्य भगवतो वा परमपुरुषार्थत्वं शास्त्रांतरेषु कृपा च विहङ्भंगीति बहुविधोपि संदेहः स्वयं पश्यति तदा निवर्त्तत इति स्व दृष्ट्या छिन्नसंशयो भवति॥ तस्य शास्त्रार्थत्वाय श्रुतिसूत्राभ्यां निरूपितशास्त्रपर्यवसानमाह॥ यद्गत्वा न निवर्त्तेतेति॥ नत्वपुनरावर्त्तते॥ अनावृत्तिः शब्दादिति तत्रैव परिसमाप्तिस्तथ्याः शास्त्रस्य च यत्स्थानं गत्वा महीयो न निवर्त्तत एव॥ योगी च लिंगाद्विनिर्गमे सति लिंगभंगे वा न निवर्त्तते २९ अंतिमजन्मानि योगिनः विघ्नाः संभवंति श्रेयांसि बहुविघ्नानीति स्मृतेः तैर्विघ्नैश्च अभिभूयते तदा कालमतिक्रम्य तत्र गच्छतीत्याह॥ यदेति योगेनोपचितासु निकटमानीतासु मायासु लोमादिषु सिद्धस्य चेतोयदा

प्राप्नोतीहांजसा धीरः स्वदृशा छिन्नसंशयः यद्गत्वा न निवर्त्तेत योगी लिंगाद्विनिर्गमे २९ यदा न
योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेंग॥ अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृ
त्युहासः ३० इति श्रीभागवते महापुराणे एकादशस्कंधे सप्तविंशोऽध्यायः ॥ श्रीगोपालाय नमः ॥

नविषज्जते॥ अनन्यहेतुष्विति निर्विघ्नतेयोगमतिरिक्तो हेतुर्यत्र॥ अनेनायासाभाव उक्तः॥ तदैव मे गतिः स्यात् वैकुंठाख्या॥ फलांतरेणासंबद्धो भुक्तब्रह्मण इवमुख्येफलेनयुज्यते॥ आगतास्वपि सिद्धिषु चित्तं चेन्नयुज्यते॥ अथ तदनंतरमेव भगवत्प्राप्तिर्भवति यद्यपि भगवतो बहुविधा गतिर्भवति सगुणापि तथापीय मात्यंतिकी॥ यत्र च फले मृत्योर्गर्वो न भवति मृत्युर्हि सर्वप्रकारेण फलसाधनप्रमेयप्रमाणेभ्रामयित्वा स्ववशे नयति तस्य यदि सर्वो विपर्यासो व्यर्थो भवति तदा गर्वो गच्छति॥ सदा यत्र मृत्योर्हासो गर्वो नास्तीति॥ अत एवास्मत्रश्रमो न कर्त्तव्यः॥ यस्मिन्नेव शास्त्रे मते वा साधने वा कदाचिदपि प्राणी म्रियते त

---

चित्तं चेद्भगवत्स्यर्षभक्तिज्ञानविरक्तिभिः॥ तदामुख्यसंबंधियुरूपं गमयेत्फलं १ योगेनापि भवेच्चुद्धमितियोगो निरूप्यते॥ अष्टाविंशोध्यायमुक्तः सर्वसाधनसंयुतः २ यत्रैव भगवद्देशः तत्प्रमाणादिकं भवेत्॥ स्वतः प्रवृद्धो हरेर्नान्यः स्वाध्याय इव सर्वथा ३ भक्तिसांख्यज्ञानानि निरूप्य योगं फलपर्यंतं निरूपयति योगस्येति॥ योगो बहुविधः सध्यानो पिद्विविधः॥ सबीजो निर्बीजश्चेति॥ सबीजोप्यनेकविधः नानाविधमर्थध्यानविषयः॥ तत्र भगवद्ध्यान एव चित्तं सन्मार्गे विशति स्वदेवतायाः एव प्रसादात्तदाह॥ सबीजस्य योगस्य लक्षणं वक्ष्व इति॥ निर्बीजो योगो गीतायामुक्तः॥ यतोयतो निःसरतीत्यादिना॥ सबीजस्तु ध्येयसहितः॥ सुगमश्चायं॥ यतस्त्वं च पात्मजा। येनैव विधिना मनः अभ्यस्मेव प्रसन्नं सत् सत्पथे याति। प्रसादस्तस्य स्वदेवताभिनिवेशात्॥ तदैव सन्मार्गं गच्छति॥ स तत्र आत्मनः भगवतो वा मार्गः वेदोक्तो वा॥ १ तत्र पंचविंशतिसाधनान्याह॥ यमनियमरूपालि कृशाराणि कृत्वा सर्वतत्त्वानामतिक्रमार्थे तावंति साधनानि॥ एकेन च साधनेन एकस्यातिक्रमो न भवतीति साधनांतराण्यपि दृश्यंते॥ स्वधर्मेति॥ स्वधर्माणां देहधर्माणां वर्णाश्रमाधिकारसिद्धानां आचरणं य

श्रीभगवानुवाच॥ योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे मनो येनैव विधिना प्रसन्नं याति सत्पथे १ स्वधर्माचरणं शक्त्या वि-
धर्माच्च निवर्त्तनं॥ दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनं २ ॥

थाशक्त्या कर्त्तव्यं न तु शक्तावपि संकोचः शास्त्रमपि यथाशक्त्या[1] तत्कुर्यादिति प्राह विधर्माच्च निवर्त्तनं द्वितीयं साधनं॥ धर्मबाधो विधर्मः यस्मिन् क्रियमाणे स्वस्य धर्मस्य बाधो भवति॥ स यथाधिकारमेव सेयः। यावद्देहोयं तावद्वर्णाश्रमधर्मा एव स्वधर्माः। भगवद्धर्मास्त्वयोपि विधर्माः परधर्मा वा॥ यदा पुनरेतान्संजीवं मन्यते संघातातिरिक्तं तदा दास्यं स्वधर्मः। अन्ये वर्णाश्रमादयोपि परधर्माः। यदा पुनर्भगवद्भावं प्राप्तः तदा लौकिकधर्मा एव स्वस्वभावादिषिर्वगोचर्यादयः स्वधर्मा अन्ये परधर्मा इति॥ चकारस्तु परधर्मादयश्च त्वारोपि संगृहीताः अयं च प्राप्तज्ञान इति स्वशक्त्या भगवत्प्रेरणया स्वज्ञानेन वा ज्ञान बाधमभावे शरीरशक्त्या वाऽभयात्मकस्वधर्मानुष्ठानं न त्वेकतरविरोधि॥ तृतीयं साधनं दैवाल्लब्धेन संतोषः॥ दैवादिति वचनाद्दावश्यकप्राप्तिः सूचिता॥ अलब्धे वा महाहिरिवानयतो निसंतुष्टेदितितात्पर्यं॥ अमेश्वेत्यनिर्देशात्॥ आत्मविदां चरण

[1] यद्देहस्य स्वे

देहिकात्मिक २

तमु२८
३५६ ग्राम्येति॥ग्राम्यधर्मालौकिकाइंद्रियग्रामवंतोवाग्राम्याः॥चकाएतत्स्वधर्मा अपिग्राम्यधर्माश्चेतत्यक्तव्या इति मोक्षधर्मा अहिंसाद्यः॥तेषुर
तिसक्षेत्येतदपिग्राम्यधर्मनिवृत्तिवत्साधनं परधर्मत्वेनाधर्मशंकायांतयोक्तं मितंपरिमितंमेध्यंपवित्रंच अशनं भोजनं कर्त्तव्यं॥श
श्वदितिसर्वदा॥मितमेध्यस्याइनमितिपाठेचर्व्यमेवफलादिकं भक्षणीयमित्युक्तंभवति विविक्तसेकांतसद्देमसभयरहितस्सेव
नं॥ तादृशेदेशेतद्देशंशुद्धंकुर्वन्सेवमानएवतिष्ठेदित्यर्थः २ अहिंसेति॥अहिंसासर्वप्राणिषुकायवाङ्मनोभिर्द्रोहाकरणं॥अ
याचितेष्वल्पद्रोहइतिकेचित्॥अतोपरिहातेस्थातयमिति॥सत्यंयथार्थभाषणं॥अस्तेयंपरस्वग्रहणाभावः॥यावान्योयोगं
साधयतितावदेवपरिग्रहः॥ब्रह्मचर्यमष्टांगं॥तपः कृच्छ्रादि॥शौचंअंतर्बहिः शुद्धिहेतूनांकरणं॥स्वाध्यायोवेदाध्ययनं॥पुरुषा

१ होमसेवनं
२ ॥ ग्राम्यधर्मनिवृत्तिश्चमोक्षधर्मरतिस्तथा मितमेध्यादनंशश्वद्विविक्तैअहिंसासत्यमस्तेयंयावदर्थपरिग्रहः॥ब्रह्मचर्य
तपःशौचंस्वाध्यायःपुरुषार्चनं ४ मौनंसदासनजयः स्थैर्यप्राणजयः शनैः॥प्रत्याहारश्चेंद्रियाणांविषयान्मन
साहृदि ५ स्वधिष्ण्यानामेकदेशेमनसाप्राणधारणं वैकुंठलीलाभिध्यानंसमाधानंतथात्मनः ६
र्चनंभगवत्पूजा ४ मौनमिति मौनंजनैःसहसंभाषणाभावः॥वृथालापपरिवर्ज्जनंच॥सर्द्दचित्तस्याभितोजयः कर्त्तव्यः॥यथाक
दाचिदपिचित्तंपरवशंनभवति॥स्थैर्यमेकनिष्ठाचांचल्याभावः शनैःप्राणजयः प्राणायामादिना इंद्रियाणांचविषयेभ्योव्यावर्त्तनं
बलात्प्रत्याहारेजयश्चचकाएत् विषयान्मोहकान्मनसासहेंद्रियाणां॥मनोवाकरणंप्रत्याहारे॥आहृतानांहृदयेस्थापनं ५
स्वेति॥एतदुक्तंधिष्ण्यानांस्थानानांमूलाधारादीनांएकदेशेनसर्वधिष्ण्येभ्यः प्राणानाकृष्यक्वचित्हृदयादिस्थानेएकदेशेस्व एम०
मनसाप्राणानांधारणं॥इंद्रियादिष्वपिमनसोयोजनं॥प्राणायामादिष्वपि॥एकदेशेवासप्तम्यर्थेतृतीया॥वैकुंठस्यभग ३५६
वतोलीलानामभिध्यानं॥सर्वावस्थासुवैयग्र्याभावः अंतःकरणस्यसमाधानं ६ ॥

॥ ०६ [illegible]
एतानिस्वसिद्धांतेप्रोक्तानिसाधनानिअन्यानिचमतांतरसिद्धानि॥एतैरिति॥सर्वैरेवपथिभिर्मार्गैः असत्पथेलौकिकेमार्गेजुष्टंम
नोबुद्ध्यायुंजीत असन्मार्गंत्याजयित्वा आत्मनिविवेकवत्याबुद्ध्यायोजयेत् नात्रबलंविधेयंअन्यथामनःकलुषितंस्यात्तत्राह॥
शनकैरिति॥जिताश्चप्राणाः इंद्रियाणिचसदासम्पते ७ एवंखंडशःकृतैःसाधनैर्बद्धजन्मसिद्धेःयदामनःइंद्रियाणिप्राणादे
हश्चसिद्धानिभवंतितदाफलपर्यवसायिनियोगेयोजयेत् तदाह शुचौदेशइति बद्धधन आवर्त्तिताः पूर्वोक्ताएवयमनियमा
ज्ञाताः आसनमुच्यते शुचौदेशइति गंगातीरादिदेशेकेशकीटास्थ्यादिवर्ज्जिते॥आसनंचैलाजिनकुशरूपंप्रतिष्ठाप्य अ
भ्यासेनविजितासनोभवेत्॥सर्वाण्येवासनानितत्रशिक्षेत् यदाभवेद्विजितासनः तदातस्मिन्नासनेस्वस्तिकासनमासीनःऋजु
कायोभूत्वासम्यक्योगमभ्यसेत् यावंतिजीवजातानितानितावंत्येवासनानि तत्रस्वस्तिकंपद्मासनंचश्रेष्ठं॥तत्रस्वस्तिकासनेस्थि
एतैरन्यैश्चपथिभिर्मनोजुष्टमसत्पथि॥बुद्ध्यायुंजीतशनकैर्ज्जितप्राणोह्यतंद्रितः ७ शुचौदेशेप्रतिष्ठाप्यविजितासन
आसनं॥तस्मिन्स्वस्तिकआसीनोऋजुकायः समभ्यसेत् ८ प्राणस्यशोधयेन्मार्गंपूरकुंभकरेचकैः॥प्रतिकूलेनवाचित्तं
यथास्थिरमचंचलं ९ मनोचिरात्स्याद्विरजंजितश्वासस्ययोगिनः वाय्वग्निभ्यांयथालोहंध्मातंत्यजतिवैमलं १०
त्वाप्राणस्यार्ज्जवेनगत्यर्थंऋजुकायोभूत्वाप्राणायाममभ्यसेत् ८ प्राणस्येतितस्मिन्नेवाभ्यासेप्राणस्यमार्गंशोधयेत् भौतिकोना
ड्यः मलादिनाआपूरितास्तिष्ठंति ताःपूरकुंभकरेचकैःशोधयेत्॥तत्रवायुंपूरयित्वासंलभ्यकुंभकेननाडीःशोषयित्वापश्चाद्विधम
यन्तोमलंवायुंचरेचयेत्॥एवंपुनःपुनःपूरणादिनाप्राणस्यमार्गंशोधयेत्॥प्राणायामभेदैर्वाकुंभादिभिःशोधयेत्॥प्रतिकूले
नवाशोधयेत् रेचकपूरककुंभकैः किंबहुनायथैवचित्तंचांचल्यंपरित्यज्यस्थिरंभवेत्तथाप्राणस्यमार्गंशोधयेत् प्राणायामे
नैवशोधनंनप्रकारांतरेणकर्त्तव्यं अविहितत्वात्॥नतैःचित्तंशुद्धंभवति ९ मनइति॥एवंकृतेयोगिनःमनोजितश्वासस्य

विजृंभवेत् क्वचित् नतुप्राणायामेनकंपमनःशु
द्धिः नतद्दृष्टांतेनाहं वायुनिग्रहमिति यथालोहंशुद्ध

Indira Gandhi National
Centre for the Arts

ग॰मु॰२८
३५७

सर्वदोषाणांनिवृत्तिप्रकारमाह॥प्राणायामैरिति दोषाःपापानिप्राणायामैर्दूरीकर्त्तव्यानिवातादिजनितदोषान्वाधारणाभिःभगव
न्मूर्त्तिचिंतनैःकिल्बिषान्वासनासहितमहापातकादीन्दहेत् प्रत्याहारेणइंद्रियाणांसंसर्गजनितान्दोषान्दहेत् ध्यानेन
पुनःअनीश्वरान्संसारित्वापादकान् अज्ञानादीन्दहेत् तत्रयेसंसारदशायांगुणाःब्राह्मणशरीरपादकानिअपिकर्माणि
भगवध्यानंदहति ११ यदेति एवंकृतेयदैवस्वंमनोविरजंभवतियोगेनसुष्ठुसमाहितंभवतितदाभगवतःकाष्ठांवैकुंठहृ
दयंवास्वनासाग्रेनिरीक्षणंयस्यतादृशोभूत्वाध्यायेत् अन्यथादृष्टिश्चंचलामनसोव्यासंगमुत्पादयेत्मीलितानिद्रां १२
तत्रभगवंतंध्यायेदितिवदसति कोभगवानित्याकांक्षायांपुरुषोत्तमस्यैतद्रूपमितिमनसातद्रूपंपरिकल्प्यनिरंतरंचिंतनी
यमितितद्रूपंकल्पनार्थमनुवर्णयति प्रसन्नवदनांभोजमितिषड्भिः षड्गुणत्वाद्भगवतः॥प्रसन्नंवदनांभोजंयस्य प्रसादो
प्राणायामैर्दहेद्दोषान्धारणाभिश्चकिल्बिषान्॥प्रत्याहारेणसंसर्गान्ध्यानेनानीश्वरान्गुणान् ११ यदामनः
स्वंविरजंयोगेनसुसमाहितं काष्ठांभगवतोध्यायेत्स्वनासाग्रावलोकनः १२ प्रसन्नवदनांभोजंपद्मगर्भारुणेक्ष
णं नीलोत्पलदलश्यामंशंखचक्रगदाधरं १३ लसत्पंकजकिंजल्कपीतकौशेयवाससं श्रीवत्सवक्षसंभ्राज
त्कौस्तुभामुक्तकंधरं १४
वरदानार्थं॥अंभोजत्वंदृष्टैवसंतोषजननार्थंमधुर्यंच॥पद्मस्यगर्भेस्थितपत्रवत्अरुण
वर्णेईक्षणेयस्य तत्रापिप्रसाद‍ःदोषदूरीकरणंयोगसिद्धिश्चसूचिता नीलोत्पलानांदलवच्छ्यामंसौंदर्यश्रुद्धतयाप्रभा
वश्रृंगाररसरूपताचसूचिता शंखचक्रगदाधरमिति।।अग्निजोवायूनांशुद्धिदोषाभावसंगादिदोषाभावार्थंशंखचक्रग
दानांधारणं १३ लसदिति॥लसंतिपंकजकिंजल्कानीवप्रांतेमुक्ताफलगुंफितंअंतेआरक्तंपरिधानयोग्यार्थंकेसरकारे
णकृतंयत्पीतांबरंतदपिकौशेयंपट्टप्रकृतिकंसर्वदेवत्वंवासोयस्य भगवांस्त्रिभुवनसारभूतःतस्यछंदोमयंगूढरसाख्यरक्तं
मुक्तानरजोगुणांसत्वभेदांश्चगृहीत्वास्थितपीतांबरयुक्तं॥श्रीवत्संवक्षसियस्य योब्रह्मानंदःसहृदयेप्रकाशते॥भ्राज

कौस्तुभेनामुक्ताकंधरायस्य मुक्तान्तजीवान्तश्चतिमियतेन ॥
कंठस्थानकरोति १४

समंततः

एम०
३५७

ग॰प॰दे॰१

मत्तेति मत्तायेद्विरेफाःभ्रमराःतेषांकलापंक्तिर्यत्रतादृश्यावनमालयापरीतंव्याप्तं॥षड्दर्शनीयतांगतैःनिरंतरंलुतयाकीर्त्याव्याप्तं पर
र्धान्यमूल्यानिहारवलयकिरीटांगदनूपुराणियस्य परार्ध्यानिभगवतःसंबंधीनिपंचभवंति भगवद्भक्ताःभगवदर्थंक्लेशाःभगव
दीयज्ञानंभक्तिर्गतिश्चेति १५ कांचीति कांचीगुणेनउल्लसंतीश्रोणिर्यस्य इष्टियांस्त्रीधनाधांसत्वरजस्तमोगुणैःसंसारःसुप्र
सिद्धोभवति॥स्वस्यहृदयांभोजमेवविष्टरंस्थानंयस्य अनेनसर्वप्राणिषुविद्यमानोभगवान्ध्येयःनत्वधिष्ठानादिषुपरि
च्छिन्नः दर्शनीयतममतिसुंदरंसर्वप्रापंचिकरसविस्मारकं शांतंकामादिसर्वदोषविनाशकंज्ञानमयं मनोनयनयोर्वर्द्ध

मत्तद्विरेफकलयापरीतंवनमालया परार्ध्यहारवलयकिरीटांगदनूपुरं १५ कांचीगुणोल्लसच्छ्रो
णिंहृदयांभोजविष्टरं दर्शनीयतमंशांतंमनोनयनवर्द्धनं १६ अपीच्यदर्शनंशश्वत्सर्वलो
कनमस्कृतं संतंवयसिकैशोरेभृत्यानुग्रहकातरं १७ श्रीगोपालयनमः ॥

नंयस्मात् सकृच्चेद्भावयतिमनंपश्यतिवापुनर्भावनामेवोत्पादयतिदिदृक्षांच अनेनविषयबलादपिप्रत्याहारःसाधितः।
योगज्ञानयोश्चवृद्धिः १६ अपीच्येति अपीच्यंसुंदरंदर्शनंयस्य स्त्रीणामपिविलासत्यामोहदायीतिदर्शनेनैवपर
मानंदजनकंच भगवदनुभवआनंदाविर्भावइतिचसूचितं शश्वदितिवयोवृद्धत्वादिनाकदाचिदप्यन्यथादर्शनं
निवारितं सर्वलोकनमस्कृतंसर्वप्रमाणसिद्धंसर्वफलरूपंच कैशोरेवयसिसंतमिति दशमवर्षमारभ्यषोडशवर्ष
पर्यंतंकिशोरावस्था॥रसप्रादुर्भावलावण्यदूरेअग्रेलावण्यस्फूर्त्तःअनेनदेवोत्तमत्वमुक्तं॥भृत्येष्वनुग्रहार्थंकातरं
सर्वं॥फलदानावश्यकर्त्तव्यंसूचितं १७

Indira Gandhi National
Centre for the Arts

त.सु.२८
३५८

कीर्त्तन्येति॥ कीर्त्तनीयं तीर्थरूपं यशो यस्य भगवानतिकृपालुर्यतः स्वस्य कीर्त्तिं कीर्त्तनीयां तीर्थरूपां चकृतवान्॥ लोके संतिती र्थ्या
नि पापनिवर्त्तकानि न तु तेषां हं बंध आवश्यकः॥ उक्तिविशेषवाक्यानि कीर्त्तनीयानि भवंति लवेपि रसाविष्टः कीर्त्तयति सर्व
पापनाशकं सर्वफलदात्सत्रित्यसंबद्धं भवेत्सर्वोपि कृतार्थः स्यात्तादृशी च कीर्त्तिः किंच स्वकीया नामपि तादृशी कीर्त्तिः संपा
दयतीत्याह पुण्यश्लोकयशस्करमिति पुण्याः श्लोकाः कीर्त्तिर्येषां भक्तानां तेषामपि स्वसमानतां संपादयतीति यशस्करः॥
एवं विंशतिधर्मात्माध्येयो हरिरिहोदितः एकविंशो हि पुरुषः विंशत्यंगुलयः आत्मैकविंश इति॥ एते ध्येया धर्मा विंशतिः॥
स्वयं भगवानेकविंशः एवमेतादृशं भगवंतं निरूप्य तत्र कर्त्तव्यमाह ध्यायेद्देवमिति एवं समग्रांगं वा वयवशः ध्यायेत्॥
स्वयं भगवानेकविंशः एवमेतादृशं भगवंतं निरूप्य तत्रकर्त्तव्यमाह ध्यायेद्देवमिति एवं समग्रांगं वा वयवशः ध्यायेत्॥
यावन्मनः एकमप्यवयवं न त्यजति संपूर्णमेव रूपं स्फुरति तावद्देवं ध्यायेदित्याह॥ यावन्नच्यवते मन इति॥ यावत्संपूर्णा

कीर्त्तन्यतीर्थयशसं पुण्यश्लोकयशस्करं॥ ध्यायेद्देवं समग्रांगं यावन्नच्यवते मनः १८
स्थितं व्रजंतमासीनं शयानं वा गुहाशये॥ प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा १९ ॥

यावन्मनः एकमप्यवयवं न त्यजति संपूर्णमेव रूपं स्फुरति तावद्देवं ध्यायेत्॥ अन्यथा मुख्ययोगेन सर्वदैव स्थिरं भवेत् १८ अ
दंगात्तन्यवतेनोपगच्छति॥ मनस्तु चंचलं नैकत्र स्थिरमिति तत्प्रोक्तं॥ अन्यथा मुख्ययोगेन सर्वदैव स्थिरं भवेत् १८ अ
वस्थासु विकल्पमाह स्थितमिति स्थितमुत्थितं वा ध्यायेत्॥ व्रजंतं वा आसीनमुपविष्टं शयानं वा चतुर्विधेपि गुहाश
य एव स्वहृदय एव सर्वतो विलोकनार्थमुत्थितः कार्यकरणार्थं चलति पूजां गृह्णन्नुपविशति॥ कृतकार्यश्च शेते किंच
॥ प्रेक्षणीयेहितो भगवान्ध्येयः॥ प्रेक्षणीयमीहितं यस्य॥ चेष्टापि भगवानिव प्रेक्षणीया॥ तेन भगवतो बाले गोभिर्गोपाले
गोपिकाभिरन्येष्वनानाविधाः क्रीडा अपि ध्येया इत्युक्तं॥ तत्र क्रीडासु तत्तद्रागेण स्वकामादिना पि ध्यानं संभवतीति तन्नि एम०
वृत्त्यर्थमाह शुद्धभावेन चेतसेति शुद्धो भावो यस्य चेतसः सर्वकामनादिदोषरहितेन एवंविधमरणानिरूपिता १९ ३५८

एकैकावयवस्य रसं ज्ञात्वा तुं ध्यानं निरूपयति तस्मिंल्लब्धपदमिति तस्मिन्संपूर्णे लब्धपदं तत्र स्थिरीभूतं चित्तं सर्वावयवेषु सुप्रति
ष्ठितं विलस्य ज्ञात्वा व्यतिरेकतया वा लक्षयित्वा किंचिन्न्यूनं ज्ञात्वा भगवतः एकस्मिन्नेवांगे संयुज्यात् यतोयं मुनिः युक्तोवपद्य
र्थान्स्थिरीकृत्य ध्यायति अतोत्राप्येकैकस्यावयवस्य माहात्म्यं ज्ञात्वा सर्वज्ञानं करिष्यतीति भावः २० तदेवमंगं निरूपयति
त्रयोदशभिः मतांतरत्वात्संवत्सरात्मकः स इति अतिक्रमस्य वक्तव्यत्वात्तत्र प्रथमं चरणारविंदं तद्गुणविष्कारेणावर्ण्यं
ति द्वाभ्यां स्वतः कार्यं तच्च माहात्म्यप्रतिपादनेन तत्र प्रथमं स्वतो माहात्म्यमाह संचिंतयेदिति भगवतश्चरणारविंदं सम्यक्चिंतयेत्॥
सम्यक्त्वं दीर्घकालादरनैरंतर्यं माहात्म्यज्ञानपूर्वकत्वं च चरणे भक्तिप्रतिपादकः॥ अरविंदं सर्वतापनाशनं वज्रांकुशध्वजसरोरुहलांछ
नाढ्यं चिह्नचतुष्टयेनाढ्यं संपन्नं भक्तानां पापपर्वतपक्षच्छेदनार्थं वज्रः॥ भक्तानां मनोगजवशीकरणार्थमंकुशः अत्र स्थितानां सर्वभय
नाशनज्ञापनार्थं ध्वजः सुखसेवार्थं चांबुजं एतानि लांछनानि विविक्तानि चतुर्विधपुरुषार्थज्ञापकानि एतादृशान्यनंतानि चिह्नानि सं
संचिंतयेद्भगवतश्चरणारविंदं व

तस्मिन्लब्धपदं चित्तं सर्वावयवसंस्थितं विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः २०
ज्रांकुशध्वजसरोरुहलांछनाढ्यं उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारं २१ ॥

तीति आकूतं ज्ञापयति अनेन भजनीया गुणा उक्ताः फलदातारः॥ दोषनिवर्त्तकानाह॥ उत्तुंगेति॥ उत्तुंगा निरक्ता नियानि विलसंति न
खानि तेषां चक्रवालं मंडलं तस्य ज्योत्स्नाभिराहतः महतां हृदयांधकारो येन बहिः स्थितेन प्रकाशो नं नीतः स्थितोंधकारो यगच्छति म
हतां चाहंकाराधिक्यं॥ तत्र त्यश्चांधकारः अवश्यं दूरीकर्त्तव्यः॥ स च नैकेन चंद्रमसा भवति सोरश्च प्रकाशस्तापजनकः॥ तेन दशनखा
त्मकाः चंद्रा दशावस्थासु सर्वदोषनिवारकाः उत्तुंगाः ऊर्ध्वतुंगाः अतितुंगेष्वहंकारे विद्यमानमहंज्ञानं नाशयति रक्ताः तदर्थमेवो
धंतः॥ उद्यंतश्चारक्ता भवंति विलासयुक्तत्वान्नियतमप्यावरणं दूरीकुर्वंति यथा कामिन्यावरणं कामुकः॥ स एव विलासः॥ चंद्राभ
वंति परं नखाः नदिशन्तेस्वमाकाशं येषां॥ एक एव चंद्रः आकाशे भासते एते तु नाकाशसंबंधिनः॥ एतेषां चक्रं आयुधं बालं अमृत
पोषकं न तु केवलमंधकारमेव नाशयति वंश अन्तः तमलंपुत्रे तिता कुत्रं करहितं ज्योत्स्नाभिरिति बद्धव चनं नानाविधमंधकार

लिङ्गत्वं स्नातेनसेवनः स्नानं दृष्ट्वा ज्ञानविशेषज्ञानं ॥
दशपरकलांतिरूपितं २१

त-सु २८ एवंस्वरूपोत्कर्षमुक्त्वा कार्यतउत्कर्षमाह यच्छौचेति॥ भगवतश्चरणोपदार्थद्वयं परममाहात्म्यसूचकमस्ति गंगाभक्तिरस्त्वि
३५७ ति तत्र गंगाया माहात्म्यं प्रायश्चित्तानधिकृतानपि सर्वशुद्धान्करोति तदाह यमोः चरणयोः शौचे प्रक्षालने सति निःसृतं यज्जलं त
त्सरित्प्रवरा जाता सरितां मध्ये गंगा श्रेष्ठा तस्याः यदुदकमेकदेशः तेनापि मूर्ध्नि निहितेन अधिकारवत्त्वाभावेन शिवः कल्याणरू
पोपि शिवोभूत् यत्सुसाधनेन न सिद्धमेव स्वरूपं प्राप्नोति स आधिदैविकं प्राप्नोतीत्यध्यवसीयते अपहतपाप्मन एवैतत्साम

यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोभूत्
ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदं २२

र्थ्यमाधिदैविकत्वप्रापणं॥ यथा स वाचमेव प्रथमामत्यमुच्यत स वागग्निरभवदिति॥ एवं शिवोपि स्वां देवतां प्राप्तवान्॥ अ
न्यथा भगवतद्वतस्य तत्त्वं तत्र तानसात् प्रमाणादि च तुष्टयेनापि॥ अतो गंगा तस्याधिदैविकं रूपं प्रापयतीति चरणसंबंधिनामपि
यत्रैतन्माहात्म्यं तत्र साक्षाच्चरणस्य ध्यातस्य तथात्वसंपादकत्वं किं वक्तव्यमिति भावः॥ एतच्च गंगाया माहात्म्यं न गंगाजलस्य नापि एम०
तदभिमानिन्या देवतायाः शिवापेक्षया अन्येषामचेतनाधिष्ठातृदेवतानां हीनत्वात् किंतु भगवच्चरणस्य च मलस्यैतन्माहा ३५७
त्म्यं तानि रजांसि पूर्वं निरूपितानि॥ भक्तानां पुण्यानां संस्कृतभौतिकानीति ता ॥

निचरणस्य मलरूपाण्येव भवंति अन्यथा सेवकरूपदेहोत्पत्तिर्न स्यात् अत एव तज्जलं शौचे पादप्रक्षालने सति तद्रजःसहितं निःसृ
तं महत्वात् रजःसंबंधात् देवताशरीरं तज्जातमित्याह सरित्प्रवरेति निःसृता सरित्प्रवरा जाता सर्वभक्तोद्धारणार्थं उपायभूता
सा चेद्रजोविशिष्टा धृतास्यात् तदा भक्तानां देहोत्पत्तिर्न स्यात् इत्युदकमेव निरूपितं॥ तस्मिन्नुदके रजःसामर्थ्याभावे शिवत्वसंपा
दकत्वं न स्यादित्याशंक्य तीर्थत्वमाह तत्साधारणमेव सर्वजगतामाधिदैविकत्वसंपादकरूपं तीर्थजातं॥ नन्वेतेन जलेन आधि
दैविकत्वमेव कुतः संपादितं यावद्दृष्टिमनुष्याणां इत्यादिवाक्यैः फलसाधकत्वं च श्रूयते तत्राह मूर्ध्न्यधिकृतेनेति मूर्ध्नाउ
त्तमांगे शिरःस्वमस्तके तज्जलमधिकारीकृतवान् अतउत्तमांगेभ्यस्य सर्वाधिकारं दत्वा स्थापितवतः साधारणं फलं प्रयच्छ
तिसर्वस्वनिवेदने आधिदैविकत्वप्रणामेव युक्तौ शिवत्वादेव न पापादिसंबंधः। अमंगलरूपस्यैव भजनीयत्वात्॥ नापित
दूपनिवृत्तिः॥ अत आधिदैविक एवायं जातः माहात्म्यांतरमाह ध्यातुर्मन इति यो ध्यायति तस्य मनसि ये शमलशैलाः
पापपर्वताः तेषां मर्थे विसृष्टो वज्रो येन भगवतश्चरणे ये चवज्रादयो निर्मिताः॥ तत्र चरणो ध्याने परमासक्तियुक्तान्
प्राणिनः पापेनातिगुरुतरान् मत्वा बहुजन्मार्जितपापपर्वतान् दूरीकरोति अनेन भक्त्यधिष्ठात्री देवतेयमिति निरूपि
ता॥ पद्मपातोपि निरूपितः एवमंकुशादिकार्यमपि करिष्यतीति सूचितं मनःपदेन ध्यानस्य तत्र संबंधस्तत्संबंधिन एव
पापं नाशयतीति तथोक्तं न तु देहपापं नाशयतीति देहस्याग्रे गमनापेक्षाभावाच्च पापानामतिदार्ढ्यप्रचयात्पर्वत
त्वं एवं भगवतश्चरणमाहात्म्यं ज्ञात्वा चरणं ध्यायेत् चिरध्यानेमनसोप्याधिदैविकत्वमापद्येत उपसंहारेपि भगवत
श्चरणारविंदकीर्त्तनमध्ये पदार्थांतरध्यानमाहृत्यर्थं प्रत्येकध्यानानि गुरुध्यानं वा निवारितं २२ ॥

Indira Gandhi National
Centre for the Arts

न॰सु २८
३६०

चरणध्यानानंतरंजानुद्वयंध्यायेदित्याह जानुद्वयमिति जानुद्वयस्यमाहात्म्यंसर्वजगत्फलरूपायाब्रह्मानंदरूपायाश्चसेव
कत्वेन यथावासुवर्णेमरकतमणिर्योजितःस्वरूपतोपिसुंदरोभवति जानुद्वयस्योर्वोर्निरूपणात्शयानोभगवान्लसते॥
शय्यागताचलक्ष्मीः अनेनतस्यामनुग्रहोपिसूचितः अतस्तज्जनितश्रमस्तयैवदूरीकर्तव्यः जलजलोचनयेति कमलन
यनयातद्दसौंदर्यनिरूपणायोक्तं दोषाभावायतथात्वप्रयोजनायवाह अखिलस्यजननेति अन्यथाजगत्सृष्टि
र्नस्यात् ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहं संभवःसर्वभूतानांततोभवतिभारतेतिभगवद्वाक्यात् लक्ष्मेति साज्ञानश
क्तिरित्यपिसूचितं लक्ष्यधनतुनिष्पन्नत्वात्॥ अनेनमातापित्रोर्ध्यानंनिरूपितं॥ तस्याध्यानंयोगिनोनकर्त्तव्यमितिकीया
माह सुरवंदितयेति॥ सर्वैर्देवैर्वंदितासापरमादेवता अतोध्येयादेवताध्यानाभावेइष्टसिद्धिर्नस्यादिति ऊर्वोर्हिभयोर्निधा

जानुद्वयंजलजलोचनयाजनन्यालक्ष्म्याखिलस्यसुरवंदितयाविधातुः॥ ऊर्वोर्निधायकरपल्लवरोचिषायत्संवाहितंहृदिविभोरभवस्यकुर्यात् २३ ॥

नंलक्ष्म्याःकृतकृत्यताभावनार्थंस्नेहाधिक्येकभा
वनार्थंच निधायेतिभगवच्छयनंलसते॥ भगवदपेक्षाभावोवा करपल्लवाःअंगुलयःतेषांरोचिर्दीप्तिःलीलयाशनैःस्था
पनं अन्यथाभगवज्जान्वपेक्षयोरुकरपल्लवयोःकठिनत्वात्पीडास्यात्॥ यथाशीतलस्पर्शेनतापोगच्छतितथाहस्तानं
दस्पर्शतःप्रवेशेनैवश्रमोगच्छतीत्यर्थः॥ यत्प्रसिद्धंजानुद्वयंएतद्हृदयेभाव्यमिति॥ ननुबहिःस्थितंमनसास्मर्त्तव्यं नन्वत्ले
हृदयेकथमेषांभावनाभविष्यतीत्याशंक्याह विभोरिति॥ सहिसमर्थोध्यातोहृदयंपुष्कलंकर्त्तुंसमर्थः॥ ननुसंसारएवनिरू
पणात्किमेतादृशेनध्यानेनेत्याशंक्याह॥ अभवस्येति॥ नविद्यतेभवःसंसारोयस्मात्योहिभगवद्धर्मःसजातीयःसतस्याधिदै
विकइतितन्नाशसमर्थोभवति॥ यथातस्याऽरणेरेवतत्रोत्पन्नोग्निर्दाहकोभवति नह्यन्योविजातीयंदहति॥ अतएवपुराविदां

॥ २३
श्री २
एम॰
३६०

तथोरूध्यायेदित्याह॥ ऊरूइति॥ गच्छन्भगवान्गरुडाधिरूढोध्येयः॥ गरुडपृष्ठेउपविष्टःस्कंधयोर्लंबितपादःगरुडहस्तयोःस्थापित
चरणोभगवान्तस्यऊरूध्येयौ॥ सुपर्णभुजयोरध्युपरिअधिकंशोभमानौ यथादिव्येंद्रनीलमणेअधिकःप्रकाशोभवति॥ तथार्तुजो
निधी॥ अतसिकापुष्पवदवभासोययोः॥ नितंबबिंबमपिध्येयमित्याह॥ व्यालंबीति॥ विशेषेणआलंबियत्पीतंबरमुत्कृष्टंवासःत
स्मिन्वर्त्तमानायाकांचीतस्याःकलापःसमूहः॥ बहुसूत्रनिर्मितत्वात्चित्ररूपाणिवा॥ मयूरकलापसदृशयट्टकयुक्तावाकांचीत
स्याःपरिरंभयुक्तंनितंबबिंबं॥ गरुडोहिकालात्मा॥ ऊरूचदेत्योत्पत्तिस्थानभूतौतेषामाधिदैविकमूरुद्वयंतत्कालाधीनगतिमत्॥
कालस्यस्कंधद्वयंकर्मस्वभावौ कालस्याप्ययंगरुडआधिदैविकः॥ अतएवसुपर्णत्वं॥ अधिकशोभमानत्वंकालकर्मस्वभावोपम
र्दनेनतद्भावनायांस्वस्यापितथात्वंभविष्यति॥ यथासंसारनिवृत्तिःपूर्वफलति तथात्रस्वभावादिजयःसुपर्णएवस्थितमितिनि

ऊरूसुपर्णभुजयोरधिशोभमानावोजोनिधीअतसिकाकुसुमावभासौव्यालंबिपीतवरवाससिवर्त्तमानकांचीकलापपरिरंभिनितंबबिंबं २४ ॥

तंबबिंबमुख्यतयाकालातिक्रमहेतुः॥ अनेनविश्वातिक्र
मोपिविश्वरूपभगवद्भावनयेत्युक्तं॥ वेदेश्वकालातिक्रमरूपमाश्वादितंवेदव्यवहितमेवयज्ञादिकंकालसंबद्धंभवतीतिकर्मणांकालो
पाधिकत्वं॥ अहोरात्रातिक्रमोग्निहोत्रेण मासातिक्रमोदर्शपूर्णमासाभ्यां॥ एवंऋत्वतिक्रमश्चातुर्मास्यैः॥ अयनातिक्रमःपशुना॥
वर्षस्यातिक्रमःसोमेनेति जगज्जननहेतुस्थानंच॥ तद्ध्यानेनैवजगतिजन्मातिक्रमश्च ऊर्जोनिधित्वंतेजसोतिक्रमाय॥ अत
सिकापृथिवीजलात्मिकातत्रयोनीलोभावःपुष्पस्यतत्पृथिव्याःयःशुक्लःसजलस्य॥ अतस्तत्पुष्पावभासत्वंतदुभयातिक्रमाय॥ भ
गवांस्तुसर्वैरेवोपमीयतइतिनप्राकृतोपमादोषः विशेषेणपीतांबरस्यलंबनात्आच्छादनाधिक्यख्यापनाय॥ वेदोहिबहुपरिकरोभति॥
पीतोयर्थःधर्मसहितःसश्रुतिरूपीभवतीतिअग्निवेदाभ्यांकर्मसाध्यते॥ आवरकसौंदर्येणैवव्यामोहार्थंवरत्वं॥ वासश्चाच्छाद
कतत्रैवमायाव्यामोहयति कांचीमाया॥ कलानोऽगादेर्विर्तं॥ तत्परिरंभोऽगादेर्निमनननार्थंवितन्नपाधिदैविकत्वाय

Indira Gandhi National
Centre for the Arts

ततोनाभीह्रदंध्यायेदित्याह नाभीह्रदमिति॥शयानएवभगवान्ध्येयइतिलक्ष्यते॥तादृशेएवरूपेभगवतोनाभिकमलात्ब्रह्मोत्प
द्यतइति॥ह्रदत्वेनातिगंभीरत्वंसर्वजीवाधारत्वंच॥तस्मिन्नेवध्यातेभौतिकोजीवभावोगच्छतीति॥भुवनात्मकोयःकमलकोशःत
गुहागुप्तस्थानंतादृशंभगवदुदरं उदरेहिजगत्तिष्ठति॥कोशस्थितश्चजनजलादिभिरूपहन्यते॥तथाभगवदुदरेस्थिताःप्राणिनः
नसंघातैरुपहन्यंते एतावतातुंदिलोभगवानितिज्ञापितं॥तादृशस्यैवोदरमध्येतथानाभिर्भवति॥नाभेर्माहात्म्यमाह यत्रेति॥

नाभीह्रदंभुवनकोशगुहोदरस्थंयत्रात्मयोनिधिषणाखिललोकपद्मं मूढं
हरिन्मणिवृषस्तनयोरमुष्यध्यायेद्द्वयंविशदहारमयूखगौरं २५ ॥

आत्मयोनेर्ब्रह्मणःतस्याधिषणाबुद्धिःआध्यात्मिकंरूपंतदेवअखिलंलोकात्मकपद्मं॥नाभौब्रह्माबुद्धिःपद्मंचेत्याधि
दैविकादयःत्रयोपिनाभौनिरूपिताः॥भगवतःस्तनयोर्द्वयंध्यायेत् हरिद्वर्णमणिवृषौयोस्तनौहरिन्मणिःकामपूरकः
चिंतामणिःतत्रश्रेष्ठोभगवद्धर्मलक्षणःसउभयविधोपिद्वयत्वेनोक्तः॥तस्यमूढताभगवदवयवेभ्यःस्वतंत्रतयाप्रकाश त्म॰
मानत्वं विशदोयोहारोमुक्तानांविशदानांनिर्मलानांवायोहारःतस्यमयूखैर्गौरं॥भगवद्धर्माःमुक्तादिभिःपरिवेष्यमा ३६१
नाःसर्वेषांराग्हेतवोभवंति॥विशदत्वंनानायोगचर्याद्यभावः॥अलौकिककरणभावोवा २५ ॥ ॥

ध्यानविषयत्वेहेतुः= वैदिको मुक्तात्मभिमुनिभिः

वक्षोभावयेदित्याह॥वक्षोधिवासमिति॥ऋषभस्यवक्षःमहाविभूतेःस्थानंनिवासः॥पुंसांमनोनयनयोर्निर्वृतिमादधानं॥वक्षोहिस्वरू
पतःकार्यतश्चसर्वोत्तमंतत्रस्वरूप माहऋषभस्यश्रेष्ठस्येति श्रेष्ठताहिह्रदयधर्मातभवति यादृशमंतर्हृदयंतादृशमेवगोलकंभ
गवति भगवतस्त्वानंदमयत्वेनैवंविधेपिभेदोविद्यते अतोयावंतोभगवद्गुणाःपुरुषोत्तमत्वज्ञापकाः तेसर्वेवक्षसीति॥स्वप
मसंबंधेनैवस्वरूपमाहात्म्यमुक्तं कार्यतोमहात्म्यंद्विविध ऐहिकंस्त्रीधनाद्यात्मकं पारलौकिकंपरमानंदहेतुत्वं तत्क्रमा
माह विभूतेर्लक्ष्म्याःसर्वैहिकपुरुषार्थरूपायाःनिवासंस्थानमिति॥आनंदोपिबाह्याभ्यंतरभेदेनद्विविधःतदुभयमाह म

वक्षोधिवासमृषभस्यमहाविभूतेःपुंसांमनोनयननिर्वृतिमादधानं कंठंचकौ
स्तुभमणेरधिभूषणार्थंकुर्यान्मनस्यखिललोकनमस्कृतस्य २६ ॥

नसोनयनयोश्चनिर्वृतिमासमंतादृधानमिति कामादिकृतदोषवशात्तथात्वंवारयति पुंसामिति॥बहुवचनंकाकता
लीयमुद्रासाय सर्वेषामेवपुंसां॥कंठंचध्यायेदित्याह॥कंठमिति॥कंठोहिद्विविधःवाह्यःआभरणाधारभूतःआंतरः
सर्ववेदोद्गमहेतुः जगद्गुरुःआभरणानिचातिप्रियाणिकंठेधार्यंतेभगवतस्तुभक्तभक्तापेक्षयाभाग्यःप्रियइतितेषांतत्व
रूपस्यकौस्तुभमणेःअधिकभूषणमर्थोयस्यमणिनाहिकंठोनभूष्यतेकिंतुकंठेनमणिसुवर्णादिकंतस्यापिभूषणंभवति
तच्छ्रात्तत्पर्यमधिकभूषणमित्युक्तं॥चकारात्स्कंधद्वयमपि॥अखिललोकनमस्कृतस्येति॥वेदोद्गमहेतुःअखिलगुरु
र्भगवान्निरूपितः २६ ॥

Indira Gandhi National
Centre for the Arts

ग॰मु २८ ३६२ बाहूंश्चध्यायेत्॥चकारात्बाहुस्थितादेवाः बाहवोहिअमृतमथनेव्याप्रताःदेवेभ्योऽमृतंपायितवंतःतथावलयाल्लत्रवेष्टनरूपाः
पुरुषार्थाःमंदरगिरेःपरिवर्त्तनेनपरितोभ्रामणेननिर्मिक्ताविश्रम्योयंमिलितानिद्यर्षणोज्वलीकृतानिबाहुवलयानियै
र्वा अधिकृतालोकपालाश्चयेषु तेषुहलेषुचचक्राद्यायुधानिध्येयानि तत्रप्रथमंसुदर्शनंध्येयमित्याह संचिंतयेदिति॥
दशशतारंचक्रंदशशतान्यारायस्य॥कालचक्रंनिर्दिष्टं शतमित्यपरिमितनाम दशप्राणाभवंति प्रत्येकंदशानांशतान्या
राःकालावयवाभवंति तेनसर्वप्राणहारिकालात्मकंसुदर्शनंचक्रं प्रतीकाराभावमाह असत्यतेजइति तस्यतेजःयदुर्मयः
कालगुणंस्थलोद्धाप्रतीकारःकर्त्तव्यः॥तद्देवत्वसत्यं शंखंचध्यायेत् चकारात्सर्ववेदांश्चतद्गतान् तस्यभगवतःकरस
रोरुहेकरकमलेराजहंसरूपं॥भगवतओष्ठकांत्याआद्यंतयोरक्तिमासश्च्छ्वेतिलोहितासचरणःकूजन्हंसःकरमध्य

वादनी? बाहूंश्चमंदरगिरेःपरिवर्त्तनेननिर्मिक्तबाहुवलयानधिलोकपालान्॥संचिंतयेद्दशशतारमसह्यतेजःशंखंचतत्कर
सरोरुहराजहंसं २७ कौमोदकींभगवतोदयितांस्मरेतदिग्धामरातिभटशोणितकर्द्दमेन मालांमधुव्रतवरूथगि
स्थोनिरूपितःसहिक्षीरनीरविवेककर्त्ताभगवत्मीतिबोधकश्च॥२७॥रोपघुष्टांचेतस्यतत्वममलंमणिमस्यकंठे २८
कौमोदकीमपिस्मरेत्॥सात्यास्यरूपेतिभगवतःप्रियाअमहतयाप्मत्वात्सर्वदैत्यहननहेतुरुक्ता॥तदाह दिग्धंव्याप्तंअरातीनां
शत्रूणांयेभटास्तेषांशोणितकर्द्दमेन॥यथानिःपापःपुरुषोमहान्भगवत्प्रियः एवंदैत्यहंतापिभगवत्प्रियोभवति मालामपिध्या
येत्॥मधुव्रतसमूहगिराउपघुष्टां मधुव्रताःमनोहरनियमयुक्ताःमध्विवव्रतंयस्येतिवेराअपिभगवत्मतियादृनमेवकुर्वंती =
तितेषांसमूहःसएववेदःतेषांगीर्धर्मज्ञानरूपातयाउपघुष्टाभगवत्कीर्त्तिर्भवतीति यद्धर्मादिभिर्नभवतितत्कीर्त्याभवतीति एम॰
मालायाःकंठएवस्थानमिति॥पूर्वोक्तएवकंठःकौस्तुभभूषणत्वेनोक्तःपुनःस्मर्यते॥चेतस्यचित्ताधिष्ठातुर्जीवस्यतत्वंयत्संघाते ३६२
अप्रविष्टंनिजंरूपंसएवकौस्तुभमणिःतदस्यभगवतःकंठेमालांचकंठेध्यायेदितिसंबंधः॥भक्तैःसहभगवत्कीर्त्तिर्वेतियावत्

अतःपरंवदनारविंदंध्यायेदित्याह॥भृत्येति तदेववदनारविंदंध्येयंयत्सर्वजन्यंतदेवचसर्वजनीनंभवतियदिभूमाववतरति॥
अवतारश्चतदेवभवेत्यदिभृत्यानांदुःखंभवति॥तदाह॥भृत्यानामनुकंपनधियागृहीतामूर्त्तिर्येन अवतीर्णस्मात्पथाशंकायु
दासायाह भगवतइति॥दृष्टिमात्रेणैवतापापनोदारविंदत्वं॥तन्मुखारविंदमनुवर्णयतिसार्द्धेन॥यद्विस्फुरदिति॥यन्मुखा
रविंदंविशेषेणस्फुरतीमकराकृतेकुंडलेताभ्यांमंडितेनगंडयुगलेनःवलितेनेतिपाठेमकरकुंडलयोर्यद्वलितंचालनेनोत्पन्नंते

भृत्यानुकंपितधियेहगृहीतमूर्त्तेःसंचिंतयेद्भगवतोवदनारविंदं॥यद्विस्फुरन्मकरकुंडलमंडिते
नविद्योतितामलकपोलमुदारनासं २९ यच्छ्रीनिकेतमलिभिःपरिषेव्यमाणंभूत्यास्वयाकुटि
लकुंतलवृंदजुष्टंमीनद्वयाश्रियमधिक्षिपदब्जनेत्रंध्यायेन्मनोमयमतंद्रितमुल्लसद्भ्रु ३० ॥

जःतेनविद्योतितौअमलकपोलौयत्र॥उदारनासायत्र २९ यत्श्रीनिकेतमिति यत्पुनर्मुखारविंदमलिभिःपरिषेव्य
मानंस्वयैवभूत्याअसाधारणकांत्याचपरिषेव्यमानं॥कुटिलानांकुंतलानांवृंदैर्जुष्टं मीनद्वयस्यश्रियमधिक्षिपत्दूरी
कुर्वत्अब्जसदृशंनेत्रद्वयंयत्र॥मनोमयंसर्वेषामेवमनोमितत्रनिरंतरंवर्त्ततइतिमनःप्रचुरं।अतंद्रितंसावधानंतथा
उल्लसंत्यौभ्रुवौयत्र एवंनवविशेषणानिमुखेनिरूपितानिनवरसजननाय सर्वेषांवशीकरणाय॥नव विधभक्तिश्चा
निरूप्यते॥मुखंत्वानंदरूपस्यभगवतोभक्तिरसात्मकंफलंभवति॥ विषयश्चरणौ ॥ श्रीगोपालयनमः ॥
...नवनक्तिविषयभक्तौचरणावपीत्यर्थः ?-

Indira Gandhi National
Centre for the Arts

त॰सु॰२८
३६३

आश्रयोजीवः नवरसास्वपिमुखेअभिव्यक्तानि कपोलौचभक्तिरसानुभवेभक्तानांसमाजस्थानमेवभवति तत्रक्रियापएज्ञा
नपएश्चभक्ताउल्लसंति यांव्योगौमकरकुंडलेशास्त्रंप्रमाणंश्रोत्रेअनुभवरूपंचचक्षुः शास्त्रप्रमाणयोर्व्योगयोःयोय भक्तेः
मनुभावः तद्वल्लितेनविद्योतितत्वंक्रियाज्ञानशक्त्याविर्भावःउन्नमभक्तानांपरस्परंश्रोतृणांसमाजत्वात्मलत्वं अनेनअ
मनुभावः तद्वलितेनविद्योतितत्वंक्रियाज्ञानशक्त्याविर्भावःउन्नमभक्तानांपरस्परंश्रोतृणांसमाजत्वान्मलत्वं अनेनअ
वणपरिकरोमहान्निरूपितः उदारेनासेयत्रेतिकीर्तनंकीर्तनस्यसर्वपुरुषार्थदातृत्वादुदारत्वं मुखेहिनासिकैवप्रध
नंजगतिसौंदर्यदानात्भगवन्नासिकायाउदारत्वं॥भगवतिस्थितिरेवसर्वेषांपुरुषार्थसिद्धिः स्थितिप्रतिपादिकाच्या
नासिकायाउदारत्वं श्रीनिकेतमितिलक्ष्म्याःस्थितिःस्मितिरूपा भक्तौश्रीःस्मृतिरेव।अलीनांपरितःसेवनंप्रकारं
नरेणभक्तानांपादसेवनं स्वयाभूत्यासेवनंचार्चनंस्पष्टमेव कुटिलानिवक्राणिकुंतलानिवंदनात्मकानिभवंति वंदनेहि
पुरुषःकुटिलाकृतिर्भवति अन्यथाभगवतिकुटिलानांस्थितिर्नस्यात् कुंपृथिवीतरंतीतियथाजलेतरंतोयादृशूपाभवंति
तथैवपृथिव्यांनमंतः॥इदंदृशनादिसंख्याहृतिः तेनापिजुष्टमितिरसनमननंप्रतिपादितं॥दास्यंप्रत्यक्षंपरोक्षमंतर्बहिश्च
॥अंतर्मलदूरीकरणरूपंबहिःसौंदर्यरूपंच मीनानिजलस्थमलनाशकानितद्वमलंबाह्याभ्यंतरभेदेनभवतीतिमीन
द्वयंशोधकंद्वयंपापाविद्यानाशकरूपंदास्यंतुभयसामर्थ्यमधरिपद्भवति आहृतोवर्ण्यमानानुसख्येव रसार्थपरिभ्रा
मणेनतथैवमतीतिःबहिःशोभार्थमब्जमित्याह॥नेत्रद्वयंसर्वानुभवहेतुःतथैवदास्यमिति॥मध्येपुनर्ध्यानिकथनंसप्तानां
स्वाधीनानांमित्रतयाज्ञापनार्थं मनोमयंसख्यं॥नहीश्वरेणवस्तुतःसख्यंभवति॥भुवोरुल्लासः आत्मसमर्पणंभवति फ एम॰
लमुखंचैतल्लक्षणं॥तद्भूविजृंभःपरमेष्ठिधिष्ण्यमितिआत्मस्थानेब्रह्मापिनिवेशितइतियेयथामांप्रपद्यंतइतिवाक्यात् ३६३
आत्मसमर्पणमुक्तंतथाफलनिरूपणेन ३० ॥

लौकिकम् ... ... ...
... ...

एवंनवविधभक्त्यनंतरंभगवतोज्ञानशक्तिंमायाशक्तिंचनिरूपयतिद्वयेन तस्येति भगवतोऽवलोकमधिकंध्यायेत्॥तस्यात्रिष्ट
निवारकत्वंइष्टसाधनत्वंचनिरूपयति अक्ष्णोरवलोकनंलौकिकालौकिकाम्नतरूपं आध्यात्मिकादित्रिविधमपितापमुभयवि
धंनाशयति॥यतःकृपयातापत्रयोपशमनायनिसृष्टं कृपाहेतुर्भक्तिरुक्ता फलार्थमाह स्निग्धंयत्स्मितंभक्तार्थेयोमोहःते
नअनुगुणितं ज्ञानशक्तिसहितानभक्त्यर्थाध्यानेनविरुध्यते॥विपुलप्रसादःस्वतंत्रभक्तिपर्यंतःताव ज्ञानंसिध्यति तद्वदृज्ञा
नमभिर्भवतीतितस्यस्वरूपंज्ञातुंध्यायेच्चिरमित्युक्तं विततभावनातदुपयोगिसर्वपदार्थानांविचारणार्थं गुहायामित्यन्येषांवि
चारणाभावाय ३१ ज्ञानेपिजातेतदुत्तरणभक्तिश्चेन्नभवेत्तदाफलंनभवेदितिसर्वथामोहाभावेभक्तिर्नभवेदितिहासंध्येयत्वेनाह
॥हासमितिभगवतोहासंध्यायेत् अतिक्लिष्टानांक्लेशाभावहेतुत्वात्हरेरित्युक्तं तदाह अवनतायेअखिललोकास्तेषांतीव्रोयः
तस्यावलोकमधिकंकृपयातिघोरतापत्रयोपशमनायनिसृष्टमक्ष्णोः स्निग्धस्मितानुगुणितंविपुलप्रसादंध्यायेच्चिरंवि =
ततभावनयागुहायां ३१ हासंहरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं संमोहनायरचितंनिजमा ३२
शोकोभगवद्विरहजनितःसर्वभक्तप्रत्ययसाक्षीतज्जनिताश्रूणांसागरस्यशोषणंयेन॥ययास्यभ्रूमंडलंमुनिकृतेमकरध्वजस्य
मायामोहेनैवएवंभवति अन्यथानिरंतरमनिर्हतएवतिष्ठेत्॥नचपरमपुरुषार्थहानिरित्याह अत्युदारमिति विरहानिवृत्तिःपर
मपुरुषार्थदायिनी तथापिप्रतीत्यादुःखात्मिकाभवतीतितांनिराकृत्यस्वयमेवतंपुरुषार्थंअधिकारमविसंपाद्यप्रयच्छतीत्युदारेणहा
सः ननुदीनेषुभक्तेषुकथंहासउत्पन्नइत्याह संमोहनायेति मकरध्वजस्यसंमोहनाय मुनयोहिभगवंतंध्यायंति तत्रभग
वदैश्वर्यंदृष्ट्वामुनीनांसर्वस्वहाभवेदितिपूर्वंतैर्निर्जितःकामःबाधकत्वेनभगवत्सांनिध्येउपतिष्ठतितदासचेन्नमुग्धोभवेत्तन्मु
नीनांसर्वमेवकार्यंनश्येदितिकंदर्पसंमोहनायहास्योत्पत्तिः॥सोपिभगवन्मुखसौंदर्यंदृष्ट्वादिंस्मितोमुनीनांमोहंनसंपादयति
निजमाययेति ... इतिकमविकामंमोहयितुंहासस्यबलंनिरूपितं अस्यभ्रूमंडलमभिध्यायेत्॥तस्यापिहासवत्कार्यसाध
कत्वंमन्युरूपत्वात्परंनाशकत्वंदुष्टविषयकतत्वमेव मोहंजीवानांस्वतएवदुःखाभावःभ्रूमंडलध्यानंतुभगवत्कर्तृकइतिद्व

विलसितं॥मकरध्वजस्यनिजमाययाभ्रूमंडलं
विलसितंमंडलीकृतकामुककलाप ३२

निजमायाकरणकं ...

Indira Gandhi National
Centre for the Arts

ध्यानायनमितिभगवतश्चप्रहसितंध्यायेत्॥पूर्वध्यानेषुसर्वदोकव्यामोहार्थध्यानायनमितितत्सर्वेषामेवध्यानानांस्थानं
॥सर्वेहितत्रप्रतिबंधनिवृत्त्यर्थंभगवतःप्रहसितंध्यायंति अत्यानंदेहिभगवतःप्रहसितंभवति तत्सर्वविस्मारकंकालादीन
पिकथंनमोहयेत् बङ्कलाअधरोष्ठयोःयाभाःदीप्तिःलज्जालोभयोःस्वरूपधनसंकोचःकार्यमितितेनकृत्वाअरुणायिता
तनुर्यस्या द्विजाएवकुंदपुष्पाणितेषांपंक्तिर्यत्र॥प्रहसितेहिदंताअपिप्रकटाभवंति॥तेचकुंदपुष्पसन्निभाःपृथिव्यांस्नेह
हेतवोदंताःपुत्रादिस्नेहरूपाःत्रिभिश्चसर्वसंकोचः॥नन्वेतादृशंप्रहसितंस्वात्मानमपिव्यामोहयतीतिकथंध्येयमित्यतआह स्व
देहकुहरेवसितस्येति यदिभगवान्स्वहृदयेप्रकटएवततःस्वस्यमोहोनभवतीतिसिद्धं॥सिद्धेभगवतिमुख्येस्यात्मनिवेदनेआ

ध्यानायनंप्रहसितंबङ्कलाधरोष्ठभासाहरुणायिततनुद्विजकुंदपंक्ति॥ध्यायेत्स्वदेहकुहरेवसितस्यविष्णोर्भ
क्त्यार्द्रयार्पितमनानपृथग्दिदृक्षेत् ३३ एवंहरौभगवतिप्रतिलब्धभावोभक्त्याद्रवद्धृदयउत्पुलकःप्रमोदा
त् औत्कंठ्यबाष्पकलयामुहुरर्द्यमानस्तच्चापिचित्तबडिशंशनकैर्वियुंक्ते ३४ ॥ ॥

ह आर्द्रयाभक्त्याअर्पितंमनोयस्य अपृथग्दर्शनंचात्मनिवेदनं ३३ एवंपूर्णाभगवतिनवधाभक्तिःसिद्धाध्यानेनत
स्यांसिद्धायांमोक्षफलमावश्यकमितितदुत्पादमध्यायमानस्यभगवद्रूपस्यनिवृत्तिमाह।एवंहरावितिा सर्वदुःखनिवर्त्तके वेगिनः ततः
सर्वपुरुषार्थदायकेभगवतिप्रतिलब्धःएवंपूर्वोक्तोभावोयेन॥भक्तेरवांतरकार्यमाह।द्रवद्धृदयइति।यथातापेनहि
मघृतादिकंद्रवतितथाभक्त्याहृदयं तस्यद्रवणेदेहेवैलक्षण्यंभवति॥आनंदप्रतिबंधकस्यहृदयस्यद्रवत्वात्॥प्रमोदे
जातेउत्पुलकोभवतिप्रेमाधिक्यात्कंठनिरोधोपिभवति।ततऔत्कंठ्ययाबाष्पकलाउत्पद्यतेतयामुहुरर्द्यमानःसकला एम०
र्याभक्तौसिद्धायांतच्चापिचित्तस्यबडिशंवशीकरणहेतुभगवद्रूपंमनःकल्पितमितिशनकैर्वियुंक्तेत्याजयति ३४ ॥ ३६४

लौ◆क ... ख्यातः

मुक्ताश्रयमितिअन्यतोनिवृत्तंमनःभगवन्मूर्तिंकल्पयित्वातत्रनिरुद्धंतस्मिंस्त्यक्तेमुक्ताश्रयंनिर्विषयंचजातंआश्रय
मुक्ताश्रयमितिअन्यतोनिवृत्तंमनःभगवन्मूर्तिंकल्पयित्वातत्रनिरुद्धंतस्मिंस्त्यक्तेमुक्ताश्रयंनिर्विषयंचजातंआश्रय
त्वविषयत्वेएतावत्कालमत्रैवस्थिते पूर्वविषयास्तुपूर्वमेवत्यक्ताःभगवद्रसस्यचास्वादितत्वात् इदानींतत्रविरक्तं॥
एवंसर्वथाविषयाभावेनिर्वाणंकारणेलयंस्वयमेवऋच्छति॥अयगच्छति संघातेविद्यमानेनगच्छेदित्याशंक्यदृष्टांत
माह यथार्चिरिति॥दीपार्चिःकाष्ठार्चिर्वा॥विद्यमानायामेवसामग्र्यांशाम्यतितथामनोपीत्यर्थः॥ततःकिमतआह॥आत्मा

मुक्ताश्रयंयर्हिनिर्विषयंविरक्तंनिर्वाणमृच्छतिमनःसहसायथार्चिः आत्मा
नमत्रपुरुषोव्यवधानमेकमन्वीक्षतेप्रतिनिवृत्तगुणप्रवाहः ३५ ॥

नमिति॥उपाधिरूपेअंतःकरणेगतेअत्रैवशरीरेपुरुषोजीवःआत्मानंभगवंतमव्यवधानंव्यवधायकधर्मरहितंस
कंनतुसजातीयमन्वीक्षते॥ननुसत्त्वादिगुणैराध्यात्मिकैर्निरंतरंरागादिप्रवाहाउत्पाद्यंते भगवदीयैश्चविषयाउ
भयोर्व्यवधायकत्वात्कथमेकत्वप्रतीतिः॥ततएवश्रुतिराहनतंविदाथेतिचेत्तत्राह॥प्रतिनिवृत्तगुणप्रवाहइति॥उ
भयविधइत्येके॥अम्यतरइत्यन्ये ३५ ॥ ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰२८ ३६५

एवमात्मज्ञानार्थं चरमा मनसो वृत्तिरपेक्षिता तदभावे ब्रह्मात्मानुभवो न भवति॥ जाते ज्ञाने तन्निवृत्तिमाशंक्याह॥ सोप्येतयेति॥ एवं चमामेव मनसो वृत्तिं स्थापितवान् यत्स्वानुभवार्थं सोपि एतयैव चरमया मनसो वृत्त्या तस्मिन्नेव महिम्नि अपवर्गाख्ये सुख यमवसितो भवति तत्रैव स्थिरो भवति॥ पुनः पूर्ववत् पूर्वावस्थां न प्राप्नोतीत्यर्थः॥ तस्या अवस्थायाः पूर्वं वैलक्षण्यमाह॥ सुखदुःखबाह्य इति॥ वैषयिकसुखदुःखे तस्यामवस्थायां न भवतः ननु चित्तगतं कर्तृत्वादिकं चित्ते लीने आत्मनि

सोप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये हेतुत्वमप्यसति कर्तरि दुःखयोर्यत् स्वात्मन्विधत्त उपलब्धपरात्मकाष्ठः ३६ ॥

स्थं चेत् पुनः सुखदुःखे आवश्यके इत्याशंक्याह हेतुत्वमपीति॥ यथा सुखदुःखे तत्र न स्तः तथा सुखदुःखयोर्हेतुरपि तत्र ना ... पदितवस्तु स्ति॥ यतः सुखदुःखहेतुत्वं असति मिथ्याभूते दृष्टे वा कर्तरि अंतःकरण एव॥ नन्वात्मन्यपि यथा सुखदुःखहेतुत्वं प्रती यत एव तत्राह॥ यत् स्वात्मनि पूर्वमेव विधत्ते इति चित्तगतमेव कर्तृत्वं पूर्वमात्मन्यारोपितं इदानीं तूपलब्धपरमात्मनः का एम॰ ष्ठा स्वरूपं येन॥ अधुना परमानंदः प्राप्त इति नात्मगतकर्तृत्वारोपणेन प्रयोजनं एवमंतः स्थितिः सर्वा निरूपिता ३६ ३६५

स्थात

बाह्यां निरूपयति द्वाभ्यां देहमिति स्वानुपयोगो देहस्थितिश्च भेदेन निरूप्यत इति॥ तत्र प्रथमं स्वानुपयोगमाह देहं तु न पश्यति॥ तत्राभिमानो दूरे तं पूर्वमुपलालितमपि यतोयं चरमः देहोपकारानपेक्षः॥ घटादिवद् पितस्मात्स्थमपि न जानातीत्याह स्थितमुत्थितं वेति॥ यत्र पूर्वमासने स्थितः तत्रैव स्थितः॥ तत्र उत्थितो वेति न वेद यतोयं जीवः स्वरूपं ब्रह्म भावमध्यगमत्॥ गार्हस्थ्यदशायां स्थितं गृहादिकं यथा महाराजत्वे जातेनानुसंधत्ते तद्वदधिष्ठानव्यतिरेकेण कथं देहस्थि ष्ठेऽच्छेदेत्याशंक्याह दैवादुपेतमिति कालादिप्रेरणायैव वासनावशात् देशांतरे उपेतं भवति॥ तस्मादपेतं च॥ असंभा वितं मत्वा दृष्टांतमाह मदिरायाउन्मादः तेनांधो महामत्तः यथा स्वयमेव परिहृतं वासो न वेद किं स्वस्मिन् गतं गच्छति

स्थस्य२५२

देहं तु तं न चरमः स्थितमुत्थितं वा सिद्धो नियश्यति यतोध्यगमत्स्वरूपं दैवादुपेतमथ दैववशादपेतं वासो यथा परिहितं मदिरामदांधः २७ देहोपि दैववशगः खलु कर्म यावत् स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ३८ ॥

अपगच्छति वेति॥ देहं तु नश्वरमिति पाठे नश्वरमित्यनुपयोगे हेतुः॥ ३७॥ देहस्य स्वरूपमाह॥ देहोपीति दैववशगोयं देहः कालकर्मस्वभावाधीनः। खल्विति निश्चये॥ यावत्स्वारंभकं कर्म तावत्सासुः॥ प्राणसहितः स्वस्थित्याद्यर्थं तत्कर्मापेक्षते॥ बहुकालमपि तिष्ठति तथापि तत्रानुसंधत्त इत्याह॥ तमिति प्रपंचसहितं तं देहं॥ अधिरूढः समाधिपर्यंतं योगो येन॥ अनेन नित्यारूढसमाधित्वम् उक्तः॥ तादृशस्य बहिःसंवेदनाभावात् युक्तमेव तस्यादर्शनं॥ किंच॥ स्वाप्नं अयं हि प्रतिबुद्धवस्तुः स्वतः स्फुरितात्मरूपः॥ तत्स्वप्न इव प्रतीतं तु इदं॥ अतो रागाभावात् लौकिकवदनुसंधानं नास्ति ३८

Indira Gandhi National
Centre for the Arts

इदानीं देहादिव्यतिरिक्तं आत्मानं साधयति॥ तदभावे पूर्वोक्तं नैव सिध्येत्॥ यथा पुत्रादिति॥ पुत्रवित्तयोर्लोके आत्मबुद्धिः शास्त्र तश्च आंतरो देहः पुत्रः बाह्यः प्राणा वित्तं॥ तत्र यथा पुत्राद्वित्तादपि मर्त्यः मरणधर्मा पुत्रे वित्ते विद्यमानेपि स्वयं म्रियत इति तस्मात्पृथक्॥ नन्वत्र भेदः स्वतः सिद्धः किमत्र साध्यत इत्याशंक्याह अप्यात्मत्वेनाभिमतादिति॥ येषां तु नात्मत्वेनाभिमतिः ता न्प्रति न साधयामः॥ ये पुनः आत्मत्वमेव मन्यंते तेषामपि देहाद्भिन्न इत्यर्थः॥ एवं देहादेः देहेंद्रियप्राणांतःकरणात्पुरुषो भिन्नः ३९ अत्रात्मनो लोके पृथक्प्रतीत्यभावात् युक्त्यायुक्तमपि न सम्यग्वगतं भवतीति दृष्टांतेन स्पष्टयति यथोल्मु कादिति॥ अग्नेस्त्रयोऽन्ये संबंधिनः आधारभूतं काष्ठं कार्यं धूमः स्वाधारः स्वांशाः विस्फुलिंगाः॥ त्रयोपि अग्नेर्यथा भिन्नाः यद्यप्यग्नित्वेनाभिमताः उल्मुकं ज्वलत्काष्ठं अग्नेरेव राजसं रूपं धूमः तामसमुल्मुकं। विस्फुलिंगाः सात्विकाः॥ स्वसंभवादि

यथा पुत्राच्च वित्ताच्च पृथग्मर्त्यः प्रतीयते अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ३९ यथोल्मुका द्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात्॥ अप्यात्मत्वेनाभिमतात्तथापिः पृथगुल्मुकात् ४० भूतेंद्रियांतःक रणात्प्रधानाज्जीवसंज्ञितात् आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ४१ ॥ ॥

ति त्रयाणां विशेषणं॥ अग्निसंबंधादेवोल्मुकत्वं॥ अन्यथा काष्ठत्वं॥ अप्यात्मत्वेनाभिमतादित्यपि पाठः॥ तथापि पृथगुल्मुका दि धूमादिषु भेदः प्रत्यक्षसिद्धः उल्मुके संदिग्ध इति स एवोक्तः ४० दार्ष्टांतिकमाह भूतेंद्रियांतःकरणादिति॥ भूतानि देहः इंद्रियाणि अंतःकरणं च प्रधानं स्वभावात्मकं॥ जीवसंज्ञितं लिंगशरीरं च स्ववाच्यं॥ एतस्माच्च तुष्टयाद्रष्टात्मा अग्निवत्पृथ क्॥ यतो द्रष्टा इदं च दृश्यं स चात्मा भगवान् भगवत्प्रकृतिकः न तु तत्वप्रकृतिकः॥ अविकृतकार्यत्वादंशत्वाद्वा भगवत्सं बंधेनोक्तः भगवानित्येवोच्यत इति केचित्॥ भगवत्शब्दः कार्येपि वर्तत इति तद्व्यावृत्त्यर्थमाह॥ ब्रह्मसंज्ञित इति॥ ब्रह्मे ति संज्ञा यस्य॥ अतो वेलक्षण्यस्य स्पष्टत्वात् संघातादात्मा पृथक् ४१ ॥ स्क०

३६६

एवं पृथगात्मज्ञानानंतरं यत्कर्तव्यं तदाह॥ सर्वभूतेष्विति॥ यद्यपि संघातात्पृथगात्मा प्रतीतः तथापि परिछिन्नः प्रतीत इति न कार्यसि द्धिः नहि परिछिन्नज्ञानात् अपरिछिन्नं फलं भवति अतः सर्वभूतेष्वेवाब्रह्मस्तंबपर्यंतेषु स्वात्मानं पश्येत् स्वयमेव सर्वत्र वर्तत इति य थास्वस्मिन् आत्मनि अयं देहादिसंघातः केनचित्संबंधेन वर्तते एवमेव सर्व एव संघाताः स्वस्मिन्नेव वर्तंते नान्यस्मिन्नित्यपीक्षेत॥ उप बारात्स्नेहाद्वानैवं द्रष्टव्यमित्याह अनन्यभावेनेति॥ न विद्यते अन्यो भावो यस्य अन्यबुद्धिर्यस्मिन्मनसि न स्फुरति तादृशमनसा ॥ यथा संघाते निरूपितं तथा भूतेष्वपि ज्ञातव्यमित्याह भूतेष्वपि तदात्मतामिति भूतेषु स्वात्मा द्रष्टव्यः भूतानि च स्वस्मिन् द्रष्ट व्यानीति तदात्मता भूतात्मता भूतेष्विवेति पाठे भूतेषु तत्वप्रतीतेः तद्भावापन्नानीति ज्ञानवतो दृष्टांतः ४२ नन्वेकस्य कथं ना नात्वप्रतीतिः कथं वा सुखदुःखाद्युपपत्तिरित्याशंक्याह स्वयोनिष्विति॥ यथा एक एवाग्निः स्वयोनिषु काष्ठेषु नाना प्रतीयते एव

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ ईक्षेतानन्यभावेन भूतेष्वपि तदात्मतां ४२ स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ४३ तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकां॥ दुर्विभाव्यां प एभात्मस्वरूपेणावतिष्ठते ४४ इति श्रीभागवते महापुराणे तृतीयस्कंधेऽष्टाविंशोध्यायः ॥ ॥

कर्त्रादिभेदेन॥ श्वेतरक्तादिभेदेन च॥ तत्र हेतुः॥ योनीनां गुणवैषम्यं आकारे जातिश्च तथा आत्मापि प्रकृतौ विद्यमानः॥ आत्मनः सका शात् यद्यपि तत्वानि जायंते तेन तश्च न तुल्यदृष्टांतता तथापि यदि तेषु प्रविश्योद्भवति तदा दृष्टांत इति ज्ञापयितुं तथात्मा प्रकृतौ स्थित इत्युक्तं ४३ शास्त्रार्थमुपसंहरति॥ तस्मादिति इदं हि शास्त्रं सांख्यं योगस्त्वंगत्वेनोक्तः यथा भक्तिः अतः प्रकृतिव्युदासमेवोपसं हरति इमामनुभूयमानां स्वभावत्वेन स्वां प्रकृतिं स्वसत्तायामेव स्वसंसारप्रसवित्रीं दैवीं भगवत्संबंधिनी विना भगवद्रूपत्वाभं गदम्रावाभावे वा अनिवर्त्यमानां सदसदात्मिकां कार्यकारणरूपामनेकविधां वा अस्त्वापने हेतुः॥ दुर्विभाव्यामिति संबंधानि रूपणे हेतुः अतः दुर्ज्ञेयान्... पराभाय स्वरूपेणैवावतिष्ठत इति शास्त्रं प्रकृतितत्कार्योपधानविलये पुरुष स्वरूपावस्थानं मोक्ष इति सिद्धं ४४ इति श्रीभागवत पुराणे तृतीयस्कंधविवरणेऽष्टाविंशोऽध्यायविवरणं

अध्याय २८ समाप्तिकांड

Indira Gandhi National
Centre for the Arts

एवंज्ञानप्रकरणंसांगंवैमुनिरूपितं अतःपरंतुवैराग्यंचतुर्भिर्विनिरूप्यते १ वैराग्यकारणंकालोपरिच्छेदकईरितः कालस्य
त॰मु २८ भक्तिहेतुत्वंमाहात्म्यार्थंस्तवतोपितत् ततोजीवस्यगतयोलोकशास्त्रविभेदतः लोकोहिद्विविधःप्रोक्तःपरलोकस्तथैहिकः २
३६७ वैदिकोब्रह्मपर्यन्तःकालश्चैवंचतुर्गतिः यावन्निरूपितंसर्वंतत्कालास्पदमेवहि ४ अग्रेसर्वंकालसाध्यमतोवैराग्यहेतुकं॥का
लस्तुसर्वत्रसमःस्वतंत्रैःसविरुध्यते ५ इंडनेतुर्यथासर्वेहरिणैवतथायतः अतःकालवशानांहिवार्त्ताप्रकरणेतथा ६
एकोनत्रिंशदध्यायेकालभक्तिःससाधना माहात्म्यंवापिकालस्यविस्तरेणनिरूप्यते ७ सर्गेयद्यस्यनोत्पत्तिःवैराग्यंनभवे
त्ततः आधिभौतिकभूतादीन्येतानीत्यपिबोध्यतां ८ पूर्वप्रकरणेज्ञानंसांगंतुविनिरूपितं ८ वैराग्याभावेतन्नोपपद्यतइति

देवहूतिरु॰ लक्षणंमहदादीनांप्रकृतेःपुरुषस्यच स्वरूपंलक्ष्यतेमीषांयेनतत्पारमार्थिकं १
यथासांख्येषुकथितंयन्मूलंतत्प्रचक्षते॥भक्तियोगस्यमेमार्गंब्रूहिविस्तरतःप्रभो २ ॥

पूर्वानुवादपूर्वकंवैराग्यहेतुंपृच्छति॥यद्यपिभक्त्यावैराग्यंभवतीतिपूर्वंसूचितंतथापिकीदृशीभक्तिःवैराग्यंजनयतीतिभक्ति =
भेदानपिपृच्छति॥ तत्रप्रथमंपूर्वानुवादमाहसार्द्धेन॥लक्षणमिति॥त्वयामहदादेःप्रकृतिपुरुषयोश्चलक्षणंकथितं
॥येनलक्षणेनस्वरूपमात्मरूपंलक्ष्यते॥ज्ञायते॥अमीषांचस्वरूपंज्ञायते॥अनेनज्ञानोपायःसर्वोप्युक्तइत्युक्तं १ त
त्रप्रमाणमप्युक्तमित्याह यथासांख्येषुकथितमिति सांख्यस्यमाहात्म्यमाह यन्मूलंतत्प्रचक्षतइति॥तत्पूर्वोक्तंल ४
क्षणादिकंयत्सांख्यमूलमितिप्रचक्षते योभगवान्वातस्यसांख्यस्यमूलमितिप्रचक्षते॥एवमनूद्यवैराग्यहेतुभूतां पृ॰ एक॰
भक्तिंपृच्छति॥भक्तियोगस्येति॥प्रेमलक्षणमार्गंनानाविधंविस्तरतोबहुसाधनभेदतोब्रूहि प्रभोइति तथाकथनेसाम ३६७

किंततःस्यात्तत्राह विरागोयेनेति भगवन्नितिसंबोधनंवैराग्यस्यापिभगवद्गुणत्वेनभक्तिसाध्यत्वेपिनदोषइतिज्ञापनार्थंयेनभक्ति
मार्गेणकृत्वापुरुषःसर्वतोविरागोभवेत् इदमेववाक्यमग्रेपियुज्यते भक्तिर्ह्यलौकिकप्रकारेणवैराग्यहेतुः॥लौकिकप्रकारेणवै
राग्यहेतुंपृच्छति आचक्ष्वेति जीवलोकस्यलौकिकप्राणिनोविविधाःसंसरणमार्गाःदेवतिर्यङ्मनुष्यादियोनिषुप्राप्त्युपायाःमम
मह्यं ३ कालश्चवैराग्यहेतुरितितस्यस्वरूपंकथयेत्याह कालस्येति ईश्वरस्यरूपमिवरूपंयस्यसैश्वर्यांशोभगवतःकालस्यापि
तोतःकालस्यस्वरूपंज्ञातव्यं-किंच-परेषांब्रह्मादीनामपिपरोनियंता॥किंच बतेतिहर्षेसर्वेजनाःकालहेतोःकुशलंकुर्वंति
॥कालाद्भयाभावेकोपिकुशलंनकुर्यात् ४ ननुमयासर्वंवक्तव्यमितिकोयंनिर्बंधस्तत्राह लोकस्येति॥लोकस्यनिस्तारार्थं
योगभास्करःकिलत्वमाविरासीः॥अतस्त्वयेवसर्वमज्ञाननिवर्त्तकंचवक्तव्यंसूर्येणेवहिसर्वंतमोबाध्यते ननुलोकाःस्वयमे

विरागोयेनपुरुषोभगवन्सर्वतोभवेत्॥आचक्ष्वजीवलोकस्यविविधाममसंसृतीः ३ कालस्येश्वररूपस्यपरे
षांचपरस्यच स्वरूपंबतकुर्वंतियद्धेतोःकुशलंजनाः ४ लोकस्यमिथ्याभिमतेरचक्षुषश्चिरंप्रसुप्तस्यतम

वस्थाज्ञानंकथंनदूरीकुर्वंतितत्राहमिथ्याभिमतेरिति ((स्यनाश्रयेश्रांतस्यकर्मस्वनुविद्धयाधियात्वमाविरासीःकिलयो
॥मिथ्याभिमतिरभिमानोयस्य अभिमानेनग्रस्तानसन्मार्गज्ञानंतीत्यर्थः॥किंच चक्षुषाहिमा ((गभास्करः ५ ॥
र्गपरिज्ञानं॥लोकास्त्वचक्षुषः॥चक्षुरत्रसच्छास्त्रं॰अन्यथासूर्येणापिनकार्यंकिंचित्॥अतस्तावविवेकार्थमाह अनाश्रयेअ
रक्षकेतमस्यज्ञानेचिरंप्रसुप्तस्यपूर्वापरानुसंधानव्यतिरेकेणसंसारएवरमतः॥तत्रापिकर्मस्वनुविद्धयाधियाश्रांतस्यकर्मश्रांतः
शयानोऽज्ञोयंधःसुप्तस्तमस्यधः॥दीनोभवतिसर्वेषांयेसमर्थादयालवःतेषांयोगप्रकाशेककारकोसीहभास्करः अतश्च
कुरपिप्रयच्छतितमोपिदूरीकरोति॰सुप्तमपिप्रबोधयतिश्रमापनोदंचकरोति॥कर्मासक्तिंचत्याजयतिमिथ्याभिमानंदू
रीकरोति॥आश्रयत्वंनवति दीर्घंचक्षुतार्थंकरोतीति॥अर्थोगोदारेहेतुरयंभास्करः ॥ ॥ ॥

Indira Gandhi National
Centre for the Arts

त.स्कं२९
३६८

तन्मार्गपृष्टवतीतिसंतुष्टः वैराग्यहेतुनोक्त इतिश्रोतृत्वमवगत्यापिप्रीतः मातृत्वादनुरुद्धः तस्मादीनत्वं दृष्ट्वा करुणयापीडितः
॥ अनेनेयं कृतार्थाभविष्यतीतिमहामुनित्वात् ज्ञात्वा अभिनंदनेन संमुखीकृत्य बभाषइत्याह इतीति श्लक्ष्णांमनोहरांमातु
र्वचः तथात्वेनाभिनंद्य तां पुरुषार्थोपयोगिनीमाब भाषेप्रत्युत्तरं दत्तवान् ६ मुख्यांभक्तिं वक्तुमादौ गुणैर्भिन्नांभक्तिमाह भ
क्तियोगइति मार्गैर्मतभेदैः पुरुषस्वभावभेदैश्चबहुविधोभाव्यते यतः स्वभावगुणमार्गेणपुंसांभावोविभिद्यते स्वभावोजी
वभेदनिमित्तः जीवात्मनेकविधाः नानास्वभावाः गुणाः अभिभेदकाः अंतःकरणस्वभावहेतवः मार्गादेशाकालनियमेनदे
हनियामकाः वर्णाश्रमधर्मपाखंडादिप्रतिपादनशास्त्ररूपोमार्गः तेषामाहत्यप्राणिनांभावोविभिद्यते अन्यथाश्रुत्वास्वभा

मैत्रेयउ इतिमातुर्वचः श्लक्ष्णांप्रतिनंद्यमहामुनिः॥ आबभाषेकुरुश्रेष्ठप्रीतस्तांकरुणार्दितः ६ श्री
भगवानु भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यते स्वभावगुणमार्गेणपुंसांभावोविभिद्यते ७ अ
भिसंधाययाहिंसांदंभंमात्सर्यमेवच संरंभीभिन्नदृग्भावंमयिकुर्यात्सतामसः ८ ॥ ॥

ववशादन्यथार्थकल्पयंति तदनुसारिणश्चतथैवप्रवर्त्तंते॥ अतोबहुविधामार्गाभक्तौ ७ तत्रप्रथमं तामसान्भक्तिभे
दानाह अभिसंधायेति शत्रूणांहिंसामुद्दिश्ययस्तुमयिभावंभक्तिंकुर्यात्सतामसोभवति स्वस्माद्दंभेनयः करोतिपरप्रता
रणार्थंसराजसतामसः॥ परसंबुद्धिर्द्धनंचापक्रियतइतितामसत्वं मात्सर्येणपरोत्कर्षासहनेनलोकानामसाधार
णबुद्धिनिहत्यर्थंयोमयिभावंकुर्यात्ससात्विकतामसः अयंभावः आंतरबुद्ध्यात्मकः अभिध्यानरूपस्तमोरूपोवानतुश्र
वणादिरूपः॥ तत्रतस्यानधिकारात्॥ भिन्नदृगिति अभिन्नदृष्टेरप्येतेभावाभवं तीतितद्व्यावृत्त्यर्थमुक्तं॥ यथाहिभ
गवानेववस्तुतःसदसच्चयत् सत्तेनानेननःसर्वेषांतुनाशमुपद्रवाइतिवाक्यात् तामसेमूलंसंरंभीति भगवत्स्तोत्रेषुसर्वे एत ३६८
षांसंग्रहार्थंबहूनिफलान्युच्यंते अतः फलविशेषकामनयैवस्तोत्रादीनांश्रवणंसंभवतीतितामसीभक्तिरुक्ता ८ ॥

एवंराजसीत्रिविधामाह विषयानिति विषयान्स्त्रक्चंदनादीन्यशःकीर्त्तिमैश्वर्यमेववा॥ क्रमेणाभिसंधायगुणैर्भि
न्नोराजसः प्रतिमादौयोमांपूजयेत्सराजसः पृथग्भावइतिपूर्ववत् एवेतिसमुदाययाहत्यर्थेवेतिविकल्पार्थं अ
न्यथाचत्वारोभेदाः स्युः आदिशब्देनसूर्यादयः ९ सात्विकभेदानाह कर्मनिर्हारमिति॥ कर्मणःपापस्यनिर्हारोदूरीकर
णंप्रायश्चित्तमितियावत्॥ पूर्वकृतकर्मणोवारोगादिनापरिज्ञानेननिवृत्त्यर्थंयोभगवंतंयजेतवैदिकतांत्रिकमार्गेणपू
जांकुर्यात्सतामससात्विकः परस्मिन्भगवतिवाकृतानांसर्वकर्मणांअर्पणंसमर्पणमुद्दिश्ययोहरिंयजेत् सराजस
सात्विकः विधानेनभगवंतमिष्ट्वातत्रसर्वाणिकर्माणिसमर्पणीयानीतिवायोयजेत् सतथोक्तः॥ यस्तुनित्यकर्मवद्य

विषयानभिसंधाययशऐश्वर्यमेववा अर्चादावर्चयेद्योमांपृथग्भावः सराजसः ९ कर्मनि
र्हारमुद्दिश्यपरस्मिन्वातदर्पणं॥ यजेद्यष्टव्यमितिवापृथग्भावः ससात्विकः १० मद्गुणश्रुति
मात्रेणमयिसर्वगुहाशये मनोगतिरविछिन्नायथागंगांभसोंबुधौ ११ श्रीगोपालयनमः॥

ष्टव्यएवभगवानइतियजेतससात्विकसात्विकः पृथग्भावः पूर्ववत् १० निर्गुणांभक्तिमाहद्वयेन मद्गुणेति॥ परिच्छेदका
हिगुणाः सत्वादयः भगवद्गुणास्सर्वोत्कृष्टहेतुत्वेनश्रुताः स्वाश्रयंभगवंतंअनवछिन्नमेवबोधयंति अन्यथास्वसउत्क
र्षहेतुत्वंनस्यात्॥ अतःसर्वगुहाशयेमयिभगवतिप्रतिबंधरहिताअविछिन्नायामनोगतिः॥ पर्वतादिभेदनमपिकृत्वा
यथागंगांभःअंबुधौगच्छति॥ तथालौकिकवैदिकप्रतिबंधान्दूरीकृत्ययाभगवतिमनसोगतिः॥ मनसइत्युपलक्षणंदुर्ल
भत्वार्यथाचाकायिकगतिर्गोपिकानांसागतिर्निर्गुणस्यभक्तियोगस्यभगवतिप्रेमगोगतिर्लक्षणंज्ञापकमित्युत्तरेणवास्य
मानसीसापरामता १२=

तमु२९
३६९

स्वरूपमुक्त्वा लक्षणसंबंधमाह॥ लक्षणमिति निर्गुणस्य भक्तियोगस्य तल्लक्षणमुदाहृतं इति प्रमाणं॥ आत्यंतिकभक्ति लक्षणमाह अहैतुकीति सार्द्धाभ्यां॥ या अहैतुकी पुरुषोत्तमे भक्तिः स एव भक्तियोग आत्यंतिकः उदाहृत इति संबंधः॥ पुरुषोत्तम एवं भक्तिर्न तु पुरुषेष्ववतारेषु वा भक्तिश्च प्रेमपूर्विका सेवा हेतुः फलानुसंधानं तद्रहिता अहैतुकी अनिमित्ता वा॥ अनेन सगुणनिवारिता अव्यवहितेति कालेन कर्मणा वा यत्र सेवायामवधानं नास्ति॥ न तु निद्राभोजनादिना वा॥ तस्य सेवाहेतुत्वात्॥ या भक्तिरिति लोकवेदप्रसिद्धा न तु चौर्यादिना विषयान्नं यावद्भगवत्सेवाकरणं १२ तस्या निदर्शनमाह॥

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं॥ अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे १२ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णंति विना मत्सेवनं जनाः १३ स एव भक्तियोगाख्य आत्यंतिक उदाहृतः येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते १४ ॥

सालोक्येति सेवात्यंतिकी या स्वतो रसभावं प्राप्ता सेवनाद्न्यत्फलमंगीकारयति॥ अत्यंतप्रेमोत्पत्तावेवं भवति॥ सालोक्यं वैकुंठे वासः॥ सार्ष्टिः समानैश्वर्यं सामीप्यं भगवत्समीपे स्थितिः सालोक्येप्येवं विशेषः॥ सारूप्यं स्वस्यापि चतुर्भुजत्वं एकत्वं सायुज्यं उतेति तस्य मुख्यफलत्वं ज्ञापयति तदपि दीयमानं न गृह्णंतीत्यत्यंतानादरे दीयमानत्वं स्नेहात् मत्सेवनमिति सेवानंदरूपा जातेति समासाद्बोध्यते॥ यतस्ते जनाः सेवकाः १३ भक्तियोगस्तु सेवनाम॥ स एवात्यंतिक इत्युदाहृतः॥ तस्य सात्यंत्यायभगवत इव फलसाधकत्वमाह येनेति येन भक्तियोगेन त्रिगुणमतिव्रज्य मद्भावाय ३६९

भगवत्त्वायउपपद्यते योग्यो भवतीत्यर्थः १४ ॥ ॥

---

एतस्याः भक्तेः साधनान्याह निषेवितेति चतुर्भिः॥ मुख्यं साधनमंतःकरणशुद्धिः तदंतःकरणं षोडशकलं भवतीति तस्य शुद्ध्यर्थं षोडश साधनान्युच्यंते तान्यपि त्रिविधानि आधिभौतिकान्येव तानि हृतानि अंतःकरणशुद्धिं संपादयंति परमां धर्मार्थं तान्येवाध्यात्मिकानि ज्ञानार्थं शुद्धिं संपादयंति परमां तान्येव च पुनः आधिदैविकानि परमां शुद्धिं संपादयंति भक्त्यर्थं सा च भक्तिरत्यंतिकी इदं वैलक्षण्यं वक्ष्यति मद्धर्माचरणैरनेरिति अन्यथा उक्तानां मद्धर्मत्वेन विहितं तस्मात् अत एव प्रथमं धर्मत्रयमाह स्मार्त्तं श्रौतं तांत्रिकं चेति सार्द्धेन प्रथमं श्रौते रुचिर्न भवतीति स्मार्त्तं विधत्ते॥ स्वधर्मेण परिशुद्ध आशयः पुरुषस्य तत्त्वमनुभवतीति संबंधः एवमन्येष्वपि साधनेषु स्वधर्मो वर्णाश्रमधर्मः देहप्रयुक्तानि यन्त्रः सोपि सम्यक्कृतिनिष्ठं सेवितश्चेत् तेन तत्त्वमनुभवतीति संबंधः एवमन्येष्वपि साधनेषु

निषेवितानिमित्तेन स्वधर्मेण महीयसा क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः १५ श्रीगोपालयनमः

कल्पेन स्वधर्मस्तत्रापि कामनारहितेन॥ तत्रापि सजातीयप्रचयसहितेन। महीयसा त्रिविधगुणयुक्तश्चेत्स्वधर्मः स्नानादिरूपः स्मार्त्तः स तु पार्थिवांशं दोषं दूरीकरोतीति षोडशांशोपकारं करोति॥ एवं क्रियायोगो वैदिको यज्ञात्मकः प्रशस्तः॥ येषु ब्राह्मणवाक्यानि प्रशंसकानि भवंति न तु ब्रह्मदशाहाहीनवत् निंदितान्यपि भवंति। तत्रापि हिंसाप्रचुरं न कर्त्तव्यमल्पहिंसाद्धा बर्हिर्याम पूर्वे आलंभेपिता दशपशुसहायेपि अल्पहिंसा भवति मत्सेवेवाएवनीयतः इति श्रुतेः अतो नातिहिंस्रेण ३६ अयमाध्यात्मिकं दोषं दूरीकरोतीति अयं वाध्यात्मिकत्वात् तच्छोधको भवति १५ ॥ १५

अकृत्रिमक दोर२

नियमादि

जलीदशैः

अनासक्तक्रियाऽ योगादाभिकाऽ

Indira Gandhi National Centre for the Arts

पंचांगभजनमेवयं चाश्रितं त्रेवजातइ मितं तैजसस्यशुद्धिः सर्वचेता १८

त.सु २९
३७०

एवंस्मार्त्तश्रोतादीनां परिसंशुद्धः तांत्रिकेऽभिनिविष्टः पंचांगं भगवद्भजनं करोतीत्याह मद्धिष्ण्येति॥ भगवद्धिष्ण्यान्यधिष्ठानानि
॥धिष्ण्यपदेन प्रमाणमूलकानि श्रीरंगादीनि॥ तेषां प्रथमतो दर्शनं ततस्तच्चरणस्पर्शः ततः पूजास्तुतिरभिवंदनं चेति पंच॥ पंचानां
प्रत्येकसामर्थ्यद्योतनाय बहुवचनं अनेन सर्वतैजसशुद्धिरुक्ता॥ पंचांगत्वं ज्ञातम् इति॥ चतुर्थं साधनमाह भूतेष्विति॥
सर्वेष्वेव संघातेषु भगवद्भावना कर्तव्या भगवानेवैवं जात एवमवस्थ इति वा यथावायोरिति वायोः शुद्धिः साधनांतरं॥
सत्वेन सत्वगुणः साधनं तत्त्रिविधं। सात्त्विककर्मरूपं सतां स्वरूपत्वापादकं वसुदेवरूपांतःकरणसाधकं च॥ अनेनाकाश
शरीरत्वाद्भगवतः तच्छुद्धिरुक्ता इंद्रियशुद्धिमाह असंगमेनेति सर्वसंगनिवृत्तिः कर्तव्या चकारान्नदिशापरित्यागः १६

मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः॥ भूतेषु मद्भावनया सत्वेनासंगमेन च १६ महतां बहुमा
नेन दीनानामनुकंपया मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च १७ आध्यात्मिकानुश्रवणान्नामसं
कीर्त्तनाच्च मे आर्जवेनार्यसंगेन निरहंक्रियया तथा १८

महतामिति स्वापेक्षया महतां बहुमाननं ॥
॥पीडितानां स्वापेक्षयादीनानां पाद्यांतरे स्वापेक्षयाहीनानां अनुकंपा तुल्येषु च मैत्री न तु मात्सर्यं अवगणना स्पर्द्धा च न
कर्तव्येति चार्थः॥ चक्षुषो दर्शनस्य स्पर्शनस्य च दोषा आवर्त्तिताः॥ यमेन नियमेन चेति प्रत्येकं द्वादशविधेनापिक
ऐपादौ शोधितौ॥ अहिंसादयो यमाः स्नानादयो नियमाः॥ चकाराद्धर्मांतरभेदा गृहीताः १७ आध्यात्मिकेति आध्या
त्मिकानां शास्त्राणां सांख्ययोगादीनामनुश्रवणं गुरुमुखाच्छ्रवणं श्रोत्रसंस्कारकं भगवतो निरंतरं नामकीर्त्तनं च वाक्सं एम०
स्कारकं चकाराद्गुणकर्मणामपि मद इति विषयो आवर्त्तितः॥ सर्वत्रार्जवं स्त्वत्र ब्राह्मणसंस्कार उक्तः॥ आर्याणां सतां संगः २७०
जिह्वासंस्कारकः न एवेतररसनिवारकाः अहंकाराभावस्तु मनः शोधकः सुप्रसिद्धः १८ ॥

मद्धर्मेति॥ एते सर्वे ये भक्तिभजनकाः ते मद्धर्माः तैः परितः शुद्ध आशयो यस्य भवति स तदैव पुरुषः अंजसा सामस्त्येन श्रुत
मात्रगुणं मां समभ्येति॥ यथा चिरकांक्षितविदेशगतपुत्रगुणोऽश्रुतभर्तृगुणो वा सर्वतो निवृत्तमनस्तत्र प्रविशति स्वयं चाभिमुखो
भवतीति युक्तमुक्तमिति हि शब्दार्थः॥ पुरुषः सांजसेति पाठे आशय एव कर्ता १९ एकं च साधनमाह यथा वातरथ इति॥
निरंतरं सेव्यमानो योग एक एव सर्वसाधकः॥ तत्र शुद्धिरपि नापेक्ष्यत इति दृष्टांतेन तथात्वमाह॥ यथा गंधः वातारूढः
स्वभावत एव वातो रथो यस्य स तु घ्राणमेवाहंक्तो॥ घ्राण एव तस्य ग्राहको भवतीति॥ एवं योगरतमपि चित्तमात्मैव ग्र

मद्धर्मैश्चरणैरेतैः परिसंशुद्ध आशयः॥ पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि मां १९ यथा वातर
थो घ्राणमावृंक्ते गंध आशयात् एवं योगरतं चेत आत्मानमविकारि यत् २० अहं सर्वेषु भू
तेषु भूतात्मावस्थितः सदा तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडंबनं २१ श्रीगोपालय नमः

ह्णातीति आत्मगाम्येव भवति॥ अत्र पूर्वसाधनान्यप्य पेक्ष्यंत इत्याशयेनाह अविकारि यदिति यच्चित्तं सर्वमेव वि
कारं त्यक्तवत् २० एवमुत्तमां भक्तिं ससाधनां साधयित्वा पूर्वोक्तां सगुणां त्रिविधामपि निंदति अहमिति चतुर्भिः॥ करो
=२ पूर्वसाधनैः प्रोक्ता
तियन्त्र दवन्मुखस्यातिक्रमस्त्याद्रोषोत्यत्रिश्रमचुणमत्री [illegible] तेश्च न साधकं १ तत्र प्रथमं पूर्वभक्तिरनुकरण
मात्रं न तु भक्तिरित्याह सर्वेषु भूतेष्वहमात्मा अवस्थित इति काशंका त्वम इत्यत्र प्रतिपादितं भगवत एवावस्था विशे
षो जीव इति तदाह॥ अवस्थितः सदेति॥ अहमेव वा भूतात्मा सर्वभूतरूपः॥ न त्वरूपश्च संघातरूपश्चेति अवस्थितः स
देहं तर्गामी॥ अतः सर्वभावेन सर्वेषु भूतेषु विद्यमानं मां अवज्ञाय भेदबुद्धिं हिंसादिकं च तत्र जनयित्वा स्वात्मानमपि केव
लं मर्त्यः शरीरमत्वाय कुरुते न तु अर्चाविडंबनमेव २१ ॥

नअस्यमुकरणोवषृ=

स्वतोमह तयांगीकृतोनतुसच्छास्त्रमाणक इत्यर्थः २=

अथभगवदाकाराभावात्तद्बुध्याशास्त्रमुक्तं कथमर्चितेनतेनतदायत्नसफलेतदाह योमामिति संद्यानेऽहंत्रिरूपोवत्र्तेप्रथ

त.सु.२९ ३७१ मंसर्वेषुभूतेषुतद्रूपः ततआत्मरूपः ततईश्वरोऽन्तर्यामीनियामकः॥एवंपुरुषेसर्वभावेनविद्यमानंभगवंतंहित्वाअ

र्चाप्रतिमांयोभजते भजनेप्रमाणाभावमाह मोढ्यादिति ननुस्वतंत्रोभगवन्मार्गोनिषिद्धःसगुणातीतइत्येकादशेव

क्ष्यते। मन्त्रिकेतंतुनिर्गुणमित्यादिभिःप्रकरणेनचवाक्यानिसंबद्धानितत्प्रकरणस्यमेवगुणंदोषंवदंति तत्रपृथग्भा

योमांसर्वभूतेषुसंतमात्मानमीश्वरं· हित्वार्चांभजतेमौढ्यात्भस्मन्येवजुहोतिसः २२ ॥

स्कं·११ एकादशेद्वादशस्कंधेच१ प्रकपनात्

वस्तुनोक्तः द्वादशानुसारेणवापुरुषोनारायणइत्यः॥उभयत्रापिभेदगुणयोरभावान्नैतानिदूषणानिसंबद्धानि

सात्त्वे२ भवंति किंत्वत्रैवतानिपूर्वोक्तसगुणभक्तदूषकानि· अर्चायांज्ञानक्रियाचेतन्यानंदानामभावात् निष्फाद्गना त्पत्र·

र्थव्याप्तान्यप्येतानिपश्चात्त्वक्त्वानीतिभस्महुतप्रायंभवति॥सइतिपूर्वोक्तएव॥पूर्वमत्रिलत्रदृष्टइतिशोते ३७१

प्यनोऽत्रमाद्भोमइतिलोत्रदृष्टांतीकृतः २२ ॥

भजन२ ग्रचालसंपत्परंमत्रैज्ञानादीनिव्याप्ता न्यापे२=

परद्वेषादिनाअर्चायांभगवद्भजनेकामाद्युत्पत्तेःकदाचिदपिनमनःशांतिर्भवतीत्याह द्विषतइति सहिमामेवद्वेष्टि·यतोभूतेष्व

हमेववर्त्तइति अतःपरकायेमांद्विषतःमनःकदापिनशांतिमृच्छतीतिसंबंधः ननुजीवएवद्वेषाश्रयःसंद्यातोवाअन्यथाव्यवहा

रोनस्यात्·अतोभेदोव्यवहारार्थंमन्यएवयंद्विष्येत्तंध्यायेत् इतिश्रुतेः तत्रकथमाहभगवान्मांद्विषतइतिचेत् सत्यं तत्कृतापका

रक्रिययाहितस्मिन्द्वेषःसाक्रियामत्कृतामत्प्रेरणयावाज्ञातेतितन्निमित्तंचेदस्मंद्वेष्टिसहिमामेवद्वेष्टि॥भेदेहियज्ञपरिपंथिनो

दैत्याःमदधिष्ठिताअपिरोगाइवनिवर्त्तनीयाः॥तुष्टादिरिवव्रीह्यादिषु॥अतोयज्ञार्थंद्वेषः ननुद्वेषार्थंयज्ञउचितः श्येनादा

द्विषतःपरकायेमांमानिनोभिन्नदर्शिनः भूतेषुबद्धवैरस्य

नमनःशांतिमृच्छति २३ ॥

वप्ययमेव॥यज्ञभ्रातृव्यएवस्वभ्रातृव्यइति तत्रतुयज्ञोनिरभिमानइतितावदपिकर्त्तव्यं॥अत्रतुभगवानस्माकमितिद्विषं

तमपिनद्विष्यात् कार्यंतुप्रह्लादइवसेत्स्यति अतोत्रमार्गेसर्वथापिद्वेषोनुचितः भगवदर्थंसृष्टिश्चेयं अतोत्रभग

वद्द्वेषएवभवति किंच मानिनोभिन्नदर्शिनोभूतेषुबद्धवैरस्येतिदोषत्रयं सात्त्विकराजसतामसादोषानिरूपिताः॥नहित्रि

दोषव्याप्तस्यशांतिरस्ति अभिमानस्तुसात्त्विकदोषएव उत्कृष्टकर्मणोवाभिमानोभवतीतिक्रिययाहिभेदइतिराजसंभे

दज्ञानं॥वैरंतुतामसमिति २३ ॥श्रीगोपालयनमः ॥

Indira Gandhi National Centre for the Arts

तमु २९
३७२

अहंतुनसंतुष्टोभवामीतिमुख्यंदूषणमाह॥ अहमिति यद्यपिबहुसुवर्णपुष्पादिकंप्रयच्छति तथाप्युच्चावचैरनेकविधै
र्द्रव्यैः पुष्पादिभिरुत्पन्नयाक्रियया अहंनैवतुष्ये तत्रहेतुः भूतग्रामावमानिनइति अर्चायामित्युपलक्षणं पुरुषवि
शेषेपिभजनेभूतग्रामावमानिनोदोषएव परंतत्रतादृशएवभजतीतिअर्चायामित्युक्तं २४ तर्ह्यर्चाविधायकानिवाक्या
निव्यर्थानिस्युरित्याशंक्याह अर्चादाविति यावत्सर्वात्मकंभगवंतंनजानातितावदर्चायामर्चयेत् यतोहमीश्वरः अन्य
थाभावयेत् साचाधर्मरूपेत्याह॥ स्वकर्मकृदिति संध्यावंदनवत्भगवत्पूजापिनित्याब्राह्मणादीनामतःस्वकर्मकृ
त्‌ शालग्रामादौमांपूजयेत् यावन्मांसर्वभूतेष्ववस्थितंस्वहृदिनवेद अनुभवोनभवतीत्यर्थः २५ नतुशालग्रामं
अर्चादावर्चयेत्तावदीश्वरं
अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे॥ नैवतुष्येऽर्चितोऽर्चायांभूतग्रामावमानिनः २४
मांस्वकर्मकृत् यावन्नवेदस्वहृदयेसर्वभूतेष्ववस्थितं २५ आत्मनश्चपरस्यापियःकरोत्यंतरोदरं तस्यभिन्नदृशोमृत्यु
र्विदधेभयमुल्बणं २६
योजनं॥ यथासाक्षाद्भगवतिसमागतेबुद्धिर्भवति एवंकृमिकीटादावपिचेद्बुद्धिस्तदा
कर्मनिवृत्तिः अर्चानिवृत्तिश्चेतिसाधारणमेतद्वाक्यंगुणप्राधान्याभावात् ज्ञानोत्तरंतुनकर्तव्यमित्यत्रहेतुमाह॥ आत्मन
इति यदिज्ञानोत्तरमपिपूजांकुर्यात्तदेवबुद्ध्यात्मसेवामिवकुर्वन्नदूष्यते॥ स्वसेवयाचस्वयंसंतुष्यति यदिअन्यांदेवतामु
पास्ते अन्योसावन्योहमस्मीतियथापशुरेवंसदेवानांपशुरितिश्रुतेः आत्मन्येवोपासीत यत्तुपुनःआत्मनःपरस्यापि
अंतरमध्येउत् अरअपिईश्वरस्यपरंभेदंकरोति अराद्धिभेदकास्थकृत्स्यपदार्थेवैषएतस्मिन्नुदरमंतरंकुरुते अ
थतस्यभयंभवतीतिश्रुतेः तन्त्रयमहमेवप्रयच्छामीत्याह तस्यभिन्नदृशइति उल्बणंभयंविदधे विशेषेणतस्मि
न्स्थापयामि॥ तद्भयंमृत्युरेव॥ तत्सम्येनभयेनप्राणांस्त्यजति॥ सहजोहिमयत्नः प्राणधारकः॥ अतोभक्तिफलंदूरेमृत्यु

अथातः कृतेः तदमितितदुदरपदस्ये
वविवरणंश्रुतौस्थेयंरम्

अज्ञानदशायामपिअर्चापेक्षयाज्ञानार्थिनःसर्वभूतेष्वेवभजनंश्रेष्ठमित्याह अथमामिति अथेतिभिन्नक्रमार्थः॥ पूर्वंज्ञानिनो
निरूपणात्सर्वभूतेषुभजनंभक्तिमार्गेपिवर्ततइतितन्निवृत्त्यर्थमाह भूतात्मानमिति भूतानामात्माजीवः॥ ननुसर्वत्रवर्तन
इतिकोयंभूतेषुविशेषस्तत्राह कृतालयमिति यथाकश्चिद्गृहंकृत्वाक्वचित्तिष्ठतितदुपलब्धिस्तत्रसुलभा अतआत्मनोपिसंघा
तरूपंगृहंतत्रोपलब्धिःसुलभालोकेपिगृहेपदार्थसमर्पणेगृहस्थःप्रीतोभवति॥ अतःभूतेष्वेवमामर्हयेत् यथायोग्यंचपूजायेनैव
यःसंतुष्यति तत्रमुख्यंदानंमानंचमैत्रीचनिकृष्टेदानमुत्कृष्टेमानंसमेमैत्री एतदप्यभिन्नचक्षुषासर्वत्रात्मज्ञानेनकर्तव्यंनतुलो
कदृष्ट्येत्याह अभिन्नेति २७ विशेषपूजायामुत्कृष्टब्राह्मणलक्षणमधिष्ठानंवक्तुंसर्वजीवापेक्षयातस्योत्कर्षमाह जीवाइतिसा
र्द्धैःषड्भिः॥ जीवाःप्राणयुक्ताः अजीवानांपाषाणादीनांमध्येश्रेष्ठाः वृक्षादयः॥ ततःप्राणभृतःश्वासोच्छ्वासवंतः जंगमाःश्रेष्ठाः
अथमांसर्वभूतेषुभूतात्मानंकृतालयं॥ अर्हयेद्दानमानाभ्यांमैत्र्याभिन्नेनचक्षुषा २७ जीवाःश्रेष्ठाह्यजीवानांततःप्राण
भृतःशुभे॥ ततःसचित्ताःप्रवरास्ततश्चेंद्रियवृत्तयः २८ तत्रापिस्पर्शवेदिभ्यःप्रवरारसवेदिनः॥ तेभ्योगंधविदःश्रेष्ठास्ते
भ्यःशब्दविदोवराः २९ ॥
शुभेइतिसंबोधनमुक्तविश्वासाय देहापेक्षयास्थूलःप्राणउत्कृष्टस्ततोप्यासन्नएवमेतेत्रयो
निरूपिताःक्रियाशक्तिप्रधानाः॥ ततोज्ञानशक्तिप्रधानाउत्तमाइत्याह॥ ततःसचित्ताइति॥ चेतनाधारभूतमंतःकरणंचित्तंतत्स
हिताज्ञानवंतइतियावत्॥ ततश्चेंद्रियवृत्तयइति सविशेषज्ञानवंतः इंद्रियाण्येतानिक्रियामयानि २८ ततोपिज्ञानवतांश्रे
ष्ठमाह॥ तत्रापीति॥ ज्ञानेंद्रियेषुनिकृष्टःस्पर्शः ततोरसनाउत्कृष्टा॥ मधुरादयोहिरसाःस्पर्शापेक्षयापिमोहकाइति॥ ततोपिगंध
विदःपृथिवीगुणत्वात्॥ दूरादपिज्ञानजनकत्वाच्च॥ स्पर्शवेदिनः॥ प्रायेणसर्वेक्रिमयः॥ ततोमत्स्यारसवेदिनः॥ गंधविदोभ्र
मरादयः॥ ततःशब्दविदोहरिणाः॥ गांधर्वापेक्षयापिश्रोत्रंदूरादेवार्थंज्ञापयतीति २९ ॥ श्रीगोपालयनमः ॥

फलितं २९ एम० ३७२

ततोपिचतुरतिदूरएदर्थज्ञापयतीति॥रूपेतिरूपभेदविदः काकादयः श्रेष्ठाः॥ततश्चोभयतोदतः साधनाधिक्यवंतःमर्कटादयःश्रे
त.भु.२७ ष्ठाः मूषकादयोवा तच्चकरणमंतर्नयनार्थमेवेति ततोपिबहिःकरणवंतःश्रेष्ठाइत्याह॥तेषांबहुपदाः श्रेष्ठाइतिगोजादयो
३७३ बहुपदाः॥ततोपिचतुष्पादःसर्वेमूषकमार्जारश्वादयः॥ततोद्विपात्सर्वेपक्षिणोमनुष्याश्च ३० ततइतिततोब्राह्मणादिवर्णा
उत्तमाः॥धर्मवत्वात्॥तेषामाद्यः॥मुख्यधर्मत्वात् जातिब्राह्मणापेक्षयावेदाध्यायीमहान् ततोपिवेदार्थवित्॥अर्थज्ञादिति॥
ततोवेदार्थेसर्वसंदेहनिवारकः॥ततोयज्ञादिकर्त्ताश्रेष्ठः॥ततोविमुक्तलिंगोगलितदेहाभिमानःश्रेष्ठः ततोपिनिरभिमानोभूत्वा
ऐहिकामुष्मिकार्थेकिंचिन्नकरोतिनापिवांछतिसउत्तमः ३२ तस्मात्तादृशोभूत्वायोभगवद्भक्तः समहानित्याह॥ तस्मादितिश्र

रूपभेदविदस्तत्र ततश्चोभयतोदतः॥तेषांबहुपदाःश्रेष्ठाश्चतुष्पादस्ततोद्विपात् ३० ततोवर्णाश्चचत्वारस्तेषांब्राह्म =
णउत्तमः ब्राह्मणेष्वपिवेदज्ञोह्यर्थज्ञोभ्यधिकस्ततः ३१ अर्थज्ञात्संशयच्छेत्ताततःश्रेयान्स्वकर्मकृत्॥मुक्तसंगस्ततो
भूयानदोग्धाधर्ममात्मनः ३२ तस्मान्मय्यर्पिताशेषक्रियार्थात्मानिरंतरः॥मय्यर्पितात्मनःपुंसोमयिसंन्यस्तक ᳚र्मा॥न

र्थत्यागापेक्षयापिसमर्पणमुत्तममिति॥मयिसमर्पितः अशेषःक्रियार्थः आत्माचयेन॥ ११ पश्यामिपरंभूतमकर्तुःसमदर्शनात्
२ निरंतरपदस्यार्थः आत्मनिवेदीतादृशोभूत्वायआत्मत्वेनैवभगवंतंजानातिसमहान्॥अतोपिकश्चिन्महानस्तीत्याशंक्यपरिहरति॥मय्यर्पितात्मन
इति॥मदर्थसंन्यस्तकर्मणःपुंसामध्येमय्यर्पितात्मनःअकर्तुःसमदर्शनात्अन्यंपरमुत्कृष्टंनपश्यामि॥यद्यपिभगवच्छास्त्रे
तेश्रेष्ठानिरूपिताः॥तथापिविचारकार्णहृदयेतेनायांतीतिनपश्यामीत्युक्तं॥सर्वापेक्षयाभक्तिज्ञानयोरुत्कर्षः॥भक्तावप्यात्म एम०
समर्पणंज्ञानंतुसांख्यंब्रह्मज्ञानंच॥यद्यप्येतेत्रयःकेवलपरित्यागिनश्चसर्वेपरित्यागिनोभवंति॥तथाप्यात्मनिवेदनंज्ञान ३७३
द्वयंचयस्यास्तिततःकिमधिकंभविष्यति॥नत्वस्त्रयेणोक्तंमय्यर्पितात्मनःअकर्तुःसमदर्शनादिति ३३ ॥ ॥

नन्वेवंसएवभजनीयःस्यात्सचसर्वैरेवस्वतएवसेव्यतइतिशास्त्रवैफल्यंपूर्वदोषानिवृत्तिश्चेत्याशंक्याह मनसेति स्वार्थ
मेवैतत्ज्ञानंनिरूपितं॥नत्वधिकारतोन्यत्ज्ञार्थं अतएवंविदपिएतानिपरिदृश्यमानानिभूतानिप्रणमेत्॥स्वापेक्षया
पिबहुमानयेत्॥तत्रहेतुः ईश्वरोभगवान्जीवकलयाजीवकलारूपेणसहवाबहुगुणैःसहप्रविष्टइति॥इतिशब्दोहेतोर्द
श्वरत्वादन्यथास्वस्यानात्मत्वापादयेत् जीवेतुनहीनबुद्धिःकर्त्तव्या॥सहिकलालीलार्थसाकल्येत्यर्थः ३४ एवंभक्तिज्ञाने

मनसैतानिभूतानिप्रणमेद्बहुमानयेत्॥ईश्वरोजीवकलयाप्रविष्टोभगवानिति॥
३४ भक्तियोगश्चयोगश्चमयामानव्युदीरितः॥ययोरेकतरेणैवपुरुषःपुरुषंव्रजेत्
॥ ३५ ॥

निरूप्यनमस्कारभगवद्दर्शनाभ्यांचव्यवहारेपितदुभयमुपपाद्यभक्तिज्ञानयोःसमुच्चयोविकल्पोवाफलहेतुरित्याशं
क्याह भक्तियोगश्चेतिहेमानवभक्तियोगःअष्टांगयोगश्चमयाद्वयमुदीरितं॥मानवीतिपरिज्ञानार्थं॥ययोर्मध्येएकत
रेणैवपुरुषःपुरुषंमहात्मानंभगवंतंव्रजेत्॥ज्ञानेयोगउक्तःउत्तरोगंसाक्षात्कारव्याहृत्यर्थप्रवेशार्थंच॥भक्तिस्तुस्वतंत्रा
एकप्राधान्येअन्यदिहगौणमेवावलंबते॥अतोनसमुच्चयःशास्त्रार्थः ३५ श्रीगोपालयनमः ॥ ॥

Indira Gandhi National
Centre for the Arts

एवं प्रष्टां भक्तिं निरूप्य वैराग्यार्थं कालस्य पराक्रमं वक्तुं प्रथमतः कालस्य स्वरूपमाह॥ एतद्भगवत इति द्वयेन॥ कालस्य कार्यस्व
त.स्कं.२९ ३७४ रूपं चोच्यते॥ कार्येनिविष्टः स्वरूपं प्राप्नोतीति ज्ञापनार्थं एतज्जगत्सर्वं भगवतो रूपं॥ अन्यथा कालस्य कार्यस्वरूपं भगव
द्रूपं चोच्यते॥ कार्येनिविष्टः स्वरूपं प्राप्नोतीति॥ अत एव जगद्रूपमित्युक्तं॥ श्रुतो हि प्रकारद्वयेन निरूपणं आत्मत्वेन ब्रह्मत्वेन च आत्मै
त्वात्कालत्वं विधातुं न शक्येत॥ अत एव जगद्रूपमित्युक्तं॥ श्रुतौ हि प्रकारद्वयेन निरूपणं आत्मत्वेन ब्रह्मत्वेन च आत्मै
वेदं सर्वं ब्रह्मैवेदं सर्वमिति बृहदारण्यकमाप्नि चापेक्ष्य परद्वयं प्रवृत्तं॥ उभयोः स्वरूपमानंदः॥ तथापि स प्रकार आत्मा नि
प्रकारं ब्रह्म· आत्मनोपि ब्रह्मविधानात् अयमात्मा ब्रह्म विज्ञानमय इति विचारे ब्रह्मैव प्रतिज्ञातं॥ अथातो ब्रह्मजिज्ञा

एतद्भगवतो रूपं ब्रह्मणः परमात्मनः॥ परं प्रधानं पुरुषं दैवं कर्मविचेष्टितं॥ रूपभेदास्पदं दिव्यं काल इत्य
भिधीयते ३६ भूतानां महदादीनां यतो भिन्नदृशां भयं॥ योंतः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः ३७

सेति जगत उभयरूपत्वमाह॥ ब्रह्मणः परमात्मन इति मतत्रयं वा संगृहीतं॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति
अत्र केचित् लोके ऐश्वर्यादिधर्मान् पुरस्कृत्य भगवत्त्वमाहुः॥ वैलक्षण्यं पुरस्कृत्यात्मत्वं सद्रूपतां पुरस्कृत्य ब्रह्मत्वमिति
तद्रूपं किमित्याकांक्षायां गणयति परं प्रकृतिपुरुषनियामकं प्रधानं प्रकृतिः पुरुषश्च॥ दैवं कालो भगवदिच्छा वा॥
कर्मादृष्टं॥ विचेष्टितं विविधचेष्टायुक्तः स्वभावः रूपभेदास्पदं सर्वमेव जगत् परिदृश्यमानं दिव्यमपरिदृश्यमानं च एत
त्सर्वं काल इत्यभिधीयते॥ कालाधारत्वात्कालाधीनत्वाच्च ३६ कालस्य कालत्वं साधयति॥ भूतानामिति महदादी स्क०
नामपि यस्मात्कालाद्भयं स कालः भयेभिन्नदर्शनं हेतुः॥ बहिर्मुखान्कालो ग्रसतीति निमित्तं कालः कालस्याधिदैविकं ३७४
रूपमाह॥ योंतः प्रविश्येति यो भगवान् स कालः ३७ ॥

स को भगवानित्यपेक्षायामाह स इति यज्ञ्वधियज्ञः यज्ञाधिष्ठात्री देवता विष्णुः यज्ञो वै विष्णुरिति श्रुतेः॥ एकस्य काल
संज्ञा विष्णुरिति च॥ तत्र विष्णुसंज्ञा कथमित्याकांक्षायां व्याप्तिं निरूपयन् अंतः प्रवेशं निरूपयति यः भूतैः सहांतः प्रविश्य
अखिलाश्रयो जातः अंतर्व्याप्तिः प्रवेशात्· बहिर्व्याप्तिराश्रयत्वात् कालत्वमाह कलयतां प्रभुरिति यस्तु कलयति आकल
यति जानाति भक्षयति वा क्रियया ज्ञानेन वा यो व्याप्नोति स कालः॥ कलयंतीति कलयंतः तेषां कलयतां ब्रह्मादीनामपि नियं
ता अतः काल इत्यर्थः इदं भगवतः केवलं मार्गैकस्वभावमिति वक्तुं तस्य सर्वसाधारणत्वमाह न चास्येति॥ अस्य काल
स्य कश्चिदपि उपासको दयितोपि नास्ति· यो वा द्वेष्टि सोपि न द्वेष्यः॥ सर्व एव कालेऽत्यन्तरतिसंबंधविशेषाभावात्कोपि न बांध

स विष्णवाख्योधियज्ञोसौ कालः कलयतां प्रभुः॥ न चास्य कश्चिद्दयितो न द्वेष्यो न च बांधवः ३८ आ
विशत्यप्रमत्तोसौ प्रमत्तं जनमंतकृत् यद्भयाद्वाति वातोयं सूर्यस्तपति यद्भयात् यद्भयाद्वर्षते देवो

वः ३८ परमयं सर्वप्रकृतिः पश्यति तं नगृह्णाति आविशतीति किंतु प्रम ऋभगणो भाति यद्भयात् ३९
त्तमेव जनमसावप्रमत्तः अंतकर्त्ता आविशति भक्षणार्थं प्रविशति व्याघ्र इव अस्य कालत्वं सर्व एव जानंतीति तेषां त
ज्ज्ञानकार्यं भयमाह यद्भयादिति पंचभिः॥ वातादयः स्वस्वकार्यं कालभयादेव कुर्वंति॥ तत्र किं वक्तव्यं प्राणी स्वधर्मं न क
रिष्यतीति अधिकारिणो महांतो ये ये वा मूढा अचेतनाः॥ तत्त्वानि देवाः सर्वे च कालाद्भीता इतीर्यते १ अयं वातः यत्का
ले काले वाति सूर्योपि यस्मिन्नृतौ यथा तापउचितः तथा तपति॥ देवः पर्जन्यः स्वकाले वर्षति नक्षत्राणां गणोपि ज्यो
तिश्चक्रं स्वकाले भाति तद्गताः शुक्रादयो यथाधिकारं भांतीत्यर्थः ३९ ॥

Indira Gandhi National
Centre for the Arts

त॰स्कं॰२९
३७५

अतिमूढावनस्पतयोलताश्चाश्वत्थादयः कूष्मांडादिफलप्रधानालताः पुष्पप्रधानाःचकाएत्यत्रप्रधाना अपिओषधयःश्री त्यादिभिःसहस्वस्वकालेखन तत्रदेशविशेषेषु अनतिक्रम्य पुष्पाणिफलानिचगृह्णंति ४० चेतन्यरहिता अपिभीता इत्या ह सरितोनद्योपिभीताःसत्यःस्रवंति॥उदधिर्भूमेरुच्चोपिमर्यादातः अग्रेनोत्सर्पति अग्निरपिइंधे‧काष्ठादिभिर्ज्वलितोभ वति अन्यथाखयोर्निनदहेत् गिरिभिःसहयद्भीत्याभूरपिनमज्जति॥ अग्निर्ज्वलतियद्भीत्येतिवापाठः ४१ तत्वान्यपिभी तानीत्याह॥नभोदधातीति॥यस्यकालस्यनियमात्नभः आकाशंस्वर्गादिलोकानांस्थानं॥अदः तत्महिद्दं दधाति आ

यद्वनस्पतयोभीतालताश्चौषधिभिःसह स्वस्वकालेऽभिगृह्णंतिपुष्पाणिचफलानिच ४० स्रवंतिसरितोभीता नोत्सर्पत्युदधिर्यतः॥ अग्निरिंधेसगिरिभिःनभूर्मज्जतियद्भयात् ४१ नभोदधातिश्वसतांपदंयन्नियमाददः॥लो केस्वदेहंतनुतेमहान्सप्तभिरावृतम् ४२ गुणाभिमानिनोदेवाः सर्गादिष्वस्ययद्भयात् वर्त्ततेनुयुगंयेषांवशएत ((चराचरं ४३

काशोपिधारकोजातोस्तीत्यर्थः॥श्रुतावाकाशादिसृष्टिरित्याकाशोपिनिरूपितः॥पुराणादौम ह दादिरितिसोप्युच्यते॥महान्स्वदेहमेवलोकात्मकंतनुते॥सप्तभिःप्रकृत्यहंकारपंचमहाभूतैरावृतं ४२ ब्रह्मा दयोपिभीताइत्याह गुणाभिमानिनोदेवाः ब्रह्मादयः रजःप्रभृतयोगुणाः रजोभिमानीब्रह्मासत्वाभिमानीआ धिभौतिकोविष्णुः तमोभिमानीशिवइति॥त्रयोप्युत्पत्तिस्थितिलयान्सर्वेषांकालानुसारेणकुर्वंति॥अनुयुगंच एम॰ ३७५ एतेवशेवर्त्तंते॥ अनेकधाअवतीर्यापिकार्यंकुर्वंति॥येषांब्रह्मादीनांवशेएतच्चराचरंजगदितिमाहात्म्यं ४३

एवंकालस्यमाहात्म्यमुक्त्वातस्यकार्यवदन्नुपसंहरति सोनंतइति स्वयमनंतःसर्वेषामंतकरः स्वयमनादिःसर्वेषामा दिकृत् कार्यंजनयन्नप्यव्ययः इतरबीजादिवद्व्ययरहितः उत्पत्तिरपितस्यविचित्रा जनेनैवउत्पत्तेनैवपित्रादिना

सोनंतोंतकरःकालोऽनादिरादिकृदव्ययः जनंजनेनजनयन्मारयन्मृत्युनांतकं
४४ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेएकोनत्रिंशोध्याय ॥ ॥

जनंपुत्रादिकंजनयन्मृत्युनामरणरूपेणमारकमपिमारयन्निववर्त्तत इतिमाहात्म्यं एतत्परिज्ञानेनैववैराग्यंभ वतीत्युक्तं॥यस्तस्मान्नबिभेतिअस्मिन्नेवचतिष्ठतितस्यगतिरुत्तरत्रवक्ष्यते ४४ इतिश्रीभागवतसुबोधिन्यांतृ तीयस्कंधविवरणेएकोनत्रिंशाध्यायविवरणं ॥ ॥

Indira Gandhi National
Centre for the Arts

त॰सु३० अभीतःकालकार्येषुयोमूढोवर्त्ततेगृहे॥नदीप्रवाहेगृहकृत्सदुःखीतिनिगद्यते १ बहिर्मुखोहिकालस्यविषयोना
३७६ त्मदर्शनः॥अतोबहिर्मुखंकालोलोकयोर्दुःखदःस्मृतः २ त्रिंशन्नमेतथाध्यायेगृहस्थस्योभयोर्महत्॥लोकयोहच्य
तेदुःखंपुनर्जन्मावधिस्फुटं ३ अष्टादशभिरध्यंतमरणावधिवर्ण्यते॥पुनर्जन्मावधिपरंश्लोकैःषोडशभिःपुनः४ का
लस्यभगवतोविष्णोर्बहिर्मुखत्वेबाधकत्वमज्ञात्वादुःखंप्राप्नोतीतिवक्तुंप्रथममज्ञानमाह तस्यैतस्येति यःपूर्वंभय
जनकत्वेनोक्तःसएवायंकालःअयमपिजनःतत्रैवोत्पन्नःप्राणीनूनंविक्रमंनवेद ननुयावन्नबाधतेतावत्कथंजा

श्रीभगवानु तस्यैतस्यजनोनूनंनायंवेदोरुविक्रमं॥काल्यमानोपिबलिनावायोरिवघनावलिः
१ यंयमर्थमुपादत्ते दुःखेनसुखहेतवे तंतंधुनोतिभगवान्पुमान्शोचतियत्कृते २ ॥

नीयादित्याशंक्याह॥काल्यमानोपीति प्रेर्यमाणःपीड्यमानोवातद्वशवर्त्यपिनजानाति असंबंधिनःपीडासोढुम
शक्याकादाचित्की अयंतुवायोरिवघनावलिस्तस्यवशे १ सर्वकार्येषुतस्यपीडामाह यंयमर्थमिति॥सुखहेतवेम
हतापिदुःखेनयंयमर्थंभार्यागृहादिकंउपादत्ते तंतमर्थंकालोधुनोति॥भगवत्वात्सामर्थ्येजानातिच ननुकेषाभ त॰ऽयतीति२
गवतोलीलायत्सर्वेभ्योदुःखंप्रयच्छतीत्याशंक्याह पुमान्शोचतियत्कृतइति॥यस्यभगवतःकृतेअर्थेतद्धी ग्रम॰
नंसर्वमितितूष्णींस्यात्तर्हितदासईश्वरःपश्चात्नकुर्यात् यदयंशोचतिअतोधुनोतीतिभावः॥अनेनभगवतोदो ३७६
षाभावोनिरूपितः २ ॥ ॥

तथापिमहतःकिमेतत्कृत्यमतआह यदध्रुवस्येति तस्यवैराग्यार्थमेवंकरोति यतोयमध्रुवस्यदेहस्यनश्वरस्यअनुबंधःपुत्रा
दिलसहितस्यसंबंधीनिगृहक्षेत्रादिस्तेत्रधनानिध्रुवाणिमन्यतेतदर्थमायुश्चहृत्याव्ययीकरोति यतोयंदुर्मतिः॥तदपिनप्र
माणात्किंतुमोहादेव ३ जंतुरिति अतोदूरीकरणार्थंतथाकरोतीतिभावः ननुकिंधनादिदूरीकरणेन-निकृष्टयोनौजातः
स्वयमेवविरक्तोभविष्यतीत्याशंक्याह जंतुरिति एतस्मिन्संसारेस्वभावतउत्कर्षापकर्षरहितेस्वयंतथाजंतुःप्राणीयांयांयो
निंश्वयोनिंसूकरयोनिंवाअनुव्रजेत्कर्मवशाद्गच्छेत-तस्यांतस्यामेवनिर्वृतिंसुखंलभते स्त्रियमन्नंनिद्रांचप्राप्नोति यथा

यदध्रुवस्यदेहस्यसानुबंधस्यदुर्मतिः॥ध्रुवाणिमन्यतेमोहाद्गृहक्षेत्रवसूनिच ३ जंतुर्वैभवएत
स्मिन्यांयांयोनिमनुव्रजेत् तस्यांतस्यांसलभतेनिर्वृतिंनविरज्यते ४ नरकस्थोपिदेहंवैनपुमां
स्त्यक्तुमिच्छति नारक्यांनिर्वृतौसत्यांदेवमायाविमोहितः ५ श्रीगोपालयनमः ॥ ॥

राजशरीरेइंद्रशरीरेवाअतोनविरज्यते॥तस्मान्ननीचयोनिसंबंधेवैराग्यं ४ कर्मणानरकेजातेदाहरणंदुःखंदृष्ट्वावैराग्यं
भविष्यतीत्याशंक्याह नरकस्थोपीति॥कुंभीपाकादिनरकाउक्ताः तत्रनारकदेहाअपिनिरूपिताः॥तादृशानपिदेहां
स्त्यक्तुंनवांछति नरकसंबंधिनीयानिर्वृतिर्नरकस्थमज्जादिभक्षणसुखंयथात्राभेध्यगर्तेकीटानां-अतस्तस्यांनि
र्वृतौसत्यांतस्मिन्देहेगतेसागमिष्यतीतिभयान्नत्यक्तुंवांछति नन्वेतद्दुःखात्मकंप्रत्यक्षसिद्धंकथंनिर्वृतिरित्युच्यतेइ
त्याशंक्याह देवमायाविमोहितइति मायाविमोहितोविपरीतमेवमन्यते तीव्रवेदनाप्रपिसुखत्वेनमन्यते मायामा
हात्म्यस्यापनार्थंदेवपदं ५ ॥

Indira Gandhi National
Centre for the Arts

त॰सु॰२॰
३७७
नन्वस्मिन्नानुषेज्जन्मनिपुत्रभार्यादिभिः अवश्यंपोष्यैःदुःखिदन्नैवैराग्यंभविष्यतीत्याशंक्याह॥ आत्मजायेति॥ आत्मादेहः
जायास्त्रीसुताःपुत्राः अगारंगृहं पशवोद्रविणानिबांधवाश्चेषुइंगोयंप्राकृत आत्मासंगेतस्मिन्निरूढंमूलंयस्यताहशांतः
करणोभूत्वाभाराक्रांतोपिदुःखंप्राप्नुवन्नपिआत्मानंबकृकृतार्थंमन्यते॥ अतलेःप्रत्युतरागएवतस्य-नतुवैराग्यमितिभावः
६ नचमंतमंतेसुखदायिनएवेत्याह संदह्येति एषांभार्यादीनामुद्वहनंपोषणंतदर्थंयआधिस्तेनसंदह्यमानानिसर्वांगानि
यस्य- नकेवलमिहलोकेकृतंदुःखंप्राप्नोतिकिंतुपरलोकेपीत्याह करोतीति सर्वदामूढःसन्बाधकवाक्यान्यविचार्यस्वतोष्यं
तःकरणशुद्धिरहितःदुरितानिदुष्टप्रकारेणधनोपार्जनादीनिएंद्रियकानिवापापानिकरोतीत्यर्थः ७ एतावदपिकृत्वा

आत्मजायासुतागारपशुद्रविणबंधुषु निरूढमूलहृदयआत्मानंवकुमन्यते ६ संदह्यमानसर्वां
मुक्त इत्यभिमानो वयमपि कर्त्तार इति॥ एवं दोषद्वयेन कृत्वा यद्यपि निःसंगं कर्म कुर्वंति॥ तथापि कर्तृत्वाभिमाना
त्सगुणमेव ब्रह्म गच्छंति पूर्वोक्तिस्वापेक्षया हीनभावमाह त्वर्थमाह॥ पुरुषं पुरुषर्षभमिति पुरुषो विराट् सहि नम० ३५७२
स्वयमेव स्वोत्तमस्तु प्रकृतिपुरुषो भवति॥ ततः पुरुषर्षभः अक्षरात्मा १३

चतुर्मुखवतोऽभिन्नस्तेप्राप्यप्रकृतिपुरुषगता अक्षरात्... कमता...

---

पुन ...इति ...केनतद ... रानद्वेव्य ५ः

तत्रगतस्य पुनरावृत्तिमाह ससंसृत्येति सब्रह्मा अक्षरमपि प्राप्यसंसृत्य सम्यक् तत्र परिभ्रमणं कृत्वा पुनः सत्यागमन
कालेईश्वरमूर्त्तिना कालेन गुणव्यतिकरे जाते प्रकृतिपुरुषयोः क्रमानंतरं अनुक्रमेवाक्षोभमात्रे जाते यथापूर्वं महदादि
द्वारा ब्रह्मांडे उत्पन्ने तत्र नारायणनाभिकमलाद्यथापूर्वं प्रजायते एवमक्षरे गतस्यापि पुनरावृत्तिरुक्ता १४ अन्येषाम
प्याह ऐश्वर्यमिति परमेष्ठिसभायां यदैश्वर्यं प्रसिद्धं तत्तेषां निवृत्तिधर्मेण निर्मितमाधिदैविके महत्तत्वे अक्षरे वा अ
नुभूय गुणव्यतिकरे सति पुनरायांति॥ सतीति संबोधनं वा॥ ऐश्वर्यं पारमेष्ठ्यं वा आयांतीति १५ एवं भगवन्मार्गानु
सारेण भगवद्भजनाभावे ब्रह्मादीनामप्येषा गतिरिति निरूप्य ये पुनस्तामसाः ऐहिकाः ते भजनाभावे सर्वथा नष्टा भविष्यंती

ससंसृत्य पुनः काले कालेनेश्वरमूर्त्तिना जाते गुणव्यतिकरे यथापूर्वं प्रजायते १४ ऐश्वर्यं पा
रमेष्ठ्यं च तेपि धर्मविनिर्मितं निषेव्य पुनरायांति गुणव्यतिकरे सति १५ ये त्विहासक्तमनसः क
र्मसु श्रद्धयान्विताः कुर्वंत्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः १६ श्रीगोपालाय नमः ॥

ति किं वक्तव्यमिति वक्तुं तामसधर्मप्रवर्त्तकानां स्वरूपसाधनफलान्याह षड्भिः॥ ये त्विहासक्तमनस इति॥ एतेसाना मि स्वरूपसाधनफला
तिवा तेषां स्वधर्मकरणं दोषश्चापि चतुर्विधाः भगवद्विमुखाश्चैते लौकिकाश्चापि ते सदा १ येसंप्राप्य निवर्त्तंते इति न्याह ९ :
तेषां निरूप्यते १ प्रथमं तत्र तेषां स्वधर्ममाह इह संसारे आसक्तमनसो येषामिति बहिर्मुखाः कर्ममार्ग एव श्रद्धान्विताः
॥ संसारसाधकत्वात्कर्मणां अप्रतिषिद्धानि लौकिकानि कुर्वंति॥ नित्यान्यप्यग्निहोत्रादीनि सर्वाण्येव कुर्वंति इहा
सक्त्या पुनरागमनं कर्मणा पुनर्जन्म॥ अप्रतिषिद्धकरणान्नाधोगतिः नित्यकरणात् पितृलोकः॥ स्वकर्मणा पितृलो
क इति श्रुतेः १६ ॥

Indira Gandhi National Centre for the Arts

त.सु:३२ रजसेति रजसा गुणेन कुंठितं मनो येषां॥ अयं सहजो दोषो विक्षेपात्मा॰ कामात्मान इति आगंतुको दोषः कामएव॥ अत
२९४ एवाजितेंद्रियाः संसर्गदोषवंतः पितॄन्यजंतीति॰ स्वपितृपितामहानामेव यागं कुर्वंतीति तेन नालौकिकभजनं॥ अयं लौकि
कमध्य एवेति गुणाभावार्थमुक्तः गृहेष्वभिरताशया इति कदाचिदपि मोक्षभावाभावार्थं उक्तः १७ तेषां भगवद्बहिर्मुख्ये हे
तुः॥ त्रैवर्गिका इति धर्मार्थकामेष्वेव ते साधकाः॥ अत एव हरिमेधसो वासुदेवाद्बहिर्मुखाः हरिः सर्वदुःखहर्त्री मेधा बुद्धिर्यस्य॥
बुद्धिमात्रेणैव संसारं नाशयिष्यतीति भयात् विमुखाः कथायामपि विमुखाः॥ तद्वार्त्तामपि न कुर्वंति॥ कथनीया उरवो विक्र
मायस्य यत्क्रमश्रवणेन त्रैलोक्यमभिहरिं चैलोक्यमपि नष्टं एवेति॥ स्वपुरुषार्थनाशकार्तृत्वं ज्ञात्वा निश्चितमिव परित्यजंतीति
तिभावः मधुद्विष इति जगत्कर्तृब्रह्मभक्षकनाशकत्वेन भगवन्निरूपणात् तद्भजने कृतघ्नतापि सूचिता॥ पापजा स्वार्थम
रजसा कुंठमनसः कामात्मानो जितेंद्रियाः॥ पितॄन्यजंत्यनुदिनं गृहेष्वभिरताशयाः १७ त्रैवर्गिका
स्ते पुरुषा॥ विमुखा हरिमेधसः॥ कथायां कथनीयोरुविक्रमस्य मधुद्विषः १८ नूनं दैवेन विहता
पि न भजंतं इति निरूपितं १८ ननु ते ((ये चाच्युतकथासुधां॥ हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः १९ ॥
स्वधर्मनिष्ठाः परधर्मत्वं ज्ञात्वा न भजंतीति चेत्तत्राह नूनमिति ते हि लोकवार्त्ताः शृण्वंति न तु भगवत्कथां॥ अतो ध
र्मव्याप्तता भगवत्कथाया अनवकाशात् निवर्त्तंत इति न शंकनीयं किंतु दैवेन विहताः प्रतिकूलेंद्रियदानात् भगव
ता ते चेद्बधिरीकृताः स्युस्तदा यथाख्यानेएवतिष्ठेयुः तदपि नास्तीति नूनं दैवेन निहताः यतः विद्यमानामपि तां कथां
हित्वा॰ तत्रापि सुधारूपां॥ असतां गाथाः याः श्रुताः इति वाक्योक्तधर्मयुक्ताः शृण्वंति॥ ननु शास्त्रोक्तत्वं न निवर्त्तंते त तृ॰
त्राह पुरीषमिव विड्भुज इति॥ भगवता ते तथैवोत्पादिताः॥ विद्यमानेपि स्वत्रैष्ठक एवायः स्वभक्ष्यमेव भक्षयंति तेषां २९४
जिह्वा न रसांतरं गृह्णाति १९ ॥
हेतोरन्यकथातः २

एवं तेषां स्वरूपसाधनप्रवृत्तिं निरूपयित्वा फलमाह दक्षिणेनेति दक्षिणेमार्गाः बहवः संति तद्व्यावृत्त्यर्थमाह॥ अर्यम्ण इति
॥ अर्यमा त्रयमः॥ मुख्यस्य यमस्याधिकारप्रच्युतौ स यमो भवतीति पूर्वमुक्तं। अविभ्रद्यर्यमा दंडमिति वाक्यात्॥ अनेन मुख्यस्य
मध्येनिष्ठेत् तदा तेषां सा पि गतिर्न भवेदिति सूचितं॥ तस्य वैष्णवत्वात् दक्षपतिषष्ठे येन मार्गेणायमोगच्छति कूरत्मा स भ
यानको मार्गः परं नाधोगतिरूपः किंतु तल्लोकात्मकः॥ यत्राग्निष्वात्ता दयः पितरस्तिष्ठंति॥ तेन पथा ते पितृलोकं व्रजं
ति॥ अनेन मार्गक्लेशाः तत्र नीत्यभावश्च सूचितः॥ पुनरावृत्तिमाह प्रजामनु प्रजायंत इति प्रजा स्वस्याः तःकोशाः तस्य
स्वयमंतःकोशा भवंति पुत्रगृहे पुत्रा भवंतीत्यर्थः॥ ननु श्राद्धादिना मोक्षो भवतीति श्रूयते च सुहृदादिदोषाख्याने तत्कथ
मुच्यते पितृलोकादागत्य तस्य जन्मेत्याशंक्य तेषां पुत्रगृहे जन्मैव मोक्ष इति श्रुत्यर्थं वक्तुं प्रजामनु प्रजायंत इति श्रोतप
दक्षिणेन पथार्यम्णः पितृलोकं व्रजंति ते प्रजामनु प्रजायंते श्मशानांतक्रियाकृताः २० ततः
स्ते क्षीणसुकृताः पुनर्लोकमिमं सति पतंति विवशा दैवैः सद्यो विभ्रंशितोदयाः २१ ॥ ॥
दमुक्तं॥ प्रजामनु प्रजायंते तद् ते मर्त्यामृतमिति श्रुतेः॥ तत्रापि नोत्सवस्तत् किंतु श्मशानांताः निषेकाद्याः वैदिकाः क्रियाः
स्पर्द्धी स्पर्धादि दूषदे कृता येषु॰ ते श्मशानांतक्रियाकृताः २० एवं बहुवारं गमनागमनाभ्यामिहैव लोके न्यायस्वर्गे पक्षे इति मार्गगत्वात् ततोपि स्व
थं२ = र्गाद्धीणसुकृताः देवानां च दुष्प्राप्य त्वाद्यते विभ्रंशितोदयाः संतः तद्वध्यानजनितपापाः पूर्ववत्पुनः अधोलोकेषु
गच्छंतीत्याह तत इति पुनरिमं लोकमिति ततः पुनरूर्ध्वगमनाभावः सूचितः॥ सतीति संबोधनं ते ष्विगुणाभावबोधनार्थं
॥ दैवैर्देवविवशाः सद्यः विलंबाभावार्थं विलंबे तत्राशोच्यते प्रतिक्रियां करिष्यंतीति तथोक्तं॥ अंतकालेपि प्रतिक्रियानि
हत्यर्थं विभ्रंशिताः उदयो येषामिति तु त॥ तदैव सर्वस्वनाशेभिरणं चेतिबहुदयाधनाद्यैश्वर्याणि २१ ॥ ॥
फलितार्थकननिदं वस्तुत कुर्वंतीति त प्रथमांतं षष्ठ्यंते वापाद.

एवंभगवद्भजनार्थमेवतन्निरासमुक्त्वाप्रकृतमाह॥ तस्मात्त्वमिति॥ येकेचिद्यथाकथंचिद्वंतुनामत्वंसर्वभावेनभगवंतंभजस्व
भग. ३२ २५५ ॥यावंतिरूपाणिभजनीयानिऐहिकपारलौकिकसाधनानिदेहमारभ्येश्वरपर्यंतंयावंतोभजनीयाः येयैर्भावैश्च तेसर्वेभावा
भगवत्येवकर्त्तव्याइतिसर्वभावः परमेष्ठिनंइतिपरमोत्कृष्टस्थानस्थितंपुरुषोत्तममितियावत् भक्त्यैवभजनंनमार्गांत
रेणअन्यस्यतथासाधकत्वाभावात्साविभक्तिलक्षणेनैवाश्रित्यवर्त्तते अन्यथाकालादिभिरुपहताभवति लोकादिभिः
प्रतिबंधात्कदाचित्अविभजनाभावमाशंक्यतन्निराकरणार्थमाह भजनीयपदांबुजमिति॥ सर्वैरेवभजनीयंपदांबुजं
यस्य साभिमानमार्गाणांसर्वेषांपुनरावृत्तिहेतुत्वात्निरभिमानमार्गः समाश्रयणीयः सतुभगवन्मार्गएवेतिनिश्चीयते॥
अन्यथास्वस्यपूर्वसंस्कारेणबलिष्ठेविद्यमानेशास्त्रीयज्ञानेमहत्त्वविवेकेनकर्त्तत्वमित्यादिदुर्बलमेवमत्वानकस्यचिद्

तस्मात्त्वंसर्वभावेनभजस्वपरमेष्ठिनं॥ तद्गुणाश्रयया भक्त्याभजनीयपदांबुजं २२ वासुदेवेभगवतिभक्ति
योगः प्रयोजितः॥ जनयत्याशुवैराग्यंज्ञानंयद्ब्रह्मदर्शनं २३ ॥
ष्यहंकारनिवृत्तिर्भवेत्।भगवानेव सर्वंकरोतीत्युक्तेपिभजनाभावेनसिध्यतीतिभजनमवश्यंकर्त्तव्यमित्युक्तं २२ तस्मोक्षपर्यवसायित्वंस्वमार्गानुसारे
णाह वासुदेवेत्यष्टभिः॥ ज्ञानवैराग्यजननेनपरिज्ञानसंभवे॥ स्थितिश्चनिरहंकारएज्ञानमेवहरिःपरः१ वैराग्यसापि
माहात्म्ययुक्तिलज्जननेपिच॥ तदर्थंचजगज्ज्ञातेवैराग्येसर्वनिश्चयः॥ तत्रप्रथमंभक्तेर्मोक्षसाधकत्वंज्ञानवैराग्यज
ननद्वारेतिभक्त्याज्ञानवैराग्योत्पत्तिमाह॥ वासुदेवइति॥ [illegible] ॥वासुदेवेभगवतिहृदयेआविर्भूतेवाभगवति
प्रयुक्ताया भक्तियोगः फलसाधकइत्युक्तं॥ प्रथमतः स्वसामर्थ्याद्वैराग्यंज्ञानंचजनयति ज्ञानंप्रतीकविष भग. २५५
यकमपिभवतीतिविशिनष्टि यद्ज्ञानंब्रह्मदर्शयतीतिब्रह्मदर्शनरूपंवायस्मिन्ज्ञानेब्रह्माविर्भवतितद्वतादृरूपंज्ञा
नंमननादिनावासाधनेसंपन्नेसाक्षात्कारइति २३ ॥



ज्ञानस्यपरीक्षामाह यदास्येति अस्यज्ञानाधिकारिणः पुरुषस्यचित्तंवस्तुतः समेष्वेवार्थेषुपांचभौतिकेषुभगवदाधारेषुभग
वद्रूपेष्वाइंद्रियवृत्तिभिः रागजनिताभिः यदावैषम्यंनगृह्णाति तस्यवैषम्यस्यस्वरूपमाह प्रियमप्रियमिति रागकृत
मेवेत्युक्तं॥ उक्तेतिप्रकारांतरमप्युक्तं साध्वसाध्वित्यादि २४ किमेवंनिदर्शनसहितेज्ञानेनैतीत्याकांक्षायामाह सतदैवेति ज्ञान
रूपंप्राप्तेनात्मनैवआत्मानंस्वस्वरूपंप्रकृतिसंगरहितंसर्वत्रसमदर्शतत्त्वंप्रकृतितद्विकारोपधानरहितमित्यर्थः॥ हेयोपादेयर
हितंप्रवर्त्तकनिवर्त्तकसर्वशास्त्राणांपर्यवसानरूपंपदमारूढंसाधीशारहितमीक्षते॥ मुक्तरूपंवात्मानंपश्यतीत्यर्थः २५ ननु
ज्ञानेएवज्ञातेकथमेवंभवतिनहिज्ञानंवस्तूत्पादयतिअतः स्वभावतएवआत्मानादृशइतिमंतव्यंततश्चनसाध्यसिद्धिः किंतुमा
यावादिनामिवमतंस्यादित्याशंक्यज्ञानस्यैवतत्संपादकत्वमुपपादयति ज्ञानमात्रमितिज्ञानंनामाविर्भूतंनित्यंकेवलोपनिष
द्वेद्यंवैतन्यंतदेवब्रह्मशब्देनोच्यते॥ ब्रह्मप्रकरणेतदेवपुनः स्वेच्छयाविर्भूतैश्वर्यमीश्वरशब्देनोच्यते॥ यस्मिन्नाविष्टेप्राकृतोपिपुरु

यदास्यचित्तमर्थेषुसमेष्विंद्रियवृत्तिभिः॥ नविगृह्णातिवैषम्यंप्रियमप्रियमप्युत २४ सतदैवात्मनात्मानंनिःसंगं
समदर्शनंहेयोपादेयरहितमारूढंपदमीक्षते २५ ज्ञानमात्रंपरंब्रह्मपरमात्मेश्वरः पुमान् दृश्यादिभिः पृथग्भावैर्भ
गवानेकईयते २६ ॥
षः मय्येवसकलंजातंमयिसर्वंप्रतिष्ठितमितिमन्यते॥ अतस्तदेवेश्वररूपंब्रह्मस्वरूपंचतथा
त्मानांतरेपि अंतर्दृष्ट्याबोधनभेदप्रकारेणआत्मेत्युच्यते॥ तदेवज्ञानमंतर्दृष्ट्याआत्मत्वेनदृष्टंपरमात्मशब्देनोच्यते॥ त
देवचपुनर्वहिर्दृष्ट्यादृष्टमीश्वरशब्देनकालशब्देनोच्यते सएवचपुनः उपास्यरूपेणव्यवहाररूपेणचदृष्टः पुमान्त्रिवि
धपुरुषरूपेणभासते॥ अतोमूलभूतेतस्मिन्नाविर्भूतेसर्वमेवसंगच्छतइतिनकिंचिदनुपपन्नं नन्वेकमेववस्तुकथ
मनेकधाभवतीत्याकांक्षायामाह दृश्यादिभिरिति दृष्टुर्भावभेदेनैवएकएवभगवान्बहुधाईयते भावास्तुपृथक्॥
यथैकएवदेवदत्तः पित्रादिशब्दैरनेकनावैर्भावक्रियतेभवतिचतथा तथापितस्यवोधावानुत्पद्यतेतंप्रतितथैवेतितन्नै

वार्त्तिकं ॥ अतोमूलरूपाविर्भावः कर्त्तव्य इतिसिद्धं २६ [illegible]

Indira Gandhi National Centre for the Arts

त. मु. ३२ ३९६ ज्ञानस्य प्रशंसां स्वरूपं चोक्त्वा वैराग्यस्य प्रशंसां स्वरूपाण्याह। एतावानेवेति॥ प्रथमतः सर्वेषां शास्त्राणां वैराग्यमेव फलमि
तिप्रमाणनिर्णयमाह संपूर्णेनापि योगेन योगशास्त्रे सर्वेषामेव ज्ञानभक्तिकर्मादीनां योगशब्दवाच्यत्वेव अतो योगिनः स
र्वैरेवोपायैरयमेवार्थो युज्यते यद्यदा सर्वतश्चेदसंगो भवति। तुशब्दः पक्षांतरं व्यावर्त्तयति येवैराग्यं मेनाभिमन्यंते॥ वै
राग्याभावे ज्ञानमेव न भवेत् ज्ञातं वा न किंचित्कार्यं कुर्याद्दोषस्यानिवृत्तत्वात् सर्वथानिवृत्ते दोषे स्वप्रकाशरूप आत्मा आ
विर्भविष्यतीति कोपि न तत्र प्रयासः कर्त्तव्यः अतः सर्वशास्त्राणां फलं वैराग्यं २७ एवं प्रमाणविचारेण वैराग्योत्कर्षमु
क्त्वा प्रमेयविचारेणाप्याह॥ ज्ञानमेकमिति॥ वस्तुतः सर्वं जगद्बोधान्वयव्यतिरेकानुसरणाद्बोधमात्रमित्यवसीयते॥ यश्च
अनलौकिको वैदिकः सर्वोपि व्यवहारः बोध एव पर्यवसित इति यथा सर्वे तरंगाः समुद्र एव पर्यवसिता इति। अत एकमेव ज्ञा

एतावानेव योगेन समग्रेणेह योगिनः॥ युज्यतेऽभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः॥ २७॥ ज्ञानमेकं पराए
नंपराचीनैरेव भ्राक्रुतैरिंद्रियैर्भ्रापक ((चीनैरिंद्रियैर्ब्रह्म निर्गुणं॥ अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा २८
त्वाद्दुहणात्वात् निर्गुणमेव गुणानां तद्व्यतिरिक्तानामभावात् घटपटाद्यर्थरूपेण भ्रांत्या अवभाति॥ अतः शुक्तिकारजत
त्प्रतिभासत इति वस्तु विचारेणापि तत्रासक्तिर्नोचितातेहि प्राकृताः स्वबुद्ध्यनुसारेणेव तत्कल्पयंति एकदेशग्रहणेन स्व
स्वभावग्रहणेन च तत्स्वयाग्रहीतं भवति॥ अतःस्वेंद्रियादिधर्मा एव तत्रारोप्यन्ते इति ख्यातिवादा बहुविधा उत्प
न्नाः धर्मिणामेव वस्तुतः प्रतिभानमित्यन्यख्यातिः॥ आधारमपि पुरस्कृत्य न तत्र कंचनार्थं परिकल्प्य ग्राहकधर्मस्वबंधा प्र. ३१० २९६
द्वन्धेत्सप्याङ्कः॥ यथाप्रतीतिर्भ्रांता तथा कस्य नापीति नात्यंतमाग्रहः कर्तव्यः॥ शब्दादिधर्मवांश्चायं॥ आदिशब्देना
र्थः तद्वद्वद्धर्मीद्ग्राहकीताः तेच धर्मा अनादिवासनया स्फुरंतीति मिथ्यावादिनो ये केदेशा वैराग्यप्रवेशेन संग्रहीता

१२ ) ३९६ ग्र

---

तानेव भेदान्गणयति युक्त्या विचारयन्निव॥ यथेति तत्त्वानां तत्भावापन्नत्वेन तत्त्वशब्दवाच्यत्वोपपत्तेः यथा महदादयः प्राकृते
धर्मैः कृत्वा तत् शब्दवाच्या जायंते वस्तुतो न्यधर्मत्वेन ज्ञानमेव तत्तच्छब्दवाच्यं॥ एवमिदानीमपि प्रतीयमानमित्यर्थः अहंकारस्या
नेकरूपत्वादहंपदस्यात्मशब्दवाच्यत्वाच्च तत्संदेहनिवृत्त्यर्थं रूपपदं त्रिवृत्त्रिविधः ततः सर्वे पंचविधाः मात्रा भूतप्राणादिरू
पाः एकादशविध इंद्रियरूपः मध्ये स्वराडिति पुरुषो नारायणः॥ इंद्रियापेक्षारहित इति ततः स्वर्वनिरूपितः॥ तस्य वपुर्विरा
ड् अंडं तस्यावरकं जगन्नस्येवमध्ये कार्यं यतो धर्मसहितज्ञानप्रतीत्यैव केवलमवभासते २९ साधितं युक्त्या फलमुखेन साध
यति एतदिति एतत्सर्वोक्तं विरक्तः परिपश्यति नाविरक्तः एतद्वैराग्यं भगवतः षष्ठो गुण इति॥ ततः सर्वं पंचभिः पदार्थैः सा

यथा महानहंरूपस्त्रिवृत्पंचविधः स्वराट्॥ एकादशविधस्तस्य वपुरंडं जगद्यतः २९ एतद्वै श्रद्धया भक्त्या यो
गाभ्यासेन नित्यशः समाहितात्मा निःसंगो विरक्तः परिपश्यति ३० इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं॥

धकैः सिद्ध्यतीति तत्साधकत्वेन पंच साधनान्याह॥ तत्रास्तिक्यबुद्धि((येनावबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च॥ ३१
र्भगवद्बुद्धिः अष्टांगो योगश्चेति त्रिगुणत्रयं दोषाभावत्रयमाह॥ समाहितात्मा निःसंग इति॥ अंतर्बहिःसंगाभावो निरूपितः॥
एवं सप्तविधः शास्त्रार्थो निरूपितः॥ भगवत्प्रतिपादकत्वेन गुणानां प्रत्येकप्रकारप्रतिपादकत्वेन च अतः शास्त्राणां निरू
पणभेदेषु परस्परविरोधो न शंकनीयः ३० उपसंहरति इत्येतदिति हे गुर्वि एतावदुपदेशोपि नाहं गुरुः किंतु त्वमेव गु
रुः॥ आत्मयापरं निरूपितमिति इतीति समाप्त्यर्थे एतत्सर्वं ज्ञानमेव निरूपितं॥ सप्तविधोपि सिद्धांतः ज्ञानमेवेति तेनो
पसंहारः॥ अनेन ब्रह्माविर्भावो भवतीति ब्रह्माविर्भावः सफलमुक्तः॥ यदपि देवहूत्या पृष्टं जिज्ञासयाहं प्रकृतेः पुरुषस्ये
ति तदप्यनेनैव भवतीत्याह॥ येनावबुध्यत इति ३१ ॥

Indira Gandhi National
Centre for the Arts

त-मु ३२
३९७

एवंसप्तविधंज्ञानशास्त्रंभक्तिशास्त्रंचापरंतस्यचबहुविधाभेदाउक्ताः सहिक्रियाप्रधानः यथापुरुषस्वरूपंगुणाःकर्माणिचेति· तत्रस्वरूपप्रतिपादकंवैदिकंशास्त्रंषडन्यानिगुणप्रतिपादकानिक्रियाप्रतिपादकंचभक्तिशास्त्रंतेषांभिन्नान्येवसर्वेषांफलानि तत्रस्वरूपंमुख्यभक्तिशास्त्रयोःएकंफलमित्याह ज्ञानयोगश्चेति मन्निष्ठइतिषस्यांव्युदासः नैर्गुण्योभक्तिलक्षणइति निर्दिष्टोभक्तिमार्गउक्तः॥द्वयोरप्येकमेवफलं भक्त्यापिभगवान्प्राप्यतेधर्मीमुख्येनापिज्ञानेन॥ अतएवभगवछब्देनलक्ष्यतेभगवछब्दोवालक्षणयसेति अतःशास्त्रद्वयमेकंषडन्यान्यंगशास्त्राणीतिसिद्धं· नन्वेकोभगवान्कथमनेकविधानिशास्त्राणीति आशंक्यदृष्टांतेनस्पष्टयति यथेंद्रियैरिति॥ यथारूपरसगंधस्पर्शवद्द्रव्यंस

ज्ञानयोगश्चमन्निष्ठोनैर्गुण्योभक्तिलक्षणः द्वयोरप्येकएवार्थोभगवछब्दलक्षणः ३२ यथेंद्रियैः
पृथग्द्वारैरर्थोबहुगुणाश्रयः॥एकोनानेयतेतद्वद्भगवान्शास्त्रवर्त्मभिः ३३ क्रिययाक्रतुभिर्दा
नैस्तपःस्वाध्यायमर्शनैः आत्मेंद्रियजयेनापिसंन्यासेनचकर्मणां ३४ श्रीगोपालयनमः ॥

वैरेवेंद्रियैःपृथक्पृथक्प्रतीयतेचक्षूरूपपुरस्कारेणपदार्थंगृह्णातिरसनारसपुरस्कारेण· घ्राणंगंधपुरस्कारेणेत्यादि एवमनेकधर्मयुक्तोभगवान्नतद्धर्मपुरस्कारेणप्रतिपाद्यतइतिसर्वेषांशास्त्राणामेकएवभगवान्तत्तद्धर्मपुरस्यतयानानार्ईयते ३३ किंचसर्वैरेवसाधनैरेकएवप्राप्यतइत्याह क्रिययेत्यादित्रिभिः॥क्रिययाह्लानादि तप०
स्मार्त्तक्रिययाक्रतुभिर्यज्ञैः॥दानैस्तुलापुरुषादिभिःतपःस्वाध्यायोवेदाध्ययनं अथचमर्शनंविचारःमीमांसाआत्मेंतः ३९८
करणमिंद्रियाणिचतेषांजयःसंन्यासः अहंममेत्यादिसर्वपरित्यागःकर्मणामिमावरूपकत्वज्ञापकं ३४ ॥

---

योगेनेति विविधोर्योगःषडंगोष्टांगइत्यादि॥भक्तियोगोप्यनेकविधःधर्मोयोविधीयतेवैराग्यगुणोपाधिभेदेनद्विविधः। अतत्वयोर्भेदमाहयःप्रवृत्तिनिवृत्तिमानिति ३५ आत्मेति आत्मतत्वावबोधःसांख्यं दृढेनवैराग्येणेतिविरक्तिशास्त्रं एवंसर्वैरेवसाधनैःएकएवभगवान्पृथक्पृथगीयते॥ननुसोपाधीनांगुणप्राप्तिःनिरुपाधीनांचात्मप्राप्तिरितिकथमेकफलमित्याशंक्याह॥सएवसगुणोनिर्गुणःस्वदृगात्माचेत्यर्थः ३६ एवमेकंफलमुपपाद्यउक्तानांभक्तिभेदानांसगुणनिर्गुण
सगुणनिर्गुणभ॰ भेदप्रतिपादनार्थंचातुर्विध्यमाह भावोचमिति भेदःपारमार्थिकइतिशास्त्रंपुरस्कृत्यत्रिविधोभक्तियोगउक्तः॥तेचसात्विकराजसतामसाः तत्ववादिनोरामानुजीयाश्चेतितमोरजःसत्वैर्भिन्नाः अस्मत्प्रतिपादितश्चनिर्गुणः॥एवंचतुर्विधोपिभग

योगेनविविधांगेनभक्तियोगेनचैवहि॥धर्मेणोभयचिह्नेनयःप्रवृत्तिनिवृत्तिमान् ३५ आत्मतत्वावबोधेनवैराग्ये
णदृढेनच ईयतेभगवानेभिःसगुणोनिर्गुणःस्वदृक् ३६ भावोचंभक्तियोगस्यस्वरूपंतेचतुर्विधं॥कालस्यचाव्यक्त
गतेर्यौतर्धावतिजंतुषु ३७ जीवस्यसंसृतीर्बह्वीरविद्याकर्मनिर्मिताः यास्वनुप्रविशन्नात्मानवेदगतिमात्मनः॥
३८ नैतत्खलायोपदिशेन्नाविनीतायकर्हिचित् नस्तब्धायनभिन्नायनैवधर्मध्वजायच ३९ ॥ ॥

तत्सेवकोपदेशः वान्प्रतिपादितः॥अभिसंधाययोहिंसामित्यादिभिःवैराग्यार्थंकालस्याप्यव्यक्तगतेःस्वरूपमुक्तं॥अव्यक्ततायांहेतुः॥योंतर्धावतिजंतुष्विति ३७ तस्यवैराग्यहेतुत्वप्रतिपादनायाह जीवस्येति त्रिविधागतयोजीवस्योक्ताःप्रत्येकंबहुविधाः॥ अविद्याकर्मनिर्मिताइति॥सर्वाएवाज्ञानोपाधिकर्मनिर्मिताः॥भावोचमितिसंबंधः॥तासांकथनस्यप्रयोजनमाह॥यास्वनुप्रविशन्निति॥यासुगतिषुकर्मणास्वयमनुप्रविशन्आत्मनोगतिंनवेद॥अतएवतत्प्रवेशाभावएवात्मगतिर्भवतीतिनिषेधार्थमुक्तमित्यर्थः ३८ एवंसर्वमेवसिद्धांतमुक्त्वाइयंसर्गलीलेतिअस्यावक्तारोभविष्यंतीतियेषांतद्वक्तव्यंयेषुचनवक्तव्यंतानुभयान्नैरेगाणिर्दृशति नैतत्खलायेतिचतुर्भिःद्वाभ्यांनिषेधमाह खलःस्तब्धःपरमर्मभेदी एतत्सभासुप्रसिद्धः

॥कपुरेधात्वस्मिपदेप्राः प्राप्नोति॥ क्राबिती॥ क्रात
मः स्थिकः स्थद्वारि तः सप्तकः॥ लितोमरतांतरैः धर्म
धृतः पार्वती ३९९

भ० ३१

Indira Gandhi National
Centre for the Arts

त.स्कं.३२
३९८

नलोलुपायेति॥ लोलुपइंद्रियविषयेष्वतिचपलः॥ गृहेष्वारूढं चित्तं यस्य-सर्वथा गृहस्थः ममचाभक्तः॥ मद्भक्तानां मद्भक्ता
द्वेषी एवं नवविधाः अवक्तव्या निरूपिताः ४० एकादशविधा वक्तव्याः॥ अस्येमध्यमाः श्रद्दधानायेति॥
श्रवणे परमश्रद्धावान्॥ भक्तो भगवतः॥ विनीतो वक्तरि सर्वत्र च॥ असूयारहितस्य तथा सर्वप्राणिषु कृतामैत्री येन शु
श्रूषायामभितो रतिर्यस्य ४१ बहिर्जातविरागायेति॥ बाह्येष्वर्थेषु जातो विरागो यस्य॥ शांतं च चित्तं यस्य मात्सर्यरहि
तो निर्मत्सरः॥ शुचिर्यः पापादिना नाभिभूतः॥ अथवा शुचय इति सर्वत्र विशेषणं॥ पूर्वोक्तनवविधस्यापि यस्याहं

नलोलुपायोपदिशेन्नगृहारूढचेतसे नाभक्ताय च मे जातु न मद्भक्तद्विषामपि॥४०॥ श्रद्दधानाय भक्ता
य विनीतायानसूयवे॥ भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ४१ बहिर्जातविरागाय शांतचित्ताय दी
यतां निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ४२ य इदं शृणुयादंब श्रद्धया पुरुषः सकृत् यो वाभिधत्ते
मच्चित्तः सह्येति पदवीं च मे ४३ इति श्रीभागवते महापुराणे तृतीयस्कंधे द्वात्रिंशाध्यायः॥ ॥

प्रेयसामपि प्रियः॥ तस्मै सर्वथा वक्तव्यं॥ सर्वदोषविनाशभावेनेति ष्वप्युक्तं ४२ एवं कथनेश्रोतृगुणदोषानुक्त्वा श्रो
तुः वक्तुश्च फलमाह य इदमिति अंबेति संबोधनं स्नेहसूचकं॥ श्रवणे श्रद्धा मुख्यमंगं॥ पुरुष इति यः पुरुष एव न
तु स्त्रियार्वचनार्थं माया पुरुषः॥ सकृदित्यात्मदर्शी अबहिर्मुखत्वरक्तः बहिर्मुखस्य वस्तुमाणं फलं न भवतीति व लभ.
क्तापि चेन्मच्चित्तः भगवतीत्यर्थमेव न धनाद्यर्थं कथयति युक्तं त्वभयोर्मत्पदवीगमनं चकारात्कामितं च प्राप्नोती ३९८
ति ४३ इति श्रीभागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां तृतीयस्कंधविवरणे द्वात्रिंशाध्यायः॥

---

एवमष्टभिरध्यायैर्मतांष्टकमुदीरितं॥ सर्वेषां तु फलं मुक्तिरतः सात्र निरूप्यते १ त्रयस्त्रिंशेत्र त्वध्याये स्त्रियामुक्तिरुदीर्यते॥
सर्गलक्ष्वधिर्यस्माद्देवालीलया कृताः २ त्रयस्त्रिंशद्विधालीला सर्गाख्यादेवबोधवी॥ वसवश्चतथा रुद्रा एकादश प्रजापती॥
३ आदित्याश्च यतः सत्त्वात्ते चतुर्दशधामताः मुक्तिः प्रसादाद्भिनवेन्नशास्त्रैः साधनैरपि ४ प्रसादश्च स्तुतः प्रीतेर्न संबंधादि
भिः क्वचित् अतः स्तोत्रं प्रसादश्च मुक्तिश्चापि फलं ततः ५ सर्गत्वप्यापनार्थाय वक्तुः स्थितिरुदीर्यते भगवत्त्वास्थितौ तस्य
सर्वसर्गप्रतिष्ठितः ६ शास्त्रार्थेऽवगतेसम्यक् प्रसादेयत्नवान्भवेत् अतः प्रसादनार्थाय तस्याय लउदीर्यते ७ एवं निशम्ये
ति एवं पूर्वोक्तप्रकारेण सर्वसिद्धांतरहस्यं वो निशम्य तुष्टावेति संबंधः एवं शास्त्रार्थपरिज्ञानेन तत्प्रसादव्यतिरेकेण शास्त्रज्ञा
नसाधनफलसिद्ध्यो न भवंतीति तत्प्रसादः प्राप्तव्य इति बुद्धिः केन धर्मेण तस्याज्जाता इत्याकांक्षायामाह जनित्रीति येन धर्मेण

मैत्रेय उ. एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः॥ विस्रस्तमोह
पटला तमभिप्रणम्य तुष्टाव तत्त्वविषयांकितसिद्धभूमिं १ ॥

तादृशं पुत्रमुत्पादितवतीसेति प्रसिद्धा स्व
धर्मैस्तपसा च भर्तृमुक्त्यापि तस्य कार्यं सिध्यतीति ज्ञापयितुमाह॥ कर्दमस्य दयितेति॥ किलेति तस्या धर्मः प्रसिद्धः॥ देवहूति
रिति देवानां हूतिर्यस्या इति योगेनापि देवसान्निध्यं एवं पंचधा तस्या माहात्म्यमुक्तं किंच-शास्त्रफलमपि तस्या जातमित्या
ह विस्रस्तमोहपटलेति पुत्रादिषु यो मोहः स एव पटलं ज्ञानाच्छादकं तदधः पतितं यस्याः अत एव तं पुत्रमप्यभिप्रणम्य नम
स्कारे मोहाभावो हेतुः गुरुत्वात्स्तोत्रे भगवानेव हेतुः अतः स्तोत्रमनुचितमित्याशंक्य भगवतो ज्ञानकलावतार इति सांख्यप्र
वर्तकत्वादुपपादयति तत्त्वविषयांकितसिद्धभूमिमिति तत्त्वलक्षणो यो विषयः वाच्योर्थस्तेनांकिता चिह्निता या सि
द्धिः सांख्यशास्त्रं तत्त्वविषये णांकितं यत् ... सिद्धभूमिमाधारं दृष्ट्वा व्याख्यानेन वर्तकं वा॥ तत्त्वि

मयं वाह्यानंतत्वज्ञानंतितांकितायासिद्धिर्भगवतोज्ञा
नकलातस्याभूमिः ज्ञानकलावतार इत्यर्थः स्कं.स्तुनः १॥

सांख्यशास्त्रप्रवर्तकामेसर्गः

सर्वसिद्धांतवक्तारं भक्तेर्विषयमेव च मत्सादृश्यालरदेवं सप्तभिः श्लोकैराहुरैः प्रत्यक्षाश्चर्यहेतूक्तिः जन्मादेः कारणाद्बहत्॥ त.सु.३३ ३९९
अवताराश्चर्यतालीलामन्त्रोद्गारोरिवोकृतिः॥ नाम्नः श्रुत्यादिमाहात्म्यं नाम्नश्च हि हरेर्महत् एवं भगवत्त्वेन स्तुत्वा तेन नमस्क्रिया
॥ हरेर्कृत्यमिहेतावत् अतः स्तुष्ट इतीर्यते॥ प्रथमं तव दर्शनं दुर्लभमित्याह अथेति यद्यप्यजो महान् अथापि यद्वपुर्दध्यौ
न तु प्रत्यक्षतया दृष्टवान्॥ तस्य महत्त्वमाह जातोपि अजत्वं प्राप्तः॥ यज्जठराब्जजातः॥ यस्य नारायणस्य जठराब्जाज्जातो
माता तु भक्त्या पुत्रत्वात्मे वपुत्रेण चेन्न दृष्टः कथमाविर्भावस्यानंद इत्यत आह तत्केः सर्वस्याः कार्येणसहनिर्गमात् किंच शया
नो भगवान् सर्वैरपि द्रष्टुं शक्यते न तु योजागर्ति तत्रापि सलिले शयानः अस्पष्टतयाऽपलभ्यत इति किंच भूतेंद्रियादि

देवहूतिह॥ अथाप्यजान्तः सलिले शयानं भूतेंद्रियार्थात्ममयं वपुस्ते॥
गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः २ ॥

भिर्व्याप्तं स्पष्टमुपलभ्यते न तु तद्राहितं जगता माधारभूतं च प्रत्यक्षं च भवितुमर्हति॥ कारणं च प्रत्यक्षं भवति॥ अन्यथा
कार्यं प्रत्यक्षं स्यात् अंतः सलिले सलिलमध्ये भूतानींद्रियाणि अर्था तन्मात्रा आत्मा अंतःकरणं मनो बुद्धिरहंकारः
चित्तमिति एतैर्व्याप्तं॥ भूतैर्यद्रा पंचभिरण्डस्य चेरितिवाक्यात् पुरुषशरीरं भौतिकं भवतीति तैर्व्याप्तं तन्मयं॥ गुणानां प्रवा
हो यस्मिन् सदव्यक्तं मशेषस्यापि जगतो बीजं स्वयमजस्तु भगवानेव॥ एवमपि न दृष्टवान् मया तु दृष्टमित्याश्चर्यं २ एम० ३९९

नन्विदं रूपमन्यदेव न तु ब्रह्मस्वरूपमित्याशंक्याह स एवेति स एव भगवान् यो ब्रह्मणा ध्यातः यतो विश्वस्य सर्गादि विधत्ते॥ एतस्य ज
गत्कर्तृत्वं विश्वरूपवत्तत्र दृश्यत इति तयोक्तं गुणानां प्रवाहेण अन्योन्यमेलनपरंपरया सृष्ट्याद्यौकरणेन विभक्तवीर्यं यस्य ब्र
ह्मादिरूपेषु उत्पत्तिस्थितिप्रलयरूपं वीर्यं विभक्तमित्यर्थः॥ कर्तृत्वेपि लौकिकवन्नकर्तृत्वं किं तु चिंतामण्यादिवदित्याह अनीह इ
ति न विद्यते ईहा चेष्टा यस्य न तु चिंतामण्यादौ परेच्छानियामिका तथा भगवतापि अन्येच्छया सृष्टिकरणे जडतास्यादत आह॥
अवितथाभिसंधिरिति अभिसंधिरभिसंधानमिच्छेतियावत् सिद्धयैव करोतीत्यर्थः ननु तर्हि निमित्तं स्यादत आह आत्मेति स =
र्वजगत् आत्मा स्वरूपं समवायिकारणमितियावत् नन्वेकस्य कथं द्विरूपता समवायित्वं निमित्तत्वमिति चेत्तत्राह ईश्वर इति॥
सर्वं कर्तुं समर्थो हीश्वरः नन्वीश्वरेपि लोके युक्तिसिद्धमेव करोति न तु युक्तिबाधितमित्याशंक्य युक्तिमाह अतर्क्यसहस्रश

स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः॥ सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ३ ४
स त्वं भ्रमतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत्॥ विश्वं युगांते वटपत्र एकः शेते स्म मायाशिशुरंघ्रिपानः ४ ॥

क्तिरिति॥ अतर्क्याः सहस्रं शक्तयो यस्य॥ अत एकमाश्चर्यं समर्थितं ३ द्वितीयमाश्चर्यमाह॥ स त्वं भ्रत इति॥ स एव त्वं च तुर्दश
लोकात्मा मेमम जठरेण कथं भृतो धृतः॥ नन्वस्मादेव हेतोर्नाहं स इति चेत्तत्राह नाथेति॥ हे नाथ स्वामिन् न ह्यन्यः स्वामी भवितुम
र्हति नन्वहं तवोदरे तदा स्थूल एवस्थितश्चेत्तत्राह कथं नु यस्योदर एतदासीदिति॥ तदेव भगवद्रूपं यद्विश्वाधारं गर्भस्थितिद
शायां यदि विश्वाधारता न स्याद्ब्रह्मत्वमपि न स्यादिति तदानीमपि विश्वाधारता वक्तव्या तत्कथं जातमित्याश्चर्यं॥ एतदिति ब्रह्मांड
रूपं स्थूलं प्रदर्शितं॥ ननु परस्परविरोधे एकं त्याज्यमिति न्यायेन गर्भस्थितेर्दृष्टत्वाज्जगदाधारत्वं नास्तीति मंतव्यमिति चेत् यु
गांते वटपत्रे एक एव मायाशिशुर्भूत्वांघ्रिपानः अंगुष्ठं पिबन् यः शेते स्म स्वानिति यथा तदा बाल्यं जगदाधारत्वं चोभयमवि

Indira Gandhi National
Centre for the Arts

कतोलविष्कायाइतेन्मत्यखंव ॰

तपु२२ ४०० नन्वेतत्सर्वं चिदानंदरूपे ब्रह्मणि न तु देहभाजि मयीत्याशंक्याह॥ त्वं देहतंत्र इति एतदपि मुख्यसिद्धांतानवगमात् स्वही तलीलाविग्रह इति लोकदृष्टिः पुण्यवाक्यानि च पाप्मनां प्रशमाय आज्ञाकारिणां विभूतये यत्त्वं देह तंत्रः देहपरिकरः स्वी कृतमूर्तिः देहाधीन इति वा प्रतीत्या विभो इति संबोधनं प्रकृतोपयोगिसामर्थ्यबोधनाय· अनेन स्वेच्छया देहतंत्रत्वमित्युक्तं॥

त्वं देहतंत्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये यथा
वतारस्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये ५ ॥

नतृत्थातेि॰ स्वतंत्रस्य परतंत्रतानयुक्तेत्याशंक्याह यथावतार इति यथा सूकरादयः क्रियावतारस्तद्व्यतिरेकेण क्रियानोपपद्यत इति तथैवमवतारव्यतिरेकेण ज्ञानमपि न संभवतीति आत्मपथोपलब्धये आत्ममार्गसिद्धये ज्ञानायायमवतार इत्याह॥ एम॰ तथायमिति अनेनास्यावतारस्य प्रयोजनद्वयमुक्तं॥ सद्वृत्ता अधर्मनाश इति सामान्यं· आत्ममार्गभूतज्ञानार्थमिति ४००
विशेषप्रयोजनं ५ ॥

एवं श्लोकद्वयेन द्वितीयमाश्चर्यस्यापयित्वा रूपस्याश्चर्यद्वयं प्रतिपाद्य नाम्नि आश्चर्यद्वयमाह यन्नामधेयेति द्वाभ्यां॥ नामश्रवण दे धर्मस्य धर्मद्वारा नाममाहात्म्यं साक्षान्नाम्नश्च तत्र प्रथममाह॥ यस्य भगवतो नामधेयस्य गुरोः सकाशाच्छ्रवणं श्रवणानंतरं यदनु कीर्तनं ततश्च श्वादोपि चांडालोपि सद्यः सवनाय सोमाभिषवयोग्यत्वाय सद्यस्तस्मिन्नेव जन्मनि कल्पते कुतः पुनः तव दर्शनात् सोमा भिषवयोग्यो भवतीति किं वक्तव्यमित्यर्थः॥ श्रवणानंतरं कीर्तनकथनाद्देहस्य वरीतृया मंत्रोपदेशपर इति केचित् सद्यः सवनाये ति सर्वमेधेवायवेचांडालमितिवाक्यात्सर्याग्निकरणपर्यंतं तद्योग्यत्वमित्यपरे वस्तुतस्त्वाश्चर्यरूपं माहात्म्यमेव॥ लौकिकोपपत्त्या चेत्सिद्ध्येत् आश्चर्यमेव न भवेत् अधर्मसंस्कृतभूतविशेषैर्हि चांडालशरीरमारभ्यते सर्वोत्कृष्टधर्मसंस्कृतभूतविशेषैस्तु ब्राह्म णशरीरं नगवन्नाम्ना रीकृयामात्रेन वा सर्वान्दोषानौत्पत्तिकान्परिहृत्य तान्येव भूतान्युत्कृष्टसंस्कारेण संस्कृतानि क्रियंत इति

यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित्॥ श्वादोपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगव
न्नाम्नो युक्तमेव माहात्म्यं अनेन सर्वदोषनाशनपूर्वकसर्वगुणोपपादकत्वं नाम्नश्चोक्तं अ नु दर्शनात् ६ ॥
वणयोऽपि नानुकीर्तनेन वा श्रवणेन दोषनिवृत्तिः कीर्तनेन गुणाधानमिति वा॥ नन्वेतदत्याश्चर्यमुच्यत इत्याशंक्य केमुतिकन्या येन तदुपपादयति॥ यत्प्रह्वणाद्यत्स्मरणादिति॥ प्रह्वो नम्रीभावो नमनमिति यावत्· नम्रीभावस्याख्यानम प्रसिद्धं स्मरणात्तु वाल्मीकेः सहि चांडाल एवमार्गघातकः स्वपेहपदेशात्पूर्वं महिषभावनां कृत्वा पश्चाद्रामस्मरणेन तस्मिन्नेव जन्मनि वाल्मीकि र्जात इति न किंचिदनुपपन्नं॥ अत एव क्वचिदित्युक्तं॥ यत्र नामरूपं वा स्वसामर्थ्यं प्रकटयति तत्रैवमेवेत्यतिप्रसक्तिरपि नि वारिता॥ श्वादश्चांडालो नामधमः॥ उत्कृष्टस्योत्तमत्वेकः संदेहः इत्यपिशब्दार्थः॥ तेदर्शनात्सवनाय पुनः कुतः कल्पते पूर्व मेव तात तत्त्वादितात्राप्यौहारदेशअर्थः॥ अयवाकुत इति किमित्यर्थे अयं किं पुनर्भगवद्दर्शनात्सवनायकल्पत इति वक्त

कुतः पल्यपतेऽप्याहारार्थात् नेतेतनकारण्याहारवक्ष्तः १=

तन्नामश्रवणकीर्तनतश्च ॰

तत्सर्वमपि एवंभूतं सवनाय ... माहात्म्यं ... पृष्ठं

त॰ सु ३३
४०१

साक्षान्नाम्नो माहात्म्यं प्रतिपादयन्ती प्रह्लादवत् भगवत्स्थितिमध्यत्वात् ब्राह्मणापेक्षया श्वपचो महानिति वदन्ती युक्तिमाह ॥ अहो बतेति न चवक्तव्यं ब्राह्मणाच्छ्वपचः कथं महानिति न ह्यसौ वयं जात्याख्या चारेण कर्मणा वा श्वपचो महानिति किंतु हेत्वंतरेणैव स महानित्याह ॥ श्वपचोतो गरीयानिति प्रथमतो नाममाहात्म्यं हृदयंप्रविष्टे पूर्वं ब्राह्मणमाहात्म्यं ज्ञातवत्याः इदानीं हीनभावो अहो इत्याश्चर्यं ब्राह्मणपर्यादृष्ट्या ॥ बतेति खेदे ॥ स्वस्य ब्राह्मणभावेन एतावत्कालं खिन्नाया नाममाहात्म्ये अवगते सति बतेति हर्षे वा अतो हेतोः श्वपचो गरीयान् यतो निवृत्तोपि ब्राह्मणः स्वस्य स्वधर्माणामुत्कर्षं ज्ञात्वा कदाचिदन्यदुच्चारयेत् अभिमानादिदोषयुक्तो वा भवेत् ॥ अतस्तत्र नाम न तिष्ठेत् ॥ अतो निरंतरनामस्थानं श्वपच इति केवलं तस्यैव तथा दर्शनात् सनिरूपितो वाल्मीकिः । किंच जिह्वाग्रे

अहो बत श्वपचोतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यं ते
पुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ७ ॥

विद्यमानमपि नाम तुभ्यं त्वदर्थमेव न तु तेनापि स्वोद्धोजातायां कार्यांतरं करोति किंतु यथा सरणमकथामेव प्रकटितवान् ॥ एतन्नाममाहात्म्यमसंभावितं मत्वा युक्त्या साधयति तेपुस्तप इति ये पूर्वजन्मनि प्रथमं तपस्तेपुस्ततः शुद्धब्राह्मणजन्मनि जुहुवुर्यज्ञादिकं कृतवंतस्ततोप्युत्कृष्टजन्मनि सस्नुः सर्वतीर्थाभिगमनं कृतवंतः ॥ ततोप्यग्रिमजन्मनि आर्याः संतो जाताः ॥ वेदवेदार्थपरिनिष्ठितास्ततोप्यग्रिमजन्मनि सर्वोत्कृष्टदेहं प्राप्य व्यासवाल्मीकिशुकपराशरादिरूपा भूत्वा ब्रह्मानूचुः ॥ ब्रह्मोपदेशकर्त्तारो जाताः ॥ त एव नाम गृणंति ॥ अतः श्वपचस्यापि तथा नामग्रहणे केवलमल्पपापवशाद्भगवदिच्छया नामैव तथा जातमिति तिरस्कृत्य अयं महानेव तथा जात इति अतो युक्तमित्यर्थः १ स्क० ४०१

सनाममाहात्म्यं ज्ञापयितुं श्वपचत्वं ज्ञातमिति निरंतरनामोच्चारणाद्वसीयते अयं महानेव तथा जात इति अतो युक्तमित्यर्थः

पु० १५२

एवं भगवतो माहात्म्यं साक्षात्परंपरया चोक्त्वा अभिप्रेतार्थसिद्ध्यर्थं तं नमस्यतितमिति तं पूर्वोक्तप्रसिद्धियुक्तं त्वां तथैव परिदृश्यमानं व्यवहारे पुत्रत्वान्नमस्कारो नौचित्यमाशंक्याह ॥ परं ब्रह्मेति ॥ जीवानां मध्ये ऽयं व्यवहारः ॥ न तु परब्रह्मणि ॥ तस्य लौकिकसंबंधकृतगुणदोषो न स्तः ॥ पुमांसमिति स एव सर्वत्र पुरि वर्त्तत इति ॥ किंच ॥ उपास्यो भवानेव ॥ यतः प्रत्यक् स्रोतसं तर्मुखचित्ते सम्यग्विभाव्यो भवान् कश्चिद्धीरः प्रत्यगात्मानमैक्षदिति श्रुतेः ॥ स भवान् फलरूपः साधनरूपश्च ॥ एवं भगवदवतारत्वमुक्त्वा तत्रापि विशेषमाह स्वतेजसा ध्वस्तगुणप्रवाहमिति ॥ स्वस्यैव तेजसा चिच्छक्त्या स्वप्रकाशज्ञानेन ध्वस्तो गुणप्रवाहो देहाद्यध्यासो येन ॥ अतो मोक्षेप्सोः ज्ञानकलावतीर्णमेव सेव्य इत्युक्तं ॥ अतस्त्वमेव वंदे विष्णुमिति तस्य मूलरूपकीर्त्तनं वेदार्थरूपं वा प्रमाणमाह वेदगर्भमिति ॥ तवैव निःश्वसिता वेदा इत्यर्थः ८ एवं स्तुते मातुरभिप्रायं ज्ञात्वा प्रसन्नो जात इत्याह ॥ ईडित इति स्तोत्रमस्य

तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं ॥ स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेदगर्भं ॥
८ मैत्रेय उ० ॥ ईडितो भगवानेवं कपिलाख्यः परः पुमान् ॥ वाचाविक्लवयेत्याह मातरं मातृवत्सलः ९ श्रीभगवानु०
मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे ॥ आस्थितेन परां काष्ठामचिरादवरोत्स्यसि १० श्रीगोपालय नमः ॥

युक्तमिति ज्ञापयितुमाह ॥ भगवानिति ॥ एवमीडितः कपिल इत्याख्यामात्रं वस्तुतः पर एव पुमानिति कार्यं भगवत्त्वव्याहत्त्यर्थमुक्तं ॥ विक्लवया वाचेति ॥ तस्यां दयोत्पत्तिः सूचिता ॥ मातुः स्तोत्रमात्रमेव महदिति ॥ मातरमित्याह ॥ अयं च प्रसादः सर्वध्यानमर्यादाकृतः किंतु पुत्रकृत इत्याह ॥ मातृवत्सल इति ॥ मातरि वत्सलः ९ प्रसादमार्गमाहात्म्यक्रमेणाह मार्गेणेति हे मातः अनेन मदुक्तमार्गेण भगवद्ध्यानयुक्तयोगेन नतेकर्त्तुं सुकरेण मयोदितेनेति अन्योक्तकथने तदुक्तांगांतरापेक्षा अस्लिनवेतिसंदेहोपि भवेत् ॥ मयैवोक्तमिति नात्रान्यापेक्षा ॥ अत एव सम्यगास्थिता ऽचिरादेव परां काष्ठामसंप्रज्ञातसमाधिं ततो भगवत्सायुज्यं च अवरोत्स्यसि प्राप्स्यसीति दरः १० ॥

Indira Gandhi National
Centre for the Arts

तद्यु२३
४०२

स्वोक्तमार्गस्योत्कर्षंचाह अद्धत्वेतदिति॥फलमप्यहमेवेत्याह॥मत्थमिति॥एतन्मत्संबंधिमतंप्राप्तः ॰ णिकं॥यतोब्रह्म
वादिभिर्जुष्टं॥अवश्यंफलसाधकमित्याह॥येनमामभयंयायादिति॥येनमतेनअभयमितिख्यस्य १॰ फलत्वं॥एतन्मता
नभिज्ञास्तुमृत्युमेवस्वछंतीत्यपनिर्दिश्यापयेतदृढीकृतं मृत्युमाप्निस्तुस्वकरणादेव॥तस्माद्विधेयमंत्रांस्वार्थमेवएत
दुक्तंसर्वभावेनेत्यादिना ११ तत्रश्रद्धार्थंएतावदुक्त्वातांकृतकृत्यांज्ञात्वाततःस्वयंनिर्गतइत्याह॥इतीति॥कथनमा
त्रेणावक्तुर्माहात्म्यात्तस्याज्ञाली॰ स्वार्थज्ञानंभविष्यतीत्यभिप्रायेणाह॥भगवानि
ति॥गतिश्चोत्तानीकमनीनाम्नस्येवगतिरितिले॰॰॰॰॰॰न।त्येनेतिज्ञापितं॰तथापितदुक्तौर्थोहृदयेनिश्चितइ

अद्धत्वेतन्मतंमत्थंजुष्टंयद्ब्रह्मवादिभिः॥येनमामभयंयायान्मृत्युमृत्युमृच्छंत्यतद्विदः ११ मैत्रेयउ०॥
इतिप्रदर्श्यभगवानुशतीमात्मनोगतिं॥स्वमात्राब्रह्मवादिन्याकपिलोनुमतोययौ १२ साचापितनयो
क्तेनयोगादेशेनयोगयुक्॥तस्मिन्नाश्रमआपीडेसरस्वत्याःसमाहिता १३ ॥ श्रीगोपालयनमः

तिज्ञापयितुमाह॥स्वमात्रेति॥सापिपूर्वमार्गपरित्यज्यशास्त्रार्थदार्ढ्यातब्रह्मवादिनीजाता॥यस्त्वत्यंतंयन्मताभि
निविष्टःसव्यवहारेपितदेववदति॥तस्यचफलंमोहाभावः॥अतएवतयाप्यनुज्ञातःस्वयंतुमोहरहितःततोययौ॥
गंतव्योदेशःपश्चाद्दृश्यते तस्याःसिद्ध्यनंतरंअन्यथाफलविसंवादेसर्वमेवोक्तंव्यर्थंस्यात् १२ तस्याःसन्मार्गः
सिद्धइत्याह॥साचापीति इत्यादिविंशत्या॥योगेपरित्यागस्यानंगत्वात्स्वस्यपरित्यागाधिकाराभावात्तस्मिन्नेवाश्रमेसास्थि
तेत्याह॥साचापिपूर्वोक्तापितस्मिन्नेवस्वाश्रमस्थितातनयोक्तेनयोगोपदेशेनयोगयुक्ताजाता॥स्वगृहेयोगोनसिध्य
तीतिदूषणंतत्रनास्तियतःसरस्वत्यास्तदाश्रमआपीडंमुकुटस्थानीयं गृहमगृहंवानप्रयोजकंकिंतुविशिष्टदेशत्व

मेव समाहितेतिसावधानांतःकरणा॰ अनेनयमाऽकोः

१३ ॥ रम॰
१३ ४०२

नियमानाह अभीक्ष्णेति कुंचितकेशाअपिसंस्कारअतिरेकेणनिरंतरअवगाहेनकपिलवर्णाजाताः॥केशाअपिजटिलाश्चअ
न्योन्यश्लेषयुक्ताःपूर्वंकुटिलालकाःएतादृशान्बिभ्रतीति देहपरिकरणाप्रसंस्कारउक्तः शरीरस्याप्यसंस्कारमाह आ
त्मानमिति चकारेणदंतनखादिसंस्काराअपिनिवर्तिताः उग्रतपसायुक्तंकृशंच॥तपसैवज्ञानंभवतीतिनियमानंतरंतपो
निरूपितं तपःसांगंचेत्याह॥चीरिणमिति॥चीरवासस्येवतपःकर्तव्यमितिकृशत्वंचतस्याभिव्यंजकं १४ तस्यावैराग्यंवक्तुं
पदार्थानामुत्कर्षंवर्णयति॥प्रजापतेरितिपंचभिः अलौकिकंतदुत्कृष्टंसर्वोपकरणोत्तमं गृहंचसर्वश्रोभाढ्यंउद्यानाति
मनोहरं१मनःक्षोभप्रदंस्वस्यतादृशेमिमतीत्यजेत् अविद्यमानसंत्यागेलोकयोर्भ्रष्टएवहि ऐहिकंसुगमंनोचेत्दूरेत्य

अभीक्ष्णावगाहकपिशान्जटिलान्कुटिलालकान्॥आत्मानंचोग्रतपसाबिभ्रतीचीरिणंकृशं १४
प्रजापतेःकर्दमस्यतपोयोगविजृंभितं॥स्वगार्हस्थ्यमनौपम्यंप्रार्थ्यंवैमानिकैरपि १५ ॥

न्यस्यसाधनं २ प्रथमंतदलौकिकंगार्हस्थ्यमित्याह॥प्रजापतेर्ब्रह्मतुल्यस्यनाम्नापितुल्यस्यतपोयोगाभ्यांविजृंभितं॥
विवाहप्रभृतिविमानभोगादिकंतपोयोगाभ्यामेवजातं॥यद्यपिभगवतासंपादितंतथापित्यागेतत्त्वंनहेतुर्भवतीतितपोयो
गाभ्यामेवविजृंभितंइत्युक्तं॥गार्हस्थ्यंगृहस्थाश्रमःसपरिकरः॥अनौपम्यंउत्तरलोकानांफलरूपत्वात्किंन्नरादीनांचफल
रूपत्वात्मर्यादात्वेनतपोत्कर्षाभावाच्चब्रह्मादीनांगार्हस्थ्याभावात्गार्हस्थ्यंकर्दमस्यानुपममेव वैमानिकादीनांतत्संभ
वमाशंक्यपरिहरति प्रार्थ्यमिति नियतभोगिनांमध्येवैमानिकाउत्तमाः १५ श्रीरामनाम ॥ श्रीगोपालयनमः॥

तपोयोगकृतं ४

Indira Gandhi National
Centre for the Arts

तमु ३३
४०३

परिकरणामुत्कर्षमाह पयइति दुग्धफेनवत्कोमलाः उज्वलाउत्तुंगाः शय्याः दंतनिर्मिताः रुक्मपरिछदाः शय्याकाष्टांशाः सुवर्णे
नचित्रिताः अंतर्भागायेषांदंतानां आसनानिचकाष्टोउदीन्यपिहैमानिसुस्पर्शानिकोमलानिनानाविधानिवस्त्राणांआस्तरणानि
परिकराणिद्विविधानिभांडमयानिवस्त्रमयानिचेतिद्वयमुक्तं १६ स्वछेति स्वछानिनिर्मलानिस्फटिकमयानिकुड्यानियेषुगृ
हेषु॥कुड्यान्येववामहामरकतनिर्मितेषुचतत्रयोजितारत्नमयाः प्रदीपाआभांतिस्त्रीरहिताग्रहाश्चापिनशोभंतइतिल
लनाः स्त्रियोपिरत्नाभरणसंयुतालेषुगृहेष्वाभांति १७ गृहोद्यानमिति॥गृहोद्यानंपुष्पादिवाटिकादेवद्रुमैःकल्पवृक्षैःर
म्यंकूजतांविहंगानांमिथुनानियत्र गायंतोमत्तामधुव्रतायत्र उद्यानस्यसर्वविषयत्वप्रतिपादनाय उद्दीपनविभावत्वा

पयःफेननिभाःशय्यादांतारुक्मपरिछदाः॥आसनानिचहैमानिसुस्पर्शास्तरणानिच॥१६॥स्वछस्फटिककुड्ये
षुमहामारकतेषुच रत्नप्रदीपाआभांतिललनारत्नसंयुताः १७ गृहोद्यानंकुसुमितैरम्यंबह्वमरद्रुमैः
॥कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतं १८ यत्रप्रविष्टमात्मानंविबुधानुचराजगुः वाप्यामुत्पलगंधिन्यां
कर्दमेनोपलालितं १९ हित्वातदीप्सिततममप्याखंडलयोषितां॥किंचिच्चकारवदनंपुत्रविश्लेषणातुरा २०

यच्चपारावतादीनांकूजनंभ्रमराणांचगानमुक्तं॥१८॥यत्रप्रविष्टमिति॥यत्रविद्यमानेउद्यानेगृहेवाप्रविष्टमात्मानंदेवहूतिंवि
बुधानुचराणांगंधर्वादयोजगुः॥वाप्यांचप्रविष्टमुत्पलगंधयुक्तायांकर्दमेनचोपलालितंकर्दमसहितंचात्मानंजगुः १९ एवंगार्ह
स्थ्यंवर्णयित्वातस्यागोभगवद्ध्यानार्थएवयुक्तइतिवक्तुंकेवलशास्त्रेभगवत्स्मरणंदृष्टंनभवतीतिनिरंतरभगवत्स्मरणार्थंभ
गवदिछयाभगवत्त्वेनपुत्रत्वेनचपुत्रेस्नेहःस्थितइत्याह॥हित्वेति॥आखंडलयोषितामिंद्रस्त्रीणामीप्सिततमंतत्गृहंहि राम०
त्वापुत्रेनिर्गतेपुत्रविश्लेषेणकिंचित्कातरंवदनंचकार शास्त्रपुत्रत्वयोःसंरक्षार्थंकिंचिदितिअव्ययंक्रियाविशेषणंवा २० ४०३

नकेवलंवदनएवविकारःकिंतुहृदयेपीत्याह वनमिति पत्यौप्रव्रजितेसतिवनंचप्रविष्टेसतिप्रव्रज्यात्तुपरित्यागोलोकस्ये
तिलोकस्थितोनपरित्यागीयेतुभिक्षादिनियमाउक्ताः तत्राश्रमस्थानांतत्रपरित्यागः पूर्वसिद्धपदार्थानामेवस्वतंत्रपरित्या
गेवनवेशएवेतितदाह वनंप्रव्रजितइति अपत्यविरहेणचातुराभर्तुर्विरहोनित्यउक्तः॥वनगमनात्ततत्संगेपुत्रविरह
उक्तइतिसोपिनित्यः॥अतआतुरा॥ननुशास्त्रज्ञानेनदेहाध्यासेनिवृत्तेविरहद्वयंनबाधकंइतिचेत्तत्राह॥ज्ञाततत्त्वेति॥ज्ञा
ततत्वमात्मनोययाएतादृश्यपिपुत्रेदूरंगतेवत्सेनष्टेगौरिवव्याकुलाज्जाता॥यतोवत्सलापुत्रस्नेहाधिक्ययुक्ता २१ अयं
स्नेहस्तस्याउपकारायजातइत्याह॥तमेवेति॥तमेवपुत्रंभगवंतंयोगेध्यायती अचिरतःशीघ्रमेवतादृशेगृहेनिःस्पृहा

वनंप्रव्रजितेपत्यावपत्यविरहातुरा ज्ञाततत्त्वाप्यभून्नष्टेवत्सेगौरिववत्सला॥२१॥तमेवध्यायतीदेव
मपत्यंकपिलंहरिं॥बभूवाचिरतोवत्सनिस्पृहातादृशेगृहे॥२२॥ध्यायतीभगवद्रूपंयदाहध्यानगोचरं॥
सुतःप्रसन्नवदनंसमस्तव्यस्तचिंतया २३ श्रीकृष्णायनमः ॥ ॥ श्रीगोपालयनमः ॥

जाता॥यतःसहरिःस्पृहाचदुःखात्मिका-वत्सेतिविदुरसंबोधनं त्वयाप्येतत्कर्तव्यमितिबोधनार्थंपरित्यागलक्षणंवैरा =
ग्यंप्रकृतेनात्मीतिस्पृहाभावएवोक्तः २२ नकेवलंभगवद्ध्यानेनगृहासक्तिःसिद्धाकिंतुयोगोपिसिद्धइत्याह॥ध्याय
तीति॥सुतोयदाहभगवद्रूपंसर्वेषामेवयोगिनांध्यानगोचरं॥सुतएवभगवानितिसुतंध्यायतीसुतंइतिवापाठः॥प्रस
न्नवदनमिति तस्यध्यानेभगवान्प्रसन्नएवाभिव्यक्तइतिकार्यसिद्धिसूचनार्थंप्रसादउक्तः॥समस्तव्यस्तप्रकारःध्या २३
नेनउक्तइतितथैवाह॥समस्तव्यस्तचिंतयेति॥समस्तचिंताप्रसन्नवदनांभोजमिति॥व्यस्तचिंतासंचिंतयेद्भगवतइति

Indira Gandhi National
Centre for the Arts

त्मुः ३३ | ४०४ तादृशध्यानेनयदासीत्तदाह॥भक्तिप्रवाहयोगेनेतिचतुर्भिः।चित्तशुद्धेःसाधनानिकार्यंशुद्धस्यचेतसः॥ज्ञानस्याप्युत्तमावस्था
दोषाभावश्चसर्वतः १ भगवच्चिंतनेनक्रमेणपरमावस्थांप्राप्तवतीतिवक्तुंचिंतनेनजातंक्रममाह॥आदौभक्तिप्रवाहोजा
तः॥सचोपायभूतइतियोगः॥ध्यानेनप्रथमंभक्तियोगोजातइत्यर्थः॥भक्तेःप्रवाहनित्यतैवेतिप्रवाहपदं॥ततोदृढंवैराग्यं
॥ततोभगवद्धर्मेषुपरमश्रद्धयापरलोकेयुक्तंयदनुष्ठानजातंनिष्ठितधर्मरूपंतदनंतरंब्रह्मप्रापकंज्ञानं एतावतास्या

भक्तिप्रवाहयोगेनवैराग्येणबलीयसा॥युक्तानुष्ठानजातेनज्ञानेनब्रह्महेतुना ३४
विशुद्धेनतदात्मानमात्मनाविश्वतोमुखं॥स्वानुभूत्यातिरोभूतमायागुणविशेषणं ३५

धनत्रयसहितेनज्ञानेनचित्तमत्यंतंशुद्धंभवति ३४ तदाशुद्धचित्तकार्यमाह विशुद्धेनेति॥तदेति-तदेवशुद्धिः॥तज्ज्ञा
नात्पूर्वंचित्तंशुद्धंभवतीत्युक्तं॥अतोविशुद्धेनात्मनाआत्मानंध्यायतीजातेतिपूर्वेणैवसंबंधः॥संसारावस्थातःत
दानींतनमात्मानंविशिष्टमाह विश्वतोमुखमिति पूर्वमात्मात्हृदयाभिमुखःशरीरप्रवणःविशुद्धेचित्तेसर्वतो
मुखतात्मानंदृष्टवतीसर्वत्रविद्यमानःसर्वतोमुखः पूर्वंचाविद्यावच्छिन्नोदेहाभिमानीसांप्रतंचतद्रहितमित्याह॥ स्वम॰
स्वानुभूत्यातिरोभूतामायाप्रकृतिःतद्गुणाःसत्वादयःतद्विशेषाःतत्कार्याणिपरिच्छेदादयोयस्य ३५ ॥ ४०४

ब्रह्मणीति आत्मज्ञानेप्रादुर्भूतेमायागुणकार्याणिलीयंतइतिअविद्यातत्कार्यविलयेब्रह्मण्येवस्थितासाजातेत्याह ब्रह्मण्येव
स्थितमतिरिति तदेवब्रह्मस्वरूपंध्यायतीभगवानितिततोज्ञानवतीततोपिसभगवान्ध्यानेनापेक्ष्यतेकिंतुआत्मन्येवब्रह्मस्थित्ये
वसम्यगाश्रयोयस्यतादृशंज्ञातवती॥एवंब्रह्मस्मिन्भगवत्स्फुरणेजीवभावोनिवृत्तइत्याह॥निवृत्तेति॥आधाराधेयभावोपिनिवृत्तः
स्वस्यपरिच्छेदेपितिरोहितानंदत्वंजीवभावःप्रकटानंदःस्वयमेवभगवान्जातइत्यर्थः॥एवंसत्यविद्यादयःसर्वेक्लेशाःक्षीणाभवंति॥
क्लेशेषुचनिवृत्तेषुपरमानिर्वृतिःप्राप्यते॥प्राप्यंरूपमधिकारतीतमितिज्ञानार्थप्राप्तेपिभगवद्रूपेपुनर्निर्वृतिरुक्ता॥ब्रह्मभा
वेपिवाआधाराधेयभावःस्थितएवमध्यावस्थावाएषा- २६ निर्वृतोजातायांइंद्रियैःपुनरनयनापेक्षाभावात्नित्यारूढसमा
धिर्जाता नित्यारूढेति नित्यमारूढःसमाधिर्यया।सादेवहूतिर्नित्यारूढसमाधिःतस्याभावकथनंतत्स्थैर्यार्थं॥एवंसमाधिदा
ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः २६ नित्यारूढसमाधित्वात्
परावृत्तगुणभ्रमा॥नसस्मारतदात्मानंस्वप्नदृष्टमिवोत्थितः २७ तद्देहःपरतःपोष्योप्यकृशश्चाध्यसंभवात्॥ब
भौमलैरवच्छन्नःसधूमइवपावकः २८ ॥

दोषपरावृत्ताःगुणैःकृताभ्रमायस्याः॥आनंदतिरोभावस्तमसःपरिच्छेदोरजसःभेदःसत्वस्येतित्रयोपिनिवृत्ताः॥एवंसत्यध्यासाश्रयभूतस्यदेहस्यापिस्फुरणंसर्वदोषहेतुर्नजातमित्याह॥नसस्मारेति॥
स्वप्नदृष्टंदेहंयथाउत्थितःअहमितिनमन्यतेतदपेक्षयापिदमंदेहमात्मानंनसस्मारस्मृतवत्यपिन २७ ननुदेहास्मरणेकथंदे
हास्थितिरित्याशंक्यापरिहरन्नतस्यदेहस्यअंतर्बाह्यप्रकाशेनप्रकाशमानत्वमाह तद्देहइति॥परतःयोगनिर्मितस्त्रीभिःपोषि
तोप्यकृशः बहिर्वस्त्रादिनेवपोषोनतुभोजनकृतः तथापिनकृशः तत्रहेतुःआध्यसंभवादिति॥आधिर्मनःपीडा मनसःप्र
र्वमेवजितइतिदेहदृष्टिश्चनापेक्षतइतिकेवलमनःपीडयैवदेहकार्श्यंभवतीतितदभावादकृशः॥चकारात्कांतिनाशासंभवश्च
अंतःस्थितज्ञानेनबहिःस्थितमलेनच ततोदृष्टिगोचरो॥इत्युपमेकत्वमाधार्यंदर्शितः॥सधूमइवपावकइति॥अंतः

॥ प्रज्वलितोप्यनिर्वाहितःस्तद्धूमकः॥ तादृशोज्ञानं
यतः फलपर्यन्तमलितो बभौ २८

कदाचिदुत्थानदशायां देहं स्मरिष्यतीत्याशंक्याह त्वांगमिति तपोयोगाभ्यामाप्तंमुक्तकेशमिति दैवगत्याकेशविमोकेपि
त·मु·३३ ४०५ वस्त्रविमोकेपिस्त्रीणां लज्जयाऽत्यावश्यकेपि निभिन्ने देहं नबुबुधे स्थितिस्तु दैवाधीनेत्याह दैवगुप्तमिति अबोधेहे
तुः वासुदेवे प्रविष्टा धीर्यस्याः २९ एवंतस्यावाह्याभ्यंतरव्यवस्थामुक्त्वाऽऽन्तरं फलितमाह एवमिति सा देवहूतिः कपिलोक्ते
नमार्गेण भक्तिज्ञानयोगात्मकेन अचिरतः शीघ्रमेव परमात्मानं ब्रह्मानंदं भगवंतं शास्त्रप्रतिपाद्यमवाप· हेत्वाश्चर्यै स्त्रियामु
क्तिर्दुर्लभेति ३० तस्यामुक्तिः सर्वजनीनाज्ञातेति हेत्रप्रसिद्ध्या निरूपयति॥ तद्वीरासीदिति वीरेति संबोधनं तयाशौर्यकर
णार्थस्वधर्मप्रतिपादनेन। दिस्थासार्थवाक्येत्रं नाम्नासिद्धपदाख्या सिद्धपदं पुण्यतममासीत् त्रैलोक्यविश्रुतमितितन्मुक्तेवेति
त्वांगंतपोयोगमयंमुक्तकेशंगतांबरं दैवगुप्तंनबुबुधेवासुदेवप्रविष्टधीः २९ एवंसाकपिलोक्तेनमार्गेणाचिर
तःपरं॥ आत्मानंब्रह्मनिर्वाणंभगवंतमवापह ३० तद्वीरासीत्पुण्यतमंक्षेत्रंत्रैलोक्यविश्रुतं नाम्नासिद्धपदं
यत्रसासंसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमार्त्यमर्त्यमभूत्सरित् स्रोतसांप्रवरासौम्यसिद्धिदासिद्ध
तन्मुक्तौप्रमाणं॥ अन्यथासर्वेषुतीर्थेषुविद्यमानेषुतस्यैवकथमसिद्धिः स्यात्॥ अतः प्रसिद्धिहेतुमाऽऽसेविताः ३२
ह सासंसिद्धिमुपेयुषीति॥ साहि सम्यक्सिद्धिमुपेयुषी प्राप्तवती ३१ शरीरस्यविनियोगमाह तस्याइतितयोगेनवि पोर
धुतंमार्त्यं मर्त्यं शोयस्य। जलमेवहिघनीभूतंमद्भवतियथाहिमं यथावाकरका· यथावासैंधवः॥ योगीश्वरोत्मकं वा मह
तातापेन तद्विशकलितंभवति॥ अतएवतादृशं मर्त्यं तत्सरिदभूत् सास्रोतसिसरस्वत्याः प्रविष्टास्रोतसांप्रवरासरस्व त्म· ४०५
त्येवाभूत् सौम्येतिसंबोधनंविश्वासार्थं यथावासोमः अमृतमयः पानेविशकलितावयवोभवति॥ नवमाः सोमक
लायाः पातायमद्रति॥ ततः प्रभृतिसरस्वतीसिद्धिदाज्ञातातत्रैव अतःसिद्धसेविताज्ञाता ३२ ॥ श्रीगोपालयनमः

एवंतस्याः सर्वसिद्धिमुक्त्वास्त्रीमुक्त्यवधिभूतां सर्गलीलां समाप्य तस्यसर्गस्यविसर्गसाधकत्वएवसर्गत्वं सेत्स्यतीत्युत्तरोपयो
गार्थं कपिलस्य स्थितिमाह कपिलोपीतित्रिभिः गतिः स्तोत्रं प्रतिष्ठा च त्रयमाह गुणान्वितं तत्रप्रथमं गतिमाह महायो
गी गमने प्रयासरहितः मातुः सिद्धिं च ज्ञात्वा अग्रे कर्तव्यमपिजानातीति भगवानितिसर्गनियामकत्वे हेतुः॥ पितुराश्रमा
न्मातरमनुज्ञाप्य प्रागुदीचीं दिशं प्रतिययौ॥ एषावैदेवमनुष्याणांशांतादिक् ३३ गमने सिद्धानां स्तोत्रमाह सिद्धेति॥

कपिलोपिमहायोगीभगवान्पितुराश्रमात् मातरंसमनुज्ञाप्यप्रागुदीचींदिशंययौ ३३
सिद्धचारणगंधर्वमुनिभिश्चाप्सरोगणैः॥ स्तूयमानःसमुद्रेणदत्तार्हणनिकेतनः ३४ आस्ते
योगंसमास्थायसांख्याचार्यैरभिष्टुतः त्रयाणामपिलोकानामुपशांत्यैसमाहितः ३५ ॥

येकिंचित्सिद्धिकामुकाः तेभागवदंशाः षड्विधानिरूपिताः॥ चारणावासुकिप्रभृतयः गणैरितिपाठेअप्सरसांगणाः येषां
तेइंद्रादयः तैः स्तूयमानः॥ यत्रगच्छतितेनापिपुरस्कृतइत्याह समुद्रेणदत्तेअर्हणनिकेतनेयस्य ३४ एवंतस्यगमन
मध्यस्थितीनिरूप्य तत्रस्थितस्यकृत्यमाह॥ आस्तइति॥ योगंसम्यगास्थायसम्यगास्ते॥ तत्रस्थितोद्वयंकृतवान्॥ सांख्यम
तप्रवृत्तिं त्रयाणामपिलोकानामुपशांत्यर्थंमुभाशंसनंच॥ अतः सांख्याचार्यैः स्तुतः ३५ श्रीगोपालयनमः ॥

Indira Gandhi National
Centre for the Arts

त·सु३३ ४०६ एवंतावच्चरित्रमुक्त्वोपसंहरति एतन्निगदितमिति॥कपिलस्यचरित्रंएष्टंतन्निगदितंसंवादोपिपावनइतिनिगदितः
॥एतस्यद्वितीयसर्गरूपत्वात्सर्गोपिनिगदितइत्यर्थः॥चकारद्वयेनद्विविधोपिसर्गउपसंहृतः ३६ एतच्चरित्रश्रवण
फलमाह यइदमनुशृणोतीति॥कपिलमुनेर्मतंसांख्यंआत्मयोगेध्यात्मपामुपायेषुगुह्यंगोप्यंअनुशृणोतीतिशि
ष्यरूपेणानतुप्रभुरूपेण·योभिधत्तेसम्यक्शिष्यहृदयेस्थापयतितावुभावपिभगवतिकृतबुद्धी॥तस्मिन्नेवसुपर्णके
तोगरुडध्वजेकालातिक्रमार्थंशास्त्रपर्यवसानार्थंचतादृशोनिश्चितबुद्धीतत्पदारविंदमुपलभेते॥एतस्मतस्यश्रव

एतन्निगदितंतातयत्पृष्टोहंत्वयानघ॥कपिलस्यचसंवादोदेवहूत्याश्चपावनः ३६
यइदमनुशृणोतियोभिधत्तेकपिलमुनेर्मतमात्मयोगगुह्यं भगवतिकृतधीः सुप
र्णकेतावुपलभतेभगवत्पदारविंदं ३७ इतिश्रीभागवतेमहापुराणेतृतियःस्कंधे
त्रयस्त्रिंशोध्यायः॥

णंभगवतिमतिनिश्चयार्थं·यत्रैतन्मतश्रवणेपिभगवत्पदप्राप्तिर्भवतितत्रकिंव
क्तव्यंतन्मतानुसारेणप्रवृत्तस्यसंपूर्णसर्गलीलाश्रोतुर्वा॥तृतीयस्कंधविवृतिःश्रीकृष्णचरणांबुजे॥निवेदितातिप
त्नेनसर्वसिद्धांतगुंफिता १ मुक्तेषुभक्तिहृदयेषुनिवेदयामिसर्गाभिधायदियथार्थतयाविचिंत्य॥लीलासदेवम राम० ४०६
तियुक्तिभिरन्वितांगीभाव्यातदाविवृतिरुज्वलमुक्तियुक्ता २ सर्वभक्तसमुद्धारेसर्वार्थोत्पादकंहरिं त्रयस्त्रिंश
त्सर्गयुतंवंदेसर्गात्ममाधवं ३ ३७ ॥

तसु·३३ ४०७ इतिश्रीभागवतसुबोधिन्यांश्रीमद्वल्लभदीक्षितवि
रचितायांतृतीयस्कंधविवरणेत्रयस्त्रिंशाध्यायविव
रणम्॥ ॥तृतीयस्कंधसुबोधिनीसंपूर्णा॥ ॥संवत १८
५८ समयेज्येष्ठमासेशुक्लपक्षेतृतीयायांरवौपुस्त
कंसंपूर्णम्॥ यादृशंपुस्तकंदृष्टंतादृशंलिखितंम
या॥यदिशुद्धमशुद्धंवाममदोषोनदीयतां ॥१॥
नागर्त्वाऽपरज्ञातीयप्रश्नवराव्याप्तोपाख्यस्यद
यानाथस्येदंपुस्तकम्॥इसखतसंकरकाश्राध्ये
देउआपरगनेभुइली श्रीवल्लोयतितराम् ॥ राम० ४०७

Indira Gandhi National Centre for the Arts

श्रीहर्षो जयति जयंति श्रीमदाचार्यवाचोर्थामृतवर्षिणोः पुमर्थादिगतभ्रांतितापो याभिर्निवारितः नन्विहानादौ संसारे केचन लोकायतिका
स्त्यागभोगं जनप्रशंसंति॥ अन्येपुनः स्वार्थमैश्वर्यादिकमेवबमन्यंते वदंति च। नमोस्तु राज्यवृक्षाय षाड्गुण्यगुरुशाखिने। सामादिचारुपुष्पाय त्रि
वर्गफलदायिने इति। अपरे कीर्त्यर्थमेव यतंते वदंति च। यावत्कीर्त्तिर्मनुष्यस्य पुण्यालोकेषु गीयते। तावद्वर्षसहस्राणि पुण्यलोकेषु महीयते इति॥
केचन पुनः कामानेव साधयंति वदंति च। शरीरस्थितिहेतुत्वादाहारस्य धर्मेणोहि कामाः फलभूतास्तु धर्मार्थयोरिति। तथेतरे स्मार्ताचारा
रं वदंति। चाथ धर्मश्चार्थश्च कामश्च सकिं मर्धनसेव्यत इति। आचारप्रभवो धर्म इति। शौचाचारविहीनानां समस्तानिष्फलाः क्रियाइति। अन्ये तु धर्म
एक प्रवर्त्तते वदंति च। मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेति। केचन तपसा तपसा देवादे
व मयं प्रायन्नित्याम्रुतेः। तथान्ये सांख्ययोगविदः संन्यासस्य शमदमादिषु। न्यास इत्याहु मनीषिण इति। सत्येन वामुपवातीति। शमेन शांताः शि
शिवमाचरंतीति॥ दमेन दांताः किल्बिषमवधून्वंतीति श्रुतेश्च। इतरे शिवमुपासंते चविष्णुं। तेतस्तत एव सकलां सिद्धिं मोक्षं चा

१) सिद्धतेभ्यो
१) वागुरुवक्तेभ्यो
३) गणनाथवक्तेभ्यो
१) अगस्त्यवक्तेभ्यो
१) जगजीवनतेभ्यो
१) रामचंद्रतेभ्यो
१) श्रावचंद्रतेभ्यो
१) जीवनरामतेभ्यो
१) मानतेभ्यो
१) तेथोवाई
गोविंदतलसीव
श्रीप्रेतो

…दिदाहित्तिचौलकर्मनीमितीमाघसु
दिपंचमीसंवत१८५६

१) श्रीदागलोनदडेचीरुपयावनुखाडतीनआनानीशाफवनु
३॥) तिनीसाडातीरुपयानी

पातलीदनाशगवासा
१५टका

३) तीनरुपानुवीग्रहशांतिजनवी
) नगारचीनरकरुका
२॥) शालके जीनेआही
॥) नादवेनेअचलो
३॥) टकासाडातीरुपयानाग्रहशातिनदाड
४ चौरटकाछोगागोनदाडमजुरन
४ चारटकानीछअवली
४ चारटकावीजदाडमजुरन
५ [illegible] चारबीजा[illegible]
चार[illegible]
[illegible] यान
[illegible] कनवकेलो[illegible]
वगीप्रावयलीना
रुपया१
नरुपयाविअना[illegible]
[illegible]नरुपयावेनीमुगामाई
जेगीनामालोदसनाना
गंगाजणाजीनेदाउ
[illegible]

एकरुपया१)
दुध्यवालीनीटकासाढसात
दरजीनेअधटीआना
चासणीवालानटकासात

Indira Gandhi National
Centre for the Arts